CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

RajGuru Math, Shivala, Varanasi Collection.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

।। श्रीमदभिनवचन्द्रेश्वरो विजयतेतराम् ।।

श्री कैलासविद्यालोकस्य सप्तचत्वारिंश (४७) सोपानः

श्रीमत्परमहंसपरिव्राजकाचार्यचित्सुखाचार्यमुनिना विरचिता

प्रत्यक्तत्त्वप्रदीपिका

(चित्सुखी)

परमहंसपरिव्राजकाचार्यश्रीकैलासपीठाधीश्वरेण

आचार्यमहामण्डलेश्वरेण श्रीमत्स्वामिविद्यानन्दगिरिणा

वेदान्त-सर्वदर्शनाचार्येण विरचितया

छात्रतोषिणी-टीकया

परीक्षाब्धिसन्तरण्या

अष्टोत्तरशतन्यायमालया

च समलङ्कृता

* * *

। साचेयम् :

श्रीमता स्वामिभास्करसंविद्गिरिणा

सम्पादिता

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रकाशक:—

श्रीकैलासविद्याप्रकाशनम्, हृषीकेशः (उ०प्र०)
(श्रीब्रह्मविद्यापीठकैलासाश्रमदशमपीठाचार्यपट्टाभिषेक-
रजतमहोत्सवप्रसङ्गे प्रकाशितः)

[अस्य ग्रन्थस्य सर्वाधिकारः प्रकाशकेन स्वायत्तीकृतः]

प्रथम-संस्करणम्
१०००

शाङ्कराब्दः १२०६
वि० सम्वत् २०५० सन् १९९३

मूल्यम्
१२०–रुप्यकाणि

ग्रन्थ-प्राप्ति-स्थानानि—

श्री कैलास आश्रम, मुनि की रेती, हृषीकेश २४९ २०१——फोन : ३०५९८
श्री दशनाम संन्यासाश्रम, भूपतवाला, हरिद्वार २४९ ४०२
श्री कैलास विद्यातीर्थ, ६ भाई वीरसिंह मार्ग, नई दिल्ली-११० ००१
श्री कैलास धाम, नई झूसी, प्रयागराज, इलाहाबाद २२१ ५०६
श्री दक्षिणामूर्ति संस्कृत महाविद्यालय, मिश्रपोखरा वाराणसी २२१ ००१
श्री चौखम्बा विद्या भवन चौक, वाराणसी २२१ ००१
श्री चौखम्बा विश्वभारती चौक, वाराणसी २२१ ००१

मुद्रक:—
श्री कैलास विद्या प्रकाशनम्, ब्रह्मानन्द आश्रमः, मुनि की रेती, हृषीकेशः ।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ॐ

KAILAS VIDYA PRAKASHAN SERIES—४७

PRATYAKTATTWAPRADIPIKA (CHITSUKHI)

OF

PARAMAHANSA CHITSUKHACHARYA

With the Commentary

CHHATRATOSHINI

BY

Vedanta Sarvadarshanacharya Kailasa Peethadheeshwara Acharya Mahamandaleshwara

SWAMI VIDYANANDA GIRIJI MAHARAJ

Also with

PAREEKSHABDHI SANTARANI

And

ASHTOTTARSHATANYMALA

EDITED BY

SWAMI BHASKAR SAMVIT GIRI

PUBLISHED BY

KAILAS VIDYA PRAKASHAN, RISHIKESH

1993

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सम्पादकीयम्

अथ खलु विदन्त्येतद्विद्वांसः श्रुतिशिखोत्थशाङ्कराद्वैतसिद्धान्तमपलिलप्सया प्रयतमानानां दुर्धियां मुखविमर्दनाय सम्यक्प्रतिपित्सूनां च महद्धिताय श्रीमच्चित्सुखाचार्यैस्तत्त्वप्रदीपिकेयं विरचिता। तदुपरि च प्रत्यक्स्वरूपभगवता कृता नयनप्रसादिनीति सुप्रसिद्धा टीकैव दरीदृश्यतेऽद्यावधिर्नान्या टीकोपलभ्यते । कालक्रमदुष्प्रभावेण पाश्चात्त्यम्लेच्छप्रवृत्तिप्राबल्येन च मन्दविवेकिनोऽपि बुद्धि-मान्द्यादिदोषेणास्माकं भारतीयसंस्कृतिं प्रति वैमुख्यं वरीवृध्यन्ते । यतोहि सम्प्रति संस्कृतस्य पठनं पाठनं च विरलताङ्गतम् । कानिचिदध्यात्मशास्त्राण्यपि क्वचिदंशतो विश्वविद्यालयेषूपेक्षितानि विद्यन्ते । यथाद्यादिनश्चतुरोऽध्यायान् विहाय छान्दोग्योपनिषत् परीक्षायां निर्धारिता, ब्रह्मसूत्रस्य साधनाख्यस्तृतीयोऽध्यायः सम्पूर्णं परीक्षातो निष्कासितः । तथैवास्य शाङ्कराद्वैतसिद्धान्तस्य परि-रक्षितुः तत्त्वप्रदीपिकाग्रन्थरत्नस्य केवलप्रथमपरिच्छेदो हि परीक्षायां निर्धारितो वर्तते । अनया चाधुनिकया प्रणाड्याऽस्माकं मूलसंस्कृतिर्लुप्तप्राया भविष्यतीति ।

नयनप्रसादिनीटीकाया दुर्बोधता मूलान्नातिरिच्यते इति विपश्चिद्भिर्नानवगता । अतः समग्रस्य तत्त्वप्रदीपिकाग्रन्थस्यावलोकनं परीक्षार्थिनां मुमुक्षूणां च कृते सुलभं स्यादिति निश्चित्य सहृदयाचार्य-प्रवरविद्वद्वरिष्ठैः पदवाक्यप्रमाणपारावारीणैराचार्यमहामण्डलेश्वरैः श्रोत्रियब्रह्मनिष्ठैः स्वनामधन्यैर-नन्तश्रीविभूषितैः श्रीमत्स्वामिविद्यानन्दगिरिजीमहाराजैः श्रीकैलासाश्रमस्य दशमपीठाधीश्वरैः तत्त्व-प्रदीपिकायाश्छात्रतोषिणीति नाम्नी टीकात्यन्तमहत्त्वपूर्णा विरचिता। एवं चान्वर्थाटीका प्रदीपवत्पदा-र्थान् प्रकाशयन्ती छात्राणामध्यापकानां चोभयेषामपि मनांसि मोमोदयति । अस्यां च टीकायां तोषिणीकारैःशास्त्रार्थांशं विहाय स्वल्पशब्दैः सुस्पष्टतया मूलग्रन्थस्य प्रतिपदव्याख्यापूर्वकं भावार्थो निर्देशितस्तेनाध्येतॄणामध्यापकानां प्रविविक्षूणां च कृतेऽनयाटीकया महदुपकारो भविष्यतीति । अतस्तोषिणीकाराः स्वीय पाण्डित्यमप्रदर्श्य मुमुक्षुभिर्येन केन प्रकारेण शास्त्रावगतं स्यादिति बुबोधयि-षया प्रासादिकं प्रयासं कृतवन्तः । अस्याश्च टीकाया व्याजेनान्यत्रापि निबन्धानकार्षुः; यथा तत्त्वप्रदीपि-कायाः "परीक्षाब्धिसन्तरणी" (प्रश्नावली) "संकलिताष्टोत्तरशतरान्यायमाला," व्याप्तिपञ्चकस्य छात्रतोषिणी टीका, सिद्धान्तलक्षणस्य छात्रतोषिणी टीका चेति ।

छात्रतोषिणीसंस्करणं पाठकानां समक्षे प्रस्तूयतेऽधुना । ये विद्यार्थिनः सटिप्पणसंस्करणं-न वाञ्छन्ति, तेषां सौविध्यायेयं मूलेन सह तोषिणी प्रकाशिता । अत्र परिशिष्टे "परीक्षाब्धिसन्तरणी" अष्टोत्तरशतन्यायमाला, मूलकारिका पाठश्च संयोजिताः; तेन परीक्षार्थिनां कृते सौविध्यं भविष्यतीति । इतः पूर्वं विगतवर्षे सटिप्पणसंस्करणस्य प्रथमो भागः डा. स्वामी देवानन्दगिरिणा सम्पादितः । ऐषमश्छात्रतोषिणीसंस्करणस्य सम्पादनकार्यभारं मदीयबलहीनस्कन्धयोः संस्थाप्यास्माकमाचार्यपादाः माम-नुगृहीतवन्तः । शोध्यपत्रसंशोधने च स्वामी सद्योजातसंविद्गिरिः ब्र० सूर्यचैतन्यश्च साहाय्यं दत्तवन्तौ ताविमौ भगवताऽभिनवचन्द्रेश्वरेणाचार्यपादेन चानुगृहीतौ भूयास्ताम । श्री-कैलासविद्याप्रकाशनस्या-धिकारिणा विद्वद्वर्येणास्य संस्करणस्य प्रकाशने महता प्रयत्नेन पाठकानां कृते स्वच्छमुद्रणादिना व्यव-स्थितपाठादिना च सौविध्यं सम्पादितं, तदर्थं तत्कृते विद्यां कीर्तिं च कामये । किञ्च कृतप्रयत्नेऽपि दोषाणामवश्यं भावित्वाद्विपश्चिद्वर्यैः क्षन्तव्योऽहमिति प्रार्थये—

प्रमादाद् दृष्टिदोषाद्वाऽशुद्ध्याद्ययोऽपि दोषाः स्युः ।
भो प्राज्ञास्तानेतान् सर्वान् क्षमेरन्नित्यहमभ्यर्थये ।।इत्यों शम् ।।

विद्वद्विनेयो भास्करसंविद्गिरिः

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

द्वादशदर्शनवेत्सरिणामाचार्यमहामण्डलेश्वराणां

श्रीमत्स्वामिकाशिकानन्दगिरिमहाभागानां

प्रस्तावना

"आत्मा वा अरे द्रष्टव्य" इत्येवं परमपुरुषार्थोपयिकमात्मदर्शनमभिधाय तत्साधनविधया "श्रोतव्यो मन्तव्यो निदिध्यासितव्य" इत्येवं श्रुत्या श्रवणमनननिदिध्यासनानि यान्यादेशिषत, तत्र षडभिर्लिङ्गैः समस्तैर्व्यस्तैर्वा यथासम्भवं मिलितैरुपनिषदामद्वैते ब्रह्मणि तात्पर्यावधारणलक्षण-श्रवणस्य उपनिषदध्ययनसमय एव सम्पन्नत्वेऽपि बहुषु स्थलेषु संशयावस्थितेः समन्वयाध्यायेन प्रमाणसंशयनिराकरणं भगवता बादरायणेन शारीरके व्यधायि। निदिध्यासनसाधनोपासनादि-विषयकविचारश्च तृतीयेन साधनाध्यायेन समसाधि। फलभूतं कैवल्यं च फलाध्यायेन तुरोयेण न्यरूपि। किन्तु श्रुतीनामद्वैतकथनपरत्वेऽपि प्रमेयं वस्तु तथैव वाऽन्यथा वेति संशयो न निशातितः। यद्यपि सोऽपि मननात्मकेनाविरोधाध्यायेन भगवता बादरायणेनैव पराकारि, तथापि तार्किकैर्नूतन-तरतर्कशैलीमवलम्ब्य बादरायणपराकृता अपि परपक्षाः पुनरुज्जीविता इति प्रमेयसंशयोऽपि जिज्ञासूनां पुनरुत्थित इति समये समये तत्संशयनिराकरणाय करुणैकपरायणाः परवर्त्तिनः परःशता आचार्याः प्रायतिषत। न च गुरुवेदान्तवाक्येषु विश्वासलक्षणश्रद्धाया अधिकारिविशेषणसाधन-चतुष्टयान्तर्गततयाऽथशब्दनिर्दिष्टसाधनचतुष्टयवतः श्रोतुः कथं श्रुतिप्रतिपादिताऽद्वैतविषयकसंशय-सम्भव इति शङ्कितव्यम्; श्रुतेरद्वैतार्थविषयकत्वनिश्चयेऽपि तदद्वैतप्रतिपादनमुपासनार्थमेवेति द्वैत-वादिभिः साभिनिवेश निरूपणाद् बहूनां तत्र संशयोद्भवसम्भवात्। आहुर्नैयायिकादयः—"अभेद-भावनयैव यतितव्यमिति वदति" इति। उपासनायां हि वस्तुनस्तथात्वनियमो नास्त्येव। शालग्राम-शिलादिषु विष्णुत्वाद्यारोपेणोपासनादर्शनात्। ततश्च वस्तुनस्तत्त्वं तथैवान्यथा वेति प्रमेयसशयः श्रुतश्रुतीनामपि विहितबहुतरमनननानामपि जायते किं पुनरन्येषामिति तन्निराकरणार्थं यत्नः सार्थक एव भगवतो बादरायणस्य परवर्त्तिनां चाचार्याणामिष्टसिद्धि-नैष्कर्म्यसिद्धि-ब्रह्मसिद्धि-न्यायमकरन्दा-द्वैतसिद्धिप्रभृतिप्रकरणग्रन्थकर्तृणां प्रकृतग्रन्थस्य तत्त्वप्रदीपिकाख्यस्य प्रणेतुः श्रीमच्चित्सुखाचार्यस्य च। तदुक्तमत्रैव—

विप्रतिपत्तिव्रातध्वान्तध्वंसप्रगल्भवाचाला।
क्रियते चित्सुखमुनिना प्रत्यक्तत्त्वप्रदीपिका विदुषा॥ इति प्रमेयसंशयतया एवात्र विप्रतिपत्तिव्रातशब्देन मुख्यतयाऽभिहिताः। तन्निराकरणस्यैव विशेषेणात्रोपलम्भात्।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सौगतप्रभृतीनां नास्तिकानां प्रमेयसंशयोद्भावकानि मतानि शङ्करभगवत्पादैरेव दुरपलपयुक्तिकलापैः समूलमुन्मूलितान्यासन्निति तन्निरासप्रयासो न परवर्त्तिषु ग्रन्थेषु बहुलमुपलभ्यते। वस्तुतस्तु युक्तिमात्रेण नास्तिकमतनिर्मूलनोक्तिर्नियुक्तिकैव प्रतिभाति। तर्काऽप्रतिष्ठानतायाः सूत्रकारैरेव निर्दिष्टत्वात् "यत्नेनानुमितोऽप्यर्थः कुशलैरनुमातृभिः। अभियुक्ततरैरन्यैरन्यथैवानुमीयते" इति प्रसिद्धेश्च नास्तिकैर्युक्त्यन्तरेणास्तिकमतनिराकरणस्य सम्भावितत्वात्। अत एव भगवत्पादात्पूर्वमेव मीमांसकप्रवरैर्नैयायिकधुरन्धरैश्च सौगतमतं निर्मूलितमासीदिति वचनमपि निर्मूलमेव। किन्तु समसामयिकान्नास्तिकान् प्रखरया प्रतिभया चमत्कारिण्या वाण्या चाभिभूय लौकिकजनेषु चिरप्रसुप्तां वैदिकवासनां ताभ्यामेव साधनाभ्यां जागरयित्वा च तत्र लोकान् दीक्षयित्वा चाद्वैतसम्प्रदायविशेषं प्रवर्त्य च नास्तिकनिर्मूलनमाचार्यैः श्रीमच्छङ्करभगवत्पादैः कृतमित्येवं समीचीनम्। अद्यत्वेऽपि ये यत्सम्प्रदायदीक्षिता भवन्ति ते तत्पक्षपातिनः सन्तस्तत्रैव लोकान् दीक्षयितुं तमेव सम्प्रदायं बृंहयितुं च प्रयतमानाः प्रत्यक्षमवेक्ष्यन्ते। शङ्करभगवत्पादाश्च चतसृषु दिक्षु चतुरो मठान् संस्थाप्य परःसहस्रानद्वैतसम्प्रदाये दीक्षयित्वा नास्तिकमतमुदमूलयन्। तामेव पद्धतिमनुसरन्तो मध्वरामानुजप्रभृतयः स्वमतप्रचारणे साफल्यमलभन्त। सम्प्रदायविशेषमप्रवर्त्तयन्तस्तु शारीरकादिभाष्यप्रणेतारोऽपि भट्टभास्करप्रभृतयो जटिलयुक्तीरुपस्थापयन्तोऽपि नैव सफला अभूवन्। तदस्तु यथा तथापि. किन्तु चित्सुखाचार्यादिसमये बौद्धादिपराक्रमणं शून्यप्रायमासीदिति न तन्निराकरणमत्र विशेषरूपेण कृतमस्ति।

भगवत्पादसमये वेदविरोधिनो नास्तिका एव प्रधानप्रतिद्वन्द्विनोऽभूवन्निति तन्निर्मूलने एव परो यत्नस्तैरास्थितः। आस्तिकदर्शनैर्वैशेषिकादिभिः सह यत्र विरोधस्तन्मात्रप्रतिषेधाय प्रयासो विहितः। अन्यत्र तु तत्र तत्र समादर एव सम्प्रदर्शितः। तथा च समन्वयसूत्रे भाष्यकारवचन—तथा चाचार्यप्रणीतं न्यायोपबृंहितं सूत्रं—"दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्ग" इति। अत एव षण्मतसंस्थापकाचार्यत्वेन भगवत्पादाः प्रसिद्धिङ्गताः। सर्वेषां चास्तिकदर्शनानां प्रस्थानभेदं प्रयोजनभेदं च प्रदर्शयद्भिराचार्यमधुसूदनसरस्वतीभिरपि सर्वदर्शनसामञ्जस्यमेव स्वीकृतम्। सर्वेषां चाद्वैते एव परमतात्पर्यं च दर्शितम्। तदेतत्पूर्वाचार्याणामभिप्रायस्य स्वाभिप्रायस्य च प्रदर्शनमात्रमाचार्यैः कृतं न तु तदानीमेवंविधमैकमत्यं दार्शनिकानामभूदित्यन्यदेतत्।

शङ्करभगवत्पादसमयान्नातिचिरमेव द्वैतादिसम्प्रदायाः प्रावर्तिषत। तत्राभिनिविष्टचेतसः स्वीयोत्कृष्टतासम्पादनसाधनमद्वैतमतनिरसनमेव मन्यमाना नानाविधानद्वैतमतखण्डनपरान् निबन्धान् निबबन्धुः। तत्र तत्कृतानाक्षेपान् प्रतिक्षेप्तुं श्रीमता चित्सुखाचार्येण प्रत्यक्तत्त्वप्रदीपिकाख्योऽयं ग्रन्थो व्यरचि, यत्र विशेषेण वैशेषिकमतनिरसनमेवोपलभ्यते। श्रीमद्रामानुजाचार्यादिद्वैताचार्यकृताक्षेपप्रतिक्षेपणमत्र न क्वाप्यवेक्ष्यते। तत्र कारणं तदीयविरलप्रचार एवेति प्रतीमः। एकादशशतकस्थितः कुलार्कनामा कश्चन विलक्षणो वैशेषिकविचक्षणोऽभूत्तेन महाविद्यानुमानानां षोडशप्रकारा दशश्लोक्या निरदेक्षिषत। ततः प्रभृति बहवस्तार्किकास्तामेव पद्धतिमनुसस्रुरिति तत्कालप्रचलितशैल्यैव तार्किकोपस्थापितसंशयनिराकरणं कर्त्तव्यमिति तदनुसरणं चित्सुखामादितोऽन्तपर्यन्तं कृतं दृश्यते। यद्यप्येवंविधानुमानानामप्रयोगकत्वोक्त्यैव निराकरणं भवति। अत एव नैयायिकैः "अग्निर्दाहानुकूलादृष्टाधिष्ठातीन्द्रियधर्मसमवायी, दाहजनकत्वाद्, अदृष्टाश्रयात्मवदित्येवंविधः शक्तिसाधकानुमानप्रयोगोऽप्रयोजकत्वोक्त्यैव निराक्रियत। यदि पुनरनुकूलस्तर्क उपस्थाप्यते, तदान्वयव्यतिरेकाभ्यां स

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एवेष्टसाधकः स्यात्। तथापि तर्कस्याप्रमाणत्वात् प्रत्यक्षानुमानाद्यन्यतमं प्रमाणमुपस्थातव्यं तर्कस्तु तदनुग्राहकमात्रमिति सम्प्रदायप्रथानिर्वाहायानुमानप्रयोगः कर्त्तव्यो भवतीति कृत्वा चित्सुखाचार्याः प्रमाणतया तथाविधानुमानानि प्रायुञ्जत। तदनन्तरं च तदनुग्राहकांस्तर्कानुपास्थापयन्।

तमिमं ग्रन्थं गहनतमरहस्यं व्याख्यासापेक्षमवेक्ष्य बहवो व्याख्यातारस्तद्व्याख्यां विदधुर्यत्र श्रीमत्प्रत्यक्स्वरूपभगवत्कृता नयनप्रसादिनो नाम्नीव्याख्या सर्वातिशायिनी वरिवर्त्ति। किन्तु मूलवदेव सापि स्वीयस्वतंत्रविचारान् योजयन्ती प्रायो विद्यार्थिनां कृते नात्युपयोगिनी समभूत्। कोमलमतीनां बालानां विषयतया प्रतीयमानानां पङ्क्तीनां विस्तृतविवरणाकरणाच्चेति तामिमां न्यूनतां परिजिहीर्षुभिर्महामण्डलेश्वरैः श्रीकैलासपीठमधितिष्ठद्भिः श्रीमद्विद्यानन्दगिरि-स्वामिभिः छात्रतोषिण्याख्या व्याख्यान्वर्थाभिधा व्यधायि। तत्र "तामाश्रित्य लघीयसी विरचिता" इति स्वोक्त्यनुसारेण नयनप्रसादिनीमनुसरन्त्यपि बालमतीनां मूलभावबोध एव प्रथमं भवत्विति मनीषया तदुपात्तनवीनोद्भावनाभागं परित्यज्यैव तदनुसरण कृतम्। प्रौढमतीनामनपेक्षिततया नयनप्रसादिन्यां परित्यक्तमपि लक्षणयोजनादिकमाहृतम्। तदेतद् विशेषरूपेण महाविद्यानुमानेषु यत्र-विद्यार्थिनां मतिविभ्रमः प्रायो जायते, समोचीनतया साधितमिति न केवलं छात्रतोषिण्येव परं छात्रा-नुग्रहकारिणी च विराजते। न केवलं मूलगतमहाविद्यानुमानानामेव, अपितु नयनप्रसादिनीगतमहा-विद्यानुमानानामपि समन्वयनविधिः सटिप्पणसंस्करणे परिशिष्टभागे प्रदर्शित इति टीकार्थजिज्ञासूनां कृतेऽप्युपकृतिः साधिता भवति।

तदेतन्नयनप्रसादिनीच्छात्रतोषिण्युभयसंवलितसंस्करणे सम्पादितं यथा, तथैव केवलतोषिणीसंव-लितसंस्करणेऽपि संचोष्यमाणविषयाणामपि सकलबालोपकारित्वं साधितं भविष्यतीति निश्चिनुः। परहितपरिरक्षणकृतदीक्षाणां प्रवृत्तेः सार्थक्यनिश्चयात्।

परिशिष्टरूपेण मुद्रिता "परीक्षाब्धिसन्तरणी" केवलमाधुनिकाध्ययनपरिश्रमालसमनसामुपकारि-णीत्येव न मन्तव्यं किन्तु मूलार्थसंक्षेपाभिलाषिणां कृतेऽपि महोपकारिण्येव।

तथा शास्त्रेषु तत्र तत्र प्रकीर्णतया प्रयुक्तानां लौकिकन्यायानां कतिपयानां सङ्ग्रहोऽपि शोभतेतराम्। लौकिकन्यायसहस्राचा मुद्रितत्वेऽपि कृत्स्नाध्ययनप्रयासः प्रायस्तरां विद्वद्भिरपि न क्रियते इति परेषां का वार्ता। ततश्चायमपि सङ्ग्रहो युज्यते।

ततश्च शतवर्षसमयद्वयसादप्यधिसमयमारभ्य गङ्गाप्रवाहवदद्यपर्यन्तमनवद्यतयाऽश्रान्तप्रवर्तमान-वेदान्ताध्ययनाध्यापनपरम्परायाः कैलासाश्रमपरमधनभूतायाः परिरक्षणपरायणैः श्रीमद्विद्यानन्दगिरि-स्वामिभिराधुनिकविद्यार्थिगणापेक्षितसरलसरणिमनुलक्ष्य निर्मला मितभाषिणीय छात्रतोषिणीसमाख्या व्याख्या छात्राणां तोषं जनयन्ती स्वार्थसमन्विता भवत्विति श्रीमदभिनवचन्द्रेश्वर मुहुरभ्यर्थना।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

॥ ॐ ॥

प्रासङ्गिकम्

दिशन्तु शं मे गुरुपादपांसवः

अतिरोहितमेतत्तत्रभवतां भवतां विपश्चित्पश्चिमानां सदसि प्रत्यक्तत्त्वप्रदीपिकाग्रन्थस्य माहात्म्यं गाम्भीर्यमुपादेयत्वं च। तस्याधुना संस्करणद्वयं प्रकाशितुं कृतनिश्चयं कैलासविद्याप्रकाशनं हृषीकेशस्थमध्यात्मविद्यामहासंस्थानम् । तत्र [illegible]टिप्पणसंस्करणं ततोऽन्यत्तोषिणीसंस्करणम्। तयोः सटिप्पणसंस्करणं भागद्वयेन सम्पादनीयमिति मत्वा प्रथमो भागो विगतवर्षे प्रकाशितः । द्वितीयो भागश्चैषमः प्रकाश्यते, तेन सहैव तोषिणीसंस्करणमपि प्रकाश्यते। अनेन "एका क्रिया द्व्यर्थकरी प्रसिद्धा" इत्यभियुक्तैरुक्ता सूक्तिर्युक्ता सनाथा च सञ्जाता।

शाङ्करीब्रह्मविद्यायाः प्राचीनतमे पीठे हृषीकेशस्थे कैलासाश्रमे समारोहणानन्तरमेतत्पीठस्य दायित्वनिर्वहणावसरे प्रधानाश्रमस्य तच्छाखाश्रमाणां च जीर्णतां परिमार्ज्य तत्र नूतनसंस्काराधानाय, पुनर्निर्माणाय, नूतनशाखाश्रमप्रतिष्ठापनाय पूर्वाचार्योपार्जितदैववित्तसंरक्षणाय, सर्वत्र दैववित्तमानुषवित्ताभ्यां समृद्धिपरिवर्धनाय च सर्वान्तर्यामिणा परमात्मनाऽत्रत्यैश्च पूर्वाचार्यैः सम्प्रेरितोऽहं सततं प्रयत्नशीलोऽभूवम् । कतिपयवर्षेभ्यो ब्रह्मविद्यापीठे हृषीकेशस्थे कैलासाश्रमे सततमुषित्वा कुशाग्रधियां विद्यानुरागिणां छात्राणामध्यापनेऽतिव्यापृतोऽप्यहं प्रत्यक्तत्त्वप्रदीपिकाऽध्यापनावसरे स्वीयं विमृष्टं विचारं सङ्कलयितुं समारम्भि। तस्यैवेयं सुपरिणतिः यच्चित्सुखीग्रन्थस्य द्वाभ्यां संस्करणाभ्यां प्रकाशनं समजनि । तत्र च परीक्षाब्धिसन्तरणीनिबन्धरचना परीक्षार्थिनां सौकर्याय भगवत्प्रेरणया सञ्जाता। साऽप्यत्र परिशिष्टरूपेण संयोजिता, इतः पृथगपि सा पुस्तिकाकारेण च प्रकाशिता।

सन्ति खलु विद्वज्जनेषु विश्रुताः "स्थूणानिखनने" त्यादिन्यायाः शतशस्तत्र तत्र शास्त्रेषूट्टङ्किताः। येषां तात्पर्यावबोधनाय रुचिवर्द्धिकाः काश्चन कथाः श्राव्यन्ते । तान् यथासम्भवं लौकिकन्यायान् सङ्कलय्यात्राभिनवप्रकाशने समायोजनेनेतः पूर्वं सम्पादितानि सर्वाणि प्रकाशनानि प्रत्यक्तत्त्वप्रदीपिकाग्रन्थस्येदं प्रकाशनमतिशेते इति सुहृज्जना विद्वांसो निगदन्ति। यद्यपि शास्त्रेषु न्यायपदेनाधिकरणमर्थो गृह्यते, तथापि विद्वज्जनेषु विश्रुतोऽर्थोऽपि निरुक्तोऽत्र ग्राह्यः ।

इतोऽप्येकमपरं परं वैशिष्ट्यमस्य प्रकाशनस्य वक्तुं युक्तं, यत्किल श्रीमत्परमहंसपरिव्राजकाचार्याणां श्रोत्रियब्रह्मविद्वरिष्ठानां द्वादशदर्शनाचार्यप्रवराणां शास्त्रार्थमहारथानामाचार्यमहामण्डलेश्वराणामनन्तश्रीस्वामिकाशिकानन्दगिरिमहोदयानां परमोत्कृष्टप्रस्तावनानिबन्धसंयोजनेनापीदं प्रकाशनं सुसमृद्धं पाठकजनसम्माननार्हं समजनि। अतः स्वामिपादाः सन्ति भुवि भूरिदा भूरिशो धन्यवादार्हा इति निरूप्यते।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तथैव श्रीमत्परमहंसवर्या विद्वद्धौरेया विरक्तशिरोमणयः सकलजनहितायाहर्निशं कार्यरताः श्रीमत्स्वामिवामदेवगिरिमहाभागाः स्वीयां शुभाशंसां सम्प्रेष्य महत्सौहार्दं सम्पादितवन्तः। एतस्याभिनवप्रकाशनस्य सम्पादने शोध्यपत्रसंशोधने च ममान्तेवासिनः श्रीस्वामिभास्करसंविद्गिरिः श्रीस्वामिनिश्चलानन्दगिरिः श्रीस्वामिसद्योजातसंविद्गिरिः ब्र. सूर्यचैतन्यश्चेत्यादयोऽनलसतया कार्यमकार्षुः। तस्मादेते सर्वे महानुभावा भूरिशो धन्यवादार्हा इति मन्ये।

अन्त्ये यत्प्रेरणया यदनुकम्पया चेयं नूतनाकृतिः सम्पादिता मया, तत्पादारविन्दयोरिमां नूतनां कृतिं समर्प्याधुना परमनिर्वृत्तिमहमनुभवामीत्योंशम्।

आदिशङ्कराचार्यजयन्ती
शाङ्कराब्दः १२०६
विक्रमाब्दः २०५०
दि० २६-४-१९९३ ई०

भगवत्पादीयः
आचार्यमहामण्डलेश्वरः स्वामिविद्यानन्दगिरिः
कैलासाश्रमः हृषीकेशः
(उ० प्र०)।

सकलशास्त्रपारंगतानां परमहंसवर्याणां

श्रीमत्स्वामिवामदेवगिरिमहाभागानां

शुभाशंसा

॥ श्रीगणेशाय नमः ॥

अनेकजन्मार्जितपुण्यपुञ्जेन भगवत्प्रसादेन ये विशदाशया जिज्ञासवोऽन्तर्मुखाः संसारविमुखास्ते गुरुमुखात् महावाक्यश्रवणेन माण्डूक्योपनिषदोऽर्थानुसंधानेन वा कृतार्था भवन्ति। ये तु मन्दजिज्ञासव औत्सुक्ये वेदान्तेषु प्रवृत्तास्ते तु वेदान्तश्रवणेन, तेन निश्चातार्थमननेन निदिध्यासनेन च कृतार्था भवन्ति ये तु तर्कादिशास्त्रकुशलाः शङ्कालवो मन्दजिज्ञासवस्तेषां कृते बृहत्प्रस्थानत्रयी विरचिताऽऽचार्यप्रवरैः। तस्यां त्रयो ग्रन्थाः सन्ति। तत्रत्यश्चित्सुख्याख्य एको ग्रन्थोऽस्ति तस्य मुख्यो नाम प्रत्यक्तत्त्वप्रदीपिकाऽस्ति किंतु चित्सुखाचार्यविरचितत्वेन चित्सुखीति नाम्ना प्रसिद्धो जातः। अधुना विद्यालयेषु वेदान्तस्यापि परीक्षा प्रचलिता। तत्र ये विद्यार्थिनोऽकृतन्यायपरिश्रमास्ते तु वदन्ति नेयं चित्सुखी अपि तु चित्तदुःख्येव। तादृशानां तु सुखबोधाय प्रत्यक्तत्त्वप्रदीपिकोपरि छात्रतोषिणोटोका अनन्तश्रीविभूषितमहामण्डलेश्वरस्वामिवर्यैर्विद्यानन्दगिरिभिः कृता। "इयं महामण्डलेश्वराणां महती कृपा जाता" इति वयं चिन्तयामः। प्रार्थयामश्च श्रीमद्भगवत्पादाद्यशङ्कराचार्यान् यदस्याष्टोकाया लाभो विद्यार्थिनां भवेत्। इति शुभम्।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ॐ

॥ श्रीमदभिनवचन्द्रेश्वरो विजयतेतराम् ॥



समर्पणम्

'पट्टाभिषेकरजतमहोत्सवस्य' परमपावनप्रसङ्गे
श्रीशाङ्करीब्रह्मविद्यापीठकैलासाश्रमस्य
परमाधिष्ठातृदेवस्य भगवतो
अभिनवचन्द्रेश्वरस्य
करसरोजयोः
सादरं समर्पयति

आचार्यमहामण्डलेश्वरः स्वामी विद्यानन्दगिरिः
कैलासाश्रमाध्यक्षः
हृषीकेशः

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विषयानुक्रमणिका

विषयाः	पृष्ठाङ्काः
प्रथमपरिच्छेदे	
१. मङ्गलाचरणम्	२
२. स्वप्रकाशत्वलक्षणनिरूपणे पूर्वपक्षः	३
३. स्वप्रकाशत्वलक्षणनिरूपणे उत्तरपक्षः	७
४. स्वप्रकाशत्वप्रमाणनिरूपणे उत्तरपक्षः	६
५. स्वप्रकाशत्वानुमाने हेतुदोषनिरासः	११
६. आत्मनः स्वप्रकाशत्वेऽकर्म-हेतुसमर्थनम्	१७
७. तमसो भावरूपत्वे पूर्वपक्षः	१६
८. तमसोभावरूपत्वे उत्तरपक्षः	२१
९. मिथ्यात्वनिरूपणे पूर्वपक्षः	२३
१०. मिथ्यात्वनिरूपणे उत्तरपक्षः	२७
११. मिथ्यात्वानुमाने हेतुदोषनिरासः	२६
१२. विषयविषयिभावप्रत्यादेशः	३१
१३. अध्ययनस्याध्यापन-विधिप्रयुक्तत्वोत्थापनम्	३३
१४. अध्ययनस्याध्यापनविधिप्रयुक्तत्वनिरासः	३५
१५. प्रपञ्चमिथ्यात्वे श्रुतिप्रमाणनिरूपणम्	३७
१६. अनिर्वचनीयाविद्यानिरूपणे पूर्वपक्षः	३६
१७. अनिर्वचनीयाविद्यानिरूपणे उत्तरपक्षः	४१
१८. अख्यातिवादोत्थापनम्	४५
१९. अख्यातिवादनिरासः	४७
२०. भ्रमज्ञानसाधनम्	४६
२१. असत्ख्यातिमतनिरासः	५१
२२. आत्मख्यातिमतोत्थापनम्	५५
२३. अनिर्वचनीयत्वनिरूपणे पूर्वपक्षः	५७
२४. अनिर्वचनीयत्वनिरूपणे उत्तरपक्षः	५६
२५. सिद्धार्थशक्तिग्रहनिरूपणे पूर्वपक्षः	६५
२६. सिद्धार्थशक्तिग्रहनिरूपणे उत्तरपक्षः	६७
२७. कार्यज्ञानस्य प्रवर्तकत्वोत्थापनम्	७१
२८. नियोगगमकभञ्जनम्	७३
२९. नियोज्यस्य कृत्युद्देश्यत्वनिराकरणम्	७७
३०. यागादेः फलकरणत्वनिराकरणम्	७६
३१. सिद्धार्थबोधकत्वोपसंहारः	८१
३२. अखण्डार्थत्वनिरूपणे पूर्वपक्षः	८३
३३. अखण्डार्थनिरूपणे उत्तरपक्षः	८५
३४. प्रामाण्यवादे पूर्वपक्षः	६१
३५. प्रामाण्यवादे उत्तरपक्षः	६७
३६. अतिरिक्तशक्तिवादे पूर्वपक्षः	१०३
३७. अतिरिक्तशक्तिवादे उत्तरपक्षः	१०७
३८. अन्विताभिधानवादिमतम्	११५
३९. अभिहितान्वयवादिमतम्	११६
४०. वेदान्तानामपौरुषेयत्वे पूर्वपक्षः	१२३
४१. वेदान्तानामपौरुषेयत्वे उत्तरपक्षः	१२५
द्वितीयपरिच्छेदे	
४२. भेदबम्भञ्जनम्	१३३
४३. द्रव्यलक्षणक्षारणम्	१४१
४४. गुणलक्षणप्रत्यादेशः	१४५
४५. कर्मणो लक्षणादिदूषणम्	१४७
४६. जातेर्लक्षणादिखण्डनम्	१५१
४७. विशेषस्य लक्षणादिनिरासः	१५५
४८. समवायलक्षणनिराकरणम्	१५७
४९. समवायप्रमाणनिराकरणम्	१६२
५०. धर्मभेदनिरासः	१६५
५१. क्षणिकत्वनिराक्रिया	१६७

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विषयाः	पृष्ठाङ्काः
५२. प्रत्यक्षलक्षणनिराकरणम्	१६९
५३. सशयलक्षणापाकरणम	१७५
५४. विपर्ययलक्षणनिराकरणम्	१७७
५५. स्मृतिलक्षणनिराकरणम्	१७९
५६. प्रत्यक्षलक्षणनिराकरणम्	१८१
५७. अनुमानलक्षणापाकरणम्	१८३
५८. व्याप्तिलक्षणनिराकरणम्	१८५
५९. व्याप्तिग्राहकनिरासः	१८९
६०. पक्षधर्मत्वनिरुक्तिनिरासः	१९१
६१. पञ्चावयवप्रयोगायोगः	१९५
६२. उपमानलक्षणनिराकरणम्	१९९
६३. शब्दलक्षणनिराकरणम्	२०३
६४. विशेषणनिरुक्तिखण्डनम्	२०५
६५. शब्दप्रमेयत्वनिरासः	२०७
६६. शब्दवाच्यत्वनिराकरणम	२०९
६७. अर्थापत्तिलक्षणनिरासः	२११
६८. अनुपलब्धिलक्षणनिरासः	२१५
६९. अभावलक्षणनिराकरणम्	२१७
७०. अन्योन्याभावलक्षणनिराकरणम्	२१९
७१. अभावखण्डनम्	२११
७२. करणलक्षणनिराकरणम्	२२३
७३. आरम्भवादोत्थापनम्	२२५
७४. आरम्भवादविमर्दनम्	२२७
७५. अवयविखण्डनम्	२३१
७६. संयोगलक्षणनिरासः	२३३
७७. विभागखण्डनम्	२३५
७८. द्वित्वखण्डनम्	२३९
७९. जातिखण्डनम्	२४१
८०. द्व्यणुकारम्भनिराकरणम्	२४३
८१. परिमाणलक्षणनिराकरणम्	२४५
८२. परिमाणप्रमाणनिराकणरम्	२४७
८३. कारणत्वनिर्वचननिरसनम्	२४९
८४. कार्यलक्षणदुर्भणत्वम्	२५५
८५. कालकवलीकरणम्	२५७
८६. दिक्खण्डनम्	२५९
८७. भेदाभेदनिराकरणम्	२६१
तृतीयपरिच्छेदे	
८८. शब्दस्यापरोक्षहेतुत्वे सिद्धान्तः	२६५
८९. ज्ञानस्य मोक्षहेतुत्वे सिद्धान्तः	२६९
९०. ज्ञानकर्मसमुच्चयसमर्थनम्	२७१
९१. समुच्चयवादखण्डनम्	२७५
चतुर्थपरिच्छेदे	
९२. श्रीवल्लभाभिमत-मोक्षोद्भावनम्	२७९
९३. नव्यतार्किकाभिमत-मोक्षोद्भावनम्	२८२
९४. श्रीवल्लभाभिमतमोक्षप्रतिक्षेपः	२८३
९५. आत्मनः सुखरूपत्व-प्रसाधनम्	२८५
९६. अविद्याश्रयनिरूपणे पूर्वपक्षः	२८९
९७. एकजीववादसमर्थनम्	२९३
९८. साक्षिप्रसाधनम्	२९७
९९. नानाजीववादः	२९९
१००. अविद्यानिवृत्तिस्वरूपनिरूपणे पूर्वपक्षः	३०३
१०१. अविद्यानिवृत्तिस्वरूपनिरूपणे उत्तरपक्षः	३०४
१०२. अविद्याया वहव आकाराः	३०७
१०३. जीवन्मुक्तिसाधनोपसंहारः	३०९
१०४. परिशिष्टम्	३१९

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

॥ श्रीमदाद्यशंकरभगवत्पादो विजयतेतराम् ॥

श्रीमच्चित्सुखाचार्यमुनिवरविरचिता

प्रत्यक्तत्त्वप्रदीपिका

प्रथमः परिच्छेद ।

श्रीकैलासपीठाचार्येण श्रीमत्स्वामिविद्यानन्दगिरिणा प्रणीता

प्रत्यक्तत्त्वप्रदीपिकाव्याख्या—

छात्रतोषिणी

यस्माज्जातं जगत्सर्वं यस्मिन्नेव विलीयते ।
येन प्राणिति तद्ब्रह्म विज्ञानानन्दविग्रहम् ॥१॥

नित्यं विज्ञानमानन्दं महेशं यतिसेवितम् ।
प्रणौमि शिरसा देवं ज्ञानविज्ञानमोक्षदम् ॥२॥

प्रत्यक्तत्त्वप्रदीपिका सुविमला ख्याता सभायां सतां
तट्टीका सुमनोहरा सुविशदा विद्वज्जनाह्लादिनी ।
तामाश्रित्य लघीयसी विरचिताऽध्येतुर्मनस्तोषिणी
विद्यानन्दविवर्द्धिनी ननु मुदा भूयात्तमोध्वंसिनी ॥३॥

मण्डितं स्वमतं यस्मिन्नन्यदीयं च खण्डितम् ।
तस्मादाद्यः परिच्छेदः सुनिश्चेयो मुमुक्षुणा ॥४॥

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्तम्भाभ्यन्तरगर्भभावनिगदव्याख्याततद्वैभवो
यः पाञ्चाननपाञ्चजन्यवपुषा व्यादिष्टविश्वात्मतः ।
प्रह्लादाभिहितार्थतत्क्षणमिलद्दृष्टप्रमाणं हरिः
सोऽव्याद्वः शरदिन्दुसुन्दरतनुः सिंहाद्रिचूडामणिः ॥१॥

ज्योतिर्यद्दक्षिणामूर्तिव्यासशङ्करशब्दितम् ।
ज्ञानोत्तमाख्यं तद्वन्दे सत्यानन्दपदोदितम् ॥२॥

विप्रतिपत्तिव्रातध्वान्तध्वंसप्रगल्भवाचाला ।
क्रियते चित्सुखमुनिना प्रत्यक्तत्त्वप्रदीपिका विदुषा ॥३॥

अथ प्रारिप्सितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थं कृतं मङ्गलं शिष्यशिक्षायै ग्रन्थतो निबध्नाति—स्तम्भाभ्यन्तरेति । अविगीतशिष्टाचारानुमितस्मृतिपरिकल्पितश्रुतिप्रमाणकं मङ्गलं त्रिविधं, वस्तुनिर्देशनमस्काराशीर्वादात्मकभेदात् । सकार्याज्ञानहर्त्ता यो हरिः स युष्मान् रक्षतात् । तस्यैव हरेर्विशेषणानि स्तम्भाभ्यन्तरेत्यादीनि । स्तम्भस्यान्तरं स्तम्भाभ्यन्तरं तत्र गर्भभावः स्तम्भाभ्यन्तरगर्भभाव इति षष्ठीगर्भसप्तमीसमासो निर्दिष्टः । गर्भत्वं नामानभिव्यक्ततया वृत्तित्वम् । एवं च स्तम्भाभ्यन्तरगर्भभावेन निगदमात्रेण व्याख्यातम्, न तत्रोपायान्तरमपेक्षते । तथा च स्तम्भाभ्यन्तरगर्भभावनिगदेन व्याख्यातं तद्वैभवं यस्य सः । तद्वैभवं=तस्य स्वरूपस्य विभुत्वं पूर्वोक्तरीत्याख्यातं येन स हरिर्वोऽव्यादित्यन्वयः । अनेन हरेः सर्वगतत्वमनौपम्यं च सुस्पष्टम् । तार्किकादिवत्सर्वगतमपि वस्तुकृतपरिच्छेदवत्त्वं स्यात्तन्निवारणाय—यः पाञ्चाननेत्यादिविशेषणम्, पचि विस्तारे इति धातोः पञ्चशब्दो व्युत्पाद्यते । पञ्चसु दिक्ष्वाननमस्य विपरिवर्तते इति व्युत्पत्तेर्विस्तृतास्याद्वेति पञ्चाननः सिंहः । तत्सम्बन्धिपाञ्चाननम् । पञ्चजना मनुष्यास्तत्सम्बन्धि पाञ्चजन्यम् । पाञ्चाननं च तत्पाञ्चजन्यं चेति पाञ्चाननपाञ्चजन्यं, तादृशं वपुः पाञ्चाननपाञ्चजन्यवपुः नृसिंहस्वरूपमित्यर्थः । तेन वपुषा विशेषतो विश्वरूपतोक्ता येन स तथोक्तो हरिः । अत्र सर्वात्मकत्वोक्त्या सर्वगतत्वोक्त्वावपि श्रुत्यादिप्रसिद्धं सर्वगतत्वं सर्वात्मकत्वमुत्प्रेक्षया मया प्रकटितमिति भावः । निरुक्तविशेषणद्वयकथनानन्तरं भक्तानुग्रहाय तस्य परमकारुणिकत्वमाह—प्रह्लादेति । प्रह्लादेनाभिहितोऽर्थः प्रह्लादाभिहितार्थः, तस्मिन्क्षणं तत्क्षणमभिधानकाल एव घटमानं प्रत्यक्षवत्साक्षात्कारसाधकत्वात्प्रमाणं दृष्टं यः स तथोक्तो हरिः । प्रमाणशब्दो नित्यनपुंसकः, तेन हरिणा सह सामानाधिकरण्यं नानुचितम् । तथाऽऽगमानुमानाभ्यां हरेः सिद्धत्वेऽपि तत्साक्षात्कर्तुकामाय—शरदिन्दुसुन्दरतनुः । शरदिन्दुवत्सुन्दरा धवला तनुर्यस्य स तथोक्तः । सिंहाद्रिचूडामणिः सिंहगिर्यलङ्कारस्तन्निवासीत्यर्थः ॥१॥

अत्र निरुक्तत्रिविधमङ्गलेषु मध्येऽनेनाशीर्वादात्मकं कृतम् । तथैव यस्य देवे पराभक्तिरितिश्रुत्या गुरुपूजाऽपि कर्तव्याऽस्ति । ईश्वरभक्तिवद्गुरुभक्तेरपि विद्याप्राप्तावन्तरङ्गसाधनत्वावगतेस्तदर्थं गुरुं नमस्करोति—ज्योतिरित्यादि । यज्ज्योतिः सत्यानन्दपदाभ्यामुदितं, यच्च दक्षिणामूर्त्तिशब्देन, व्यासशब्देन,शङ्करशब्देन चोक्तम्। तथा ज्ञानोत्तमाख्येनोक्तं मद्दृष्टिगोचरं यत्तदहं वन्दे। मौनव्याख्यानेन दक्षिणामूर्त्तिरूपेण यदुपदिष्टं, तदेव सूत्ररचनया भगवता व्यासेनोक्तम्,तदर्थाविष्कारः शङ्करभगवत्पादेन कृतः, तद्भाष्यार्थविवरणं मदाचार्येण ज्ञानोत्तमाख्येन कृतमिति भावः ॥२॥

यद्यपि शारीरकविषयादिनाऽस्य ग्रन्थस्य विषयादिमत्त्वं गतार्थं, तथापि सन्ति किलापराण्यप्यस्यासाधारणानि वक्तव्यानीति पृथग्ग्रन्थारम्भसामर्थ्यादवगम्यते इत्याह—विप्रतिपत्तिव्रातेति । विप्रति-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रमाणनखनिर्भिन्नमहामोहामरारये ।
नमस्कुर्मो नृसिंहाय स्वप्रकाशचिदात्मने ।।४।।

अथ कोऽयं स्वप्रकाशशब्दार्थः ? किं (१) स्वश्चासौ प्रकाशश्च स्वप्रकाशः ? (२) स्वस्य स्वयमेव प्रकाश इति वा ? (३) सजातीयप्रकाशाप्रकाश्यत्वं वा ? (४) स्वसत्तायां प्रकाशव्यतिरेकविरहितत्वं वा ? (५) स्वव्यवहारहेतुप्रकाशत्वं वा ? (६) ज्ञानाविषयत्वं वा ? (७) ज्ञानाविषयत्वे सत्यपरोक्षत्वं वा ? (८) व्यवहारविषयत्वे सति ज्ञानाविषयत्वं वा ? (९) स्वप्रतिबद्धव्यवहारे सजातीयपरानपेक्षत्वं वा ? (१०) अवेद्यत्वे सत्यपरोक्षव्यवहार-

---

पत्तीनां व्रातः समूहस्तदेवध्वान्तं तस्य ध्वंसाय प्रगल्भा दृढ़तरन्यायोपेता वाचाला "आलजाटचौ बहुभाषिणी"ति पाणिनिस्मृत्या वाक्शब्दादालच्प्रत्यये वाचाला=बहुभाषिणीति तदर्थः । एतेनात्र-सम्पूर्णताकथनेनासम्पूर्णता निराकृता । तत्त्वं पारमार्थिकं निखिलानर्थशून्यं परमानन्दस्वरूपं ब्रह्म, तदेव प्रतीचो जीवस्य पारमार्थिकं स्वरूपं तस्य प्रदीपिकेव प्रकाशकत्वात्प्रदीपिका सेयं चित्सुखाचार्येण निर्मीयते । यद्यपि पूर्वोक्तशारीरकतद्भाष्यादिग्रन्थेन प्रत्यक्तत्त्वप्रकाशने विप्रतिपत्तिनिवारणात्मकमिति-कर्तव्यताकृत्यमप्यनुष्ठितं, तथापि नूतनविप्रतिपत्तिनिवारणेऽस्योपयोगः प्रयोजनमुक्तम् । विप्रति-पत्तितिरोधानमस्यप्रधानविषयः, तदर्थी अस्याधिकारी, तथैव यथायथं सम्बन्धोऽप्युक्तः । एवं विषयादि-सिद्धेरारम्भणीयोऽयं ग्रन्थ इति भावः ।।३।।

विवक्ष्यमाणं स्वप्रकाशवादार्थं नृसिंहनमस्कारव्याजेन दर्शयति—प्रमाणेति । प्रमाणं महावाक्यजनिता ब्रह्मात्मैक्याकारा बुद्धिवृत्तिर्या चित्प्रतिबिम्बं गृह्णाति । चित्प्रतिबिम्बितं चैतन्यं वा प्रमाणम् । तस्य वाक्यबाहुल्येन बहुत्वम् । प्रमाणरूपैर्नखैर्निर्भिन्नो महामोहोऽमरारिर्येन तस्मै । स्वप्रकाशा चिदेवात्मा यस्य । नहि प्रमाणेन सा जायते । मोहनिवृत्तिमात्रे प्रमाणानां प्रामाण्यं तत्कृत्यं चोपपद्यते । एतेन संविदात्मनोः स्वप्रकाशत्वप्रतिज्ञातेनोत्तरत्र यथाक्रमं द्वयमुपपादयिष्यते इति प्रतिज्ञातम् ।।४।।

अथशब्दोऽत्रानन्तर्यार्थकः । विषयादिसिद्ध्यनन्तरमित्यर्थः । पराङ्गीकृतस्वप्रकाशशब्देन विप्रति-पत्त्यधिकरणत्वं तस्येत्याह—अथ कोऽयमिति । लक्षणप्रमाणाभ्यां वस्तुसिद्धिरिति पूर्वं लक्षणं साधयितु-माक्षिपति तदर्थं च विकल्पमुद्भावयति—किमिति । (१) स्वत्वे सति प्रकाशत्वमिति प्रथमलक्षणार्थः । तत्र घटादावतिव्याप्तिवारणार्थं प्रकाशपदम् । (२) स्वविषयत्वे सति प्रकाशत्वं वा । तत्रार्थान्त-रवारणाय प्रथमदलम् । शब्दशब्देऽतिव्याप्तिं वारयितुं प्रकाशपदम् । उभाभ्यां स्वस्मिन् स्वस्य प्रकाशत्वाभिधानेनार्थतः परप्रकाशत्वं व्यावर्तितम् । (३) प्रदीपादेः स्वप्रकाशत्वमभ्युपगच्छतां लक्षणं, तत्रार्थान्तरतावारणाय सजातीयपदम् । (४) स्वसत्तापर्यन्तं प्रकाशेनाव्यभिचार इत्यर्थः । (५) अविज्ञातवस्तुनि व्यवहारायोगादवश्यं स्वव्यवहारहेतुज्ञानमभ्युपेयम् । (६) यद्यपि शशविषाणशब्दजन्यबुद्धिर्नार्थसंस्पर्शिनी, तस्या विकल्पमात्रतया न तत्रातिव्याप्तिः शङ्कनीया । शिष्यमतिविकासायोत्तरोत्तरलक्षणमनुसरति, ननु सर्वत्र पूर्वलक्षणे दोषपरिहारायेति भावः । (७) तथापि षष्ठलक्षणे पूर्वोक्तातिव्याप्तिशङ्कया सप्तममनुधावति । शशविषाणादौ ज्ञानाविषय-त्वेऽप्यपरोक्षत्वाभावान्नातिव्याप्तिः । (८) ननु ज्ञानाविषयत्वे सत्यपरोक्षत्वमिति व्याघातोऽस्तीति चेन्न; पक्षान्तरानुसृतत्वात् । (९) अख्यातिवादिमतेन शुक्तिरजतादिसंसर्गेऽप्यतिव्याप्तिशङ्कया लक्षणान्तर-मनुधावति । तत्रासम्भवदोषवारणाय सजातीयपदम् । (१०) सप्तमेऽपरोक्षत्वं विशेष्यदलमत्रत्व-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विषयत्वं वा ? (११) तद्योग्यत्वं वा ? नाद्यः । वेद्यस्यापि ज्ञानस्य स्वप्रकाशत्वाभ्युपगमात् । न द्वितीयः । कर्मकर्तृभावविरोधेन लक्षणस्यासम्भवात् । न तृतीयः । प्रदीपादेः सजातीयप्रकाशाप्रकाश्यस्यास्वयंप्रकाशत्वेन लक्षणस्यातिव्याप्तेः; घटादेरपि सजातीयप्रकाशाप्रकाश्यस्य स्वप्रकाशत्वप्रसङ्गाच्च । न हि प्रदीपादौ ज्ञाने वा घटत्वादिजातिरस्ति, येन घटादयः सजातीयप्रकाशप्रकाश्या भवेयुः । सत्तया सजातीयत्वं तत्राप्यस्तीति चेत्, न; विशेषणवैयर्थ्यात्सत्ताविरहिणः प्रकाशस्यैवासम्भवात्प्रकाशाप्रकाश्यत्वमित्येतावतैव चरितार्थत्वात् । नापि चतुर्थः । सुखादावतिव्याप्तेः, सुखादेरपि स्वसत्तायां प्रकाशाव्यभिचारात् । न पञ्चमः। प्रदीपादावतिव्याप्तेः, प्रदीपादेरपि स्वव्यवहारे हेतुत्वात्प्रकाशत्वाच्च । अथ ज्ञानव्यवहारहेतुप्रकाशत्वं विवक्षितं, तदपि न; अनुव्यवसायेऽतिव्याप्तेः । तस्य वेद्यत्वेऽपि व्यवसायज्ञानव्यवहारहेतुप्रकाशत्वात्, प्रदीपज्ञानमिदमिति व्यवहारहेतौ प्रदीपप्रकाशेऽतिव्याप्तेश्च । किञ्च व्यवहारहेतुत्वं विशेषणम् ? उपलक्षणं वा ? नाद्यः । मुक्तिप्रलयादावव्याप्तेः । न द्वितीयः । उपलक्षितत्वस्यापि विशेषणत्वे प्रागुक्तदोषानुसङ्गात्, स्वरूपमात्रत्वे तु ज्ञानं प्रकाश इत्येव स्यात्, तथा सति न लक्षणसिद्धिः । नापि षष्ठः । स्वयम्प्रकाशत्वसाधकानुमानागमादिजन्यज्ञानविषयत्वेन लक्षणस्यासम्भवित्वात्तस्याप्यविषयत्वे कथाप्रवृत्त्यनुपपत्तेः । नापि सप्तमः । अविषयत्वस्यैवासम्भवेन निरस्तत्वाद्विषयत्वशब्देन कर्मत्वविवक्षायां गुरुमतानुसारिणामात्मन्यतिव्याप्तेश्च तस्य ग्राहकतया सिद्धस्याविषयत्वेऽप्यपरोक्षतायास्तैरङ्गीकारात् । नाप्यष्टमः । प्राचीनदोषानुषङ्गात्; शुक्तिरजतादिसंसर्गेऽख्यातिवादिनामतिव्याप्तेश्च । तस्य व्यवहारविषयत्वेऽपि तैर्ज्ञानविषयतानङ्गीकारात् ।

परोक्षव्यवहारविषयत्वमिति भेदान्न तयोः सांकर्यशङ्कावकाशः । (११) मोक्षकाले व्यवहारानङ्गीकाराढव्याप्तिस्तद्वारणायान्यानुधावनम् । यथासम्भवं पूर्वपूर्वलक्षणेषु दूषणमभिलक्ष्योत्तरोत्तलक्षणानुधावनमिति बोध्यम् । तत्र नाद्यः, नहि वेद्यज्ञानमस्वं; नाप्यप्रकाशोऽतोऽनुव्यवसाये वेद्यज्ञानेऽतिव्याप्तिः । द्वितीये कर्तृत्वकर्मत्वविरोधेन लक्षणासम्भवम् । परसमवेतक्रियाजन्यफलशालित्वं कर्मत्वं, यथा देवदत्तोग्रामंगच्छतीत्यत्र परः=देवदत्तस्तत्र समवेता ग्रामसंयोगानुकूला क्रिया तज्जन्यं ग्रामसंयोगात्मकं फलं तच्छालित्वं ग्रामेऽस्तीति । तादृशफलं कर्त्तरि देवदत्ते नास्तीतिभावः । तृतीये, प्रदीपादेरपि प्रदीपान्तरेणाप्रकाशमानत्वात्तत्रातिव्याप्तिः । तथा घटादेरपि स्वप्रकाशत्वापत्तिस्तस्यापि विजातीयालोकादिप्रकाशमानत्वेन सजातीयप्रकाशेनाप्रकाशमानत्वात् । नहि प्रदीपादौ ज्ञाने वा एका जातिरितिभावः। चतुर्थे, सुखादावतिव्याप्तिः, तस्यापि स्वसत्तायां प्रकाशाव्यभिचारात्। पञ्चमे, प्रदीपादावतिव्याप्तिवारणाय ज्ञानव्यवहारहेतुप्रकाशत्वं विवक्षितं चेत्तर्ह्यनुव्यवसायेऽतिव्याप्तिः । प्रदीपज्ञानमिदमिति व्यवहारहेतौ प्रदीपप्रकाशेऽतिव्याप्तिश्च । किञ्च व्यवहारहेतुत्वस्य विशेषणत्वे मोक्षादावव्याप्तिः । उपलक्षणत्वे विशेषणत्वोक्तौ प्रागुक्तदोषानुसङ्गः, स्वरूपमात्रत्वे ज्ञानं प्रकाश इति लक्षणोक्तौ लक्षणासिद्धिः; लक्ष्यलक्षणयोस्तुल्यत्वात् । नहि लक्ष्यलक्षणयोः साम्यं कस्यचिदिष्टमन्यथा घटस्य लक्षणं घट इत्यपि प्रसङ्गः स्यात् । षष्ठे, असम्भवापत्तिः । सप्तमे, प्राभाकराणामात्मन्यतिव्याप्तिः, तस्यात्मनो ज्ञानाविषयत्वेऽपि ज्ञानग्राहकतयाऽपरोक्षत्वात् । अष्टमे, मोक्ष-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नापि नवमः। स्वप्रतिबद्धव्यवहारे सजातीयपरानपेक्षत्वस्य प्रदीपादौ घटादौ च भावेनातिव्याप्तेः। सत्तया सजातीयत्वविवक्षायां तु तद्व्यवहारस्यापि सत्तया सजातीयादृष्टादिजन्यतया तदपेक्षत्वेन लक्षणस्यासंभवित्वप्रसङ्गात्। नापि दशमः। अवेद्यत्वेऽनुमानाद्यगोचरतया कथानवतारप्रसङ्गस्य दर्शितत्वात्; अपरोक्षव्यवहारविषयत्वमिति शब्देन प्रत्यक्षज्ञानविषयत्वस्य कण्ठोक्तत्वात् तद्विपरीतावेद्यत्वाभिधाने मे माता वन्ध्येतिवद्व्याघाताच्च सुषुप्तिप्रलयमोक्षेष्वव्याप्तेश्च तदा व्यवहारस्यैवासंभवेन तद्विषयताभावात्। नाप्येकादशः। उक्तव्यवहारयोग्यताया धर्मत्वे मोक्षदशायामव्याप्तेरद्वैतवादिनामपसिद्धान्तापातात्, स्वरूपत्वे च ज्ञानस्वभावस्यात्मनो व्यवहारनिरूपणीयत्वात्सप्रतियोगिकत्वप्रसङ्गात्। तदेवं न स्वप्रकाशलक्षणं पश्यामः।

नापि प्रमाणम्। अथानुभूतिरनुभूतिव्यवहारहेतुप्रकाशोऽनुभूतित्वात् यन्नैवं तन्नैवं यथा घट इत्यनुमानं प्रमाणम्। नचाप्रसिद्धविशेषणः पक्षः; अनुभूतिव्यवहारस्य हेतुभूतः प्रकाशः परेषामपि हि प्रसिद्धस्ततोऽनुभूतेस्तत्स्वरूपत्वप्रतिज्ञोपपद्यते। न चानुव्यवसायज्ञाने साध्यस्य सिद्धत्वाद्भागे सिद्धसाधनता; तत्स्वरूपस्यैवासंमतत्वेन तस्य धर्मिभागतानङ्गीकारादिति चेत्, मैवम्; अनुभूतिव्यवहारस्य हेतुभूतः प्रकाशो यत्र सिद्धस्तत्र हेतोर्वृत्तौ, केवलव्यतिरेकित्वव्याकोपात्, अवृत्तौ सपक्षाप्रवेशिनोऽसाधारणानैकान्तिकत्वापातात्। वृत्तावपि भागे सिद्धसाधनताया दुष्परिहरत्वात्। न च स्वस्यासिद्धतामात्रेण परसिद्धे साध्यवति धर्मिणि सिद्धसाधनतायाः परिहारः। अन्यथाऽन्यथाख्यातिवादिभिः केनचिद्धेतुना रजत-

---

दशायां व्यवहारविषयत्वाभावादव्याप्तिः प्राभाकरमते शुक्तिरजतसंसर्गेऽतिव्याप्तिश्च। नवमे प्रदीपादौ घटादौ चातिव्याप्तिः। अदृष्टादौ सत्ताजातिविद्यमानतया लक्षणस्यासम्भवापत्तिः। दशमे, अव्याप्तिर्व्याघातश्च स्याताम्। एकादशे, निरुक्तयोग्यत्वस्य धर्मत्वे मोक्षकालेऽव्याप्तिरद्वैतिनामपसिद्धान्तापत्तिः, स्वरूपत्वे ज्ञानस्वभावस्यात्मनोऽपि व्यवहारनिरूपणीयत्वेन सप्रतियोगिकत्वप्रसङ्गः। तस्मान्न स्वप्रकाशलक्षणं सम्भवतीति भावः।

प्रमाणबलात्स्वप्रकाशत्वसिद्धे सति कथञ्चिल्लक्षणं कल्पनीयं स्यात् किन्तु प्रमाणमपि नात्र सम्भवति। एकदेशिनाऽनुमानमुपस्थाप्यते—अथानुभूतिरिति। परेषामपि=वैशेषिकानामपि। पक्षैकदेशेऽनुव्यवसाये सिद्धसाधनता दातुं न शक्यते पूर्ववादिनेत्याह—न चानुव्यवसायेत्यादिना। तदेतद्दूषयति पूर्ववादी—मैवमिति। सपक्षे हेतोर्वृत्तितया केवलव्यतिरेकित्वभङ्गः। सपक्षे हेतोरवर्तमानत्वेनासाधारणानैकान्तिकत्वापत्तिरित्याह—अनुभूतिव्यवहारस्येत्यादिना। स्वप्रकाशवादिनाऽनुव्यवसायो नाभ्युपेयते, एतावन्मात्रेण सिद्धसाधनतावारणं न सम्भवतीत्याह—न च स्वस्येति। विपक्षे बाधिकां प्रतिबन्दीमाह—अन्यथान्यथेति। अन्यथाख्यातिवादिनां प्रयोगः—इदं रजतमिति ज्ञानं, पुरोवर्त्तिवस्तुविषयकं, रजतेच्छाधीनपुरोवर्त्तिप्रवृत्तिहेतुत्वादित्यत्र वेदान्तिनाऽनिर्वचनीयपुरोवर्तिरजतविषयकत्वेन सिद्धसाधनतोक्तौ तत्रान्यथाख्यातिवादिना, नाहमनिर्वचनीयरजतमभ्युपगच्छामीति वचनमात्रेण चरितार्थो भवेदितिभावः। अथानिर्वचनीयवादिनं प्रति नायं प्रयोगः, तर्ह्यनुव्यवसायवादिनं प्रति भागे सिद्धसाधनतापत्तेर्नपूर्वप्रयोगो दर्शयितुं

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ज्ञानस्य पुरोवर्तिविषयत्वे साधिते वेदान्तिना चानिर्वचनीयपुरोवर्तिरजतविषयत्वेन सिद्धसाधनत्वेऽभिहिते नास्माकं तत्सिद्धमिति वचनमात्रेणान्यथाख्यातिवादिनश्चरितार्था भवेयुः। अथ नानिर्वचनीयवादिनं प्रति अयं प्रयोगस्तस्य सिद्धसाधनतापत्तेः; तर्ह्यनुव्यवसायवादिनं प्रत्यप्ययं प्रयोगो न स्याद्भागे सिद्धसाधनत्वप्रसङ्गात्, स्वप्रकाशवादिनं प्रति सिद्धसाधनत्वादप्रयोग इति मूकीभाव एव स्यात्। अथ विवादपदेनानुव्यवसायस्य व्यवच्छेदान्नास्य धर्मिभागतेति मतिः; तथापि तस्य साध्यविशेषणप्रसिद्धस्थलत्वेनाभ्युपगमाद्धेतोः केवलव्यतिरेकित्वाभावस्तदवस्थः; तदनङ्गीकारे च न विशेषणप्रसिद्ध्युपपत्तिः। अथ परं प्रत्येव तस्य प्रसिद्धिस्थलता; तर्हि तं प्रति केवलव्यतिरेकिप्रयोगायोगः। किं च व्यवहारहेतुत्वस्य प्रकाशविशेषणतायां, कैवल्ये तदभावात्स्वयंप्रकाशताभावः, व्यवहारहेतुत्वयोग्यतायां च स्वरूपातिरिक्तायां स एव दोषः। अथ तदुपलक्षितप्रकाशात्मत्वमेव साध्यं; तथाप्युपलक्षितत्वस्य साध्यान्तर्भावे स एव दोषः। अनन्तर्भावे च प्रकाशस्वरूपताया एव साध्यत्वात् तस्याश्चान्यत्रापि सिद्धत्वान्न केवलव्यतिरेक्यनुमानावकाशः। एतेनानुभूतिरनुभाव्या न भवत्यनुभूतित्वादित्यादिप्रयोगोऽपि परास्तः; तत्राप्यप्रसिद्धविशेषणताया दुष्परिहरत्वात्; ज्ञानं वेद्यं वस्तुत्वाद्घटवदिति प्रतिप्रयोगसंभवाच्च। नच हेत्वसिद्धिः; सत्ताधिकरणत्वलक्षणवस्तुत्वस्यावधीरितकल्पितविशेषस्यानुभूतित्वादिवद्धेतुत्वोपपत्तेः।

ननु किमिदं साध्यमानं वेद्यत्वं—वास्तवम्? उतावास्तवम्? आहोस्विद्व्यावहारिकम्? अथवा साधारणम्? आद्ये, साध्यविकलं निदर्शनमितरेषु सिद्धसाधनत्वमिति चेत्, मैवम्; घटादेरिव व्यावहारिकप्रमाणसिद्धवेद्यतापादनेऽपि स्वप्रकाशत्वासिद्धेः। किं

शक्यः। स्वप्रकाशवादिनं प्रति प्रयोगो निरर्थकस्तेन पुरस्तादेव स्वीकृतत्वान्मूकीभाव एव स्यात्। अथ कथञ्चिदनुव्यवसायस्य पक्षान्तर्गतत्वेऽपि दृष्टान्तत्वेन स्वीकृतत्वमावश्यकं, तत्रानुव्यवसायेऽनुभूतित्वहेतोर्वर्तमानत्वे केवलव्यतिरेकित्वभङ्गस्तदवस्थः, तत्रहेतोरवृत्तित्वे स्वीकारेऽसाधारणानैकान्तिकता, दृष्टान्तत्वेनानुव्यवसायाभ्युगमाभावे साध्याप्रसिद्धिस्तदवस्थेत्याह—अथविवादपदेनेत्यादिना। ननु प्रतिवादिनं प्रत्येव दृष्टान्तयितुमनुव्यवसायः स्वीक्रियते चेत्तर्हि तं प्रति निरुक्तकेवलव्यतिरेकिप्रयोगोऽयुक्तः। किञ्चानुभूतिव्यवहारहेतुत्वे सति प्रकाशत्वमिति साध्यशरीरे निविष्टं व्यवहारहेतुत्वं प्रकाशस्य विशेषणमुपलक्षणं वा। आद्ये, मुक्तिदशायां व्यवहारहेतुत्वाभावात्स्वप्रकाशत्वाभावप्रसङ्गः; व्यवहारहेतुत्वस्य स्वरूपभिन्नत्वे पूर्वोक्तदोषः। अन्तिमे तादृशहेतुत्वस्य साध्यान्तर्भावे मुक्तिकालीनात्मनि स्वप्रकाशताभावो दोषः, साध्यानन्तर्भावे च प्रकाशस्वरूपत्वस्यैव साध्यत्वात्तस्यान्यत्रानुव्यवसायेऽपि सिद्धत्वान्न केवलव्यतिरेकिप्रयोगावकाश इत्याह—किं च व्यवहारेत्यादिना। उक्तदोषः प्राचीनाचार्योक्तानुमानेऽप्याक्षिप्यते—एतेनेति। प्रत्यनुमानमाह—ज्ञानमित्यादिना। न च प्रत्यनुमाने स्वरूपासिद्धिरिति वाच्यं, सत्ताधिकरणत्वरूपवस्तुत्वस्य परित्यक्तकल्पिताकल्पितविशेषस्यानुभूतित्वमिवोभयवादिसम्मतत्वेन हेतुत्वोपपत्तेः स्वरूपासिद्ध्यभावात्।

ननु प्रत्यनुमाने साध्यं वेद्यं किमिति विकल्पयति—ननु किमिदमिति। आद्ये दृष्टान्ते साध्यवैकल्यं, घटादौ मायावादिना पारमार्थिकवेद्यत्वानभ्युपगमात्। अन्येषु त्रिषु पक्षेषु

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

चानुभूतिपदं स्वगोचरगोचरज्ञानजन्यं पदत्वात्कुम्भपदवत् । ननु किमत्र गोचरशब्देन विषयमात्रमुच्यते ? किंवा वाच्योऽर्थः ? अथ लक्ष्यो वा ? न तावत्प्रथमद्वितीयौ; सिद्धसाधनतापत्तेः । अभ्युपेयते हि अनुभूतिशब्दवाच्यस्यान्तःकरणवृत्तिविशिष्टस्य ज्ञानस्य ज्ञानगोचरता । तृतीये, तु मुख्यार्थविवक्षया प्रयुक्तगङ्गादिपदैर्व्यभिचार इति चेत्, मैवम्; लक्षकपदं पक्षीकृत्य लक्षकपदत्वेन लक्षकगङ्गादिपदवल्लक्ष्यज्ञानजन्यत्वानुमानात् । किंचानुभूतिपदाभिधेयस्य स्वप्रकाशत्वमभिधीयते भवद्भिः ? उत लक्ष्यस्य ? नाद्यः; अपसिद्धान्तापातात् । न द्वितीयः; प्रतिवादिनं प्रत्याश्रयासिद्धेः । सकलधर्मातीतस्याद्वितीयस्यानुभूतिपदलक्ष्यस्य परैरनङ्गीकारात् । किं च स्वप्रकाशतायां सति प्रमाणे तद्वेद्यत्वमसति च साधकाभावादेव न तत्सिद्धिरिति सैषौपनिषदानामुभयतःपाशा रज्जुरित्यलमतिविस्तरेण ।

अत्रोच्यते—'अपरोक्षव्यवहृतेर्योग्यस्याधीपदस्य नः ।
संभवे स्वप्रकाशस्य लक्षणासंभवः कुतः ॥१॥

न तावत्स्वयंप्रकाशे लक्षणासंभवः; अवेद्यत्वे सत्यपरोक्षव्यवहारयोग्यतायास्तल्लक्षणत्वात् । नच योग्यतालक्षणधर्माङ्गीकारेऽव्याप्तिर्मोक्षदशायां तदसंभवादपसिद्धांतापत्तिश्चेति शङ्कनीयं; योग्यत्वात्यान्ताभावानधिकरणत्वस्य तत्त्वात्, गुणवत्त्वात्यन्ताभावानधिकरणस्य द्रव्यत्ववत्, तेन नाव्याप्तिः नाप्यपसिद्धान्तः, काल्पनिकधर्माणां संसारदशायामभ्युपगमात् ।

व्यावहारिकस्य साधारणस्य वा वेद्यत्वस्यानुभूतौ मयाऽप्यभ्युपगतत्वेन सिद्धसाधनत्वात् । पूर्ववादी पूर्वोक्तदोषान् प्रतिक्षिपति—मैवं, घटादेरिवेति । वेद्यत्वेऽनुमानान्तरमाह—किञ्चानुभूतिपदमित्यादिना । स्वगोचरगोचरज्ञानजन्यं=स्ववाच्यविषयकज्ञानजन्यमित्यर्थः । स्वं कुम्भादिशब्दस्तद्वाच्यः कम्बुग्रीवादिमानर्थः, स एव विषयो यस्य ज्ञानस्य तज्जन्यं कुम्भादिपदमनुभूतिपदं च । दृष्टान्ते पदत्वहेतुरस्ति, तत्र निरुक्तं साध्यमप्यस्ति । अनेनानुभूतौ वेद्यत्वं सिद्धयति । अत्रापि वेदान्तिभिरुद्भावितं दूषणमनुवदति—ननु किमत्रेति । विकल्पितदोषान् पूर्ववादी निराचष्टे—मैवमिति । तृतीयविकल्पमङ्गीकृत्य दोषान् परिहरति—लक्षकपदमित्यादिना । लक्षकानुभूतिपदं स्वलक्ष्यविषयकज्ञानजन्यं, लक्षकपदत्वाद्लक्षकगङ्गादिपदवदित्यनुमानेन व्यभिचारवारणं भवति । किञ्च वेदान्तिनामनुमानेऽनुभूतिपदवाच्यस्य स्वप्रकाशत्वं लक्ष्यस्य वा, इति विकल्प्य दूषयति—किञ्चानुभूतीति । किञ्च स्वप्रकाशतायां प्रमाणस्य सत्त्वेऽसत्त्वे च पक्षे दोषसद्भावादौपनिषदानामुभयतः पाशारज्जुरिति पूर्वपक्षोपसंहार इत्याह—अलमतिविस्तरेणेति ।

एवं स्वप्रकाशविषये लक्षणप्रमाणे समर्थयितुमारभते—अत्रोच्यत इत्यादिना । तत्रादौ श्लोकेन लक्षणं संकलयति—अपरोक्षेति । अपरोक्षव्यवहृतेर्योग्यस्येत्यत्र व्यधिकरणे षष्ठ्यौ स्तः । अधीपदस्य=ज्ञानाविषयस्य । स्वप्रकाशस्येति पदं लक्ष्यलक्षणयोरुभयत्रान्वेति देहलीदीपन्यायेन । तथाऽस्माकं पक्षेऽवेद्यत्वे सत्यपरोक्षव्यवहारयोग्यत्वंस्वप्रकाशत्वमिति सम्भवे कुतो लक्षणासम्भवः प्रोच्यते ।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

"अक्षमा भवतः केयं साधकत्वप्रकल्पने ।
किं न पश्यसि संसारं तत्रैवाज्ञानकल्पितम्"

इति सुरेश्वराचार्यवचनात् । "आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति धर्मा" इति पञ्चपादिकाचार्यवचनाच्च । मोक्षदशायां च विवक्षितधर्माभावेऽपि कदाचित्सत्त्वेन तदत्यन्ताभावानधिकरणत्वस्य गुणाश्रयो द्रव्यमितिवत्सिद्धेः ।

अपरोक्षव्यवहारयोग्यघटादावतिव्याप्तिपरिहारार्थमवेद्यत्वे सतीति विशेषणम् । नचैतावदस्तु लक्षणमिति वाच्यम्; तथा सत्यतीतानागतयोर्नित्यानुमेयेषु च धर्मादिष्वतिव्याप्तेः । ननु तेषामप्यागमवेद्यत्वान्नावेद्यत्वमिति चेत्, मैवम्; फलव्याप्यतालक्षणवेद्यत्वस्य तत्राभावात् । तत्र विशिष्टशब्दप्रमाणबलात्तदाकारधीवृत्तिसमुल्लासमात्रादेव तद्व्यवहार इति वेदवादिनां प्रक्रिया । न च योगिप्रत्यक्षगम्यतया अपरोक्षत्वं धर्मादीनां; चोदनैकप्रमाणवेद्यत्वात्तेषाम् । न चैतावता सर्वदर्शित्वाभावो योगिनाम्; सर्वदर्शित्वशब्देन योग्यसर्वद्रष्टृत्वस्य विवक्षितत्वात्—

'यत्राप्यतिशयो दृष्टः स स्वार्थानतिलङ्घनात् ।
दूरसूक्ष्मादिदृष्टौ स्यान्न रूपे श्रोत्रवृत्तिता ।।'

इति न्यायात् । अतो धर्मादिव्यवच्छेदार्थमपरोक्षव्यवहारयोग्यत्वे सतीति विशेषणम् । नन्वज्ञानान्तःकरणतद्धर्मेच्छादिषु शुक्तिरजतादिषु च लक्षणातिव्याप्तिस्तदवस्था, तेषामपि

गुणवत्त्वात्यन्ताभावानधिकरणत्वं द्रव्यत्वमितिवद् योग्यत्वात्यन्ताभावानधिकरणत्वं स्वप्रकाशत्वमित्युक्तौ न मुक्तिदशायामसम्भवादव्याप्तिः, नाप्यपसिद्धान्तापत्तिः, काल्पनिकधर्माणां संसारदशायामभ्युपगमात् । तत्र सुरेश्वरपद्मपादाचार्ययोर्वचनमुद्धृतम् "अक्षमेति", "आनन्द" इति । न च संसारदशायां तत्कल्पनासम्भवेऽपि मुक्तौ तदभावादव्याप्तिरिति वाच्यम्, कदाचित्सत्त्वेनापि तद्धर्मात्यन्ताभावानधिकरणत्वाल्लक्षणसमन्वय इत्याह—मोक्षदशायामित्यादिनेति ।

घटादावतिव्याप्तिवारणायावेद्यत्वे सतीति दलम् । अतीतादिषु नित्यानुमेयेषु च धर्मादिष्वतिव्याप्ति वारयितुमपरोक्षव्यवहारयोग्येतिविशेषणमिति पदकृत्यमाह—अपरोक्षेत्यादिनेति । ननु नित्यानुमेयधर्मादीनामप्यागमवेद्यत्वेनावेद्यत्वाभावान्न तत्रातिव्याप्तिर्येनापरोक्षव्यवहारयोग्यत्वदलं सार्थकमिति चेन्न, फलव्याप्यत्वरूपावेद्यत्वस्य धर्मादिष्वभावादिति भावः । विषयसन्निकर्षदशायां विषयाकारवृत्तौ प्रतिफलितं चैतन्यं फलमित्युच्यते । विधिवाक्यरूपविशिष्टशब्दप्रमाणात्परोक्षबुद्धिवृत्तिसमुदयमात्रादेव धर्मादिव्यवहारो भवतीति वेदवादिप्रक्रिया; न तत्र धर्माद्याकाराऽपरोक्षा बुद्धिवृत्तिर्भवति, येन तत्र चैतन्यमभिव्यज्येत । चोदनाप्रमाणैकगम्यत्वात्तेषां धर्मादीनां न योगिप्रत्यक्षत्वेनापरोक्षत्वं शङ्कनीयमित्याह—न च योगीत्यादिनेति । योगिनां सर्वदर्शित्वशब्देन योग्यसर्वदर्शित्वमभिप्रेतम् । तथा चाह भट्टपादः—यत्राप्यतिशय इति । प्रमाणबलात्सर्वशब्दार्थः सङ्कोचनीयः । योग्ये विषये एव दूरवर्तिनि सूक्ष्मे च योगिनां दर्शनं, स्वार्थातिलङ्घने तु रूपादौ श्रोत्रवृत्तित्वप्रसङ्ग इति भट्टपादाभिप्रायः । अतो धर्मादिष्वतिव्याप्तिवारणार्थं स्वप्रकाशलक्षणे विशेष्यदलमावश्यकम् । केवलसाक्षिवेद्येषु निरुक्तलक्षणा-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

फलव्याप्यत्वाभावेनावेद्यत्वात्, अहमज्ञ इत्याद्यपरोक्षव्यवहारयोग्यत्वाच्चेति चेत्, सत्यम्; अवेद्यत्वेऽपि नापरोक्षव्यवहारयोग्यता तेषाम्, अध्यस्ततयैव तेषां सिद्धेः। ननु तथाप्यपरोक्षमिति व्यवहारदर्शनात्तद्योग्यता तत्र कल्पनीयेति चेत्, मैवम्; रजतादिव्यवहारायोग्येऽपि शुक्तिशकलादौ रजतादिव्यवहारदर्शनात्। नन्वेवं सत्यवेद्यत्वविशेषणस्य न व्यवच्छेद्यमस्ति, त्वन्मते घटादेरप्यध्यस्ततया अपरोक्षव्यवहारयोग्यत्वाभावात्, मैवम्; व्यवहारदशायां तेषां प्रत्यक्षप्रमाणविषयाणामपरोक्षव्यवहारयोग्यताङ्गीकारात्। तथाप्यवेद्यत्वे सत्यपरोक्षत्वमेव लक्षणमस्तु व्यभिचाराभावादिति चेत्, सत्यम्; अपरोक्षज्ञानविषयत्वेनैव घटादेरपरोक्षत्वाङ्गीकाराद्, अत्रापि तथात्वाद्व्याघात इति विभ्रमो माभूदिति तद्व्यवहारेणैव प्रतिवादिनामपि सम्प्रतिपन्नेन तदेव स्फुटीक्रियत इति न कश्चिद्दोषः। कथं तर्हि अवेद्यस्य व्यवहारयोग्यत्वमिति चेत्; किमिदमवेद्यत्वे व्यवहारविषयत्वं न स्यादित्यनिष्टप्रसञ्जनम्? उत व्यवहारविषयत्वाद्वेद्यत्वानुमानम्? नाद्यः; आपाद्यापादकयोरुभयोरपि परेषामप्रसिद्धेः। नेतरः; तस्य सप्रतिसाधननिराससमये निराकरिष्यमाणत्वात् तस्मादनाविलं स्वप्रकाशलक्षणम्।

प्रमाणमपि—अनुभूतिः स्वयंप्रकाशा अनुभूतित्वाद्यन्नैवं तन्नैवं यथा घट इत्यनुमानम्। न चाप्रसिद्धविशेषणत्वम्; यतः—

सामान्यतोऽनुमानेन प्रसिद्धेऽपिविशेषणे।
कथं कथय पक्षोऽयमप्रसिद्धविशेषणः ॥२॥

तथा हि—वेद्यत्वं किञ्चिन्निष्ठात्यन्ताभावप्रतियोगि, धर्मत्वात् शौक्ल्यवदिति सामान्यतो दृष्टानुमानेनानिर्धारितधर्मीविशेषनिष्ठस्यावेद्यत्वधर्मस्य प्रसिद्धत्वात्, केवलव्यतिरेकिणश्चोभयवादिसम्प्रतिपन्नापरोक्षव्यवहारयोग्यानुभूतिविशेषावलम्बनताया एव समर्प्यमाण-

---

तिव्याप्तिमाक्षिप्य परिहरतीति—नन्वज्ञानेत्यादिनेति। अध्यस्तत्वेन केवलसाक्षिवेद्यवस्तूनामवेद्यत्वेऽपि नापरोक्षयोग्यतास्तीति भावः। न चैवमहमज्ञोऽहमिच्छामीत्यादावपरोक्षव्यवहारदर्शनात्तत्रापि योग्यता कल्पनीयेति वाच्यम्, रजतादिव्यवहारायोग्येऽपि शुक्तिखण्डे रजतादिव्यवहारदर्शनात्। नन्वेवं रजतादिवद्घटादीनामप्यध्यस्तत्वेनैवापरोक्षव्यवहारसम्भवान्न तत्रापि योग्यताऽस्ति, येन तत्रातिव्याप्तिवारणायावेद्यत्वविशेषणं सार्थकमिति चेन्न, व्यवहारदशायां प्रमाणविषयघटादीनामपरोक्षव्यवहारयोग्यतास्वीकारात्। एवमप्यवेद्यत्वपदस्यापरोक्षत्वपदस्य च सार्थक्येऽपि व्यवहारयोग्यतेति विशेषणं निरर्थकमित्याशङ्कते—तथापीति। विभ्रमवारणाय तद्विशेषणं सफलमित्याह—सत्यमित्यादिनेति। व्याघातमाशङ्कते—कथं तर्हीति। विकल्प्य दूषयति—किमिदमिति।

स्वप्रकाशत्वे लक्षणं समर्थयित्वा प्रमाणं समर्थयितुं प्रारभते—प्रमाणमपीति। स्वप्रकाशत्वसाधकानुमाने साध्याप्रसिद्धिदोषं श्लोकेन वारयति—सामान्यत इति। तत्र सामान्यतो दृष्टं स्फुटयति—तथा हीत्यादिना। उदयनरीत्या केवलव्यतिरेकिणः प्रामाण्यमुपपाद्य लीलावतीकाररीत्या तत्र प्रामाण्य-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्वात् नाप्रसिद्धविशेषणता । यद्वा यद्विपर्यये असमीहितप्रसक्तिस्तत्क्वचिन्मानयोग्यमिति सामान्यव्याप्तिः । इह चानुभूतिरनुभाव्या भवति नवेति वादिविप्रतिपत्तेः संशये सत्यनुभाव्यत्वे सत्यसमीहितप्रसक्तेस्तद्विपर्ययस्य सामान्यतो मानयोग्यत्वाधिगमात्, विशेषप्रमाणापेक्षायां व्यतिरेकिण उपन्यासात् नाप्रसिद्धविशेषणता । अन्यथा कथमिच्छादीनामष्टद्रव्यव्यतिरिक्तद्रव्याश्रितत्वं नैयायिकादयोऽपि साधयेयुरष्टद्रव्यव्यतिरिक्तद्रव्यस्याप्रसिद्धावप्रसिद्धविशेषणता, प्रसिद्धौ च हेतोस्तत्र वृत्तावन्वयव्यतिरेकितया केवलव्यतिरेकित्वासम्भवः, अवृत्तौ चासाधारणानैकान्तिकतापत्तिः । न चैवं सत्यप्रसिद्धविशेषणताया अदूषणतापत्तिः; उक्तसामान्यतोदृष्टानुमानगोचरत्वासम्भवे शशविषाणोल्लिखिता भूरित्यादौ तस्याः सावकाशत्वात् । अथवा अयं घट एतद्घटान्यत्वे सति वेद्यत्वानधिकरणान्यः पदार्थत्वात्पटवदित्यादिमहाविद्याप्रयोगैरप्यवेद्यत्वप्रसिद्धिरप्यूहनीया ।

नाप्रसिद्धविशेष्यतापि; अनुभूतेः प्रसिद्धत्वात् । अतएव नाश्रयासिद्धिरपि हेतोः । नापि स्वरूपासिद्धिः; कल्पितव्यक्तिभेदनिष्ठस्य चन्द्रत्वसामान्यस्येवानुभूतित्वसामान्य-

---

मुपपादयति—यद्वेति । व्याप्तिविशिष्टहेतोः पक्षधर्मतामाह—इह चेति । सन्दिग्धस्थले वादिविप्रतिपत्तौ वेद्यत्वस्वीकारेऽनिष्टानवस्थादिप्रसक्तिस्तत्र "यद्विपर्ययेऽसमीहितप्रसक्तिस्तत्किञ्चिन्मानयोग्यमि"त्यनुमानं प्रवर्तते, न सर्वत्र । सामान्यतोऽनुमानेन मानयोग्यत्वाधिगमे सति विशेषप्रमाणापेक्षायां व्यतिरेकिण उपन्यासान्न साध्याप्रसिद्धिदोषप्रसक्तिः । अन्यथा, इच्छादीनामष्टद्रव्यातिरिक्तद्रव्याश्रितत्वेनात्मसाधने नैयायिकादिष्वपि सर्वदोषप्रसक्तिस्तुल्यैवेत्याह—अन्यथेत्यादिना । अप्रसिद्धविशेषणतायाः स्थलं दर्शयति—शशविषाणोल्लिखिता भूरिति । वक्ररीतिं रोचयतो वादिनः प्रति साध्यप्रसिद्धिमुपक्रमते—अथवेति । तत्र महाविद्यानुमानप्रयोगः—अयं घट इत्यादि । महती विद्या-महाविद्या, तदुपयोग्यनुमानं महाविद्यानुमानम् । तत्र दृष्टान्ते साध्यप्रसिद्धिरन्यरीतया, पक्षे साध्यसिद्धिरन्यरीतया च क्रियते । एतद्घटान्यत्वविशिष्टवेद्यत्वमेतद्घटं विहाय सर्वत्र पटादौ तिष्ठति शुद्धवेद्यत्वं तु सर्वत्रास्ति । तादृशविशिष्टवेद्यत्वाधिकरणं पटादिकम्; अनधिकरणमेतद्घटः पक्षः, तद्भेदः पुनर्दृष्टान्ते पटादौ समागतः । एवञ्च यत्र पदार्थत्वं हेतुस्तत्रैतद्घटान्यत्वविशिष्टवेद्यत्वानधिकरणान्यत्वं साध्यमप्यस्ति । अतो दृष्टान्ते साध्यहेत्वोः साहचर्यं प्रसाध्य पक्षे महाविद्यानुमानेन साध्यं निश्चेतुं सुलभमिति । इदमत्रावधेयम्, एतद्घटान्यत्वं विशेषणं वेद्यत्वं च विशेष्यं, यत्र विशेषणाभावप्रयुक्तो विशिष्टाभावो न सम्भवति, तत्र विशेष्याभावप्रयुक्तो विशिष्टाभावोऽवश्यं ग्राह्यः । अत्र दृष्टान्ते सत्यपि विशेषणाभावप्रयुक्तविशिष्टाभावे पक्षे तदसम्भवाद्विशेष्याभावप्रयुक्त एव विशिष्टाभावो ग्राह्यः, स च वेद्यत्वाभावरूपः । तस्मादवेद्यत्वसिद्धिरिति भावः ।

आश्रयासिद्धिदोषमुद्भाव्य दूषयति—नाप्रसिद्धेत्यादिना । विशेष्यमाश्रयः । विशेष्यरूपपक्षस्य प्रसिद्धित एव हेतोराश्रयासिद्धिर्निराकृता वेदितव्या । स्वरूपासिद्धिं वारयति—नापीति । मिथ्यात्ववादे कल्पितस्य साधकत्वाभ्युपगम्यमानेन कल्पितानुभूतिव्यक्तिभेदमादाय चन्द्रत्वसामान्यवदनुभूतित्वसामान्यस्वीकारे न सिद्धान्तविरोधः शङ्कनीयः, कल्पितस्य प्रतिबिम्बादिवत्साधकत्वाभ्युपगमेऽदोषादि-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्याभ्युपगमे सिद्धान्ताविरोधात् । कल्पितस्यापि प्रतिबिम्बादिवत्साधकत्वसम्भवात् । न च प्रतिवाद्यसिद्धिस्तेनाप्यनुभूतित्वसामान्यस्याभ्युपगमात् । न च कल्पिताकल्पितत्ववैषम्याद्धेतोरन्यतरासिद्धिराशङ्कनीया, अवधीरितकल्पिताकल्पितविशेषस्यानुभूतित्वमात्रस्योभयवादिसिद्धत्वात् । अन्यथा धूमवत्त्वादावपि तदेतद्देशनिष्ठत्वादिविकल्पेनासिद्ध्यादेर्दुष्परिहरत्वात् । न च व्याप्यत्वासिद्धिः; सोपाधिकस्यैव तथात्वात्, केवलव्यतिरेकिणि चोपाधेरसंभवात् । उपाधिर्हि—साध्यव्यापकत्वे सति साधनाव्यापकः, स चान्वयव्यतिरेकी कश्चिद्धर्मः । स कथं केवलव्यतिरेकिणि पक्षव्यतिरिक्तभूमौ साध्येनान्वयी स्यात् । न च पक्षे साध्येनान्वयः; तत्र साध्यस्याद्यापि संदिग्धत्वात् । निश्चये च सिद्धं नः समीहितमिति किमुपाधिः करिष्यति । पक्षे चोपाधिवृत्तौ; साधनव्यापकता च दुर्वारा । न च साध्यसद्भावे मा भूदुपाधिः, साध्याभावे पुनरुपाधिः कश्चिद्भविष्यतीति वाच्यम्, तथाहि—यत्रोपाधिरस्ति तत्र साध्यं नास्तीति साध्याभावस्य गमकत्वेनोपाधिरेष्टव्यः । अन्यथोपाधिसद्भावेऽपि साध्याभावो व्यापकतया न वर्तते चेत्, उपाधिसद्भावे साध्यं स्यात् । तच्च न पक्षे; तत्रोपाधिसद्भावे तस्य साधनव्यापकत्वप्रसङ्गात् । तस्मादन्यत्रोपाधिसत्त्वे साध्यस्य सत्त्वं स्यादिति वाच्यम् । तथा च केवलव्यतिरेकित्वभङ्गप्रसङ्गः । प्रकृते चानुभूतिर्वेद्या वस्तुत्वाद्घटवदिति केवलान्वयिनानुमानेन हि स्वयंप्रकाशत्वव्यतिरेको वक्तव्यः । तत्र च नोपाधिः संभवति; साधनाव्यापकत्वस्य वक्तुमशक्यत्वात् । तदेवं नासिद्धो हेतुः ; नापि विरुद्धः; वेद्येषु विपक्षेष्वनुभूतित्वहेतोरवृत्तेः । नाप्यनैकान्तिकः; विपक्षाद्व्यावृत्तैरेव । नाप्यसाधारणः; सपक्षाभावात् । विपक्षे बाधकतर्का-

---

त्याह—कल्पितस्यापीति । न चानुभूतित्वहेतौ कल्पिताकल्पितयोर्वैषम्यात्कथं नान्यतरासिद्धिरित्यत आह—अवधीरितेति । अवधीरितः =परित्यक्तः । पूर्वोक्तपरिहारास्वीकारे वादिपक्षे व्याहतिबाधकमाह —अन्यथेति । धूमवत्त्वादिहेतावपि महानसीयधूमस्य हेतुत्वे स्वरूपासिद्धिः, पर्वतीयधूमस्य हेतुत्वे दृष्टान्ते साधनवैकल्यमिति दोषोऽपरिहार्य इत्याह—तदेतद्देशनिष्ठेति । प्रकारान्तरेणाशङ्कितामसिद्धिं वारयति—न च व्याप्यत्वासिद्धिरिति । व्यतिरेकिणि पक्षभिन्नस्थले साध्येन सहान्वयो दर्शयितुमशक्यः । साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधिः, सोपाधिको हेतुर्व्याप्यत्वासिद्ध इति हेत्वाभासस्थितिरित्याह—उपाधिर्हीति । पक्षेऽद्यापि-साध्यस्य सन्दिग्धत्वान्न तत्रोपाधेः साध्येन सहान्वयः सम्भवतीत्याह—न च पक्ष इति । पक्षे साध्यस्य निश्चये नोपाधिः क्षतिकरः । पक्षे चोपाधेर्वर्तमानत्वे साधनव्यापकत्वं तत्र दुर्वारमित्याह—पक्षे चेति । अथ माभूदुपाधिः साध्यसमानाधिकरणकः, साध्याभावे वस्तुत्वादिः कश्चिदुपाधिर्भविष्यतीत्याशङ्क्य परिहरति—न च साध्येति । वस्तुत्वादिः कश्चिदुपाधिः साध्यगमकः स्यात्तर्हि यत्रोपाधिस्तत्र साध्याभाव इति साध्याभावस्य व्याप्यत्वमुपाधौ स्वीकार्यमिति दर्शयति—तथाहि यत्रेति । उपाधौ साध्याभावव्यापकत्वे दोषमाह—अन्यथेति । अथ पूर्वोक्तदोषराशिभिया साध्याभावस्य व्यापकत्वमुपाधौ मा भूत्, व्याप्यत्वे को दोष इत्यत आह—प्रकृते चेति । वस्तुत्वं नोपाधिर्भवितुमर्हति, तस्य केवलान्वयितया साधनाव्यापकत्वं वक्तुमशक्यमिति नानुभूतित्वहेतावसिद्धिरिति भावः । अनुभूतित्वहेतौ विरोधमाशङ्क्य दूषयति—नापि विरुद्ध इति । विपक्षेषु वेद्यघटादि-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भावात्सन्दिग्धानैकान्तिकतेति चेत्, मैवम्, अनुभूतेरनुभाव्यत्वेऽनवस्थापातात्, न च वाच्यमवश्यवेद्यत्वाभावान्नानवस्था, व्यवहारस्य तत्स्वरूपसत्तामात्रेणाप्युपपत्तेरिति; तद्विषयप्रमाणानुदये तत्सत्ताया अप्यनिश्चयात् तत एव व्यवहार इत्यप्यसिद्धेः। अथ यदा कदाचित्तत्सत्ताजिज्ञासोदये व्यवहारादिना केनचिल्लिङ्गेन सापि प्रमीयत इति मतं, तन्न; घट इति घटमनुभवामीति चानुभूतिद्वयातिरिक्तायास्तत्तदनुभूतिपरम्परावगाहिकायाः कस्याश्चिदनुभूतेरनुभवागोचरत्वात्। अन्तरेण तदनुभवं तत्सत्ताभ्युपगमे, प्रमेयसत्ताया अपि तथाभ्युपगमोपपत्तौ प्रमाणगवेषणावैयर्थ्यापातात्, तत्रापि च प्रमाणगवेषणायां पूर्वोक्तानवस्था तदवस्थैव स्यात्। अथ सा स्वविषयप्रमाणमन्तरेण स्वभावभेदादेव स्वविषयभेदव्यवहारं जनयेत्; सैव तर्हि तथा स्वव्यवहारमिति व्यर्थाऽनुभूतिपरम्पराभ्युपगतिः। तदेवमनुभूतेरनुभाव्यत्वेऽनुभूतिस्वरूपासिद्धिप्रसङ्गस्यैव विपक्षे बाधकतर्कत्वात्, न संदिग्धानैकान्तिकता। किञ्चानुभूतिरर्थप्रकाशनसमये यदि न प्रकाशेत, तथा सत्यनन्तरक्षणे जिज्ञासोस्तत्र संदेहो, विपर्ययो वा विपरीतप्रमा वोदियात्। न च कश्चिदमुमद्राक्षीन्नो वा भवानिति पृष्टोऽनन्तरक्षणे संदिग्धे, विपर्यस्यति, संविदभावं वा प्रमिणोति, किन्तु निश्चिनोत्येव 'इदमहमद्राक्षम्' इति तेन प्रकाशमानैवानुभूतिरर्थे व्यवहारं जनयतीति युक्तम्। न च सुखादिवदन्याधीनप्रकाशत्वेऽपि संशयाद्यविषयत्वोपपत्तिः, सति धर्मिणि तद्वदेवावश्यवेद्यत्वेऽनवस्थादौस्थ्यात्। किञ्च येन मनःसंयोगेन घटानुभूतिर्जनिता तेनैवानुव्यवसायस्यापि जन्म? उत संयोगान्तरेण? नाद्यः, अनुव्यवसायं प्रति कर्मकारकतया जनकस्य व्यवसायस्य तज्जन्यानुव्यवसायस्य च यौगपद्यायोगात्, करणस्य प्रत्ययपर्याये सामर्थ्यानङ्गीकाराच्च, यतोऽसमवायिकारणभेद एव ज्ञानभेदहेतुरभ्युपेयते।

ऽनुभूतित्वहेतोरवर्तमानत्वात्। विपक्षे हेतोरवर्तमानत्वान्न साधारणानैकान्तिकतेति। एवं सपक्षाभावादसाधारणानैकान्तिकतापि नास्ति। विपक्षेऽनुभूतेरप्यनुभाव्यत्वस्वीकारेऽनवस्थादोष एव बाधकस्तर्को न सन्दिग्धानैकान्तिकता शङ्कनीया। अनुभूतौ नियमतोऽनुभाव्यत्वानङ्गीकारेऽनुभूतेः स्वरूपसत्तामात्रेणापि व्यवहारसिद्धौ तद्विषयप्रमाणानुदयेऽनुभूतिसत्ताया अप्यनिश्चयेन व्यवहारासिद्धेः। अथ तात्पर्यपरिशुद्धावुदयनेनोक्तं पक्षमाशङ्कते—अथ यदेति। तं निराचष्टे—तन्नेत्यादिनेति। अतोऽनुभूतौ वेद्यत्वेऽनुभूतिस्वरूपासिद्धिरेव विपक्षे बाधकस्तर्कस्तत्र न सन्दिग्धानैकान्तिकतेति भावः। किञ्चानुभूतौ संशयविपर्ययविरहादपि तस्याः स्वप्रकाशत्वमभ्युपेयमित्याह—किञ्चानुभूतिरिति। सति धर्मिणि=सत्यनुभवे द्वितीयज्ञाने वा सति। तद्वदेव=सुखादिवदेव, प्रथमज्ञानवदेव वार्थः। अथात्ममनःसंयोगो ज्ञानस्यासमवायिकारणमभ्युपेयते तार्किकैः। तत्र येनात्ममनःसंयोगेन घटानुभूतिरूपव्यवसायस्य जन्माभूत् तेनैव संयोगेनानुव्यवसायस्य जन्माभ्युपगम्यते चेत्तर्हि कार्यकारणयोर्युगपदुत्पत्तिरनुभवविरुद्धाभ्युपेया। असमवायिकारणभेद एव ज्ञानभेदहेतुस्तवाभिमत इत्याह—किञ्च येनेति। असमवायिकारणस्य ज्ञानभेदानङ्गीकारे दोषमाह—अन्यथेति। अथ भिन्नेनात्ममनःसंयोगेन मयानुव्यवसायस्य जन्माभ्युपेयते, तर्हि व्यवसायजन्मापेक्षयाऽनेकक्षणविलम्बेन जायमानेनानुव्यवसायेन पूर्वजातस्य व्यवसायस्यापरोक्षत्वं कथं स्यात्। ग्राहकज्ञानोत्पत्तिसमये गृह्यमाणज्ञानस्याभावादित्यर्थः। अथ चक्षुरादिवदप्रकाशमानस्यापि

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अन्यथापेक्षणीयान्तरासम्भवेन युगपदेव घटानुभवस्मरणयोरनुभवान्तरस्य च तद्विषयस्योत्पत्तिप्रसङ्गात्। अक्रमाच्च कारणात्कार्यभेदक्रमायोगात्, बाह्यसामग्र्यवच्छेदकक्रमभेदेन कार्यक्रमाभ्युपगमे युगपदेव सम्प्रयुक्तेषु घटपटादिषु युगपदेवानेकज्ञानजन्मप्रसङ्गात्। न द्वितीयः; घटज्ञानोदयसमये मनसि क्रिया ततो विभागस्ततः पूर्वसंयोगविनाशस्तत उत्तरसंयोगोत्पत्तिस्ततो ज्ञानान्तरमित्यनेकक्षणविलम्बेनोत्पद्यमानस्यापरोक्षतया पूर्वज्ञानग्राहकत्वानुपपत्तेः। किञ्च चक्षुरादिवदप्रकाशमानस्यैव ज्ञानस्य स्वातिरिक्तज्ञानजननेनार्थव्यवहारहेतुत्वाभावात् जडानां च स्वतः परस्परतो वा प्रकाशमानत्वायोगात् ज्ञानमपि न प्रकाशते चेत्, किमपि न प्रकाशेतेति जगदान्ध्यप्रसङ्ग इत्यादिविपक्षबाधकस्तर्क उन्नेयः। ननु घटज्ञानवानहमस्मि ज्ञातो घट इति प्रत्यक्षेणैवानुभूतेर्वेद्यत्वप्रतीतेः कालात्ययापदिष्टतेतिचेत्, न; वेद्यत्वव्यतिरेकेण तस्याः स्वतःस्फुरणेनापि तादृग्व्यवहारोपपत्तेः। किञ्च विदितो घट इत्यत्रानुव्यवसायेन घटस्यैव विदित्वमवसीयते न तु वित्तेः, विदितत्वस्य घटविशेषणत्वात्। अपि चानुभूतेः प्रत्यक्षतायामपि तत्प्रत्यक्षेणैव तदनुभाव्यत्वस्याप्रत्यक्षीकरणान्न प्रत्यक्षविरुद्धता। अन्यथानुव्यवसायेन व्यवसायस्य स्वविशेषितवेद्यत्वग्रहणे विशेषणतया स्वस्यापि स्वेन वेद्यत्वापातात् सौगतमतानुमतिप्रसङ्गः। न च वेद्यत्वापादकवस्तुत्वाद्यनुमानविरोधः, व्याप्तिग्रहणासिद्धेः। तथाहि—वस्तुत्वाद्वेद्यत्वं साधयता यद्यद्वस्तु तत्तद्वेद्यमिति व्याप्तिरभ्युपेया। तथासत्यस्या व्याप्तेर्ग्राहिका संविद्व्याप्तिग्रहणसमये स्फुरति ? न वा ? आद्ये, स्वेनैव स्फुरणे सौगतमताभिमतं स्वयंप्रकाशत्वं त्वयाभ्युपगतं स्यात्। द्वितीये तु संविल्लक्षणवस्तुविशेषस्यास्फुरणादेव सर्वोपसंहारवती व्याप्तिरेवास्तमियात्तत्र कुतोऽनुमानप्रसरः, कुतस्तरां च प्रकृतस्य हेतोः सप्रतिसाधनता। अपि च भाट्टानां ज्ञाततायां व्यभिचारात्, नैयायिकादेश्च वेद्यत्वस्यापि धर्मतयात्यन्ताभावप्रति-

---

ज्ञानस्य सर्वार्थव्यवहारहेतुत्वे सर्वस्फुरणानुपपत्तिरूपं बाधकमाह—किञ्च चक्षुरादीति। अथानुभूतिस्वप्रकाशत्वानुमाने बाधदोषमाह—नन्विति। बाधं वारयति—न, वेद्यत्वेति। घटज्ञानवानहं, ज्ञातो घट इत्यादौ घटस्यैव विदितत्वं न तज्ज्ञानस्य व्यवसायस्य, तस्य स्वतः स्फुरणेनापि तादृग्व्यवहारोपपत्तेः। प्रकारान्तरेणानुभूतौ वेद्यत्वं वारयति—अपि चानुभूतेरिति। अस्तु तावदनुभूतौ प्रत्यक्षत्वं, किन्तु तत्प्रत्यक्षेणानुभूतिगतानुभाव्यत्वं प्रत्यक्षयितुं शक्यं चेत् तदा कथमनुभूतौ स्वप्रकाशत्वानुमाने प्रत्यक्षेण बाधप्रसक्तिदोषः। अन्यथाऽनुव्यवसायेन स्वीयविशिष्टवेद्यत्वग्रहणाङ्गीकारेऽनुव्यवसायस्यापि स्वेन वेद्यत्वापातात् सौगतमतानुमोदनप्रसक्तिः। अथ वेद्यत्वसाधकवस्तुत्वहेतुकानुमानेनोक्तं विरोधं वारयति—न च वेद्यत्वेत्यादिना। वेद्यत्वसाधकानुमाने "यद्यद्वस्तु, तत्तद्वेद्यमि"ति व्याप्तिरभ्युपेया, तदायं प्रश्नो जागर्ति, यत्किल निरुक्तव्याप्तिग्रहणसमये तद्ग्राहकज्ञानं स्फुरति न वा ? आद्ये स्वेनैव स्वस्य स्फुरणे बौद्धाभिमतस्वप्रकाशत्वापत्तिः। स्वस्फुरणं प्रति स्वस्य हेतुत्वानङ्गीकारे वेदान्तसिद्धान्ताभ्युपगमप्रसङ्गः। द्वितीये ज्ञानरूपवस्तुविशेषस्य स्फुरणाभावे सर्वोपसंहारवती व्याप्तिरेव समाप्येत, तत्र वस्तुत्ववेद्यत्वयोर्व्याप्तिग्रहाभावे कुतोऽनुमानोदयः, कुतस्तरां वाऽनुभूतित्वहेतौ सप्रतिसाधनताप्रसङ्गः। वस्तुत्वहेतौ भाट्टानुमतं विरोधं दर्शयति—अपि च भाट्टानामिति। नैयायिकादिमते वेद्यत्वं

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

योगित्वादवेद्यस्यापि कस्यचित्संभवेन वस्तुत्वादेः केवलान्वयित्वेनाभिमतस्यापि संभावितविपक्षतया विपक्षबाधकतर्कमन्तरेणाप्रयोजकत्वात् । नह्यनुभूतेरवेद्यत्वे वस्तुत्वानुपपत्तिः; स्वतःसिद्धतायामपि तदुपपत्तेः । लक्ष्यत्वन्यायविषयत्वहेत्वोरपि यथोक्तमूहनीयम् ।

नच लक्षकपदत्वेन लक्ष्यविषयज्ञानजन्यत्वमनुमेयं; हेतोरसिद्धत्वात् । न ह्यनुभूतिपदमनुभूतिं लक्षयतीति तवाभिमतं, तद्वाचकत्वेनैव स्वीकारात् । किञ्च लक्ष्यज्ञानशब्देन लक्ष्यकर्मकं स्फुरणं ? किंवा तद्विषयम् ? उत स्फुरणमात्रं ? किंवा तद्विषयान्तःकरणवृत्तिर्विवक्ष्यते ? नाद्यः, अतीताद्यर्थलक्षकपदेषु व्यभिचारात् । नेतरे; सिद्धसाधनत्वात् । अस्ति हि तत्स्वभावस्यापि स्फुरणस्य तद्व्यवहारजनकत्वेन तद्विषयत्वम् । अस्ति च स्फुरणमात्रमनुभूतेः स्फुरणरूपत्वात्तदाकाराया वृत्तेः स्वीकाराच्च । अनुभूतिपदवाच्यस्य लक्ष्यस्य वा स्वप्रकाशत्वमित्यपि विकल्पोऽनुपपन्नः, उभयवादिसंप्रतिपन्नस्फुरणमात्रस्य स्वकाशत्वप्रतिपादनात् । अन्यथा वेद्यत्वसाधनेऽपि तवास्य विकल्पस्य दुष्परिहरत्वात् । नन्वेवमपि घटः स्वयंप्रकाशो घटत्वाद्यन्नैवं तन्नैवं यथा पट इत्याभाससमानयोगक्षेमता हेतोरिति चेत्, मैवम्; पृथुबुध्नोदराकारस्य घटशब्दवाच्यस्य स्पर्शरूपादिमतश्चक्षुःस्पर्शनप्रमाणसिद्धत्वेन संमतस्य स्वप्रकाशत्वसाधने प्रत्यक्षविरोधादतद्विषयस्य चाप्रसिद्धत्वेन धर्म्यसिद्धिः । न चात्राप्यवेद्यस्यानुभूतित्वमप्रसिद्धमिति वाच्यम्; तथा सति तस्या

केवलान्वयित्वेनाभिमतं, तस्यापि धर्मतयाऽत्यन्ताभावप्रतियोगित्वेन कुत्रचिदवेद्यत्वमपि सम्भवति, स चावेद्यो, वस्तुत्वादेर्हेतोर्विपक्षस्तत्र केवलान्वयित्वेनाभिमतस्य वस्तुत्वादेर्हेतोर्विपक्षबाधकतर्कं विनाऽप्रयोजकत्वात् । एवं भाट्टमते स्वप्रकाशज्ञाततायां वेद्यत्वं नाभिमतं, तत्र वस्तुत्वादेर्हेतोर्वर्तमानतया सव्यभिचारः । न चानुभूतौ वेद्यत्वानभ्युपगमे वस्तुत्वं नोपपद्येतेति वाच्यम्; स्वतः सिद्धावप्यनुभूतौ वस्तुत्वोपपत्तेः । एवं लक्ष्यत्वन्यायविषयत्वहेतावपि पूर्वोक्तविकल्पा ऊहनीयाः ।

ननु लक्षकमनुभूतिपदं, स्वलक्ष्यविषयकज्ञानजन्यं, लक्षकपदत्वात्, लक्षकगङ्गादिपदवदित्यनुमानेन लक्षकानुभूतिपदेऽपि लक्ष्यविषयकज्ञानजन्यत्वमनुमेयमिति चेन्न, हेतोरसिद्धेःस्वरूपासिद्धेः । नह्यनुभूतिपदे लक्षकत्वं तवाभिमतं,तद्वाचकत्वेन स्वीकारात् । न चैवमप्यनुभूतौ वेद्यत्वमनुमातुं शक्यम्; विकल्पासहत्वात् । प्रथमविकल्पेऽतीताद्यर्थकलक्षकपदेषु लक्षकपदत्वहेतुरस्ति तत्र लक्ष्यकर्मकस्फुरणजन्यत्वं साध्यं नास्तीति व्यभिचारः । शेषविकल्पत्रये सिद्धसाधनता, यतो हि अनुभूतिस्वरूपस्य स्फुरणस्यानुभूतिव्यवहारजनकतयाऽनुभूतिविषयकत्वमस्त्येव, अस्ति चानुभूत्याकारान्तःकरणवृत्तौ तत्स्फुरणमात्रेऽपि चानुभूतिविषयकत्वम् । न चानुभूतिपदवाच्यस्य लक्ष्यस्य वा स्वप्रकाशत्वमितिविकल्पनीयम्; उभयवादिसम्मतस्फुरणमात्रे स्वप्रकाशत्वस्य प्रतिपादनेऽदोषात् । अन्यथा वेद्यत्वसाधनेऽपि विकल्पदोषपरिहारासम्भवात् । आभाससमानयोगक्षेमतामाक्षिपति— नन्वेवमपीति । लौकिकघटस्य पक्षत्वे प्रत्यक्षविरोधः, अलौकिकस्य च पक्षत्वेऽप्रसिद्धत्वादाश्रयासिद्धिः । न च रूपादिहीनस्य यथा घटत्वमप्रसिद्धं तथाऽवेद्यस्यानुभूतित्वमप्रसिद्धमिति वाच्यम्, तथा सत्यनुभूतिविषये वादिनां वेद्यत्वावेद्यत्वयोर्विप्रतिपत्त्यभावप्रसङ्गात् । न चानुभूतौ प्रमाणसत्त्वे वेद्यत्वादस्वप्रकाशत्वं, प्रमाणाभावेऽसिद्धत्वादाश्रयासिद्धिरिति वाच्यम्; प्रमाणजनितान्तःकरणवृत्तिव्याप्यत्वमात्रेण विषयत्वाभ्युपगमेऽपि स्वप्रकाशत्वाव्याघातात् । न च घटादौ फलव्याप्यत्वेन प्रामाणिकत्वदर्शनादनुभूतावपि प्रामा-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वेद्यत्वावेद्यत्वयोर्वादिनां विप्रतिपत्त्यभावप्रसङ्गात् । न चैवमुभयतः पाशारज्जुः; अनुभूतेः प्रमाणजन्यस्फुरणाश्रयतया, स्फुरणकर्मतया वा घटादिवद्विषयभावाभावेऽपि प्रमाण-जनितान्तःकरणवृत्तिव्याप्यत्वेन विषयताङ्गीकारेऽपि स्वप्रकाशत्वाव्याघातात् । उक्त-वृत्तिव्याप्यत्वेऽपि स्फुरणव्याप्यत्वाभावापराधेन नाप्रामाणिकतापि, केवलव्यतिरेका-भावात्, अतीतानागतयोः स्फुरणविरहिणोरुक्तवृत्तिव्याप्ययोर्भाट्टैः प्रामाणिकत्वाभ्यु-पगमात्, चेष्टादिलिङ्गकानुमानविषयस्यापि परज्ञानस्य स्वाश्रये स्वविषयापरोक्षव्यवहार-जनने ज्ञानान्तरनिरपेक्षतया स्वप्रकाशत्वोपपत्तेश्च । किञ्च त्वज्ज्ञानं तवापरोक्षव्यवहार-योग्यत्वे सति वेद्यं न भवति ज्ञानत्वान्मदीयज्ञानवत् । न च मदसमवेतत्वं मदन्यसम-वेतत्वं वोपाधिः; साध्याव्याप्तेः, त्वदीयधर्मादिषु त्वत्समवेतेष्वसमवेतेषु च परमाणुषूक्त-साध्यसद्भावेऽप्युपाधेरभावात् । न च ममापरोक्षव्यवहारयोग्यत्वमुपाधिः; ममापरोक्ष-व्यवहारयोग्यत्वादिदं ममापरोक्षव्यवहारयोग्यत्वे सत्यवेद्यं न भवति घटवदिति व्यतिरेके ज्ञानेतरत्वस्यैवोपाधित्वात् । विवादपदानि ज्ञानानि घटज्ञानान्यत्वे सति वेद्यत्वानधि-करणानि ज्ञानत्वाद्घटज्ञानवत् । नच घटज्ञानत्वमुपाधिः, शरीरजन्यत्वोपाधाविव व्यर्थ-विशेषणत्वात् तस्माद्विगलितसकलकलङ्कमनुभूतेः स्वप्रकाशत्वानुमानमिति सिद्धम् ।

एतेनात्मनोऽपि स्वप्रकाशत्वं व्याख्यातम् । तथाहि—

णिकत्वसिद्धये फलव्याप्यत्वमवश्यं स्वीकार्यमिति वाच्यम्; केवलव्यतिरेकाभावात् । इदमत्राकूतं— यत्रफलव्याप्यत्वं तत्र प्रामाणिकत्वमित्यन्वयसत्त्वेऽपि यत्र फलव्याप्यत्वं नास्ति तत्र प्रामाणिकत्वं नास्तीति व्यतिरेकस्य दुर्घटत्वात्, फलव्याप्यत्वरहितयोर्वृत्तिमात्रव्याप्ययोरतीतानागतयोर्भाट्टैः प्रामाणिकत्वस्वीकारात् । चेष्टादिलिङ्गकानुमानगम्यस्य परकीयज्ञानस्य स्वाश्रये स्वविषयापरोक्ष-व्यवहारोत्पत्तौ ज्ञानान्तरनिरपेक्षत्वेन स्वप्रकाशत्वोपपत्तेश्च । वक्ररीत्याऽभिनवान्वयव्यतिरेकप्रयोग-माह—किञ्च त्वज्ज्ञानमिति । मदीयज्ञाने दृष्टान्ते ज्ञानत्वहेतुरस्ति, तत्र तवापरोक्षव्यवहारयोग्यत्व-विशिष्टवेद्यत्वाभावरूपं साध्यमप्यस्ति । इदमत्रावधेयं—दृष्टान्ते मदीयज्ञाने हेतुसाध्यव्याप्तिग्रहे विशेषणाभावप्रयुक्तविशिष्टाभावरूपं साध्यमुभयवादिसम्मतं ननु वेद्यत्वाभावरूपविशेष्याभाव-प्रयुक्तो विशिष्टाभाव उभयसम्मतः, किन्तु पक्षे त्वदीयज्ञाने विशेषणाभावो नास्तीत्यगत्या विशेष्या-भावो वेद्यत्वाभावरूप एव ग्राह्यस्तेन वादिज्ञानेऽवेद्यत्वरूपं स्वप्रकाशत्वं सिद्ध्यति । न चात्रानुमाने मदसमवेतत्वं मदन्यसमवेतत्वं वोपाधिसम्भवः, त्वदीयात्मसमवेतेषु त्वदीयधर्मादिषु, असमवेतेषु परमाणुषु च प्रकृतसाध्यस्य सद्भावेपि पूर्वोक्तोभयविधोपाधेरभावात् । देवदत्तसमवेतधर्मादिषु प्रकृत-साध्यसत्त्वेऽपि देवदत्तासमवेतत्वमुपाधिर्नास्ति, तथा परमाणवः कुत्रापि न समवेतास्तस्मान्न तत्र साध्य-सत्त्वे मदन्यसमवेतत्वमुपाधिः सम्भवतीत्यत आह—साध्याव्याप्तेः । उपाध्यन्तरमाशङ्क्य दूषयति— न च ममेति । उपाध्यभावेन साध्याभावानुमानावसरे ज्ञानेतरत्वस्यैवोपाधित्वात् । अतः साध्या-भावसाध्यकोपाध्यभावरूपहेतौ व्याप्यत्वासिद्धिदोषस्य विद्यमानत्वादुपाधिर्निरर्थक इति भावः । वक्ररी-त्यैवानुमानान्तरमाह—विवादपदानीति । अत्र घटत्वोपाधिमाशङ्क्य वारयति—न चेति । स्वप्रकाश-त्वोपपादनमुपसंहरति—तस्मादिति ।

अनुभूतिस्वप्रकाशत्वमात्मस्वप्रकाशत्वेऽतिदिशति—एतेनेति । आत्मनः स्वप्रकाशत्वसाधकान्

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'चिद्रूपत्वादकर्मत्वात्स्वयंज्योतिरिति श्रुतेः ।
आत्मनः स्वप्रकाशत्वं को निवारयितुं क्षमः' ॥ ३ ॥

आत्मा, संविद्रूपः, संवित्कर्मतामन्तरेणापरोक्षत्वात्संवेदनवदिति प्राभाकरं प्रत्यनुमानात्; घटतज्ज्ञानयोः सम्बन्धः, आत्मनिष्ठः, ज्ञाननिष्ठत्वात्पदविषयत्ववदिति नैयायिकादीन्प्रत्यनुमानादात्मनश्चिद्रूपत्वसिद्धिः । विपक्षे चात्मनः संशयविपर्यासगोचरत्वापत्तिर्बाधिका, नह्यात्मन्यहमनहं वेति कश्चित्संदिग्धे, नैवाहमिति वा विपर्यस्यति । न चैतत्स्वप्रकाशज्ञानरूपतामन्तरेणावकल्प्यते । न चान्तरेणापि ज्ञानरूपतां दुःखादिवदेतदुपपद्यत इति शङ्कनीयम्; तेषां स्वसत्तायां ज्ञानाव्यभिचारात्तदुपपत्तेः । न चात्मन्येवमभ्युपगम्यते; सुषुप्त्यभावप्रसङ्गात् । न च ज्ञानात्मनोः संबन्धोऽनात्मवृत्तिर्ज्ञानवृत्तित्वात् सत्तावदिति शङ्कनीयम्; ज्ञानमेवात्मेत्यभ्युपगच्छतां ज्ञानात्मनोः सम्बन्धस्यैवाभावादाश्रयासिद्धेः । 'नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते' इति द्रष्टृदृष्टयोः सम्बन्धः श्रुतित एवाधिगत इति मानमनोहरकारः प्रातिष्ठिपदितिचेत्, मैवम्; श्रुतेर्लोकप्रसिद्धसम्बधानुवादेन दृष्टेर्विनाशित्वाभावमात्रप्रतिपादनपरत्वात्, "अप्राप्ते हि शास्त्रमर्थव"दिति न्यायात्, मुख्यार्थेऽद्वैतश्रुतिविरोधात्, राहोः शिर इतिवदुपचारेणापि सम्बन्धश्रुतेर्वृत्त्युपपत्तेश्च ।

न चानयोस्तुल्यबलतया विपर्ययः, तत्परत्वातत्परत्वविशेषोपपत्तेरुपक्रमोपसंहारादिषड्विधतात्पर्यलिङ्गोपेताद्वैतश्रुतिः कथं लोकप्रवादोपजीविनीं सम्बन्धश्रुतिं न बाधेत । देवदत्तस्य गन्तुरितिवद्द्रष्टुर्दृष्टेरिति द्रष्टृरूपाया दृष्टेः, दृष्टिलक्षणो वा यो द्रष्टा तस्य, विपरिलोपो नास्तीति सामानाधिकरण्येन षष्ठ्योः सम्बन्धसम्भवे वैयधिकरण्यस्य कल्पनायोगात् । 'न दृष्टेर्द्रष्टारं पश्ये'रित्यादाविव वैयधिकरण्येऽप्यन्तःकरणपरिणाम-

---

हेतून् श्लोकेन सङ्कलयति—चिद्रूपत्वादिति । तत्राद्यमुपपादयति—आत्मा, संविद्रूप इति । अपरोक्षत्वमपरोक्षव्यवहारविषयत्वमर्थः, तेन पक्षदृष्टान्तयोर्न साधनवैकल्यम् । घटादिव्यवच्छेदाय प्रथमं विशेषणम्, अतीतादिव्यवच्छेदाय द्वितीयं विशेषणम् । आत्मनो ज्ञानरूपत्वाभावे बाधकमाह—विपक्षे चेति । दुःखादीनां स्वसत्तायां ज्ञानाव्यभिचारेऽपि नात्मनि तथात्वमभ्युपेयेत, अन्यथा सुषुप्त्यभावप्रसङ्गः । सत्प्रतिपक्षतामाशङ्क्य प्रतिक्षिपति—न च ज्ञानेति । सत्प्रतिपक्षे मानमनोहरकाररीत्याऽश्रयासिद्धिं वारयति—नहि द्रष्टुरिति । श्रुतेरन्यपरत्वमादाय परिहरति—मैवमिति । अज्ञातज्ञापकत्वे शास्त्रप्रामाण्यम् मुख्यार्थेऽद्वैतश्रुतिविरोधापत्तिः, सम्बन्धश्रुतेः राहोः शिर इतिवदुपचारेणाप्युपपत्तिश्च । न च "तुल्यं हि साम्प्रदायिकमि"ति सम्बन्धासम्बन्धपक्षयोस्तुल्यबलतया विपर्ययः किं न स्यादिति वाच्यम्; देवदत्तस्य गन्तुरितिवद् द्रष्टुर्दृष्टेरिति श्रुतेः द्रष्टृरूपाया दृष्टेः, दृष्टिरूपो वा द्रष्टा, तस्या विपरिलोपो नास्तीति सामानाधिकरण्येन षष्ठीद्वयस्यान्वयसम्भवे वैयधिकरण्येनान्वयकल्पनायोगात् । न च "दृष्टेर्द्रष्टारं पश्येदि" तिवदत्रापि वैयधिकरण्येनान्वयः कुतो न क्रियते इति वाच्यम्; अद्वैतश्रुत्यनुगुणे सम्बन्धे सम्भवति तद्विरुद्धकल्पनाया दौर्भाग्यपूर्णत्वात् ।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रूपाया दृष्टेर्यो द्रष्टेति वा परिणामिनोऽन्तःकरणस्य द्रष्टुः साक्षिभूता या दृष्टिस्तस्या विपरिलोपो नास्तीति वाऽद्वैतश्रुत्यनुगुणे सम्भवति सम्बन्धे गुणगुणिभावेन सम्बन्धकल्पना अविदितमीमांसावृत्तान्तस्यैव परं शोभते ।

किञ्च जीवेश्वरयोर्भेदमभ्युपगच्छता नित्यदृष्टिसम्बन्धः कस्योच्यत इति विवेचनीयम् । न तावज्जीवस्य, तस्यानित्यज्ञानाभ्युपगमात् । नापीश्वरस्य; मैत्रेयीब्राह्मणे 'नवा अरे पत्युः कामाय पतिः प्रियो भवती' त्यादिना पतिजायादिप्रियसंसूचितं जीवमुपक्रम्य तस्यैव 'चैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्ती'त्यवस्थान्तर-प्रतिपादनावसरे विनाशमाशङ्क्य 'अविनाशी वा अरेऽयमात्माऽनुच्छित्तिधर्मा मात्राऽसंसर्गस्त्वस्य भवति' 'यद्वै तन्न पश्यति पश्यन्वै तन्न पश्यति । न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते अविनाशित्वा'दित्येवमविनाशितोपपादनात्, ज्योतिर्ब्राह्मणे च जागराद्यवस्थोपन्यासपुरःसरम् 'अथ यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यती'ति सम्प्रसादावस्थानमवतार्य 'यद्वै तन्न पश्यति पश्यन्वै तन्न पश्यति । नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यत' इति विशेषविज्ञानाभावेऽपि स्वरूपविज्ञानस्य नित्यत्वप्रतिपादनात्, ईश्वरपक्षे च विशेषविज्ञानाभावस्य वक्तुमयुक्तत्वात्तस्य सर्वदा सर्वज्ञत्वात् सुषुप्त्याद्यवस्थाभावाच्च । तस्माज्ज्ञानात्मनोः सम्बन्धोऽनात्मनिष्ठ इत्यनुमानमाश्रयासिद्धमिति सिद्धम् । यत्तु गुणत्वादनित्यत्वाज्ज्ञानमात्मा न भवति रूपादिवदित्यनुमानं तत्सर्वमन्यतरासिद्धतयापास्तम् । अथ घटतज्ज्ञानयोः सम्बन्धः गुणनिष्ठः ज्ञाननिष्ठत्वात्सत्तावद्विपक्षे च जानामीति प्रत्ययस्य निरालम्बनत्वप्रसंगो बाधक इति चेत्, मैवम्; रूपतज्ज्ञानयोः सम्बन्धो द्रव्यनिष्ठो ज्ञाननिष्ठत्वात्सत्तावदिति प्रतिप्रयोगसम्भवात्, जानामीति चानुभवस्यान्तऽकरणवृत्त्याश्रयप्रमातृविषयतयाप्युपपत्तेः । 'विज्ञानमानन्दं ब्रह्म' 'प्रज्ञानं ब्रह्म' 'ज्ञानघन एवे'त्यादिश्रुतिभ्यश्चात्मनश्चिद्रूपत्वसिद्धिः । नचाधिकरणपरतया ज्ञानशब्दो योज्यः; अद्वैतश्रुतिविरोधात् । तस्मात्साधूक्तं चिद्रूपत्वादिति ।

अकर्मत्वाच्चात्मनः स्वप्रकाशत्वम्; वेद्यत्वे स्वाश्रयज्ञानविषयतया कर्मकर्तृभाव-

---

किञ्च श्रुतिरियं न भेदवादिपक्षं स्पृशति, तदभिमतसम्बन्धबोधे प्रामाण्यं तु दूरतरमित्याह—किञ्च जीवेति । तत्रस्थश्रुतिपर्यालोचनयाऽत्मज्ञानयोः सम्बन्धासिद्धेरात्मनः स्वप्रकाशत्वसिद्धेश्च । तस्माज्ज्ञानात्मनोः सम्बन्धोऽनात्मनिष्ठ इत्यादिसत्प्रतिपक्षानुमानेऽस्त्याश्रयासिद्धिरिति सिद्धम् । एतेन ज्ञानमात्मा न भवति, गुणत्वादनित्यत्वाच्च, रूपादिवदित्यनुमानं वेदान्तिमतेऽसिद्धतयाऽपास्तम् । ज्ञाने गुणत्वसाधकमुत्थापयति—अथेति । यदि ज्ञानं गुणो न स्यात्तर्हि जानामीति प्रत्ययस्य निरालम्बनत्वप्रसङ्गो बाधकः । प्रत्यनुमानं दर्शयति वेदान्तीत्याह—रूपतज्ज्ञानयोरिति । जानामीति बाधकानुभवस्यान्तःकरणवृत्त्याश्रयप्रमातृविषयतयाऽप्युपपत्तेः । ज्ञानस्यात्मत्वानुमानानुग्राहकमागमसप्याह—विज्ञानमिति । मानसनोहरकारोक्तिं ज्ञानशब्दस्याधिकरणपरतया व्युत्पत्तिं दूषयति—नचेति ।

संग्रहश्लोकोक्तं द्वितीयं हेतुं विवृणुते—अकर्मत्वाच्चेति । आत्मनो वेद्यत्वस्वीकारे ज्ञानस्याश्रयो

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विरोधप्रसङ्गात् । न च सुखादिविशिष्टस्याहं सुखीत्यादिज्ञानकर्मत्वं; केवलस्य च कर्तृत्वमित्याकारभेदादविरोधो, गमनादिक्रियास्वपि केवलस्य कर्तृत्वं गमनविशिष्टाकारेण च कर्मत्वमित्याकारभेदेनाविरोधात्कर्मकर्तृभावविरोधस्य सर्वत्रोच्छेदप्रसङ्गात् ।

तथापि नात्मनः स्वप्रकाशत्वं, तत्तदर्थसंवेदनाश्रयतयापि स्फुरणोपपत्तेः । न चास्य क्रियाफलभाजोऽपि कर्मत्वं; परसमवेतक्रियाफलशालित्वाभावात् । न चैतन्मानसप्रत्यक्षेऽपि समानं; जानातेः सदा सकर्मकतया कर्मणा व्याप्तस्य तन्निवृत्तौ निवृत्तेरिति चेत्, मैवम्; संविद्व्यतिरिक्तस्य संवित्कर्मत्वेनैवापरोक्षत्वनियमादात्मनः कर्मत्वाभावे तदनुपपत्तेः । संवेदिता संविदाश्रयतयाऽपरोक्षो न भवति, अपरोक्षत्वात्संवेदनवदिति । न च विपक्षे बाधकतर्काभावः; स्वसत्तायां प्रकाशव्यभिचारवतः प्रकाशान्तराधीनव्यवहारवत्त्वे कदाचित्संशयादिगोचरत्वप्रसङ्गस्यैव बाधकत्वात्, आत्मनो घटादिज्ञाने भासमानत्वाङ्गीकाराच्च घटादिवदेव चाक्षुषत्वमपि प्रसज्येत, तज्जनितज्ञाने भासमानताया एव तत्त्वात्, नीरूपस्य च द्रव्यस्य चाक्षुषत्वायोगात्, आत्मा, चाक्षुषज्ञाने न प्रकाशते, अरूपिद्रव्यत्वादाकाशवदिति प्रतिप्रयोगसम्भवाच्च ।

'अत्रायं पुरुषः स्वयंज्योति'रिति श्रुतेश्चात्मा स्वप्रकाशः । ननु स्वप्नावस्थामधिकृत्येदमाम्नायते, तत्र मनसोऽनुपरमान्न स्वयंज्योतिष्ट्वम् । न च मनसो गजाद्याकारपरिणतस्यावभासकर्मतयैवावस्थानात्करणान्तराभावाच्चात्मैव स्वयंज्योतिः स्यादिति शङ्कनीयम्; मनसश्चक्षुरादिवदिन्द्रियत्वेन प्रत्यक्षत्वानुपपत्तेः । तस्मान्मनःसंयोगजन्यज्ञानाधारत्वेन

य आत्मा स एव तज्ज्ञानविषयः स्यादिति कर्मकर्तृभावविरोधप्रसङ्गात् । सुखादिविशिष्टाकारेणेत्यादिदृष्टान्ततया केवलस्य कर्तृत्वं विशिष्टस्य कर्मत्वमित्यभ्युपगमे गमनादिक्रियास्वपि तथात्वात्सर्वत्र कर्मकर्तृभावविरोधस्योच्छेदप्रसङ्गः स्यात् ।

अत्र प्राभाकरः शङ्कते—तथापीति । प्राभाकरो मनुते यत्किलात्मनोऽकर्मत्वेऽपि तत्तदर्थविषयसंवेदनाश्रयतया स्फुरणोपपत्तेः । परसमवेतक्रियाफलशालित्वाभावादकर्मत्वोपपत्तेः । न च मानसप्रत्यक्षमप्येतत्तुल्यमिति वाच्यं; जानातेः सदा सकर्मकतया कर्मणा व्याप्तस्य ज्ञानत्वस्य कर्मरूपव्यापकस्य निवृत्या ज्ञानत्वरूपव्याप्यस्यापि निवृत्तेः । प्राभाकरमतं निराकुरुते—मैवमिति । यद्यात्मा संविद्भिन्नः स्यात्तर्हि तत्र संवित्कर्मतयाऽपरोक्षव्यवहारः स्यादिति नियमाद्, आत्मनः कर्मत्वाभावेऽपरोक्षत्वानुपपत्तिः । संविदाश्रयतयाऽपरोक्षत्वेऽनुमानविरोधमाह—सम्वेदितेति । विपक्षबाधकतर्कमाह—स्वसत्तायामिति । तर्कान्तरेणापि विरोधमाह—आत्मन इति । संविदाश्रयतयात्मनो घटादिज्ञाने भासमानतया घटादिवदेव चाक्षुषत्वप्रसक्तिः । न चेष्टापत्तिः; नीरूपस्य द्रव्यस्यात्मनश्चाक्षुषत्वायोगात् । इष्टापत्तौ प्रतिप्रयोगमाह—आत्मेति ।

श्लोकोक्तं तृतीयहेतुं व्याचष्टे—अत्रायमिति । ननु स्वपने नात्मा स्वयं प्रकाशस्तदा मनसोऽनुपरमात् । न च गजाद्याकारेण परिणतस्य मनसो ज्ञानकर्मतयाऽवस्थितेः करणान्तराभावाच्चात्मैव तत्र स्वयंज्योतिरिति वाच्यम्; चक्षुरादिवदिन्द्रियत्वेन मनसः प्रत्यक्षत्वानुपपत्तेः । तस्मान्मनःसन्निकर्षजन्यज्ञानाधारत्वेन स्वयंशब्दवाच्यः आत्मा ज्योतिरित्युच्यते । अथवा ज्योतिः साधनत्वादात्मा ज्योतिः-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्वयंशब्दवाच्य आत्मा ज्योतिरित्यभिधीयते, ज्योतिःसाधनत्वाद्वा 'वाचैवायं ज्योतिषा'; 'अग्निनैवायं ज्योतिषे'त्येतत्प्रकरणपठितवागग्न्यादिवत्, नत्वात्मा स्वयंज्योतिरिति, द्रव्यस्य गुणत्वानुपपत्तेरिति चेन्मैवम्; यतः—

सम्बन्धस्याश्रयत्वेन विज्ञानासमवायिनः ।
इन्द्रियत्वाविघाताच्च मनः प्रत्यक्षमात्मवत् ॥४॥

मनः प्रत्यक्षं ज्ञानासमवायिकारणाधारत्वात् आत्मवदित्यनुमानान्मनसोऽपि प्रत्यक्षत्वोपपत्तेः। न च प्रत्यक्षत्वे सति इन्द्रियत्वव्याकोपः, तस्य साक्षिवेद्यस्याप्यैन्द्रियकज्ञानाविषयत्वेनेन्द्रियत्वाव्याकोपात् । तस्मान्निरस्तसमस्तकलङ्कावकाशमात्मनः स्वप्रकाशत्वम् । तच्चात्मरूपमविद्यापरिकल्पितप्रपञ्चावभासकत्वादविद्यातमोनिवर्तकत्वाच्च ज्योतिःशब्दाभिधेयं, यथा भावरूपशार्वरादितमोनिवर्तनेन जगदवभासकमादित्यादि ज्योतिरिति सिद्धम् ।

ननु तमो न भावरूपं, भावेष्वनन्तर्भावात् तद्धि पृथिव्यादिद्रव्याणामन्यतमत्तद् ? अन्यद्वा स्यात् ? नाद्यः । क्षितिसलिलात्मसु चतुर्दशगुणेषु, तेजसि एकादशगुणे, मातरिश्वनि नवगुणे; मनसि चाष्टगुणे, नभसि षड्गुणे दिक्कालयोः पञ्चगुणयोरविनाशिनोरनन्तर्भावात् । अन्तर्भावे तु तावद्गुणवत्त्वप्रसङ्गात्, आत्मादावन्तर्भावे नित्यत्वापत्तेश्च ।

नापि द्वितीयो; निर्गुणस्य द्रव्यत्वानुपपत्तौ द्रव्यान्तरत्वस्य सुतरामनुपपत्तेः । नीलोत्पलदलश्यामं महच्चोपलक्ष्यमाणं तमः कथं निर्गुणमितिचेन्न । नीलरूपस्य गन्धाद्येकार्थसमवायिनस्तद्व्याप्तस्य तदभावे भावायोगात् । अपि च द्रव्यान्तरत्वे न तावन्निरवयवत्वं, नित्यत्वेनालोकानिवर्त्यत्वापत्तेः । सावयवत्वे च तदारम्भकाणां स्पर्शवत्त्वे तस्मिन्नपि स्पर्शोपलम्भप्रसङ्गादस्पर्शवत्त्वे च तेषां मनोवद्द्रव्यारम्भकत्वायोगात् । नापि

शब्दवाच्यः, तथाच श्रुतिः "वाचैवायम्" इत्यादि, न त्वात्मा स्वयंज्योतिरिति द्रव्यस्य गुणत्वानुपपत्तेरिति चेन्न, तद्दूषणं वारयति—मैवमित्यादिना । श्लोकेनानुमानमाह— सम्बन्धस्येति । संकलितमनुमानाकारं प्रयोगं दर्शयति—मन इत्यादिना । असिद्धिवारणायासमवायिकारणाधारत्वं विशेषणं, परमाण्वादिषु व्यभिचारवारणाय ज्ञानाधारत्वदलमिति । न च मनसः प्रत्यक्षत्वे सतीन्द्रियत्वव्याकोप इति वाच्यम्; तत्र साक्षिवेद्यत्वस्वीकारेऽदोषादित्याह—न चेति । आत्मनः स्वप्रकाशत्वविचारमुपसंहरति—तस्मादित्यादिना ।

तमसो भावरूपताममृष्यमाणा वादिनः शङ्कते—ननु तमो नेति । षट्पदार्थान्यतमत्वरूपं व्यावर्तमानं भावत्वं व्यावर्तयति—भावेष्विति । विकल्प्य दूषयति—तद्धीत्यादिना । द्रव्येष्वन्तर्भावं प्रदूष्य अन्यत्रान्तर्भावं दूषयति—नापि द्वितीय इति । तत्रापि गुणवत्तमो निर्गुणं वेति विकल्प्य दूषयति—निर्गुणस्येति । द्रव्यान्तरत्वस्य=द्रव्यभिन्नत्वस्येत्यर्थः । तमसो निर्गुणत्वमाक्षिप्य दूषयति—नीलोत्पल इत्यादिनेति ।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गुणाः; रूपान्तर्भावे पृथिव्यादित्रितयगुणत्वे च तत्सहचारिणां गुणान्तराणामप्युपलब्धिप्रसङ्गात्। नापि नभोनभस्वतोर्गुणः; तयोररूपत्वात्। नापि दिक्कालमनसाम्; एतेषां विशेषगुणरहितत्वात्। नाप्यात्मनः, तस्य बाह्येन्द्रियप्रत्यक्षगुणानधिकरणत्वात्। नापि कर्म; संयोगविभागयोरकारणत्वात्। नापि सामान्यविशेषसमवायाः; तेषां व्यक्त्याश्रयसम्बन्धिनामुपलब्धिमन्तरेणानुपलम्भनियमात्। न हि सामान्यस्येव व्यक्तिर्विशेषाणामिव चाश्रयः समवायस्येव सम्बन्धी तमसः कश्चिदुपलभ्यते। न चास्य तमस उपलम्भसम्भवः; तदुपलम्भकाभावात्। न च लोचनमुपलम्भकं; तदव्यापारे तदनुपलम्भापातात्। अस्ति च निमीलितनयनस्यापि तमः पश्यामीत्यभिमानः। अपि च रूपत्वे रूपवत्त्वे वाऽऽलोकाजन्यचक्षुर्जन्यसाक्षात्कारविषयत्वं न स्यादालोकसहकृतस्यैव चक्षुषस्तत्र सामर्थ्यात्। नापि मनस्तदुपलम्भकं; बाह्येन्द्रियनिरपेक्षस्य तस्य बहिरप्रवृत्तेः। तस्मात्षट्स्वपि भावेष्वनन्तर्भावात्तद्भावे वोपलम्भकाभावाच्च, प्रभाभावस्तम इति।

अत्रोच्यते—'तमालश्यामलज्ञाने निर्बाधे जाग्रति स्फुटे।
द्रव्यान्तरं तमः कस्मादकस्मादपलप्यते ॥५॥

अस्ति हि तमस्तमालमालाश्यामलमिति प्रतीतिः। न चाप्रतीतावेवायं प्रतीतिभ्रमः; तद्व्यवहारस्य तत्प्रतीतिमन्तरेणानुपपत्तेः। न चायमौपचारिक आलोकाभावे, शौक्ल्याभावे पटादौ नीलव्यवहार इवेति युक्तम्; मुख्ये बाधकाभावात्। रूपत्वे रूपवत्त्वे वा

प्रकारान्तरेण द्रव्यान्तरत्वं पुनरपि दूषयति—अपि चेति। तमसो गुणान्तर्भावं दूषयति—नापि नभ इत्यादिना। कर्मान्तर्भावं वारयति—नापि कर्मेति। संयोगविभागयोरसमवायिकारणं कर्मेति कर्मलक्षणं, तमसि तदभावान्न तमः कर्मेति भावः। सामान्यादित्रये तमसोऽनन्तर्भावं दर्शयति—नापि सामान्येति। तमसः प्रतीत्यनुपपत्तिमप्याह—न चास्येति। रूपगुणत्वे रूपवद्द्रव्यत्वे चान्तर्भावयितुमशक्यं तम इत्याह—अपि च रूपत्व इति। तमसि बाह्यप्रत्यक्षत्वं प्रतिक्षिप्य मानसप्रत्यक्षत्वं प्रतिक्षिपति—नापि मन इति। तमसि भावरूपत्वनिषेधमुपसंहरति—तस्मादित्यादिना।

तमसो भावरूपत्वं समर्थयितुमुपक्रमते—अत्रोच्यते। श्लोकेन तमसि भावरूपत्वे प्रमाणं दर्शयति—तमालेति। तमालवच्छ्यामलं तम इति ज्ञाने निर्बाधे स्फुरति सति कस्मान्निष्कारणं द्रव्यान्तरं तमोऽपलप्यते इति पदयोजना। जागर्तीत्यनेनाप्रामाण्यस्य, स्फुटपदेन संशयस्य, निर्बाधपदेन च विपर्ययस्य पर्युदास इति भावः। श्लोकं व्याचष्टे—अस्तिहीति। भ्रमव्यवहारः प्रतीतिमन्तरेण न सम्भवतीत्याह—तद्व्यवहारस्येति। न च शौक्ल्याभावे नीलव्यवहारवदालोकाभावे श्यामलशब्दप्रयोग औपचारिक इति वक्तुं युक्तं; मुख्यव्यवहारे बाधकाभावात्। न चालोकनिरपेक्षस्य चक्षुषो रूपप्रतीतिजनकत्वानुपपत्तिर्मुख्ये बाधिकेति वाच्यम्; आलोकविरोधिनस्तमसश्चालोकाभावेन व्यञ्जनीयतयाऽऽलोकनिरपेक्षचाक्षुषत्वोपपत्तेः। न चान्यत्र चक्षुषस्तथा सामर्थ्यं न दृश्यते इति वाच्यम्; सामर्थ्यस्य कार्यगम्यत्वात्। न च रूपवत्प्रतियोगिकस्यालोकाभावस्य घटाभावस्येव नालोकनिरपेक्षचक्षुर्विषयत्वमिति वाच्यं; तमसो भावरूपत्वपक्षेऽपि तदुत्तरस्य तुल्यत्वात्। न च चक्षुर्व्यापाराभावेऽपि निमीलितचक्षुषः पुरुषस्य तमसो दृश्यमानत्वान्न तमसि चाक्षुषत्वमिति वाच्यं; पक्ष्मपटलान्तर्वर्तितमसश्चक्षुर्व्यापारादेवोपलब्धेः, यथा

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आलोकानपेक्षचक्षुर्जन्यज्ञानविषयत्वासम्भवो बाधक इति चेत्, मैवम्; आलोकविरोधिनस्तमसश्चालोकाभावव्यञ्जनीयतया तन्निरपेक्षचक्षुर्विषयत्वोपपत्तेः; सामर्थ्यस्य कार्यगम्यत्वात्। न चेद् आलोकाभावस्यापि रूपवदभावतया घटाभाववदालोकनिरपेक्षचक्षुर्विषयत्वं न स्यात्, तद्विरोधितया तदनपेक्षत्वं तु प्रकृतेऽपि समानमन्यत्राभिनिवेशात्। न च निमीलितनयनस्य लोचनव्यापाराभावेऽपि तमस उपलम्भादचाक्षुषत्वं; तत्रापि पक्ष्मपटलान्तर्वर्तितमसश्चक्षुर्व्यापारादेवोपलब्धेः, पिहितकर्णपुटस्य श्रोत्रव्यापारादेवान्तरशब्दोपलब्धिवत्। यत्तु गन्धाभावे तद्व्याप्तं नीलरूपमपि न स्यादिति, तदपि न; अनुष्णाशीतस्पर्शस्य पृथिव्यां गन्धादिव्याप्तस्य तदभावेऽपि मरुति प्रतीतेरेवाङ्गीकारवदिहापि प्रतीतेरेव नीलरूपस्य गन्धाभावेऽप्यभ्युपेयत्वात्। अथ पाकजस्यैवानुष्णाशीतस्पर्शस्य गन्धादिना व्याप्तिस्तर्हीहापि पाकजस्यैव कालिमगुणस्य गन्धादिना व्याप्तिरिति तुल्यम्। सद्भावग्राहिणः प्रत्यक्षस्योभयत्र समानत्वात्। न च स्पर्शाभावात्तमसो रूपवत्त्वाभावः; रूपग्राहकप्रत्यक्षविरोधे हेतोः कालात्ययापदिष्टतया तदभावानुमानानुदयात्। अन्यथा रूपाभावेन पवनेऽपि स्पर्शाभावानुमानस्य दुर्निवारत्वात्, अन्यत्र रूपवतामेव स्पर्शवत्त्वनियमात्। न चास्पर्शवत्त्वादेव तमःपरमाणूनां मनोवदनारम्भकत्वमनुमातुं युक्तम्; तत्र वैयर्थ्यस्योपाधेः सद्भावात्। न हि शरीरतया विषयतयेन्द्रियतया वा मनआरब्धद्रव्यस्य भोगसाधनता सम्भावनीया, पार्थिवादिचतुर्विधशरीरानन्तर्भूतस्येन्द्रियानाश्रयस्य शरीरतया भोगसाधनतानुपपत्तेः। न च विषयतया, रूपस्पर्शशून्यारब्धस्य तद्रहितत्वेन विषयत्वायोगाच्छरीरेन्द्रियव्यतिरिक्तोऽवयवी विषय इत्यङ्गीकारात्। नापीन्द्रियतया, मनस एवेन्द्रियत्वात्तदारब्धेन्द्रियान्तरस्वीकारवैयर्थ्यात्। न च शरीरेन्द्रियविषयानन्त-

---

पिहितकर्णस्य श्रोत्रव्यापारादेवान्तरशब्दोपलब्धिस्तद्वत्। ननु नीलरूपं पृथिव्यां गन्धव्याप्तं दृष्टं, तद्गन्धाभावे तमसि कथमुपलभ्यते इति चेन्न, अनुष्णाशीतस्पर्शस्य भूम्यां गन्धादिव्याप्तस्यापि गन्धाभाववति वायौ प्रतीत्यभ्युपगमेन गन्धाभाववति तमसि नीलरूपप्रतीतेरदोषात्। यदि पाकजानुष्णाशीतस्पर्शो गन्धादिव्याप्तस्तर्हि पाकजनीलरूपमेव गन्धादिव्याप्तमिति तुल्यम्। अपाकजानुष्णाशीतस्पर्शवत्पाकजनीलरूपसिद्धौ प्रमाणमाह—सद्भावग्राहिण इति। तमसो रूपवत्त्वाभावानुमाने बाधमाह—रूपग्राहकेति। पवनस्पर्शप्रतिबन्द्या बाधं समर्थयति—अन्यथेति। तत्र व्याप्तिमाह—अन्यत्रेति। कन्दलीकारोक्तं दूषणमनूद्य वारयति—न चास्पर्शेत्यदिना। ननु तमःपरमाणवो द्रव्यानारम्भकाः, स्पर्शरहितत्वात्, मनोवदिति चेन्न; वैयर्थ्योपाधेः सद्भावात्। दृष्टान्ते मनसि द्रव्यानारम्भकत्वं साध्यमस्ति, तत्र शरीरेन्द्रियविषयतया तदारब्धेषु भोगसाधनत्वानुपपत्तेर्वैयर्थ्योपाधिरस्तीति साध्यव्यापकत्वं, स्पर्शरहितत्वं हेतुः पक्षे तमस्यपि विद्यते इति साधनाव्यापकत्वम्, महतो रूपवतस्तमसो भोगसाधकत्वसम्भवान्न तत्र वैयर्थ्योपाधिरिति। आत्मादीनामपि स्पर्शरहितानां शरीरेन्द्रियविषयारम्भासम्भवात्तुल्यमेव द्रव्यारम्भवैयर्थ्यमिति भावः। वस्तुतस्तु नास्माकमनिर्वचनीयवादिनां तमोऽवयवैः किञ्चिदारब्धमभिप्रेतं, मेघमण्डलान्महाविद्युदादिजन्मवन्मूलकारणान्मायाविशिष्टचैतन्याद्ब्रह्मणस्तमोजन्माभ्युपगमे न कश्चिद्विरोधोऽस्तीति भावः। आपाततो मनसोऽप्यारम्भकत्वाभावं स्वीकृत्य

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भूतस्य कार्यद्रव्यस्य भोगसाधनत्वं परैरङ्गीक्रियते। आत्मादीनामपि पुनरस्पर्शवतां शरीरेन्द्रियविषयारम्भासम्भवात्समानमेव द्रव्यान्तरारम्भवैयर्थ्यम्। इह पुनस्तमसो महतो रूपवतः सम्भवति भोगसाधनत्वमिति नारम्भवैयर्थ्यम्। किञ्चास्मन्मते न तमस्तमोवयवैरारब्धं, तस्य मूलकारणान्मेघमण्डलान्महाविद्युदादिजन्मवज्जन्माभ्युपगमात्। न च मनसोऽनारम्भकत्वं, तस्यापि सावयवद्रव्यत्वेन परिणामित्वाभ्युपगमात्, आत्मनश्च स्पर्शरहितस्य सर्वजगदुपादानकारणत्वाभ्युपगमाच्च।

चलत्वाच्चालोकवत्तमो द्रव्यान्तरम्। अन्यानुविधाननियमान्न स्वाभाविकं चलनमस्य घटरूपादिवदिति चेत्, न; द्रव्यस्यापि सुवर्णादिवद्द्रव्यान्तरानुविधानेऽपि स्वाभाविकचलनोपपत्तेः। तथाहि—आकरजस्य तेजसः सुवर्णादेः पार्थिवद्रव्योपष्टम्भात्पतनादिप्रतिभासेऽपि न स्वाभाविकं चलनमुपरुध्यते। किञ्चेदमनुविधानम्—किमालोकावरकातपत्राद्यनुविधानम्? किंवा निवर्तकप्रदीपाद्यनुविधानम्? नाद्यः, निश्चलेऽप्यचलादौ तच्छायायाश्चलनोपलम्भात्। नापि द्वितीयः, वैपरीत्यादालोकागमने गच्छति छायेति प्रतीतेर्गमने चागच्छतीति प्रतीतेः, तद्विरोधित्वाच्च तदनुविधानानुपपत्तेः। किञ्च—

'चक्षुःप्रकाशनाजन्यरूपवद्वीक्षणक्षमम्।
रूपिग्राहीन्द्रियत्वेन यथैव स्पर्शनेन्द्रियम्॥६॥

चक्षुरालोकाजन्यरूपिद्रव्यसाक्षात्कारजनकं, रूपिद्रव्यग्राहकेन्द्रियत्वात्त्वगिन्द्रियवत्। न च रूपरहितेन्द्रियत्वमुपाधिः, यद्रूपवदिन्द्रियं तदालोकाजन्यरूपिसाक्षात्कारजनकं न भवति घ्राणवदिति व्यतिरेकव्याप्तौ, रूपवदग्राहकत्वस्यैवोपाधित्वात्। तत्सिद्धमेतत्तमो द्रव्यान्तरमिति। इत्थमालोकवदेव भावरूपाज्ञानतमोविरोधिन आत्मनो जगदवभासकस्य ज्योतिःशब्दवाच्यत्वात्।

तस्य त्वसङ्गस्य दृश्यसङ्गानिरूपणात् दृश्यप्रपञ्चस्य स्वतः परतश्चासिद्धेर्दृगात्मन्य-

---

वैयर्थ्योपाधिरुक्तः, सम्प्रति मनसः सावयवत्वेन परिणामित्वमभ्युपगम्य तत्र साध्यवैकल्यमाह—न च मनस इति। आत्मनि निरुक्तहेतोः सव्यभिचारमाह—आत्मनश्चेति।

रूपवत्त्वेन तमसि द्रव्यत्वं प्रसाध्याधुना क्रियावत्त्वेनापि तत्र द्रव्यत्वं साधयति—चलत्वाच्चेति। तमोद्रव्यं, चलनक्रियावत्त्वादालोकवदित्यनुमाने स्वरूपासिद्धिमुद्भाव्य दूषयति—अन्येत्यादिना। तमस्यन्यानुविधानं विकल्पेन प्रतिक्षिपति—किं चेदमनुविधानमिति। अतस्तमसि चलनं स्वाभाविकं न त्वन्यानुविधानमिति भावः। पूर्वं रूपवत्यपि तमस्यालोकनिरपेक्षचक्षुषः प्रवृत्तिरुक्ताधुना तत्रानुमानमप्याह—श्लोकेनेति। आलोकाजन्यरूपवद्द्रव्यसाक्षात्कारक्षमं चक्षुरिति प्रतिज्ञा, तत्र हेतुमाह—रूपीति। श्लोकोक्तमनुमानं विशदयति—चक्षुरित्यादिना। तत्र रूपरहितेन्द्रियत्वमुपाधिं वारयति—यद्रूपवदित्यादिना। तमसो द्रव्यत्वसिद्धौ समुत्थितं वादमुपसंहृत्य प्रयोजनमाह—इत्थमित्यादिना। एतत्प्रकरणस्याभावविलक्षणाविद्यासिद्धिः फलमिति तात्पर्यम्।

वक्ष्यमाणवादार्थं प्रस्तौति—दृश्यप्रपञ्चेत्यादिना। चैतन्यात्मन्यध्यस्तत्वेनोक्तं मिथ्यात्वमपृष्य-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ध्यस्ततयैव सिद्धिरिति सिद्धं मिथ्यात्वम्। किं पुनरिदं मिथ्यात्वं ? (१) प्रमाणागम्यत्वं वा ? (२) अप्रमाणज्ञानगम्यत्वं वा ? (३) अयथार्थज्ञानगम्यत्वं वा ? (४) सद्विलक्षणत्वं वा ? (५) सदसद्विलक्षणत्वं वा ? (६) अविद्यातत्कार्ययोरन्यतरत्वं वा ? (७) ज्ञाननिवर्त्यत्वं वा ? (८) प्रतिपन्नोपाधौ निषेधप्रतियोगित्वं वा ? (९) बाध्यत्वं वा ? (१०) स्वात्यन्ताभावसमानधिकरणतया प्रतीयमानत्वं वा ?। नाद्यः, ब्रह्मणोऽपि मिथ्यात्वप्रसङ्गात्, तस्य स्वप्रकाशत्वेन त्वया सर्वप्रमाणगोचरतानङ्गीकारात्। नापि द्वितीयः, सद्वादिभिरपि तस्याङ्गीकृतत्वेनार्थान्तरत्वात्, तस्य तस्य शुक्तिशकलादेस्तेन तेन रजताद्याकारेण प्रतीयमानतयाऽप्रमाणज्ञानविषयत्वात्, सर्वस्य प्रपञ्चस्य क्षणिकमिदं ब्रह्मकार्यमिदमनिर्वचनीयमिदमिति च मिथ्याज्ञानगोचरतायाः परैरभ्युपगमात्, स्मृतेरप्रमाणतया तद्विषयस्य तथात्वाङ्गीकाराच्च। न तृतीयः, उक्तदोषानुषक्तेरेव। न चतुर्थः, सद्विलक्षणस्यापि शशविषाणादेरमिथ्यात्वात्। न पञ्चमः, एकतरनिषेधस्यान्यतरविधिनान्तरीयकतया सदसम्भवात्। न षष्ठः, अनिर्वचनीयाविद्याया अप्रसिद्धत्वात्। अग्रहणमिथ्याज्ञानलक्षणाविद्यायास्तत्कार्यस्य च प्रवृत्तिसंस्कारादेः सत्यत्वात्। न सप्तमः, ज्ञाननिवर्त्यस्यापि ज्ञानसुखादेः सत्यत्वात्, सर्वस्य सत्यत्वेऽपि परैरीश्वरज्ञाननिवर्त्यत्वाङ्गीकारात्। नाष्टमः, प्रमाणेन यदुपाधौ यः प्रतिपन्नस्तत्र तस्य निषेधासम्भवाद्, अन्यथातिप्रसङ्गात्। भ्रान्तिप्रतिपन्नोपाधौ निषेधप्रतियोगित्वस्य सत्त्वेऽपि सम्भवेनार्थान्तरत्वाद्, अन्यथाख्यातिवादिभिरपि क्वचिन्निषिद्धस्यान्यत्र सत्तास्वीकारात्। न नवमः, बाधकज्ञानविषयत्वं तन्निवर्त्यत्वं वा बाध्यत्वमित्यभ्युपगमेऽ-

---

माणाः प्रपञ्चसत्यत्ववादिनस्तत्रविकल्पं समुद्भावयन्ति—किं पुनरिति। प्रमाणागम्यत्वादप्रमाणगम्यत्वं भिन्नमेव, तदपि यथार्थायथार्थभेदाद् द्विविधं, यथास्मृतिर्विपर्ययश्च। तेन प्रारम्भलक्षणेषु त्रिषु न सांकर्यशङ्कावकाशः। अविद्यातत्कार्ययोरव्याप्तिवारणायान्यतरग्रहणम्। बाधकज्ञानविषयशुक्त्यादेस्तन्निवर्त्यपूर्वज्ञानादेश्च प्रतिपन्नोपाधौ बाधाभावान्न सप्तमादिषु त्रिषु सांकर्यम्। प्रतिपन्नोपाधिपदेन प्रतीयमानोपाधिरित्यर्थः। नाष्टमदशमयोः सांकर्यमिति शङ्कनीयम्; अष्टमलक्षणे स्वाधिष्ठाननिष्ठात्यन्ताभावमात्रप्रतियोगित्वमुक्तं, दशमलक्षणे स्वात्यन्ताभावस्य स्वेन सहैकत्र वृत्तित्वबोध इति भेदः। मिथ्यात्वलक्षणेषु दशसु दोषमुद्भाव्य निराकुरुते—नाद्य इत्यादिना। आद्ये ब्रह्मण्यतिव्याप्तिः, तस्यापि स्वप्रकाशतया त्वया प्रमाणवेद्यत्वानभ्युपगमात्। द्वितीये प्रपञ्चसत्यत्ववादिभिस्तथात्वाभ्युपगतत्वेनार्थान्तरत्वं दर्शयति—तस्य तस्येति। अन्यार्थान्तरतामाह—स्मृतेरिति। तृतीये तत्तदारोपाधिष्ठानतया सर्वस्यायथार्थज्ञानगम्यत्वाभ्युपगमात्। चतुर्थे सद्विलक्षणस्यापि शशविषाणादेरमिथ्यात्वेन तत्रातिव्याप्तिः। पञ्चमेऽसम्भवापत्तिः। षष्ठेऽनिर्वचनीयाविद्याया अप्रसिद्धत्वम्, अग्रहणमिथ्याग्रहणरूपाविद्यायास्तत्कार्यस्य च प्रवृत्तिसंस्कारादेश्च सत्यत्वेनार्थान्तरतादोषप्रसङ्गः। सप्तमे ज्ञाननिवर्त्यस्यापि ज्ञानसुखादेः सत्यत्वात्, सर्वस्य वादिभिः सत्यत्वाभ्युपगमेऽपि परैरीश्वरज्ञाननिवर्त्यत्वाङ्गीकाराच्चार्थान्तरतापत्तिः। अष्टमेऽन्यथाख्यातिवादप्रसङ्गोऽर्थान्तरत्वापत्तिश्च। नवमेऽपि पूर्ववदर्थान्तरता, शुक्त्यादेरपि नेदं रजतमिति बाधकज्ञानविषयत्वाङ्गीकारात्, सर्वैर्वादिभिर्बाधकज्ञानेन पूर्वज्ञाननिवृत्त्यभ्युपग-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्यर्थान्तरतायास्तादवस्थ्यात्, शुक्त्यादेरपि बाधकज्ञानविषयत्वाङ्गीकारात्, बाधकज्ञानेन पूर्वज्ञाननिवृत्त्यभ्युपगमाच्च। न दशमः, संयोगविभागशब्दात्मविशेषगुणानां प्रदेशवृत्तीनां स्वात्यन्ताभावसमानाधिकरणतया प्रतीयमानानामपि परैः सत्यत्वाङ्गीकारादर्थान्तरताया दुरतिक्रमत्वात्। तदेवं न प्रपञ्चमिथ्यात्वनिरुक्तिः।

नापि तत्र प्रमाणम्। तथाहि—न तावत्प्रत्यक्षं तत्र क्रमते; उक्तप्रकाराणामन्यतमस्यापि मिथ्यात्वस्य प्रत्यक्षसिद्धत्वे तत्र वादिनां विवादाभावप्रसङ्गात्। न च विवादपदं, मिथ्या, दृश्यत्वाच्छुक्तिरूप्यवदित्यनुमानम्; प्रमाणागम्यत्वस्य सदसद्वैलक्षण्यस्याविद्यातत्कार्ययोरन्यतरत्वस्य वा साधनेऽप्रसिद्धविशेषणत्वादयथार्थज्ञानगम्यत्वस्य गुरुमतेऽप्रसिद्धत्वात्, इतरेषु च सिद्धसाधनत्वात्। किञ्च दृश्यत्वं नाम फलव्याप्यत्वं वा। वृत्तिव्याप्यत्वं वा? साधारणं वा? नाद्यः; अतीन्द्रियेषु तदभावेन भागासिद्धत्वात्। नद्वितीयः; ब्रह्मणोऽपि वेदान्तिभिर्वृत्तिव्याप्यत्वाभ्युपगमादनैकान्तिकत्वात्। न तृतीयः; ब्रह्मण्यनैकान्तिकत्वादेव। एतेन जडत्वाद्यन्तवत्त्वपरिच्छिन्नत्वादयो हेतवो निरस्ताः; तत्रापि साध्यानिरुक्तेः।

अथायं पट एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगी दृश्यत्वाद्घटवदितिचेत्, न, तन्तुनिष्ठात्यन्ताभावे दृश्यत्वहेतौ चानैकान्तिकत्वात्, तयोर्दृश्यत्वेऽपि तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वात्। प्रतियोगित्वे वा तन्निष्ठात्यन्ताभावाभावात्पटस्य तत्प्रतियोगित्वलक्षण-

---

माच्चार्थान्तरता तदवस्था। दशमे प्रदेशवृत्तीनां संयोगविभागशब्दरूपविशेषगुणानां स्वात्यन्ताभावसमानाधिकरणतया प्रतीयमानानामपि वादिभिः सत्यत्वाभ्युपगमेनार्थान्तरता दुष्परिहार्या। तस्मान्न प्रपञ्चमिथ्यात्वनिरुक्तिः सम्भवतीति।

लक्षणमितरव्यावर्त्तकं व्यवहारप्रयोजकं च भवति, न स्वरूपावबोधकं, प्रमाणं तु लक्षितस्य स्वरूपसाधकं भवति। अतस्तद्विचारः स्वातन्त्र्येण सर्वत्र प्रसरतीत्यत आह—नापीति। तत्रादौ प्रत्यक्षं निराकर्तुमुपक्रमते—न तावत्प्रत्यक्षमिति। प्रत्यक्षं निरस्यानुमानं निरस्यति—न चेत्यादिना। दशधा मिथ्यात्वलक्षणेषु प्रथमे प्रमाणागम्यत्वे, पञ्चमे सदसद्विलक्षणत्वे षष्ठेऽविद्यातत्कार्ययोरन्यतरत्वेऽप्रसिद्धविशेषणत्वापत्तिः, तृतीयेऽयथार्थज्ञानागम्यत्वे, गुरुमतेनाप्रसिद्धत्वमिति। इतो भिन्नेषु सिद्धसाधनत्वमिति। साध्यनिरूपणं प्रदूष्य हेतुनिरूपणं दूषयति—किञ्चेति। निरुक्तप्रयोगे दृश्यत्वं हेतुं विकल्प्य दूषयति—नाद्य इत्यादिना। अतीन्द्रियेषु धर्मादिषु फलव्याप्यत्वाभावेन भागासिद्धत्वात्। द्वितीये ब्रह्मणोऽपि वेदान्तिभिर्वृत्तिव्याप्यत्वाङ्गीकारेण तत्र मिथ्यात्वरूपसाध्याभावे वृत्तिव्याप्यत्वात्मकदृश्यत्वहेतोर्वर्तमानत्वेन व्यभिचारात्। तृतीये ब्रह्मण्यनैकान्तिकत्वादेव नोक्तानुमानं मिथ्यात्वे प्रमाणम्। एतेन विवादास्पदं जगन्मिथ्या, जडत्वादाद्यन्तवत्त्वात्परिच्छिन्नत्वाच्चेति हेतवो निरस्ता वेदितव्याः। तत्रापि साध्यं निर्वक्तुमशक्यम्। अनुमानान्तरमुद्भाव्य दूषयति—अयं घट इति। तन्तुनिष्ठात्यन्ताभावे दृश्यत्वहेतौ च निरुक्तसाध्याभावेऽपि दृश्यत्वहेतोर्वर्तमानत्वेनानैकान्तिकत्वम्। तयोः प्रतियोगित्वे तन्निष्ठात्यन्ताभावाभावात्पटस्य तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वरूपसाध्यासिद्धि-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

साध्यासिद्धिस्तन्तूनामदृश्यता च स्यात्। किं च प्रपञ्चस्य प्रामाणिकत्वे, मिथ्यात्वानुमानानां धर्मिग्राहकप्रमाणेन बाधः। अप्रामाणिकत्वे, चाश्रयासिद्धिः। प्रतीतिमात्रसिद्धस्याश्रयत्वे च दूषणभूषणादेरपि प्रतीतिमात्रसिद्धस्य सर्वत्र सम्भवात्सर्ववादविधिनिषेधप्रसङ्गः। एवं साध्यहेतुदृष्टान्तानामपि प्रामाणिकत्वे दृश्यत्वहेतोस्तत्रानैकान्तिकता, अप्रामाणिकत्वे वा साध्यसाधनाद्यभावादनुमानासिद्धिः।

नाप्यागमः प्रपञ्चमिथ्यात्वे मानम्। तथाहि—न तावत् 'एकमेवाद्वितीयं' 'सत्यं ज्ञानमनन्तं ब्रह्मे'त्यत्र ब्रह्मणोऽद्वितीयत्वानन्तत्वप्रतिपादनाद् द्वितीयवस्तुनोऽभावः प्रतीयत इति युक्तं वक्तुम्, अद्वितीयशब्दस्य तत्सजातीयवस्त्वन्तरनिषेधपरत्वात्, अस्मिन्ग्रामेऽयमेक एवाद्वितीयः पुरुष इतिवत्। अनन्तपदस्य च प्रागुत्तरकालीनान्ताभावपरत्वात्तत्रैव तस्य व्युत्पत्तेरन्योन्याभावाधिकरणत्वानधिकरणत्वस्याप्रसिद्धत्वेन तत्र व्युत्पत्त्ययोगात्। 'नेह नानास्ति किञ्चने' त्यादेश्चागमस्य कारणे ब्रह्मणि नानात्वनिषेधपरत्वात्। 'इन्द्रो मायाभि'रित्यादेश्च तत्तदिन्द्रियद्वारकबुद्धिवृत्त्युपाधिभिर्मायाशब्दाभिधेयैः स्वशक्तिविशेषैर्वा भेदेन परमेश्वरप्रतिपत्तिविधिपरत्वेन प्रपञ्चनिषेधे तात्पर्याभावात्। 'मृत्योः स मृत्युमाप्नोती'त्येवंविधायाश्च श्रुतेर्भेददर्शननिन्दयाऽभेदप्रतिपत्तिविधिपरत्वेन प्रपञ्चनिषेधे तात्पर्याभावात्।

आगमस्य च स्वरूपावगतौ पदपदार्थविभागप्रतिपत्तौ च प्रत्यक्षादिसाकाङ्क्षत्वात्प्रत्यक्षस्य चागमानपेक्षत्वात्। 'न हिंस्यात्सर्वा भूतानि', 'अग्नीषोमीयं पशुमालभेत', 'ब्राह्मणो न हन्तव्यः' 'ब्रह्मणे ब्राह्मणमालभेत' 'अतिरात्रे षोडशिनं गृह्णाति', 'नातिरात्रे षोडशिनं गृह्णाति' 'उदिते जुहोति', 'अनुदिते जुहोती'ति च परस्परं व्याकुलत्वात्; प्रत्यक्षादेश्च

स्तन्तूनामदृश्यत्वं च स्यात्। मिथ्यात्वसाधकसकलानुमानानां साधारणं दोषमाह—किञ्चेत्यादिना। प्रपञ्चस्य प्रामाणिकत्वे बाधः, अप्रामाणिकत्वे चाश्रयासिद्धिः, भ्रमप्रमासाधारणप्रतीतिमात्रसिद्धस्य पक्षत्वे च दूषणादेरपि तथात्वस्य सर्वत्र सम्भवात्सर्ववादिविधिनिषेधप्रसङ्गः। पक्षोक्तं निरुक्तविकल्पं साध्यादिष्वतिदिशत—एवमिति।

प्रपञ्चमिथ्यात्वे आगमप्रमाणं निराकुरुते—नाप्यागम इति। सर्वेषां श्रुतिवाक्यानां यथायथं क्वचित्तत्सजातीयवस्त्वन्तरनिषेधपरत्वं, क्वचित्प्रागुत्तरकालीनान्ताभावपरत्वं क्वचित्कारणे ब्रह्मणि नानात्वनिषेधपरत्वं क्वचित् तत्तदिन्द्रियद्वारकबुद्धिवृत्त्युपाधिभिर्मायाशब्दाभिधेयैः स्वशक्तिविशेषैर्वा भेदेन परमेश्वरोपासनाविधिपरत्वेन च प्रपञ्चनिषेधे तात्पर्याभावात्। तथा "मृत्योः स मृत्युमाप्नोति" इत्येवंविधश्रुतेर्भेदनिन्दाद्वारेणाभेदोपासनाविधिपरत्वेन प्रपञ्चनिषेधे तात्पर्याभावादिति।

प्रत्यक्षागमयोः प्रत्यक्षस्य प्राबल्यमित्याह—आगमस्य चेति। किञ्च परस्परविगीतत्वेनागमास्तावदुपहताः सन्तीत्याह—न हिंस्यादित्यादिना। प्रत्यक्षादेर्न खलु विगीततया परस्परव्याहतत्वं, येन प्रत्यक्षादावपि प्रामाण्यं सन्दिह्येत। अपिच सावकाशनिरवकाशयोर्निरवकाशत्वेन

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तदभावात्। आगमस्य चोपचरितार्थत्वेनापि तत्र सावकाशत्वादनवकाशत्वाच्च भेदग्राहिणः प्रत्यक्षादेः। पूर्वसिद्धतया चागमेभ्यस्तस्य प्रतिष्ठितत्वात्तद्विरोधे तेषामेव बाधात्। 'मृत्तिकेत्येव सत्यं', 'त्रीणिरूपाणीत्येव सत्यं', 'सच्च त्यच्चाभवदि'ति च प्रपञ्चस्य सत्यत्वप्रतिपादनात्।

विवादास्पदीभूतः प्रपञ्चः, सत्यः, प्रमाणसिद्धत्वादात्मवदिति, अयं घट एतन्निष्ठबाध्यभेदातिरिक्तभेदाश्रयः, द्रव्यत्वात्पटवदित्यनुमानतोऽपि वियदादेरात्मनां च सत्यभेदसिद्धिः। नच भेदस्य सत्यत्वे दृग्दृश्ययोःसम्बन्धानुपपत्तिर्बाधिका, तत्तत्प्रतिपत्तिहेतुभूतेन्द्रियलिङ्गादेस्तत्तद्विषयसम्बन्धादेव तदुत्पन्नज्ञानानां तत्तद्विषयं प्रति नियमसिद्धावन्तरेणापि सम्बन्धान्तरमतिप्रसङ्गाप्रसङ्गात्। शब्दान्तराभ्याससंख्यादेश्च कर्मभेदप्रतिपादकप्रमाणस्य भेदमिथ्यात्वेऽप्रामाण्यप्रसङ्गः। नच तस्य लोकसिद्धभेदानुवादकत्वसंभवः; तादृक्कर्मापूर्वभेदस्य लोकतोऽसिद्धेः, सिद्धत्वे च शब्दान्तराद्यधिकरणानारम्भप्रसङ्गात्। तदेवं मिथ्यात्वे लक्षणप्रमाणयोरसम्भवादनुमानागमाभ्यां प्रपञ्चस्य सत्यत्वापादनान्न मिथ्यात्वमिति।

अत्रोच्यते—न तावल्लक्षणासम्भवः; यतः—

भेदग्राहिणः प्रत्यक्षादेः प्राबल्यम्, गौणार्थत्वेनापि तत्रागमस्य सावकाशत्वमित्याह—आगमस्य चेत्यादिना। संजातासंजातविरोधिनोः संजातविरोधिदुर्बलमिति न्यायेन पूर्वप्रतिष्ठितेन प्रत्यक्षादिना सह विरोधे आगमानामेव बाधस्योचितत्वादित्याह—पूर्वसिद्धतयेति। अपिचागमेनापि प्रपञ्चस्य सत्यत्वमुक्तमित्याह—मृत्तिकेत्यादिना।

प्रपञ्चस्य सत्यत्वे प्रत्यक्षादिप्रमाणमुक्त्वाऽनुमानं दर्शयति—विवादेति। वियदादेरात्मनां च सत्यभेदमनुमानेन साधयति—अयं घट इति। दृग्दृश्ययोः सम्बन्धानुपपत्तिं वारयति—न च भेदस्येति। एवं प्रतिकूलतर्कं निराकृत्य स्वानुमानस्य, विपक्षे बाधकतर्कमाह—शब्दान्तराभ्यासेत्यादिना। इदमत्राकूतं—शब्दान्तराभ्याससंख्यासंज्ञागुणप्रकरणान्तरैः कर्मभेदः (पू० मी० द्वितीयाध्याये) निरुपितः। १—शब्दान्तरात्कर्मभेदः—यथा-यजति-ददाति—जुहोतीत्यादौ धात्वन्तरभेदे सति कर्मभेदेन भावना भेदोऽभ्युपेयः, कुतः, कृतानुबन्धत्वात्, तेनैव भावनायाः कृतावच्छेदकत्वात्। २—अभ्यासात्कर्मभेदः—"समिधो यजति", "तनूनपातं यजति" इत्यादौ पञ्चकृत्वो यजति श्रुतौ भिन्नविधितया कर्मभेदः सिद्धान्तितः। अन्यथा पुनः पुनरेकस्य विधेः श्रवणमनर्थकं स्यादित्यर्थः। ३—संख्याभेदात्कर्मभेदः—"सप्तदशप्राज्यापत्यान् पशूनालभते" इत्यत्र प्रजापतिदेवताया एकत्वेऽपि सप्तदशसंख्याश्रवणात्कर्मभेदोऽभ्युपेयः। तथा च प्रतिपशुदृष्टार्थमेकादशावदानसिद्धिः। ४—संज्ञाभेदात्कर्मभेदः—"अथैष ज्योतिरथैष विश्वज्योति"रित्यत्र मिथो विलक्षणनामभेदात्कर्मभेदोऽवश्यमभ्युपेयः। ५—गुणभेदात्कर्मभेदः—"वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमि"त्यत्रामिक्षावाजिनरूपगुणभेदात्कर्मभेदोऽभ्युपेयः। आमिक्षात्मकगुणविशिष्टकर्मणोऽपेक्षया वाजिनविशिष्टं कर्म ततोऽन्यदिति भावः। ६—प्रकरणभेदात्कर्मभेदः—प्रकृताग्निहोत्रापेक्षया मासाग्निहोत्रं कर्मप्रकरणभेदाद् भिन्नमेव, विच्छिन्नप्रकरणतया प्रत्यभिज्ञाऽभावान् मासादिगुणविशिष्टं कर्मान्तरमेव। अग्निहोत्रादिधर्मातिदेशार्थमेवाग्निहोत्रादिनामोपदेश इति भावः। तदेवमित्यादिना पूर्वपक्षमुपसंहरति।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सर्वेषामपि भावानामाश्रयत्वेन सम्मते ।
प्रतियोगित्वमत्यन्ताभावं प्रति मृषात्मता ॥७॥

तथाहि—पटादीनां भावानां स्वाश्रयत्वेनाभिमतास्तन्त्वादयो ये तन्निष्ठात्यन्ताभावप्रतियोगितैव तेषां मिथ्यात्वम् । न हि तेषामन्यत्र सत्ता सम्भविनी । तत्रापि चेत्सा न स्यात्तदा 'गले पादुकान्यायेन' मृषात्वमेव पर्यवस्येत् । न च निराश्रयेषु नित्येषु भावेषु सा नास्तीति लक्षणस्याव्याप्तिः; ब्रह्मव्यतिरिक्तस्य कृत्स्नस्य कार्यतया कारणाश्रितत्वस्य व्यवहारदशायां रजतादेरिव शुक्त्याद्याश्रिततायाः स्वीकारात् । नाप्यतिव्याप्तिः; सत्यस्य ब्रह्मणो निराश्रयत्वात्तस्य तन्निष्ठात्यन्ताभावप्रतियोगितायाः शङ्कितुमप्यशक्यत्वात । न च परैः प्रदेशवृत्तितयाभ्युपगतेषु संयोगशब्दादिषु सत्येष्वपि लक्षणस्य सद्भावादर्थान्तरता; भावाभावयोरेकाधिकरणत्वाभ्युपगमे सर्वत्रैव तथाभावापत्तेर्विरोधस्य जगति दत्तजलाञ्जलिताप्रसङ्गात् । भावाभावयोर्हि साक्षाद्विरोधस्तन्मुखेनैवान्यत्रेति परीक्षकपरिषदां सम्मतत्वात्, प्रदेशोपाधिभेदेन वा तत्र विरोधसमाधाने भावात्यन्ताभावयोर्भिन्नाधिकरणत्वेन लक्षणस्य तत्र सत्ये कुतः सम्भवः ? कुतस्तरां चातिव्याप्तिः ? कुतरतमां चार्थान्तरता ? तदेवं न मिथ्यात्वानिरुक्तिः ।

नापि मानासत्त्वम्; अनुमानसद्भावात् । तथाहि—

अंशिनः स्वांशगात्यन्ताभावस्य प्रतियोगिनः ।
अंशित्वादितरांशीव दिगेषैव गुणादिषु ॥८॥

विमतः पटः, एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगी, अवयवित्वात्पटान्तरवत् । एवमेतद्गुणकर्म-

---

मिथ्यात्वलक्षणं श्लोकेन संकलयति—सर्वेषामिति । स्वाश्रयत्वेनाभिमतेऽत्यन्ताभावं प्रति प्रतियोगित्वं सर्वेषां पदार्थानां मिथ्यात्वमिति तदर्थः । श्लोकं व्याचष्टे—तथाहीति । प्रमितवारणायाभिमत इति पदम्, तेन बाधदोषाभावो बोध्यः । स्वकारणातिरिक्तस्थले कार्याणां सत्ता नास्ति, तत्रापि कार्यसत्ता न स्यात्तर्हि बलात्सर्वेषां भावानां मिथ्यात्वं सेत्स्यतीति । न चात्मवदनाश्रयेषु नित्येषु परमाणुष्वव्याप्तिरिति वाच्यम्; ब्रह्मभिन्नस्य सर्वस्य कार्यत्वेन व्यवहारदशायां रजतादिवत्स्वाधिष्ठानशुक्त्यादावाश्रितत्वेन स्वीकारात् । ब्रह्मण्यतिव्याप्तिं वारयति—नाप्यतीति । प्रदेशवृत्तितयाऽभ्युपगतेषु संयोगशब्दादिषु निरुक्तमिथ्यात्वलक्षणस्य वर्तमानतयाऽर्थान्तरता—तां वारयति—न च परैरित्यादिना । प्रकारान्तरेणार्थान्तरतां वारयति—प्रदेशोपाधीति ।

मिथ्यात्वसिद्धौ प्रमाणं साधयति—नापीति । अनुमानं श्लोकेन संकलयति—अंशिन इति । अवयविनः स्वावयवनिष्ठात्यन्ताभावप्रतियोगिन इति प्रतिज्ञा, अवयवित्वादिति हेतुः, अन्त्यावयविवदिति दृष्टान्तः । निरवयवगुणादिषु पूर्वोक्तलक्षणमतिदिशति—दिगेषैवेति । अनेन यथायथं गुणादिष्वपि मिथात्वमनुमेयमिति भावः । श्लोकोक्तमनुमानं विवृणुते—विमत इत्यादिनेति । अर्थान्तरता वारणाय—विमत इति । पटान्तरस्यैतत्तन्तुनिष्ठात्यन्ताभावादर्थान्तरता, तद्वारणाय विमतपदम् । एतत्तन्तुभिरनारब्धे पटान्तरे साध्यप्रसिद्धिः । अवयवित्वेन सम्मतत्वम्, तेन प्रतिज्ञाहेत्वोरविरोधः । दिगेषैवेत्यतिदेशं विशदयति—एवमिति । एतद्रूपमेतत्तन्तुनिष्ठात्यन्ताभाव-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

जात्यादयोऽपि तत्तत्तन्तुनिष्ठात्यन्ताभावप्रतियोगिनः, तत्तद्रूपत्वादितरतत्तद्रूपवदित्येवमादिप्रयोगः सर्वत्रैवोहनीयः ।

ननु किं प्रामाणिकैतन्निष्ठात्यन्ताभावप्रतियोगित्वं साध्यं ? किं वा प्रातिभासिकात्यन्ताभावप्रतियोगत्वम् ? नाद्यः; अभावानां प्रामाणिकत्वे तैरेव द्वैतापत्तेः; प्रामाणिकाभावप्रतियोगित्वे च भावानामपि प्रामाणिकतया न मिथ्यात्वसिद्धिः । न द्वितीयः; रजते सीसविभ्रमे सीसमेवैतन्न रजतमिति रजते रजतत्वप्रतिषेधे प्रातिभासिकात्यन्ताभावप्रतियोगिनोऽपि रजतत्वस्यामिथ्यात्वेनार्थान्तरत्वापातादिति चेत्, मैवम्; अभावानां प्रामाणिकत्वेऽपि सदद्वैताव्याकोपात् । कथं च व्यावहारिकप्रमाणोपस्थापितस्वभावैर्भावैरभावैर्वा तत्त्वावेदकप्रमाणोपनीतस्याद्वैतस्य व्याकोपाशङ्कावकाशः ? नापि प्रामाणिकाभावप्रतियोगिनोऽपि शुक्तीदमंशरजताकारद्वयालिङ्गितस्य, संसर्गस्य, 'इदं रजतम्'—इत्येकज्ञानोपनीतस्य, केवलतद्व्यवहारोपनीतस्य, वा धीरूपरजताकारोपारोहिणो बहिष्ट्वस्य वा कुत्रचिद्देशे काले वा केनचिदपि वादिना सत्ता स्वीक्रियते; येन प्रामाणिकाभावप्रतियोगिनः सत्तां भावाः प्रतिपद्येरन् । द्वितीयस्तु विकल्पोऽनङ्गीकारपरास्तः । न च धर्मिग्राहकप्रमाणबाधः; धर्मिणस्तत्त्वावेदकप्रमाणसिद्धत्वानभ्युपगमात् । तर्ह्याश्रयासिद्धिरितिचेत्, न; सांव्यावहारिकप्रमाणोपनीतस्याप्याश्रयत्वोपपत्तेः । प्रपञ्चस्तत्त्वावेदकप्रमाणविषयः, धर्मित्वादात्मवदिति चेत्, न; आत्मत्वस्यैव तत्रोपाधित्वात् । न च व्यतिरेकासिद्धिः; अनात्मनः शुक्तिरजतसंसर्गादेस्तत्त्वावेदकप्रमाणाविषयस्योभयवादि-

---

प्रतियोगि, रूपत्वादितररूपवत् । एवं स्पर्शादिष्वपि मिथ्यात्वमनुमानेन साधनीयम् । तथैतच्चलनमेतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगि, चलनत्वादितरचलनवत्, तन्तुत्वसत्तादिषु तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वरूपं मिथ्यात्वं घटादिदृष्टान्ते व्याप्तिग्रहानन्तरं जातित्वहेतुनाऽनुमेयम् । समवायः, स्वसमवायिनिष्ठात्यन्ताभावप्रतियोगी, सम्बन्धत्वात्संयोगादिसम्बन्धवत् । तथाऽयं विशेषः, एतदात्मनिष्ठात्यन्ताभावप्रतियोगी, विशेषत्वादात्मान्तरवृत्तिविशेषवदितिरीत्या समवायविशेषयोरपि तादृग्मिथ्यात्वमनुमेयमिति भावः ।

ननु तादृक्प्रतियोगित्वस्य प्रामाणिकत्वे तदभावानामपि प्रामाणिकत्वस्वीकारप्रसङ्गः, तथा तैरेव द्वैतापत्तिः, प्रामाणिकाभावप्रतियोगिनां च भावानामपि प्रामाणिकतया न तत्र मिथ्यात्वं साधयितुं शक्यम् । निरुक्तप्रतियोगित्वस्य प्रातिभासिकत्वेऽर्थान्तरतामाह—न द्वितीय इत्यादिना । विकल्पागतमाक्षेपं प्रतिक्षिपति—मैवमिति । भावेनाद्वैतव्याकोपः कथञ्चिद्वक्तुं शक्यो, नत्वभावेनेति भावः । वस्तुतस्तु तत्त्वावेदकप्रमाणोपनीतस्याद्वैतस्य व्यावहारिकैर्भावैरभावैर्वा न व्याकोपशङ्कावसरः । प्रामाणिकाभावपक्षे प्रतियोगिभूतैर्भावैः पूर्वोक्तमद्वैतविरोधं परिहरति—नापि प्रामाणिकेत्यादिना । अप्रामाणिकाभावपक्षान्तःपातिनं दोषं परिहरति—द्वितीयस्त्विति । धर्मिग्राहकप्रमाणबाधमुद्भाव्य दूषयति—नचेति । आश्रयासिद्धिं वारयति—तर्ह्याश्रयेति । बाधसिद्ध्यर्थं प्रपञ्चे तत्त्वावेदकप्रमाणगम्यत्वमनुमानेन साधयति—प्रपञ्चेति । आत्मत्वोपाधिना पूर्वपक्षोक्तमनुमानं निराचष्टे—न; आत्मत्वेति । पूर्वोक्तोपाधौ पक्षेतरत्वं वारयति—नच व्यतिरेकेति । धर्मित्वहेतौ सव्यभिचारमाह—

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सिद्धस्य व्यतिरेकोपसंहारस्थलस्य सद्भावात्, धर्मित्वहेतोः शुक्तिरजतादिसंसर्गधर्मिणि व्यभिचाराच्च। नासौ धर्मी मिथ्यात्वादिति चेत्, न; एतमेव हेतुं प्रति धर्मित्वाधर्मित्वयोस्तदयोगात्। एतेन प्रतीतिमात्रसिद्धस्याश्रयत्वे दूषणभूषणादेरपि तथाभूतस्य सुलभत्वात् सर्ववादविधिनिषेधप्रसङ्ग इत्यपास्तम्; वादिप्रतिवादिमध्यस्थानां प्रमाणसिद्धमेतदिति संमत्यालम्बनतया त्रिचतुरकक्षाविश्रान्तस्य तत्तदाभासलक्षणानालिङ्गितस्याश्रयस्य दूषणभूषणादेश्च तत्र तत्र कथाङ्गताङ्गीकारात्; तादृशव्यावहारिकप्रमाणसिद्धस्यैव च व्यावहारिकसत्यत्वेन स्वीकारात्, सर्वदा बाधवैधुर्यस्यागमेतरप्रमाणैरसर्वज्ञेन ज्ञातुमशक्यत्वात्। एतेनेदमपास्तम्, यदाहुर्भट्टाचार्याः—

"संवृतेर्न तु सत्यत्वं सत्यभेदः कुतोऽन्वयम्।
सत्या चेत्संवृतिः केयं मृषा चेत्सत्यता कथम्॥
सत्यत्वं नच सामान्यं मृषार्थपरमार्थयोः।
विरोधान्नहि वृक्षत्वं सामान्यं वृक्षसिंहयोः॥"

वस्तुतोऽसत्यस्यैव यावद्बाधं देहात्मभाववल्लौकिकवैदिकव्यवहाराङ्गतया सत्यत्वेन व्यवहारात्।

नायमसिद्धो हेतुः, पटस्यांशित्वे वादिनोरविवादात्। नापि विरुद्धः; एतत्तन्तुनिष्ठात्यन्ताभावाप्रतियोगिनि विपक्षे आत्मनि अंशित्वस्यावृत्तेः। नानैकान्तिकोऽपि; विपक्षाद्व्यावृत्तेरेव। इह तन्तुषु पट इत्यादिनैव प्रत्यक्षेण तन्तुनिष्ठतया पटस्यावगमात्तदपहृतविषयतया कालात्ययापदिष्टतेति चेत्, मैवम्; पटस्यैतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वमङ्गीकुर्वता तस्य प्रामाण्यानङ्गीकारादिह नभसि नीलिमति प्रत्यक्षाभिमत-

---

धर्मित्वहेतोरिति। न च शुक्तिरजतसंसर्गो न धर्मी, मिथ्यात्वादिति वाच्यम्; मिथ्यात्वहेतुं प्रति संसर्गस्य धर्मित्वाधर्मित्वयोर्वक्तुमशक्यत्वात्। प्रतीतिमात्रसिद्धस्य हेतुत्वादित्वेऽतिप्रसक्तिं वारयति—एतेनेति। सांव्यावहारिकप्रमाणं विशदयति—वादिप्रतिवादीत्यादिना। त्रिचतुरकक्षाविश्रान्तस्य=त्रिचतुरश्रेणिष्वबाधितत्वस्य। तादृशव्यावहारिकप्रमाणसिद्धस्य वेदान्तिभिर्व्यावहारिकं सत्यत्वमभ्युपेयते नत्वात्यन्तिकमित्याह—तादृशेत्यादिना। बौद्धपक्षप्रदूषणाय भट्टपादोक्तं सम्मतमप्यपास्तमित्याह—यदाहुरिति। संवृणोति तत्त्वमिति संवृत्तिरविद्या, तस्याः सत्यत्वं न युक्तमित्यत्र हेतुमाह—सत्यभेद इति। इदं संवृत्तिसद्, इदं परमार्थसदिति बौद्धेनासत एव सत्यविशेषस्याभ्युपगते न सत्यशब्दोऽन्वर्थकः। सत्यविशेषः कश्चित्संवृत्तिसत्यमित्यभ्युपेये कुतोऽयं सत्यभेदः। न कुतोऽपि, प्रमाणाभावादित्यर्थः। प्रमाणाभावे विरोधमाह—सत्या चेदिति। विरोधाज्जातिव्यक्तिभावं प्रदूष्याधुना मिथो विरुद्धयोः सदसतोः सत्यत्वजातिसम्बन्धं विघटयति—सत्यत्वमिति। तत्र दृष्टान्तमाह—नहि वृक्षत्वमिति। एतेनेत्याद्यतिदेशं विशदयति—वस्तुत इति।

अवयवित्वहेतौ स्वरूपासिद्धिं निरस्य विरोधं निरस्यति—नापि विरुद्ध इति। निरुक्तमिथ्यात्वानुमाने विपक्षस्यात्मनः सर्वाधिष्ठानत्वेन सर्वस्वरूपतया तन्तुनिष्ठात्यन्ताभावाभावात्। तत्र चात्मनि निरवयवेंऽशित्वं नास्तीति भावः। प्रत्यक्षबाधं शङ्कते—इहेति। प्रत्यक्षबाधं परिहृति—मैवमिति। आकाशमरूपि, विभुत्वादात्मवदित्यनुमाने नभसि नीलिमेति प्रत्यक्षस्य विभ्रमत्वान्न प्रत्यक्षबाधस्तद्वदिह

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रत्ययबाधेनारूपित्वानुमानप्रवृत्तिवदत्राप्यनुमानप्रवृत्त्युपपत्तेः। नचैवं सति दहनशैत्यानुमानादेरप्यप्रतिबद्धप्रसरतया कालात्ययापदिष्टकथा सर्वत्रास्तमियादिति वाच्यम्, तत्र तत्रोभयवादिसंमतप्रबलप्रमाणे परिपन्थिनि जाग्रति तस्या निरंकुशप्रसरत्वात्, प्रकृते च तथाभावाभावात्। एतेन प्रमाणसिद्धत्वादिति प्रत्यनुमानविरोधोऽपास्तः; प्रमाणसिद्धत्वस्यैवासिद्धेः। यत्र प्रत्यक्षमपि न तत्त्वावेदकं प्रमाणं, तत्र का कथा तत्पादोपजीविनो वराकस्यानुमानादेः प्रमाणतायाम् ?

यत्पुनरेतस्य घटस्य द्रव्यत्वादेतन्निष्ठबाध्यभेदातिरिक्तभेदवत्त्वानुमानं, तदप्यद्वैतागमविरोधात्कालात्ययापदिष्टमित्युपेक्षणीयम्। 'मृत्तिकेत्येव सत्य'मित्याद्यागमेन प्रपञ्चस्य सत्यतावगमादद्वैतागम एवोपचरितार्थः किं न स्यादिति चेत्, न; तस्यान्यपरत्वात्। तथाहि—एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय ब्रह्मणः सर्वकारणतया सर्वकार्यैरनन्यत्वप्रदर्शनेन तां प्रतिज्ञामुपपादयितुं लोकेऽपि घटरुचकादिकार्याणां मृल्लोहादिकारणादनन्यत्वं दर्शयति—'मृत्तिकेत्येव सत्यं', 'त्रीणि रूपाणित्येव सत्य' मित्यादिना। न तु तेषां वास्तवत्वमभिप्रैति; 'ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मे'त्यन्तेन ब्रह्मण एव सत्यत्वप्रतिपादनविरोधात्। एतेन मिथ्यात्वानुमानस्यागमविरोधोऽप्यपास्तः।

दृग्दृश्ययोः सम्बन्धानुपपत्तिश्च सत्यत्वानुमानस्य बाधिका। न च करणसम्बन्धादेव सम्बन्धोपपत्तिः; ईश्वरज्ञानेऽकरणजन्येऽपि विषयाणां स्फुरणात्, करणजन्येष्वपि योगिज्ञानेषु युक्तावस्थायामन्तःकरणासम्बद्धानामतीतानागतानां बाह्यार्थानां च स्फुरणात्। न च मनसो बहिरर्थैः सम्बन्धः; परतन्त्रं बहिर्मन इति न्यायात्, असमदादीनां चैन्द्रियिक-

---

तन्तुषु पट इति प्रत्यक्षस्यापि विभ्रमत्वान्मिथ्यात्वानुमाने न प्रत्यक्षबाधः प्रसरति। नचैवं वह्नौ शैत्यानुमानेऽपि प्रत्यक्षबाधो न प्रसरेदिति सर्वत्र बाधकथाऽस्तमियादिति वाच्यम्; तत्र तत्रोभयवादिसम्मतप्रबलप्रमाणछत्रच्छायायां निःशङ्करूपतया बाधप्रवृत्तिसम्भवात्, प्रकृते प्रबलप्रमाणाविरोधेन प्रत्यक्षबाधप्रवृत्तिसम्भवादित्याह—न चैवं सतीत्यादिना। पूर्ववादिनोक्तं "प्रपञ्चः, सत्यः, प्रमाणसिद्धत्वादि"ति विरोधं परिहरति—एतेनेति। परिहारं विवृणुते—प्रमाणेति।

भेदसत्यत्वानुमानमनूद्य निराचष्टे। यत्पुनरिति। द्वैताद्वैतप्रतिपादकयोरागमयोः पौर्वापर्यपर्यालोचनयाऽद्वैतागमस्य मुख्यार्थत्वमितरश्रुतेरद्वैतश्रुतौ शेषत्वमवसीयते। अन्यथा शेषिविरोधः प्रसज्ज्येत। श्रुतीनां मिथो विरोधपरिहारं विशदयति—तथाहीति। द्वैतागमस्यान्यपरत्वोपपादनेन मिथ्यात्वानुमानागमयोर्विरोधोऽपि निराकृतो वेदितव्यः।

दृग्दृश्यसम्बन्धस्यान्यथोपपत्तिं पूर्ववाद्युक्तिमनूद्य दूषयति—न चेति। करणसम्बन्धमन्तरेणैवाकरणजन्येऽपि परमेश्वरज्ञाने विषयाणां स्फुरणात्, करणजन्येष्वपि योगिज्ञानेषु युक्तावस्थायामन्तःकरणासम्बद्धानामतीतादिबाह्यार्थानां च स्फुरणादिन्द्रियसम्बन्धनियमो बाधित इति भावः। परतन्त्रं हि बहिर्मन इति नियमादिन्द्रियसाहाय्यमन्तरेण मनसो बहिरर्थैः सम्बन्धासम्भवः। अथ विशिष्टादृष्टसामर्थ्यसहकृतमनोयोगियोगिज्ञानं विहायायं नियम इति—चेत्तर्हि तत्राव्याप्तिमाह—असमदादीनां चेति। अथ

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विभ्रमेष्विन्द्रियासम्बद्धानामेव स्फुरणाङ्गीकाराद्, अस्मदादिप्रमाणजन्येऽपि ज्ञाने सोऽयं देवदत्त इत्यादौ तत्तांशस्य करणासम्बद्धस्यापि प्रत्यक्षताभ्युपगमात्। नच तत्तायामपीन्द्रियेण सह संयुक्तविशेषणतालक्षणः सन्निकर्षः समवायेतरभावस्येन्द्रियसम्प्रयोगमन्तरेणापि प्रत्यक्षतायामयं पर्वतोऽग्निमानित्यत्राग्निमत्त्वस्यापि संयुक्तविशेषणतया प्रत्यक्षत्वापत्तेः प्रत्यक्षधर्मिकानुमानमात्रोच्छेदप्रसङ्गः।

अस्तु तर्हि ज्ञानज्ञेययोर्विषयविषयिभावः सम्बन्ध इति चेत्, न; तदनिरूपणात्। तथा हि न तावज्ज्ञानजन्यफलाधारत्वं विषयत्वं, विषयनिष्ठफलजनकत्वं च विषयित्वमिति युक्तम्, विकल्पासहत्वात्। तत्फलं ज्ञातता? व्यवहारो वा? नाद्यः, अतीतादौ तदभावेनाविषयत्वप्रसङ्गात्। तत्रैव फलजननेऽप्यनुगतनियामकायोगात्, तद्योगे वा तस्यैव विषयत्वनियामकतोपपत्तेः। न द्वितीयः; कराकर्षणादेर्व्यवहारस्यात्मादावभावात्, कलधौतमलादेरपि नान्तरीयकतया तद्व्यवहारविषयस्य तज्ज्ञानविषयतापत्तेः। नापीच्छादिः; आत्मन एव तदाधारतया तदन्यस्याविषयत्वप्रसङ्गात्। अथ ज्ञानप्रतिबद्धहानादिलक्षणज्ञानगोचरत्वं तद्योग्यत्वं वा विषयत्वम्, न; ज्ञानगोचरत्वस्यैव निरूप्यमाणत्वात्। हानादिज्ञानानां च हानादिज्ञानान्तराजनकतया निर्विषयत्वप्रसङ्गात्, जनकत्वे वा हानादिज्ञानानुपरमाद्विषयान्तरसंचाराभावः सुषुप्त्यभावश्च प्रसज्येयाताम्। व्यवहारयोग्यत्वं विषयत्वमित्यङ्गीकारे च योग्यतायां योग्यतान्तराभ्युपगमेऽनवस्था, तदनभ्युपगमे योग्यताया विषयत्वाभावः।

विभ्रमेषु तथात्वेऽपि प्रमाणजन्येष्वेवायं नियम इत्युक्तौ प्रत्याह—अस्मदादिप्रमाणजन्येऽपीति। न च तत्तांशस्यापीन्द्रियेण सह संयुक्तविशेषणतारूपः सन्निकर्षः। अर्थात् चक्षुषा संयुक्तो देवदत्तपिण्डस्तत्र तत्ताविशेषणं, यथेन्द्रियसंयुक्ते भूतले घटाभावो विशेषणमिति वाच्यम्; समवायभिन्नभावस्येन्द्रियसन्निकर्षमन्तरेणापि प्रत्यक्षत्वाभ्युपगमेऽयं पर्वतो वह्निमान् इत्यादावपि वह्निमत्त्वस्येन्द्रियसंयुक्ते पर्वते विशेषणतया प्रत्यक्षत्वापत्तेः प्रत्यक्षपक्षकानुमानमात्रोच्छेदप्रसङ्गः।

न च ज्ञानेन जन्यं फलं प्रत्याधारत्वं विषयत्वं, तादृशफलजनकत्वं च विषयित्वमिति ज्ञानज्ञेययोर्विषयविषयिभावः सम्बन्धोऽभ्युपगन्तव्य इति वाच्यम्; विकल्पे सति दूषणासहत्वात्। ज्ञानजन्यं फलं ज्ञातता वा, व्यवहारो वा। नाद्यः, फलजननकालेऽतीतादेरवर्तमानत्वेन फलाधारत्वानुपपत्तेस्तत्रलक्षणाव्याप्तिप्रसक्तेः। तत्रैव दूषणान्तरमाह—तत्रैव फलजनन इति। न द्वितीयः, कराकर्षणभक्षणादिव्यवहारस्य विभौ स्पर्शरहिते आत्मादावसम्भवेनाव्याप्तेः। रजतमलस्यापि नान्तरीयकतया रजतज्ञानप्रयुक्तादानव्यवहारभाक्त्वस्य विद्यमानत्वेन रजतज्ञानविषयत्वापत्तेः। ज्ञानजन्येच्छादिव्यवहाराभ्युपगमेऽपि दोषमाह—नापीच्छादिरिति। इच्छाधारत्वमात्मन्येवास्ति, तद्भिन्नेऽनात्मवर्गे लक्षणाव्याप्तिः। निरुक्तविषयत्वस्य लक्षणान्तरमाह—अथ ज्ञानेति। विकल्पमुपविकल्पं चोद्भाव्य तदपि दूषयति—नेत्यादिना।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अलमिह लक्षणान्तरगवेषणापरिश्रमेण यस्यां संविदि योऽर्थोऽवभासते स तद्विषय इति लक्षणनिरुक्त्युपपत्तेरिति चेत्, मैवं; विकल्पासहत्वात् । संविदीति सप्तम्या किमधिकरणं विवक्ष्यते ? अथ विषयः ? किं वा सम्बन्धिमात्रं ? सति सप्तमी वा ? नाद्यः, घटादि-द्रव्याणां बाह्यानामान्तरसंविल्लक्षणगुणाधिकरणतानुत्पत्तेः । न द्वितीयः; तस्यैव निरूप्य-माणत्वात्, संविदो विषयत्वं घटादीनां च विषयित्वमिति वैपरित्यापत्तेश्च । न तृतीयः; संविज्जनकतया तत्सम्बन्धिनो नयनादृष्टादेरपि तद्विषयत्वप्रसङ्गात् । संविदि भासत इति भासमानताया विशेषणत्वान्न नयनादावतिप्रसङ्ग इति चेत्, न, भासमानताया एवाद्याप्यनिरूपितत्वात् । न चतुर्थः, भासमानत्वानिरुक्तेरेव ।

ज्ञानाकारार्पको हेतुर्विषय इति चेत्, न, ज्ञानतदाकारयोर्भेदाभावेन सर्वेषामपि ज्ञानहेतूनां तदाकारसमर्पकतया विषयत्वप्रसङ्गात् । दृश्यमानतया तदाकारसमर्पको विषय इति चेत् न, दृश्यमानताया एवाद्याप्यनिरूपणात् । न च ज्ञानकर्मत्वं विषयत्वम्, अतीतादिज्ञानस्येश्वरज्ञानस्य च कर्मकारकाजन्यत्वेनाविषयत्वप्रसङ्गात् । सम्बन्धान्तरमन्तरेण ज्ञानस्य यद्विशेषणं स तद्विषयो, विशेष्यं च तेन विषयीति चेत्, न, मत्समवेतं रूपज्ञान-मित्यत्र व्यभिचारात् । सम्बन्धान्तरमन्तरेणैव मत्समवायस्य रूपज्ञानस्य च विशेषण-विशेष्यभावेऽपि मत्समवायरूपज्ञानयोर्विषयविषयित्वाभावात्, तत्र समवायस्यानुव्यवसाय-ज्ञानविषयत्वेऽपि रूपज्ञानाविषयत्वात् । तदेवं विषयविषयिभावानिरूपणात्, आत्मन्य-

---

शालिकनाथोक्तलक्षणं दर्शयति—अलमिहेति । तदपि विकल्पमुद्भाव्य दूषयति—मैवमिति । संविदीत्यत्र सप्तम्या अधिकरणत्वविवक्षायां घटादिद्रव्यगुणकर्मसामान्यविशेषाणामान्तरसंविल्लक्षण-गुणाधिकरणतानुपपत्तेः । विषयसप्तमीपक्षं द्वितीयं निराकुरुते—न द्वितीय इति । विषयत्वस्यैव निरुप्यमाणत्वात् वैपरीत्यापत्तेश्चापि सम्भवात् । सम्बन्धिमात्रं तृतीयपक्षं व्यावर्तयति—न तृतीय इति । संविज्जनकतया संवित्सम्बन्धिनश्चक्षुरादेरपि संविद्विषयत्वप्रसङ्गः । संविदि भासमानताया विशेषण-त्वेऽपि नेत्रादावतिव्याप्तिं वारयितुं न शक्यते, भासमानत्वस्याद्याप्यनिरूपितत्वात् । सतिसप्तमीतिपक्षं निराकुरुते—न चतुर्थ इति ।

सौगताभिमतं लक्षणमनुक्रामति—ज्ञानेति । घटज्ञानं पटज्ञानमित्यत्र ज्ञाने आकारं समर्पयति घटादिकं, तस्माज्ज्ञाने आकारसमर्पकत्वे सति हेतुत्वं विषयत्वमिति तेन नेत्रादौ नातिप्रसङ्ग इति चेन्न, ज्ञानतदाकारयोर्भेदाभावेन ज्ञानहेतूनां विषयेन्द्रियसहकारिणां सर्वेषां ज्ञानाकारसमर्पकतया विषय-त्वप्रसक्तेः । दृश्यमानताया अद्याप्यनिरूपणाद् दृश्यमानत्वविशेषणं न व्यावर्तकमिति भावः । लक्षणान्तरं विधाय दूषयति—न चेत्यादिना । लक्षणान्तरं विधाय तदतिव्याप्त्या दूषयति—सम्बन्धा-न्तरेणेति । मत्समवेतं रूपज्ञानमित्यत्र समवायो ज्ञानं प्रति विशेषणमस्ति, न तत्र ज्ञानसमवाययोः संयोगसमवायादिसम्बन्धान्तरमस्ति । अतः समवायेऽतिव्याप्तिरिति भावः । न चात्रेष्टापत्तिरिति वाच्यम्; मत्समवायरूपज्ञानयोर्विषयविषयित्वाभावात् । तत्रानुव्यवसायविषयत्वेऽपि व्यवसायस्य रूप-ज्ञानाविषयत्वादिति भावः । निरुक्तं बाधकतर्कमुपसंहरति—तदेवमिति । आत्मन्यध्यस्तत्वेन प्रपञ्चसिद्धिः प्रपञ्चसत्यत्ववादिभिर्नाभ्युपगता । अतः प्रपञ्चस्य सत्यत्वे दृश्यत्वानुपपत्तिर्बाधिका सुस्थिरेति भावः ।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ध्यस्ततया चासिद्धौ, प्रपञ्चस्य सत्यत्वे दृश्यत्वानुपपत्तिर्बाधिकेति स्थितम्। न च भेदस्य मिथ्यात्वे शब्दान्तरादेः कर्मभेदप्रतिपादकस्याप्रामाण्यप्रसङ्गः, घटपटादेरिव व्यावहारिकस्यैव भेदमात्रस्य कर्मगोचरस्य तत्र तत्र शब्दान्तरादिभिः प्रतिपाद्यमानत्वात्तद्गतबाधायोग्यतालक्षणस्य सत्यत्वस्य प्रतिपादने तेषामौदासीन्यात्। तदेवं निरस्तसमस्तप्रत्यनीकमनुमानं प्रपञ्चमिथ्यात्वे मानमिति सिद्धम्।

नन्वस्यानुमानस्य मिथ्यात्वं किमनुमानान्तरेण सिद्धयति? किं वा स्वेनैव? आद्येऽनवस्था—तस्य तस्यानुमानस्य मिथ्यात्वसाधनेऽनुमानान्तरापेक्षणात्। जिज्ञासायां सत्यां तत्तदनुमानप्रवृत्तेर्नानवस्था मूलक्षयकरीति चेत्, न, यद्यदुक्तसाधनं तत्तदुक्तसाध्यमिति व्याप्तिग्रहणसमये तस्य तस्यानुमानस्य मिथ्यात्वानधिगमे सर्वोपसंहारवती व्याप्तिर्न सिद्धयेत्। अधिगमे च तदधिगमाय तत्तदनुमानान्तरं तदैवापेक्षणीयमिति कथय कथं न मूलक्षतिः? द्वितीये तु स्वात्मनि वृत्तिविरोधः, स्वगतमिथ्यात्वस्य स्वेनैव ग्रहणादिति चेत्, मैवम्, शब्दशब्दवत्प्रपञ्चसत्यत्वानुमानवदध्ययनविधिवच्चाविरोधात्।

ननु नाध्ययनविधिप्रयुक्तमध्ययनम्; तस्याध्यापनविधिप्रयुक्तत्वात्। तथाहि—अध्ययनविधिर्न स्वविषयाध्ययनस्यानुष्ठापनक्षमः, निर्नियोज्यत्वात्। नह्यत्र कामी जीवनादिनिमित्तवान्यः कश्चिन्नियोज्यः प्रतीयते। नापि विश्वजिदादिवत्कल्पयितुं शक्यः, अध्यापनविधिप्रयुक्तित एव तद्विषयस्याध्ययनस्य सिद्धौ नियोगासिद्धेः कल्पकाभावात्। नचाध्यापनविधेरपि निर्नियोज्यतयाननुष्ठापकत्वम्, आचार्यकरणकामस्य नियोज्यस्य

न च प्रपञ्चस्य मिथ्यात्वे कर्मभेदप्रतिपादकस्य शब्दान्तरादेरागमस्याप्रामाण्यप्रसङ्ग इति वाच्यम्; घटपटादिवद् व्यावहारिकभेदमात्रस्य सत्यत्वाभ्युपगमात्पारमार्थिकसत्यत्वप्रतिपादने तेषां शब्दान्तराद्यागमानामौदासीन्यात्। प्रतिपादितमनुमानमुपसंहरति—तदेवं निरस्तेति।

ननु प्रपञ्चस्य मिथ्यात्वसाधकानुमाने मिथ्यात्वं तदेवानुमानं स्वयं साधयति किमप्यन्यद्वानुमानम्? अन्त्येऽनवस्थापत्तिः। आद्ये स्वात्मनि वृत्तिविरोध इति चेन्न, शब्दशब्दः सर्वान् शब्दान् स्वमपि च यथा विषयीकरोति, यथा तव मते प्रपञ्चसत्यत्वानुमानं स्वस्मिन्नपि सत्यत्वं साधयति, यथा वा स्वाध्यायोऽध्येतव्य इत्यध्ययनविधिः स्वाध्यायशब्दः सर्ववेदराशिवत् स्वस्याप्यध्ययनं विधत्ते, तद्वदत्रानुमानेऽपि मिथ्यात्वसाधने विरोधाभावात्।

अध्ययनविधेर्विधायकत्वं प्राभाकरः शङ्कते—ननु नाध्ययनेति। अध्ययनेऽध्यापनविधिप्रयुक्तत्वं समर्थयति—तथाहीति। स्वर्गकामी, जीवनादिनिमित्तवान् पुरुषो यथान्यत्र विधौ नियोज्योऽस्ति न तथाऽध्ययनविधौ कश्चिन्नियोज्यः प्रतीयते, येनाध्ययनविधिः स्वविषयाध्ययनमनुष्ठापयितुं क्षमः स्यात्। न च "विश्वजिता यजेत" इति विश्वजिन्न्यायेन स्वर्गकामो नियोज्यः कल्पनीय इति वाच्यम्; "तमध्यापयीत" इत्यध्यापनविधिप्रयुक्त्यैवाध्ययनविधिविषयाध्ययनस्य सिद्धौ नियोगसिद्धेः कल्पयितुमसमर्थत्वात्। न चाध्यापनविधावपि नियोज्याश्रवणं तुल्यमिति वाच्यम्; "सम्माननोत्सञ्जनाचार्यकरणे"ति (पा० सू० १-३-३६) सूत्रेणाचार्यकरणार्थे नयतेरात्मनेपदविधानाद् "अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीत" इत्युपनयनाध्यापनयोरेकप्रयोगतावगमादुपनयनपूर्वकाचार्यत्वसम्पाद-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रतीतेः। तथा हि—'अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीते'ति श्रूयते। तत्र 'सम्माननोत्सञ्जनाचार्यकरणे'ति सूत्रेणाचार्यकरणे नयतेरात्मनेपदविधानात्, 'उपनयीत, तमध्यापयीते'ति चोपनयनाध्यापनयोरेकप्रयोगतावगमात्, उपनयनपूर्वकाध्यापनसाध्याचार्यत्वप्रतीतौ तत्कामिनो नियोज्यत्वावगमात् न निर्नियोज्यताध्यापनविधेः। तथा च स्वविषयस्याध्यापनस्यानुष्ठानं प्रयुञ्जानोऽध्यापनविधिस्तन्निष्पादकमध्ययनमपि प्रयुङ्क्ते, तेन विध्याक्षेपलक्षणोपादानप्रमाणेनान्यत एवाध्ययनसिद्धेर्नाध्ययनविधिप्रयुक्तमध्ययनमिति।

अत्रोच्यते—भवतु नाम सनियोज्यताऽध्यापनविधेः, तथापि नाध्यापनविधिप्रयुक्तताऽध्ययनस्य सिद्धयेत्; कामाधिकारे करणांशे रागस्यैव प्रवर्तकत्वात् अध्यापनस्यापि काम्यत्वात्, तद्विषयरागेणैव तन्निष्पादकेप्यध्ययनेऽनुष्ठानलाभात् अध्यापनविधेरनुष्ठापकत्वकल्पनानुपपत्तेः। नचाध्यापनाङ्गत्वादध्ययने विधितः प्रवृत्तिराशङ्कनीया; तत्र श्रुत्यादीनामन्यतमप्रमाणस्यादर्शनात्। नचाध्यापनविधिप्रयुक्तत्वादध्ययनस्य तदङ्गत्वं; प्रयुक्तेर्व्यभिचारात्। न हि 'भिन्ने जुहोति' 'स्कन्ने जुहोति' इत्यादौ भेदनादिना प्रयुज्यमानो होमस्तदङ्गमङ्गीक्रियते। तत्प्रयुक्तेरध्ययनस्याद्याप्यसिद्धेः, अङ्गत्वेन प्रयुक्तिः प्रयुक्तौ च तदङ्गत्वमिति परस्पराश्रयता च। किं चाध्ययनविधावधिकारिणमङ्गीकुर्वता नियोज्यः कस्मान्न स्वीक्रियते इति वाच्यम्? अनुष्ठानसिद्धये नियोज्योऽपेक्षितव्यः तच्चान्यत एव सिद्धमिति नासावङ्गी क्रियत इति चेत्, तर्हि अधिकार्यपि नापेक्षणीयः, अनुष्ठानस्यान्यत एव सिद्धेः। अधिकारी विधिपर्यवसानायापेक्ष्यत इति चेत्, नियोज्येऽपि-

---

नाय तत्कामिनो नियोज्यत्वावगमात्। न च सर्वत्र विधिः स्वविषये तदङ्गे वा पुरुषं नियोजयति, न खल्वध्ययनस्याध्यापनाङ्गत्वे श्रुत्यादीनामन्यतमं किञ्चन प्रमाणमस्ति, न चोपकारमात्रादङ्गत्वं, गोदोहनादेरप्यङ्गत्वप्रसङ्गादिति कथमध्यापनविधिः स्वविषयाध्यापनं विहायाध्ययनं प्रयुञ्जीतेति वाच्यम्; तार्तीयप्रमाणाभावेऽपि चातुर्थिकप्रमाणस्य सत्त्वेनादोषादित्याह—तथा च स्वविषयस्येत्यादिना। पूर्वपक्षमुपसंहरति—तेनेति।

समाधातुमुपक्रमते—अत्रोच्यते इति। अध्यापनविधेःसनियोज्यतायाः सत्त्वेऽपि नाध्यापनविधिप्रयुक्तताऽध्ययनेऽस्तीत्याह—भवतु नामेति। तत्र हेतुमाह—कामाधिकार इति। प्राभाकरमतेऽधिकारपदस्य नियोगोऽर्थः। फलवत् करणांशे यागादावपि काम्यनियोगेषु रागस्यैव प्रवर्तकत्वात्तत्र शास्त्रप्रवर्तकत्वं नास्ति, केवलमितिकर्तव्यतासु शास्त्रेणैव प्रवृत्तिः, अध्यापनस्यापि काम्यत्वान्नाध्यापनविधेरध्ययनानुष्ठापकत्वकल्पनोपपद्यते इत्याह—अध्यापनस्यापीति। अध्यापनाङ्गत्वमध्ययनेऽवबोधकं श्रुत्यादीनामन्यतमं प्रमाणमसदप्यध्यापनप्रयुक्तत्वरूपोपादानप्रमाणमस्तीति न शङ्कनीयम्? "भिन्ने जुहोति" "स्कन्ने जुहोती" त्यादौ नैमित्तिके होमादौ व्यभिचारादित्याह—न चाध्यापनेति। भिन्ने—अवयवशः कपाले भिन्ने साकल्येन कपाले भिन्ने च। स्कन्ने—सोमरसादीनामधःपतने। अध्यापनप्रयुक्तेरध्ययनस्याद्याप्यसिद्धेरन्योन्याश्रयत्वाच्चेत्याह—तत्प्रयुक्तेरिति। पूर्वोक्तमध्ययनविधेर्निर्नियोज्यत्वमुत्थाप्य दूषयति—किञ्चेति। अनुष्ठानसिद्धये यथाऽधिकारी अपेक्ष्यते तथानियोज्योऽप्यपेक्ष्यताम्। यदि विधिपर्यवसानायाधिकारी अपेक्ष्यते तर्हि नियोगपर्यवसानाय नियोज्यापेक्षापि तुल्या।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तुल्यं, तेनापि विना नियोगापर्यवसानात् । अन्यतोऽपि विषयानुष्ठानसिद्ध्या च नियोगसिद्धौ का नाम विधेरपर्यवसानवाचोयुक्तिः ? किं च तमध्यापयीतेति च नायमध्यापने विधिः, वृत्त्यर्थत्वेनाध्यापनस्य याजनवत्प्राप्तत्वात् । उक्तं हि—

'षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका ।
याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः' ।। इति ।।

(मनु० १०।७६)

'तस्माद्यथैतयाऽन्नाद्यकामं याजये'दित्यादिषु याजनं न विधीयते, किन्तु एतयान्नाद्यकामो यजेतेति वाक्यार्थः । तथेहाप्य'ष्टवर्षो ब्राह्मण उपगच्छेत्सोधीयाते'ति वाक्यार्थः स्वीकार्यः । नचालौकिकनियोगार्थत्वेनाध्यापने विधिः; याजनेपि तथाप्रसङ्गात् । अपि चाध्ययनं नित्यं—

'योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम् ।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ।।'

इत्यादिनाऽकरणे प्रत्यवायस्मरणात् । अध्यापनं चानित्यं; काम्यत्वात् । तथाच कथं नित्यमनित्येन प्रयुज्येत, विरोधात् । तस्मादध्ययनविधिप्रयुक्तमेवाध्ययनमिति न दृष्टान्तासिद्धिः । अस्तु वाध्यापनविधिप्रयुक्तमध्ययनं तथाप्यध्यापनविधिरखिलवेदवाक्याध्यापनं विदधानः स्ववाक्याध्यापनमपि विधत्त इति स एव दृष्टान्तो भविष्यतीत्यलमतिविस्तरेण ।

तथैकमेवाद्वितीयमित्याद्यागमोपि तत्र प्रमाणम् । नचाद्वितीयशब्दस्तत्सजातीयवस्त्वन्तरनिषेधपरः; संकोचे कारणाभावात्, एकत्वविशेषणेनैव सजातीयस्य निषिद्धत्वात्, सजातीयमात्रनिषेधपरत्वे चैकविज्ञानेन सर्वविज्ञानप्रतिज्ञानस्य वाचारम्भणशब्दस्य चैतदात्म्यमिदं सर्वमित्याद्युपसंहारस्य च बाधप्रसङ्गात् । नचैकमित्येकत्वसंख्याविधानपरं तत्रैव

यद्यध्यापनविधिना तन्नियोगविषयाध्ययनस्य सिद्धिः सम्पद्यते, तर्ह्यधिकारिणं विना विधेरपर्यवसानतोक्तिर्निष्प्रयोजनेति भावः । वस्तुतस्तु नाध्यापनस्य विधेयत्वं, वृत्त्यर्थत्वेन याजनवदध्यापनस्यापि रागतः प्राप्तत्वादित्याह—किञ्च तमिति । तत्र प्रमाणमाह—षण्णां त्विति । अध्यापने विध्यभावोपपादकं श्रुतिवाक्यं पठति—तस्माद्यथेति । अपि चाध्यापनस्य लौकिकजीविकारूपप्रयोजनसिद्धिसम्भवे नालौकिकनियोगार्थसिद्धये विधिरभ्युपगन्तव्यः, अन्यथा याजनेऽपि नियोगार्थाभ्युपगमप्रसङ्ग इत्याह—न चालौकिकेति । अध्यापनस्य विधेयत्वस्वीकारे दूषणान्तरमाह—अपि चेति । अध्ययने विधेयत्वपक्षमुपसंहरति—तस्मादिति । अध्यापनेऽध्ययनप्रयोजकत्वस्वीकारेऽपि दृष्टान्तासिद्धिं वारयति—अस्तु वेत्यादिना । अध्यापनविधिरेव दृष्टान्तो भविष्यतीति भावः ।

प्रपञ्चमिथ्यात्वेऽनुमानमिवागमप्रमाणमप्याह—तथैकमेवेति । पूर्वपक्षोक्तदोषमुद्भाव्य दूषयति—न चेति । अद्वितीयपदस्य सजातीयमात्रनिषेधपरत्वाभ्युपगमे सर्वविज्ञानप्रतिज्ञोपक्रमोपसंहारादयो बाध्येरन्नित्याह—सजातीयेति । न च मानमनोहरकाररीत्या"एकमि"तिपदमेकत्वसंख्या विधानपरं तत्रैव लोकव्युत्पत्तेर्लोकशक्तेश्च वेदेऽपि बोधकत्वमिति वाच्यम्; संख्यारहितेष्वपि रूप-संख्या-ऽभावेषु एकं रूपमेका संख्या एकोऽभाव इत्यादिष्वेकपदप्रयोगात् । न चापि अनन्तपदस्य प्रागभावप्रध्वंसाभावयोर्व्यु-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तस्य व्युत्पत्तेरिति वाच्यम्; एकं रूपमेका संख्या एकोऽभाव इत्यादावपि प्रयोगात्। आनन्त्यमप्युभयान्ताभाव एव, तत्रैव तस्य व्युत्पत्तेरित्यपि न; पूर्वापरकालानवच्छेदस्यैवेहानन्तपदेन विवक्षायां नित्यमाकाशमनन्तं चेति प्रयोगानुपपत्तिप्रसङ्गात्। न चान्योन्याभावाधिकरणत्वानधिकरणे व्युत्पत्त्यभावो दोषः अन्तशब्दस्य देशतः कालतो वस्तुतश्च परिच्छिन्ने व्युत्पन्नत्वात्तस्य नञ्समासे त्रिविधस्याप्यन्तस्य निषेधकतोपपत्तौ पृथग्व्युत्पत्त्यनपेक्षत्वात्। "नेह नानास्ति किञ्चने"ति च ब्रह्मणि नानात्वं निषिध्यते; अप्रसक्तत्वात्। नहि लोकतः श्रुतितो वा वादिप्रसिद्धतो वा ब्रह्मणि नानात्वं प्रसक्तं येन प्रतिसिद्ध्येत। नानाशब्दस्य भावप्रत्ययान्तताभावाच्च न नानात्वनिषेधः। तन्निषेधे वा संकोचे कारणाभावात् सजातीयविजातीयस्वगतनानात्वनिषेधाद्ब्रह्माद्वैतमेव पर्यवस्येदिति स एव घट्टकुटीप्रभातवृत्तान्तः प्रसज्येत।

न चेन्द्रो मायाभिरितीन्द्रियद्वारकबुद्धिवृत्त्युपाधावीश्वरस्य भेदोऽवभासत इत्येतावत्परमिदं वाक्यं नतु द्वैतनिषेधपरमिति युक्तम्; ईश्वरस्य नित्यानुमेयस्यैन्द्रियकबुद्धिवृत्तिविषयत्वानङ्गीकारात्। मायाशक्तिविशेषाभिधाने च 'युक्ता ह्यस्य हरयः शता देशे'ति वाक्यशेषो न संगच्छेत। इन्द्रियबाहुल्याभिधानस्य मायाशक्तिविशेषाभिधानं प्रत्यनुपयुक्तत्वात्। 'अयं वै हरयोऽयं वै दश च सहस्राणि बहुनि चानन्तानि चे'ति वाक्यशेषे सर्वस्येश्वरात्मकत्वप्रतिपादनविरोधाच्च। मृत्योः स मृत्युमिति च नाभेदप्रतिपत्तिविधिः; नेह नानास्ति किञ्चनेति द्वैतनिषेधवैयर्थ्यात्, अनुपासनप्रकरणत्वाच्च। पूर्वापरालोच-

---

त्पत्तेस्तयोरेव तस्य बोधकत्वमिति वाच्यम्; तथात्वाभ्युपगमे नित्यमाकाशमनन्तं चेति प्रयोगानुपपत्तिप्रसङ्गात्। पूर्वपक्षिणोक्तं व्युत्यपत्त्याभावं दूषयति—न चान्योऽन्याभावेति। यौगिकशब्दानामवयवव्युत्पत्त्यैव व्युत्पत्तेर्न तत्र समुदायव्युत्पत्त्यपेक्षा। तथा चान्तशब्दस्य देशतः कालतो वस्तुतश्च त्यवच्छेदत्रये व्युत्पत्तेर्नञस्तन्निषेधव्युत्पन्नत्वान्न पृथक् समुदायव्युत्पत्त्यपेक्षेत्याह—अन्तशब्दस्येति। नापि लोकतः श्रुतितो वादिप्रसिद्धितो वा ब्रह्मणि नानात्वप्रसक्तिः, यस्य "नेहनानास्ति किञ्चने"ति श्रुत्या निषिद्धित्वं वक्तुं शक्यत्वात्। किञ्च नानाशब्दान्न भावप्रत्ययोऽस्ति, येन ब्रह्मणि नानात्वप्रतिषेधः स्यात्। अस्तु तावद्गोशब्देन गोत्वमिव नानात्वाभिधानं नानाशब्देन, तथापि संकोचे हेत्वभावात्सर्वप्रतियोगिकनानात्वनिषेधेनाद्वैते पर्यवसानादित्याह—तन्निषेधे वेति।

अपि चेन्द्रो मायाभिरित्यत्र पूर्ववादिनोक्तामन्यथासिद्धिमनूद्य दूषयति—न चेन्द्र इत्यादिना। नित्यानुमेयस्येश्वरस्येन्द्रियद्वारकबुद्धिवृत्त्युपाधौ भेदोऽवभासयितुमशक्यः। तस्मान्निखिलनिषेधपरमेवेदं वाक्यमिति। अपि च मायाशब्देन मायाशक्तिविशेषाभिधाने वाक्यशेषासङ्गतिमाह—मायाशक्तीति। मायाशक्तिविशेषोक्ति प्रतीन्द्रियबाहुल्याभिधानमनुपयुक्तमित्याह—इन्द्रियेति। उत्तरस्मिन् वाक्ये सर्वस्येश्वरात्मकत्वप्रतिपादनविरोधमाह—अयं वै हरय इति। "मृत्योः स मृत्युमाप्नोति" इत्यभेददर्शनस्य स्तुतिपरमिदं वाक्यं न सर्वद्वैतनिषेधपरमिदं वाक्यमिति चेन्न द्वैतनिषेधस्य वैयर्थ्यात्, अनुशासनप्रकरणत्वाच्च। तदेव स्फोरयति—पूर्वापरेति। निष्प्रपञ्चब्रह्मप्रकरणे स्तावकत्वादुपासना-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नायां चास्य प्रकरणस्य निष्प्रपञ्चब्रह्मात्मत्वप्रतिपत्तौ तात्पर्याधिगमात् । ननु पूर्वापरवाक्यानामुपासनपरतापि दृश्यते 'आयुर्होपासतेऽमृतं, विज्ञाय प्रज्ञां कुर्वीत, सर्वस्य वशी सर्वस्येशानः, अन्नादो वसुदानो विन्दते वसु य एवं वेदे'त्यादिश्रवणादिति चेत्, मैवं, प्रसङ्गागतत्वादुपासनानुवादस्य । तमेव धीरो विज्ञायेति च "यस्मिन्पञ्च पञ्चजना" इति पूर्वोदिताकाशादितत्त्वाधारतया सप्रपञ्चताप्रसक्ताववधारणस्य तन्निवारणपरत्वात् । प्रज्ञां कुर्वीतेति च प्रज्ञाशब्देन विज्ञानशब्दाभिधेयपरोक्षज्ञानातिरिक्तसाक्षात्काराभिधानाङ्गीकारे तस्यानवधिसुखरूपात्मसाक्षात्कारतया फलत्वेन विधेयत्वानुपपत्तेः सर्वस्य वशीत्यादेः स्तुतिपरतया गुणविधानार्थत्वाभावात् ।

आगमस्य च स्वरूपप्रतीतौ पदपदार्थसम्बन्धावगमे च प्रत्यक्षादिसापेक्षत्वेऽपि तस्य तद्विषयस्य च पारमार्थिकत्वांशस्यानुपजीव्यत्वात्तद्बाधनेऽपि विरोधाभावात्, सांव्यवहारिकभेदाभावस्य ज्ञानोदयनान्तरीयकतया श्रुतिबाध्यत्वाभावात् न व्यावहारिकभेदसापेक्षतया श्रुतेरप्रामाण्यप्रसङ्गः । नच न हिंस्यादित्यादिवाक्येषु परस्परपराहतिः; सामान्यविशेषभावेनेच्छविकल्पेन वा व्यवस्थितविकल्पेन वाऽविरोधोपपत्तेः । नच कर्मज्ञानकाण्डयोर्भेदाभेदविषयतया कर्मानुष्ठनतत्त्यगप्रतिपदद्वद्वकतया च विरोधः विद्याविद्यावस्थाभेदेन विद्वदविद्वत्पुरुषविषयतया चाविरोधात् । तदेवं मिथ्यात्वे लक्षणप्रमाणयोरुपपन्नत्वादनिर्वचनीयानाद्यविद्याविलसित एवायमात्मनि द्वैतप्रपञ्च इत्यलमतिप्रपञ्चेन ।

ननु भोः ! केयमनिर्वचनीयाविद्या नाम ? नहि जानाभावव्यतिरेकेण काचिदविद्या प्रसिद्धा उपपन्ना वा । ज्ञानप्रागभावप्रध्वंसयोरेव न जानामीत्यविद्यात्वेन लोके व्याव-

---

नुवादस्य, विधिस्वीकारे वाक्यभेदप्रसङ्गः । इममेवार्थं "तमेव धीरः", "तमेव मन्ये" इति द्वाभ्यामेवकाराभ्यां स्पष्टयतीत्याह—तमेव धीर इति । अतो निष्प्रपञ्चब्रह्मपरत्वे तच्छ्रुतेस्तात्पर्यमिति भावः । न च तथापि ब्रह्मसाक्षात्कारविधिपरत्वाभ्युपगमे को दोष इति वाच्यम्; ब्रह्मसाक्षात्कारस्य फलत्वेन विधेयत्वानुपपत्तेः । न च "सर्वस्य वशी"त्यादिना गुणविधानं शङ्कनीयमिति वाच्यम्; स्तुतिपरतया गुणविधानार्थत्वाभावात्

आगमस्योपजीव्यविरोधं परिहरति—आगमस्येति । आगमो यदंशमपेक्षते प्रत्यक्षस्य न तदंशं बाधते, यदंशं बाधते न तदंशमपेक्षते । अतो नोपजीव्यविरोधोऽस्तीत्याह—पारमार्थिकत्वेति । न च सांव्यवहारिकस्य बाधाभावेऽद्वैतानुपपत्तिरिति वाच्यम्; प्रपञ्चे पारमार्थिकत्वस्येव सांव्यवहारिकभेदांशस्याबाध्यमानत्वात् । आगमेन प्रत्यक्षवृत्तिसांव्यवहारिकत्वभागस्याबाध्यमानत्वान्न श्रुतेरप्रामाण्यप्रसक्तिरिति भावः । सामान्यविशेषभावमादाय श्रुतिवाक्येषु मिथो व्याघातं वारयति—न च नेत्यादिना । कर्मकाण्डज्ञानकाण्डयोर्विरोधं निराचष्टे—न च कर्मेति । तस्माल्लक्षणप्रमाणाभ्यां प्रपञ्चे मिथ्यात्वमुपपाद्य वादार्थमुपसंहरति—तदेवमिति ।

अविद्यायामनिर्वचनीयत्वमाक्षिपति—ननु भोरिति । ज्ञानाभावव्यतिरेकेणाविद्यानुपपत्तिं दर्शयति—नहि ज्ञानाभावेति । अभावार्थे तत्प्रसिद्धिं साधयति—ज्ञानप्रागभावेति । प्रसिद्ध्यभावं प्रदर्श्य

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

हारिकव्यवहारोपलम्भात्। अविद्येति च विद्यापदेन समस्यमानस्य च नञस्तदभावस्तद्विरोधी तदन्यो वार्थोऽभ्युपेयः। आद्ये विद्याभावस्यापि वेद्याभाववन्नानिर्वचनीयता। द्वितीये तु संशयविपर्यासादेर्विद्याविरोधिनो गुणान्तरस्य वा नानिर्वचनीयतोपपत्तिः; प्रसिद्धभावस्वभावत्वस्य व्याकोपात्। न तृतीयोपि; विद्याऽतिरिक्तस्य समस्तस्याविद्यात्वप्रसङ्गात्। नचास्या लक्षणं प्रमाणं वा पश्यामः। न तावज्ज्ञाननिवर्त्यमज्ञानं; पूर्वज्ञानस्यापि तन्निवर्त्यस्याज्ञानत्वप्राप्तेः। अनादित्वविशेषणाददोष इति चेत्, न; ज्ञानप्रागभावे व्यभिचारात्। अनादिभावत्वे सति ज्ञाननिवर्त्यमज्ञानमिति चेत्, न; अनादेर्भावस्यात्मवन्नित्यत्वेन निवर्त्यत्वानुपपत्तेः। अथ चिरन्तनमतानुसारेणानादेरेव भावस्य परमाणुगतश्यामत्वादेरिव निवर्त्यत्वमुच्येत; तर्हि तस्मिन्नेवेश्वरज्ञाननिवर्त्येऽतिव्याप्तिः, त्वदुक्तलक्षणस्यापि तस्याज्ञानत्वाभावात्। अथानाद्यनिर्वचनीयमज्ञानं, तदपि न; निर्वचनागोचरताया भावाभावविलक्षणतायाश्चासम्भवित्वात्। भ्रमोपादानमज्ञानमित्यपि न; आत्मन्यतिव्याप्तेः। सत्योपादानत्वे भ्रमस्य सत्यत्वप्रसङ्गात् नात्मोपादानमिति चेत्, न; भ्रमस्यापि स्वरूपसत्यत्वात् विषयापहाराद्धि तत्र मिथ्येति व्यवहारो न स्वरूपापहारात्। तथात्वे चैतावन्तं कालमिदं रजतमित्यभादित्यनुभवविरोधः। अस्तु वा यत्किञ्चिदविचारितरमणीयं लक्षणं तथापि तत्र किं प्रमाणम्? अज्ञोऽहमित्यनुभव इति चेत्, न; तस्य ज्ञानाभावविषयत्वेनाप्युपपत्तेः, अनादित्वभावत्वयोस्त्वदभिमतयोरस्यानुभवस्यौदासीन्याच्च। नापि सुप्तोत्थितस्य 'न किञ्चिदवेदिषं', 'गाढं मूढोऽहमासमि'तिपरामर्शानुपपत्तिसिद्धः सुषुप्तिकालीनोऽनुभवः प्रमाणं; त्वन्मते ज्ञानाभावस्यापि साक्षि-

---

युक्त्यभावं दर्शयति—अविद्येति। अविद्येत्यत्र नञर्थत्रयं सम्भाव्य दूषयति—नञ इत्यादिना। तत्राभावार्थे वेद्याभाववन्न विद्याभावस्याप्यनिर्वचनीयता, विरोध्यर्थे संशयस्य विपर्यासादेर्गुणान्तरस्य वा नानिर्वचनीयतोपपत्तिः, प्रसिद्धभावस्वभावत्वस्य व्याकोपापातात्। अन्यार्थत्वे च विद्याभिन्नस्य समस्तस्य जगतोऽविद्यात्वप्रसङ्गात्। व्युत्पत्तिं प्रदूष्य लक्षणप्रमाणे दूषयति—नचास्या इति। तत्र (१) ज्ञाननिवर्त्यत्वमज्ञानलक्षणं,(२) अनादित्वे सति ज्ञाननिवर्त्यत्वं वा,(३) अनादित्वे सति भावत्वे सति ज्ञाननिवर्त्यत्वं वा, (४) अनादित्वेऽनिर्वचनीयत्वं वा, (५) भ्रमोपादानत्वं वा। नाद्यं, उत्तरज्ञाननिवर्त्यस्य पूर्वज्ञानस्याज्ञानप्राप्त्यातिव्याप्तेः। नापि द्वितीयं, ज्ञानप्रागभावेऽतिव्याप्तेः। नापि तृतीयं, असम्भवापत्तेः। किञ्च प्राचीनमतानुसारेणापि परमाणुगतश्यामत्वादावीश्वरज्ञाननिवर्त्ये त्वदुक्तलक्षणस्यातिव्याप्तिरस्त्येव। नापि चतुर्थं, विकल्प्यमानेऽप्यसम्भवापत्तिदुर्वारत्वापत्तेः। नापि पञ्चमम्, आत्मन्यतिव्याप्तेः। आत्मनोऽपि भ्रमाधिष्ठानतया विवर्त्तोपादानत्वाङ्गीकारादित्यर्थः। अस्माभिरपि विभ्रमसमवायिकारणत्वमात्मनि स्वीक्रियते एव। आत्मनि लक्षणातिव्याप्तिं वारयति—सत्योपादानत्व इति। अनिष्टापत्तिं परिहरति—न भ्रमस्यापीति। स्वरूपापहारे प्रत्यभिज्ञाविरोधं दर्शयति—तथात्वे चेति। सुप्तोत्थितस्य सौषुप्ताज्ञानपरामर्शेन यथा तथाऽज्ञानलक्षणस्य सत्त्वेऽपि तत्र प्रमाणाभावमाक्षिपति—नापीति। सौषुप्तज्ञानाभावगमकतया त्वन्मते सुप्तोत्थितस्य तादृक् परामर्शस्यान्यथासिद्धिः, अस्मन्मते पूर्वकालीनज्ञानाभावविषयकमनुमानमभ्युपेयते इति सर्वथापि विवक्षितार्थासिद्धश्चेति। ननु ज्ञानाभावस्य

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सिद्धस्य परामर्शोपपत्तेः। अस्मन्मते चेदानीमेव ज्ञानाभावस्यानुमीयमानतया परामर्श-सम्प्रतिपत्तेः। ननु कथं ज्ञानाभावस्य निर्विकल्पकचैतन्यगोचरतया सिद्धिः ? तत्सिद्धेर्धर्मिप्रतियोगिज्ञानपराधीनत्वात्, सुषुप्तौ च तदसम्भवादिति चेत्, न; ज्ञानाभावस्यापि स्वरूपेण भेदादिवन्निर्विकल्पकसिद्धस्य सविकल्पकदशायां धर्मिप्रतियोगिज्ञानपराधीनतया स्फुटतर-व्यवहारविषयत्वोपपत्तेः। नचासिद्धे तत्कालीने धर्मिण्यात्मनि, ज्ञानाभावस्येदानीमेवानु-मीयमानत्वासिद्धिः, प्रतिपन्ने हि प्रातश्चत्वरादौ धर्मिणि सायंसमये तत्र गजाभावानुमान-मुपलभ्यत इति वाच्यम्, सम्प्रतिपन्नोदयास्तमयवद्विवादपदयोरप्युदयास्तमययोरन्तराल-कालमनुमाय कालाख्येन लिङ्गेनानुमिते धर्मिण्यात्मनि ज्ञानाभावानुमानोपपत्तेः। भव-त्वेवं धर्मिसिद्धिस्तथापि न ज्ञानाभावानुमाने लिङ्गमस्ति, अस्मर्यमाणत्वस्य नियमेनास्मर्य-माणत्वस्य वा पथि गच्छतस्तृणस्पर्शादौ निर्विकल्पकानुभूते चानैकान्तिकत्वादिति चेत्, न, ज्ञानसामग्रीवैकल्यलक्षणलिङ्गाज्ज्ञानाभावानुमानोपपत्तेः। तदेव कुतः सिद्धमिति न वाच्यम्, तत्सिद्धेरुभयवादिसिद्धत्वात्। अन्यथा वेदान्तिनामपि सुषुप्तिकाले घटपटा-दिविशेषज्ञानाभावानुमानं न स्यात्। ज्ञानाभावस्य निर्विकल्पकसाक्षिवेद्यतानङ्गीकरात्। नचावस्थाभेदसम्भिन्नभावरूपाज्ञानपरामर्शसामर्थ्यसिद्धतदनुभवादेव तद्विरोधिनो ज्ञान-स्याभावानुमानम्, भावरूपाज्ञानस्य तत्परामर्शस्य च परं प्रत्यद्याप्यसिद्धत्वात्।

सिद्धिर्धर्मिप्रतियोगिज्ञानाधीना तथा च सुषुप्तौ ज्ञानाभावस्य निर्विकल्पकचैतन्यगोचरत्वेन कथं सिद्धि-रिति चेन्न, भेदादिवज्ज्ञानाभावस्यापि स्वरूपेण निर्विकल्पकसाक्षिचैतन्यविषयत्वेन सिद्धिसम्भवात्। सविकल्पकदशायां भेदादिवदेव सुस्पष्टव्यवहारविषयत्वोपपत्तेः। आश्रयासिद्धिमाशङ्क्य परिहरति—नचासिद्धे इति। आश्रयासिद्धिनिराकरणे हेतुमाह—सम्प्रतिपन्नेति। इदमत्राकूतम्:—सुषुप्तिपूर्वोत्तर-कालिकौ उदयास्तमयौ, अन्तरालकालविशिष्टौ, उदयास्तमयत्वात्, सम्प्रतिपन्नोदयास्तमयान्तरालकाल-वदित्यनुमानेनान्तरालकालसिद्धिः। तस्मिन्नन्तरालकाले पुनरात्मसिद्धिमनुमीयते। तथाहि—स कालः, आत्मविशिष्टः, कालत्वादुत्तरकालवत्। तस्मिन्नात्मनि धर्मिणि ज्ञानाभावानुमानं निर्बाधमिति। एवं धर्मिसिद्धिमभ्युपगम्य हेतौ स्वरूपासिद्धिमाक्षिपति—भवत्वेवमिति। ननु सुषुप्तिकालीन आत्मा, ज्ञानाभाववान्, अस्मर्यमाणतदानीं ज्ञानवत्त्वात्, सम्प्रतिपन्नवत् इत्यनुमानेनास्मर्यमाणत्वं नियमेनास्मर्य-माणत्वं वा ज्ञानाभावस्यानुमापकं लिङ्गमस्तीति चेन्न; पथि गच्छतः पुरुषस्योपेक्षादृष्टिदृष्टस्य तृणस्पर्शादौ, निर्विकल्पकानुभूते चानैकान्तिकत्वात्। उभयस्थले ज्ञानाभावसाध्यस्यासत्त्वेऽपि तत्र हेतु-सत्त्वादिति तात्पर्यम्। स्वरूपासिद्धौ पूर्ववादी प्रतिक्षिपति—न, ज्ञानसामग्रीति। सुषुप्तिकालीन आत्मा, ज्ञानाभाववान्, ज्ञानसामग्रीवैकल्यात्, सम्प्रतिपन्नवदिति तत्र ज्ञानाभावानुमानोपपत्तेः। न चात्रापि हेतौ स्वरूपासिद्धिः शङ्कनीयेति वाच्यम्; विशेषविज्ञानाभावस्य वेदान्तिभिरभ्युपगतत्वेनोभयवादि-सिद्धत्वात्। न च सुषुप्तिकालीनविशेषज्ञानाभावोऽस्माभिर्नानुमीयते इति वाच्यम्; ज्ञानाभावस्य निर्वि-कल्पकसाक्षिवेद्यतानङ्गीकारात्। न च सुषुप्तिकालीन आत्मा, भावरूपाज्ञानवान्, सुषुप्तोत्थितस्य न किञ्चिदेतावन्तं कालमवेदिषमहमिति स्मरणादित्यनुमानेन भावरूपाज्ञानसिद्धे सति सुषुप्तिकालीन आत्मा, घटपटादिविशेषज्ञानाभाववान्, निरुक्तभावरूपाज्ञानवत्त्वादिति हेतुना ज्ञानाभावोऽनुमीयते,

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यत्तु कैश्चिदनुमानं रचितम्—न तावदज्ञानं, ज्ञानाभावः, अभावमानागम्यत्वात्, सम्प्रतिपन्नवत्। अभावो ह्यभावस्य प्रत्यक्षस्य वा विषयः परेणेष्यते; अज्ञानं च, न मानगम्यं, माननिवर्त्यत्वात्सम्प्रतिपन्नवदिति। तदन्ये नानुमन्यन्ते; अज्ञानस्य मानगम्यत्वे तत्साधनायानुमानप्रयोगायोगात्। एतन्मानगम्यत्वे वा मानगम्यं न भवतीति स्ववचनव्याघातात्। नचात्मनोऽनुमानेनावेद्यत्वसाधन इव न स्ववचनव्याघातादिदोषापत्तिः; तत्र वृत्तिव्याप्यत्वेपि फलाव्याप्यत्वेनाविरोधात्, इह च वृत्तिव्याप्यत्वानङ्गीकरात्। नच प्रमाणनिवर्त्यस्य प्रमाणागम्यत्वनियमः; प्रत्यभिज्ञानप्रमाणनिवर्त्यस्य तद्धेतोस्संस्कारस्य नित्यपरोक्षतया साक्षिसिद्धत्वाभावेनानुमानगम्यत्वाङ्गीकारात्। नच त्वदुक्तमर्थं न जानामीत्यादिव्यवहारोऽत्यन्तसुषुप्ते ज्ञायमाने वाऽसम्भाव्यमानोऽतिरिक्तमेव ज्ञानाभावादज्ञानं गमयति। अवगतेंऽशेऽवगतत्वादेव न जानामीतिव्यवहारायोगादनवगतेंऽशे चानवगतत्वादेव प्रश्नानुपपत्तेरिति युक्तम्; प्रतिवादिवाक्यादवगतार्थस्यानुवादपुरःसरं प्रमाणासम्भवेन सर्वैर्वादिभिर्निराकरणाङ्गीकारात् नापि 'नासदासीन्नो सदासी'दित्युपक्रम्य 'तम आसीत्', 'मायां तु प्रकृतिं विद्यात्', 'इन्द्रो मायाभि'रित्याद्यागमस्तत्र प्रमाणम्; तमःशब्देन सांसारिकपुरुषाणां प्रलयकालीनज्ञानाभावस्यैवोच्यमानत्वात्, मायाशब्देन च परमेश्वरज्ञानशक्तेरेव तत्स्वरूपभूतायाः संकीर्तनात्। तदेवमनिर्वचनीयाज्ञाने लक्षणप्रमाणयोरसम्भवात्तादृगज्ञानमस्तीत्येतदेवाज्ञानमिति सिद्धम्।

अत्रोच्यते। न तावल्लक्षणासम्भवस्तथाहि—

ननु सामग्रीविरहादिति वैषम्यमिति वाच्यम्; भावात्मकाज्ञानस्य तत्स्मरणस्य चाद्यापि परं प्रत्यसिद्धत्वादिति बोध्यम्।

न्यासकारकृतमनुमानं दूषयितुमुद्भावयति—यत्तुकैश्चिदिति। भाट्टमतेऽनुपलब्धिमानगम्यत्वमभावस्य। तार्किकमते प्रत्यक्षप्रमाणगम्यत्वमभावस्येत्यभिप्रायः। सम्प्रतिपन्नवत्=शुक्तिरुप्यसंसर्गवदित्यर्थः। मानागम्यवस्तुसिद्धयेऽनुमानप्रयोगो व्याहतोऽनुमानप्रयोगे च मानागम्यत्वं व्याहतमित्याशयेन दूषयति—तदन्ये इत्यादिना। नन्वात्मनोऽनुमानेनाऽवेद्यत्वसाधनेऽपि न तत्र वेद्यत्वप्रसक्तिस्तथा प्रमाणेनाप्रामाणिकत्वसाधनेऽपि न प्रामाणिकत्वप्रसक्तिदोषेण स्ववचनव्याहतिरिति चेन्न; वैषम्यादित्याह—नचात्मन इति। न च प्रमाणनिवर्त्यं यत्तन्न प्रमाणगम्यमिति नियमः; प्रत्यभिज्ञाप्रमाणनिवर्त्यस्य तद्धेतोस्संस्कारस्य नित्यपरोक्षत्वेन साक्षिसिद्धत्वाभावेनानुमानगम्यत्वाभ्युपगमात्। विवरणकारोक्तामर्थापत्तिमुद्भाव्य दूषयति—नच त्वदुक्तमित्यादिना। इदमत्राकूतम्:—अत्यन्ताज्ञातेऽत्यन्तज्ञाते वा वस्तुन्युक्तप्रश्नानुपपत्त्या ज्ञानाभावाद्भावरूपमज्ञानमवगम्यते। न च सामान्यांशमनूद्य विशेषांशेऽज्ञाते प्रश्नो युज्यते इति वाच्यम्; अवगतेंऽशेऽवगतत्वादेव न जानामीति वाग्व्यवहारानुपपत्तेरनवगतेंऽशेऽनवगतत्वादेव प्रश्नानुपपत्तेः। तस्मात् त्वदुक्तमर्थं न जानामीति व्यवहारान्यथाऽनुपपत्त्या ज्ञानादतिरिक्तं भावरूपमज्ञानमवश्यमभ्युपेयमिति। अन्यथोपपत्तिं साधयति—त्वदुक्तमर्थमिति। आगमप्रमाणं प्रतिषेधति—नापीति। अनिर्वचनीयाज्ञाने लक्षणप्रमाणयोरसम्भवं प्रसङ्गमुपसंहरति—तदेवमिति। एतदेवाज्ञानं मौर्ख्यमित्यर्थः।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अनादिभावरूपं यद्विज्ञानेन विलीयते ।
तदज्ञानमिति प्राज्ञा लक्षणं संप्रचक्षते ॥९॥

अनादित्वे सति भावरूपं विज्ञाननिरस्यमज्ञानमिति लक्षणमिह विवक्षितम् । न तावदिहाव्याप्तिः; सर्वेषामप्यज्ञानानामुक्तरूपत्रयानुगमात् । नाप्यतिव्याप्तिः, अनादेर्भावस्यात्मनो निवर्त्यत्वाभावेन ज्ञाननिवर्त्यत्वस्याप्यभावात्, तदन्यस्य च परमाणोस्तद्गतश्यामत्वादेश्च स्वरूपतोऽनङ्गीकृतस्य दूरत एवानादित्वानङ्गीकारात् । नचासम्भवित्वं;भावाभावविलक्षणस्याज्ञानस्याभावविलक्षणत्वमात्रेण भावत्वोपचारादात्मवदनादिभावत्वेनानिवर्त्यत्वानुमानानुपपत्तेः ।

नचैवंविधे मानासम्भवः, यतः—

देवदत्तप्रमा तत्स्थप्रमाभावातिरेकिणः ।
अनादेर्ध्वंसिनी मात्वादविगीतप्रमा यथा ॥१०॥

विगीतं देवदत्तनिष्ठप्रमाणज्ञानं, देवदत्तनिष्ठप्रमाऽभावातिरिक्तानादेर्निवर्तकं, प्रमाणत्वाद्यज्ञदत्तादिगतप्रमाणज्ञानवदित्यनुमानम् । ये तु प्रमा प्रमाप्रागभावनिवृत्तिरेव न तु निवर्तिकेति मन्यन्ते, तान्प्रति—देवदत्तप्रमा तन्निष्ठप्रमाभावातिरिक्तानादिनिवृत्तिरिति प्रयोक्तव्यम् । नचैतदसमवेतत्वमेतदन्यसमवेतत्वं वा तत्रोपाधिः; साध्याव्याप्तेः—एतत्समवेतसुखदुःखेच्छाद्वेषप्रयत्नानामेतन्निष्ठप्रमाभावातिरिक्तानादेः स्वप्रागभावस्य निवर्तकत्वेन साध्ये विद्यमानेऽपि त्वदुक्तोपाधेरभावात् । नच विवादपदमनादेर्भावस्य निवर्तकं न भवति, पदार्थत्वात्सम्प्रतिपन्न-

---

सिद्धान्ती श्लोकेन लक्षणं संकलयति—अनादिभावरूपमिति । श्लोकोक्तं लक्षणं स्फोरयति—अनादित्वे सतीत्यादिना । न च प्राचीनमतानुसारेण पार्थिवपरमाणूनां विशेषगुणेष्वतिव्याप्तिरिति वाच्यम्; तेषां स्वरूपतोऽनङ्गीकृतस्य दूरतोऽनादित्वानङ्गीकारात् । यच्चोक्तमनादिभावरूपं यत्तज्ज्ञानानिवर्त्यमात्मनि विरोधादिदं लक्षणमसम्भवमिति तद्दूषयति—न चासम्भवित्वमिति ।

प्रमाणाभावं प्रतिक्षिपति—न चैवंविध इति । श्लोकेनानुमानं संकलयति—देवदत्तेत्यादिना । श्लोकसंकलितमनुमानं स्फोरयति—विगीतमित्यादिना । अनादेर्निवर्तकमित्युक्तौ प्रागभावमादायार्थान्तरता स्यात्, तद्वारणाय प्रमाभावातिरिक्तेति । तावल्लक्षणत्वेऽप्रसिद्धविशेषणता (साध्याप्रसिद्धिः) स्यात्तद्वारणाय देवदत्तनिष्ठेति । दृष्टान्ते निरुक्तसाध्यलक्षणस्य यज्ञदत्तनिष्ठप्रमाप्रागभावमादाय प्रसिद्धिः सुस्थिरा । पक्षे देवदत्तनिष्ठप्रमाज्ञाने निरुक्तसाध्यलक्षणमज्ञानमन्तरेण संघटयितुमशक्यमिति भावरूपमनादित्वविशिष्टमज्ञानं सिध्यति । पूर्वज्ञानसुखादिव्यवच्छेदायानादिविशेषणम् । प्रमाप्रागभावनिवृत्तिरूपा नतु तन्निर्वातिकेति पूर्वोक्तदृष्टान्ते साध्यवैकल्यं स्यादिति, तत्परिहर्तुं लक्षणं संशोध्य संघटयति—ये तु प्रमेत्यादिना । व्याप्यत्वासिद्धिं वारयति—न चैतदिति । अत्रोपाधिपदेन देवदत्तासमवेतत्वं देवदत्तान्यसमवेतत्वं वा विवक्षितम्, तस्य साध्याव्यापकत्वान्नोपाधित्वमिति भावः । सत्प्रतिपक्षमुद्भाव्य वारयति—न च विवादपदमिति । सम्प्रतिपन्नवद्=घटवदित्यर्थः ।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वदिति प्रत्यनुमानविरोधः; सत्ताद्रव्यत्वाद्यनिवर्तकत्वेन सिद्धसाधनत्वात्। ननु सम्प्रतिपन्नात्मादिपदार्थातिरिक्तस्य भावस्याभावातिरिक्तस्य चानादेर्नं निवर्तकमिति विशेषणादिदमदूषणमिति चेत्, न; तस्य तवाप्रसिद्धतयाऽप्रसिद्धविशेषणत्वापत्तेः। किञ्च 'न किञ्चिदवेदिषमि'ति परामर्शसिद्धसौषुप्तिकानुभवोऽप्यत्र प्रमाणम्। नच ज्ञानाभावविषयोऽयमनुभवः;अभावप्रतीतेर्धर्मिप्रतियोगिबोधपराधीनतया तदभावे तस्यानुभवितुमयोग्यत्वात्। नच भेदसादृश्यादिवत्स्वरूपेणाभावस्यापि निर्विकल्पकबुद्धिबोध्यता; तथात्वे सादृश्यादिवदेव भावत्वापत्तेः, निर्विकल्पकबुद्धिबोध्यो भाव इति परैर्लक्षणाङ्गीकारात्। नायं सुषुप्तिकालीनानुभवजपरामर्शः, किन्तूत्थितस्येदानीमेव सौषुप्तिकज्ञानाभावानुमानमिति च न वाच्यम्, तदनुमापकलिङ्गासिद्धेः। न च सामग्र्यभावो लिङ्गम्; तस्याप्यसिद्धेः। नच ज्ञानाभावेन तस्यानुमानम्; अन्योन्याश्रयतापत्तेः, सामग्र्यभावाज्ज्ञानाभावानुमानं तदभावाच्च सामग्र्यभावानुमानमिति। नचैवं सति वेदान्तिनामपि ज्ञानाभावानुमानासम्भवः; अवस्थाभेदसम्भिन्नभावरूपाज्ञानसंवेदनादेव सुषुप्त्यवस्थायां तद्विरुद्धस्य ज्ञानस्य तत्सामग्र्याश्चाभावानुमानात्, त्वयापि गत्यन्तराभावादेवमेव ज्ञानाभावानुमानस्यावश्याभ्युपेयत्वात्। नचैवंविधमज्ञानमद्याप्यसिद्धमिति वाच्यम्, तत्प्रमाणस्य दर्शितत्वात्।

त्वदुक्तमर्थं न जानामीति व्यवहारान्यथानुपपत्तिरपि भावरूपाज्ञानसद्भावे मानम्। नच प्रमाणतो न जानामीत्येवम्परतयापि व्यवहारोपपत्तिः; त्वदुक्तेऽर्थे प्रमाणज्ञानं मम नास्तीत्यस्य विशिष्टविषयज्ञानस्य प्रमात्वात्, तद्विशेषणतयार्थस्यापि प्रमाणेनाधिगतत्वात्, स्ववचनव्याघातापत्तेः। एतदतिरिक्तप्रमाणज्ञानं त्वदुक्तेऽर्थे मम नास्तीति वदतो वचन-

---

अनादिभावस्य यस्य कस्यचिदनिवर्तकत्वस्य साध्यत्वे सिद्धसाधनतामाह—सत्तेति। उभयसम्मतानादिभावभिन्नस्य भावविलक्षणस्य साध्यत्वमाशङ्क्य दूषयति—नन्विति। प्रतिपक्षिमते तादृशपदार्थस्याप्रसिद्धतयाऽप्रसिद्धविशेषणतापत्तेः। अभावविलक्षणाज्ञाने प्रत्यक्षप्रमाणमप्याह—किञ्चेति। तदभावे=धर्मिप्रतियोगिबोधाभावे। तस्य=ज्ञानाभावस्य। प्रतिपक्षिभिर्निर्विकल्पकबुद्धिबोध्यो भाव एव मन्यते नत्वभावस्तथेत्यर्थः। पूर्वपक्षिणोक्तं "न किञ्चिदवेदिषम्" इति नेदं स्मरणं किन्तूत्थितस्येदानीमेवानुमानमिति, तद्दूषयति—तदनुमापकेति। सामग्र्यभावो लिङ्गमप्यसिद्धम्। ज्ञानाभावेन सामग्र्यभावस्यानुमेयत्वेऽन्योऽन्याश्रयतापत्तेः। न च भवतामपि घटपटादिविशेषज्ञानाभावानुमानं दुःशकमिति वाच्यम्; भावरूपाज्ञानबलाद्विशेषघटादिज्ञानाभावस्य सामग्र्यभावस्य चानुमातुं सुलभत्वात्। त्वयापीयमेव गतिरनुसरणीया, नान्येति। एवंविधाज्ञानसिद्धौ प्रमाणस्य दर्शितत्वेन तत्र प्रमाणाभावो न शङ्कनीयः।

निरुक्तज्ञानसिद्धौ पूर्वोक्तामर्थापत्तिं प्रमाणयति—त्वदुक्तमर्थमित्यादिना। पूर्ववाद्यभिप्रायमनूद्य दूषयति—न चेत्यादिना। त्वदुक्तमर्थं प्रमाणतो न जानामीति ज्ञानस्य यथार्थानुभवत्वात्तद्विषयभूतस्यार्थस्यापि प्रमाणतो ज्ञाततया तन्निषेधवचनविरोधमाह—त्वदुक्तेऽर्थे इति। एतदज्ञानत्वग्राहिप्रमाणभिन्नं प्रमाणज्ञानं त्वदुक्तेऽर्थे मम नास्तीत्युक्तावपि स्ववचनव्याघातस्य तादवस्थ्यादित्याह—एतदतिरिक्तेति। सामान्यविशेषभावाभ्यामर्थस्याधिगमानधिगमयोरभ्युपगमेऽपि व्याघातस्तदवस्थः।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

व्याघातदोषानुषङ्ग एवास्यापि ज्ञानस्य पूर्ववदेव प्रमाणजन्यत्वात्। नच सामान्यतः प्रमाणेनार्थस्याधिगमेपि विशेषानधिगमाददोषः; विशेषस्याप्यधिगमानधिगमयोः पूर्वोक्तदोषानतिवृत्तेः। ननु भावरूपमप्यज्ञानं ज्ञाननिरस्यमभ्युपगम्यते भवद्भिस्तत्कथं ज्ञायमानेर्थे न जानामीति व्यवहारः, मैवम्; अस्मन्मतेऽज्ञानस्य साक्षिसिद्धतया प्रमाणाबोध्यत्वात्, प्रमाणज्ञानोदयात्प्राक्कालेऽज्ञानं तद्विशेषितोऽर्थः साक्षिसिद्धोऽज्ञात इत्यनुवादगोचरो भवति, भवति च प्रश्नार्हं इत्यविरोधात्। उक्तं च सम्प्रदायविद्भिः—"सर्वं वस्तु ज्ञाततया अज्ञाततया वा साक्षिचैतन्यस्य विषय एवे"ति।

किञ्च 'तम आसीत्', 'मायां तु प्रकृतिं विद्या'दित्याद्यागमोऽपि तत्र प्रमाणम्। नच तमःशब्देन ज्ञानाभावः कथ्यते; नासदासीदित्यभावं व्यावर्त्य तम आसीदिति प्रतिपादनात्। नच परमेश्वरज्ञानशक्तिर्माया, 'भूयश्चान्ते विश्वमायानिवृत्तिः', 'मायामेतां तरन्ति ते', 'तरत्यविद्यां विततां योगी माया'मित्यादिना ज्ञाननिवर्त्ये मायाशब्दप्रयोगदर्शनात्। तदेवं लक्षणप्रमाणयोरुपपन्नत्वादनादिभावरूपाज्ञानमस्तीति सिद्धम्।

किञ्च भ्रमोपादानमज्ञानमिति लक्षणेऽपि न दोषः। नचात्मन्यतिव्याप्तिः, तस्य केवलस्य कूटस्थस्य कस्याप्यनुपादानत्वात्। सत्योपादानत्वे च विभ्रमस्यापि सत्यत्वप्रसङ्गात्। नच विभ्रमोऽपि स्वरूपतः सत्यः, तथात्वे प्रमाणज्ञानवदेव विषयापहारलक्षणबाधस्याप्यसम्भवप्रसङ्गात्। नचैतावन्तं कालमिदं रजतमित्यभादित्यनुभवविरोधः, अनिर्वचनीयस्यापि विभ्रमस्याभावविलक्षणतया तथात्वेनानुसन्धानोपपत्तेः। नच स्वरूपसत एवासीदिति प्रतिसन्धानम्, एतावन्तं कालमिहादर्शे मुखमासीत्स्फटिकश्च लोहित

ननु भावरूपाज्ञानपक्षेऽपि कथमुक्तव्यवहारोपपत्तिरुभयपक्षे निवर्त्यत्वस्य तुल्यत्वादिति चेन्न, तत्राज्ञाननिवर्तकं प्रमाणज्ञानं नाज्ञानबोधकं किन्तु साक्षिचैतन्येन भावरूपाज्ञानस्य प्रकाशमानत्वाभ्युपगमेऽदोषादित्याह—मैवमिति। साक्षिचैतन्येनावगतेऽर्थे प्रश्नस्वीकारेऽविरोधात्। तत्र सम्प्रदायविदां सम्मतिमाह—सर्वं वस्त्विति।

भावरूपाज्ञानसद्भावे आगमप्रमाणमप्याह—किञ्च तम आसीदित्यादिना। नासदासीदित्यनेनाभावस्यापि प्रतिषेधान्न तमःशब्देन ज्ञानाभावो वक्तुं शक्य इत्याह—न च तम इति। मायाशब्दस्योक्तान्यथासिद्धिं निराकुरुते—न च परमेश्वरेति। नित्यस्य परमेश्वरज्ञानस्य ज्ञाननिवर्त्यत्वानभ्युपगमादित्यर्थः। लक्षणप्रमाणाभ्यामज्ञानस्यानादिभावरूपत्वं प्रसाध्य प्रसङ्गमुपसंहरति—तदेवमिति।

पञ्चमं लक्षणमपि समर्थयति—किञ्च भ्रमेति। भ्रमोपादानत्वं=परिणाम्युपादानत्वमित्यर्थः। तस्यात्मन्यभावान्न तत्रातिव्याप्तिरित्याह—न चात्मनीति। सत्योपादानत्वे विभ्रमस्यापि सत्यत्वप्रसङ्गः। न चेष्टापत्तिः; तथासति प्रमाज्ञानमिव विषयापहाररूपबाधस्याप्यसम्भवापत्तेः। प्रत्यभिज्ञाविरोधं निराचष्टे—न चैतावन्तमिति। आसीदिति प्रतिसन्धानं तु मुखमादर्शे, स्फटिकश्च लोहित आसीदितिवद् सद्विलक्षणस्यासतोऽपि सम्भवतीत्याह—न च स्वरूप सत इति। अज्ञाने भ्रमोपादानत्वं

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आसीदित्याद्यनुसन्धानदर्शनात् । प्रयोगश्च, विगीतो विभ्रमः, एतज्ज्ञानकारणाबाध्यातिरिक्तोपादानः, विभ्रमत्वात् देवदत्तादिविभ्रमवत् । दर्शित एव च सत्योपादानत्वे सत्यत्वप्रसङ्गो विपक्षे बाधकस्तर्कः । तस्माद्यदुपादानो विभ्रमस्तदज्ञानमिति सिद्धम् ।

ननु तथाप्यसम्भवि लक्षणं, सर्वप्रत्ययानां यथार्थत्वेन विभ्रमाणामेवाभावात् विगीताः प्रत्यया यथार्थाः, प्रत्ययत्वात्सम्प्रतिपन्नवदित्यनुमानात्, अन्यथान्याकारस्य प्रत्ययस्यान्यालम्बनतायामनुभवविरोधात्, संविदां स्वविषयव्यभिचारे चानाश्वासप्रसङ्गात् । असतोऽपि संसर्गादेरवभासमानतायामसत्ख्यातेरपि दत्तावसरतया सौगतमतानुप्रवेशप्रसङ्गात्, असतश्च संसर्गादेः स्फुरणकारणानिरूपणात्, चक्षुरादेश्च सम्प्रयुक्तमात्रग्राहित्वात् देशान्तरनिवेशिनः स्वरूपासतश्च सम्प्रयोगायोग्यत्वात्, दोषाणां च स्वारसिककार्यप्रसवशक्तिप्रतिरोधमात्रहेतुत्वात् मूषिकाघ्रातशालिबीजादौ तथादृष्टत्वात्, दावदहनदग्धवेत्रबीजात्कदलीकाण्डजन्मनो दग्धस्यावेत्रबीजत्वेन दोषाणां विपरीतकार्यकारणतां प्रत्यनुदाहरणत्वात् । सर्वत्र च प्रतीयमानयोः संसर्गिणोः संसर्गव्यवहारस्यासंसर्गाग्रहनिबन्धनत्वात्, संसर्गज्ञानस्यापि हेतुत्वकल्पनायां गौरवात् । असंसर्गाग्रहप्रसञ्जितसंसर्गव्यवहारमात्रबाधनादेव बाधकस्य बाधकतोपपत्तेः । इदमितिप्रत्ययस्य च दोषदूषितचक्षुर्जन्यतयानाकलित-

---

प्रमाणयति—प्रयोगश्चेति । एतज्ज्ञानकारणीभूतोऽबाध्य एव आत्मा, तदतिरिक्तो देवदत्तात्मा तत्रोपादानकर्त्वं देवदत्तविभ्रमस्येति साध्यप्रसिद्धिः । पक्षेऽगत्याऽज्ञानमेव भ्रमोपादानं सेत्स्यति । विभ्रमस्य सत्योपादानत्वे सत्यत्वप्रसङ्गो विपक्षे बाधकस्तर्को दर्शित एवेत्याह—दर्शित एवेति । पञ्चमलक्षणसमर्थनमुपसंहरति—तस्मादिति ।

विभ्रममनन्यमानोऽख्यातिवादी प्राभाकरः प्रत्यवतिष्ठते—ननु तथापीति । विभ्रमत्वेन यथार्थज्ञानविशेषस्य विवक्षितत्वे आत्मनोऽन्तःकरणस्य चाप्यविद्यात्वप्रसङ्गः, अयथार्थज्ञानस्य विभ्रमत्वेन विवक्षायां स्वीयानभिमतिं दर्शयति—सर्वप्रत्ययानामिति । विभ्रमाणामेवाभावात्=ज्ञानानामयथार्थत्वाभावादित्यर्थः। सर्वप्रत्ययानां यथार्थत्वे प्रयोगमाह—विगीत इति । पक्षैकदेशे सिद्धसाधनतावारणाय—विगीतपदम् । अयथार्थव्यवहारभूतज्ञानानामेव पक्षत्वे नाश्रयासिद्धिः । विपक्षे बाधकं दर्शयति—अन्यथेति । रजताकारज्ञानस्य शुक्तिकालम्बनत्वेऽनुभवविरोध इति । बाधकान्तरमाह—संविदामिति । सौगतसिद्धान्तापत्तिमपि बाधिकामाह—असतोऽपीति । कारणानिरूपणेऽकारणककार्यप्रसङ्गमपि बाधकमाह—असतश्चेति । अन्वयव्यतिरेकाभ्यां चक्षुषः कारणत्वेऽनुपपत्तिमाह—चक्षुरादेश्चेति । आरोप्येणापि सम्प्रयोगाभावमाह—देशान्तरेति । दोषदूषितनेत्रादेरपि मिथ्याज्ञानजननासामर्थ्यमाह—दोषाणां चेति । दोषाणां विपरीतकार्यकारणतायां व्यभिचारमाह—मूषिकेति । सर्वत्रसंसर्गव्यवहारं प्रत्यसंसर्गाग्रहकारणं दर्शयति—सर्वत्र चेति । विपक्षे गौरवमाह—संसर्गज्ञानस्यापीति । बाधकज्ञानस्य बाधकतां संसर्गव्यवहारमात्रबाधनादेवोपपादयति—असंसर्गाग्रहेति । अथेदं रजतमिति ज्ञानं नैकं तयोः संसर्गावगाहि, किन्त्विदमिति पुरोवर्तिशुक्तिसामान्यविषयकं प्रत्यक्षं, रजतमिति पूर्वदृष्टरजताहितसंस्कारजन्यं स्मरणात्मकं तयोरनुभवस्मरणयोर्विशेषाग्रहणे तत्तांशाग्रहणे च दोषस्य कारणत्वं स्वविषयाविवेचकत्वं चेत्याह—इदमित्यादिना, स्वविषयेत्यन्तेन । स्वरूपतो विषयतश्च भिन्नाभ्यामाभ्यां संसृष्टप्रवृत्ते-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विशेषस्य सामान्यमात्रग्रहणरूपत्वात्, रजतमिति चासन्निहितविशेषविषयस्य सम्प्रयोगलिङ्गाद्यजन्यतया संस्कारमात्रकारणत्वेन स्मरणत्वात्, तस्य च दोषहेतुकत्वेन तत्तांशागोचरतया स्वविषयाविवेचकत्वात्। तयोश्चान्योऽन्यसंसर्गसाकाङ्क्षसामान्यविशेषालम्बनयोः स्वरूपतो विषयतश्चागृहीतासंसर्गयोर्निरन्तरोत्पन्नयोः स्वरूपेण यथार्थयोरप्ययथार्थव्यवहारप्रवर्तकयोर्विभ्रमत्वप्रसिद्धेरप्युपपत्तेः। तदेवं प्रत्ययानां यथार्थत्वेन स्वरूपतो विभ्रमत्वाभावात् विभ्रमोपादानमज्ञानमिति लक्षणमलक्षणमेवेति।

अत्रोच्यते, नैतत्सारं यतः—

स्वीकारे विभ्रमाणां स्यात्स्वीयसिद्धान्तबाधना।
अनभ्युपगमे तेषामाश्रयासिद्धिरुद्धता ॥११॥

विगीतविभ्रमाभ्युपगमे सिद्धान्तविरोधात्, अनभ्युपगमे हेतोराश्रयासिद्धेरनुमानानुदयात्। अयथार्थव्यवहारहेतोर्ज्ञानस्य पक्षीकरणाददोष इति चेत्, न; यथार्थस्यापीश्वरज्ञानस्य सर्वव्यवहारहेतोरयथार्थव्यवहारं प्रत्यपि हेतुतया तत्र तार्किकाणां सिद्धसाधनत्वात्। इदं रजतमित्यत्रापीदमंशविषयस्य वृत्तिज्ञानस्यायथार्थव्यवहारहेतोरप्यधिष्ठानविषयस्य वेदान्तिभिर्यथार्थत्वाङ्गीकारात्। ज्ञानत्वं यथार्थमात्रवृत्ति, ज्ञानमात्रवृत्तित्वात्प्रमात्ववदिति विवक्षितमिति चेत्, मैवम्; मात्रशब्देनायथार्थव्यवहारे ज्ञानत्वस्य वृत्त्यभावेन सिद्धसाधनत्वात्। अयथार्थवृत्तित्वात्यन्ताभावाधिकरणत्वं विवक्षितमिति चेत्, न; दुष्टसामग्र्यप्रसूतमात्रवृत्तित्वस्य तत्रोपाधेः।

यथार्थशब्देन च सदर्थविवक्षायां नायं सर्प इत्यादिबाधविरोधात्, तुच्छव्यावृत्तार्थ-

---

हेतुमाह—तयोश्चेति। सामान्यविशेषेति—इदमितिसामान्यमात्रं पुरोवर्त्तिविषयकं, रजताकारः पूर्वदृष्टरजतविशेषकः। तत्र रजतार्थिनः पुरोवर्त्तिनि प्रवृत्तिकारणमाह—निरन्तरोत्पन्नयोरिति। ननु यथार्थज्ञानानामयथार्थव्यवहारजनकत्वे किमिति न सर्वेषां तथात्वमित्याह—स्वरूपेणेति। प्राभाकरोक्तं पूर्वपक्षमुपसंहरति—तदेवमित्यादिना।

पूर्वपक्षं निराकर्तुं सिद्धान्ती प्रतिजानीते—अत्रोच्यते इति। श्लोकेन पूर्वपक्षं निराचष्टे—स्वीकार इति। श्लोकार्थं विशदयति—विगीतेति। गङ्गापुरीयं मतमुद्भाव्य दूषयति—अयथार्थेत्यादिना। तत्र तार्किकमतेन सिद्धसाधनतामाह—यथार्थस्यापीति। सिद्धान्तिमतेंऽशतः सिद्धसाधने प्राभाकरस्यापि सम्मतिमाह—इदं रजतमित्यत्रेति। धर्मिप्रयुक्तदूषणं परिहर्तुं प्रकारान्तरमनुसरति—ज्ञानत्वमिति। ज्ञानमात्रेति विकल्प्य दूषयितुमुपक्रमते—मैवमित्यादिना। प्रथमे सिद्धसाधनत्वं, द्वितीये दुष्टसामग्र्यप्रसूतत्वमुपाधिरिति हेतौ मात्रग्रहणं व्यर्थमिति भावः।

किञ्च प्राभाकरप्रयुक्तयोरुभयोरप्यनुमानयोः साध्यान्तर्गतयथाशब्दार्थं विकल्प्य क्रमेण दूषयति—यथार्थशब्देनेत्यादिना। आद्ये बाधविरोधः, अन्त्ये मां प्रति सिद्धसाधनत्वम्। सर्ववादिसाधारणं

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विवक्षायां चास्मान्प्रति सिद्धसाधनत्वात्। किञ्चायथार्थप्रत्ययोऽस्तीत्यस्य प्रत्ययस्य यथार्थत्वे तस्य सालम्बनत्वाय कश्चिदप्ययथार्थप्रत्ययोऽभ्युपेयः; तथा सति तत्रैव हेतोरनैकान्तिकता। अयथार्थत्वे तस्य प्रत्ययस्य कण्ठोक्त एव व्यभिचारः। अयथार्थप्रत्ययोऽस्तीत्येतादृशः प्रत्ययो नास्ति किन्तु व्यवहारमात्रं पदार्थानामसंसर्गाग्रहनिबन्धनमिति चेत्, मैवम्; सर्वत्र संसर्ग-व्यवहारस्य व्यवह्रियमाणपदार्थसंसर्गज्ञानपूर्वकत्वनियमात्। अन्यथा मध्यमवृद्धव्यवहा-रेऽप्यसंसर्गाग्रहादेव तदुपपत्तेर्व्युत्पित्सोः संसर्गज्ञानानुमानाभावाच्छब्दप्रामाण्यभङ्गप्रसङ्गः। एवमनुमानाभास इव सदनुमानेऽप्यसंसर्गाग्रहादेव संसर्गव्यवहारोपपत्तेरनुमानोच्छेदः, प्रत्यभिज्ञाप्रामाण्योच्छेदश्च; ज्वालैकत्वव्यवहारवत्सर्वत्र प्रत्यभिज्ञायामसंसर्गाग्रहादेव संसर्ग-व्यवहारोपपत्तेः।८

यत्र दोषशङ्का नास्ति तत्र संसर्गज्ञानानुमानादुपपद्यत एव शब्दप्रामाण्यं, अन्यथान्य-थाख्यातिवादिनोऽपि विपर्ययाशङ्कया व्युत्पत्तिविरहाच्छब्दप्रामाण्यभङ्गप्रसङ्गो दुर्वार इति चेत्, मैवम्; तव संसर्गज्ञानानुमानलिङ्गानिरूपणात्। तथाहि—किं दोषाभावः संसर्गज्ञाना-नुमापकः? किं वा व्यवहारमात्रं? उताविसंवादिव्यवहारः? नाद्यः; दोषाभावस्य संसर्ग-ज्ञानस्य च व्यभिचारित्वात्, सत्यपि दोषाभावे सामग्रीवैकल्ये संसर्गज्ञानानुदयात्। नच दोषाभावविशिष्टसामग्रीसद्भावेन संसर्गज्ञानानुमानम्; सामग्र्याः कार्यैकसमधिगम्यत्वात् सति संसर्गज्ञाने सामग्र्यनुमानं तदनुमाने च संसर्गज्ञानमिति परस्पराश्रयप्रसङ्गात्। नापि द्वितीयः; इदं रजतमित्याद्ययथार्थव्यवहारे व्यभिचारात्। नापि तृतीयः; विनापि संसर्गग्रहं

दोषमुपपादयति—किं चेत्यादिना। अयथार्थप्रत्ययोऽस्तीत्यस्य बोधस्य यथार्थत्वेऽयथार्थत्वे चानैकान्तिक-तेति भावः। संसृष्टव्यवहारानुपपत्तिपक्षं शङ्कते—अयथार्थेति। संसर्गज्ञानं विना संसृष्टव्यवहारानुप-पत्तिनियमादिति परिहरति—मैवमिति। नियमानभ्युपगमे बाधकमाह—अन्यथेति। न केवलं शब्द-प्रामाण्यभङ्गो दोषो; अपित्वनुमानस्यापीत्याह—एवमिति। प्रत्यक्षेऽपि प्रामाण्यभङ्गप्रसङ्गमाह—ज्वालैकत्वेत्यादिना।

दोषसम्भावनासदसत्त्वाभ्यां नियममन्यथाख्यातिवादिप्रतिबन्द्या प्राभाकरः शङ्कते—यत्र दोषे-त्यादिना। इदमत्राकूतमन्यथाख्यातिवादिनस्तार्किका मन्यन्ते, यत्किलोत्तमवृद्धप्रयुक्तशब्दात्संसृष्टज्ञान-मनुमाय तत्र बालस्य व्युत्पत्तिरभिमता। तेषां मतेऽपि यत्र विपर्ययशङ्का, न तत्र संसर्गज्ञानमनुमातुं शक्यं, किन्तु विपर्ययाशङ्काभावस्थले संसर्गज्ञानमनुमातुं शक्यं चेत्तर्हि प्राभाकरमतेऽपि तुल्यम्। तस्मान्न शब्दप्रामाण्यभङ्गप्रसङ्गो दोषः। अन्यथाऽन्यथाख्यातिवादिनोऽपि शब्दप्रामाण्यभङ्गप्रसङ्गो दुर्वारः। प्राभाकरोक्तं दोषं परिहरति—मैवमिति। प्राभाकरमते संसर्गज्ञानानुमापकलिङ्गं विकल्प्य दूषयति—तथाहीत्यादिना। आद्ये यत्र दोषाभावस्तत्र संसर्गज्ञानमिति दोषाभावसंसर्गज्ञानयोर्न व्याप्तिरिति कल्पं स्फोरयति—सत्यपि दोषाभावे इति। सत्यपि दोषाभावे इन्द्रियार्थसन्निकर्षादिसामग्रीवैकल्येन संसर्गज्ञानानुदयदर्शनात्। दोषाभावहेतौ सामग्रीसद्भावविशेषणमप्यनुपयुक्तमित्याह—न च दोषा-भावेति। सामग्रीसद्भावसंसर्गज्ञानयोः परस्परानुमानेऽन्योऽन्याश्रयप्रसङ्ग इति भावः। द्वितीये 'इदं

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

संसृष्टयोरसंसर्गाग्रहादेव तदुपपत्तेः, त्वन्मते घटत्वतद्वचक्त्योः समवायस्याप्रत्यक्षतया संसर्गाग्रहेऽपि संवादिव्यवहारदर्शनेनानैकान्त्याच्च । व्यवहाराविसंवादस्य च देशान्तरकालान्तराधीनाधिगमतया व्यवहाराधिगमसमयेऽनधिगतत्वेनातल्लिङ्गत्वात् बालस्य मध्यमवृद्धसमवायिसंसर्गज्ञानानुमानानुदये व्युत्पत्तिविरहप्रसङ्गात् । नच प्रतीतिविरोधः; रजताकारायाः प्रतीतेः शुक्तिकालम्बनतानभ्युपगमात् नहि रजतं शुक्तिरिति परैरपि प्रतीतिरुपेयते । इदमाकारस्य तु रजतज्ञानालम्बनतामनभ्युपगच्छतस्तवैव प्रतीतिविरोधः । इदं रजतमिति सामानाधिकरण्येन पुरोवर्तिन्यङ्गुलिनिर्देशपुरःसरमादानादिव्यवहारदर्शनात् ।

नच संविदां विषयव्यभिचारादनाश्वासप्रसङ्गः; विसंवादिव्यवहारजनकत्वपक्ष इवास्मन्मतेऽप्याश्वासोपपत्तेः । नचासतः संसर्गादेरवभासाभ्युपगमादसत्ख्यातिप्रसङ्गः; भासमानस्य संसर्गादेः सद्विलक्षणतावदसद्विलक्षणताया अप्यङ्गीकारात् । नचायथार्थज्ञानजन्मनिकरणाभावः । दोषदूषितचक्षुरादेस्तत्करणत्वोपपत्तेः । ज्ञानानामजानतो यथार्थव्यवहारजनकत्वेऽपि दोषवशादयथार्थव्यवहारहेतुत्ववदेव दुष्टानां करणानां विपरीतज्ञानहेतुताया अपि सम्भवात् । यथा च दवदाहस्य वेत्रबीजविनाशकत्वं रूपान्तरजनकत्वं च तथा दोषाणामपि यथार्थज्ञानप्रतिबन्धकत्वमयथार्थज्ञानजनकत्वं च किं न स्यात् ? सर्वत्र चासंसर्गाग्रहादेव संसर्गव्यवहारमभ्युपगच्छतः शब्दलिङ्गादिप्रामाण्यभङ्गस्य दर्शितत्वादेव कल्पनागौरवस्यादूषणत्वात् । असंसर्गाग्रहमात्रस्य व्यवहाराप्रसञ्जकत्वादेव तत्प्रसञ्जितायथार्थ-

---

रजतमि'त्यत्र संसर्गज्ञानं साध्यं तव मतेन नास्ति, किन्तु तत्राप्ययथार्थव्यवहाररूपहेतुरस्तीति व्यभिचारः । तृतीये संसर्गज्ञानं विना संसृष्टयोरर्थयोरसंसर्गाग्रहादेवाविसंवादिव्यवहारोत्पत्तौ न काचिदप्यनुपपत्तिर्येनाविसंवादिव्यवहारो संसर्गज्ञानमनुमापयेत् । अपि च शङ्कितानैकान्त्यप्रदर्शनेन किं प्रयोजनं, त्वन्मते स्पष्टमनैकान्त्यमित्याह—त्वन्मत इति । घटत्वतद्वचक्तिसंसृष्टव्यवहारः सम्वादीति तत्र तयोः संसर्गस्य समवायस्याप्रत्यक्षतया संसर्गज्ञानं नास्तीति व्यभिचारः सुस्पष्टः स्वरूपासिद्धिमाह—व्यवहारेति । अनुभवविरोधबाधकं परिहरति—नचेति । तवमतेऽनुभवविरोधबाधकस्य परिहारः दुःशक इत्याह—इदमाकारस्य तु रजतेति । प्रतीतिमभिनयति—इदं रजतमिति ।

प्राभाकरोक्तमनाश्वासप्रसङ्गं निराचष्टे—न च संविदामिति विसंवादिव्यवहारजनकत्वपक्षवदस्मन्मतेऽपि न दण्डवारितोऽनाश्वास इत्याह—विसंवादीति । असत्ख्यातिवादप्रसङ्गं तृतीयं बाधकं परिहरति—न चासत इति । अनिर्वचनीयवादिमते दोषाभावमुपपादयति—भासमानस्येति । अध्यासकारणाभावादध्यासो न युक्त इति दोषं परिहरति—न चायथार्थेति । समीचीनज्ञानोत्पत्तिकारणेभ्यो नेत्रादिभ्योऽसमीचीनज्ञानोत्पत्त्यसम्भवं वारयति—ज्ञानानामिति । अज्ञानतः=स्वभावतः । दोषाणामयथार्थव्यवहारजनकत्ववदध्यासजनकत्वस्यापि सम्भवात् । दोषाणां विपरीतकार्यजनकत्वं सोदाहरणमाह—यथा च दवदाहस्येति । कल्पनागौरवं वारयति—सर्वत्र चेति । प्रमाणबलात्प्राप्तगौरवं न दोषावहमिति भावः । अतः संसर्गज्ञाने संसृष्टव्यवहारान्यथानुपपत्ति प्रमाणत्वेनोक्त्वा बाधान्यथानुपपत्तिरूपं प्रमाणमप्याह—असंसर्गाग्रहमात्रस्येति । बाधकत्वानुपपत्तिरपि संसर्गज्ञानसाधिकेत्यवधेयम । न च नेदं रजतमिति बाधकज्ञानेन तत्र व्यवहारव्यवच्छेदरूपबाधो भवत्येवेति वाच्यम्; विरक्तानां तत्र

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

व्यवहारबाधकत्वेन बाधकस्य बाधकत्वोपपादनासम्भवात्। नच व्यवहारव्यवच्छेदो बाधः; अतदर्थिनां तत्र व्यवहारानुदये नेद रजतमित्यादिज्ञानस्याबाधकत्वप्रसङ्गात्। तदर्थिनां च व्यवहारविच्छेदकस्य बाधकत्वे चौरादिज्ञानस्यापि तद्विच्छेदकस्य बाधकतापत्तेः।

नच तद्योग्यताविच्छेदो बाधः; तद्विच्छेदे, समयान्तरे पुनस्तत्र व्यवहाराभावप्रसङ्गात्। योग्यताप्रतिबन्धो बाध इत्यपि न; विवेकज्ञानवेलायां हेत्वभावादेव फलासिद्धौ प्रतिबन्धकल्पनानवकाशात्। नचाग्रहणनिवृत्तिर्बाधः; सर्वग्रहणानां तथात्वेन बाधरूपत्वप्रसङ्गात्। अतो न व्यवहारनिवारणेन बाधकस्य बाधकतोपपत्तिः। रजतगोचरविज्ञानस्य च दोषदूषितलोचनजन्यतया परिशेषासिद्धौ संस्कारमात्रजन्यतया स्मृतित्वकल्पनायोगात्। नन्वसंयुक्तत्वेन रजतज्ञानं प्रत्यकारणस्य रजतस्य न तद्गोचरत्वं, सर्वत्र साक्षात्कारिज्ञाने तज्जनकस्यैव विषयत्वादिति चेत्, न; प्रत्यभिज्ञायां तत्ताया अपि गोचरत्वात्। तत्र संस्कारसचिवमिन्द्रियं तत्तां गोचरयति संस्कारोपस्थापितत्वात्तत्ताया इति चेत्; प्रकृतेऽपि तर्हि संस्कारोपनीतं रजतं दोषकलुषितेन्द्रियेण विषयीक्रियत इति न दोषः।

तथापि समारोपे किं प्रमाणमिति चेत्, उच्यते—

नयनं नयनोद्भूतसम्यग्ज्ञानातिरेकिणः।
ज्ञानस्य कारणं तत्त्वाद्यथैव नयनान्तरम्॥ १२॥

एतच्चक्षुरेतच्चक्षुर्जन्ययथार्थज्ञानातिरिक्तज्ञानजनकं, चक्षुष्ट्वादिन्द्रियत्वाद्वा, चक्षुरन्त-

---

व्यवहारानुदये निरुक्तबाधकज्ञानस्याबाधकत्व प्रसङ्गात्। रजतार्थिनामपि क्वचित्प्रदेशे चोरादिज्ञानस्य व्यवहारव्यवच्छेदकस्य बाधकत्वप्रसङ्गात्।

योग्यताविच्छेदे सति कालान्तरे पुनस्तत्र व्यवहाराभावप्रसङ्गान्न योग्यताविच्छेदो बाध इति वक्तुं शक्यः, नापि योग्यताप्रतिबन्धो बाध इति वक्तुं युक्तं, पुष्कलकारणे सत्यपि कार्यानुत्पत्तिः शक्तिप्रतिबन्धिकां कल्पयति, सा च कल्पिकाऽत्र नास्ति, विवेकग्रहेण विवेकाग्रहस्य निराकृतत्वादिति भावः। लक्षणान्तरं निराचष्टे—न चाग्रहणेति। स्वप्रागभावनिवर्तकानां सर्वेषां ज्ञानानामज्ञाननिवर्तकत्वेन बाधरूपत्वप्रसङ्गात्। तस्मान्न व्यवहारनिवृत्तिमात्रेण बाधकज्ञानस्य बाधकोपपद्यते। परिशेषन्यायात्प्राप्तां स्मृतिं दूषयति—रजतगोचरेति। साक्षात्कारित्वेऽसंयुक्तविषयत्वमनुपपन्नमिति शङ्कते—नन्विति। प्रत्यभिज्ञायामैक्यज्ञानपक्षे तत्ताया अपि चाक्षुषविषयत्वाभ्युपगमादिति भावः। यदि तत्र संस्कारोत्स्थापितां तत्तां संस्कारसहकृतमिन्द्रियं गोचरयति, तर्हि प्रकृतेऽपि संस्कारोपनीतं रजतं दोषदूषितमिन्द्रियं विषयीकरिष्यतीति न कोऽपि दोषः। मास्तु सर्वज्ञानानां याथार्थ्यं प्रामाणिकं, मामूद्विपक्षे बाधकस्तर्कस्तथापि समारोपे किं मानमिति जिज्ञासति—तथापीति। श्लोकेनानुमानं संकलयति—नयनमिति। एतन्नयनमेतन्नयनोद्भूतसम्यग्ज्ञानभिन्नज्ञानस्य कारणं, नयनत्वादितरनयनवत्। श्लोकार्थं स्फोरयति—एतच्चक्षुरिति। चक्षुर्मात्रपक्षत्वेऽर्थान्तरता स्यात्तद्वारणायैतच्चक्षुर्ग्रहणम्। साध्येऽप्येतच्चक्षुर्ग्रहणं विशेषणमर्थान्तरतावारणाय। यथार्थज्ञानातिरिक्तज्ञानजनकत्वस्य साध्यत्वे प्राभाकराणामप्रसिद्धविशेषणता विरुद्धता च स्यात्तद्वारणायैतच्चक्षुर्जन्येति। व्याहतिवारणाय यथार्थपदम्। दृष्टान्तेचक्षुरन्तरे चक्षुष्ट्वं हेतुरस्ति, तत्र निरुक्तसाध्यं यथार्थज्ञानजनकत्वमप्यस्ति,

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रवदिन्द्रियान्तरवच्च । नच चक्षुश्चक्षुर्जन्ययथार्थज्ञानजनकत्वे सत्यतिरिक्तज्ञानजनकं न भवति, इन्द्रियत्वात् घ्राणवदिति प्रकरणसमता;मनस्यनैकान्तिकत्वात्, तस्य साधारणकारणस्य चक्षुर्जन्ययथार्थज्ञानजनकत्वे सत्यतिरिक्तरसादिज्ञानजनकत्वात् । चक्षुषश्चक्षुर्जन्ययथार्थज्ञानजनकत्वे सत्यतिरिक्तरसादिज्ञानाजनकतया सिद्धसाधनत्वाच्च । नच बहिरिन्द्रियत्वादिति विशेषणान्नानैकान्तिकता; तत्रापि सिद्धसाधनतायास्तादवस्थ्यात् । नच यथोक्तयथार्थज्ञानजनकत्वे सत्यतिरिक्तज्ञानजनकत्वात्यन्ताभावाधिकरणतया साध्यस्य विवक्षितत्वाददोषः; घ्राणादिषु चक्षुर्जन्ययथार्थज्ञानाजनकत्वस्यैवोपाधेः सत्त्वात् । नच व्यतिरेकोपसंहारस्थलाभावः, मनसश्चक्षुर्जन्ययथार्थज्ञानजनकस्यातिरिक्तज्ञानजनकतया व्यतिरेकोपसंहारभूमित्वात् ।

विवादपदानि पदानि स्वस्मारितपदार्थान्वयप्रतिपादकानि आकाङ्क्षासन्निधिमत्पदकदम्बकत्वाद्गामानयेत्यादिपदकदम्बवत् । नच योग्यतावत्त्वमुपाधिः, साध्येन समव्याप्त्यभावात् । आकाङ्क्षासन्निधिरहितपदेषु योग्यतावत्त्वेऽपि साध्याभावात् । नचाकाङ्क्षादिमत्वे सति योग्यतावत्त्वमुपाधिः; व्यर्थविशेष्यापातात् । नह्याकाङ्क्षासन्निधिमत्त्वे सति योग्यताभावेनान्वयज्ञानाजनकत्वमुभयवादिसम्प्रतिपन्नस्थले दृष्टमस्ति । अयोग्यार्थविषयाणामाकाङ्क्षासन्निधिमत्पदानां सर्वेषां पक्षीकरणात् । नच योग्यतावत्त्वस्य विषमव्यापकत्वे-

---

पक्षेऽगत्याभ्रमज्ञानजनकत्वमेव ग्राह्यं, तेन न दृष्टान्ते साध्याप्रसिद्धिर्नापि पक्षेऽर्थान्तरतेति भावः । निरुक्तानुमाने सत्प्रतिपक्षतामुद्भाव्य निराकुरुते—न च चक्षुरित्यादिना । व्यभिचारं दर्शयति—तस्येति । तस्य मनसः साधारणकारणस्य न केवलं चक्षुर्जन्ययथार्थज्ञानजनकत्वमपितु तदतिरिक्तरसादिज्ञानजनकत्वमप्यस्ति । तस्मान्मनस्यैकान्तिकता । सिद्धसाधनतामाप्याह—चक्षुष इति । मनस्यनैकान्तिकतां परिहर्तुं विशेषणनियोजनेऽपि दोषमाह—न च वहिरिति । तथापि सिद्धसाधनतायास्तादवस्थ्यमिति भावः । प्रकारान्तरेण सिद्धसाधनतां परिहर्तुमाशङ्क्य निराचष्टे—न च यथोक्तेति । न चोक्तसिद्धसाधनतावारणाय चक्षुर्जन्ययथार्थज्ञानजनकत्वे सत्यतिरिक्तज्ञानाजनकत्वात्यन्ताभावाधिकरणत्वं साध्यं विवक्ष्यतामिति वाच्यम्; घ्राणादिदृष्टान्ते निरुक्तसाध्यस्य चक्षुर्जन्ययथार्थज्ञानाजनकत्वस्यैवोपाधित्वात् । नच साध्येन सहोपाधेर्व्यापकत्वेऽपि व्यतिरेकोपसंहारस्थलाभावः; अर्थात् यत्र निरुक्तोपाधिर्नास्ति तत्र निरुक्तसाध्यं नास्ति, इति व्यतिरेकोपसंहारस्थलं नास्तीति वाच्यम्; मनसो व्यतिरेकोपसंहारभूमित्वेनादोषात्

सम्प्रति शाब्दभ्रममुपपादयति—विवादपदानीति । सिद्धसाधनतावारणाय विवादपदम् । आकाङ्क्षासन्निधिमात्रवन्ति पदानीत्यर्थः । पदानामन्वयप्रतिपत्तिजनकत्वेन सिद्धसाधनता, तद्वारणाय साध्ये स्वस्मारितेति पदम् । घटः पट इति निराकाङ्क्षपदसमुदायेऽनैकान्तिकतावारणायाकाङ्क्षाग्रहणम् । तावत्युक्ते गामानय प्रासादं पश्येत्यत्र गां पश्येत्यनयोः पदयोरसन्निहितत्वेनानैकान्तिकता, तद्वारणाय-सन्निधिमदिति पदम् । तथैव 'अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यतामि'त्यत्रानैकान्तिकता, तद्वारणाया प्याकाङ्क्षाग्रहणमावश्यकमिति । साध्येन समव्याप्त्यभावान्न योग्यतावत्त्वमुपाधिः । तं विशदयति-आकाङ्क्षेति । न चाकाङ्क्षादिमत्त्वमप्युपाधौ विशेषणमिति वाच्यम्; पक्षमात्रव्यावर्तकतया पक्षेतरत्ववद्व्यर्थविशेष्यापातात् । तदेव विशदयति—नह्येति । विषमव्यापकोपाधिं दूषयति—नचेति । पूर्वोक्त-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नोपाधिता; यदयोग्यार्थं तदन्वितप्रतिपत्तिजनकं न भवति व्यतिरेकोपसंहारस्थलस्य पूर्वोक्तन्यायेन दर्शयितुमशक्यत्वात् । नच विवादपदानि पदानि स्वस्मारितान्वयप्रमितिजनकानि, आकाङ्क्षासन्निधिमत्पदत्वात्, गामानयेतिपदवदित्याभाससमानयोगक्षेमता; तत्र बाधकप्रमाणविरोधेन कालात्ययापदिष्टत्वात् । प्रतीतिमात्रसाधने तु बाधाभावात् । उक्तं चैतद्भट्टाचार्य्यैः–'अत्यन्तासत्यपि ज्ञानमर्थे शब्दः करोति ही,' ति । विपक्षे च प्रतिपक्षाप्रतिपत्तौ तन्निराकरणाय कथारम्भासंभवो बाधकः । तथाहि—शब्दोऽनित्य इति शब्दस्यानित्यत्वे वादिना प्रतिपादिते यदि न तत्प्रतिवादी प्रतिपद्येत तदा वादिना परिषदा च विज्ञातस्यापि स्वयम'विज्ञातेऽविज्ञानं नाम निग्रहस्थानमापद्येत । प्रतिपत्तौ वा विपर्ययाभ्युपगमप्रसङ्गः । नहि शब्दस्यानित्यत्वज्ञानं तन्नित्यत्ववादिनो यथार्थम् ।

किंचैकाधिकरणविरुद्धधर्मद्वयप्रतिपत्तिलक्षणा विप्रतिपत्तिरेव भवन्मते न भवेत् तत्र कुतस्तरां कथाप्रवृत्तिः ? कुतस्तमां च विप्रतिपत्तिनिरासः ? अपि च सर्वस्य वाक्यस्य संसर्गप्रतीत्यजनकत्वेऽनृतापार्थकनिरर्थकभेदो न स्यात्, समुदायार्थप्रतीतौ सत्यामपि यदर्थो बाधितो भवति तद्वाक्यमनृतमुच्यते, यथा नद्यास्तीरे पञ्चफलानि सन्तीति विप्रलम्भकवचनम्,यत्रावयवार्थप्रतीतौ सत्यामपि समुदायार्था प्रतीतिस्तदपार्थकम्,यथा'दश दाडिमानि षडपूपाः कुण्डमजाजिन' मित्यादि । अवयवार्थप्रतीरपि यत्राभावस्तन्निरर्थकं यथा नित्यः शब्दः कचटतपानां गजडदबत्वात् खछठथव'दिति । स चायमनृतापार्थकादिभेदः क्वचिदपि शब्दस्य संसर्गप्रतीत्यजनकत्वे न सम्भवतीत्यलमतिविस्तरेण । यदसत्तन्न प्रकाशते यथा

रीत्या व्यतिरेकोपसंहारस्थलस्य दर्शयितुमशक्यत्वात् । आभासतुल्ययोगक्षेमतामुद्भाव्य दूषयति—नचविवादेति । तत्रानुमाने नेदं रजतमिति बाधकप्रमाणविरोधेन बाधितत्वात् । सिद्धान्तानुसारेण प्रतीतिमात्रसाधने तु न बाधः । शशविषाणं खपुष्पमित्यत्रात्यन्तासत्यप्यर्थे आकाङ्क्षासन्निधियुक्तशब्दो ज्ञानं करोतीति भट्टवार्तिकाभिप्रायः । ग्रन्थरचनादिकथानारम्भप्रसङ्गं विपक्षे बाधमाह—विपक्षे चेति । तदेव विकल्प्य विशदयति—तथाहीति । वादिनोक्तं प्रतिवादी न बुध्येत चेत्तर्हि तस्य निराकरणमशक्यं निग्रहस्थानापत्तिश्च । "परिषत्प्रतिवादिभ्यां त्रिरभिहितमप्यविज्ञातमविज्ञातार्थमि"ति न्यायेन प्रतिवादी निगृहीतो भवेदित्यर्थः । बुध्येत चेत्तर्हि विपर्ययाभ्युपगमप्रसङ्गः । तदेव विशदयति—नहि शब्दस्येति ।

दूषणान्तरापत्तिमाह—किं चेति । नित्य आत्माऽनित्याबुद्धिरित्यनयोर्नित्य आत्मा विभुश्चेत्यनयोर्वा विप्रतिपत्तित्वाभावादेकाधिकरणविरुद्धधर्मद्वयप्रतिपत्तिरूपा विप्रतिपत्तिरेव प्राभाकरमते न भवेत् कुतस्तरां शास्त्रार्थनिर्णये कथाप्रवृत्तिः, कुतस्तमां च विप्रतिपत्तिनिराकरणम् । बाधकान्तरमाह—अपिचेति । सर्वस्यवाक्यस्य=वाक्यमात्रस्येत्यर्थः । अनृतशब्दं व्याचष्टे—समुदायार्थेति । अत्रानृतशब्देन प्रतिज्ञासंन्यासो निरनुयोज्यानुयोगोऽसिद्धिविशेषश्चाप्युपलक्ष्यन्ते । अपार्थकं व्याकुरुते—यत्रेति । निरर्थकमर्थयति—अवयवार्थेति । उभयत्राक्षपादसूत्रं "पौर्वापर्यायोगादप्रतिबद्धार्थमपार्थकम्" "वर्णक्रमनिर्देशवन्निरर्थकम्" इत्यादि । एतेषु क्वचिदप्यनृतादिभेदः शब्दस्य संसर्गप्रतीत्यजनकत्वाभ्युपगमे न सम्भवतीत्यर्थः । अनुमानेन संसर्गप्रतीतिमपलपन्सत्प्रतिपक्षमाह—यदसदिति । सत्प्रतिपक्षम-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गगनकुसुमम्, असच्च शुक्तिरजततादात्म्यमितिचेत्, मैवं; गगनकुसुमस्यापि तच्छब्दात्प्रतीयमानत्वेन दृष्टान्तस्य साध्यविकलत्वात्, तादात्म्यस्य च प्रतीतावन्यथाख्यातिस्वीकारात्, अप्रतीतावाश्रयासिद्धेः, असंसर्गाग्रहबलेन च तद्व्यवहारे तत्रासत्त्वाप्रतीतौ हेतोरपक्षधर्मत्वात् । तस्माद्रजतादिविभ्रमे पुरोवर्तिशुक्तिशकलादि रजताद्यात्मनावभासत इति सिद्धम् ।

भवत्वेवं विभ्रमसद्भावः, विभ्रमालम्बनं तु किमसत्? सदेव वा ? किं वोभयात्मकम् ? उतोभयविलक्षणम् ? इति विवेचनीयम् । न तावदसत्; असतोऽपरोक्षावभासानर्हत्वात्, तदादित्सया प्रवृत्त्यनुपपत्तेश्च क्वचिदसद्विशेषेऽपि प्रतिभासप्रवृत्ती किं न स्यातामिति चेत्, न; विशेषाधिकरणत्वे तुच्छत्वानुपपत्तेस्तस्य निःस्वभावत्वात् । सद्वैलक्षण्यमात्रेणासत्त्वाभिधाने मायावादिमतप्रवेशात् । अन्तरेणापि ज्ञेयसामर्थ्यं निःस्वभावेऽप्यसति स्वकारणाविशेषमासादितस्वभावविशेषज्ञानमेवाविद्ययाऽसत्प्रकाशनशक्तिमदिति चेत्; तर्हि वक्तव्यं किमस्याः शक्तेः शक्यमिति ? यद्यसदेव, किमेतस्याः कार्यम् ? उतैतज्ज्ञाप्यम् ? नाद्यः; असतोऽकार्यत्वात् । प्रकाशनशक्तित्वव्याघाताच्च । न द्वितीयः; प्रकाशान्तराभावात्, अनवस्थानाच्च । तदेव विज्ञानमसतः प्रकाश इति चेत्, न; विज्ञानाश्रयां शक्तिं प्रति विज्ञानस्यैव शक्तशक्यतया विषयत्वानुपपत्तेः । नह्येकस्यैकदैव सिद्धतया शक्त्याश्रयत्वमसिद्धतया च तद्विषयत्वं सम्भवति, युगपदेवसिद्धसाध्यत्वविरोधात् । शक्यमेव तर्हि शक्तेर्माभूदिति चेत्;

हरति—मैवमिति । तत्र दृष्टान्ते साध्यवैकल्यमाह—गगनकुसुमस्यापीति । प्राभाकरमते तादात्म्यस्य प्रतीतौ सिद्धान्तहानिरप्रतीतौ च पक्षासिद्धिः । स्वरूपासिद्धिमप्याह—असंसर्गाग्रहेति । अख्यातिवादनिराकरणमुपसंहरति—तस्मादिति ।

अध्यासं निरूप्याध्यस्यमानं निरूपयति—भवत्वेवमित्यादिना । आद्यविकल्पेनासत्ख्यातिनिर्देशः, द्वितीयेनान्यथाख्यात्यात्मख्यात्योर्निर्देशस्तृतीयेन भेदाभेदवादिनोरन्यथाख्यातिविशेषस्य, चतुर्थेन सिद्धान्तस्य च निर्देशः । तेषु प्रथममसत्ख्यातिवादं दूषयति—न तावदिति । शाब्दप्रतीतिवारणाय-परोक्षेति । मा भूतामत्यन्तासति शशविषाणादौ प्रवृत्तिप्रतीती, क्वचिदसद्विशेषे शुक्तिरजतादौ किं न स्यातामित्याशङ्क्य परिहरति—क्वचिदित्यादिना । सद्वैलक्षण्यमसच्छब्दार्थमित्यत आह—सद्वैलक्षण्येति । असतोऽप्यापरोक्ष्यं सम्पादयत्यसद्वादीति चित्रमेतत् । मायावादिमते प्रवेशप्रसङ्गः सौगतानामितिभावः । यद्यपि निस्वभावमसज्ज्ञेयं, तथापि तस्य=ज्ञेयस्य सामर्थ्यमन्तरेण स्वकारणविशेषात्समनन्तरप्रत्ययादासादितः=प्राप्तः स्वभावविशेषो येन विज्ञानेन तत्तथा । इदमत्राकूतम्—स्वमुत्तरक्षणवृत्ति विज्ञानं तस्य कारणविशेषः पूर्वक्षणवृत्तिविज्ञानं तस्मात्समासादितः प्राप्तः स्वभावविशेषोऽसत्प्रकाशनसामर्थ्यं येन विज्ञानेनोत्तरक्षणवर्तिना, तदेव विज्ञानमविद्यायाऽसत्प्रकाशनशक्तिमदित्यर्थः । तदेतद्दूषयति—तर्हि वक्तव्यमित्यादिना । प्रकाशनशक्तित्वेति—प्रमाणं प्रमेयव्यञ्जकं भवति, तत्र प्रमाणे प्रमेयोत्पादकत्वकथनमयुक्तमिति भावः । शक्तेर्ज्ञाप्यमसदिति कल्पोऽपि न सम्भवति, तत्र प्रकाशान्तराभावात्, सत्त्वे चानवस्थापातात् । न च जन्यज्ञानपदेन शक्त्याश्रयभूतस्य प्रथमज्ञानस्यैव विवक्षितत्वान्नानवस्थेति वाच्यम्; विज्ञानाश्रयभूतां शक्तिं प्रति विज्ञानस्यैव शक्त्याश्रयत्वेन शक्तस्य पुनः शक्यतया विषयत्वानुपपत्तेः । तदेव स्पष्टयति—नह्येकस्येति । अथ विज्ञानमेवासतः प्रकाशकमिति

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

न, शक्तेः कस्य, कुत्रेति शक्तशक्यनिरूपणाधीननिरूपणत्वात्। अस्तु तर्हि स्वकारणविशेषासादितस्वभावभेदं विज्ञानमेवासतः प्रकाश इति चेत्, न; सदसतोः सम्बन्धनिरूपणात्। असदधीननिरूपणत्वं ज्ञानस्य तत्सम्बन्ध इतिचेत्,न, तदधीननिरूपणत्वस्यापि सम्बन्धान्तराधीनत्वादसतश्च निरुपाख्यत्वात्सम्बन्धाधारतानुपपत्तेः। ज्ञानजन्यातिशयानाधारत्वाच्च घटादिवदसतो ज्ञानविषयत्वानुपपत्तेः। अयमसदनुभव इत्यसता विना नानुभवो निरूप्यत इति तेनाविनाभावः सम्बन्ध इति चेत्, मैवम्; अतदुत्पत्तेरतदात्मनश्चानुभवस्य तदविनाभावासम्भवात्। तस्मात्स्वप्रत्ययासादितस्वभावभेदं विज्ञानमेवासत्प्रकाश इत्यसत्ख्यातिवादिनामसत्प्रलाप इत्यारोप्यमाणं नासत्।

नापि सत्; नेदं रजतमित्यादिबाधविरोधात्। यत्र बाध्यते ततोऽन्यत्रास्तीति चेत्, न; तत्र प्रमाणानिरूपणात्। यथाहि—भ्रान्त्यनुभवस्तत्र प्रमाणम्? उत बाधानुभवः? किंवा भ्रमानुपपत्तिः? बाधानुपपत्तिर्वा? असत्ख्यात्यनुपपत्तिर्वा? नाद्यः; तस्य पुरोवर्तिरजतसत्तामात्रगोचरतयाऽसंनिहिततत्सत्तायामौदासीन्यात्। न द्वितीयः;बाधानुभवस्यापि पुरोवर्तिन्यारोपिताभावविषयस्य देशान्तरतत्सत्तानावेदकत्वात्। न तृतीयः; रजतावभासस्य यथाप्रतीतपुरोवर्तिरजतसत्तां विनानुपपत्तावपि देशान्तरे तदीयसत्तामन्तरेणानुपपत्त्यभावात्। न चतुर्थः; बाधस्य प्रसक्तप्रतिषेधात्मनस्तत्रैव तत्सत्ताक्षेपकतयाऽन्यत्र तत्सत्तानाक्षेपकत्वात्। नच वाच्यमन्यत्रापि तस्यासत्त्वे तत्रापि कुतो न तस्य बाधः स्यादिति;तत्र तस्या-

---

आङ्कते—अस्तु तर्हीति। स्वमुत्तरविज्ञानं तत्र स्वीयकारणात्पूर्वविज्ञानाद्विशेषात्प्राप्तः स्वभावविशेषः, तादृशं विज्ञानमेव सतः प्रकाश इत्यपि न वाच्यम्; असत इति षष्ठ्या निर्दिष्टस्य सदसतोः सम्बन्धस्य निरूपयितुमशक्यत्वात्। असद्वादिना सम्बन्धमुद्भावयति—असदधीनेति। असदधीननिरूपणत्वमेव ज्ञानस्यासतः सह सम्बन्धः इत्यपि वक्तुं न युक्तं; तस्यापि सम्बन्धान्तरापेक्षाऽस्ति, तन्नात्रसम्भवं निरुपाख्यत्वादसतः सम्बन्धान्तराधारतानुपपत्तेः घटस्यप्रकाश इत्यत्र यथा ज्ञानजन्यातिशयाधारता घटेऽस्ति, न तथासतो ज्ञानजन्यातिशयाधारता। असत्त्वाज्ज्ञानजन्यातिशयानाधारत्वादसतोऽपरोक्षज्ञानविषयत्वानुपपत्तेः। अनुभवेन सहासतो निरूप्यनिरूपकभावसम्बन्धमाह—अयमसदनुभव इति। शङ्कितं सम्बन्धं विघटयति—मैवमित्यादिना। अनुभवो नासदुत्पन्नो नाप्यसदात्मा। एवं चानुभवेन सहासतोऽविनाभावसम्बन्धोऽसम्भव इति भावः। असत्ख्यातिवादनिराकरणमुपसंहरति—तस्मादिति।

सत्ख्यातिं निराकर्तुमुपक्रमते—नापि सदिति। बाधविरोधं परिहरति—यत्रेति। बाधविरोधपरिहारं निराचष्टे—न, तत्रेति। सम्भावितप्रमाणविकल्पमुत्थाप्य दूषयति—भ्रान्त्यनुभव इत्यादिना। भ्रान्त्यनुभवं प्रत्यक्षं दूषयति—नाद्यः इति। अर्थापत्तिरूपं बाधानुभवं दूषयति—न द्वितीयः इत्यादिना। भ्रमानुपपत्तिं दूषयति—न तृतीय इति। अत्यन्तासतः संसर्गस्याप्यपरोक्षानुभूतिमभ्युपगच्छतस्तव रजतादेरपि तथा प्रतीतिसम्भवान्नान्यत्ररजतसत्तापेक्षेति सूचितम्—अपीति। बाधानुपपत्तिं प्रतिक्षिपति—न चतुर्थः इति। तत्रैव तत्सत्तेति—पुरोवर्तिन्येव। रजतसन्निधिमाक्षिपतु नान्यत्रेति भावः। न चान्यत्रापि रजतस्यासत्त्वे कुतो न रजतस्य तत्रापि बाध इति वाच्यम्; आपणे रजतस्यानुभवाप्रसक्तेस्तत्रबाधाभावस्यान्यथासिद्धं रजतसत्तामध्यवसातुमयुक्तत्वात्। पुरोवर्तिनि रजततादात्म्यबाधानुपपत्ति

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रसक्तेरेव बाधाभावोपपत्तौ तत्सत्ताध्यवसायायोगात् । नेदं रजतमिति पुरोवर्तिनि रजततादात्म्यनिषेधात्मबाधानुभवो रजतमर्थात् क्वापि परिशिनष्टीति चेत्, न; तथासति वनस्पत्योरिव विविक्तयोर्द्वयोरप्यत्रैवान्तरं प्रतीतिप्रसक्तेः । नापि पञ्चमः; असतः संसर्गस्येव रजतस्याप्यसतः ख्यात्युपपत्तेः ।

अथाधुनिकस्य कस्यचिन्मतानुसारेणेदं रजतमिति ज्ञानमिदमाकाररजताकारयोर्न संसर्गग्राहकमपितु तयोरेकज्ञानसंसर्गिणोर्भेदाग्रहादयथार्थव्यवहारो, गृह्यमाणयोर्भेदाग्राहि सविकल्पकमेकं विज्ञानं विभ्रम इति भ्रमलक्षणाभ्युपगमात् । तथा च नासतः कस्यचित्ख्यातिरिति कश्चिद्ब्रूयात्,तं प्रति ब्रूयात्––मध्यमवृद्धव्यवहारेऽप्येकज्ञानोपारोहिणोःसंसर्गिणोरसंसर्गाग्रहादेव व्यवहारोपपत्तौ बालस्य संसर्गज्ञानानुमानानुदयाच्छब्दप्रामाण्यभङ्गप्रसङ्गात् । एवमनुमानाभास इव सदनुमानेऽप्यसंसर्गाग्रहादेव संसर्गव्यवहारोपपत्तेरनुमानोच्छेदः, प्रत्यभिज्ञाप्रामाण्योच्छेदश्च; ज्वालैकत्वव्यवहारवत्सर्वत्रप्रत्यभिज्ञायामसंसर्गाग्रहादेव संसर्गव्यवहारोपपत्तेरिति गुरुमतनिरसनेनैव गुरुमतपरिपोषणनिपुणमतेर्मतं निरस्तमिति । किञ्च कणभक्षाक्षचरणमतमवलम्ब्यैवमन्यथाख्यातिमन्यथावर्णयतो द्वितीयसूत्रे मिथ्याज्ञानविवेचनवेलायाम्––'इहात्मनि मिथ्याज्ञानमनेकप्रकारं वर्तते,तद्यथाऽनित्ये नित्यमिति सभये निर्भय' मित्यादिभाष्यविरोधः । 'कः पुनर्विपर्ययः ?अतस्मिंस्तदिति प्रत्यय' इत्युद्द्योतकरवार्तिकविरोधश्च प्रसज्येतेति ।

'बध्यतां बध्यतां बालो नानेनार्थोऽस्ति जीवता ।
स्वपक्षहानिकर्तृत्वाद् यः कुलाङ्गारतां गतः ॥' इति

न्यायविषयताभयं नातिवर्तते । तस्मादसत्ख्यात्यनुपपत्तिरपि नान्यत्र सत्तावेदिकारोपितस्य ।

प्रतिक्षिपति—नेदं रजतमित्यादिना । तादात्म्यमात्रस्य बाधे धर्मिणोर्द्वयोरिदंरजतयोरत्रैव भिन्नत्वेन प्रतीतिप्रसक्तेरिति सदृष्टान्तमाह––वनस्पत्योरिवेति । असत्ख्यात्यनुपपत्तिं दूषयति—नापि पञ्चम इति । असत्संसर्गवदसतो रजतस्यापि ख्यातिरुपपद्यते ।

न्यायकल्पतरुकारोक्तमाशङ्कते—अथाधुनिकस्येति । इदं रजतमित्येकज्ञानसंसर्गिणोर्द्वयोर्भेदाग्रहाद्ययथार्थव्यवहारो विभ्रमः, स च गृह्यमाणयोर्भेदाग्राहकमेकं ज्ञानं सविकल्पकमिति भ्रमलक्षणमभ्युपगम्यते । फलितार्थमाह—तथा चेति । तदपि लक्षणं दूषयति—तं प्रति ब्रूयादिति । तत्र दोषमाह—मध्यमवृद्धेत्यादिना । मध्यमवृद्धव्यवहारेऽपि तथात्वे बालस्य संसर्गज्ञानानुदयाच्छब्दप्रामाण्यभङ्गप्रसङ्गात् । एवमनुमानमात्रोच्छेदापत्तिः प्रत्यभिज्ञाप्रामाण्योच्छेदापत्तिश्चापि स्यातामिति-दोषमाह—एवमित्यादिना-व्यवहारोपपत्तेरित्यन्तेन । प्रकृतमतदोषमुपसंहरति—इति गुरुमतेति । भाष्यवार्त्तिकविरोधेनापसिद्धान्तापत्तिमाह—किं च कणभक्षेत्यादिना । आत्माधिकरणेऽनेकप्रकारं सोदाहरणमाह—इहात्मनीति । स्वपुत्रं प्रति हिरण्यकशिपुवचनमाह—बध्यतामिति । चरमपक्षोक्तदोषमुपसंहरति—तस्मादिति ।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कुत्रचेदमारोपितमन्यत्र भवद्भवेत्? न तावद्देशान्तरादौ, तस्यासन्निहितस्य द्रष्टुमयोग्यत्वात्। दुष्टं करणं विप्रकृष्टमपि द्रष्टुं शक्नोतीतिचेन्न, दुष्टकरणस्य पुंसः सर्वदर्शित्वप्रसङ्गात्। अतो दोषोऽप्यसदनिर्वचनीयं वा दर्शयति, दृष्टानुसारात्। तदेवं न देशान्तरादावारोप्यसद्भावः।

अस्तु तर्हि बुद्धौ; स्वरूपेणासतो गगनारविन्दादिवदप्रतिभासात्, नेदं रजतमिति बाधस्येदंतामात्रगोचरत्वात्, द्वयोर्बाधकल्पनायां कल्पनागौरवात्, नेदं रजतमिति च रजते बाधादर्शनात्। नचेदंतानिषेधे सत्यनिदंतया बहिरपि व्यवस्थोपपत्तौ कुतः संविदाकारतेति सांप्रतम्, व्यवहितस्यापरोक्षसंविदैक्यमन्तरेणापरोक्षत्वानुपपत्तेः, संविदाकारो रजतं, संप्रयोगमन्तरेणापरोक्षत्वात्संवेदनवदिति प्रयोगोपपत्तेः। ननु संप्रयोगो नाम किमिन्द्रियसंयोगादिविशेषः? किं वा सम्बन्धमात्रम्? नाद्यः; रूपादिनाऽनैकान्त्यात्। द्वितीये तु विशेषणासिद्धिः। दृष्टान्ते साधनविकलता च। नह्याध्यासिकसम्बन्धं विनास्माकं रूप्यं तद्धीश्चापरोक्षा, धीरूपत्वे च रजतादेर्भ्रान्तिं विनापि दर्शनप्रसङ्ग इति चेत्, मैवम्; इन्द्रियसन्निकर्षानधीनापरोक्षत्वस्य विवक्षितत्वात्। संवेदनस्य चेन्द्रियसम्बन्धमन्तरेणैव स्वतः सिद्धतया साक्षिसिद्धत्वेन वा साधनवैकल्याभावात्। न च धीरूपत्वे रजतादेर्भ्रान्तिं विनापि दर्शनप्रसङ्गः; धियोऽन्यत्वेऽपि पटादिवद्भ्रान्तिं विनापि दर्शनप्रसङ्गस्य तुल्यत्वात्। ततो धीरूपमेव रूप्यमिति चेत्,

---

साधारण्येनारोपितस्यान्यत्रासत्त्वमुपपाद्य विशेषतो दूषयितुमनुक्रमते—कुत्र चेदमिति। अन्यथाख्यातिं दूषयति—न तावदिति। दोषस्य दोषत्वं नाम प्राप्तकार्यप्रतिबन्धकत्वे सति विपरीतकार्यसम्पादकत्वं, तदिहाप्यसदनिर्वचनीयं वा रजतं सत्त्वेन भासयतोऽस्त्येवेत्यर्थः। दृष्टानुसारात्—असत्संसर्गविषयके ज्ञाने त्वयैवाभ्युपगमादिति भावः।

आत्मख्यातिवादो स्वपक्षमुपस्थापयति—अस्तु तर्हीति। तत्रोपपत्तिमाह—स्वरूपेणासत इत्यादिना। बाधविरोधं परिहरति—नेदं रजतमिति। रजतस्य तत्रेदन्त्वस्य चापि कल्पनागौरवमाह—द्वयोरिति। तत्रानुभवप्रमाणमाह—नेदं रजतमिति। रजतस्यात्मस्वरूपप्रत्ययात्मकत्वमुपपादयति—न चेदन्तानिषेधे सतीति। व्यवहितस्य—संप्रयोगरहितस्येति भावः। रजतस्य संविदाकारतायां प्रयोगमाह—संविदाकारो रजतमित्यादिना। न्यायदीपावल्यामुक्तं दोषं विकल्प्येनानूद्य परिहरति—नन्वित्यादिना। संयोगमन्तरेण रूपादेरपरोक्षत्वात् समवायमन्तरेण शब्दभिन्नस्य सर्वस्यापरोक्षत्वाच्च तेषु सम्विद्रूपताभावादनैकान्तिकत्वमिति। सर्वस्य सम्विद्रूपताभ्युपगमे विपक्षासम्भवेन सम्प्रयोगमन्तरेणेति विशेषणस्य वैयर्थ्यम्। दृष्टान्ते साध्यवैकल्यमाह—द्वितीये त्विति। आत्मख्यातिवादे तर्कबाधमप्याह—धीरूपत्वे चेति। तदेतदात्मख्यातिवादी परिहरति—मैवमित्यादिना। रजतादेरिन्द्रियराहित्यमेव विवक्षितं, तेनानैकान्तिकताऽसिद्धी न स्तः। साध्ये वैकल्यं निराचष्टे—सम्वेदनस्य चेति। सुगताभिप्रायेण—स्वतः सिद्धतयेति। वेदान्तिमतेन—साक्षिसिद्धत्वेनेति। तर्कविरोधं दूषयति—न च धीरूपत्वे इति। आत्मख्यातिवादमुपसंहरति—तत इति।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तदयुक्तम्; अत्यन्तालीकाया अपि बाह्यतायाः प्रतिभासवदत्यन्तासतोपि रजतादेः प्रतिभासोपपत्तेः। नच नेदं रजतमितीदन्तामात्रमेव बाध्यते, कल्पनालाघवादिति न्याय्यम्; इदं रजतमिति प्रतिपन्नविशिष्टरजतस्य नेदं रजतमिति बाधस्य चानुभवसिद्धतया कल्पनीयत्वाभावात्। अतएव कल्पनालाघवन्यायानवतारात्। नच संविदैक्यमन्तरेणापरोक्षत्वानुपपत्तिः; बाह्यतावत्तदुपपत्तेः। किञ्चारोपितं बुद्धौ चेत् गुञ्जापुञ्जादौ दहनसमारोपे देहदाहप्रसङ्गः। बुद्धावपि तस्यातात्त्विकत्वादप्रसङ्ग इतिचेत्; तर्हि न तद्बहिः सन्नान्तरित्यत्यन्तासदनिर्वचनीयं वा स्यात्; गत्यन्तराभावात्। सम्प्रयोगमन्तरेणापरोक्षत्वादिति हेतुर्बहिष्ट्वेऽप्यबुद्ध्याकारे वर्तत इति सव्यभिचारः। तस्मान्नासत्, नापि सत्समारोपितम्, नापि सदसद्रूपम्, विरोधात्। अविरोधे वा न भ्रान्तिबाधौ; द्वयोरपि परमार्थविषयत्वात्। उभयाकारस्यैकाकारप्रतिभासो भ्रम इति चेत्; तर्हि बाधस्यापि भ्रमत्वप्रसङ्गः। तस्याप्येकाकारविषयत्वात्। सर्वज्ञानानां च सर्वात्मनाऽनवभासकत्वाद्भ्रान्तित्वप्रसङ्गो दुर्वारः स्यात्। तस्माद् गत्यन्तराभावादनिर्वचनीयमारोपितमिति सिद्धम्।

ननु किमिदमनिर्वचनीयत्वम्—किं निरुक्तिविरहः? किंवा निरुक्तिनिमित्तस्य विरहः? नाद्यः; इदं रजतमित्यादिनिरुक्तेरङ्गीकारात्। न द्वितीयः; विकल्पासहत्वात्। तथाहि निरुक्तेर्निमित्तं ज्ञानम्? अर्थो वा? नाद्यः; रजतादिज्ञानस्य निरुक्तिनिमित्तस्य मायावादिभिरभ्युपगमात्। न द्वितीयः; अर्थस्यापि सतो विरहेऽसत्ख्यातिप्रसङ्गात्, असतोपि विरहे सत्त्वप्रसङ्गात्। उभयविरहस्य च परस्परविरुद्धयोर्लोकसिद्धयोरन्यतरनिषेधस्येतरविधि-

---

सिद्धान्ती विज्ञानवादिमतं दूषयितुमुपक्रमते—तदयुक्तमिति। इदन्तामात्रबाधने कल्पनालाघवमुद्भाव्य दूषयति—न च नेदमित्यादिना। अनुपपत्तिं निराचष्टे—न च सम्विदैक्यमिति। आत्मख्यातिवादमप्रामाणिकमुक्त्वा प्रमाणबाधमाह—किं चारोपितमित्यादिना। नच बुद्धावपि दहनस्यातात्त्विकत्वान्न देहदाहप्रसङ्ग इति वाच्यम्; गत्यन्तराभावेनासतोऽनिर्वचनीयत्वस्य वाऽभ्युपगमप्रसङ्गात्। आत्मख्यातिवादिनोक्तानुमाने सम्प्रयोगमन्तरेणापरोक्षत्वादिति हेतौ बहिष्ट्वेऽबुद्ध्याकारेऽपि वर्तमानत्वादनैकान्तिकतेति। सत्ख्यातिनिराकरणमुपसंहरति—तस्मादिति। सदसतोरुभयोः परमार्थविषयत्वेऽपि सतोऽर्थस्योभयाकारस्यैकाकारग्राहकत्वेन पूर्वज्ञानं भ्रान्तमित्याशङ्कते—उभयाकारस्येति। तदासदाकारमात्रग्राहिणो बाधकस्योत्तरज्ञानस्यापि भ्रान्तत्वप्रसङ्गमाह—तर्हीति। किं बहुना सर्वज्ञानानां तथात्वेन भ्रान्तित्वप्रसक्तिरित्याह—सर्वज्ञानानां चेति। अध्यस्यमानमर्थमनिर्वचनीयमिति सिद्धान्तमुपसंहरति—तस्माद्गत्येति।

अध्यस्तमनिर्वचनीयमाक्षिपति—नन्विति। किमिदमनिर्वचनीयत्वमिति सम्भवविकल्पानुत्थाप्य दूषयति—किं निरुक्तीत्यादिना। नाद्यः; इदं रजतमिति निर्वचनाभ्युपगतत्वात्। नापि निरुक्तिनिमित्तस्य विरहो द्वितीयकल्पः समीचीनः, विकल्पासहत्वात्। ज्ञानस्य निरुक्तिनिमित्तत्वस्वीकारे रजतादिज्ञानस्य निरुक्तिनिमित्तस्य मायावादिभिरभ्युपगमात्। रजतादेरर्थस्य निरुक्तिनिमित्तस्य विरहेऽसत्ख्यातिप्रसङ्गात्, असतोऽपि सत्त्वापत्तेः। अर्थपदेनोभयस्य सदसतोर्ग्रहणे लौकिकत्वेऽलौकिकत्वे वा स्वीकारे दोषमाह—उभयविरहस्येत्यादिना। एतेन सदसद्विलक्षणमनिर्वचनीयमिति पक्षो-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नान्तरीयकत्वनियमदर्शनादेवानुपपत्तेः । भावाभावयोरलौकिकयोः स्वकपोलपरिकल्पित-योर्निषेधसमुच्चयाङ्गीकरणे तु लौकिकसदसतोरनिषेधात् न निरुक्तिनिमित्तार्थसंभवः। अतो न सदसद्विलक्षणमनिर्वचनीयम्, नापि ज्ञानबाध्यत्वम्; बाध्यत्वशब्देन निवर्त्यत्वाङ्गी-कारे पूर्वज्ञानस्य संस्कारस्य चोत्तरविज्ञाननिवर्त्यत्वादनिर्वाच्यत्वापातः। विश्वस्य चेश्वर-ज्ञाननिवर्त्यत्वादनिर्वाच्यत्वं स्यात् इति लक्षणस्यातिव्याप्तिः । अथ बाध्यत्वं नाम बाधक-ज्ञानविषयत्वम्; तदा शुक्त्यादेर्ब्रह्मणश्चानिर्वाच्यत्वं स्यात्, तयोरधिष्ठानतया बाधकज्ञान-विषयत्वात् । अथ नाभूदस्ति भविष्यतीति कालत्रयसत्तानिषेधो बाधस्तद्विषयत्वं च बाध्य-त्वमिति, मैवम्; मायाविवर्त्तस्य पुरोवर्तिरजतस्य तथाविधनिषेधविषयत्वानङ्गीकारा-ल्लक्षणस्याव्याप्तेः, लौकिकपरमार्थरजतस्यात्र तथाविधनिषेधविषयत्वाङ्गीकारादनि-र्वाच्यत्वापत्तिरिति लक्षणस्यातिव्याप्तेश्च । एतेन प्रतिपन्नोपाधौ निषेध्यत्वमनिवर्चनीयत्व-मित्यपास्तम् । पुरोवर्तिनि प्रतिपन्नस्य रजतस्याधिष्ठानज्ञानेन मायायां विलीयमानायां तत्परिणामतया स्वयमेव विलीयमानस्य नेदं रजतमिति निषेधाविषयत्वात् ।

किं चात्र प्रमाणम् ? ख्यातत्वे सति बाध्यत्वानुपपत्तिः—असतो नरशृङ्गादेरख्याना-त्सतश्च चिदात्मनो बाधाभावाद् उभयस्य चेह दर्शनादितिचेत् न; देशान्तरे सत्त्वात्ख्याते-रिहासत्वाद्बाधस्यापि संभवाद् अन्यथाप्युपपत्तेः । किं चासतो भानमनुपपन्नमित्यसत्; अस-तोपि तच्छब्दाद्भानात् । अन्यथा त्वपार्थकत्वं वाक्यस्य, प्रयुक्तपदानां संभूयकारित्वनिय-मात् । किं चेदं सद्विवक्षितम् ? किं सत्तायुक्तम्? अथाबाध्यम्? उत ब्रह्मस्वरूपम्? नाद्यः

परिहृत इत्याह—अतो नेति । ज्ञानबाध्यत्वमनिर्वचनीयत्वमिति कल्पोपि नोचितः, तत्र बाध्यत्वपदे निवर्त्यत्वाङ्गीकारे पूर्वज्ञाने संस्कारे चोत्तरविज्ञाननिवर्त्यत्वादनिर्वाच्यत्वापत्तिः। सर्वस्य चेश्वर-ज्ञाननिवर्त्यत्वात्तत्र तत्र लक्षणस्यातिव्याप्तिः। बाधकज्ञानविषयत्वं बाध्यत्वमिति पक्षे शुक्त्यादेर्ब्रह्मण-श्चातिव्याप्तिः, तयोरधिष्ठानत्वेन बाधकज्ञानविषयत्वाङ्गीकारात् । त्रैकालिकसत्तानिषेधविषयत्व-मित्यपि न वाच्यम्; मायापरिणामरूपस्य पुरोवर्तिरजतस्य वर्तमानसमये सत्ताभ्युपगमेन तत्र त्रैका-लिकनिषेधविषयत्वानङ्गीकाराल्लक्षणाव्याप्तेः। तृतीयपक्षोक्तं दोषं चतुर्थेऽतिदिशति—एतेनेति। अतिदिश्यमानामव्याप्तिं विशदयति—पुरोवर्तिनीति । तव मतेऽधिष्ठानतत्त्वज्ञानेनाधिष्ठानाज्ञानस्य बाध्यत्वेऽज्ञानपरिणामयोर्ज्ञानज्ञेययोः स्वयमेव विलयो भवतीति स्वीक्रियते, तत्र न तयोर्नेदं रजतमिति निषेधविषयत्वमभ्युपेयते । तथा तयोर्लक्षणस्याव्याप्तिः ।

एवमनिर्वचनीयत्वनिरूपणे लक्षणं प्रतिक्षिप्य प्रमाणं प्रतिक्षिपति—किं चात्र प्रमाणमित्यादिना। अर्थापत्तिमाशङ्क्य मानमनोहरकाररीत्यान्यथोपपत्त्या तां दूषयति—ख्यातत्वे सतीत्यादिना-देशान्त-रेत्यन्त्येन । अर्थापत्तेरनुदयमप्याह—किं चेति । असच्छब्देनासतोऽभानत्वे वाक्यस्य निरर्थकत्वप्रसङ्गः। वाक्ये प्रयुक्तपदानां सम्भूय बोधकारित्वनियमात् । तत्र वाक्ये प्रयुक्तपदानामेकपदस्याप्यर्थानवगमे सम्पूर्णवाक्यस्य निरर्थकत्वप्रसङ्गः । किं चार्थापत्तिप्रमाणोपपादनसमये यदुक्तं सतश्च चिदात्मनो बाधाभावेनेत्यादिदूषणमिति । तत्राह—किं चेदमित्यादिना । सत्पदेन सत्तायुक्तत्वविवक्षायां यत्सत्तद्-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सत्तायुक्तस्य प्रपञ्चस्य भवन्मते बाध्यतया यत्सत्तदबाध्यमिति व्याप्तेरसिद्धेः । न द्वितीयः; यदबाध्यं तदबाध्यमिति साध्याविशिष्टत्वापत्तेः । न तृतीयः; सिद्धसाधनत्वात् अर्थान्तरत्वाच्च । किंचान्यथैवोपपत्तिरभ्यूहनीया; सद्विलक्षणत्वे नृशृङ्गवत्ख्यात्यनुपपत्तेः, असद्विलक्षणत्वे चात्मवद्बाधायोगादुभयविलक्षणस्योभयानुपपत्तेः । नच वाच्यं सदसत्त्वे बाधाभावाभानप्रयोजके न तु तद्वैलक्षण्ये, गौरवादिति; असतोपि तत्पदात्प्रतिभानेन सतोपि प्रपञ्चस्य बाध्यत्वदर्शनेनोक्तोत्तरत्वात् । तदेवं नार्थापत्तिरनिर्वचनीये प्रमाणम् ।

अस्तु तर्ह्यनुमानम्——विवादपदमनिर्वाच्यं, भ्रमविषयत्वात्, यन्नैवं तन्नैवं यथात्मा । नचाप्रसिद्धविशेषणः पक्षः; इच्छादीनामष्टद्रव्यातिरिक्ताश्रितत्वानुमानवत्सामान्यतः प्रसिद्धिविशेषपरिशेषाभ्यां तत्प्रसिद्ध्युपपत्तेरितिचेत्,; शुक्त्यादावात्मनि च विपक्षे वर्तमानतया विरुद्धत्वात् । गुणत्वलिङ्गेन क्वचिदाश्रितत्वप्रसाधनवदनिर्वाच्यत्वसाधने लिङ्गाभावात् । अथैतद्दोषपरिजिहीर्षया विमतं सदसद्विलक्षणं, दोषप्रयुक्तभानत्वात्, भ्रान्तिसिद्धतादात्म्यवदिति प्रयुञ्जीत, तदप्यसत्; दृष्टान्तस्य साध्यविकलत्वात् । नहि शुक्तिरजततादात्म्यस्य सदसद्वैलक्षण्यं परीक्षकैरभ्युपगम्यते, येनोभयवादिसिद्धतया तस्य दृष्टान्तता स्यात् । अथ भावरूपतयाऽपरोक्षत्वेन भानाद्बाधाच्च तस्य सदसद्वैलक्षण्यं युक्त्या साध्येत, तदा रजतस्यापि यथा तत्साधयितुं शक्यमिति व्यर्थोऽयं बकबन्धविधिप्रयासः । किंचेदं दोषप्रयुक्तभानत्वम् ? किं दोषजन्यज्ञानविषयत्वम् ? उत दोषजन्यप्राकट्याश्रयत्वम् ? नाद्यः; ज्ञानस्यैकत्वेन तज्ज्ञानविषयाधिष्ठाने व्यभिचारात्, न द्वितीयः; प्रतिवादिनं प्रत्यसिद्धत्वात्——नहि

बाध्यमिति व्याप्त्यभावमाह——सत्तायुक्तस्येति । अतः प्रपञ्चेऽबाध्यत्वरूपसाध्याभावेऽपि सत्तायुक्तत्वहेतोर्वर्तमानत्वेन व्यभिचारप्रसङ्गः । सत्पदेनाबाध्यत्वविवक्षायां यदबाध्यं तदबाध्यमिति हेतोः साध्यसमत्वेन पक्षे साध्यस्य साधनेऽक्षमत्वप्रसङ्गः । सत्पदेन ब्रह्मणो विवक्षितत्वे सिद्धसाधनत्वादर्थान्तरतापत्तेश्च । अन्यथैवोपपत्तिमाह——किं चान्यथैवेति । बाधत्वे सद्वैलक्षण्यं ख्यातित्वेऽसद्वैलक्षण्यमिति स्वीकारे गौरवमाह——नच वाच्यमिति । लाघवात्सदसत्त्वे बाधाभावाभानप्रयोजके स्वीकार्ये । निरुक्तान्यथोपपत्तिमेव दोषमाह——असतोऽपीति । अर्थापत्तिप्रमाणनिराकरणमुपसंहरति——तदेवमिति ।

अनिर्वचनीयत्वेऽर्थापत्तिं प्रदूष्यानुमानं दूषयति——अस्तु तर्ह्यनुमानमिति । साध्याप्रसिद्धिं वारयति–न चाप्रसिद्धेत्यादिना । भ्रमविषयत्वहेतौ विरोधमाह——शुक्त्यादाविति । दृष्टान्तदार्ष्टान्तियोर्वैलक्षण्यमाह——गुणत्वलिङ्गेनेत्यादिना । साध्याप्रसिद्धिवारणायान्वयव्यतिरेक्यनुमानं न्यायरत्नदीपावलीस्थमुत्थापयति–अथैतद्दोषेति । दृष्टान्ते साध्यवैकल्यं विशदयति——नहि शुक्तीति । अथ पूर्वं तादात्म्ये सदसद्वैलक्षण्यं प्रसाध्यताम्, ततस्तद्दृष्टान्तेन प्रपञ्चे सदसद्वैलक्षण्यं साधनीयम्; यया युक्त्या तादात्म्ये सदसद्वैलक्षण्यं साध्यते, तयैव युक्त्या रजतादेरपि तत्साधयितुं शक्यं, कृतं बकबन्धविधिप्रयासेन । बकं जिघृक्षुः कश्चित्पुरुषः सूर्यरश्मिसन्तप्ते बकशिरसि नवनीतं निदधाति, ततो विलीनेन नवनीतेन बकनेत्रयोः पूर्णतयान्धीभूतं बकं जिघृक्षति । तं न्यायमनुसरन्परिहसति——अथ भावरूपतयेत्यादिना । हेतुं विकल्प्य विघटयति——किं चेति । प्रथमेऽनैकान्तिकतां, द्वितीये स्वरूपासिद्धिमाह——नाद्य इत्यादिना——

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

देशकालव्यवहितस्य रजतादेर्दोषजन्यभानाश्रयत्वमुपपद्यतेऽभ्युपेयते वा परैः। किं चेदमनिर्वचनीयत्वं न भ्रान्तिज्ञानानुकूलम्, नापि बाधकज्ञानानुसारि; भ्रान्तौ सदिदं रजतमिति सत्त्वेन बाधे च नेदं रजतमित्यसत्त्वेन स्फुरणात्।

अपि चानिर्वचनीये रजतशब्दो न जातिनिबन्धनस्तत्र जातेरभावात्, भावे वा सत्यरजतवदेवाबाध्यत्वप्रसङ्गात्। नाप्यौपाधिकः; पाचकादिशब्दवदखण्डशब्दत्वात्, उपाधेरनिरूपणाच्च। नाप्यक्षादिशब्दवद्रूढः; स्वभ्रान्तिमात्रसिद्धस्यान्यत्राद्दष्टचरत्वेन रजतस्य तेनागृहीतसम्बन्धत्वात्। किं चानिर्वचनीयं चेद्रजतम्, न प्रतीयेत। तथा हि किं दुष्टेन्द्रियेण तत्प्रतीतिः? उत संस्कारात्? अथवा साक्षिचैतन्यात्? नाद्यः; तस्य प्रतिभासमात्रशरीरतया सम्प्रयोगायोग्यत्वात्। न द्वितीयः; अननुभूतेः संस्काराभावात्। न तृतीयः; इन्द्रियान्वयव्यतिरेकानुविधायिनः केवलसाक्षिवेद्यत्वासम्भवात्। नचाधिष्ठानविषयतयान्वयव्यतिरेकयोरन्यथासिद्धिः; तथासति ज्ञानद्वयस्वीकारेणाख्यातिमतानुमतिप्रसङ्गः। नच संसर्गप्रतीतेरभ्युपगमान्नाख्यातिप्रसङ्गः; तथापि विज्ञानद्वयाभ्युपगमेनाख्यातिप्रसङ्गस्य दुर्वारत्वात्, इदमाकारविषयमिन्द्रियजन्यं ग्रहणं रजततत्संसर्गविषयं साक्षि-

---

अभ्युपेयते वा परैरित्यन्त्येन। भ्रान्तिबाधाभ्यां विरोधादयुक्तमनिर्वचनीयामभ्युपगतिमाह—किं चेदमिति।

रजतशब्दप्रयोगोऽनिर्वचनीयवस्तुनि किं निबन्धनः इत्युपपादयितुमशक्यत्वादपि रजतशब्दप्रयोगानुपपत्तिरनिर्वचनीयत्वबाधिकेत्याह—अपि चानिर्वचनीय इति। यथा गोत्वजातिनिबन्धनो गोशब्दो गवि प्रयुज्यते, न तथानिर्वचनीये रजते रजतत्वजातिनिबन्धनः प्रयोक्तुं शक्यो रजतशब्दः; रजते रजतत्वजातेरभावात्, अनिर्वचनीयरजते रजतत्वस्वीकारे रजतस्य सत्यत्वापत्तेः=सत्यरजतवदेवाबाध्यत्वापत्तेः। अथोपाधिनिबन्धनो रजतशब्दस्तत्र प्रयुज्यते इत्यपि नोचितः, यथा क्रियासम्बन्धाभिधाने पच् धातोर्ण्वुलि सति पाचकशब्दः प्रयुज्यते, न तथाऽत्रावयवशक्त्याऽनिर्वचनीयरजते रजतशब्दप्रयोगः, तस्यायौगिकत्वात्, उपाधेर्निरूपयितुमशक्यत्वाच्च। अक्षादिवद्रूढो रजतशब्दोऽनिर्वचनीयरजते प्रयुज्यते इत्यप्ययुक्तः। स्वभ्रान्तिमात्रसिद्धस्यानिर्वचनीयरजतस्यान्यत्राद्दष्टतया शक्तिग्रहाभावात्। रजतस्यानिर्वचनीयत्वे प्रतीत्यनुपपत्तिरपि बाधिकेत्याह—किं चानिर्वचनीयं चेदिति। विकल्प्य दूषयति—तथाहि किमित्यादिना। इन्द्रियेण प्रतीतिकल्पं निराकुरुते—नाद्य इति। प्रतीतिमात्रशरीरस्य तद्रजतस्येन्द्रियेण सह सम्प्रयोगायोग्यत्वात्। संस्कारात्तद्रजतप्रतीतिरिति कल्पं दूषयति—न द्वितीय इति—साक्षिवेद्यताकल्पं दूषयति—न तृतीय इति। नच तस्य केवलसाक्षिवेद्यता, इन्द्रियान्वयव्यतिरेकानुविधायित्वात्। अन्यथा चक्षुर्हीनस्यान्धस्यापि चाक्षुषरजतभ्रमप्रसङ्गः स्यात्। न चेन्द्रियान्वयव्यतिरेकयोरधिष्ठानविषयत्वेन रजतप्रतीतौ तयोरन्यथासिद्धत्वमिति वाच्यम्; तथासति भ्रमस्थले ज्ञानद्वयाभ्युपगमेनाख्यातिवादानुमतिप्रसङ्गात्। न च संसर्गज्ञानाभ्युपगमान्नाख्यातिप्रसङ्ग इति वाच्यम्; तथापि तत्राख्यातिवादप्रसङ्गस्य दुर्वारत्वादित्याह—तथापीति। ज्ञानद्वयाभ्युपगतिमेव दर्शयति—इदमाकारेत्यादिना।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

चैतन्यमित्यभ्युपगमात्। तदित्थं लक्षणप्रमाणयोरनिरूपणान्नानिर्वचनीयावभासो विभ्रम इति।

अत्रोच्यते—प्रत्येकं सदसत्त्वाभ्यां विचारपदवीं न यत्।
गाहते तदनिर्वाच्यमाहुर्वेदान्तवेदिनः ॥१३॥

सत्त्वेनासत्त्वेन च विचारासहत्वे सति सदसत्त्वेन च यद्विचारं न सहते तदनिर्वाच्यम्। न चैवंसत्यव्याप्तिरतिव्याप्तिर्वा; सर्वभ्रमगोचराणां तथाभावनियमात्, सदादीनां च तत्तद्विचारसहत्वेन परैरभ्युपगमाच्च। एवं च सति निरुक्तिविरहः, किं वा निरुक्तिनिमित्तस्य च विरह इत्यादिविकल्पोऽकाण्डताण्डवितम्; निरुक्तेर्निमित्तभूतायाः प्रतीतेस्तदालम्बनस्य चार्थस्य व्यवहारगोचरत्वेऽपि सदसदादिप्रकारैर्निश्चित्य वक्तुमनर्हत्वाङ्गीकारात्। न च परस्परविरुद्धयोः सदसत्त्वयोर्निषेधसमुच्चयोऽनुपपन्नोऽन्यतरनिषेधस्यान्यतरविधिनान्तरीयकत्वादिति युक्तम्; निषेधसमुच्चयस्य तात्त्विकत्वानङ्गीकारात्। तत्तत्प्रतियोगिदुर्निरूपतामात्रप्रकटनाय तद्विलक्षणत्वाभिलापः। न हि स्वरूपतो दुर्निरूपस्य किञ्चिदपि रूपं वास्तवं सम्भवति; तथा सति तस्यापि तात्त्विकत्वप्रसङ्गात्। न चैकतरनिषेधोऽन्यतरविधिनान्तरीयकः; अनिर्वचनीयवादिनं प्रति व्याप्त्यसिद्धेः।

ज्ञानबाध्यत्वं वाऽनिर्वचनीयत्वम्। न च पूर्वज्ञानसंस्कारयोरतिव्याप्तिः;तयोर्ज्ञाननाश्यत्वेऽपि ज्ञानबाध्यत्वाभावात्। बाधो हि नाम प्रतिपन्नोपाधावभावबोधनम्। न च पूर्वज्ञानस्य तत्संस्कारस्य वा प्रतिपन्नोपाधावात्मनि नासीदात्माधिकरणं ज्ञानं संस्कारो वेत्यभावो बोध्यते। ईश्वरस्य ज्ञानेन च मुद्गरप्रहारेणेव घटादेः प्रपञ्चस्य प्रध्वंस एव क्रियते नाभाव-

---

अनिर्वचनीयनिराकरणपक्षमुपसंहरति—तदित्थमिति।

सिद्धान्तो लक्षणं श्लोकेन संकलयति—प्रत्येकमिति। सत्त्वेनासत्त्वेन सदसत्त्वेन च प्रत्येकं यद्विचारमार्गं न प्रविशति, तदेवानिर्बचनीयं प्राहुर्वेदान्तवेदिन इति श्लोकार्थः। श्लोकेन संकलितं लक्षणं स्फोरयति—सत्त्वेनेत्यादिना। अव्याप्तिं वारयति—सर्वभ्रमेति। अतिव्याप्तिं निषेधति—सदादीनामिति। उदयनाचार्येण तात्पर्यपरिशुद्धौ द्वितीयसूत्रे भ्रमविचारावसरे निगदितं कल्पं निराचष्टे—एवं च सति निरुक्तीति। अत्राप्युदयनेनोक्तं विकल्पमनूद्य दूषयति—न च परस्परेति। परस्परविरुद्धेन सत्त्वेनासत्त्वेन सदसत्त्वेन च निषेधानां समुच्चयस्य तात्त्विकत्वानङ्गीकारात्। सत्त्वादिविलक्षणत्वाभिलापस्तत्तत्प्रतियोगिसत्त्वादिदुर्निरूपतामात्रप्रकटनार्थमिति भावः। अन्यथाऽसम्भवमित्याह—नहि स्वरूपत इति। एकतरनिषेधेऽन्यतरविधिरवश्यम्भावीति व्याप्तिं मत्वा पूर्वमुत्तरितमधुना तद्व्याप्तिमनङ्गीकृत्याह—न चैकतरेति।

ज्ञानबाध्यत्वलक्षणेऽतिव्याप्तिमाशङ्क्य परिहरति—न च पूर्वज्ञानेत्यादिना। पूर्वज्ञानादावनतिव्याप्तिं दर्शयितुं बाधस्वरूपमाह—बाधो हीति। अभावबोधनमभिनयति—नासीदात्माधिकरणमिति। ईश्वरज्ञाननिवर्त्ये सर्वस्मिन् प्रपञ्चेऽतिव्याप्तिवारणाय बाधस्वरूपं स्पष्टयति—ईश्वरस्य ज्ञानेनेति।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

बोधनमतो नातिव्याप्तिः। एतेन बाधकज्ञानविषयत्वाच्छुक्त्यादेर्ब्रह्मणश्चानिर्वाच्यत्वप्रसङ्ग इत्यपास्तम्; धर्मितया बाधकज्ञानप्रतिपन्नत्वेऽपि बोध्यमानाभावप्रतियोगित्वाभावात्। अत एव प्रतिपन्नोपाधौ नाभूदस्ति भविष्यतीति कालत्रयसत्तानिषेधो बाधस्तद्विषयत्वं च बाध्यत्वमिति केचिदाचार्याः। न चाव्याप्त्यतिव्याप्ती; शुक्तिशकले प्रतिपन्नस्य रजतस्य कालत्रयेऽपि तत्र सत्ताभावस्य नेदं रजतमिति बाधेन बोध्यमानत्वात्, लौकिकपरमार्थरजतस्य देशान्तरादौ सत्त्वेन प्रमितस्य तत्रासत्त्वबोधनस्याशक्यत्वात्। तस्य शुक्तिकाशकले कालत्रयासत्त्वं बोध्यत इति चेत्, न तस्यात्राप्रसक्तेः। रजताभासप्रसक्तिरेव तत्प्रसक्तिरितिचेत् मैवम्; रजताभास इत्यप्रतीतेरिदं रजतमित्येव प्रतीतेश्च। प्रतिपन्नोपाधौ निषेधात्तदाभासता पश्चान्निश्चीयते इतिचेत्; एवं तर्हि नाव्याप्तिः, प्रतिपन्नोपाधौ तस्य निषेधस्य त्वयाङ्गीकारात्। अत एव न देशान्तरादौ प्रमितस्य लौकिकपरमार्थरजतस्यैतन्निषेधप्रतियोगित्वम्; आभासविषत्वात्तस्य। अन्यथा जगति रजतमेव न स्यात्। तस्माल्लौकिकपरमार्थरजतमेव नेदं रजतमिति निषेधप्रतियोगीति पूर्वाचार्यवाचोयुक्तिरपि पुरोवर्तिनि रजतार्थिनः प्रवृत्तिदर्शनाल्लौकिकरजतात्मत्वेनापरोक्षतया प्रतीतस्य कालत्रयेऽपि लौकिकरजतमिदं न भवतीति निषेधप्रतियोगीतामङ्गीकृत्य नेतव्या। न चैवं सत्यन्यथाख्यातेः प्रसक्तिः संसर्गवत्संसर्गिणोऽपि ख्यातिबाधान्यथानुपपत्त्या सदसद्विलक्षणताङ्गीकारात्। एवं च सति कुतोऽतिव्याप्तिः ?

प्रमाणं च तत्र ख्यातत्वे सति बाध्यत्वान्यथानुपपत्तिः। नच देशान्तरे सत्त्वादत्रा-

---

अत्यन्ताभावबोधनं बाधो न तु ध्वंसकरणमिति। एतल्लक्षणमन्यत्रातिदिशति—एतेनेति। तदेव विवृणोति—धर्मितयेति। अत्यन्ताभावबोधनं बाध इति लक्षणकरणादेव न कुत्रचिदव्याप्तिरतिव्याप्तिर्वेत्याह—अत एवेत्यादिना। अव्याप्तिं वारयितुमाह—शुक्तिशकले प्रतिपन्नस्येति। अतिव्याप्तिं वारयति—लौकिकपरमार्थरजतस्येति। न च देशान्तरीयरजतस्यैव पुरोवर्तिनि शुक्तिशकले त्रैकालिकासत्त्वं बोध्यते इति वाच्यम्; देशान्तरीयरजतस्यात्राप्रसक्तेः। अप्रसक्तस्य न प्रतिषेध इति भावः। रजताभासत्वेन तत्प्रसक्तिं वारयति—मैवं, रजताभासेति। न च प्रतिपन्नोपाधौ शुक्तिशकले भ्रमकाले रजताभासोऽस्ति, किन्तु तस्य रजताभासता निषेधानन्तरं निश्चीयते इतिवाच्यं; प्रतिपन्नोपाधौ रजताभासस्य निषेधस्य त्वयाऽङ्गीकारेणाव्याप्त्यभावात्। अतएव। निषेधस्याभासविषयत्वादेवापणस्थस्य प्रमाविषयस्य व्यावहारिकस्य रजतस्य नेदं रजतमिति निषेधप्रतियोगित्वं नास्ति। लौकिकरजतनिषेधानुपपत्तिमाह—अन्यथेति। अप्रसक्तस्यैव सम्यग्रजतस्य प्रमितस्य निषेधे जगति रजतमेव न स्यादितिभावः। तत्र विवरणाचार्यवाचोयुक्तिमनुकूलयति—तस्मादिति। लौकिकपरमार्थरजतात्मत्वेन पुरोवर्तिनि प्रतीतस्य रजतस्य निषेधेऽन्यथाख्यात्यापत्तिमुद्भाव्य परिहरति—न चैवमित्यादिना। इदं रजतमित्यत्र यथा तादात्म्यसंसर्गोऽस्माभिः सदसद्वैलक्षण्यं स्वीक्रियते तथा संसर्गिणो रजतादेरपि सदसद्वैलक्षण्यं स्वीक्रियते एव; एवमख्यातिवादिना नाभ्युपेयते, तस्मात्तेन सह नो भेदः सुस्पष्टः। तस्माद्व्यावहारिकरजतप्रतिषेधादेव नातिव्याप्तिरित्याह—एवं च सतीति।

अनिर्वचनीयत्वस्य लक्षणोपपादनानन्तरं प्रमाणमुपपादयति—प्रमाणं चेति। अन्यथोपपत्ति-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सत्त्वाच्च ख्यातिबाधयोरन्यथाप्युपपत्तिः; अन्यत्र सत्ताया इह प्रतीत्यहेतुत्वात्। न हि भूमावम्भोरुहं सदिति दुष्टाक्षस्यापि नभसि तदवभासते। अप्रतीतत्वादेव च बाधायोगात्। न चासतोऽभाने शब्दस्यापार्थकत्वप्रसङ्गः; अपरोक्षभानाभावस्येह विवक्षितत्वात्, परोक्षभानस्य चानिराकरणात्। न च सच्छब्दार्थानिरुक्तेर्यत्सत्तदबाध्यमिति व्याप्त्यसिद्धिः; त्वयापि द्वे तत्त्वे सदसती इति तत्त्वं व्यवस्थापितं तस्यैव मयापि व्यवहारदशायामबाध्यत्वोक्तेः। न चान्यथैवोपपत्तिः; सदसत्त्वयोरेवाबाधाभानप्रयोजकत्वोपपत्तौ तदितरवैलक्षण्यस्य तत्प्रयोजकत्वकल्पनायां गौरवात्। न चासतोऽपि तत्पदात्प्रतिभासनात्सत्तायुक्तस्यापि प्रपञ्चस्य बाधाभ्युपगमात्तयोरप्रयोजकत्वम्; अपरोक्षतयाऽभानस्य व्यवहारदशायां चाबाध्यस्येह विवक्षितत्वात्। ननु सत्त्वासत्त्वयोरेवाबाध्यत्वाभानप्रयोजकत्वे यत्सद्विलक्षणं तद्बाध्यं यदसद्विलक्षणं तत्ख्यातीति व्यतिरेके गौरवं स्यात्। सत्त्वासत्त्वयोस्तु ख्यातिबाधप्रयोजकतायां लाघवमिति चेत् मैवम्; तवापि व्यतिरेके गौरवस्य तुल्यत्वात् अख्यात्यबाध्यत्वयोः सदसद्वैलक्षण्यस्य प्रयोजकत्वाङ्गीकारात्। एवमपि प्रयोजकत्वविनिगमनायां को हेतुरितिचेत्; पक्षान्तरे ख्यात्यसंभवः। तथाहि—न तावत्सत्त्वादध्यस्तस्य ख्यातिः, तस्येहासत्त्वात्; सतश्च ख्यातौ भ्रान्तिबाधयोरनुपपत्तेश्च। असत्त्वे चापरोक्षतया भानत्वानुपपत्तेः।

अनुमानमप्यत्र प्रमाणम्—विमतमनिर्वचनीयं, बाध्यत्वात्, यन्नैवं तन्नैवं, यथात्मेति। संसर्गस्यैव बाध्यत्वाद्रजतस्य बाध्यत्वमसिद्धमितिचेत्, न; द्वयोरपरोक्षतया प्रतिभासमानयोः

मुद्भाव्य परिहरति—न च देशान्तरे इत्यादिना। अन्यथोपपत्तिपरिहारे दृष्टान्तमाह—नहि भूमाविति। बाधोपपत्तिमपि निराचष्टे—अप्रतीतत्वादेव चेति। असतोऽभानेऽसत्पदप्रयोगस्यापार्थकत्वप्रसङ्गं परिहरति—न चासत इति। एवं च नान्यथोपपत्तिर्नाप्यपार्थकत्वमिति भावः। सच्छब्दार्थं त्रिधा विकल्प्योक्तं दोषं निराचष्टे—न च सच्छब्दार्थेति। व्यवहारदशायां तत्त्वं व्यवस्थापयिता त्वयाऽपि रजताद्यपेक्षया यदेव सत्त्वेन घटादौ व्यवस्थापितं तदेव मयाप्यबाध्यत्वमुच्यते। अतो न तत्र व्याप्त्यसिद्धिशङ्का। अन्यथोपपत्तिं परिहरति—न चान्यथैवेति। सत्त्वमबाधायां प्रयोजकमसत्त्वं चाभाने प्रयोजकमभ्युपेयमन्यथा गौरवापत्तिः। पूर्वोक्तं दोषं स्मारयति—न चासतोऽपीत्यादिना। असच्छब्दनिर्वचनवत्सच्छब्दनिर्वचनेऽपि पूर्वोक्तपरिहारमाह—अपरोक्षतयेति। अथ यत्सद्विलक्षणं तद्बाध्यं यदसद्विलक्षणं तत्ख्यातीति व्यतिरेके गौरवं, मत्पक्षे च लाघवमिति शङ्कते—नन्विति। विनिगमकाभावेन तवापि व्यतिरेके गौरवस्य तुल्यत्वादिति समाधत्ते—मैवमित्यादिना। सिद्धान्ती स्वपक्षे विनिगमकं दर्शयति—तथाहीति। अध्यस्तस्येहासत्त्वात्; सतश्च ख्यातौ भ्रान्त्यभावेन बाधानुपपत्तेश्च। रजतस्यासत्त्वे चापरोक्षतयाभानानुपपत्तेः। सतश्चेत्यत्र चकारो विनिगमकसूचनाय त्वर्थक इतिध्येयम्। अनिर्वचनीयत्वेऽनुमानमपि प्रमाणयति—अनुमानमपीति।

व्यतिरेकिप्रयोगमाह—विमतमिति। शुक्तिरजतादिकमित्यर्थः। अत्र सदसद्विलक्षणत्वमनिर्वचनीयत्वमिति साध्यं विवक्षितं, तेन न हेतुना सह साध्यस्य समानतेत्यवधेयम्। स्वरूपासिद्धिं शङ्कते—संसर्गस्येति। असिद्धिं वारयति—न; द्वयोरिति। सामान्यतो दृष्टानुमानेनानिर्व-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

संसर्गमात्रनिषेधे वनस्पत्योरिव विविक्तयोः बाधोत्तरकालमुभयोरपि इहावभासप्रसङ्गात्। न चाप्रसिद्धविशेषणः पक्षः। यस्मात्—

एकालम्बनसंसर्गनिषेधे सदसत्त्वयोः ।
धर्मत्वाद्रूपरसवत्सिद्धानिर्वचनीयता ॥ १४ ॥

विवादाध्यासिते सदसत्त्वे, एकधर्मिनिष्ठात्यन्ताभावप्रतियोगिनी, धर्मत्वाद्, रूपरसवदिति अनिर्धारितधर्मिनिष्ठतया सामान्यतः सिद्धस्य सदसद्वैलक्षण्यस्य केवलव्यतिरेकिणो रजत धर्मिनिष्ठतयोपसंहारादप्रसिद्धविशेषणत्वाभावात्। न चानिर्वचनीयत्वे सदिदं रजतमिति भ्रमानुभवविरोधः; अधिष्ठानेदन्तासंसर्गवत्तत्सत्तासंसर्गस्यापि अनिर्वचनीयस्यैव भ्रमेऽनुभवात्। अपि च ब्रह्मणीव पारमार्थिकसत्तायाः प्रपञ्च इव च व्यावहारिकसत्ताया अभावेऽपि प्रातिभासिकसत्तास्वीकारेण सदिदं रजतमित्यनुभवो न विरुद्धचते। न च नेदं रजतमित्यसत्त्वानुभवविरोधः; अर्थक्रियासामर्थ्यलक्षणसत्त्वस्यैव तत्र निषिध्यमानत्वात्। न चानिर्वाच्ये रजतशब्दप्रयोगायोगः; सविकल्पकरजतानुभवसंस्कारजन्यतया रजत भ्रमस्य तद्वाचकशब्दोल्लेखोपपत्तेः। न चानिर्वचनीयत्वे रजतस्य प्रतीत्यनुपपत्तिः शुक्त्यवच्छिन्नात्मचैतन्यस्थाविद्याविवर्ततया चैतन्येऽध्यस्तत्वात्तेन प्रतीत्युपपत्तेः। न संप्रयोगाभावादपरोक्षत्वानुपपत्तिः। अध्यस्तस्यापरोक्षतायां संप्रयोगानपेक्षत्वात्। अन्यथ

चनीयतासाध्यं साधयन् साध्याप्रसिद्धिपरिहारं श्लोकेन सङ्कलयति—एकालम्बनेत्यादिना। एकालम्बनसंसर्गनिषेधे=एकाधिकरणात्यन्ताभावे। धर्मत्वाद्—हेतोरिति। यथा रूपरसयोर्धर्मत्व हेतुरस्ति, तयोरेकाधिकरणे नभसि अत्यन्ताभावोऽप्यस्ति, तथा सदसत्त्वयोर्धर्मत्वमस्ति; तयोरपि कुत्रचिदेकाधिकरणेऽत्यन्ताभावोऽवश्यमभ्युपेयः, स चैवानिर्वचनीय इति। श्लोकेन संकलित मनुमानं विशदयति—विवादाध्यासिते इति। अर्थान्तरतावारणाय—एकधर्मीत्युक्तम्। वेदान्तिमते—प्रमेयत्वं, किञ्चिन्निष्ठात्यन्ताभावप्रतियोगि, धर्मत्वाद्रूपवदिति न्याये साध्यसिद्धौ न प्रमेयत्वादौ व्यभिचारः शङ्कनीयः। अनिर्वचनीयत्वानुमाने सदिदं रजतमिति भ्रमानुभवेन विरोधमुद्भाव्य परिहरति—न चेति। प्रकारान्तरेण विरोधं परिहरति—अपि चेति। भ्रमविरोधं परिहृत्याधुना बाधविरोधं परिहरति—नच नेदमिति। अर्थक्रियाकारित्वसामर्थ्यं सत्यत्वं, तस्यैव तत्र नेदं रजतमिति निषेधान्न तद्वैलक्षण्यमनुमानं निरोधयतीत्यर्थः। पूर्वोक्तं दोषान्तरं परिहरति—न चानिर्वा इति। अननुभूतरजतस्य भ्रमानुपपत्त्या समाधत्ते—सविकल्पकेति। सविकल्पकानुभवः शब्दोल्लेख पूर्वकः संजातस्तज्जन्यत्वेन रजतभ्रमस्य रजतवाचकशब्दोल्लेखोपपत्तेः। इन्द्रियार्थसन्निकर्षोऽर्थप्रत्यक्षः कस्तस्य भ्रमस्थलेऽनुपपत्त्या रजतप्रतीतिर्नोपपद्यते। अतस्तां प्रतीत्यनुपपत्तिं वारयति—न चानिर्वचनीयत्वे इति। शुक्त्यवच्छिन्नात्मचैतन्यनिष्ठाविद्यारजतरूपार्थेन परिणमते, तच्च रजतं तदवच्छिन्नाधिष्ठानात्मचैतन्येऽध्यस्तं, तेनैव चैतन्येनाध्यस्तरजतस्य प्रतीतिरुपपद्यते इति भावः। अध्यस्तरजते सहेन्द्रियसम्प्रयोगाभावादपरोक्षानुपपत्तिमाशङ्क्य परिहरति—न च सम्प्रयोगेति। इन्द्रियार्थसन्निकर्ष नियमभङ्गो भवत्पक्षेऽपि तुल्य इत्याह—अन्यथेति। यद्यधिष्ठानशुक्त्या सहेन्द्रियसन्निकर्षादेव शुक्ति

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवतोऽपि रजततत्संसर्गयोरपरोक्षत्वाभावापातात् । अधिष्ठानसंप्रयोगादेवापरोक्षत्वमस्मन्तेऽपि तुल्यम्, अन्यत्र स्व पक्षपातात् । न चेन्द्रियान्वयव्यतिरेकानुविधायित्वं रजतस्य; तयोरधिष्ठानग्रहणेनान्यथासिद्धत्वात् । न चैवं सति स्पर्शनेनाधिष्ठाने गृहीतेऽपि चाक्षुषो रजतविभ्रमः स्यादिति वाच्यम्; सादृश्यदर्शनजन्ये विभ्रमे तेनैवेन्द्रियेण सादृश्यस्य ग्रहणनियमात् । अन्यथा तवापि तिक्तो गुड इति विभ्रमो न भवेत् । आरोप्यस्य रसस्य रसनेन्द्रियग्राह्यतया द्रव्यग्राहकस्पर्शनेन्द्रियागोचरत्वात् । तस्मात्तत्राधिष्ठानग्रहण एवेन्द्रियस्योपयोग इति त्वयापि वक्तव्यम् । तथा च न तत्प्रकृतेऽपि दण्डवारितम् । न च ज्ञानद्वयाङ्गीकारादख्यातिप्रसङ्गः; इदमंशावच्छिन्नसाक्षिचैतन्यस्यैवाधिष्ठानज्ञानफलभूतस्य स्वमायाविवर्तरजतादिसिद्धित्वात्, अन्तःकरणवृत्तिलक्षणज्ञानद्वयानङ्गीकारात् । तदेवं लक्षणप्रमाणयोरनिर्वचनीये रजतादिविभ्रमे सम्भवात् तद्वद्द्वैतप्रपञ्चविभ्रमोऽपि वेदान्तवाक्यप्रमाणजन्यादधिष्ठानाद्वितीयात्मविज्ञानाद्विलीयत इति सिद्धम् ।

ननु कथं वेदान्तवाक्यानां सिद्धार्थबोधकत्वम् ? सकलपदानां लोके कार्ये एव सङ्गतिग्रहणात्, लोकावगतसामर्थ्यः शब्दो वेदेऽपि बोधक इति न्यायात् । लोके च प्रवर्तकवचनश्रवणमनन्तरं श्रोतुः प्रवृत्तिमुपलभ्य प्रवृत्तिलिंगेन प्रवर्तकप्रत्यये पदसमुदायस्य सामान्यतः सामर्थ्यमधिगम्य पुनरावापोद्धाराभ्यां च प्रत्येकं कार्यान्विते पदानां सङ्गतिग्रहणात् आनयनादिलक्षणकार्यविशेषे व्यभिचारेऽपि कार्यमात्रस्य सर्वत्राव्यभिचारात्तदन्वितस्वार्थेषु

रजतस्यापरोक्षत्वं त्वयाभ्युपेयते तदस्मन्मतेऽपि निष्पक्षदृष्ट्या दृष्टे सति तुल्यमित्याह—अधिष्ठानेति । इन्द्रियान्वयव्यतिरेकानुविधायित्वमधिष्ठानशुक्तिग्रहणेनोपक्षीणतयाऽन्यथासिद्धमित्याह—नचेन्द्रियेति । आरोप्याधिष्ठानयोरेकेन्द्रियग्राह्यतानियममपवदति—न चैवं सति । सादृश्यसंदर्शनजन्ये विभ्रमे तेनैव सादृश्यग्राहकेन्द्रियेणाधिष्ठानग्रहणनियमोऽस्ति, न तु सर्वत्र विभ्रमे, अन्यथा तिक्तो गुड इति विभ्रमाभावस्तवापि स्यादित्याह—सादृश्यदर्शनेति । एकेन्द्रियग्राह्यतापवादे हेतुमाह—आरोप्यस्येति । ज्ञानद्वयाङ्गीकारादख्यातिवादप्रसङ्गं वारयति—न च ज्ञानेति । अन्तःकरणवृत्तिरूपद्वयानङ्गीकारेणादोष इत्याह—इदमंशेत्यादिना । अनिर्वचनीयवादार्थमुपसंहरन् दृष्टान्तदार्ष्टान्तियोः समन्वयमाह—तदेवमित्यादिना । निखिलभेदप्रपञ्चस्याविद्यापरिणामस्यारोपितत्वात्तदधिष्ठानाद्वयतत्त्वसिद्धिरिति तात्पर्यम् ।

सिद्धार्थे वेदस्य प्रामाण्याभावं कार्यवादी शङ्कते—ननु कथमिति । लोकवेदयोः कार्ये शक्तिग्रहसामर्थ्यसमानमाह—सकलपदानामित्यादिना । दृष्टान्ते कार्ये शक्तिं संघटयति—लोके चेत्यादिना । श्रोतुः=मध्यमवृद्धस्य । प्रवर्तकप्रत्यये=उत्तमवृद्धप्रत्यये । व्युत्पित्सुर्बाल इत्थमनुमिनोति—मध्यमवृद्धस्य इयं प्रवृत्तिर्ज्ञानजन्या, स्वतन्त्रप्रवृत्तित्वात्, मदीयप्रवृत्तिवत् । इत्थं पदसमूहस्य सामान्यतः सामर्थ्यमधिगच्छति व्युत्पित्सुर्बालः । तदनन्तरं "गामानय गां बधानाश्वमानयेत्यादिषु प्रयोगान्तरेषु शब्दान्तरोद्धारे शब्दान्तरप्रक्षेपे च गवादिविशेषार्थेषु पदविशेषाणां सामर्थ्यमधिगच्छति । तस्मात्प्रत्येकं कार्यान्विते पदानां शक्तिग्रहणं भवति । कुत्रचिदानयनादिकार्यविशेषे व्यभिचारेऽपि कार्यमात्रं सर्वत्राव्यभिचरितं, तस्मात्कार्यान्वितस्वार्थेषु पदानां सर्वत्र सामर्थ्यमधिगन्तव्यमिति भावः । कार्यान्वितेषु

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पदानां सामर्थ्याधिगमात् । न चान्तरेणापि व्यवहारं पुत्रस्ते जात इत्यादिवाक्यश्रवणसम नन्तरं श्रोतुर्मुखविकासादिना लिङ्गेन हर्षमनुमाय, तद्धेतुप्रत्यये वाक्यस्य सामर्थ्यं सामान्य तोऽधिगम्यावापोद्धाराभ्यां पुनः पुत्रादिपदानां तनयाद्यर्थविशेषेषु सङ्गतिग्रहो दृश्यते इ वाच्यम्:; परिशेषावधारणानुपपत्तेः; प्रियासुखप्रसवादेरपि हर्षहेतोः सम्भवात् । यत्र प्रभिन्नकमलोदरे मधूनि मधुकरः पिबतीति प्रसिद्धपदसमभिव्याहारात्प्रसिद्धेतरपदार्थोऽप्रसिद्ध मधुकरपदार्थः समधिगतविभक्त्यर्थश्च यं मधुपाने कर्तारं पश्यति, तं मधुकरशब्दवाच्यत्वे प्रत्येति । तत्रापि न कार्यपरताव्याकोपः । तादृश्या अपि व्युत्पत्तेर्व्यवहारनिबन्धनप्रथम कार्यव्युत्पत्तिनिबन्धनतया तदानुगुण्येन व्यवस्थानात्, पुत्रस्ते जात इत्यादेश्च सिद्धार्थ प्रयोगस्य लाक्षणिकत्वेनाप्युपपत्तेः । परस्परान्वयस्य कार्यान्वयाव्यभिचारात् । पुत्रं जातस्तं पश्येसि वक्तव्येऽपि कार्ये, विव्रियतामिति पदावधीरणेन द्वारमिति प्रयो वत्प्रयोगोपपत्तेः । ननु न कार्यान्विते पदानां सामर्थ्यमध्यवसातुं शक्यम् कार्यस्य कार्यान्त रामावेन कार्यपदस्य कार्यान्वितस्वार्थाभिधायित्वानुपपत्तेः, योग्येतरान्विताभिधाने प्रयोजकद्वैविध्यापातादिति चेत्, न; कार्यान्वयिनि कार्यपरपदार्थान्विते वा पदशक्तिग्रह णाभ्युपगमे प्रयोजकद्वैविध्याप्रसक्तेः ।

यत्तु कैश्चिदुच्यते कार्यान्वयिनि इत्यत्र किं कार्यं विशेषणमन्वयस्य किं वोपलक्षणम् ? नाद्यः; अन्वयस्य कार्यविशिष्टस्य सम्बन्धद्वयप्रसङ्गात्

शक्तिग्रहणे व्यभिचारमुद्भाव्य परिहरति—न चान्तरेणापीति । प्रियसुखप्रसवादेरपि हर्षहेतुसम्भ तत्र पुत्रजन्ममात्रमेव पितृहर्षकारणमिति परिशेषावधारणमशक्यमिति । प्रभिन्नकमलोदरे मधू मधुकरः पिबतीति व्यभिचारमुद्भाव्य दूषयति—यत्र चेति । द्विविधा लक्षणाऽस्ति, अर्थलक्षणा, वाक्य लक्षणा चेति, तत्राद्या अर्थे पदस्यलक्षणा, अन्त्ये च वाक्ये वाक्यैकदेशलक्षणा । तयोरर्थलक्षणा व्यभिचारं परिहृत्य वाक्यैकदेशलक्षणया तं परिहरति—पुत्रस्ते जात इति । अत्र तं पश्येत्यध्याहृ वाक्यं पूरणीयम् । तथा द्वारमित्युक्तौ विव्रियतामित्यध्याह्रियते यथा, तद्वत्प्रयोगोपपत्तिः । कार्या न्वितस्वार्थाभिधायकत्वरूपस्य शक्तिमत्त्वस्य कार्यपदे व्यभिचारं शङ्कते—ननु नेति । तत्र व्यभिचार वारणाय योग्येतरान्विताभिधाने प्रयोजकद्वैविध्यापत्तिश्च स्यात् । प्रयोजकद्वैविध्यापत्तिं वारयति— न, कार्येति । कार्यनिरूपितोऽन्वयः कार्यान्वयस्तस्यान्वयि=तदाधारः । स च कार्यमितरच्चाति सम्बन्धस्य द्विष्ठत्वात् । नयविवेककारोक्तं प्रयोजकमाह—कार्यपरेति । कार्यपरं यत्पदं तस्य योऽ स्तेनान्विते सामर्थ्यमभ्युपेयते प्राभाकरैः । तथा न प्रयोजकद्वैविध्यापत्तिरिति भावः ।

रत्नदीपावलीकारेण दूषितं प्रथमं प्रयोजकमनुवदति—यत्त्वित्यादिना । सम्बन्धद्वयप्रसङ्गादिति कार्यस्यान्वयेत्यत्रैकः सम्बन्धः, तस्यान्वयीत्यत्रान्यः सम्बन्ध इतिभाव । किं कार्यान्वयेत्यत्र तत्पुरु समासे पूर्वपदस्याप्रधानतया कार्यस्य विशेषणत्वमुत्तरपदस्य प्रधानतयाऽन्वयस्य विशेष्यत्वम्, अन्वयि त्यत्र प्रकृतिप्रत्यययोः प्रत्ययार्थस्य प्राधान्यमिति नियमादन्वयस्य विशेषणत्वं कार्यस्य च विशेष्यत्व मिति युगपदेव विशेषणत्वविशेष्यत्वे प्रत्येकमनयोः कार्यान्वययोरन्योऽन्यापेक्षया प्रसज्ज्येयातामित्याह

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

युगपच्च कार्यान्वययोर्विशेषणता विशेष्यता चापद्येत । न चैतत्सर्वमुपपन्नम्, अलौकिकत्वात् । नापि द्वितीयः; कार्यस्य शब्दशक्त्यगोचरत्वप्रसङ्गादिति, तदसत्; कार्यान्वयान्वयिनीति कार्यस्य सम्बन्धव्यावर्तकमात्रताया विवक्षितत्वात् । तत्र यथा गवादिपदार्थानामकार्यरूपाणां तत्सम्बन्धनिरूपकता तथैव कार्यस्यापि, सम्बन्धस्योभयनिष्ठत्वात् । इतरथा योग्येतरान्वयपक्षेऽप्यन्वययोग्येनेतरेणान्वयस्य विवक्षितत्वात्, अन्वयस्य विशेषणोपलक्षणपक्षयोरुक्तदोषानुषङ्गस्तुल्य एव स्यात् । उपलक्षणपक्षेऽपि कार्यस्य शब्दशक्तिविषयत्वं न व्याहन्यते, कार्योपलक्षितत्वस्यान्वयविशेषणतया कार्यस्यापि परम्परया शब्दशक्तिप्रतियोगित्वोपपत्तेः । एवमनभ्युपगच्छतः स्वप्रच्युत्युपलक्षितसत्तायोगित्वमनित्यत्वमित्येवमादिलक्षणमपि न निर्वहति; प्रच्युतेः कार्यानन्वये सत्तायोगित्वमात्रस्यैव लक्षणत्वादात्मादेरप्यनित्यत्वापत्तेः । स्वयमेव चानुभूतिरनुभूतिव्यवहारहेतुप्रकाश॰ इति प्रतिज्ञाय मोक्षदशायां व्यवहार हेतुत्वाभावात् लक्षणस्याव्याप्तिमाशङ्क्य व्यवहारहेतुत्वमुपलक्षणमित्यङ्गीकृत्योपलक्षितत्वमपि क्वचित्साध्यं यथा विनाशोपलक्षितसत्तायोगित्वमनित्यत्वमिति स्वकीयग्रन्थे निबद्धत्वात् । एतेन विवादपदानि पदानि, न कार्यान्वयान्वयिनि शक्तिमन्ति, पदत्वात्, कार्यपदवदित्यनुमानमपास्तम्; विशेषणोपलक्षणपक्षयोरुक्तदूषणोद्धरणात्कार्यवदस्यापि कार्यान्वयान्वयिनि शक्तिमत्त्वेन दृष्टान्तस्य साध्यविकलत्वात्, विवादपदानि पदानि, कार्यपराणि, पदत्वात्कार्यपदवदिति प्रयोगसम्भवाच्च । न च 'विज्ञानमानन्दं ब्रह्म' इत्यादिपदेषु व्यभिचारः; तेषामपि द्रष्टव्य इत्यादिविधिशेषतया कार्यपरत्वात् ।

युगपच्चेति । इष्टापत्तिमुद्भाव्य दूषयति—न चैतदिति । अन्वयस्य कार्यमुपलक्षणमिति द्वितीये कल्पेऽन्वयवत एव शक्तिगोचरत्वं नतु कार्यस्येत्याह—नापि द्वितीय इति । तदेतद्दूषणं परिहरति—तदसदिति । कार्यान्वयान्वयिनीत्यत्र कार्यस्यान्वयं प्रति न विशेषणत्वं नाप्युपलक्षणत्वं विवक्षितं, किन्तूभयानुगतं व्यावर्तकमात्रमित्याह—कार्यान्वयेति । अत्राप्रसिद्धिं वारयति—तत्र यथेति । गामानयेत्यादौ गवानयनरूपकार्यतदितरगोपदार्थसम्बन्धस्योभयनिष्ठत्वाद्यथागोपदार्थः सम्बन्धनिरूपकस्तथैव कार्यमपि सम्बन्धनिरूपकमित्यर्थः । इममेव पक्षं प्रतिबन्द्या साधयति—इतरथेति । कार्यस्य सम्बन्धव्यावर्तकतामात्रानभ्युपगमे योग्येतरान्वयपक्षेऽप्यन्वयस्य योग्येतरं प्रति विशेषणोपलक्षणपक्षयोरपि निरुक्तदोषानुसङ्गस्तुल्य एवेति भावः । कार्यमन्वयस्योपलक्षणमिति पक्षे पूर्वोक्तदोषाभावमाह—उपलक्षणेत्यादिना । कार्यस्योपलक्षणत्वदोषादेव कार्यस्य शब्दशक्त्यविषयत्वाभ्युपगमे प्रच्युतेरनित्यत्वरूपलक्ष्येऽनन्वये सत्तायोगित्वमात्रमेवानित्यत्वमिति लक्षणत्वादात्मादेरप्यनित्यत्वापत्त्यातिव्याप्तिरित्याह—एवमनभ्युपगच्छत इति । इष्टापत्तिं वारयति—स्वयमेवेति । सिद्धे व्युत्पत्तिं दूषयित्वा कार्यव्युत्पत्तिसमर्थनेन तर्कबाधविपक्षबाधकतर्काभावाभ्यां प्रतिपक्षीयमनुमानमपि दूषयितमित्याह—एतेनेति । लिङ्गादिव्यावर्तकं विवादपदम्, अन्यथा दृष्टान्तासिद्धिः । दृष्टान्ते साध्यवैकल्यमाह—कार्यपदस्यापीति । अस्येत्यनेन विशेषणोपलक्षणयोर्ग्रहणमितिभावः । स्वीयानुमानेन परकीयानुमाने बाधमाह–विवादपदानीति । उपनिषदामपि विधिपरत्वे ब्रह्मासिद्धेर्व्यभिचारमाह—न च विज्ञानमिति ।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तदेवं सकलपदानां कार्यपदत्वान्न सिद्धे ब्रह्मणि वेदान्तवाक्यानां प्रामाण्यमिति।

अत्रोच्यते--न तावत्सिद्धे प्राथमिकव्युत्पत्त्यसम्भवः। प्रागुन्नीतन्यायेन पुत्रस्ते जात इत्यादिवाक्यादपि व्युत्पत्तिसम्भवात्। न च तत्र पारिशेष्यावधारणानुपपत्तिः; यतः--

दृष्टचैत्रसुतोत्पत्तेस्तत्पदाङ्कितवाससा।
वार्ताहारेण यातस्य परिशेषविनिश्चिते ॥१५॥

यो हि परिदृष्टचैत्रप्रहर्षहेतुपुत्रजन्मा पुत्रपदालिप्तकुङ्कुमाङ्कितपटप्रदर्शकेन वार्ताहारेण सह चैत्रसकाशं गतः, तस्य दिष्टया वर्धसे चैत्र! पुत्रस्ते जात इति वार्ताहरव्याहारश्रवणसमनन्तरं समुन्मीलत्पुलकसकलकलेवरमुत्फुल्लगण्डयुगलमुल्लसितनयनयुगलं चैत्रमवलोकयतस्तत्प्रमोदलिङ्गेन स एव नूनमनेन मदवलोकितः सुतसम्भवः प्रमोदहेतुरेतस्माद्वाक्यादधिगत इति परिशेषावधारणोपपत्तेः। न च प्रियासुखप्रसवस्यापि सम्भवात्परिशेषावधारणानुपपत्तिः; पुत्रपदाङ्कितपटप्रदर्शनवत्प्रियासुखप्रसवसूचकाभावात्। न च विद्यमानतामात्रेण तत्रापि शङ्कावकाशः; कार्येऽप्युपानच्छत्रदण्डाद्याहरणलक्षणावान्तरकार्यदर्शनेन शङ्काप्रसरस्य दुर्निवारत्वात्। एवमुक्तरीत्या सिद्धेऽपि प्राथमिकव्युत्पत्तेसम्भवात्प्रभिन्नकमलोदरे मधूनी मधुकरः पिबतीत्यादिप्रसिद्धपदसमभिव्याहारनिबन्धनव्युत्पत्तावपि सिद्धार्थपरता न व्याहन्यते, मुख्यार्थविषयतया सिद्धेऽपि प्रयोगयोगे लाक्षणिकत्वकल्पनानुपपत्तेः।

नच प्रथमावगतकार्यान्वयानुरोधेन लक्षणाश्रयणम्; प्रथममपि 'पुत्रस्ते देशान्तरादागतः' 'पुत्रस्ते गच्छति,' 'पुत्रस्ते सुखी,' 'पुत्रस्ते निरामयः' इत्यादिप्रयोगेष्वावापोद्धाराभ्या

श्रुतिवाक्यानि विधिशेषापेक्षितमात्मानं सत्यज्ञानादिरूपं प्रतिपादयन्ति न कार्यपरतामतिशेरते। प्राभाकरः स्वपक्षमुपसंहरति--तदेवमिति।

सिद्धान्ती प्राथमिकव्युत्पत्तिं साधयति--न तावदित्यादिना। पारिशेष्यावधारणोपपत्तिं श्लोकेनसंग्रथ्नाति--दृष्टेत्यादिना। दृष्टा चैत्रसुतोत्पत्तिर्येन तस्य दृष्टचैत्रसुतोत्पत्तिः, तस्य पुत्रपदेनाङ्कितं लांछितं वासो यस्य तत्पदाङ्कितवासास्तेन वार्ताहारेण सह यातस्याविदितपदपदार्थभावस्य पुरुषस्य परिशेषविनिश्चितेः सम्भवादितिभावः। श्लोकार्थं विशदयति--यो हीत्यादिना। तत्पदाङ्कितवाससेति विशेषणस्य प्रयोजनं शङ्कापरिहारपूर्वकं दर्शयति--न च प्रियेति। हर्षसूचकं पुत्रजन्म नान्यदिति दर्शयति--पुत्राङ्कितेति। नान्यत्कारणमिति कण्ठतः प्रतिषेधति--न च विद्यमानतेति सिद्धे प्राथमिकव्युत्पत्तिसमर्थनेनान्यदापि व्युत्पत्तिं व्युत्पादयति--एवमुक्तरीत्येति। सिद्धार्थपरप्रयोगे लाक्षणिकत्वं व्यावर्तयति--मुख्यार्थेति।

सिद्धार्थप्रयोगे लाक्षणिकत्वमुद्भाव्य परिहरति--न च प्रथमेति। इत्यादिप्रयोगेषु-सिद्धार्थप्रयोगेष्वित्यर्थः। प्राभाकरैर्लोके कार्यपदेन धात्वर्थोऽभिधीयते वेदे नियोगः स चाप्रसिद्धः तथा च प्रथमव्युत्पत्तिमनुसृत्य लक्षणाश्रयणे लोके धात्वर्थरूपकार्ये व्युत्पत्तिदर्शनेन वे तदसम्भवात् यजेतेत्यादिलिङादिशब्दानामबोधकत्वप्रसङ्गः। अपूर्वस्य वाच्यधात्वर्थसम्बन्ध

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पुत्रादिपदानां स्वस्वार्थे व्युत्पत्तेरुपपत्तेः। प्रथमव्युत्पत्त्यनुसारेण च लक्षणाश्रयणे लोके भावार्थकार्ये व्युत्पत्तेर्वेदे तदसंम्भवात्, यजेतेत्यादिशब्दानामबोधकत्व प्रसङ्गः। कामाधिकारे च प्रथमं कामसाधने नियोगे लिङ्गादिपदानां व्युत्पत्तेः, नित्यनैमित्तिकाधिकारे लाक्षणिको लिङ्गादिप्रयोगः स्यात्। एवं नित्यनैमित्तिकयोः स्वतन्त्रकार्ये पदशक्त्यधिगतेरङ्गवाक्ये परार्थकार्ये लिङ्गादिपदप्रयोगो मुख्यो न स्यात्।

अथावधीरितभावार्थकामसाधनस्वतन्त्रविशेषं कार्यमात्रं व्युत्पत्तिगोचरः, सर्वत्र तस्याव्यभिचारात् लाघवाच्चेति मतम्; तर्हीहापि योग्येतरान्विते पदशक्तेरव्यभिचाराल्लाघवाच्चेति समः समाधिः। एवं च सति कार्यान्वयान्वयिनि पदशक्तिरित्यपास्तम्; अन्वितमात्रस्य प्रयोजकत्वे सम्भवति कार्यान्वयिनीति कल्पनायां गौरवात्। न च कार्यपरपदार्थान्वितस्वार्थे शक्तिः; विकल्पासहत्वात्। तथाहि—कार्यपरत्वं पदधर्मः? किं वा पदार्थधर्मः? नाद्यः; सर्वपदानां लिङ्गादिपदवत्कार्यपरत्वे पर्यायतापत्तेः। अथ पर्यायतापरिहाराय मुख्यगौणसाक्षात्परम्परादिभेदेन कार्यपरतां विशिष्यात्, न तर्ह्येकप्रयोजकत्वलाभः, मुख्यादिविशेषणानां सर्वपदेष्वेकरूपताभावात्। न हि सिंहो देवदत्त इत्यादौ सिंहादि-

---

दर्शनेन लक्ष्यत्वस्याप्यभाव इत्यर्थः। कामाधिकारे काम्यनियोगे प्रथमं लिङादिपदानां व्युत्पत्तेः, नित्यादिकर्मजन्यनियोगे लिङादिप्रयोगो लाक्षणिकः स्यात्। तथा नित्यादिकर्मजन्ये स्वतन्त्रनियोगे पदप्रयोगो मुख्यो न भवेदित्याह—प्रथमव्युत्पत्तीत्यादिना। इदमत्राकूतं—प्राभाकरमान्यतां परिहरन् चित्सुखाचार्यः कथयति—यत्किल प्रथमव्युत्पत्तिर्व्यवहाराधीनाभ्युपेयते त्वया, चेत्तर्हि लिङादीनां व्यवहारस्यापूर्वेऽदृष्टचरत्वेन क्रियात्मककार्ये तत् सम्भवात्, तस्य वेदेऽसम्भवेन वैदिकलिङादिपदानां कस्यचिदप्यर्थस्य शक्त्या लक्षणया वाऽर्थानवबोधकत्वापत्तेः। अपूर्वे लिङादिशक्त्यभ्युपगमेऽपि नैकधमपूर्वं, यत्र लिङादिशक्त्यव्यभिचरितत्वं स्वीकर्तुं शक्येत। काम्यापूर्वं नित्यापूर्वमङ्गापूर्वं चेति त्रिविधमपूर्वमस्ति। तेषु कुत्र लिङादिपदानां शक्तिरिति विनिगमकाभावेन निर्णेतुमशक्यं, कुत्रचिच्छक्तिस्वीकारे तद्भिन्नयोर्द्वयोर्लक्षणाप्रसक्तिर्दुर्वारा, तथा नाभ्युपेयते त्वयाऽपितु सर्वेष्वपूर्वेषु शक्त्या बोध्यत्वमभ्युपगम्यते तच्चासम्भवमिति भावः।

अथ धात्वर्थस्वरूप-काम्यापूर्वरूप-नित्यापूर्वरूपविशेषतां परित्यज्यैतेष्वनुगतरूपं कार्यमात्रं शक्तिगोचरोऽभ्युपेयते चेत्तर्हि योग्येतरान्विते पदशक्तेरनुगतप्रयोजकलाभाल्लाघवाच्चाभ्युपगन्तुमुचितत्वात्समः समाधिरित्याह—अथावधीरितेति। अवधीरितः—परित्यक्तो भावार्थरूपादिविशेषो येन तत्तथोक्तमिति। एवं सति कार्यान्वयान्वयिनि पदशक्तिकल्पनायां गौरवादन्वितमात्रस्य शक्तिप्रयोजकत्वं श्रेय इतिभावः। प्राभाकरोक्तं द्वितीयं प्रयोजकं दूषयति—न चेति। तद्विकल्प्य दूषयतीत्याह—विकल्पेति। कार्यपरपदार्थान्वितस्वार्थे शक्तिरित्यत्र कार्यपरत्वं पदस्य विशेषणमर्थात् कार्यपरं यत्पदं तदर्थेनान्विते इति विवक्षायां सर्वपदानां लिङादिपदवत्कार्यपरत्वे पर्यायतापत्तिः। एकार्थतापरिहाराय लिङादिपदं मुख्यवृत्त्या कार्यबोधकमन्यत्पदं गौणवृत्त्या कार्यपरमथवा लिङादिपदं साक्षात्कार्यार्थबोधकमन्यत्पदं परम्परया इत्यादिभेदेन कार्यपरताविशेषणीया चेत्तर्हि नैकप्रयोजकत्वलाभ इति परिहरति—न तर्हीति। मुख्यादिवृत्तिविशेषणानां सर्वपदेष्वेकरूपताभावात्। तदेव विवृणुते—नहि सिंह इति। सिंहपदं देवदत्तपदमित्युभयोः सिंहपरकत्वेऽपि न तयोः सिंहपरत्व-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शब्दानां मुख्यगौणयोस्तत्परत्वमेकरूपम्, तथा सति देवदत्तादेरपि केसरादिमत्त्वप्रसङ्गात्। नापि द्वितीयः; पदार्थानां कार्याबोधकत्वेन तत्परत्वाभावात्। अथ कार्यशेषत्वं कार्यपरत्वं पदार्थानाम्; तर्हि कार्यशेषत्वं कार्यपदार्थस्य नास्तीति तदन्विताभिधायिकारकपदानां कार्यपरपदार्थान्विताभिधायित्वं न स्यादिति न किञ्चिदेतत्। यत्पुनरनुमानं कार्यपराणि पदानि, पदत्वात्कार्यपदवदिति, तदपि 'न पिबेन्न हन्यादि, त्यादिनिषेधवाक्यस्थपदैरनैकान्तम्। न हि तत्र प्राप्तक्रियानिवृत्त्यौदासीन्यव्यतिरेकेण किञ्चिदनुष्ठेयमवबोध्यते, हननप्रागभावस्यानादित्वेनाननुष्ठेयत्वात्। न हन्यामिति सङ्कल्पस्य विधारकप्रयत्नस्य वा विधानाभ्युपगमे तस्याप्रतीयमानतया लक्षणाप्रसङ्गात्। प्राप्तक्रियायाश्चेष्टसाधनत्वाभावबोधादेव निवृत्तेर्वाक्यस्य चरितार्थत्वोपपत्तेश्च।

न च 'विज्ञानमानन्दं ब्रह्म' इत्यादिवचसां प्रतिपत्तिशेषत्वम्, विकल्पासहत्वात्। तथा हि किं शाब्दी प्रतिपत्तिर्विधेया? उत भावनात्मिका? अथ साक्षात्कारलक्षणा? नाद्यः तस्याः स्वर्गकामो यजेतेत्यादिशब्दादिवद्विदितपदपदार्थसंगतेः स्वयमेवोत्पत्तेः। न द्वितीयः ज्ञानप्रकर्षहेतुत्वस्यान्वयव्यतिरेकासिद्धत्वेन भावनाया अविधेयत्वात्। न तृतीयः साक्षात्कारस्य ब्रह्मरूपत्वेन नित्यत्वेनाविधेयत्वात्। अन्तःकरणपरिणतिरूपत्वे चानन्द-

---

मेकरूपम्। इष्टापत्त्यभ्युपगमे देवदत्तादेरपि केसरादिमत्त्वप्रसङ्गः स्यादिति भावः। अथ कार्यपरत्वं पदार्थस्य विशेषणमर्थात् कार्यपरो यः पदार्थस्तदन्विते इति विवक्षितत्वेऽपि दोषमाह—नापि द्वितीयः नहि पदार्थाः कार्यावबोधकाः क्वापि दृश्यन्ते, तेषां कार्यपरत्वाभावात्। अथ पदार्थानां कार्यपरत्वं नाम कार्यशेषत्वमिति चेत्तर्हि स्यादन्यपदार्थानां द्रव्यादीनां कार्यशेषत्वं, कार्यपदार्थस्य तु कार्यशेषत्वं नास्तीति तादृशकार्यान्वितार्थवाचकपदानां गवादीनां कार्यपरपदार्थान्वितवाचकत्वं न स्यादिति द्वितीयपक्षोऽपि न किञ्चित्कर इतिभावः। प्राभाकरोक्तानुमाने निषेधवाक्येषु "न हन्यात्" "न पिबेदि"त्यादिषु साध्याभावं प्रदर्श्य व्यभिचारं स्फोरयति—यत्पुनरित्यादिना। तत्र पदत्वं हेतुरस्ति किन्तु कार्यपरत्वं साध्यं नास्ति। तं तर्केण साधयति—नहीति। हननप्रागभावो नानुष्ठेयोऽनादित्वादित्यर्थः। अथोक्तौदासीन्यव्यतिरिक्तस्य "न हन्यामि"ति हनननिरोधसंकल्पस्य विधानमभ्युपेयते चेत्तर्हि तस्याप्रतीयमानतया लक्षणाप्रसङ्गात्, निषेधवाचकवाक्येन प्राप्तक्रियायाश्चेष्टसाधनत्वाभावमात्रबोधादेव कृतकार्यत्वोपपत्तेश्चेत्याह—नेत्यादिना—प्राप्तेत्यन्त्येनेति।

अथ 'विज्ञानमानन्दं ब्रह्मे'त्यादिवाक्यानां विकल्पासहत्वेन प्रतिपत्तिविधिशेषत्वाभावमाह—न चेति। न खल्वत्र परोक्षज्ञानरूपाशाब्दीप्रतिपत्तिर्विधेया, परोक्षज्ञानरूपाया, शाब्दीप्रतिपत्तेः स्वर्गकामो यजेतेत्यादिशब्दवत् विधिमन्तरेणैव विदितपदपदार्थसंगतेः पुरुषस्य स्वयमेवोत्पत्तेः। न चात्राध्यापनविधिनैव शाब्दीप्रतिपत्तिर्भवतीति वाच्यं; पृथग् विध्यनवकाशात्, अध्ययनविधेरक्षरग्रहणमात्रविश्रान्तत्वाच्चेति भावः। नापि ध्यानरूपा भावनात्मिका प्रतिपत्तिरत्रविधेया; तस्याः प्रकर्षज्ञानहेतुत्वं गान्धर्वशास्त्रवदन्वयव्यतिरेकसिद्धमिति तत्र विधेयत्वाभावात्। नापि साक्षात्काररूपा प्रतिपत्तिर्विधेयेति वाच्यम्; ब्रह्मस्वरूपतया नित्यत्वेनाविधेयत्वादित्याह—न तृतीय इति। यदि साक्षात्कारपदेनान्तःकरणपरिणामो गृह्येत, तर्हि तस्यापि परमानन्दब्रह्मसाक्षात्कारत्वेन फलत्वादविधेयत्वमिति। 'द्रष्टव्यः' इत्यादिपदानां 'अर्हे कृत्यतृचश्चेति' कृत्यप्रत्ययान्तानामर्हार्थितयाप्युपपत्तेः।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

साक्षात्कारतया फलत्वेन विधेयत्वानुपपत्तेः।'द्रष्टव्यः' इत्यादिपदानां चार्हार्थतयाप्युपपत्तेः।

अथापि सिद्धार्थव्युत्पत्तौ किं मानमिति चेत्, उच्यते—

विवादाध्यासितः सिद्धः शब्दव्युत्पत्तिगोचरः।
मेयत्वान्न्यायगम्यत्वात् तवाभिमतकार्यवत् ॥१६॥

न च कार्यत्वमुपाधिः; व्यतिरेकासिद्धेः। यत्कार्यं न भवति नासौ शब्दव्युत्पत्तिगोचरो तथा संप्रतिपन्नमिति व्यतिरेकव्याप्तेः परं प्रति दर्शयितुमशक्यत्वात्। नन्वाकृतेरेव शब्दार्थत्वाद्व्यक्तेस्तदभावात्तत्रानैकान्तिकमिति चेत्, मैवम्; आकृतेः शब्दार्थ वेऽपि तस्या एव शब्दार्थत्वमिति नियमानङ्गीकारात्, "व्यक्त्याकृतिजातयस्तु पदार्थः" इत्यक्षचरणपक्षपातिभिरङ्गीकारात्, आकाशादिपदानां च व्यक्तिवचनतया मीमांसकैरप्यभ्युपगमात्, व्यक्तिशब्दस्य च व्यक्तिवाचकत्वात्। ननु तत्रापि व्यक्तित्वोपाधेरेव वाच्यत्वं न व्यक्तेस्तस्या लक्ष्यत्वादितिचेत्, मैवम्; क्वचिच्छब्दान्तरवाच्यस्यैव शब्दान्तरलक्ष्यत्वाभ्युपगमात्, व्यक्तिः शब्दवाच्या न भवतीति स्ववचनव्याघाताच्च। तस्मात्सिद्धं सिद्धे ब्रह्मणि वेदान्तानां प्रामाण्यमिति।

अङ्गीकृत्यैतदवोचाम—कार्ये प्रामाण्यमेव शब्दस्यानुपपन्नम्, तत्र सङ्गतिग्रहणायोगात्। ननु कथं तत्र सङ्गतिग्रहणायोगः; प्रवृत्तिदर्शनात् प्रवर्त्तकज्ञानमनुमाय तस्य च प्रवर्त्तकज्ञानत्वादेवात्मीयप्रवर्त्तकज्ञानवत्कार्यविषयकतामध्यवस्यानन्तरं शब्दान्वव्यतिरेकानुविधा-

---

न केवलं सिद्धार्थव्युत्पत्तौ युक्तिरेवापितु प्रमाणमपीत्याह—विवादेति श्लोकेन। विवादाध्यासितः—स च कार्यान्विते सिद्धसाधनतावारणायेति भावः। व्यतिरेकासिद्धिं स्फोरयति—यत्कार्यमिति। यत्र कार्यत्वं नास्ति तत्र शब्दशक्तिविषयत्वमपि नास्ति। यथोभयसम्मतमिति व्यतिरेकव्याप्तेः प्राभाकरं प्रति दर्शयितुमशक्यत्वेन नोक्तानुमाने कार्यत्वमुपाधिः सम्भवतीति भावः। व्यभिचारमुद्भावयति—नन्वाकृतेरिति। व्यक्तौ शब्दशक्तिविषयत्वं साध्यं नास्ति तत्र मेयत्वादिहेतुरस्त्येवेति व्यभिचारमाह—तत्रेति। व्यभिचारं वारयति—मैवमिति। व्यक्तेरपि शक्तिविषयत्वं ममाभिमतं सूत्रकृद्भिः समर्थितमाकाशादिपदानां व्यक्तिवाचकत्वं मीमांसकैरप्यभिमतं व्यक्तिशब्दस्य व्यक्तिवाचकत्वं सर्वैरभ्युपेयमिति। ननु सर्वव्यक्तिष्वनुगतस्य व्यक्तित्वोपाधेरेव व्यक्तिशब्दस्य वाच्यत्वं न व्यक्तेस्तस्या लक्ष्यत्वादिति चेन्न; क्वचिदप्यवाच्यस्य लक्ष्यत्वानुपपत्तेः, व्यक्तिः शब्दवाच्या न भवतीति स्ववचनव्याघाताच्च। सिद्धे ब्रह्मणि वेदान्तानां प्रामाण्यमिति प्रसङ्गमुपसंहरति—तस्मादिति।

कार्यस्य शक्तिविषयत्वमङ्गीकृत्यैतदुक्तं वस्तुतस्तन्नास्तीत्याह—कार्ये प्रामाण्यमिति। कार्ये शक्तिग्रहक्रमं प्राभाकरो दर्शयति—नन्विति। प्रवृतिदर्शनात्=स्वतन्त्रप्रवृत्तिदर्शनादित्यर्थः। अन्यथा प्रबलानिलजलौघेन नुद्यमानप्रवृतौ व्यभिचारः स्यादिति। तथाहि स्वाधीनाप्रवृत्तिर्बुद्धिपूर्विका, स्वतन्त्रप्रवृत्तित्वात्, मदीयप्रवृत्तिवत्, इति पूर्वं प्रवृत्तिदर्शनेन प्रवर्तकज्ञानमनुमीयते, ततः प्रवर्तकज्ञानत्वहेतुना स्वीयप्रवर्तकज्ञानं दृष्टान्तीकृत्य कार्यविषयकतामध्यवस्यति (यथा—मध्यमवृद्धप्रवृत्तिहेतुभूताबुद्धिः, कार्यविषया, प्रवृत्तिहेतुभूतबुद्धित्वात्, मदीयप्रवृत्तिहेतुभूतबुद्धिवत्)। तदनन्तरं मध्यमवृद्धनिष्ठज्ञानं, शब्दशक्तिकार्यग्रहपूर्वकं, गामानयेत्यन्वयव्यतिरेकाभ्यां शब्दानुविधायित्वात्,

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यितया तस्य शब्दजन्यत्वावगमेन तत्रैव शब्दशक्तेर्ग्रहणात् । न च स्वात्मनि 'प्रवर्त्तकबोध-स्येष्टसाधनविषयत्वात्परप्रवृत्तावपि तदेव प्रवर्तकतयानुमीयते न कार्यमितिवाच्यम्; अतीता-नागतविषयेष्विष्टसाधनज्ञानेषु प्रवर्तकत्वव्यभिचारात् । अथ कृतिसाध्येष्टसाधनत्वज्ञानं प्रवर्त्तकम्, तर्हि कार्यमेव नामान्तरेण प्रवर्तकं त्वयाप्यङ्गीकृतम्, तस्यैव कृतिसाध्यत्वात् 'कृतिसाध्यं प्रधानं यत्तत्कार्यमभिधीयते' इत्यभिधानात् । तथापि कृतिसाध्येष्टसाधनज्ञान-मेव प्रवर्तकं न केवलं कार्यज्ञानमिति चेत्, मैवम्; इष्टसाधनतावबोधस्य कार्याबोधं प्रति हेतुतयाऽन्यथासिद्धेः ।

उक्तं हि—'किन्तु स्वयं क्लेशरूपं कर्म यत्कार्यतां व्रजेत् ।
फलसाधनता तत्र कारणं तेन कार्यता ॥' इति । (प्र० पं० पृ० १७८)

ननु चिकीर्षैवैषा ममेदं कार्यमिति; न तु तदतिरिक्तं कार्यं नामात्र किञ्चित्प्रतीयत इतिचेत्, मैवम्; अन्तरेणापि कार्यधियं समीहितसाधनतामात्रावबोधात्सुधामरीचिमण्ड-लोदयादौ चिकीर्षाया अप्यनुपपत्तेः । न चास्याः कार्यधियः कृतियोग्यतामात्रमालम्बनम्; कृतियोग्ययोरपि दुःखतत्साधनयोरतददर्शनात् । नापि समीहितसाधनम्; अतीतवर्तमानयोः समीहितसाधनयोस्तदभावात् । नापि फलमेव; तत्साधनेऽपि दर्शनात् । नापि फलतत्साध-नयोरनुस्यूतमभिलाषगोचरतामात्रमस्या आलम्बनम्; अभिलाषमात्रगोचरेऽपि सुधामरी-

मदीयशब्दशक्तिकार्यज्ञानवदिति कार्ये शक्तिग्रहः सम्भवत्येव । अथात्मनि प्रवृत्तिमिष्टसाधनताज्ञाना-देव दृष्ट्वा परत्रापि तदेवानुमेयमिति विरुद्धो हेतुर्दृष्टान्ते साध्यवैकल्यं चेति शङ्कां पूर्ववादी परि-हरति—अतीतेत्यादि । तदेवं=इष्टसाधनताज्ञानमेवेत्यर्थः । नष्टराज्यादिषु ज्योतिषाचार्येणोक्ते-भाविधनादिषु च सत्त्वेऽपीष्टसाधनताज्ञाने प्रवर्त्तकत्वाभावेन व्यभिचारात् । कृतिसाध्येष्टसाधनता-ज्ञानस्य प्रवर्त्तकत्वे स्वीकारे नामान्तरेण कार्यमेव प्रवर्त्तकं त्वयापि स्वीकृतं, कार्यस्यैव कृतिसाध्यत्वात् "कृतिसाध्यं प्रधानं यत्तत्कार्यमभिधीयते" इति शालिकनाथेनाभिधानादित्याह—अथेत्यादिना । केवलं कार्यज्ञानस्य प्रवर्त्तकत्वमाक्षिपति—तथापीति । आक्षेपं प्रतिक्षिपति—मैवमित्यादिना । यत्कार्य-ज्ञानं प्रतिकारणमिष्टसाधनताज्ञानमिति कुलालपितृवत्प्रवृत्तिं प्रति तदन्यथासिद्धमिति । अत्रार्थे शालिकनाथवचनं प्रमाणमाह—उक्तं हीति । स्वयं क्लेशरूपस्यापि कर्मणः कर्तव्यतां प्रतीष्टसाधन-तैव कारणमित्यर्थः ।

कार्यसिद्धौ प्रमाणमाक्षिपति—नन्विति । ममेदं कार्यमित्याकारः चिकीर्षारूपसंकल्पस्यैवार्थो नान्यस्येतिभावः । कर्तव्यज्ञानं विनापि समीहितसाधनतामात्रज्ञानाच्चन्द्रमण्डलोदये चिकीर्षा नोपपद्यते इत्याह—मैवमित्यादिना । न चास्याः कर्तव्यबुद्धेः 'ममेदं कर्तव्यमि'त्याकारिकायाः कृति-योग्यतामात्रमालम्बनमिति वाच्यम्; कृतियोग्ययोरपि दुःखतत्साधनयोः कर्तव्यबुद्धेरदशनात् । इष्ट-साधनतामात्रं कर्तव्यबुद्धिविषय इत्यपि प्रतिषेधति – नापीत्यादिना । फलतत्साधनयोरनुगतमभिलाष-गोचरतामात्रं कार्यबुद्धेर्विषय इत्यपि दूषयति—नापि फलेति । परिशेषादेभ्योऽतिरिक्ताकार

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

चिमण्डलादौ तदभावस्य दर्शितत्वात्। तस्मादेभ्योऽतिरिक्त एव कश्चिदाकारः कार्यधीगम्यः, स एव चाकारः कृतिसाध्यः कृत्युद्देश्यः कार्यमित्युच्यते। स एव प्रवर्तकतया स्वात्मन्यधिगतत्वाच्छब्दशक्तेर्गोचरः।

तथापि कथमलौकिकनियोगे वैदिकलिङ्गादिशब्दानां व्युत्पत्तिरितिचेत्; उच्यते—यद्यपि लोकव्युत्पत्त्यनुसारेण क्रियायाः कार्यत्वं प्राप्तम्, तथापि वेदे स्वर्गकामो यजेतेति नियोज्याभिधायिना स्वर्गकामपदेन समभिव्याहारात् 'नियोज्यः सच कार्यं यः स्वकीयत्वेन बुध्यते' इतिन्यायात्। तस्य च कमिसम्बन्धात्साध्यस्वर्गविशिष्टस्य क्षणप्रध्वंसिन्यां क्रियायां कालान्तरभाविस्वर्गसाधनयोग्यतावैधुर्येण कार्यताबुद्ध्यनुत्पत्तेः क्रियातोऽतिरिक्तं कालान्तरभाविफलसाधनं नियोगमेव नियोज्यं प्रति लिङ्गादयः कार्यमवगमयन्ति। तच्च स्वात्मनि पुरुषं नियुञ्जानं नियोग इति, मानान्तरापूर्वतया 'अपूर्वमि'ति च व्यपदिश्यते। न च फलजनकतया फलं प्रति शेषत्वाद् अपूर्वस्य प्राधान्यप्रच्युतिः; स्वसिद्ध्यनुकूलनियोज्यलाभायैव फलशेषतावलम्बनात्। स्वशेषभूतगर्भदासोपकाराय संविदधानस्य स्वामिन इव प्राधान्यानुपरोधात्। तदुक्तम्—

'स्वात्मसिद्ध्यनुकूलस्य नियोज्यस्य प्रसिद्धये।
कुर्वत्स्वर्गादिकमपि प्रधानं कार्यमेव न'॥ इति॥

तदेवमलौकिकत्वेऽपि नियोगस्य यूपाहवनीयादिवत्पदान्तरसमभिव्याहाराल्लिङ्गादीनां

कार्यबुद्धिगम्य इत्युपसंहरति—तस्मादिति। स्वात्मनि—बालस्येत्याध्याहार्यः।

अस्तु तावत्कार्यमात्रस्य शब्दार्थत्वं, तथाप्यलौकिकत्वेन तत्र लिङ्गादीनामगृहीतशक्तिकत्वान्नियोगस्य शब्दार्थत्वं न युक्तमित्याशङ्कते—तथापीति। विमर्शरूपतर्केण सम्भाविते ऽलौकिके नियोगे शक्तिग्रहमुपपादयति—यद्यपीति। क्रियायाः=धात्वर्थस्य। स्वर्गकामो यजेतेति वाक्यं नियोगबोधनपरं न तु फलबोधनपरमिति गुरुमतम्। तथाच शालिकनाथेनोक्तम्—नियोज्यः सचेति। अन्यथाबोधकस्य-कर्तृत्वानुपपत्तेरिति भावः। नियोगसिद्धिप्रकारं बोधयति—तस्येति। साध्यस्वर्गविशिष्टस्य, तस्य=नियोज्यस्य, स्वर्गकामस्येत्यर्थः। कार्यस्यापरं नाम सहेतुकं निर्दिशति—तच्च स्वात्मनीति। अपूर्वस्य फलजनकतया फलं प्रति शेषत्वादपि प्राधान्याप्रच्युतिं दर्शयति—नच फलेति। यथा स्वशेषभूतगर्भदासानां भृत्यानां योगक्षेमं च कुर्वतः प्राधान्यं नोपरुध्यते, तथैवापूर्वस्यापि स्वसिद्ध्यनुकूलनियोज्यलाभाय फलशेषतावलम्बनान्न प्राधान्यमुपरुध्येत इति भावः। अत्र शालिकनाथसम्मतिमप्याह—स्वात्मसिद्धयेति। स्वमपूर्वं, नः=अस्माकम्, अपि-भिन्नक्रमः। तथा चापूर्वं स्वात्मसिद्ध्यनुकूलस्य नियोज्यस्य प्रसिद्धये स्वर्गादिफलं कुर्वदपि प्रधानमेवेति श्लोकयोजना। अत्रानुकूल्यमर्थापत्त्या बोध्यम्, तथाहि:—नियोगः स्वसिद्धयेऽनुष्ठानमपेक्षते, अनुष्ठानं स्वसिद्धये कर्त्तारमपेक्षते, कर्त्ताऽधिकारिणमपेक्षतेऽधिकारी नियोज्यमपेक्षते स्वस्वसिद्धये इति भावः। प्रसङ्गमुपसंहरन्नियोगसिद्धये वेदस्य प्रामाण्यमाह—तदेवमिति। तत्र दृष्टान्तमाह—यूपेत्यादि। तत्र = अपूर्व-नियोग इत्यर्थः। आहवनीया-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तत्र सम्बन्धग्रहणोपपत्तेरुपपन्नं तत्राम्नायस्य प्रामाण्यम्। प्रयोगश्च विवादाध्यासि लिङ्गादयः, एतत्क्रियातिरिक्तकार्याभिधायिनः, कार्याभिधायित्वाद्, गामानयेत्यादिपद दिति। विपक्षे यागातिरिक्तकार्यानभ्युपगमात् यागस्य च स्वर्गसाधनत्वानुपपत्तेः स्व कामो यजेतेत्यादिवाक्यानामप्रामाण्यप्रसङ्गो बाधक इति।

अत्रोच्यते—भवेदिष्टमनोरथो यदि स्वात्मन्यपि कार्यबोधस्य प्रवर्त्तकत्वमध्यव येत, समीहितसाधनताया एव तु स्वात्मनि प्रवर्त्तकत्वाध्यवसायात्। न च भूता व्यभिचारः; यतः—

कार्यस्यावगतेर्हेतुर्यादृशं हितसाधनम्।
प्रवृत्तेस्तादृशं हेतुर्व्यभिचारस्ततः कुतः ॥१७॥

येनापि हि कार्यावबोधस्यैव प्रवर्तकत्वमभ्युपेयते एव तेनापीष्टसाधनतावबोध कार्यावबोधं प्रति हेतुता, तदभावे कार्यबोधानुपपत्तेः। तत्रापीष्टसाधनतामात्र भूतादौ व्यभिचारात्कृतियोग्येष्टसाधनताज्ञानमेव कार्यताज्ञानहेतुरित्यभ्युपेयम्, त च तादृगिष्टसाधनताबोधस्यैव प्रवृत्तिहेतुत्वोपपत्तौ किमन्तर्गडुना कार्यावबोधे न चेदृगिष्टसाधनताज्ञानमेव कार्यताज्ञानम्; तस्य तज्ज्ञानं प्रति हेतुत्वाभ्युपगमात्। च ममेदं कार्यमिति चिकीर्षामपहाय कार्यज्ञानं नाम किञ्चिदुपलभामहे। न च चिकीर्षे कार्यधियमन्तरेणानुत्पद्यमाना तां कल्पयतीति युक्तम्; कृतियोग्येष्टसाधनतावबोधा चिकीर्षाया अप्युपपत्तेः।

न च कृतिसाध्यं प्रधानमिति कार्यलक्षणं युक्तम्, फलेऽतिव्याप्तेः। अथ साक्षात्कृ साध्यत्वं विवक्षितं न च तत्फलेऽस्तीति मतम्; मैवम्। नियोगे तदभावेनाव्याप्तेः, भाव

यादीत्यत्रादिपदेन यववराहादिग्राह्यम्। विवादेति। धात्वर्थे सिद्धसाधनतावारणाय क्रियातिरिक्ते ग्रहणं, तथात्वोक्तौ साध्याप्रसिद्धिस्तद्वारणायैतत्पदम्। दृष्टान्ते क्रियान्तरमादाय साध्यप्रसि पक्षेऽगत्या तथाविधसाध्यपदेन नियोग एव ग्राह्यः। विपक्षे बाधकमाह—विपक्ष इत्यादिना।

सिद्धान्ती कार्ये व्युत्पत्तिं दूषयितुं प्रतिजानीते—अत्रोच्यते। अध्यवसीयेत—बालेनेति शेष इष्टसाधनताज्ञानस्यातीतादौ व्यभिचारं पूर्वोक्तं श्लोकेन वारयति—कार्यस्येति। यादृशं = कृ योग्यताविशिष्टम्, हितसाधनं = इष्टसाधनत्वम्। तादृशमेव ज्ञानं प्रवृत्तेर्हेतुराश्रीयते ममापि, कु व्यभिचार इत्यर्थः। श्लोकं विशदयति—येनापीति। येन = कृतियोग्यताविशेषणेन। तादृशप्रवर्तकत्व श्रयणमनुकूलयति—न चेति। तत्रहेतुमाह—तस्येति। चिकीर्षाकार्ययोर्भेदानुपलब्धिमाह न च ममेति। चिकीर्षोत्पादकं कार्यज्ञानमित्यभिमतिं दूषयति—न च चिकीर्षेवेत्यादिना।

मास्तु कार्यस्य प्रवर्तकं प्रमाणं, लक्षणं तु पूर्वोक्तं स्यादेवेति संस्मार्य दूषयति—न च कृतीति कृतिसाध्ये फलेऽप्यतिव्याप्तेरित्यर्थः। अव्यवधानेन कृतिसाध्यत्वस्य विवक्षितत्वे नियोगेऽव्याप्तिमाह अथसाक्षादिति। अथ साध्यैकस्वभावार्हत्वं नाम साधनार्हत्वाधिकरणत्वं चेत्तर्हि उत्पत्तियो

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्यैव साक्षात्कृतिसाध्यत्वात् । अथ साध्यैकस्वभावत्वम्, न; प्रागभाववत्सु व्यभिचारात् । न च सदा साध्यैकस्वभावत्वम्, यागाद्यनुष्ठानोत्तरकालमपि तस्य साध्यैकस्वभावत्वे कदाचिदपि नियोगासिद्धौ स्वर्गासिद्धिप्रसङ्गात् । अस्तु वा यत्किञ्चिदविचारितरमणीयं लोके कार्यम्, तथापि कथं वैदिकलिङादिशब्दादलौकिकनियोगस्य प्रतिपत्तिः ? मानान्तरानधिगते तस्मिँल्लिङादेः सङ्गतिग्रहणायोगात् । अधिगमे वा "अतो मानान्तरापूर्वमपूर्वमिति गीयते", इति स्वकपोलकल्पितापूर्वत्वभङ्गप्रसङ्गः । न च कार्यमात्रेऽवसितसङ्गतिका लिङादयः शब्दाः नियोज्याभिधायिस्वर्गकामादिपदसमभिव्याहारसामर्थ्यात्क्रियातिरिक्तमेव कार्यमवगमयन्ति, आशुतरविनाशिन्याः क्रियायाः कालान्तरभाविस्वर्गादिसाधनतानुपपत्तेरिति युक्तं वक्तुम् । अनुपपत्तिवेद्यत्वे मानान्तरगोचरत्वप्रसङ्गात् ।

ननु नेयमर्थापत्तिः, तर्क एवायमुपन्यस्तः, तेन तर्काधिगते नियोगे सङ्गतिग्रहः सङ्गच्छते; तर्कस्यामानत्वात् । प्रमाणानुग्राहकस्तर्को नतु प्रमाणमिति हि परीक्षका इति चेत्, मैवम्; तर्कगोचरत्वेऽपि प्रमाणान्तरगोचरत्वस्यापरिहार्यत्वात् । तथाहि— प्रमाणान्तराधिगतव्याप्यव्यापकभावयोरेकाभ्युपगमेन द्वितीयस्य नियतप्रसञ्जनरूपस्तर्कः । यथा यद्ययं वह्निमान्नस्याद्धूमवानपि नस्यादिति । तथा च यद्ययं लिङादिः क्रियातिरिक्तकार्याभिधायी न भवेत्तदा न स्वर्गकामपदेन समभिव्याह्रियेत, समभिव्याह्रियते चायम्; तस्मात्क्रियातिरिक्तकार्याभिधायकः इति प्रसङ्गरूपेऽपि तर्के द्वयोरापाद्यापादकभावयोस्तदभावयोश्च धूमवत्त्ववह्निमत्त्वयोस्तदभावयोरिव मानान्तरगोचरता कथं न स्यात् ? न चापाद्यापादकभावोऽपि; क्रियातिरिक्तकार्यस्याप्रसिद्धत्वेन तदभावस्या-

---

प्रागभाववत्सु घटादिष्वतिव्याप्तिरित्याह—अथ साध्येति । न च सदा साध्यैकस्वभावत्वं कृतिसाध्यत्वं नियोगस्य लक्षणमभिप्रेतं घटादीनामुत्पत्तिकालावच्छेदेन साध्यैकस्वभावत्वे सत्यऽप्युत्पत्त्यनन्तरं सिद्धतया साध्यैकस्वभावत्वाभावान्न तत्र घटादिषु नियोगलक्षणस्यातिव्याप्तिरिति वाच्यम्; नियोगस्य तथात्वाभ्युपगमे नियोगस्वरूपस्य सदाऽसिद्धौ स्वर्गादिफलासिद्धिप्रसङ्गात् । अस्तु तावल्लोके किञ्चित्कार्यमापाततः, तथापि तद्विशेषेऽलौकिके नियोगे वैदिकलिङ्गादिशब्दाद्बोधः कथं स्यात् ? मानान्तरानधिगते नियोगे लिङ्गादेः शक्तिग्रहस्यायुक्तत्वात् । अधिगते वा नियोगेऽपूर्वत्वभङ्गप्रसङ्गादित्याह—अस्तु वेत्यादिना । न च कार्यताकारेण लोकप्रसिद्धस्यैव नियोगस्य वाक्यविशेषविमर्शाद्विशेषमात्रनिर्णयो भवतीति वाच्यम्; अनुपपत्तिर्नामार्थापत्तिः, तद्वेद्यत्वस्वीकारे नियोगस्य मानान्तराधिगततयाऽपूर्वत्वभङ्गप्रसङ्गस्य तादवस्थ्यादित्याशङ्क्याह—न च कार्येति । अथोक्तानुपपत्तिर्नार्थापत्तिः किन्तु तर्करूपा सा, तर्कस्य स्वरूपेणामानत्वेऽपि प्रमाणानुग्राहकस्वाभ्युपगमान्नोक्तदोषः इति पूर्वपक्षमुद्भाव्य निराचष्टे—ननु नेत्यादिना तदभावस्याप्रसिद्धत्वादित्यन्त्येन । तर्कगोचरत्वस्य प्रमाणगोचरत्वमवश्यम्भावीति तर्कस्वरूपं विशदयति—तथाहीति । आपाद्यापादकभावमभ्युपगम्य मानान्तरविषयत्वप्रसक्तिरुक्ता, वस्तुतस्तु तयोरापाद्यापादकभाव एव नास्त्यप्रसिद्धविशेषणत्वादित्याह—न चापाद्येति । क्रियातिरिक्तकार्यावाचकत्वमापाद्यं स्वर्गकामपदासमभिहारश्चापाद्यः, अतिरिक्तकार्यस्याप्रसद्धित्वमाह—क्रियेति । तर्कस्याप्रमाणभूतत्वेन स्मृतावन्तर्भावेऽपि नियोगेऽप्रमाण-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रसिद्धत्वात् । अप्रमाणभूतश्च तर्कः । स्मृत्यनुभवभेदेन ज्ञानद्वैराश्यवादिना स्मृतावन्त-र्भवतीति वाच्यम् । न चात्राननुभूते नियोगे स्मृतिः सम्भवति, संस्कारजन्यायाः स्मृते-स्तदभावेऽभावात् । ननु पूर्वानुभवजन्यसंस्कारमात्रजन्यं ज्ञानं स्मृतिरिति न ब्रूमः, किन्तु सापेक्षं ज्ञानम् । अस्ति चात्र प्रमाणनुग्राहकतया तर्कस्य तदपेक्षा, ततो नोक्तदोषः इति चेत्, मैवम्; विकल्पासहत्वात् । तथाहि—किमुत्पत्तौ सापेक्षत्वम् ? उत विषया-वबोधे ? नाद्यः; प्रमाणज्ञानानामपीन्द्रियलिङ्गादिसापेक्षतया स्मृतित्वप्रसङ्गात् । न द्वितीयः; विषयावबोधेऽपि सापेक्षत्वे स्मृतेः प्रदीपवज्ज्ञानत्वाभावप्रसङ्गात्, अपसिद्धान्ता-पत्तिश्च ।

"प्रमाणमनुभूतिः सा स्मृतेरन्या स्मृतिः पुनः ।
पूर्वविज्ञानसंस्कारमात्रजं ज्ञानमुच्यते ।।" (प्र० पं० अमृ० १)

इति शालिकनाथवचनविरोधात् ।

न चार्थापत्तिगम्यत्वमपि; कृतेर्भावार्थजननद्वाराऽपूर्वसाधनत्ववत्क्रियाया एवापूर्वा-वान्तरव्यापारायाः स्वर्गसाधनत्वोपपत्तेः । अपि च 'यो ब्राह्मणायावगुरेत्तं शतेन यातया-दित्यत्रावगूरणकर्मणः क्षणिकस्यापि दुरितापूर्वजननद्वारा कालान्तदभाविशतयातनाफल-साधनत्ववत्क्षणिकाया अपि यागक्रियाया अपूर्वजननद्वारा स्वर्गसाधनता किं न स्यात् ? नन्ववगूरणे दुरितापूर्वकल्पना कामाधिकारे क्रियातिरिक्तनियोगसिद्ध्युत्तरकालीना । तथाहि—तत्राशुतरविनाशिन्याः क्रियायाः कालान्तरभाविफलसाधनत्वासामर्थ्यात्तदति-रिक्तापूर्वस्य फलसाधनत्वे स्थिते पश्चादवगूरणेऽपि कालान्तरभाविशतयातनाफलमपि दुरितापूर्वद्वारैवेति कल्प्यते, तथा सति कथं नियोगासिद्धिः ? तत्सिद्ध्युत्तरकालीनत्वा-

---

त्वमाह—अप्रमाणभूतश्चेत्यादिना । तर्कं स्मृतावन्तर्भावयितुं स्मृतेर्लक्षणान्तरं सम्भाव्य दूषयति—ननु पूर्वेति । स्मृतिवत्तर्केऽपि प्रमाणापेक्षाऽस्तीति स्मृतौ तर्कमन्तर्भाव्य दोषाभावमुद्भाव्य विकल्पा-सहत्वेन दोषमापादयति—मैवमित्यादिना । तथात्वे शालिकनाथवचनविरोधं दर्शयति—प्रमाणमिति ।

अनुपपत्तिं स्वीकृत्यापूर्वस्य निरस्याधुनाऽनुपपत्तिमपि वारयति—न चार्थेति । यथा त्वन्मते क्षणिकापि कृतिभावार्थोत्पत्तिद्वाराऽपूर्वं साधयति, तथा यागादिक्रियैवापूर्वान्तरव्यापारद्वारा स्वर्गं साधयिष्यतीत्यत्र कानुपपत्तिरिति भावः । प्रतिबन्द्यापि पूर्वपक्षं दूषयति—अपि च य इति । अवगुरेत=शस्त्रमुद्यच्छेत् । तमुद्यतायुधं पुरुषं, शतेन—इत्थं भावेतृतीया । शतगुणयातनां तदेवावगूरण-मनुभावयेदित्यर्थः । तत्र क्षणिकमवगूरणं (ताडवं) दुरितापूर्वजननद्वारा शतयातनासाधनमिवयागादि-क्रियैवापूर्वजननद्वारा स्वर्गसाधनं किं न स्यादिति भावः । अत्रापि नयविवेककारोक्तामनुपपत्तिमुद्भाव्य परिहरति—नन्ववेति । अवगूरणे धात्वर्थातिरिक्तनियोगसिद्ध्युत्तरकालीनतां दुरितापूर्वकल्पनायां दर्शयति—तथाहीत्यादिना । कृतिः साक्षाद्रूपेण धात्वर्थमेव गोचरयति नियोगस्य भावार्थभिन्नत्वात् साक्षात्कृतिविषयत्वं न सम्भवति, धात्वर्थं साधयन्तो कृतिर्यथा नियोगं साधयतीति कल्प्यते, तथा नियोगमन्तरेणापि यागादिक्रियायामेव स्वजन्यापूर्वरूपावान्तरव्यापारद्वाराफलसाधनत्वं कल्पयि-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दुस्तरकल्पनाया इति चेत्, मैवम्; कृतिसाध्ये नियोगे प्रतीते कृतेर्भावार्थैकविषयत्वात्, नियोगस्य चाभावार्थरूपत्वात्साक्षात्कृतिसाध्यत्वासम्भवात्, भावार्थं साधयन्ती कृतिर्नियोगं साधयतीति यथा कल्प्यते। अत एव चाघटितसंघटकतया भावार्थोऽपि विषयः करणं च नियोगं प्रतीति गीयते। यथाहुः—

"कृतितत्साध्यमध्यस्थो यागादिर्विषयोमतः।
कार्येऽसंघटिताकारे करणत्वेन सम्मतः॥" इति॥

तथा लोकावगतसामर्थ्यैर्लिङादिशब्दैरविगतफलसाधनभावाया: क्रियाया नियोगमन्तरेणापि स्वजन्यापूर्वावान्तरव्यापारद्वारा फलसाधनत्वसम्भवे तद्दृष्टान्तावष्टम्भत एवावगूरणेऽपि दुरितापूर्वकल्पनायां सम्भाविन्यामलोकवेदसिद्धनियोगकल्पनानुपपत्तेः। इतरथा क्लृप्त-क्रियाकार्यवाचकत्वभङ्गोऽपरिक्लृप्तनियोगवाचकत्वकल्पना, अपूर्वस्य फलसाधनत्वकल्पना, यागस्य च फलनियोगयोः करणत्वकल्पना चेति गौरवं प्रसज्येत।

किं च यथा तवाग्नेयादीनामुत्पत्त्यपूर्वावान्तरव्यापाराणां परमापूर्वसाधनभावस्तथास्मन्मतेऽप्यपूर्वावान्तरव्यापाराया एव क्रियाया ईश्वरप्रसादावान्तरव्यापाराया वा फलसाधनतोपपत्तेर्न नियोगकल्पनावकाशः। न चोत्पत्त्यपूर्वाणामेव परमापूर्वसाधनत्वमाग्नेयादीनां तु तत्साधनतैवेति युक्तं वक्तुम्; प्रमाणाभावात्। तथाहि—किं 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यधिकारवाक्येनैषां परमापूर्वसाधनत्वमवगतम्? उत

शक्यं, तद्दृष्टान्तबलेनावगूरणेऽपि दुरितापूर्वकल्पनासम्भवे लोकवेदाप्रसिद्धनियोगकल्पनानुपपत्तेः। एतदेव भवनाथवचनेन द्रढयति—कृतितत्साध्येति। अन्यथाऽलौकिकानेककल्पनाप्रसङ्गरूपगौरवमाह—इतरथेति।

वेदान्ती प्रतिबन्द्या क्रियायामेव फलसाधनतामुपपादयति—किञ्च यथेति। इदमत्राकूतम्—विचित्रेयमपूर्वकथा, क्रियाः सर्वत्र क्षणिकाः भवन्तिः ताश्च सर्वा अपूर्वजननद्वारैव फलं जनयन्तीति। तथाहि पञ्चप्रयाजानुष्ठानेनाङ्गापूर्वं जायते, तेनोपोद्बलितं दर्शपौर्णमासान्तर्भूतानां षण्णां यागानां प्रत्येकं यागोऽनुष्ठानमुत्पत्त्यपूर्वं जनयति। तत्रापि दर्शान्तर्भूतेषु त्रिषु तथा पौर्णमास्यन्तर्भूतेषु त्रिषु यागेषु च मध्ये आग्नेयोऽष्टाकपालः, ऐन्द्रं दधि, ऐन्द्रं पयः इति यागत्रयं दर्शनाम्ना प्रसिद्धं तथैव पौर्णमास्यामनुष्ठेयं यागत्रयमाग्नेयोऽष्टाकपालो यागः, आज्यहविष्कश्चोपांशुयागः, अग्नीषोमीयैकादशकपालयागश्चेति। तत्रैकत्रिकस्य दर्शसंज्ञा, अपरत्रिकस्य पौर्णमाससंज्ञा भवति। तत्राप्येकैकत्रिकेणोत्पद्यमानां त्रयाणामपूर्वाणां समुदायापूर्वसंज्ञा भवति। द्वाभ्यां समुदायाभ्यां फलजनकं परमापूर्वमुत्पद्यते। इदमेव परमापूर्वं कालान्तरभाविस्वर्गादिफलं जनयति। तत्र यथा गुरुमते आग्नेयादीनामुत्पत्त्यपूर्वावान्तरव्यापाराणां स्वर्गादिफलजनकपरमापूर्वसाधनताभ्युपेयते, तथैवास्मन्मतेऽप्यपूर्वावान्तरविशिष्टायां यागादिक्रियायामेवेश्वरानुग्रहावान्तरव्यापारविशिष्टायां वा स्वर्गादिफलसाधनतोपपत्तेः कुतो नियोगकल्पनावकाश इत्यर्थः। प्रमाणाभावादुत्पत्त्यपूर्वाणामेव परमापूर्वसाधनत्वाग्नेयादियागानामुत्पत्त्यपूर्वसाधनत्वमिति कल्पयितुं न शक्यमिति स्पष्टयति—तथाहीत्यादिना। फलसम्बन्धबोधको विधिरधिकारविधिः, यथा "दर्शपूर्णमासाभ्यां स्वर्गकामो

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'आग्नेयोऽष्टाकपालः' इत्याद्युत्पत्तिवाक्यैः ? नाद्यः; दर्शपूर्णमासाभ्यामित्यस्य कर्मसमुदायवाचकत्वात्, यजेतेति च परमापूर्वाभिधानात् । नापि द्वितीयः; दर्शपूर्णमासाभ्यामित्यधिकारवाक्यसंनिधिसमाम्नातानामुत्पत्तिवाक्यानामधिकारापूर्वानुवादशङ्काकुण्ठितशक्तीनां द्रागित्येवापूर्वान्तरप्रत्ययजनकतानाश्रयणात् । अन्यथाधिकारवाक्यसंनिधिपरिपठितसमिदादिवाक्यस्थलिङ्गादिशब्दानामपि स्वतन्त्रकार्याभिधायकत्वे ग्राहकग्रहणभङ्गप्रसङ्गः। प्रयोजनप्रयोजनिभावेनान्विताभिधानं ग्राहकग्रहणमित्यभ्युपगमात्, स्वतन्त्राणां च प्रयोजनप्रयोजनिभावासम्भवात् । आग्नेयादीनामेव त्वधिकारापूर्वं प्रत्यवगतकरणविषयभावनां क्षणिकत्वेन तदनुपपत्तौ तत्सिद्ध्यर्थमेवावान्तरव्यापारतयोत्पत्त्यपूर्वाङ्गीकरणात्।

कश्चायं नियोज्यो नाम यदन्वयात्क्रियातिरिक्तनियोगसिद्धिः ? स किं कार्यं प्रति गुणभूतः ? प्रधानभूतो वा ? नाद्यः; गुणत्वे कर्तृत्वान्वयान्तर्भावात् । न द्वितीयः; प्राधानेऽधिकार्यन्वयापातात्, गुणप्रधानभावातिरिक्तप्रकारान्तरासंभवाच्च । कार्यमात्मीयत्वेन योऽवबुध्यते स नियोज्य इति चेत्; तथाभूतावबोधस्यापि गुणप्रधानभावान्तर्भावेणोक्तदूषणापत्तेः । क्रियाकार्यं प्रति गुणभूतत्वं कर्तृत्वं क्रियातिरिक्तं प्रति गुणभूतत्व-

---

यजेत" । तत्र दर्शपूर्णमासाभ्यामिति पदेन कर्मसमुदायावबोधो जायते, यजेतेति पदेन परमापूर्वावबोधो भवतीति नात्र किञ्चित्पदमुत्पत्त्यपूर्वबोधकमस्ति । 'आग्नेयोऽष्टाकपालो भवती'त्यादिवाक्यं केवलं कर्मस्वरूपमात्रावबोधकं नतूत्पत्त्यपूर्वबोधकं न तत्रापूर्वान्तरप्रत्ययजनकता कल्पयितुं शक्या तेषामधिकारवाक्यसन्निहितपठितत्वेनाधिकारापूर्वानुवादकतया शक्तिहतानां झटित्यपूर्वान्तरप्रत्ययजननसामर्थ्यानाश्रयणादिति भावः । गुरुमतेऽनिष्टप्रसक्तिमप्याह—अन्यथेति । ग्राहकग्रहणभङ्गप्रसङ्गः= अन्विताभिधानभङ्गप्रसङ्गः स्यात् । परमापूर्वेण ग्राहकग्रहणस्वरूपं दर्शयति—प्रयोजनेति । प्रयोजनं प्रधानं नियोगः, प्रयोजनिनस्तत्प्रकरणाम्नातसकलपदार्थास्तदन्वितत्वेन प्रधाननियोगस्याभिधानं ग्राहकग्रहणमित्युच्यते । इदमत्राकूतं प्राभाकरमते—वैदिकलिङ्गादिप्रत्ययैः प्रतीयमानो नियोगः स्वाङ्गभूतैः प्रकरणाम्नातपदार्थैर्विशेषितः सन्नभिधीयते । अतो नियोगग्राहकशब्देनैवाङ्गपदार्थानामपि ग्रहणं भवतीत्यतो नियोगग्राहकेणैवाङ्गानां ग्रहणं भवति । अथवाऽङ्गान्वितस्य प्रधाननियोगस्याभिधानमित्यर्थः । सर्वेषामपूर्वाणां स्वातन्त्र्याभ्युपगतत्वेन मिथो ग्राहकग्रहणभावासम्भवित्वमाह—स्वतन्त्राणां चेति । आग्नेयादीनां क्षणिकानामपि परमापूर्वनिर्वर्तकत्वमाह—आग्नेयादीनामेव त्विति । तदनुपपत्तौ= विषयकरणभावानुपपत्तौ । तत्सिद्ध्यर्थमेव = आग्नेयादिषु परमापूर्वं प्रति विषयकरणभावसिद्ध्यर्थमेव। निरन्वयविनाशः कस्यापि न सम्भवतीति भावः ।

नियोगस्य शब्दाप्रतिपाद्यत्वमुपपाद्य नियोगव्यावर्तकं नियोज्यं दूषयति—कश्चायमिति । नियोज्यस्य क्रियां प्रति गुणत्वस्वीकारे तस्य चेतनतया कर्तृत्वेन लोके क्रियामात्रेऽन्वयदर्शनात् क्रियातिरिक्तकार्यसिद्धिः सम्भवति । नियोज्यस्य क्रियां प्रति प्राधान्याभ्युपगमेऽधिकारिण्यन्तर्भावात् ततोऽपि क्रियातिरिक्तकार्यसिद्धिरित्यर्थः । नियोगनियोज्ययोः प्रकारान्तरासम्भवमाह—गुणप्रधानेति । तयोः स्वतन्त्रयोरन्वयाभावादित्यर्थः । कथञ्चित्प्रकारान्तराभ्युपगमे पूर्वोक्तदोषस्तदवस्थ एवेत्याह—कार्यमित्यादिनेति । निगूढाभिसन्धिमुद्घाट्य दूषयति—क्रियाकार्यमित्यादिनेति । नियोज्यनियोज्योर्निरूपणस्यान्योऽन्याश्रितत्वेन दुष्टत्वात् ।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मेव नियोज्यत्वमिति विषयभेदाद्भेद इति चेत्; मैवम् । क्रियातिरिक्तकार्यसिद्धौ, नियोज्यान्वयसिद्धिः; नियोज्यान्वयसिद्ध्यधीना च क्रियातिरिक्तकार्यसिद्धिरिति परस्पराश्रयप्रसङ्गात् ।

न च नियोगस्य कृत्युद्देश्यत्वम्; अपुरुषार्थत्वात् । सुखदुःखप्राप्तिपरिहारौ तदुभयसाधनं वा पुरुषार्थः । न चैषामन्यतमो नियोगः, येन पुरुषार्थतया कृत्युद्देश्यः स्यात् । नच स्वर्गादिसाधनतया पुरुषार्थत्वम्; नित्यनैमित्तिकनियोगयोस्तदभावेन कृत्युद्देश्यतावैधुर्यापातात् । नियोगसिद्धेरेव च पुरुषार्थत्वे नियोगस्य स्वर्गसाधनताभ्युपगमानर्थक्यप्रसङ्गात् । ननु कामाधिकारे फलकामिनो नियोज्यत्वात्फलं प्रति करणीभूतस्यैव यागस्य नियोगं प्रति विषयत्वात् तत्साध्यस्य नियोगस्य फलान्तरसाधनता । नित्ये तु न फलकामिनोऽधिकारः, नापि फलं प्रति करणीभूतस्यैव यागस्य नियोगं प्रति विषयत्वम्; किंतु नियोगं प्रत्येव विषयत्वं करणत्वं च, अन्यथा नित्यकाम्यवैषम्यानुपपत्तेः । तस्मान्नित्येषु नियोगसिद्धिरेव पुरुषार्थं इति चेत् मैवम्; नित्यकाम्यवैषम्यस्यान्यथाप्युपपन्नत्वात् । तथाहि द्वयोः फलवत्त्वाविशेषेऽपि यत्र कामना निमित्ततया श्रूयते कल्प्यते वा तत्काम्यम्, यत्र पुनर्नैवं, यदकरणे च प्रत्यवायस्तदितरदिति वैषम्यात् । नित्यनैमित्तिकयोश्च फलशून्यत्वे हि तत्साधनताबुद्ध्या प्रवृत्तिरेव पुंसा न स्यात् । ननु नियोगसिद्धेः परमपुरुषार्थत्वात्तत्साधने यागादौ हितसाधनबुद्ध्यैव प्रवृत्तिः, "नियोगार्थसिद्धेः किमन्यत्प्रयोजनं सर्वविधीनाम्" इति गुरुणैवोदीरितत्वादिति चेत्, मैवम्; तथा सति तवापि नित्यकाम्यवैषम्यभङ्गप्रसङ्गात् । तथाहि—फलं प्रति करणीभूते यागादौ रागत एव प्रवृत्तिरितिकर्तव्येषु तु वैधी कामाधिकारे, नित्येषु तु करणेतिकर्तव्यतयोर्विधित एव प्रवृत्तिरिति वैषम्यं तवाभिमतम्, तच्चेदं भज्येत; नियोगस्य फलरूपत्वेन तत्करणे यागादावपि रागत एव प्रवृत्त्युपपत्तेः ।

सुखावाप्तिदुःखपरिहारयोस्तदुभयसाधनयोर्वा पुरुषार्थत्वान्न कृत्युद्देश्यत्वमपि नियोगस्य लक्षणं गुरुमतानुसारिभिर्वक्तुं शक्यम् । न च स्वर्गादिफलसाधनत्वेन नियोगस्य पुरुषार्थत्वमिति वाच्याम्; नित्यनैमित्तिकनियोगस्य कृत्युद्देश्यत्वलक्षणस्याव्याप्तेः । नियोगस्य पुरुषार्थत्वाभ्युपगमे तत्र फलसाधनत्वानर्थक्यप्रसङ्गः । नित्यकाम्ययोर्वैषम्यान्यथानुपपत्तिमाशङ्क्य दूषयति—नन्वित्यादिना । तद्वैषम्यमन्यथोपपादयति—तथाहीति । विश्वजिदादिसंग्रहार्थमाह—कल्प्यते वेति । नित्यनैमितिकयोः फलशून्यत्वे पुरुषस्य तदनुष्ठाने प्रवृत्त्यभावमाह—नित्येति । नित्यकाम्ययोः पुनरपि वैषम्यमुद्भावयति—तथाहि द्वयोरिति । नियोगो हितं तत्साधनं च यागादिः; तस्माद्धितसाधने यागादौ प्रवृत्तिः सम्भतीत्याशङ्कते—ननु नियोगसिद्धेरिति । तत्र गुरुवाक्यमपि सम्मतमिति । वैषम्यं निराचष्टे—मैवमिति । तदेवोपपादयति—तथाहि फलं प्रतीत्यादिनेति । नित्यकाम्ययोस्तवाभिमतं वैषम्यं भज्येत । नियोगस्य फलरूपत्वाभ्युपगमे नियोगकरणे यागादावपि रागत एव प्रवृत्त्युपपत्तेः ।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

किंचेदं यागस्य फलं प्रति करणत्वं श्रुतिलिङ्गादिगम्यम्? उत नियोगानुपपत्तिगम्यम्? नाद्यः श्रुत्यादेरदर्शनात्। 'स्वर्गकामो यजेते' त्यादौ फलं प्रति करणत्वस्य प्रकृतिप्रत्ययाभ्यामप्रतीतेः,यागेन फलशिरस्कस्य नियोगस्यैव साध्यत्वप्रतीतेरभ्युपगमात्। लिङ्गादिनां चानाशङ्कनीयत्वात्। नापि द्वितीयः; विकल्पासहत्वात्। किं नियोगः स्वसिद्धये यागस्य फलकरणत्वं कल्पयति? उत फलसिद्धये? स्वस्य फलकामिकृतिसाध्यत्वसिद्धये वा? न प्रथमः; स्वसाधनीभूतयागानुष्ठानादेव स्वस्य सिद्धेः। न द्वितीयः; स्वसिद्ध्यैव फलस्यापि सिद्ध्युपपत्तेः। न चरमः; यागस्य स्वर्गं प्रति साधनत्वाभाव इव करणत्वाभावेऽपि स्वर्गसाधनीभूतनियोगं प्रति करणत्वादेव स्वर्गकामिकृतिव्याप्यत्वोपपत्तेः। यागादेः फलं प्रत्यकरणत्वे तत्कामिनस्तत्र कथं प्रवृत्तिरितिचेत्; साधनत्वाभावेऽपि तत्र तस्य प्रवृत्तिरनुपपन्नेति तुल्यम्। किं च साधनत्वाभावे तद्विशेषरूपकरणत्वमपि न स्यात्, 'साधकतमं करण'मिति पाणिनिस्मरणात्।

अथ परोद्दिष्टकृतिव्याप्यत्वं तेन साधनत्वाभावेऽपि करणता किं न स्यादिति चेत्; तर्हि नियोगस्यापि परोद्दिष्टकृतिव्याप्यतया करणत्वप्रसङ्गः, तस्यापि स्वर्गादिफलोद्देशेन प्रवृत्तकृतिव्याप्यत्वात्। अथ साक्षादिति विशेषणाददोषः, मैवम्; इतिकर्तव्यस्य प्रयाजादेरङ्गजातस्य धात्वर्थतया साक्षात्कृतिव्याप्यत्वेन करणत्वप्रसङ्गात्। उभयोः साधनत्वाविशेषे करणेतिकर्तव्यतालक्षणो विभागो न सिद्ध्येदिति चेत्, न; तवापि नियोगसाधने यागे तदितिकर्तव्येषु च साधनत्वाविशेषाद्विभागानुपपत्तेस्तुल्यत्वात्। न च करणांशे रागतः प्रवृ

अपिच फलं प्रति करणीभूतस्य यागस्य नियोगं प्रति विषयत्वमपि दुर्निरूपमित्याह—किं च यागस्येत्यादिना। चकारेणार्थं विकल्प्य दूषयति—श्रुत्यादेरदर्शनात्। यजेतेत्यस्य यागेन नियोगः कर्तव्यत्वेन तवाभिमतो न तु फलमिति भावः। द्वितीयं दूषयति—नापीति। त्रिषु विकल्पेषु न प्रथमः नियोगसाधनीभूतयागानुष्ठानादेव नियोगस्य सिद्धेः। न द्वितीयः, नियोगसिद्ध्यैव फलस्यापि सिद्ध्युपपत्तेः। नापि तृतीयः; यथा यागस्य स्वर्गसाधनत्वाभावस्तथा करणत्वाभावोऽप्यभ्युपेयः स्वर्गसाधनीभूतनियोगं प्रति करणत्वादेव स्वर्गकामिनः पुरुषस्य कृतिसाध्यत्वोपपत्तेः। ननु यदि यागो न स्वर्गं प्रति करणं तर्हि स्वर्गकामिनो न यागे प्रवृत्तिः सम्भवतीत्याशङ्कते—यागादेरिति। तुल्ययुक्त्या समाधत्ते—साधनत्वाभावेऽपीति। किं च "साधकतमं करण"मिति पाणिनिस्मरणात् स्वर्गं प्रति यागस्य साधनत्वाभावे साधनविशेषकरणत्वमपि स्वर्गं प्रति यागस्य न स्यादिति भावः।

अथ छेदनोद्देश्येन यथा प्रवृत्तकृतिव्याप्यत्वरूपं करणत्वं कुठारादेस्तथा स्वर्गादिफलमुद्दिश्य प्रवृत्तपुरुषकृतिव्याप्यरूपं करणत्वं यागादौ साधनत्वाभावेऽपि किं न स्यादितिशङ्कते—अथ परोद्दिष्टेति। तथासति नियोगेऽपि करणत्वप्रसक्तिरित्याह—तर्हीति। साक्षात्कृतिव्याप्यत्वं करणत्वमित्युक्ते प्रयाजादेरङ्गसमुदायस्येतिकर्तव्यस्य धात्वर्थतया तथात्वात्करणत्वप्रसङ्ग इत्याह—अथेति। करणेतिकर्तव्यतारूपविभागान्यथानुपपत्त्या तयोर्भेदमाशङ्कते—उभयोरित्यादिना। तुल्ययुक्त्या परिहृति—तवापीति। प्रकारान्तरेण विभागमुद्भाव्य दूषयति—न च करणांश इत्यादिना

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रितिकर्तव्येषु तु विधित इति विभागो युक्तः; सेतिकर्तव्यताकस्यैव करणतया तत्र रागतः प्रवृत्तेरवर्जनीयत्वात्, तथा लोके दृष्टत्वात्। एतेन श्येनाग्नीषोमीयवैषम्यमप्यपास्तम्; श्येनवदग्नीषोमीयेऽपि रागतः प्रवृत्तेः समानत्वात्। न च प्रथमतो नियोगेनैव सम्बद्धेतिकर्तव्यता पश्चात्तत्प्रयुक्ता फलेन सम्बध्यते, यागस्य तु फलं प्रति करणीभूतस्यैव नियोगेन पश्चात्सम्बन्धः इति वैषम्यम्; ग्राहकग्रहणदशायां प्राकरणिकसकलपदार्थानामविशेषेण नियोगसम्बद्धानां तद्वशादेव परस्परसम्बन्धस्य पार्ष्ठिकस्याङ्गीकारात्, फलं प्रति करणत्वस्य विध्याक्षेपलक्षणोपादानाधीनतया तत्प्रतीतेर्विशिष्टनियोगप्रतीत्युत्तरकालीनत्वात्।

कथं चैवं सति 'श्येनेनाभिचरन्यजेते'ति विधौ जाग्रति रागतः प्रवृत्तौ निषेधानुप्रवेशादधर्मता स्यात्? नहि विधिसंस्पृष्टे निषेधः प्रवर्तमानोऽनर्थतां बोधयितुमीष्टे। तथा सति षोडशिग्रहणस्यापि नातिरात्रे षोडशिनं गृह्णातीति निषेधादनर्थत्वप्रसङ्गात्। उक्तं हि भट्टाचार्यैः—

'यद्यपि स्याद्विधिस्पृष्टे निषेधो नैव तादृशम्।
विज्ञायते ह्यनर्थत्वं षोडशिग्रहणादिवत्॥' इति। (श्लो०वा०२/२०३)

ननु विधेर्द्विविधो व्यापारो भावार्थफलयोः साध्यसाधनसम्बन्धबोधो भावार्था-

---

एतेन=करणेतिकर्तव्यतयो रागतः प्रवृत्त्यापादनेन। अपि च करणेतिकर्तव्ययोः पुनरपि वैषम्यमुद्भाव्य दूषयति—न च प्रथमत इति। तत्र हेतुमाह—ग्राहकेति। प्रथमतो नियोगग्राहकलिङादिनैव तत्प्रकरणपठितानां सकलपदार्थानां ग्रहणं भवति, तदा सर्वे पदार्था अविशेषेण नियोगसम्बद्धा भवन्ति, पश्चाद्भाविनि सम्बन्धबोधे यथायोग्यं परस्परं पदार्थाः सम्बन्धमुपयान्तीति भवतामभ्युपगमः। एवं च प्रथमतो नियोगेनैवेतिकर्तव्यतान्वीयते, पश्चान्नियोगप्रयुक्ता सा फलेन सम्बध्यते, प्रधानयागस्य तु फलं प्रति करणीभूतस्यैव पश्चान्नियोगेन सम्बन्ध इति तवोक्तिर्दुरुक्तिरेवेति भावः। किं च विध्याक्षेपरूपोपादानप्रमाणबलेन स्वर्गादिफलकामिकृतिव्याप्यताऽन्यथानुपपत्तिरूपेण नियोगफलयोः सम्बन्धस्तवाभिप्रेतः। विषयनियोज्यविशिष्टनियोगप्रतीतिरेव विध्याक्षेपिका। अतोऽपीतरप्राकरणिकपदार्थवन्नियोगेनैव विषयभूतयागस्य प्रथमं सम्बन्धो वक्तव्यो नतु फलेनेत्याह—फलं प्रतीति। तस्मात्करणेतिकर्तव्ययोरुभयत्र रागतो विधितो वा प्रवृत्तिः समानेत्यर्थः।

अथ श्येनयागाग्नीषोमीययागयोरुभयो रागतः प्रवृत्तेः समानत्वेऽपि "न हिंस्यात् सर्वा भूतानी"ति निषेधेन निषिध्यमाने श्येनयागेऽधर्मता, अग्नीषोमीययागेऽतथात्वाद् धर्मतेति महद्वैषम्यमित्यत आह—कथं चैवमिति। विधिसंस्पृष्टे निषेधः प्रवर्तमानोऽनर्थतां बोधयति चेर्त्ताह षोडशिग्रहणस्यापि 'नातिरात्रे षोडशिनं गृह्णाती'ति निषेधादनर्थत्वप्रसक्तिः स्यात्। तच्च भट्टाचार्याणामसम्मतमाह—यद्यपीत्यादिना। विधिसंस्पृष्टे प्रवर्तमानेऽपि निषेधो नैव तादृशमनर्थत्वं बोधयति, यथा षोडशिग्रहणे प्रवर्तमानो निषेधो नानर्थत्वं बोधयतीति श्लोकार्थः।

विधेर्द्वैविध्यं व्यापारं परिकल्प्य श्येनयागस्याधर्मत्वमुपपादयति—नन्वित्यादिना। साध्यसाधनसम्बन्धबोधो धात्वर्थानुष्ठानबोधश्चेति द्विविधो विधेर्व्यापारः। धात्वर्थे रागतः प्रवृत्त्यभावस्थले

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नुष्ठानबोधश्चेति । तत्रैव चानुष्ठानबोधो यत्र भावार्थेऽन्यतो न प्रवृत्तिः, श्येनादौ तु फलोपायत्वेऽधिगते रागत एव प्रवृत्त्युपपत्तेर्नानुष्ठापकत्वम्, ततश्च निषेधप्रवेशाच्छ्येनादेरनर्थत्वमिति चेत्, न; उक्तोत्तरत्वात् । उक्तं हि—सेतिकर्तव्यस्यैव करणत्वात्तत्र रागतः प्रवृत्ताविति‍कर्तव्येऽपि तत एव प्रवृत्तौ श्येनवदग्निषोमीयस्यापीतिकर्तव्यस्यानर्थत्वं प्रसज्येतेति । ननु 'अभिचारमहीनं च त्रिभिः कृच्छ्रैर्व्यपोहती'ति प्रायश्चित्तविधानादनर्थत्वं निश्चीयत इति चेत्, मैवम्; नैमित्तिकत्वेनाप्यस्योपपत्तेः । यथा हि—"वर्णिनां हि बधो यत्र तत्र साक्ष्यनृतं वदे'दित्यनृतवदनविधानानन्तरं "तत्पावनाय निर्वाप्यश्चरुः सारस्वतो द्विजै"रिति नैमित्तिकत्वेन सारस्वतश्चरुर्निर्वाप्यो विधीयते नत्वनृतवदनजनितपापनिबर्हणाय; अनृतवदने कामतोऽप्रवृत्तेर्विधित एव तत्र प्रवृत्त्यङ्गीकारात् । एवमत्रापि । तदेवं नित्यकाम्यवैषम्यस्य वक्तुमशक्यत्वान्नित्यवत्काम्येऽपि नियोगस्य फलसाधनत्वकल्पना निःप्रामाणिका; पुरुषार्थत्वे नियोगस्य स्वर्गसाधनताभ्युपगमानर्थकताप्रसङ्गात् ।

न च स्वर्गादिसाधनत्वे नियोगस्य प्राधान्यमपि सम्भवति; स्वर्गादिसुखशेषत्वात् । न च स्वानुकूलनियोज्यसिद्धये स्वर्गादिकं साधयतो नियोगस्य स्वामिवत्प्राधान्यानुपघातः दृष्टान्तवैषम्यात् । तथा हि—द्वौ तत्र स्वामिभृत्ययोः प्रयत्नौ स्वार्थोद्देशेन प्रवृत्तौ परस्परमुपकुर्वाते, न तथेह नियोगस्य चेतनता, येन स्वकीयप्रयत्ने स्वर्गमात्मार्थतया आक्षिपेत्, प्रत्युत गर्भदासस्थानीयो नियोज्यः स एव स्वर्गाय प्रवृत्तो नियोगमेव स्वर्गशेषतया स्वीकुर्यात् । न च स्वर्गादिसुखस्यान्यार्थता, स्वभाववैपरीत्यापत्तेः । यदर्थं सर्वं यच्च नान्यार्थं तत्सुखमिति हि सुखस्य लक्षणमाचक्षते, तत्कथमन्यशेषता स्वर्गादिसुखस्य भवेत् ? न चालौकिकत्वेऽपि नियोगस्य यूपाहवनीयादिवत्पदान्तरसमभिव्याहारात्सम्बन्धग्रहणम्; तत्र यूपाहवनीयादेर्यूपं तक्षतीत्यादिप्रसिद्धपदसमभिव्याहारान्यथानुपपत्तिगम्यत्ववन्नियोगस्यार्थापत्तिगम्यत्वानङ्गीकारात् । अङ्गीकारे वाऽपूर्वत्वव्याघाताच्च ।

विधितोऽनुष्ठानबोधो भवति । फलसाधनत्वेऽधिगते श्येनादौ रागतः प्रवृत्तिसम्भवे न तत्र विधितोऽनुष्ठापकत्वं, तत्र न हिंस्यादिति प्रवेशादनर्थत्वमिति चेन्न; उक्तोत्तरत्वात् । उत्तरवाक्यं स्फोटयति—उक्तं हीत्यादिना । प्रायश्चित्तविधानात्तत्राधर्मतामाशङ्कते—नन्विति । निषिद्धत्वानिर्णये प्रायश्चित्तानिर्णयात्तद्विधानस्य नैमित्तिकत्वेनाप्युपपत्तिमाह—मैवमित्यादिना । तत्र प्रमाणमाह—यथाहीति । दार्ष्टान्ते पूर्वोक्तं विचारं संयोज्यावान्तरविचारमुपसंहरति—तदेवमिति ।

स्वर्गादिसाधनत्वे नियोगस्य प्राधान्यं दूषयति—न च स्वर्गादीति । प्राभाकराशयमनूद्य दूषयति—न च स्वानुकूलेति । नियोगस्य स्वामिस्थानीयत्वाभावमुपपादयति—न तथेहेति । नियोगे स्वर्गशेषत्वमाह—प्रत्युतेति । स्वर्गादिसुखस्यान्यार्थत्वं वारयति—न चेति । नियोगे शक्तिग्रहणायोपपादिते दृष्टान्ते वैषम्यं दर्शयति—न चालौकिकत्वेऽपीति । नियोगसिद्धये पूर्ववादिनोक्तमनुमानं प्रत्यनुमान-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यत्तु लिङादेः क्रियातिरिक्तकार्याभिधायित्वानुमानम्, तत्प्रत्यनुमानपराहतत्वादसाधनम्। तथाहि—

विवादाध्यासिताः शब्दाः क्रियाकार्याभिधायिनः।
कार्यप्रत्ययहेतुत्वाद् आनयेत्यादिशब्दवत् ॥१८॥

इष्टसाधनवादिनो वेदान्तिनः प्रति साध्यविकलत्वाच्च। लौकिकलिङादिशब्दानामपि श्रेयः-साधनबोधकत्वाभ्युपगमात्, व्यापकानुपलब्धिपराहतत्वाच्च। तथाहि—तदभिधायकत्वं तत्र सङ्गतिग्रहणेन व्याप्तम्, तच्च मानान्तरानधिगतादपूर्वाद्व्यावर्तमानं लिङादीनां तदभिधायकतां व्यावर्तयति। न च क्रियातिरिक्तकार्यानभिधाने स्वर्गकामो यजेतेत्यादिशास्त्रस्याप्रामाण्यप्रसङ्गः; क्रियाया एवापूर्वावान्तरव्यापारायाः परमेश्वरप्रसादावान्तरव्यापाराया वा फलसाधनत्वोपपत्तेः प्रदर्शितत्वात्। तदेवं विधिवाक्यानामपि सिद्धार्थबोधकत्वाद्विधिसंस्पर्शविधुराणां सत्यज्ञानादिवाक्यानामखण्डैकरसब्रह्मलक्षणसिद्धार्थावबोधकत्वं सुतरां सिद्धचतीति सिद्धम्।

ननु कथं वेदान्तानामखण्डार्थत्वम्? तस्य निर्वक्तुमशक्यत्वात्, तत्र प्रमाणासम्भवाच्च। तथाहि—किमिदमखण्डार्थत्वम्? किं निर्विशेषवस्तुपरत्वम्? उत निर्भेदार्थनिष्ठत्वम्? आहोस्विदपर्यायशब्दानां प्रातिपदिकार्थमात्रपर्यवसायित्वम्? अथवा तेषामेवैकप्रातिपदिकार्थमात्रपर्यवसायित्वम्? संसर्गागोचरप्रमाजनकत्वं वा? नाद्यः; विकल्पासहत्वात्। तथाहि—पदानां निर्विशेषवस्तुपर्यवसायित्वमभिधायकतया? लक्षकतया वा स्यात्? न प्रथमः; तस्यात्यन्तमप्रसिद्धतया सम्बन्धाग्रहणेनपदानां तत्पर्यवसायित्वासम्भवेन लक्षणस्यासम्भवित्वप्रसङ्गात्। नापि द्वितीयः; अप्रसिद्धत्वादेवाभिधेयाविनाभावस्य लक्षणाहेतोरसम्भवेन प्राचीनदोषानुषङ्गप्रसङ्गात्। न चाभिधेयाविनाभावं

पराहतमित्याह—यत्त्विति। प्रत्यनुमानमेव श्लोकेन दर्शयति—विवादेति। विवादाध्यासिताः=वैदिकलिङादयः शब्दाः। क्रियाकार्याभिधायिनः=क्रियारूपकार्यवाचकाः। उभयपक्षिणोरनुमाने समबलत्वाशङ्कया दोषान्तरमप्याह—इष्टसाधनेति। साध्यवैकल्यं विशदयति—लौकिकेति। दोषान्तरमप्याह—व्यापकेति। व्यापकाभावेन व्याप्याभावं व्युत्पादयति—तथाहीति। विपक्षे निरुक्तं बाधकतर्कमुन्मूलयति—न च क्रियातिरिक्तेति। वादार्थोपसंहारप्रयोजनमाह—तदेवमित्यादिनेति।

वेदान्तानामुक्तमखण्डार्थत्वमाक्षिपति—ननु कथमित्यादिना। अखण्डार्थत्वस्य सम्भवलक्षणानि विकल्प्य दूषयति—किमित्यादिना। पञ्चसु लक्षणेषु नाद्यः, तत्रापि जिज्ञासोदेति किं पदानां वाचकत्वेन तथाबोधकत्वं, लक्षकत्वेन वा तथाबोधकत्वमिति? प्रथमे निर्विशेषवस्तुनोऽत्यन्ताप्रसिद्धत्वया शक्तिग्रहाभावेन पदानां तत्परत्वासम्भवेनास्यलक्षणस्यासम्भवित्वापत्तिः। द्वितीयेऽप्रसिद्धत्वादेव लक्षणाहेतोर्वाच्याविनाभावस्यात्रापि लक्षणस्यासम्भवित्वापत्तिस्तदवस्थैव। 'सत्यं ज्ञानमनन्तं ब्रह्मेति सत्यादिवाक्यप्रामाण्यानुपपत्तिं लक्षणाबीजमभ्युपगम्यमाह—न चाभिधेयेत्यादिना। अनुपपत्तिरपि योग्ये

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विनापि 'गरमभ्यवहरे'त्यादिगिरामिव वाक्यप्रामाण्यानुपपत्तिरेव लक्षणाक्षेपिका; अत्यन्ताप्रसिद्धत्वेन गगनारविन्दादेरिव लक्ष्यत्वानुपपत्तेः।

अथ निर्भेदवस्तुपरत्वम्? तदपि न; निर्भेदत्वस्यानिरुक्तेः। तथाहि—निर्भेदत्वं नाम किं भेदाभावविशिष्टत्वम्? उत भेदाभावोपलक्षितत्वम्? नाद्यः; तत्परत्वे वाक्यस्य निर्घटं भूतलमितिवत्संसृष्टार्थत्वप्रसङ्गात्। न द्वितीयः; तत्रापि संसृष्टार्थत्वस्यानतिवृत्तेः। तथाहि—भेदस्य योऽभावस्तेनोपलक्षणेनोपलक्षितवस्तुपरत्वे कथं न संसृष्टार्थता? वस्तुमात्रमेव तत्र प्रतिपाद्यम्, भेदाभावस्तु द्वारमिति चेत्, तथापि नाखण्डार्थता; उपलक्ष्यमाणस्य स्वेतरेभ्यो व्यावृत्तत्वेन प्रतीतावखण्डार्थत्वासम्भवात्। अप्रतीतौ चानुपलक्षकत्वादेवोपलक्षणस्य वैयर्थ्यप्रसङ्गात्। नापि तृतीयः; शीतोष्णस्पर्शवन्तौ पयःपावकावित्यत्रापर्यायशब्दानां प्रातिपदिकार्थमात्रपर्यवसायित्वेऽप्यखण्डार्थत्वादर्शनात्। नापि चतुर्थः; तथासत्येकेनैव तत्प्रतिपत्तेः पदान्तरप्रयोगस्य वैयर्थ्येन लक्षणस्यासम्भवित्वापातात्। व्यवच्छेद्यभेदादवैयर्थ्यमिति चेन्न। तदनिरुक्तेः। तथाहि—किं व्यवच्छेद्यानि व्यावृत्तयः पदैः प्रतिपाद्यन्ते? अथवा तद्विशिष्टम्? आहोस्विदुपलक्षितं स्वरूपमात्रं वा? तत्र न प्रथमद्वितीयौ; तथासति संसृष्टार्थत्वेनाखण्डार्थत्वानुपपत्तेः। नापि तृतीयः; तत्राप्यन्यतो व्यावृत्तस्य प्रतिपादने प्राचीनदोषानुषङ्गात्। स्वरूपमात्रप्रतिपादने च पदान्तरप्रयोगवैयर्थ्यस्य दर्शितत्वात्।

नापि पञ्चमः। तथात्वस्यात्यन्तादृष्टचरत्वेन लक्षणासम्भवित्वात्। ननु प्रकृष्ट

लक्षणां प्रवर्तयति, नायोग्ये। अतोऽनुपपत्तिर्नाखण्डार्थपरतायां बीजं भवितुमर्हतीति भावः।

नापि द्वितीयं, निर्भेदवस्तुपरत्वमखण्डार्थत्वं पदानाम्; निर्भेदत्वस्यानिरुक्तेरित्याह—तथाहीति। भेदाभावविशिष्टत्वं निर्भेदत्वमित्यभ्युपगमे निर्घटं भूतलमितिवत्सत्यादिवाक्यस्यापि संसृष्टार्थबोधकत्वापत्तिः। भेदावाभावोपलक्षितत्वं निर्भेदत्वमिति स्वीकारे संसृष्टार्थत्वस्यानतिवृत्तेः। तदेव स्पष्टयति—तथाहीत्यादिना। अपर्यायशब्दानां प्रातिपदिकार्थमात्रपर्यवसायित्वमिति पक्षं दूषयति—नापि तृतीय इति। शीतस्पर्शवद्, उष्णस्पर्शवत्, पयः, पावक इत्यत्रापर्यायशब्दानां केवलजलाग्निरूपप्रातिपदिकार्थमात्रपरत्वेऽप्यखण्डार्थत्वं न दृश्यते। अपर्यायशब्दानामेकप्रातिपदिकार्थमात्रपर्यवसायित्वमिति पक्षं दूषयति—नापि चतुर्थ इति। तथासति सत्यं ज्ञानमित्याद्येकेनैवपदेनाखण्डार्थत्वबोधे पदान्तरप्रयोगवैयर्थ्येन लक्षणस्यासम्भवापत्तेः। न च व्यवच्छेद्यानामसत्वादीनां भेदात्पदान्तरप्रयोगस्यावैयर्थ्यमिति वाच्यम्; व्यवच्छेद्यानां निर्वक्तुमशक्यत्वात्। तदेव विकल्प्योपपादयति—तथाहि किमित्यादिना। न तत्र प्रथमद्वितीयौ, तद्व्यवच्छेद्यमात्रप्रतिपादने व्यवच्छेद्यविशिष्टवस्तुप्रतिपादने च संसृष्टार्थत्वेनाखण्डार्थत्वानुपपत्तेः। व्यवच्छेद्योपलक्षितत्वविशिष्टवस्तुप्रतिपादने तृतीयकल्पेऽखण्डार्थत्वानुपपत्तिस्तदवस्थैव। स्वरूपमात्रप्रतिपादने च पदान्तरप्रयोगस्य व्यर्थत्वमुक्तमेवेति भावः।

नापि संसर्गाविषयकप्रमाजनकत्वं तदिति पञ्चमः कल्पः; सर्वत्र वाक्यस्य पदार्थसंसर्गपरतया संसृष्टपदार्थपरतया वा दृष्टत्वेन संसर्गागोचरप्रमाजनकत्वस्यात्यन्तादृष्टचरत्वेन च लक्षणासम्भवापत्तेः। सिद्धान्त्यभिमतं पक्षमुत्थाप्य दूषयति—ननु प्रकृष्टेति। चन्द्रप्रातिपदिकार्थमात्रमिह पृ

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रकाशश्चन्द्र इत्यादिलक्षणवाक्येषु दृष्टं संसर्गागोचरप्रमितिजनकत्वमिति चेत्, मैवम्; लक्षणवाक्यैरपि लक्ष्यस्य सजातीयविजातीयेभ्यो व्यावृत्तत्वेन प्रतिपादनात् तच्छब्दैर्व्यवहर्तव्यत्वेन प्रतिपादनाद्वा लक्षणवाक्यानामपि संसृष्टार्थत्वानतिवृत्तेः। ननु सोऽयं देवदत्त इत्यादिषु देवदत्तगतभेदभ्रमव्युदासेन तत्स्वरूपमात्रपर्यवसायित्वमपर्यायशब्दानां इष्टमिति चेत्, मैवम्; तत्रापि परोक्षदेशकालोपलक्षितस्यैतद्देशकालविशिष्टत्वप्रतिपादकतया संसृष्टार्थत्वानतिवृत्तेः, तावतैव च भेदभ्रमव्युदासादुभयपदलक्षणाभ्युपगमे गौरवप्रसङ्गाच्च। तदेवं नाखण्डार्थत्वनिरुक्तिः।

नापि तत्र प्रमाणम्। प्रकृष्टप्रकाश इति वाक्यार्थश्चन्द्रप्रातिपदिकमात्रार्थस्तत्प्रश्नोत्तरार्थत्वात्, यन्नैवं तन्नैवं यथा वाक्यान्तरार्थं इति व्यतिरेक्यनुमानमस्तीति चेत्, मैवम्; विकल्पासहत्वात्। तथाहि—चन्द्रप्रातिपदिकमात्रार्थोऽन्यत्र प्रसिद्धः? न वा? आद्ये तत्र हेतोर्वृत्तावन्वयव्यतिरेकितया केवलव्यतिरेकित्वव्याघातः। अवृत्तौ तु सत्यपि सपक्षे तत्र हेतोरवृत्तेरसाधारणानैकान्तिकता। द्वितीये पुनरप्रसिद्धविशेषणतैव। अन्वयव्यतिरेकितायां च यो यत्प्रश्नोत्तरार्थं इति व्याप्तिरभ्युपेया। तथाच त्वत्करे कति वराटका इति प्रश्नस्य पाणौ पञ्च वराटका इति प्रतिवचने व्यभिचारः। न च विमतमखण्डार्थं लक्षणवाक्यत्वात्पृथुबुध्नोदराकारः कुम्भ इति वाक्यवदित्यनुमानं मानम्; लक्षणवाक्यानामप्युक्तप्रकारेण संसृष्टार्थपरतया दृष्टान्तस्य साध्यविकलत्वात्। तदेवं लक्षणप्रमाणयोरभावान्नाखण्डार्थत्वं शब्दानाम्। विवादाध्यासितं पदार्थसंसर्गप्रतीतिजनकं, वाक्यत्वाद्,

---

तदेवैतल्लक्षणवाक्यस्य विषयो न संसर्ग इति भावः। तदपि दूषयति—मैवमिति। निरुक्तलक्षणवाक्येन तदितरव्यावृत्तिर्वा तच्छब्दव्यवहारो वाभिमतश्चेत्तर्हि संसृष्टार्थानतिवृत्तेः। महावाक्येऽखण्डार्थत्वभूमिसम्भाव्य दूषयति—ननु सोऽयमिति। एकस्मिन् पदे लक्षणयापि भेदभ्रमनिरासादुभयपदयोर्लक्षणाभ्युपगमे गौरवाच्च।

अखण्डार्थत्वनिरुक्तिं निरस्य तत्र प्रमाणं निराकर्तुमुपक्रमते—नापि तत्रेति। सिद्धसाधनतावारणाय साध्यशरीरे मात्रपदम्। संसृष्टपदार्थस्यैव वाक्यार्थत्वेन चन्द्रपदार्थस्यापि संसृष्टार्थत्वाभ्युपगमात्। तत्प्रश्नोत्तरार्थत्वात्=तत्प्रश्नस्योत्तरं यद्वाक्यं तदर्थत्वादित्यर्थः। विकल्पासहत्वेनोक्तानुमानं दूषयति—तथाहीत्यादिना। साध्यस्य चन्द्रप्रातिपदिकमात्रार्थस्यान्यत्र प्रसिद्धत्वे तत्र हेतोर्वृत्तेरन्वयव्यतिरेकितया केवलव्यतिरेकित्वव्याघातापत्तिः। अवृत्तौ तु सपक्षे हेतोरवर्तमानतयाऽसाधारणानैकान्तिकता। द्वितीये साध्याप्रसिद्धिदोषापत्तिः। अस्तु तर्ह्यन्वयव्यतिरेकित्वम्; तथासति यो यत्प्रश्नोत्तरार्थः स तत्प्रातिपदिकार्थः इतिव्याप्तिरभ्युपेया। एवं च कति वराटकाः (कपर्दिकाः) इति प्रश्नस्य पाणौ पञ्चवराटका इति प्रतिवचने वराटकसंख्याविशेषे वराटकप्रातिपदिकार्थमात्रत्वं नास्ति। एतद्वाक्यस्य संख्यापरत्वादिति भावः। आनन्दबोधाचार्यानुमाने साध्यवैकल्यमुद्भाव्य दूषयति—न च विमतमित्यादिना। विज्ञानादिवाक्यं पक्षः। उक्तप्रकारेण=इतरव्यावृत्तेर्व्यवहारस्य वा बोधनप्रकारेणेत्यर्थः। पूर्ववादी स्वपक्षे प्रयोगमाह—विवादाध्यासितमिति। सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिवाक्यमित्यर्थः। साध्यशरीरे प्रतीतिपदस्य प्रमितिरर्थः। न च "जरद्गवः

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding JKS-MoE-Grant-2

गवानयनादिवाक्यत्वत्। नच जरद्गवादिवाक्ये व्यभिचारः; तस्य वाक्याभासत्वात्। आकाङ्क्षासन्निधियोग्यतावन्ति पदानि वाक्यमिति हि वाक्यविदः। न च खं छिद्रमित्यादि व्यभिचारः; तस्यापि लक्षणवाक्यत्वेन लक्ष्यस्य सजातीयविजातीयेभ्यो व्यावृत्तिप्रतिपादनपरत्वेनाखण्डार्थत्वाभावात्। न च विपक्षे बाधकतर्काभावः; संसर्गप्रतीत्यजनकत्वे वाक्यत्वाभावप्रसङ्गस्यैव बाधकत्वात्। तदेवं नाखण्डार्थता वेदान्तानामिति।

अत्राभिदध्महे—न तावल्लक्षणासंभवोः; यतः—

संसर्गासङ्गिसम्यग्धीहेतुता या गिरामियम्।
उक्ताखण्डार्थता यद्वा तत्प्रातिपदिकार्थता ॥ १६ ॥

अपर्यायशब्दानां संसर्गागोचरप्रमितिजनकत्वमखण्डार्थता। न चेदमसम्भवि लक्षणम्; प्रकृष्टप्रकाशादिवाक्येषु तत्सद्भावात्। न च लक्षणवाक्यमपि संसृष्टार्थं लक्ष्यस्य सजातीयविजातीयेभ्यो व्यावृत्तिवैशिष्ट्यप्रतिपादनपरत्वात्तत्तच्छब्दैर्व्यवहर्तव्यत्वप्रतिपादनाद्वेति युक्तम्; विकल्पासहत्वात्। किं प्रकृष्टप्रकाशादिवाक्यं साक्षादन्यतो व्यावृत्तिं प्रतिपादयति? किंवा स्वरूपप्रतिपादनेनार्थात्? नाद्यः; व्यावृत्तिप्रतिपादकशब्दाभावात्। नापि द्वितीयः; नान्तरीयकतया सिध्यतोऽर्थस्य शब्दार्थत्वाभावात्, 'यश्चार्थादर्थो न स चोदनार्थः' इति न्यायात्। अन्यथा गामानयेत्यादिवाक्येऽश्वाद्यानयनव्यावृत्तेरपि वाक्यार्थत्वप्रसङ्गात्। नन्वयं चन्द्र इति व्यवहर्तव्यः, प्रकृष्टत्वे सति प्रकाशत्वात्, यन्नैवं न तदेवं यथा नक्षत्रादि, न तथा चायम्, तस्मान्न तथेति केवलव्यतिरेकितया लक्षणवाक्यं पर्यवस्यति।

कम्बलपादुकाभ्यां द्वारि स्थितो गायति भद्रकाणि। तं ब्राह्मणी पृच्छति पुत्रकामा राजन्रुमायां लशुनस्य कोऽर्घः॥ इति व्यभिचारः; तस्य वाक्याभासत्वात्। कम्बलेन निर्मिताभ्यां पादुकाभ्यां, मङ्गलगीतानि, रुमायां लवणोत्पत्तिभूमौ, अर्घः=मूल्यमित्यर्थः। वाक्याभासत्वमुपपादयति—आकाङ्क्षेति। जरद्गवादिवाक्ये योग्यता नास्तीत्यर्थः। न च खं छिद्रमिति वाक्ये वाक्यत्वं हेतुरस्ति पदार्थसंसर्गप्रतीतिजनकत्वं साध्यं नास्ति, तत्रानेकपदार्थाभावेन संसर्गाभावादिति व्यभिचार इति वाच्यम्; विपक्षे बाधकतर्कमाह—संसर्गेति। पूर्वपक्षमुपसंहरति—तदेवमिति।

सिद्धान्ती समाधातुमुपक्रमते—अत्रेति। श्लोकेन लक्षणद्वयं संकलयति—संसर्गेति। यद्वा तत्प्रातिपदिकार्थता=अथवा तेषामपर्यायशब्दानामेवैकप्रातिपदिकार्थता। तत्पदेनैकत्वं परामृशति। श्लोकं विशदयति—अपर्यायेति। हस्तःकर इत्यादिपर्यायशब्देष्वतिव्याप्तिवारणायापर्यायेतिपदम्। इन्द्रियेऽतिव्याप्तिवारणाय शब्दग्रहणम्। गामानयेत्यादिवारणाय संसर्गागोचरेतिपदम्। वाक्याभासवारणाय प्रमितिग्रहणम्। तत्सद्भावात्=लक्षणसद्भावात्। प्रकृष्टप्रकाशश्चन्द्र इतिलक्षणवाक्येऽपि पूर्वक्षदिनोक्तं संसृष्टार्थत्वमनूद्य दूषयति—किं प्रकृष्टेत्यादिना। साक्षात्=अभिधावृत्त्येत्यर्थः। अर्थात्=नान्तरीयकत्वेन। यश्चार्थाच्छ्रुतार्थं नान्तरीकतया लभ्यते स न वेदार्थ इति शाबरभाष्यम्। गामानयेत्यादिवाक्येष्वश्वानयनव्यावृत्तेरपि वाक्यार्थत्वस्वीकारे वाक्यभेदप्रसक्तिरित्याह—अन्यथेति। लक्षणवाक्यस्य व्यवहारसाधनत्वमात्रं स्वीकृत्याखण्डार्थत्वं निराकर्तुमाशङ्कते—नन्वयमित्यादिना।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तथा च कथमखण्डार्थता? चन्द्र इति व्यवहर्तव्यतालक्षणधर्मवैशिष्ट्यप्रतिपादनपरत्वादिति चेत्, मैवम्; 'चन्द्रतया व्यवहर्तव्यः' इति किं चन्द्ररूपार्थविशेषितो व्यवहारः कर्तव्यः? उत चन्द्रशब्दमात्रविशेषितो व्यवहारः? आद्ये चन्द्रविशिष्टं व्यवहारं यदि नाज्ञासीत्तदा लक्षणवाक्यादपि विषयविशेषितकर्तव्यतां तस्य कथमधिगच्छेत्? नह्यविदिताग्निरनुमानादप्यग्निसम्बन्धमधिगमयितुं शक्यः। अथाधिगतवान् तदा लक्षणवाक्यरूपमनुमानं निष्प्रयोजनम्, ज्ञातस्यैव ज्ञापनात्। अथ सामान्यतो जानात्यस्ति कश्चिद्विषयश्चन्द्रव्यवहारस्येति, विशेषतस्तु न जानातीत्युच्यते; तथापि किं सामान्यतो व्यवहारस्य निमित्तवत्तां जानाति? किं वा व्यवहारविशेषस्य? आद्ये प्रकृतानुपयोगः; व्यवहारविशेषस्य विचार्यमाणत्वात्। द्वितीयेऽपि चन्द्रलक्षणार्थविशेषापरिज्ञाने तद्विशिष्टव्यवहार एव विज्ञातुमशक्यः। ज्ञाते च लक्षणवाक्यवैयर्थ्यमित्युक्तम्। नापि द्वितीयः; लक्षणं विनापि गवादि शब्दानामिव वृद्धव्यवहारादेव वाच्यवाचकसम्बन्धग्रहोपपत्तेः। पूर्वं प्रतिपन्न एव वाच्यवाचकभावो लक्षणवाक्येन स्मार्यत इति चेत्, न; अवगतसम्बन्धस्य तत्र तच्छब्दादेव सम्बन्धस्मरणोपपत्तौ लक्षणाभिधानवैयर्थ्यात्। अवगतसम्बन्धस्यापि शब्दस्य लक्षणवाक्यादेव सम्बन्धस्मरणनियमे, लक्षणवाक्यस्थपदानामपि प्रत्येकं लक्षणवाक्यैः सम्बन्धस्मरणप्रसङ्गादनवस्थादुरवस्था स्यात्। तस्माद् गवानयनादिवाक्यवदाप्तोपदेशतयैव लक्षणवाक्यमवबोधकम्। तच्च सर्वं स्वरूपमात्रे पर्यवस्यति, अर्थात्पुनरन्यतो व्यावृत्तिः फलतीति युक्तम्।

साध्यस्वरूपं विकल्प्य प्रयोगं दूषयति—मैवमित्यादिना। तत्र चन्द्ररूपार्थविशेषितव्यवहारकर्तव्यतासाधने दोषमाह—आद्ये इति। तत्रापि प्रतिवादिनश्चन्द्रविशेषितार्थव्यवहारोऽज्ञातश्चेत्तर्हि साध्याप्रसिद्धिः। अज्ञातसाध्यस्वरूपः कश्चिद् लक्षणवाक्यादपि विषयविशेषितकर्तव्यतां नाधिगन्तुं शक्नुयात्। यथाऽज्ञाताग्निरनुमानादपि पक्षेऽग्निसम्बन्धमधिगमयितुं न शक्यस्तद्वदित्यर्थः। ज्ञातपक्षं द्वितीयं दूषयति—अथेति। ज्ञाताज्ञातविकल्पोत्थदोषं निराकुर्वन्नाह—अथ सामान्यत इति। केवलव्यतिरेकिणि विशेषतः साध्याप्रसिद्धिर्न दोषः, सामान्यतस्तु सिद्धत्वादिति पक्षं दूषयितुं विकल्प्यते—तथापीति। सामान्यतो यस्य कस्यचिद्व्यवहारस्य निमित्तवत्ताधिगतत्वे प्रकृतेऽनुपयोगमाह—आद्ये इति। नहि व्यवहारसामान्यमत्र विचारविषयः, व्यवहारविशेषस्यात्र विचारविषयत्वात्। द्वितीये-चन्द्ररूपार्थविशेषानधिगमे तद्विशिष्टव्यवहारोऽपि ज्ञातुं न शक्यः। चन्द्ररूपार्थविशेषाधिगमे च लक्षणवाक्यवैयर्थ्यमुक्तमेव। चन्द्रशब्दविशेषितोव्यवहारः साध्य इति द्वितीयकल्पं दूषयति—नापि द्वितीयः। वाच्यवाचकशक्तिग्रहस्य लक्षणप्रयोजनत्वाभ्युपगमे लक्षणं विनापि गवादिपदानामिव वृद्धव्यवहारादेव वाच्यवाचकसंगतिग्रहसम्भवे लक्षणवाक्यस्य वैयर्थ्यप्रसङ्गादित्यर्थः। पूर्वाधिगतस्य वाच्यवाचकभावसम्बन्धस्यैव लक्षणवाक्येन स्मार्यमाणत्वस्वीकारे तत्तच्छब्दादेव सम्बन्धस्मरणोपपत्तौ लक्षणोक्तेर्वैयर्थ्यात्। न केवलं लक्षणवाक्यस्यानर्थक्यमपित्वनवस्थारूपानर्थक्यमपि स्यादित्याह—अवगतसम्बन्धस्यापीति। लक्षणवाक्यस्योपयोगमाह—तस्मादिति। एतेनाखण्डार्थत्वं समर्थयति—तच्च सर्वमिति। स्वरूपमात्रं शब्देन बोध्यते, तदितरव्यावृत्तिस्त्वार्थिकी, न च स शब्दार्थः॥

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नन्वेवमपि नैतल्लक्षणम्; अप्राप्तयोः प्राप्तिः संयोगः, नित्यः सम्बन्धः समवाय इत्येवमादिसम्बन्धप्रतिपादकलक्षणवाक्येष्वव्याप्तेः। तेषां संसर्गगोचरप्रमितिजनकत्वादिति चेत्, मैवम्; तेषामपि स्वस्वपदस्मारितपदार्थानामन्योन्यसंसर्गागोचरप्रमितिजनकत्वात्। संसर्गगोचरप्रमितिजनकत्वशब्देन चास्यैवार्थस्य विवक्षितत्वात्। नाप्यतिव्याप्तिः; संसर्गप्रमिति जनकेषु गवानयनादिवाक्येषु लक्षणाभावात्।

यद्वा अपर्यायशब्दानामेकप्रातिपदिकार्थमात्रपर्यवसायित्वमखण्डार्थता। न चैवं पदान्तरवैयर्थ्यम्; व्यावर्त्यभेदादर्थवत्त्वोपपत्तेः। तथाहि—लोके प्रकृष्टप्रकाशश्चन्द्र इत्यत्र प्रकृष्टपदेनाप्रकृष्टखद्योतादेः प्रकाशपदेनाप्रकाशात्मप्रकृष्टसंतमसादेश्चव्यवच्छेदेन बुभुत्सितश्चन्द्रप्रातिपदिकमात्रार्थः प्रतिपाद्यते, अन्यथा वक्तुरबुभुत्सितमर्थं प्रतिपादयतोऽनवधेयवचनत्वप्रसङ्गात्। न च व्यावृत्तिपरत्वे व्यावृत्तिमत्परत्वे वा संसृष्टार्थत्वम्, स्वरूपमात्रपरत्वे च पदान्तरवैयर्थ्यमिति वाच्यम्; व्यावृत्तिद्वारा पदानां स्वरूपमात्रपर्यवसायित्वाङ्गीकारात्, व्यावर्त्यभेदेनावैयर्थ्याच्च। तथा वेदेऽपि 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादौ सत्यज्ञानानन्दानन्तात्मशब्दा अनृतजडदुःखान्तवत्त्वानात्मत्वभ्रान्तिनिवृत्तिद्वारा लक्ष्ये ब्रह्मणि पर्यवस्यन्ति। न चैवमनेकाकारविज्ञानजनकत्वात्पदानां लक्ष्यस्य ब्रह्मणोऽनेकाकारत्वप्रसङ्गः; लक्षणासमये भिन्नाकारविज्ञानजनकानामपि पदानां तत्तद्भ्रान्तिनिवृत्तिमात्रप्रयोजनकतया लक्ष्ये ब्रह्ममात्रे तात्पर्येण पर्यवसानात्। एवं च तत्तच्छब्दजन्यविज्ञानानां तत्तद्भिन्नाकारसमर्पणां नान्तरीयकतया तत्तद्विरोध्याकारनिवर्तकत्वाद्वाक्यस्याखण्डार्थत्वसिद्धिः।

अथ संयोगादिसम्बन्धप्रतिपादकलक्षणवाक्येषु निरुक्ताखण्डार्थत्वलक्षणस्याव्याप्तिं शङ्कते—नन्वेवमिति। संयोगसमवायादिसम्बन्धप्रतिपादकलक्षणवाक्यानामपि स्वस्वपदस्मारितपदार्थानामन्योऽन्यसंसर्गागोचरप्रमाजनकत्वात्। एतेषु वाक्येषु संसर्गस्याबुभुत्सितत्वादित्यभिप्रेत्य दूषयति—मैवं तेषामपोति। गवानयनवाक्येष्वतिव्याप्तिं वारयति—नापीति।

संग्रहश्लोकस्थं द्वितीयलक्षणं संघटयति—यद्वेति। पदान्तरप्रयोगावैयर्थ्यं लौकिकोदाहरणेनोपपादयति—तथाहीत्यादिना। व्यवच्छेद्यभेदेन लोकेऽपि प्रकृष्टप्रकाशशब्दयोरर्थवत्त्वोपपत्त्या प्रकृष्टप्रकाशश्चन्द्र इत्यत्र यथा बुभुत्सितश्चन्द्रप्रातिपदिकार्थमात्रः प्रतिपाद्यते, तथा सत्यादिवाक्येष्वपि बोध्यम्। प्रकर्षादिसंसर्गपरत्वे दोषमाह—अन्यथेति। स्वरूपमात्रे पृष्टे गुणादिसंसर्गं प्रतिपादयतोऽश्रद्धेयवचनत्वप्रसक्तिरित्यर्थः। पूर्वपक्षिणा त्रेधाविकल्प्योक्तं दोषद्वयमधुनोद्धरति—न च व्यावृत्तीति। प्रकृष्टप्रकाशश्चन्द्र इत्यादिलौकिकवाक्येषूदाहृतं लक्षणं विवक्षितसत्यादिवाक्येषु संघटयति—तथा वेदेऽपीति। सत्यादिपदानां भिन्नाकारविज्ञानजनकानामपि लक्षणासमये तत्तद्भ्रान्तिनिवृत्तिमात्रप्रयोजनकतया लक्ष्ये शुद्धब्रह्ममात्रे तात्पर्येण पर्यवसानान्न लक्ष्यस्य ब्रह्मणोऽनेकाकारत्वप्रसक्तिरित्याह—न चैवमित्यादिना। विधिमुखेषु वाक्येषु निरुक्तन्यायं निषेधविधया प्रतिपादकेष्वपि वाक्येष्वतिदिशति—एवं चेति। तस्माद्वेदान्तवाक्यानामखण्डार्थत्वसिद्धिः। एवं च विरोधिनिवृत्त्यर्थमेव

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

उक्तं चैतत्सुरेश्वराचार्यैः—

"प्रतिपद्य पदार्थं हि विरोधात्तद्विरोधिनः ।
पश्चादभावं जानाति वध्यघातकवत्पदात् ॥१॥
शब्दात्प्रतीयते तावत्सङ्गतिर्धर्मधर्मिणोः ।
मानान्तरादपोहस्तु न शाब्दस्तेन स स्मृतः ॥२॥
तत्रानन्तोऽन्तवद्वस्तुव्यावृत्त्यैव विशेषणम् ।
स्वार्थार्पणपणाड्या च परिशिष्टौ विशेषणम् ॥३॥
तद्विरोध्यर्थसंत्यागः सामर्थ्यात्स्यान्न शब्दतः ।" इति ॥

न च गुणगुण्यादिभावप्रतिपादनेऽपि तत्तद्विरोध्याकारनिवृत्त्युपपत्तेः कथमखण्डैकरसत्वसिद्धिरिति वाच्यम्; ब्रह्मशब्दार्थमात्रस्यैव बुभुत्सितत्वात् । सर्वतोऽनवच्छिन्नवस्तुप्रतिपादनपरब्रह्मानन्तशब्दाभ्यां विरोधाच्च, एकधैवानुद्रष्टव्यमेकमेवाद्वितीयमित्याद्येकरसत्वप्रतिपादकवाक्यविरोधाच्च, नेह नानास्ति किंचनेत्यनेकरसत्वप्रतिषेधाच्च ।

न चाप्रसिद्धत्वाद्ब्रह्मणो लक्ष्यत्वासम्भवः; प्रत्यगात्मतया स्वतः सामान्येन प्रसिद्धत्वात् । न च तथात्वे लक्षणवैयर्थ्यम्; लक्षणस्य विशेषाकारसमर्पणार्थत्वात् । अन्यथा 'गन्धवती पृथिवी' 'नित्यज्ञानाधार ईश्वरः' इत्यादिलक्षणानामपि लक्ष्यस्याप्रसिद्धत्वप्रसिद्धत्वयोर्वैयर्थ्यापातात् । एतेन 'सोऽयं देवदत्तः' इत्यत्रापि तत्कालोपलक्षितस्यैतत्कालवैशिष्ट्यं प्रतिपाद्यत इत्येतन्निरस्तम्; देवदत्तस्वरूपमात्रस्यैव बुभुत्सितत्वात् । एतत्कालवैशिष्ट्यस्य-

---

तत्तदाकारविधानं यत्किञ्चिदुक्तं तत्सुरेश्वराचार्यवचनेन द्रढ़यति—उक्तं चैतदिति । सत्यं ज्ञानमनन्तमिति वाक्यव्याख्यानावसरे तैत्तिरीयके वार्त्तिके इतिशेषः । पदात्सत्यादेः सत्यत्वादिपदार्थं ब्रह्मणि ज्ञात्वा तेन पश्चाद्विरोधात्कारणाद्विरोधिनोऽनृतादेरभावं जानाति । यथाऽऽखुभूषितां भूमिमवलोक्यार्थान्मार्जाराभावोऽवगम्यते तद्वदित्यर्थः । तत्राह—शब्दादिति । तत्र प्रथमं सत्यत्वादेर्धर्मस्य ब्रह्मणो धर्मिणश्च शब्दाच्छक्तिग्रहो भवति । विरोधिव्यावृत्तिरूपोऽपोहस्तु मानान्तरादनुपपत्तिलक्षणाज्ज्ञायते । तस्मादपोहो न शाब्दः । तत्रापि सत्यं ज्ञानमनन्तमिति त्रयाणां वैषम्यमाह—तत्रानन्त इति । सत्यज्ञानयोर्विरोधिव्यावृत्तिनिमित्तमाह–तद्विरोधीति । तस्मादसत्यत्वादिविरोधिपदार्थानां निवृत्तिरर्थतो भवति, न शब्दत इति भावः । पुनरखण्डार्थतामाक्षिपति—न च गुणेति । ब्रह्मविदाप्नोति परमिति श्रुतस्य ब्रह्ममात्रस्य बुभुत्सितत्वात्, बुभुत्सितार्थपराभ्यां ब्रह्मानन्तशब्दाभ्यां विरोधात्, "एकधैवानुद्रष्टव्यमि"त्याद्येकरसत्वप्रतिपादकवाक्यविरोधात्, "नेह नानास्ति किञ्चने"त्याद्यनेकरसत्वनिषेधाच्चेतिसमाधानमाह—ब्रह्मशब्दार्थमात्रस्यैवेत्यादिना ।

सर्वप्रमाणागम्यतया ब्रह्मणो लक्ष्यत्वमाशङ्क्य समाधत्ते—न चाप्रसिद्धत्वादिति । सामान्यतः प्रसिद्धेऽपि लक्षणस्य विशेषाकारसमर्थकत्वानभ्युपगमे 'गन्धवती पृथिवी' 'नित्यज्ञानाधार ईश्वर' इत्यादिलक्षणानामपि लक्ष्यस्य प्रसिद्धत्वाप्रसिद्धत्वाभ्यां वैयर्थ्यापातस्य तुल्यत्वात् । सोऽयं देवदत्तः इत्यादिप्रत्यभिज्ञास्थले पूर्वपक्षिणोक्तस्याक्षेपस्य प्रतिक्षेपायोक्तन्यायमतिदिशति—एतेनेति । तस्यैव विवरणमाह—देवदत्तेति । यद्दृष्टं न तद्बुभुत्सितमिति नैतत्कालविशिष्टस्य बुभुत्सितत्वमिति भावः ।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दृष्टेत्वेनाबुभुत्सितत्वात्। न च पूर्वकालोपलक्षितस्यैतत्कालवैशिष्टचप्रतिपादनेऽपि भेद भ्रमनिरासः सिध्यतीति वाच्यम्; एतत्कालविशिष्टस्य पूर्वकालसम्बन्धासम्भवेन तदुपल क्षितत्वस्यासम्भवात्, तयोरभेदप्रतिपादनस्याशक्यत्वात्।

ननु तथापि पूर्वकालोपलक्षितस्यैतत्कालवैशिष्टचसम्भवात्सम्भवत्येव तयोरभेदप्रति पादनमितिचेत्, मैवम्; विकल्पासहत्वात्। किं पूर्वकालोपलक्षितस्यैतत्कालविशिष्टेनाभे प्रतिपाद्यत इत्युच्यते? किं वा पूर्वकालोपलक्षिते वर्तमानकालवैशिष्टचलक्षणधर्मप्रतिपाद नार्थादभेदः सिद्धचतीति? नाद्यः; विशिष्टाविशिष्टस्वरूपयोरभेदासम्भवात्। तथा सति वर्तमानकालविशिष्टस्य पूर्वमपि सद्भावप्रसङ्गात्। नापि द्वितीयः; साक्षादेवाभेदप्रति पादने सम्भवति परम्परया तत्प्रतिपादनाश्रयणस्यायुक्तत्वात्। उभयपदलक्षणाश्रय कल्पनागौरवात्तथाश्रीयत इति चेत्, मैवम्; अत्रापि परम्परया अभेदप्रतिपादनात्साक्षाद भेदप्रतिपादने बुद्धिलाघवस्य दर्शितत्वात्। तथापि विनिगमनायां को हेतुरिति चेत्, बुभुत्सितार्थस्य साक्षात्प्रतिपादनलाभ एवेति ब्रूमः। उक्तं च प्रतिज्ञावचनस्य साधनाङ्गत्व माचक्षाणेनाचार्यवाचस्पतिना—"अनित्यं शब्दं बुभुत्समानायानित्यः शब्द इत्यनुक्त्वा यदेव किञ्चिदुच्यते यत्कृतकं तदनित्यमिति वा, कृतकश्च शब्द इति वा, तत्सर्वमसम्बद्ध बुद्धचा न प्रत्येति प्रतिवादी" इति। एतेनोभयपदलक्षणास्वीकारे गौरवदोषो निरस्तो वेदितव्यः। बुभुत्सितार्थप्रतिपादनप्रयोजनतायां गौरवस्यैवोचितत्वात् 'प्रमाणवन्त्यदृष्टानि कल्प्यानि सुबहून्यपि' इति न्यायात्। तदेवमखण्डार्थत्वे न लक्षणासम्भवः।

नापि प्रमाणासम्भवः। तथाहि—सत्यज्ञानादिगीरेतत्संसर्गव्यतिरेकिणि।

अर्थे प्रमाणं मानत्वान्नयनादिप्रमाणवत्॥२०॥

बुभुत्सितैक्यविरोधादपि न पूर्वकालोपलक्षितस्यैतत्कालवैशिष्टचप्रतिपादनं सम्भवतीत्याशङ्क्य दूषयति—न च पूर्वेति। न चैतत्कालविशिष्टस्य पूर्वकालसम्बन्धः सम्भवति। अतस्तयोर्नैक्य मिति भावः।

अथतोऽभेदलाभापेक्षया उभयोस्तदिदंपदयोर्लक्षणैकस्मिन् देवदत्तस्वरूपे साक्षादभेदप्रतिपादनं वरमित्याशयेन द्वितीयं कल्पमुत्थाप्योपपादयति—ननु तथापीत्यादिना। विकल्प्य दूषयति—नाद्य इति। तत्राद्य एतत्कालविशिष्टस्य पूर्वकालोपलक्षितस्य चाभेदाभावमुपपादयति—तथा सतीति। द्वितीये साक्षाच्छब्दादभेदप्रतिपादने सम्मतिपरम्परयाऽर्थतोऽभेदप्रतिपादनमयुक्तम्। न चोभयपदलक्षणाश्रयणे गौरवात्तथाश्रयणमुचितमिति वाच्यम्; परम्परयाऽभेदप्रतिपादनापेक्षया साक्षादभेदप्रतिपादने बुद्धि लाघवस्योक्तत्वात्। तत्र बुभुत्सितस्यार्थस्य साक्षात्प्रतिपादनलाभ एव विनिगमक इत्युपपादयति— तथापीति। तत्राचार्यवाचस्पतिवचनं प्रमाणमाह—उक्तं चेति। असम्बद्धबुद्धचा=हेतूदाहरणा वयद्वयवादिनः सौगतस्येदं सर्वमसम्बद्धबुद्धचभिधानं न प्रतिवादिनो बोधजनकमिति। निरुक्तरीत्या बुभुत्सितार्थप्रतिपादनाय न गौरवं दोषावहमितिसविवरणमाह—एतेनेत्यादिना। लक्षणोपपादनमुप संहरति—तदेवमिति।

प्रमाणं निरूपयितुमुपक्रमते—नापीति। श्लोकेन प्रमाणं सङ्कलयति—सत्यज्ञानादीति। एतत्=

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सत्यादिवाक्यमेतत्पदार्थसंसर्गातिरिक्तेऽर्थे प्रमाणं, प्रमाणत्वाच्चक्षुरादिवत् । विपक्षे चैकरसत्वप्रतिपादकश्रुतीनामुदाहृतानामप्रामाण्यप्रसङ्गः, बुभुत्सिते ब्रह्मणि प्रामाण्याभावप्रसङ्गश्च बाधकस्तर्क उन्नेयः । यत्तु वाक्यत्वाद् गवानयनादिवाक्यवत् संसर्गपरत्वानुमानं, तदेकरसत्वप्रतिपादकश्रुतिविरोधात्कालात्ययापदिष्टम्, उक्तरीत्या च संसर्गप्रतीतिजनकत्वाभावेऽपि वाक्यत्वोपपत्तेः संदिग्धव्यतिरेको हेतुः । आकाङ्क्षासंनिधियोग्यतावन्ति पदानि वाक्य'मिति वाक्यविदः, ननु संसर्गप्रमितिजनकान्यपीति; विशेषणवैयर्थ्यात् । आचार्यशबरस्वामिना च 'शास्त्रं शब्दविज्ञानादसंनिकृष्टेऽर्थे विज्ञानमि'त्येतावत एव लक्षणस्याभिधानात् । प्रातिपदिकमात्रार्थप्रश्नोत्तरत्वानुपपत्तिश्च, लौकिकवैदिकलक्षणवाक्यानामेकप्रातिपदिकार्थमात्रपर्यवसायित्वे प्रमाणम् । प्रदर्शिता च तत्रानुपपत्तिः—अबुभुत्सितार्थप्रतिपादनेऽनवधेयवचनत्वप्रसक्तिरिति । तदेवमशेषोपनिषदामखण्डैकरसे ब्रह्मणि स्वतः सिद्धमेव प्रामाण्यमिति सिद्धम् ।

ननु किमिदं प्रामाण्यस्य स्वतस्त्वम् ? न तावत्स्वत एव जन्म; स्वस्य स्वहेतुकत्वविरोधात् । नापि प्रमाणादेव जन्म; ज्ञानस्य गुणत्वेन स्वप्रामाण्यं प्रति समवायिकारणत्वासम्भवात् । नापि ज्ञानसामग्रीतो जन्म; प्रामाण्यस्योपाधित्वे जातित्वे च जन्मासम्भवात् ।

सत्यादि । प्रमाणमित्यन्तो ग्रन्थः प्रतिज्ञावाक्यम् । सिद्धसाधनतावारणाय संसर्गव्यतिरेकिणीति पदम् । यत्किञ्चित्संसर्गव्यतिरिक्तत्वेनार्थान्तरता स्यात्तद्वारणायैतत्पदम् । सत्यज्ञानादिवाक्यस्य संसर्गबोधपरत्वेऽद्वैतश्रुतीनामप्रामाण्यप्रसङ्गः, बुभुत्सिते केवले ब्रह्मणि प्रामाण्याभावप्रसङ्गश्च बाधकस्तर्कः इत्याह—विपक्षे चेत्यादिना । पूर्ववादिनोऽनुमानं बाधदोषदूषितमित्याह—यत्तु वाक्यत्वादिति । उक्तरीत्या सत्यादिवाक्यानां संसर्गप्रतीतिजनकत्वाभावेऽपि हेतुरयं सन्दिग्धव्यतिरेकः । सन्दिग्धव्यतिरेकः=सत्यादिवाक्यात्मके पक्षे सन्दिग्धः साध्यव्यतिरेको यस्य हेतोरिति विग्रहः । सत्यादिवाक्यस्य संसर्गपरत्वाभावेऽपि वाक्यत्वभङ्गप्रसङ्गं बाधकं परिहरति—आकाङ्क्षेति । वाक्यत्वसिद्धये विशेषणवैयर्थ्यान्नसंसर्गप्रमितिजनकानीतिविशेषणस्य किञ्चित्प्रयोजनमित्याह—नन्विति । तत्र शाबरभाष्यं प्रमाणमाह—आचार्येत्यादिना । शब्दविषयविज्ञानात्प्रमाणान्तरेणानधिगतेऽर्थे यद्विज्ञानं जायते, तच्छास्त्रं शब्दप्रमाणमिति शाबरवाक्यार्थः । अत्र लक्षणेऽनुवादविसम्वदवारणायासन्निकृष्टपदम् । अपेक्षितादिपदवारणायार्थपदम् । अनुमानत्ववारणाय शब्दविज्ञानग्रहणम् । नात्र शब्दप्रमाणे संसर्गविषयत्वं स्वामिना निविष्टम् । प्रातिपदिकार्थमात्रस्य अखण्डार्थत्वेऽर्थापत्तिप्रमाणमप्याह—प्रातिपदिकेति । तामेव स्फोरयति—अबुभुत्सितेति । वादार्थमुपसंहरन्वक्ष्यमाणमपि संकेतयति—तदेवमिति ।

पूर्ववादी निरुक्तं स्वतःसिद्धं प्रामाण्यमाक्षिपति—ननु किमिदमिति । (१) प्रामाण्यस्य स्वतस्त्वं नाम प्रमात्वस्य जन्म प्रमात्वादिति वक्तुं न शक्यं; प्राक्क्षणे स्वस्यैव कारणत्वेन सत्त्वं, तदैव कार्यत्वेनासत्त्वमित्युक्ते विरोधात् । (२) नापि प्रमात्वाश्रयप्रज्ञानादेव प्रमात्वस्य जन्मेति वक्तुं युक्तम्; समवायिकारणत्वं द्रव्यस्यैव विज्ञेयमिति नियमेन ज्ञानस्य गुणत्वेन स्ववृत्तिप्रामाण्यं प्रति समवायिकारणत्वासम्भवात् । (३) नापि स्वकीयज्ञानसामग्रीनिरूपितजन्यत्वं प्रमात्वेऽभ्युपगन्तुं शक्यं; प्रमात्वस्योपाधित्वे जातित्वे चाभ्युपगमे जन्यत्वासम्भवात् । तदेवासम्भवमुपपादयति—

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तथाहि—उपाधिपक्षे स्मृतित्वानधिकरणस्य ज्ञानस्य बाधात्यन्ताभावः प्रामाण्यम्। न च तस्योत्पत्तिः सम्भवति; अत्यन्ताभावत्वादेव। नापि जातेर्जन्म; नित्यत्वात्। ज्ञानसामग्री-जन्यत्वं प्रमायाः प्रामाण्यस्य स्वतस्त्वमिति चेत्, मैवम्; अप्रमाया अपि स्वतस्त्वप्रसङ्गात्; तस्या अपि ज्ञानसामग्रीजन्यत्वात्। अथ ज्ञानसामग्रीमात्रजन्यत्वं स्वतस्त्वम्, अप्रमा तु न तन्मात्रजन्या, दोषसहकृतज्ञानसामग्रीजन्यत्वादिति चेत्, मैवम्; विकल्पासहत्वात्। तथाहि—दोषाभावसहकृतज्ञानसामग्रीजन्यत्वं मात्रशब्दार्थः? किं वा दोषासहकृतज्ञानसामग्री-जन्यत्वम्? नाद्यः; परतः प्रामाण्यवादिमतानुप्रवेशप्रसङ्गात्। तेऽपि हि दोषाभावसहकृत-ज्ञानसामग्रीजन्यत्वमेव परतः प्रामाण्यमितीच्छन्ति। नापि द्वितीय, विशेषदर्शनस्य भ्रम-निवृत्तिहेतुत्वे तद्विपर्ययस्य भ्रमहेतुत्ववद्दोषसहकृतज्ञानसामग्रीजन्यं ज्ञानमप्रमेत्यङ्गी-कुर्वता प्रमां प्रति दोषाभावस्य हेतुताया अनिराकार्यत्वात्। नन्वीश्वरज्ञान इव दोषाभाव-स्यावर्जनीयतया अस्मत्प्रमास्वपि तथासन्निधिः किं न स्यात्? नहीश्वरज्ञानेऽपि दोषाभाव-प्रयोजक इति युक्तं वक्तुम्; तत्प्रयुक्तत्वस्य तदन्तर्भूतसामग्रीजन्यत्वानतिरेकात्, तस्य च नित्यतया विशिष्टसामग्रीजन्यत्वादिति चेत्, मैवम्; अन्तरेणापि तत्सामग्रीजन्यत्वं नित्य-द्रव्येषु गुणवत्त्वप्रयुक्तद्रव्यत्ववत्तत्प्रयुक्तत्वोपपत्तेः। न च दोषाभावस्याभावत्वादेवाकारण-त्वम्; विशेषदर्शनाभावस्य भ्रमहेतुत्ववत्प्रमाणाभावस्य प्रमेयाभावप्रमितिहेतुत्ववद्विहिता-कारणस्य प्रत्यवायहेतुत्ववच्च तदुपपत्तेः।

न च प्रामाण्यस्य स्वतस्त्वे मानमस्ति। प्रामाण्यं,ज्ञानहेतुमात्रजन्याश्रयमप्रामाण्येतरत्वे

तथाहीति। (४) नापि ज्ञानसामग्रीजन्यप्रमाश्रितत्वं प्रामाण्यस्य स्वतस्त्वम्; अप्रमाया अपि स्वतस्त्वप्रसङ्गात्। प्रमावदप्रमाया अपि ज्ञानसामग्रीजन्यत्वात्। (५) नापि ज्ञानसामग्रीमात्रजन्य-प्रमाश्रितत्वं प्रमात्वस्य स्वतस्त्वम्; अप्रामाण्यस्य तु दोषसहकृतसामग्रीजन्यत्वादिति वाच्यम्; विकल्पासहत्वात्। मात्रपदव्यावर्त्यं विकल्प्य दूषयति—तथाहीति। तत्र नाद्यः, परतस्त्वेऽपि स्वतः प्रामाण्योपपत्तेः। तथा चार्थान्तरतापत्तिः। द्वितीयं प्रत्याचष्टे—नापि द्वितीयः। अप्रमाणज्ञानं प्रति प्रमाणज्ञानहेतुभूतविशेषदर्शनस्याभाववदप्रमाणज्ञानहेतुदोषस्याभावोऽपि प्रमाणहेतुरस्त्येव भ्रमप्रमाज्ञानयोः स्वभावस्य तथात्वनिश्चितत्वात्। ननु जन्या प्रमा दोषाभावसहकृतज्ञानसामग्रीजन्या प्रमात्वादीश्वरप्रमावदित्यनेन प्रमात्वस्य स्वतस्त्वसिद्धिः। अत्र साध्यवैकल्यं परिहरति—नहीश्वरेति। प्रतिक्षिपति—मैवमित्यादिना। यथा नित्यद्रव्यनिष्ठद्रव्यत्ववत्तायां गुणवत्त्वघटितसामग्रीजन्यत्वा-भावेऽपि गुणवत्त्वप्रयुक्तत्वमस्ति, तथा परमेश्वरज्ञाने दोषाभावघटितसामग्रीजन्यत्वासत्त्वेऽपि दोषाभाव-प्रयुक्तत्वमभ्युपगतमेव। न चाभावस्य निःस्वभावतया तत्र कारणत्वमयुक्तमिति वाच्यम्; यथा विशेषस्य स्थाणुत्वस्य दर्शनाभावः पुरुषभ्रमहेतुः, यथा प्रमाणाभावः प्रमेयाभावप्रमितिहेतुर्यथा च नित्यादिविहितकर्मानुष्ठानाभावः प्रत्यवायस्य हेतुस्तद्वद्दोषाभावस्यापि प्रमात्वहेतुत्वोपपत्तेः। तस्मात्स्वतःप्रामाण्यमिति लक्षणासम्भवमिति।

प्रमात्वगतस्वतस्त्वे प्रमाणमाक्षिपति—न च प्रामाण्यस्येति। रत्नदीपावलीकृतमनुमान-मुद्भावयति—प्रामाण्यमिति। ज्ञानहेतुजन्याश्रयत्वसाधने सिद्धसाधनत्ववारणाय मात्रपदम्। अप्रमा

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सति ज्ञानैकधर्मत्वात्, ज्ञानत्ववत् । दोषजन्यत्वेन व्यभिचारो मा भूदिति ज्ञानैकधर्मत्वादित्युक्तम् । तथा प्रामाण्यमुक्तविधमप्रामाण्येतरत्वे सति ज्ञानत्वन्यूनवृत्तित्वात्, प्रत्यक्षत्ववदित्यनुमानं मानमिति केचित्, तन्न; विकल्पासहत्वात् । तथाहि—किं तथाविधव्यक्तिवृत्तितामात्रं विवक्षितम्? उतान्यावृत्तित्वे सति तथाविधव्यक्तिवृत्तित्वम्? नाद्यः; अंशतःसिद्धसाधनत्वात्, अनुव्यवसायानुमित्युपमितीनां स्वतः प्रमात्वस्य परैरप्यङ्गीकारात् । न द्वितीयः; आद्यप्रयोगे दृष्टान्तस्य साध्यविकलत्वात्, ज्ञानत्वस्य दोषजन्याप्रमाणज्ञानवृत्तित्वस्याप्यङ्गीकारात् । नाप्रमाणज्ञाने ज्ञानत्वस्य वृत्तिस्तस्य ज्ञानाभासत्वादिति चेत्, मैवम्; तथा सत्यप्रामाण्येतरत्वे सति इति विशेषणस्य वैयर्थ्यात्, अप्रमाणज्ञानस्य ज्ञानाभासत्वेनाप्रामाण्यस्य ज्ञानवृत्तित्वाभावात् । द्वितीयानुमाने च संशयत्वादिना व्यभिचारः । तथाहि—तदपि ह्यप्रामाण्येतरत्वे सति ज्ञानत्वन्यूनवृत्ति भवति न तु भवति ज्ञानहेतुमात्रजन्याश्रयम्, तिमिरादिदोषजन्याश्रयत्वात् । दृष्टान्तस्य साध्यविकलता च; प्रत्यक्षत्वस्यापि परतःप्रामाण्यवादिना ज्ञानहेतुमात्रजन्याश्रयत्वानाश्रयणात् । प्रमात्वमेव यस्य ज्ञानहेतुमात्रजन्याश्रयं न भवति, गुणविशिष्टज्ञानसामग्रीजन्यवृत्तित्वात्, तस्य कथं तदवान्तरजातिप्रत्यक्षत्वं तद्धेतुमात्रजन्याश्रयं स्यात्?

अस्ति च परतस्त्वेऽपि प्रयोगः—अनीश्वरप्रमा, विज्ञानहेत्वतिरिक्तहेत्वधीना, कार्यत्वाद्घटवत् । ननु किं ज्ञानव्यक्तेः प्रमाव्यक्तितोऽस्ति कश्चिद्विशेषः? किं वा प्रमाव्यक्तिरेव ज्ञान-

---

ज्ञानैकधर्मत्वात्तत्रातिव्याप्तिवारणाय—सत्यन्तदलम् । घटत्वादिवारणाय ज्ञानपदम् । हेतुगतज्ञानैकधर्मत्वादिति विशेषणस्य कृत्यमाह—दोषजन्यत्वेनेति । तदीयानुमानान्तरमाह—तथेति । ज्ञानत्वन्यूनवृत्तित्वमित्युक्तेऽप्रामाण्येऽतिव्याप्तिस्तद्वारणाय सत्यन्तदलम् । सत्तागुणत्वज्ञानत्वेष्वतिव्याप्तिवारणाय—ज्ञानत्वन्यूनवृत्तित्वपदम् । तत्राद्येंऽशतः सिद्धसाधनतामाह—अंशतः इत्यादिना । पूर्ववादिभिरप्यनुव्यवसायादिषु स्वतः प्रमात्वं स्वीकृतमितिसिद्धान्ते प्रतिपादयिष्यते । द्वितीये प्रथमप्रयोगे दृष्टान्ते साध्यवैकल्यमुपपादयति—ज्ञानत्वस्येति। दोषजन्येति=अतिरिक्तजन्येत्यर्थः। अप्रमाणज्ञानेऽतिव्याप्तिं वारयितुं शङ्कते—नाप्रमाणेति । ज्ञानाभासत्वादप्रमा न ज्ञानमित्युक्तेऽप्रामाण्येतरत्वे सतीति विशेषणस्य वैयर्थ्यात् । तथासति ज्ञानैकवृत्तित्वादित्येतावानेव हेतुरितिभावः । द्वितीयानुमाने पातितं व्यभिचारं स्पष्टयति—तथाहीति । प्रमात्वं ज्ञानहेतुमात्रजन्याश्रयकम्, अप्रामाण्येतरत्वे सति ज्ञानत्वन्यूनवृत्तित्वात्, प्रत्यक्षत्ववदिति हेतौ संशयत्वादिना व्यभिचारः । संशयत्वादावपि प्रकृतहेतुरस्ति, तत्र ज्ञानमात्रजन्याश्रयत्वं साध्यं नास्ति, तस्य हि तिमिरादिदोषजन्याश्रयत्वात् । दृष्टान्ते साध्यवैकल्यमुक्तं विशदयति—प्रत्यक्षत्वस्यापीति । गुणविशिष्टसामग्रीजन्यप्रमाश्रयं प्रमात्वमङ्गीकुर्वाणः कथं तदवान्तरजातिं प्रत्यक्षत्वं ज्ञानहेतुमात्रजन्याश्रयमङ्गीकुर्यादित्यर्थः ।

एवं प्रमात्वस्य स्वतस्त्वे लक्षणप्रमाणे निरस्य परतस्त्वे कुसुमाञ्जलीयमनुमानं दर्शयति—अनीश्वरप्रमेति । बाधासिद्धिवारणाय अनीश्वरप्रमेति विशेषणं युक्तम् (अतिरिक्तहेत्वनधीनत्वेन बाधः, कार्यत्वाभावेन चासिद्धिरिति बोध्यम्) । रत्नदीपावल्यामुक्तमनुमानदोषं विकल्प्य दूषयति—ननु किं ज्ञानव्यक्तेरिति । ज्ञानव्यक्तेः प्रमाव्यक्तितो भेदाङ्गीकारे प्रत्यक्षज्ञानव्यक्त्या

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

व्यक्तिः ? आद्ये प्रत्यक्षज्ञानव्यक्त्या स्पष्टो व्यभिचारः; प्रत्यक्षज्ञानव्यक्तेर्विज्ञानहेत्वतिरिक्त हेत्वधीनत्वाभावात्। द्वितीयेऽपि जन्यापि विज्ञानरूपा प्रमा न ज्ञानहेत्वतिरिक्तहेत्वधीनेति बाध इति चेत्, मैवम्; ज्ञानव्यक्तेः प्रमाव्यक्तितो भेदाभावेऽपि विज्ञानत्वप्रमात्वधर्मयोर्भेदात्। ततश्च घटत्वस्य पृथिवीत्वप्रयोजकातिरिक्तप्रयोजकत्वसाधन इव प्रमाया विज्ञानत्वप्रयोजकातिरिक्तप्रयोजकत्वसाधने बाधाभावात्। विपक्षे च प्रमात्वस्य विज्ञानत्वप्रयोजकमात्रप्रयोज्यत्वात्, ज्ञानत्ववदप्रमाज्ञानवृत्तित्वं स्यादिति बाधकस्तर्क उन्नेयः। ननु ज्ञानसामग्र्या एवानिरूपणात् तदतिरिक्तहेत्वधीनत्वं दुर्ज्ञानमिति चेत् मैवम्; एवं सत्यप्रमायाः परतस्त्वं दत्तजलाञ्जलि स्यात्। तदपि हि ज्ञानसामग्रीनिरूपणाधीननिरूपणं, तस्य दोषानुषक्तविज्ञानसामग्रीजन्यताप्रतिज्ञानात्। तस्मान्नोत्पत्तौ प्रमायाः स्वतस्त्वम्।

नापि ज्ञप्तौ। तथाहि—नीलसंवेदनस्य प्रामाण्यं नीलसंवेदनेनैवावेद्यत इति स्वतस्त्वमुच्यते? किंवा तद्वेदनग्राहकमात्रग्राह्यत्वेन ? नाद्यः; तस्य तत्राप्रमाणत्वात्। तथाहि—यदेतन्नीलप्रकाशनप्रत्यक्षं तन्नीलं प्रति तावत्प्रत्यक्षमिन्द्रियार्थसन्निकर्षोत्पन्नत्वात्। स्वप्रामाण्यपरिच्छित्तौ तु कथं तत्प्रमाणम् ? तस्य बहिरिन्द्रियैरसन्निकर्षात्। अपि च तत्प्रत्यक्षं विज्ञानस्यैव प्रामाण्यं गृह्णीयात् ? उत तत्फलस्य ? नाद्यः; ज्ञानस्य फललिङ्गानुमेयत्वेन तस्याः प्रत्यक्षतया तत्प्रामाण्यस्यापि प्रत्यक्षतानुपपत्तेः। फलस्यापि स्वप्रकाशतया बाह्येन्द्रिया-

---

व्यभिचारः सुस्पष्टः। तत्र प्रत्यक्षज्ञानव्यक्तौ कार्यत्वहेतुसत्त्वेऽपि विज्ञानहेत्वतिरिक्तहेत्वधीनत्वस्य साध्यस्याभावात्। अथ प्रमाव्यक्तिरेव ज्ञानव्यक्तिरिति द्वितीयेऽपि जन्याऽपि विज्ञानरूपा प्रमा न ज्ञानहेत्वतिरिक्तहेत्वधीनेति बाध इति। उभयदोषं प्रतिक्षिपति—मैवमित्यादिना। ज्ञानव्यक्ति-प्रमाव्यक्त्योर्भेदासत्त्वेऽपि विज्ञानत्वप्रमात्वयोर्भेदात् प्रमायामपि ज्ञानत्वप्रयोजकभिन्नप्रयोज्यत्वमिति। यथैकस्मिन् घटे द्रव्यत्वपृथिवीत्वघटत्वादीनां विभिन्नप्रयोजकत्वेन द्रव्यादीनामपि विभिन्नप्रयोज्यतेत्यर्थः। विज्ञानहेत्वतिरिक्तहेत्वधीनासत्त्वे बाधकमाह—विपक्षे चेति। प्रमात्व-ज्ञानत्वयोः प्रयोजकैकत्वे यत्र यत्र ज्ञानत्वं तत्र तत्र प्रमात्वमपि स्यात्, किन्तु ज्ञानत्वस्याप्रमायां सत्त्वेऽपि प्रमात्वं न दृश्यते। अतः प्रमात्वस्य प्रयोजकं ज्ञानत्वप्रयोजकातिरिक्तमिति मन्तव्यम्। न च ज्ञानसामग्रीनिरूपणासम्भवादेव तदतिरिक्तहेत्वधीनत्वं ज्ञातुं दुःशकमिति वाच्यम्; तथासति वेदान्त्यभिमतमप्रमायामपि परतस्त्वमपि दत्तजलाञ्जलि प्रसज्येत। तस्य दोषविशिष्टज्ञानसामग्रीजन्यत्वं त्वयाभ्युपेतमित्यतो नोत्पत्तौ प्रमायाः स्वतस्त्वमित्युपसंहरति—तस्मादिति।

ज्ञप्तौ स्वतस्त्वमाक्षिपति—नापीति। नीलविषयकज्ञाननिष्ठप्रमात्वं नीलविषयकज्ञानेनैवावगम्यत इति स्वतस्त्वमभिमतमुत नीलज्ञानग्राहकमात्रेण गृहीतं स्वतस्त्वमिति विकल्प्याद्यं दूषयति—नाद्य इति। नीलविषयज्ञानस्य स्ववृत्तिप्रमात्वग्राहकत्वाभावमेवोपपादयति—तथाहीति। इन्द्रियार्थसन्निकर्षजन्यत्वेन स्यादेतन्नीलप्रकाशनप्रत्यक्षं नीलं प्रति प्रत्यक्षं किन्तु स्ववृत्तिप्रामाण्यप्रकाशने कथं तन्नीलप्रकाशनप्रत्यक्षं प्रमाणं स्यात् ? प्रमात्वस्य बहिरिन्द्रियैः सन्निकर्षाभावात्। अपि च प्रत्यक्षं प्रमाणं ज्ञानवृत्तिप्रमात्वस्य ग्राहकमुत ज्ञानजन्यप्राकट्यरूपफलस्य ग्राहकं, आद्ये प्रत्यक्षत्वानुपपत्तिं दर्शयति—नाद्यः। तत्र हेतुमाह—ज्ञानस्येति। भाट्टमते ज्ञाततारूपफलानुमेयं ज्ञानं, तथा च ज्ञानस्या-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विषयत्वात्, तद्गतयथार्थत्वलक्षणप्रामाण्यस्यापि बाह्येन्द्रियप्रत्यक्षविषयत्वानुपपत्तेः। नापि द्वितीयः; ज्ञानग्राहकमात्रग्राह्यत्वे प्रामाण्यस्य क्वचिदपि ज्ञाने प्रमाणमप्रमाणं वेति संशयाभावप्रसङ्गात्। ननु ज्ञानग्राहकमात्रग्राह्यत्वेप्यर्थविशेषितत्वस्य सांशयिकत्ववत्प्रामाण्यस्यापि सांशयिकत्वमुपपद्यते। तथाहि—कुम्भज्ञानस्याम्भो विषयोऽभून्न वेति संशयाना दृश्यन्ते जनाः, साम्भसामनम्भसामपि कुम्भानामुपलम्भात्। एवं प्रामाण्येऽपि संशयः किं न स्यादिति चेत्, मैवम्; अम्भसः कुम्भग्राहकसामग्रीमात्रग्राह्यत्वानङ्गीकारात्, अङ्गीकारे वाऽविशेषेण सकलकलशानां सलिलवत्त्वप्रसङ्गात्। तस्मान्नारिकेलफलान्तर्गतसलिलादिवद्भिन्नसामग्रीग्राह्यत्वादेव तत्र संशयः। प्रामाण्ये तु न तथेति युक्तमुत्पश्यामः। किंच विज्ञानग्राहकसामग्रीमात्रग्राह्यतायां प्रामाण्यस्य शुक्तिकारजतादिबुद्धिष्वपि तद्ग्रहप्रसङ्गः, सत्यम्; गृहीतमेव तत् बाधकादपनीयते। यथाहुः—

'तस्माद्बोधात्मकत्वेन प्राप्ता बुद्धेः प्रमाणता।
अर्थान्यथात्वहेतूत्थदोषज्ञानैः अपोद्यते॥'इति। (श्लो० वा० २।५३)

तस्मादस्माकमिष्टप्रसञ्जनमिति चेत्, मैवम्;परतः प्रामाण्यप्रसङ्गात्। तथाहि—प्रसक्तमपि प्रामाण्यं रजतादिबुद्धिषु बाधकज्ञानादपनीयत इति वदता बाधकज्ञानाभावनिबन्धनमेव प्रामाण्यावधारणमभ्युपगतं स्यात्।

प्रत्यक्षतया ज्ञानगतप्रामाण्यस्यापि प्रत्यक्षत्वानुपपत्तेः। ज्ञाततारूपफलस्यापि स्वप्रकाशतया बाह्येन्द्रियाविषयत्वेन तद्गतप्रामाण्यस्यापि बाह्येन्द्रियप्रत्यक्षविषयत्वानुपपत्तेः। ज्ञानग्राहकादेव ज्ञानगतप्रामाण्ये ग्रहणं ज्ञप्तिस्वतस्त्वमिति द्वितीयपक्षं वारयति—नापि द्वितीयः। प्रामाण्यस्य ज्ञानग्राहकमात्रग्राह्यत्वे कुत्रचिदपि ज्ञाने प्रामाण्यसंशयाभावप्रसङ्गात्। तथा चाह—"प्रामाण्यं न स्वतो ग्राह्यं संशयानुपपत्ति"रिति। सामान्यज्ञानत्वे सति विशेषाज्ञानं संशयकारणम्। यथा स्थाणुपुरुषयोरुच्चैस्त्वस्य ज्ञातत्वेऽपि स्थाणुत्वाज्ञानादेव संशयो भवति। किन्त्वत्र धर्मिग्राहकसामग्रीतो ज्ञानगतप्रमात्वस्यापि ग्रहणात् संशयो नोपपद्यते। ननु ज्ञानस्य तद्गतप्रामाण्यस्य च ज्ञानग्राहकग्राह्यत्वे समानेऽपि घटस्य तद्गतजलस्य च भिन्नसामग्रीग्राह्यत्वेन जलविषये संशयः सम्भवति, साम्भसामनाम्भसामपि घटानामुपलम्भात्, तथैव प्रामाण्येऽपि संशयः सम्भवतीति चेन्न; जलस्य घटग्राहकसामग्रीमात्रग्राह्यत्वानङ्गीकारात्। घटग्राहकसामग्र्या जलस्य ग्रहणाङ्गीकारेऽविशेषेण सकलघटानां जलवत्त्वप्रसङ्गात्। तत्र दृष्टान्तमाह—तस्मादिति। प्रामाण्ये तद्विपरीततां दर्शयति—प्रामाण्ये त्विति। बाधकान्तरमाह—किं चेति। सत्यमित्यर्धस्वीकृतिः। अनभिमतांशमाह—बाधकादिति। तत्र भट्टपादसम्मतिमाह—यथाहुरिति। बोधरूपेण शुक्तिरजतादिज्ञानेष्वपि पूर्वं प्रमात्वमेव गृह्यते, बाधकज्ञानेन हेतुगतदोषज्ञानेन च प्रमात्वं बाधितं भवति। तस्माच्छुक्तिरजतादिज्ञानेषु प्रमात्वग्रहणमस्माकमिष्टप्रसञ्जनमिति भावः। इष्टतायामनिष्टतामुपपादयति—मैवमिति। परतः प्रामाण्यापत्तिं विशदयति—तथाहीति। तथासति बाधकज्ञानाभावनिबन्धनमेव प्रामाण्यावधारणं त्वयाप्यभ्युपगतं स्यादिति भावः।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

न च ज्ञप्तिस्वतस्त्वे मानमस्ति। ननु 'प्रमा, स्वतो ज्ञायते, परनिरपेक्षोत्पत्तिकत्वात्, ज्ञानवत्', तथा 'प्रामाण्यं, स्वतो ज्ञायते, अप्रामाण्येतरत्वे सति ज्ञानैकधर्मत्वात्, ज्ञानत्ववत्' इत्यस्त्येवानुमानमिति चेत्, मैवम्; आद्यप्रयोगे परतः प्रामाण्यवादिनं प्रति हेतोरसिद्धेः दृष्टान्ताभावाच्च। न हि पक्षीकृतां प्रमां विपक्षकुक्षिनिक्षिप्तामप्रमां च विहाय ज्ञानस्या परा कोटिरस्ति, या दृष्टान्तपदवीमुपारोहेत्। द्वितीये च प्रयोगे प्राभाकरस्य स्वयंप्रभत्वे ज्ञानैकधर्मे, भाट्टस्य च ज्ञाततानुमेयत्वधर्मे व्यभिचारः। तयोर्ज्ञानैकधर्मत्वेऽपि ज्ञानग्राहकसामग्रीमात्रग्राह्यत्वाभावात्। अन्यथा तत्र वादिनां विप्रतिपत्त्यभावप्रसक्तेः। ज्ञप्तिपरतस्त्वे चानुमानं न्यायकुसुमाञ्जलावाह स्म चोदयनः 'प्रामाण्यं, परतो ज्ञायते, अनभ्यासदशायां सांशयिकत्वात्, अप्रामाण्यवत्'। विपक्षे प्रामाण्ये संशयो न स्यात् ज्ञाननिश्चायकादेव तन्निश्चयप्राप्तेर्बाधकस्तर्कः। ननु नैवमनुमानमुदेति, धर्मिहेत्वोरसिद्धेः। तथाहि— प्रामाण्यं प्रवृत्तिसामर्थ्यलिङ्गावगम्यं भवद्भिरुपगम्यते, तस्य च लिङ्गस्य प्रवृत्तिः प्रामाण्यसंशयपूर्विका। असंदिग्धे सिषाधयिषाभावात्, अनुमानाप्रवृत्तेः। तत्संशयश्च क्वचिन्निश्चयाधीन इति प्रामाण्ये संशयनिश्चययोरन्योन्याश्रयादनवस्थानाद्वा नैकमपि सिद्ध्येदिति चेत्, मैवम्; विकल्पासहत्वात्। किं स्वार्थानुमानमसंदिग्धे न प्रवर्तते? किंवा परार्थम्? नाद्यः; सद्यःसमुन्मीलितविलोचनस्य शिखरिशिखरविपरिवर्तमानधूमलेखावलोकनसमनन्तरमप्रत्यूहं धूमध्वजमनीषासमुन्मेषात्। नापि द्वितीयः; विपर्यस्तमपि प्रति प्रतिवादिनमनुमानप्रयोगोपगमात्। अन्यथा जल्पवितण्डयोः प्रमाणतर्काभ्यां स्वपरपक्षसाधनोपालम्भा

ज्ञप्तिस्वतस्त्वे प्रमाणमाक्षिपति—न चेति। तत्र रत्नदीपावलीयमनुमानमुद्भावयति—ननु प्रमेति आद्यप्रयोगे दोषद्वयमाह—परतः प्रामाण्येति। द्वितीये च प्रयोगे अप्रमात्वेतरत्वे सति ज्ञानैकधर्मत्वमिति हेतौ प्राभाकरीरीत्या स्वयंप्रभत्वे ज्ञानैकधर्मे व्यभिचारः, भाट्टमते च ज्ञाततानुमेयत्वधर्मे व्यभिचारः स्यात्। उभयोर्हेतुसत्त्वेऽपि निरुक्तसाध्याभावादिति। ज्ञानग्राहकसामग्रीमात्रेण उभयोर्धर्मयोर्गृह्यमाणे वादिनां विप्रतिपत्त्यभावप्रसङ्ग इत्याह—अन्यथेति। यदि ज्ञानग्राहकादेव तयोरपि ग्रहणं स्यात्तर्हि ज्ञानवदेव तयोरपि वादिनां विवादो न स्यादितिभावः। करतलस्पर्शवत्त्वादिप्रत्यक्षे मुग्धस्यापि संशयाभावो दृश्यते। ज्ञप्तिपरतस्त्वे न्यायकुसुमाञ्जल्यामुदयनाचार्य आह— प्रामाण्यमित्यादिना। विपक्षे बाधकतर्कमाह—विपक्षे इति। रत्नदीपावल्यामुक्तं दोषमनुवदति— ननु नैवमिति। धर्मिहेत्वोरसिद्धेरित्यत्र निर्णीतप्रामाण्याभावाद्धर्म्यभावः, संशयाभावाच्च हेत्वभाव इतिसमुदायार्थः। संशयाभावेनापि निश्चयोपपादनसम्भवे विकल्प्य धर्मिहेतू समर्थयते—मैवमित्यादिना। किं सन्दिग्धे स्वार्थानुमानं न प्रवर्तते, परार्थानुमानं वा न प्रवर्तते? नाद्यः, स्वार्थानुमाने संशयस्यापेक्षा, सद्यः समुन्मीलितलोचनस्य पुरुषस्य पर्वतशिखराग्रभागे धूमदर्शनानन्तरमप्रतिबद्धं पर्वतो वह्निमानिति ज्ञानं भवति। स्वार्थानुमानं नाम हितसाधनादिज्ञानप्रामाण्यानुमानमिति। परार्थानुमानेऽपि न संशयपूर्वकत्वनियमोऽस्ति, विपर्यस्तं प्रत्यप्यनुमानप्रयोगादित्याह—नापि द्वितीयः। यं प्रत्यनुमानं प्रयुज्यते, स प्रतिवादी न तत्र संशयालुरपितु विपर्ययग्रस्तोऽस्ति। अन्यथा जल्पवितण्डयोः प्रमाणतर्काभ्यां स्वपक्षसाधनपरपक्षनिराकरणोपलम्भाभावप्रसङ्गात्। "निश्चितौ

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सम्भवात्। 'संदिग्धे न्यायः प्रवर्त्तते' इति वचनस्यायोगव्यवच्छेदपरत्वात्, क्वचित्साधकबाधकप्रमाणानुदयात्संदेहे सति न्यायप्रवृत्त्युपपत्तेः। न चानभ्यासदशायामिति विशेषणस्य वैयर्थ्यम्; असिद्धिवारकत्वात्। न च व्यभिचारवारकमेव हेतोर्विशेषणमिति नियमः; चक्षुस्तैजसं रूपादिषु मध्ये रूपस्यैवाभिव्यञ्जकत्वात्, प्रदीपवदित्यादिचिरन्तनानुमानेष्वसिद्धिनिवारकाणां विशेषणानां बहुलमुपलम्भात्। अपि चासिद्धिनिवारणार्थेऽपि विशेषणोपादाने नदोषं पश्यामः। क्षित्यादिकर्मकर्तृकं, शरीरेजन्यत्वादाकाशवदित्यादाविव व्याप्यत्वासिद्धिरिति चेत्, मैवम्; तत्राकर्तृकत्वे साध्ये तदेकदेशस्याजन्यत्वस्यैवोपाधितया विशिष्टस्य व्याप्यत्वासिद्धेः। उक्तं हि—'एकामसिद्धिं परिहरतो द्वितीयाऽसिद्धिरापद्यते' इति। प्रकृते तु परतो ज्ञाने न सांशयिकत्वमुपाधिः; स्फीतालोकविपरिवर्तिनां परतो ज्ञायमानानामपि घटादीनां सांशयिकत्वादर्शनात्। ननु प्रामाण्यस्य परतो ज्ञानेऽनवस्था, तत्तत्प्रामाण्यग्रहणायान्यस्यान्यस्य प्रमाणस्यापेक्षणादतः प्रतिकूलतर्कपराहतं परतः प्रामाण्यानुमानमितिचेत्, मैवम्; मानान्तरस्यावश्यंभावनियमाभावात्।

न च स्फुरत एव मानस्यार्थनिश्चायकत्वमन्यथा ज्ञानेऽप्यनन्तरं सन्देहापत्तेरिति वाच्यम्, ज्ञाततयानुमेयं ज्ञानमिति मते निलीनस्यापि ज्ञानस्यार्थनिश्चायकत्वात्। स्वयं वेदनं संवेदनमिति वदतः प्राभाकरस्यापि मते प्रामाण्यस्य तद्धर्मस्य तद्गतगुणत्वादेरिव न स्वतः

वादं कुरुतः" इति वाचस्पतिमिश्रेण वादकथायामाहार्यसंशयस्याभ्युपगमात्। 'सन्दिग्धे न्यायः प्रवर्तते' इति वृद्धवचनमयोगव्यावृत्तिपरम् [अयोगव्यावृत्तीति—'नीलमब्जं भवत्येव, पार्थ एव धनुर्धरः। शङ्खः पाण्डर एव स्यादेवशब्दगतिस्त्रिधा' ॥ विशेषणान्वितस्यैवकारस्यायोगव्यवच्छेदोऽर्थः। विशेष्यान्वितस्यान्ययोगव्यवच्छेदः। क्रियान्वितस्यैवकारस्यात्यन्तायोगव्यच्छेदोऽर्थ इतिभावः।] उपपादयति—क्वचिदिति। सन्दिग्धे न्यायः प्रवर्तते इत्यस्येदमेवतात्पर्यं यत्किलानुमानस्थले सन्देहोऽपि भवति। विशेषणस्य व्यभिचारावारकत्वे सत्यपि असिद्धिवारकतया सार्थक्यमिति चक्षुस्तैजसं रूपादिषु मध्ये रूपस्यैवाभिव्यञ्जकत्वात्प्रदीपवदित्यादिप्राचीनप्रयोगेऽसिद्धिवारकत्वेन विशेषणानां बहुलमुपलम्भात्। असिद्धिवारकत्वेन विशेषणोपादाने दोषमुद्भाव्य निराचष्टे—क्षित्यादिकमित्यादिना। यथात्रानुमानेऽसिद्धिवारणाय कृतेऽशरीरिविशेषणे व्याप्यत्वासिद्धिस्तत्राजन्यत्वस्यवाकर्तृकत्वोपाधित्वात्तद्वदिहापि स्यादिति भावः। स्वरूपासिद्धिं परिहरतो व्याप्यत्वासिद्धिरिति बौद्धाधिकारे श्रीमदुदयनाचार्येणोक्तम् "एकामसिद्धिं परिहरतो द्वितीयासिद्धिरापद्यत" इति। प्रकृते तु ज्ञानग्राहकातिरिक्तग्राह्याणां स्फीतालोकमध्यवर्तिनां परतो ज्ञायमानानामपि घटादीनां सांशयिकत्वादर्शनेन न परतो ज्ञाने सांशयिकत्वमुपाधिरिति भावः। न च प्रामाण्यस्य परतोज्ञानेऽनवस्थेति वाच्यम्; मानान्तरस्यावश्यम्भावनियमानभ्युपगमात्।

न च ज्ञायमानस्यैव प्रमाणस्यार्थनिश्चायकत्वमभ्युपेयमन्यथाज्ञानेऽप्यनन्तरं सन्देहापत्तेः, तस्मादुत्तरोत्तरप्रमाणस्यापेक्षितत्वेनानवस्था दुर्वारेति वाच्यम्; भाट्टमते ज्ञातताहेतुना ज्ञानमनुमेयमिति निलीनस्यापि ज्ञानस्यार्थनिश्चायकत्वाभ्युपगमात्, संवित्स्वयंप्रकाशवादिनः प्राभाकरस्यापि मते प्रमागतधर्मस्य प्रमात्वस्य प्रमागतगुणत्वादिवन्न स्वतः स्फुरणं, स्वतः स्फुरणाभावे दोषमाह—

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust Funding IKS-MoE-Grant-2

स्फुरणम्, तस्यापि संवेदनवत्स्वयंप्रभावत्वापत्तेः। तथात्वे चाप्रमात्वस्यापि स्वत एव स्फुरण प्रसङ्गात्, ततश्चाप्रामाण्यं परतः प्रतीयते इति स्वसिद्धान्तभङ्गप्रसङ्गः। वेदान्तिनां च प्रामा ण्यस्य साक्षिवेद्यत्वेन स्फुरणनियमादिदं प्रमाणमप्रमाणं वेति संदेहो न भवेत्। न च प्रमाण स्वत एव फलं जनयति, हानोपादानोपेक्षालक्षणस्य त्रिविधस्यापि फलस्य वस्तु ज्ञानातिरिक्तगुणदोषमाध्यस्थ्यदर्शनपूर्वकत्वाभ्युपगमात्, तस्माद्वेदान्ताः स्वतः एव प्रमाण मिति न प्रामाणिकप्रतीतिपथमवतरति।

अत्राभिदध्महे—न तावत्प्रमायाः स्वतस्त्वानिरुक्तिः, यतः—

आहुर्विज्ञानसामग्रीजन्यत्वे सत्यजन्यता। तदन्यतः प्रमायास्तत्स्वतस्त्वमिति तद्विदः ॥२१॥

विज्ञानसामग्रीजन्यत्वे सति तदतिरिक्तहेत्वजन्यत्वं प्रमायाः स्वतस्त्वं नाम। न चैतल्ल क्षणमव्यापकम्; सर्वप्रमाणानुगमात्। न चाजन्यत्वादव्याप्तिरीश्वरज्ञाने; तस्याजन्यत्वेऽपि ज्ञानसामग्रीजन्यत्वे सत्यतिरिक्तकारणजन्यत्वलक्षणविशिष्टधर्मवत्त्वाभावात्। नाप्यति व्यापकम्; अप्रमाया विज्ञानसामग्रीजन्यत्वे सत्यरिक्तहेतुजन्यत्वात्। अस्ति चेह मानम नुमानम्, तथा हि—

प्रमा विज्ञानसामग्रीजन्यत्वे सति नान्यतः। जायते व्यतिरिक्तत्वादप्रमातः पटादिवत् ॥२२॥

प्रमा, विज्ञानसामग्रीजन्यत्वे सत्यतिरिक्तजन्या न भवति, अप्रमातिरिक्तत्वात्, पटादिवत्। न च ज्ञानत्वानधिकरणत्वमुपाधिः; ईश्वरज्ञाने साध्याव्याप्तेः। नापि ज्ञानसामग्र्यजन्यत्वमु पाधिः; यज्ज्ञानसामग्रीजन्यं तज्ज्ञानसामग्रीजन्यत्वे सत्यतिरिक्तजन्यमप्रमाणवदिति व्यति रेकिव्याप्तावप्रमात्वस्यैवोपाधित्वात्। विपक्षे च विज्ञानसामग्रीमात्रादेव प्रमोत्पत्तिसंभवे

तस्यापीति। ततोऽप्यनिष्टापत्तिमाह—तथात्वे इति। अप्रमात्वस्य स्वतःस्वप्रकाशत्वाभ्युपगमे स्व सिद्धान्तभङ्गप्रसङ्गः। वेदान्तिमते प्रमात्वस्य स्वतस्त्वे संशयानुपपत्तिदोषमाह—वेदान्तिनां चेति। फल जननेऽपिप्रमाणं न निरपेक्षम् हानोपादानोपेक्षात्मकस्य त्रिविधस्य फलस्य वस्तुज्ञानभिन्नगुणदोषमाध्य स्थ्यदर्शनपूर्वकत्वाभ्युपगमात्। यत्र वस्तुज्ञानानन्तरं गुणज्ञानं भवति, तत्र प्रवर्तते, दोषज्ञानानन्तरं निवर्तते, माध्यस्थ्यदर्शनेनोपेक्षा च भवति। पूर्वपक्षमुसंहरति—तस्मादिति।

लक्षणं समर्थयितुं प्रतिजानीते—अत्रेति। श्लोकेन लक्षणं संकलयति—आहुरित्यादिना। विज्ञानसामग्रीजन्यत्वे सति तदतिरिक्तकारणाजन्यत्वं प्रमायाः स्वतस्त्वमित्याहुः प्रामाण्यविद इति योजना। लक्षणवाक्यं विशदयति—विज्ञानेति। अप्रामाण्येऽतिव्याप्तिवारणाय विज्ञानजनकसामग्री भिन्नकारणाजन्यत्वमिति विशेष्यदलम्, तेनार्थान्तरतापि वार्यते इति। ईश्वरज्ञानेऽव्याप्तिं वारयति—न चाजन्यत्वादिति। तत्र विशेष्याभावादेव विशिष्टलक्षणस्य संगमनान्नाव्याप्तिरिति भावः। अप्रमायास्तु विज्ञानसामग्रीजन्यत्वे सत्यतिरिक्तकारणजन्यत्वान्न तत्रातिव्याप्तिः। प्रामाण्यस्य स्वतस्त्वे प्रमाणं श्लोकेनोपपादयति—प्रमेति। जायते इत्यन्तग्रन्थः प्रतिज्ञा, अप्रमातोव्यतिरिक्तत्वादिति हेतुः, शेषमुदाहरणम्। ईश्वरज्ञाने साध्याव्याप्तेर्ज्ञानत्वानधिकरणत्वमुपाधिं वारयति—नचेति। नापि ज्ञानसामग्र्यजन्यत्वमुपाधिः; व्यतिरेकिव्याप्तावप्रमात्वस्यैवोपाधित्वात्। व्यतिरेके सोपाधिकतया त्वयोक्तोपाधेरसम्भवात्। विपक्षे गौरवापत्तिबाधकतर्कमाह—विपक्षे चेति। प्रामाण्यस्य परतस्त्वे

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तदतिरिक्तस्य गुणस्य दोषाभावस्य वा कारणत्वकल्पनागौरवप्रसङ्गो बाधकस्तर्कः । एतेन—'प्रमा, विज्ञानहेत्वतिरिक्तहेत्वधीना, कार्यत्वात्पटवत्' इति योऽयमुदयनस्य परतस्त्वेऽपि प्रयोगः सोऽपि परास्तः । प्रमा, दोषव्यतिरिक्तज्ञानहेत्वतिरिक्तजन्या न भवति, ज्ञानत्वादप्रमावदिति प्रतिसाधनग्रस्तत्वाच्च । न च प्रमात्वस्य विज्ञानसामग्रीमात्रप्रयोज्यत्वादप्रमाज्ञानवृत्तित्वं स्यादिति वाच्यम्; तत्र प्रयोजकाभावादेव प्रयोज्यस्याप्रसक्तेः । दोषासहकृतज्ञानसामग्रीप्रयोज्यं हि प्रमात्वम्, तत्र दोषस्यैव सद्भावात् कथं प्रमात्वस्य वर्तमानत्वसम्भावनापि समुद्भवेत् ? दोषस्याप्रमाहेतुत्वे तदभावस्य गले पादुकान्यायेन प्रमां प्रति हेतुत्वं स्यादिति चेत्; स्यादेवं यद्यनन्यथासिद्धावन्वयव्यतिरेकौ कारणत्वावेदकौ स्याताम्, तौ तु विरोध्यप्रमाप्रतिबन्धकत्वेनोपक्षीणौ न कारणमात्रत्वमावेदयतः । तथा चाहुर्भट्टपादाः—

'तस्माद् गुणेभ्यो दोषाणामभावस्तदभावतः

अप्रामाण्यद्वयासत्वं तेनोत्सर्गोऽनपोदितः' ॥ इति । (श्लो.वा. २।६५)

नन्वेकस्यापि दोषाभावस्याप्रमाप्रतिबन्धकत्वं प्रमाहेतुत्वं च किं न स्यात् ? एकस्यापि संस्कारस्यानुभवनाशकत्वस्मृतिहेतुत्वयोरपि दर्शनादिति चेत्, मैवम्; तत्र संस्कारस्यानुभवनाशकत्वेऽपि स्मृतेः संस्कारातिरिक्तकारणान्तरानिरूपणात्, उभयहेतुताया अवश्याश्रयणीयत्वात् । न च तत्रापि संस्कारनाशात्स्मृतिः किं न स्यादितिवाच्यम्; स्मृतिसमुदयव्यतिरेकेण संस्कारनाशस्यैवासम्भवात् । प्रकृते तु ज्ञानसामग्रीत एव प्रमोद्भव-

---

उदयनाचार्यानुमानमपि निरस्तमिति गौरवतर्कपराहताशङ्कयमानमुपाधिमतिदिशति—एतेनेति । सत्प्रतिपक्षतामप्याह—प्रमेति । न च विज्ञानसामग्रीमात्रप्रयोज्यत्वेन प्रमात्वस्याप्रमाज्ञानवृत्तित्वं प्रसज्ज्येतेतिवाच्यम्; प्रयोजकाभावप्रयुक्तस्य प्रयोज्यस्याप्रसक्तेः । प्रयोजकाभावं दर्शयति—दोषासहेति । अप्रमायां दोषस्यैव सद्भावेन कुतस्तत्र प्रमात्वस्य वर्तमानसम्भावनाऽपि जायेत । अत्र पूर्वपक्षोक्तं दोषं स्मारयति—दोषस्येति । न च दोषस्याप्रमाहेतुत्वेऽन्ततोगत्वा दोषाभावस्य प्रमां प्रति हेतुत्वं स्यादेवेति वाच्यम्; कारणत्वावेदकावन्यथासिद्धिशून्यावन्वयव्यतिरेकौ प्रमात्वविरोध्यप्रमाप्रतिबन्धकत्वेनोपक्षीणौ न कारणमात्रत्वमावेदयितुं शक्नुयाताम् । तत्र भट्टपादसम्मतिमाह—तस्मादिति । गुणेभ्योदोषाणामभावस्ततो मिथ्यात्वसंशयरूपयोरप्रामाण्ययोर्द्वयोरसत्त्वं, तेन कारणेनोत्सर्गो ज्ञानसाग्रीमात्रप्रयुक्तत्वलक्षणोऽपोदितो न भवतीति भट्टपादवार्तिकार्थः ।

नन्वेकस्यापि संस्कारस्यानुभवनाशकत्वस्मृतिहेतुत्वमिवैकस्यैव दोषाभावस्याप्रमाप्रतिबन्धकत्वं प्रमाहेतुत्वं च किं न स्यादिति चेन्न, तत्र संस्कारस्यानुभवनाशकत्वेऽपि स्मृतेः संस्कारभिन्नकारणान्तरानिरूपणेनोभयहेतुत्वस्यावश्याश्रयणीयत्वात् । न च संस्कारापेक्षया संस्कारनाशादेव स्मरणोत्पत्तिः किं न मन्येतेतिवाच्यम्; स्मृतिसमुदयमन्तरेण संस्कारनाशस्यैवासम्भवात् । एवं तत्रानन्यगतिकमुक्त्वा प्रकृते तदभावमाह—प्रकृते त्विति । विज्ञानसामग्रीमात्रेण प्रमोत्पत्तिसम्भवे तत्र

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सम्भवे दोषाभावस्यापि तद्धेतुत्वकल्पना निष्प्रामाणिका। तस्मात्प्रमा विज्ञानसामग्री-मात्रादेव जायत इति सिद्धम्।

तथा प्रमाज्ञप्तिरपि विज्ञानज्ञापकसामग्रीत एव। न च तथात्वे विज्ञान इव प्रमाणम-प्रमाणं वेति संशयानुदयप्रसङ्गः; स्वतःप्रमाणत्वेन भवदभिमतधर्मिज्ञानेऽनुव्यवसाये च स्फुरत्यपि सुगतमतानुसारिणामप्रमाणमेवेति विपर्यासदर्शनात्, स्वतःप्रमाणत्वेन भवदङ्गीकृतानुमित्यादावपि ज्ञायमानायां चार्वाकस्य प्रामाण्ये विप्रतिपत्त्युपलब्धेः। स्वरूपभेदवादिनां च गृह्यमाणेऽपि स्थाणोः स्वरूपे स्थाणुर्वा पुरुषो वेति सन्देहस्य पुरुष एवेति विपर्ययस्य चोपलम्भात्। सत्यपि प्रतिभासपुष्कलकारणे प्रतिबन्धकदोषादिसम-वधानात्तत्र संशयविपर्यासयोरुपपत्तौ प्रकृतेऽपि समं समाधानमन्यत्राभिनिवेशात्। न च ज्ञानज्ञापकादेव प्रामाण्यग्रहणे मिथ्यारजतादिबुद्धिषु प्रामाण्यग्रहणप्रसङ्गः; प्रसक्तस्यापि प्रामाण्यग्रहणस्य कारणदोषावगमबाधबोधाभ्यामपनयात्। न च ताभ्यामपनये तयोरभाव-ज्ञानस्य प्रामाण्यग्रहणहेतुत्वोपपत्तौ परतः प्रामाण्यापत्तिरिति वाच्यम्; दोषबाधबोधयोर-नुदयमात्रेण प्रामाण्यस्फुरणोररीकरणात्। तथाचाहुर्भट्टपादाः—

'यदा स्वतःप्रमाणत्वं तदान्यन्नैव मृग्यते।
निवर्तते हि मिथ्यात्वं दोषाज्ञानादयत्नतः' ॥ इति। (श्लो.वा. २।५२)

अन्यथा तदभावावगमस्यापि प्रामाण्यस्फुरणहेतुत्वेन तदभावावगमस्यापि प्रामाण्याव-

---

दोषाभावस्यान्यथासिद्धतया प्रमाहेतुत्वकल्पना निष्प्रामाणिका। तस्माद्विज्ञानसामग्रीमात्रादेव प्रमोत्पद्यते इति सिद्धम्।

उत्पत्तिस्वतस्त्वमुपसंहृत्य ज्ञप्तिस्वतस्त्वमुपपादयति—तथा प्रमेति। ननु विज्ञानग्राहकसाक्षि-मात्रग्राह्यत्वेन विज्ञानवत्तत्प्रामाण्येऽपि संशयानुदयप्रसङ्ग इति चेन्न स्वतः प्रमाणत्वेन भवदभिमत-धर्मिज्ञानेऽनुव्यवसाये च स्फुरत्यपि बौद्धानामप्रमाणमेवेति भ्रान्तिदर्शनात्। सर्वं ज्ञानं धर्मिण्यभ्रान्त-मित्यभ्युपगमात्। तथा व्यवसायज्ञानप्रकाशनावसरेऽनुव्यवसाये प्रामाण्यं स्फुरत्येव। अन्यथानवस्था-प्रसङ्गात्। स्वतः प्रमाणत्वेन भवदङ्गीकृतानुमित्युपमित्योरपि ज्ञायमानयोः प्रत्यक्षमात्रप्रमाणवादिन-श्चार्वाकस्य प्रामाण्ये विप्रतिपत्तिदर्शनात्। प्राभाकरार्कबन्धुप्रभृतीनां स्वरूपभेदवादिनां च गृह्यमाणेऽपि स्थाणोः स्वरूपे स्थाणुर्वापुरुषो वेति सन्देहस्य पुरुष एवेति वा भ्रमस्योपलम्भात्। न च तत्र सत्यपि ज्ञानपुष्कलकारणे प्रबलप्रतिबन्धकसमवधानात्तत्र संशयभ्रमोत्पत्तिरिति वाच्यम्; प्रकृतेऽपि समं समाधानमन्यत्राभिनिवेशात्। भ्रमज्ञानेऽपि प्रथमं प्रामाण्यं गृह्यते एव, प्रसक्तस्यापि प्रामाण्यज्ञानस्य कारणदोषज्ञानबाधबोधाभ्यां पश्चादपनयनात्। न च कारणदोषज्ञानबाधबोधाभ्यां प्रसक्तस्यापि प्रमात्वग्रहस्यापनयनाभ्युपगमे तयोरभावज्ञानस्य प्रामाण्यग्रहहेतुत्वोपपत्तौ तत्र परतः प्रामाण्यापत्तिरिति वाच्यम्; दोषज्ञानबाधबोधयोरनुदयमात्रेण प्रामाण्यस्फुरणाङ्गीकारात्। तत्र भट्टपादसम्मतिमाह—यदेत्यादिना। दोषज्ञानानुदयमात्रेणायत्नतो मिथ्यात्वशङ्का निवर्तते, यदा स्वतः प्रमात्वमस्याश्रीयते तदा ज्ञानग्राहकभिन्नकारणं नैव मृग्यते इति वार्तिकार्थः। दोषाभावज्ञानस्यापि प्रमात्वहेतुत्वाभ्युपगमे-नवस्थाबाधकमाह—अन्यथेति। ज्ञप्तिपरतस्त्वे पूर्वोक्ते उदयनीयानुमाने निरुक्तदोषमतिदिशति—

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गमाय तत्तदभावावगमान्तराणामप्यवश्याश्रयणीयत्वादनवस्था, तथा चानभ्यासदशायां सांशयिकत्वादिति हेतोः स्पष्टमनैकान्तिकत्वम् । स्वतःप्रमाणत्वेन भवदभिमतेष्वेवानुमानोपमानानुव्यवसायधर्म्यध्यवसायेषु व्यभिचारस्य दर्शितत्वात् । उक्तं चैतदनुमानादेः स्वतःप्रामाण्यमाचार्यवाचस्पतिना न्यायवार्तिकटीकायाम् "विमतं ज्ञानमर्थाव्यभिचारि, समर्थप्रवृत्तिजनकत्वात्, यदि पुनरेवं नाभविष्यन्न समर्था प्रवृत्तिमकरिष्यत्, यथा प्रमाणाभास इति व्यतिरेकी, अन्वयव्यतिरेकी वा । अनुमानस्य स्वतःप्रमाणतया अन्वयस्यापि सम्भवात् ।" तथा––"अनुमानस्य तु परितो निरस्तसमस्तविभ्रमाशङ्कस्य स्वत एव प्रामाण्यम्, अनुमेयाव्यभिचारिलिङ्गसमुत्थत्वात् ।" "एतेनोपमानं व्याख्यातम्" इत्यादि । सत्प्रतिपक्षसाधनत्वाच्च––विवादस्थले प्रमात्वं, विज्ञानग्राहकसामग्रीमात्रग्राह्यं, अप्रमामात्रवृत्तित्वानधिकरणत्वे सति ज्ञानैकवृत्तिजातित्वात्, ज्ञानत्ववत्[0]।

ननु कथं प्रमात्वम् जातिः ? साक्षात्कारित्वेन तस्य परापरभावासम्भवात् । तथा हि––यदि साक्षात्कारित्वं परम्, तदा तदपरसामान्यस्य प्रमात्वस्य परसामान्याविनाभावनियमात्सर्वैव प्रमा साक्षात्कारिण्येवेत्यनुमानादेःपरोक्षस्याप्रमात्वमेव भवेत् । अथापरम्,

---

तथा चेति । तमेवातिदेशं स्फोरयति—स्वतः प्रमाणत्वेनेति । परैरङ्गीकृतेऽनुमानादिषु स्वतःप्रामाण्ये आचार्यवाचस्पतिमिश्रवाक्यं प्रमाणमाह—विमतमित्यादि । 'लिङ्निमित्ते लृङ् क्रियातिपत्तौ, इति पाणिनिसूत्रेणाभविष्यदिति लृङो रूपम् । व्यतिरेक्यनुमाने सर्वत्र सपक्षाभावान्नासाधारणानैकान्तिकता । विमतपदेन विवादग्रस्तज्ञानमेव पक्षत्वेनाभिमतं नोपेक्षाज्ञानं येन भागासिद्धिराशङ्क्येत । ननु वादिनां प्रामाण्यस्य निश्चयेऽनिश्चये च विप्रतिपत्त्यभावान्न कथायां प्रवृत्तिः स्यात्, नहि व्यतिरेक्यनुमाने व्याप्तिग्रहभूमिरभ्युपेयते इत्याशङ्क्याह—अन्वयव्यतिरेकेति । नन्वनुमाने स्वतः प्रमात्वं न सिद्धं, यद्दृष्टान्तबलेन तत्रान्वयित्वमङ्गीकृत्यानुमानस्यान्वयव्यतिरेकित्वमभ्युपगन्तुं शक्येतेत्यत आह—अनुमानस्येति । तत्रापि तदीयमेव ग्रन्थमुट्टङ्कति—अनुमानस्य त्विति । परितो निरस्तविभ्रमाशङ्का यस्येति व्यासः । अनुमेयेनाग्न्यादिना यल्लिङ्गमव्यभिचारि तेनोपत्पन्नत्वात् । अनुमानोपमानानुव्यवसायधर्मिज्ञानानां स्वत एव प्रामाण्यमभ्युपेयते । तत्रापि व्याप्तिपक्षधर्मताग्राहकेणैवानुमाने हेतुतः स्वरूपतश्च व्यभिचारशङ्कानिरासात्, उपमानेऽतिदेशवाक्यसादृश्यज्ञानयोः प्रामाण्यनिश्चयेनाप्रमात्वशङ्कानिरासात्, अनुव्यवसायेऽप्यज्ञातानुव्यवसायादिति भावः । एतच्च सर्वमुपलक्षितमित्याह—"एतेनोपमानं व्याख्यातमि"त्यादि । उदयनीयानुमाने सत्प्रतिपक्षसाधनतामप्याह—सत्प्रतिपक्षेति । अनुमित्यादिभिन्ने विवादास्पदे प्रमात्वादिना प्रयोगः प्रदर्शितः । परतः प्रामाण्यवादिनोऽर्थान्तरतावारणाय मात्रपदम् । गुणत्वादिव्यभिचारवारणाय ज्ञानैकवृत्तीत्युक्तम् । अप्रमात्वसंशयत्वादिव्यभिचारवारणायाप्रमावृत्तित्वानधिकरणेत्युक्तम् । साधनवैकल्यवारणाय हेतुशरीरेऽपि मात्रपदम् । प्रमामात्रवर्तिना प्रमाभिन्नभिन्नत्वादिना व्यभिचारवारणाय जातिपदम् ।

जातिं निराकर्तुं शङ्कते—ननु कथमिति । प्रत्यक्षत्वप्रमात्वयोः परापराभावमेवोपपादयति—तथाहीत्यादिना । यद्यत्र प्रत्यक्षत्वं व्यापकं प्रमात्वं च व्याप्यं, तर्हि व्यापकाभावेन व्याप्याभाव इति नियमेन प्रत्यक्षसत्वरहितेषु परोक्षेष्वनुमानादिषु प्रमात्वाभावप्रसङ्गः । अथ प्रत्यक्षत्वमपरं प्रमात्वं च

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तदा साक्षात्कारित्वस्य प्रमात्वाविनाभावादिदं रजतमित्यादिसाक्षात्कारिणो विभ्रम प्रमात्वप्रसङ्गः। किं च यदि प्रमात्वं जातिस्तदा सर्वं ज्ञानं धर्मिण्यभ्रान्तं प्रकारे विपर्यय इत्येषा परिभाषा परिलुप्येत। एकस्यैवेदं रजतमिति ज्ञानस्य धर्म्यंशे प्रमात्व अप्रमात्वं चेतरांशे इति जातिसङ्करप्रसङ्गादिति चेत्, मैवम्; साक्षात्कारित्वस्य रजता दिविभ्रमावृत्तित्वात्। तत्र तद्व्यवहारस्येन्द्रियसम्प्रयोगजन्यतोपाधिमात्रेणोपपत्तेः, धर्म्यं प्रमाव्यवहारस्य चाबाधितानुभूतित्वोपाधिनिबन्धनतयापि सम्भवात्। न चैवं सर्वत्रो पाधिनिबन्धन एवास्तु प्रमाव्यवहारः, कृतं जातिकल्पनयेति वाच्यम्; प्रमिणोमीत्यबाधि तानुगतव्यवहारस्य गौर्गौरिति व्यवहारस्येव जातिमन्तरेणानुपपत्तेः। उपाधिमादा जातिप्रत्याख्यानस्य गोत्वादिष्वपि तुल्यत्वात्। तस्माद्यत्र—

'व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथानवस्थितिः। रूपहानिरसम्बन्धो जातिबाधकसङ्ग्रहः'।

इत्युक्तबाधकानामन्यतमोऽपि बाधको न प्रसरति, तत्र जातिनिमित्तो व्यवहार इति

परं, तदा प्रत्यक्षत्वरूपव्याप्यजातौ व्यापकप्रमात्वादिनाऽविनाभावनियमोऽभ्युपगन्तव्यः, तथा इदं रजतमिति प्रत्यक्षभ्रमेऽपि प्रमात्वप्रसक्तिः। ततः परापरभावशून्ययोरेकत्र समावेशे साङ्कर्यप्रसङ्ग सङ्करान्तरमाह—किं च यदीति। प्रमात्वस्य जातित्वाभ्युपगमे जातिसङ्करपरिहारायाप्रमात्वा करणेषु विभ्रमेषु जातिरनभ्युपेया, तथा च सर्वं ज्ञानं धर्म्यंशेऽभ्रान्तं प्रकारे च विपर्यय इति यौक्ति परिभाषा परिलुप्येत। इदं रजतमित्येकस्यैव ज्ञानस्य धर्मिणि प्रमात्वं प्रकारे चाप्रमात्वमि जातिसङ्करप्रसङ्गादिति चेन्न, रजतादिभ्रमेषु प्रत्यक्षत्वानभ्युपगमात्। भ्रमेषु प्रत्यक्षत्वव्यवहारस्येन्द्रि संप्रयोगजन्यत्वोपाधिमात्रेणोपपत्तेः। एवं च भ्रमे प्रमात्वमपि नास्ति, तत्र प्रमाव्यवहारस्य धर्म्यं चाबाधितानुभूतित्वोपाधिनिबन्धनत्वेनापि सम्भवात्। नचैवं सर्वत्रोपाधिनिबन्धन एव व्यवहारोऽ किमर्थमर्धजरतीयं कल्प्यते इत्यत आह—प्रमिणोमीत्यादि। गौर्गौरित्यनुगतव्यवहारवत् प्रमिणोमीत्य बाधितानुगतव्यवहारस्य जात्यभ्युपगमं विनाऽनुपपत्तेः। न चोपाधिमादाय जातिः प्रत्याख्या शक्या; तथा सति गोत्वादिष्वपि समानत्वात्। तस्मादुदयनाचार्यैः किरणावल्यां जातिबाधक परिगणिता इत्याह—व्यक्तेरभेद इत्यादिना। (१) अनुवृत्तज्ञानाभावादनेकसमवेतत्वाभावाच्चैक व्यक्तिवृत्तिराकाशत्वादिकं न जातिः। (२) कुम्भत्वकलशत्वयोस्तुल्यव्यक्तिवृत्तित्वेन न जाति त्वमेकस्यैवानुगतप्रतीतिसिद्धेः। (३) अन्यत्रात्यन्ताभावसमानाधिकरणयोर्धर्मयोर्द्वयोरेकत्रसमावेशः संकरः। यथा मूर्तत्वं विहाय भूतत्वमाकाशे वर्तते, भूतत्वं च विहाय मूर्तत्वं मनसि वर्तते, पृथिव्यादि चतुष्टये भूतत्वमूर्तत्वयोरुभयोः समावेशान्न तयोर्जातित्वम्। (४) जातौ जात्यभ्युपगमेऽनवस्था प्रसक्तिः, यथा सत्तायां सत्तास्वीकारे तत्रापि पुनर्जातिकल्पनायामानवस्था स्यादतस्तत्र जाति कल्पनीया। (५) सजातीयेभ्यो व्यावर्तकत्वं विशेषस्य स्वरूपम्, तत्र जातित्वस्वीकारे त व्यावर्तकत्वं नश्येत। तस्मान्न विशेषेऽपि जातिकल्पना। (६) यत्र जातिकल्पनायां व्यवस्था सम्बन्धाभावः। अनुयोगिताप्रतियोगितान्यतरसम्बन्धेन समवायस्याभावोऽसम्बन्धपदार्थः। न समवायसम्बन्धेन समवायः क्वापि तिष्ठति, नापि समवाये समवायसम्बन्धेन किमपि तिष्ठति तस्मान्न समवायेऽपि जातिः कल्पनीया। एवं चेत्युदयनाचार्यसंकलितजातिबाधकानां षण्णाम तमस्यापि यत्राभावस्तत्र जातित्वमन्यत्रोपाधित्वमिति समुदायार्थः। अतः प्रमात्वजातिं समर्थयि

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तूपाधिनिबन्धन इति विभागो द्रष्टव्यः। तस्माज्ज्ञानैकनिष्ठजातित्वादिति न विशेष्यासिद्धो हेतुः। विपक्षे चानवस्थाप्रसङ्गो बाधकस्तर्कः। न च निलीनस्यैव प्रमाणस्यार्थे व्यवहारजनकत्वोपपत्तेर्नानवस्थेति वाच्यम्; तथात्वनिश्चायकप्रमाणानुदये तदस्तित्वस्यैव निश्चेतुमशक्यत्वात्।

अस्तु तर्हि ज्ञानस्य स्वतः एव स्फुरणम्, तथापि तत्प्रामाण्यं तद्गतगुणत्वादिवदन्यत एव स्फुरिष्यति को विरोध इति चेत्, मैवम्; तस्यादित एव प्रमाणत्वेनास्फुरणे तद्विषये निःशङ्कप्रवृत्त्यनुपपत्तेः। न हि ज्ञातमित्येतावता प्रवृत्तिः, मरुमरीचिकादौ सत्यपि विज्ञाने तदप्रामाण्यनिश्चये प्रवृत्त्यदर्शनात्। अस्तु तर्ह्यप्रामाण्यास्फुरणे प्रामाण्यस्फुरणमन्तरेणापि ज्ञानमात्रात्प्रवृत्तिरितिचेत्, मैवम्; विज्ञानस्य प्रामाण्याप्रामाण्ययोरस्फुरणे संशयान्निःशङ्कप्रवृत्त्यनुपपत्तेः। अस्ति चानभ्यासदशायां नववनस्थलीस्थितेषु फलितरसालादिषु तत्फलादानेच्छोर्निःशङ्कप्रवृत्तिः। अपि च त्वयापि पारलौकिकफलसाधनेषु निःशङ्कप्रवृत्तिः प्रामाण्यनिश्चयाधीनाभ्युपगता। न च कृष्यादौ संशयेऽपिप्रवृत्तिर्दृष्टेति वाच्यम्; तत्र निःशङ्कप्रवृत्तेरभावात्। एवं च यत्र यत्र निःशङ्कप्रवृत्तिः, तत्र तत्र प्रामाण्यनिश्चयाधीनैव सेत्यभ्युपगन्तव्यमपरथा प्रामाण्यानिश्चयान्निवृत्तेरपि प्रसङ्गात्। न च फलेपि परतस्त्वम्; ज्ञेयाभिव्यक्तिलक्षणफलस्य ज्ञानमात्रादेव सिद्धेः। उपादानादीनां पुनरिष्टसाधनादिज्ञानाधीनतया तद्विषयप्रमाणस्य तत्रापि फलजनकत्वं स्वत एव।

मारब्धं प्रसङ्गमुपसंहरति—तस्मादिति। ज्ञप्तिपरतस्त्वे बाधकमाह—विपक्षे च। न चाज्ञातप्रमाणस्यैवार्थे व्यवहारजनकत्वसम्भवे ऽनवस्थेति वाच्यम्; अज्ञातप्रमायां व्यवहारजनकत्वनिश्चायकप्रमाणानुदयेऽज्ञातप्रमास्तित्वस्यैव निश्चेतुमशक्यत्वादिति।

अस्तु तावत्प्रमास्तित्वलोभाज्ज्ञानस्य स्वतः स्फुरणं, तथापि ज्ञानगतगुणत्वादिवज्ज्ञाने प्रामाण्यस्यान्यतः स्फुरणे को विरोधः, इति चेन्न; ज्ञानस्य प्रथमतः प्रमाणत्वेन स्फुरणाभावे ज्ञानविषये निःशङ्कप्रवृत्त्यनुपपत्तेः। नहि मरुमरीचिकायां जलं ज्ञातमित्येतावन्मात्रेण तत्राप्रामाण्यनिश्चये सति तृषावतां जलार्थिनां तत्र प्रवृत्तिर्दृश्यते। न चाप्रामाण्यास्फुरणेऽपि प्रमात्वस्फुरणं विना ज्ञानमात्रात्प्रवृत्तिरिति वाच्यम्; विज्ञानस्य प्रमात्वाप्रमात्वयोर्द्वयोः स्फुरणाभावे संशयसम्भवान्निःशङ्कप्रवृत्त्यनुपपत्तेः। अस्ति च पुनः पुनः दर्शनानभ्यासदशायां नववनस्थलीस्थितेषु फलिताम्रादिषु तदर्थिनां फलोपादानेच्छया निःशङ्कप्रवृत्तिः। अपि च त्वयापि इहामुत्रार्थफलसाधनेषु अनभ्यासदशापन्नेषु प्रामाण्यनिश्चयाधीनैव निःशङ्कप्रवृत्तिः स्वीकृता, तद्वत्सर्वत्र प्रामाण्यनिश्चयाधीनैव निःशङ्कप्रवृत्तिरनुमेयेत्याह—अपि च त्वयापीति। न च कृष्यादौ संशये सत्यपि प्रवृत्तिर्दृष्टेति वाच्यम्; तत्र निःशङ्कप्रवृत्तेर्वक्तुमशक्यत्वात्। तथा चानुमानमाह—यत्र यत्रेति। व्याप्तिग्रहबलेन सर्वत्र निःशङ्कप्रवृत्तिः प्रमात्वनिश्चयाधीनैव, अन्यथा प्रामाण्यानिश्चयेन निवृत्तेरपि प्रसङ्गात्। एवमुत्पत्तौ ज्ञप्तौ च स्वतस्त्वमुपपाद्य व्यवहारेऽपि स्वतस्त्वमुपपादयति—न च फलेऽपीति। ज्ञानस्य फलं द्विविधं ज्ञेयाभिव्यक्तिरूपं ग्रहणादिरूपं च। तत्राद्यं ज्ञानमात्रादेव नान्यनिबन्धनम्। ग्रहणादीनामिष्टसाधनादिज्ञानाधीनतया तद्विषयप्रमाण-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तस्मादवधीर्यैव गुणगणमनपेक्ष्यैव दोषाभावं स्वशक्त्यैव स्वार्थमावेदयन्ति वेदान्ता इति सिद्धम् ।

ननु स्वरूपसहकारिसमवधानातिरिक्तां शक्तिमेव न जानीमः, तत्र प्रमाणाभावात्, तथा हि स्फोटादिलक्षणकार्यान्यथानुपपत्तिस्तत्र प्रमाणम् ? उतोपादानोपादेयभावनियमानुपपत्तिः ? नाद्यः; स्वरूपादेव पावकादेः प्रतिबन्धकाभावादिसहकार्युपबृंहितात्, स्फोटादिलक्षणकार्योत्पत्त्युपपत्तावतीन्द्रियशक्तिकल्पनानुपपत्तेः । न चाभावस्याकारणत्वात्प्रतिबन्धकाभावो न सहकारीति साम्प्रतम्; किमन्वयव्यतिरेकित्वं नास्ति ? उताभावस्य कारणत्वेऽनिष्टप्रसक्तिः ? नाद्यः; भाववदभावस्यापि कार्यान्वयव्यतिरेकित्वात् । न द्वितीयः; योग्यानुपलब्धेरभावप्रमितिहेतुत्वात्, विवेकाग्रहस्य च विभ्रमहेतुत्वात् । ननु किं प्रतिबन्धकप्रागभावस्य कारणत्वम् ? उत तत्प्रध्वंसस्य ? नाद्यः; उत्तम्भकसद्भावे सत्यपि प्रतिबन्धके विनापि प्रागभावं कार्यदर्शनात् । न द्वितीयः; प्रतिबन्धकानुदयेऽपि कार्योपलब्धेरिति चेत्, मैवम्; उत्तम्भकमणिमन्त्राद्यभावसहकृतस्यैव प्रतिबन्धकस्य प्रतिबन्धकत्वात्, तेन तत्र प्रतिबन्धकप्रागभावसहकृतस्यैव कारणत्वान्न व्यभिचारः । एतेनानियतहेतुकत्वमप्यपास्तम् । सर्वत्र प्रतिबन्धकसंसर्गाभावविशिष्टस्यैव कारणत्वाङ्गीकारात् । अन्यथानुपलब्धावप्युपलब्धिप्रागभावप्रध्वंसाभावविकल्पेनाभावप्रमितेरनियतहेतुकता

स्योपादानादिनिष्ठेष्टसाधनताज्ञानस्यापि स्वत एव फलजनकत्वं, न तत्रापि व्यभिचार इति भावः समन्वयोपयोगकथनाय स्वतःप्रामाण्यवादमुपसंहरति—तस्मादिति ।

स्वरूपसहकारिसमवधानातिरिक्तां शक्तिममन्यमानास्तार्किकाः प्रत्यवतिष्ठन्ते—नन्वित्यादिना तत्र प्रमाणाभावं स्फोरयति—तथाहीत्यादिना । अनुपपत्तिलक्षणं प्रमाणं विकल्प्य दूषयति—नाद्य इति । प्रतिबन्धकाभावादिविशिष्टात्पावकात्स्वरूपादेव दाहादिरूपकार्योत्पत्तावतीन्द्रियशक्तिकल्पनानुपपत्तेः । न चाभावस्याकारणत्वेन प्रतिबन्धकाभावो न सहकारीति युक्तम्; भाववदभावस्यापि कार्येण सहान्वयव्यतिरेकदर्शनेन दाहरूपकार्यं प्रति प्रतिबन्धकाभावस्य सहकारिकारणाभ्युपगमे दोषाभावात् भाट्टैर्योग्यानुपलब्धेरभावप्रमाहेतुत्वाङ्गीकारात्, प्राभाकरैरपि विवेकाग्रहस्य विभ्रमहेतुत्वस्वीकाराच्च गुरुमतेऽयथार्थव्यवहारो विभ्रमशब्दार्थ इति ध्येयम् । प्रतिबन्धकाभावस्य कारणत्वं विकल्प्य दूषयति—ननु किमित्यादिना । तत्र नाद्यः; प्रतिबन्धके सत्यपि सूर्यकान्तमण्युत्तम्भकसद्भावे प्रागभावमन्तरेणापि दाहादिकार्यदर्शनात् । नापि द्वितीयः; प्रतिबन्धकानुदयेऽपि कार्योपलब्धिदर्शनात्, नह्यनुदितप्रतियोगिकः प्रध्वंसः सम्भवतीति चेन्न; उत्तम्भकमणिमन्त्राद्यभावसहकृतस्यैव मणिसमवधानप्रतिबन्धकस्य प्रतिबन्धकत्वात् । उत्तेजकप्रतिबन्धकयोरुभयोर्यत्र सद्भावस्तत्र प्रतिबन्धकत्वमेव नास्तीति भावः अतः प्रतिबन्धकाभावविशिष्टवह्नेर्दाहं प्रति कारणत्वाभ्युपगमे न क्वापि व्यभिचारः । एतेन क्वचिद्विशेषस्य मण्यादेरभावस्य कारणत्वं, क्वचिद्विशेषणस्योत्तेजकाभावस्यावर्तमानस्य च कारणत्वमित्यनियतहेतुकत्वपक्षोऽप्यपास्तः । तमेव विवृणोति—सर्वत्रेति । संसर्गाभावान्तःपातिनः प्रागभावः प्रध्वंसाभावोऽत्यन्ताभावश्चेति त्रयोऽभावाः सन्तीति भावः । अनुपलब्धेरप्यभावप्रमितिहेतुत्वेऽपि नियत दोषसाम्यात्संसर्गाभावस्यैव कारणत्वमङ्गीकर्तव्यमित्याह—अन्यथेति । शक्तिपक्षेऽपि प्रतिबन्धकशून्य

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

या दुष्परिहरत्वात् । शक्तिपक्षेऽप्यप्रतिबद्धाया एव तस्याः कारणत्वादभावविकल्पोत्थदोषतत्परिहारयोः समानत्वात् ।

ननु न प्रतिबन्धकाभावस्य कारणता, प्रतिबन्धापेक्षस्तदभावः कारणम्, कारणापेक्षश्च तदभावः प्रतिबन्ध इत्यन्योन्याश्रयग्रस्तत्वात्, प्रतिबन्धो विसामग्री तद्धेतुः प्रतिबन्धकः, इत्यङ्गीकारादिति चेत्, मैवम्; अवधीर्यैवाभावस्य कारणतां कार्यानुदयमात्रेणैव मन्त्रादेः कार्यप्रतिकूलतावगमात्, अनवलम्ब्यैव च मणिमन्त्रादेः कार्यप्रतिबन्धकतां तदभावस्यान्वयव्यतिरेकाभ्यामेव कारणताध्यवसायात् । किं चेदमन्योन्याश्रयत्वमुत्पत्तौ ज्ञप्तौ वा स्यात्? नाद्यः; मन्त्रतदभावयोः परस्परहेतुत्वाभावात् । नापि द्वितीयः; अज्ञातयोरपि मन्त्रतदभावयोः कार्यं प्रति प्रतिकूलत्वकारणत्वयोरुपपत्तेः । ननु कार्याभानावसेयकार्यप्रतिकूलभावा मन्त्रादयः शक्तेरपह्नवाय कारणाभावरूपा इष्यन्ते, अत एव मन्त्राद्यभावोऽपि कारणमिष्यते, ततो मन्त्रतदभावनिष्ठप्रतिबन्धकत्वकारणत्वयोरन्योन्योपाधिकत्वादुत्पत्तौ ज्ञप्तौ वान्योन्याश्रयता दुर्वारेति चेत्, न, उक्तोत्तरत्वात्—अन्तरेणैवाभावस्य कारणतावावगमं मन्त्रादेः कार्याभावमात्रेण कार्यप्रतिकूलभावस्यावगन्तुं शक्यत्वात्, तदभावकारणत्वस्याप्यन्वयव्यतिरेकाभ्यामेव सुकरावगम्यत्वात् इति । न च शक्त्यनङ्गीकारे प्रतिबन्धासम्भवः, मणिमन्त्रादिसन्निधानासन्निधानयोः स्वरूपस्याविशेषादिति

शक्तेरेव कारणत्वादभावविकल्पसञ्जातदोषतत्परिहारयोस्तुल्यादिति भावः ।

शक्तिवादी प्रकारान्तरेण प्रतिबन्धकाभावस्य कारणतामाक्षिपति—ननु नेति । उदयनाचार्येण "प्रतिबन्धो विसामग्री तद्धेतुः प्रतिबन्धकः"—सामग्र्यभावः प्रतिबन्धः, तद्धेतुर्मन्त्रप्रयोक्ता पुरुषः प्रतिबन्धक इति, (न्या०कु० १।१०), अभ्युपगमेन प्रतिबन्धकाभावरूपकारणस्य कारणाभावरूपप्रतिबन्धस्य चान्योऽन्याश्रयताग्रस्तत्वादिति चेन्न; अभावस्य कारणतां निश्चित्यैव कार्यानुदयमात्रेणैव मन्त्रादेः कार्यप्रतिकूलत्वावगमात् मण्यादेः प्रतिबन्धकतामनपेक्ष्यैव स्वातन्त्र्येण मण्यादेरभावस्यान्वयव्यतिरेकाभ्यां कारणत्वनिश्चयादन्योऽन्याश्रयाभावात् । किं चेदमन्योऽन्याश्रयत्वमुत्पत्तौ न वक्तुं शक्यं; मन्त्रतदभावयोरन्योऽन्यहेतुत्वाभावात्, नापि ज्ञप्तौ तदन्योऽन्याश्रयत्वं; मणितदभावयोरज्ञातयोरपि कार्यप्रतिकूलत्वकारणत्वयोरुपपत्तेः । ननु येषां मन्त्रादीनां कार्यानुत्पादनद्वारा कार्यप्रतिकूलत्वमवसीयते, ते एव मन्त्रादयः शक्तेर्निराकरणाय कारणाभावरूपा इष्यन्ते, तस्मादेव मन्त्राद्यभावस्यापि कारणत्वमिष्यते, ततो मन्त्रादिनिष्ठप्रतिबन्धकता मन्त्राद्यभावनिष्ठकारणतानिबन्धनाऽस्ति, तथा मन्त्राद्यभावनिष्ठकारणता मन्त्रादिनिष्ठप्रतिबन्धकतानिबन्धनाऽस्ति, तथासति प्रतिबन्धकत्वकारणत्वयोरुभयोरुत्पत्तौ ज्ञप्तौ वाऽन्योऽन्याश्रयता दुर्वारेति चेन्न; उक्तोत्तरत्वात् ?। तदेव विशदयति—अन्तरेणैवेत्यादिना । अभावनिष्ठकारणतावगमं विनैव कार्यानुत्पादनमात्रेण मन्त्रादेः कार्यप्रतिकूलत्वस्यावगन्तुं शक्यत्वात्, एवमन्वयव्यतिरेकाभ्यामेव मन्त्राद्यभावनिष्ठकारणत्वस्यावगन्तुं सुकरत्वात् । न च शक्त्यनभ्युपगमे कार्यप्रतिबन्धासम्भवः, मण्यादिसन्निधानासन्निधानयोरग्निस्वरूपस्याविशेषादतः प्रतिबन्धान्यथानुपपत्तिः शक्तिसद्भावे प्रमाणमिति वाच्यम्; अग्न्यादिस्वरूपावैकल्येऽपि मन्त्रादिसमवधानदशायां कार्योत्पादं प्रत्यौदासीन्यस्यैव प्रतिबन्धशब्दवाच्यस्य विशेषत्वात् । अयमेव प्रतिबन्धपदार्थो

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वाच्यम्, कार्यौदासीन्यस्यैव प्रतिबन्धशब्दाभिधेयस्य विशेषत्वात्, अन्यथा शक्तिपक्षेऽपि प्रतिबन्धस्य दुर्विवेकत्वात्। नहि शक्तेर्नाशः प्रतिबन्धः; प्रतिबन्धापाये कार्याभाव-प्रसङ्गात्। न च स्फोटाख्यकार्योत्पत्तये शक्त्यन्तरं तत्रोत्पन्नम्; तत्कारणानिरूपणात्। न च प्रतिबन्धाभावः कारणम्; अभावस्य कारणतानङ्गीकारात्। अङ्गीकारे वा तस्यैव स्फोटा-दिकार्यजनकत्वमस्तु; कृतमतीन्द्रियशक्तिकल्पनादुर्व्यसनेन। शक्तेः शक्त्यन्तरं प्रति बध्यते इति वदतोऽनवस्था, तस्मात्कार्यस्यान्यथाप्युपपन्नत्वान्नातीन्द्रियशक्तिकल्पनावकाशः।

नापि द्वितीयः; उपादानोपादेयभावनियमस्याप्यनादिसिद्धवृद्धव्यवहारावसिततत्कार्यानु-कूलस्वभावभेदादेवोपपत्तेः। अन्यथेयमिहैव किमिति शक्तिर्नान्यत्रेति पर्यनुयोगे कः स्वभा-वभेदादन्यः परिहारः स्यात्? तस्मादर्थापत्तिद्वयमपि नात्र प्रमाणम्। अस्तु तर्ह्यनुमानम्, तथाहि—विमतमज्ञानकदशातो जनकदशायामतिशययोगि, कारकत्वात्, कुण्ठकुठारवदिति चेत्, न; सहकारिसमवधानातिशयेनैव सिद्धसाधनत्वात्। अस्तु तर्ह्यग्निरतीन्द्रियसामान्य-वन्निष्क्रियाश्रयः, कारणत्वात्, गुरुत्वाश्रयवदिति प्रयोगः। तेजोद्व्यणुकमतीन्द्रियरूपस्य वायोश्चाधिकरणमिति तद्व्यावृत्त्यर्थमतीन्द्रियसामान्यवन्निष्क्रयेत्युक्तमतः शक्तिसिद्धिरिति कश्चित्; तन्न; योगिस्वीकारवादिनं प्रत्यतीन्द्रियविशेषणस्याप्रसिद्धत्वात्। विमतं,

---

न तु शक्तिनाशः प्रतिबन्धः। अन्यथा शक्तिपक्षेऽपि प्रतिबन्धस्य पूर्वोक्तरीत्यननुसरणे दुर्विवेकत्वात् प्रतिबन्धस्य शक्तिनाशस्वरूपाभ्युपगमे प्रतिबन्धापाये कार्यानुत्पादप्रसङ्गात्। न च दाहकार्योत्पादना तत्र शक्त्यन्तरमुत्पन्नमिति वाच्यम्; शक्त्यन्तरोत्पत्तिकारणस्य निरूपयितुमशक्यत्वात्। प्रतिबन्धा-भावस्य शक्त्यन्तरोत्पत्तौ कारणत्वं दूषयति—न च प्रतिबन्धेति। शक्तेरपि शक्तिस्वीकारेऽन-वस्थामाह—शक्तेरिति। प्रथममर्थापत्तिदोषमुपसंहरति—तस्मादिति।

उपादानोपादेयभावनियमस्यान्यथानुपपत्तिः शक्तिसद्भावे प्रमाणमिति द्वितीयामर्थापत्तिं दूषयति—नापि द्वितीयः। तिलतैलयोर्दुग्धदध्नोश्चोपादानोपादेयभावनियमस्यानादिसिद्धवृद्धव्यवहारेण निश्चित-कार्यानुकूलकारणस्वभावादेवोपपत्तेः। अन्यथा स्वभावविशेषस्य नियामकत्वानभ्युगमे दाहादिशक्ति-रग्नावेव किमिति नान्यत्रेति प्रश्ने स्वभावविशेषादन्यत् किमुत्तरं स्यात्। तस्मादर्थापत्तिद्वयमपि न शक्तिसद्भावे प्रमाणमिति। तिमिरादिप्रयोगमनूद्य दूषयति—विमतमित्यादि। विमतम्—अग्न्यादि। इदमनुमानं शक्तिसाधकं भवितुं नार्हति, सहकारिसमवधानातिशयेनैव सिद्धसाधनत्वात्। अनुमानेऽति-शयपदेन शक्तिर्ग्राह्या, निराकरणेऽतिशयपदार्थः सहकारिसमवधानमिति भेदः। न्यायरत्नदीपावलीस्थ-मनुमानमुद्भाव्य दूषयति—अस्तु तर्हीति। निष्क्रियाश्रय इत्युक्ते सामान्याद्याश्रयत्वमादाय सिद्धसाधन-तापत्तिस्तद्वारणाय सामान्यवदितिपदम्। गुणकर्मणोः सिद्धसाधनत्ववारणाय अतीन्द्रियेतिग्रहणम्। वाय्वाश्रयत्वेनार्थान्तरतावारणाय निष्क्रियेति। गुरुणी द्वे इतिप्रमाणत्वेन गुरुत्वाश्रयः पृथिवी जलं च दृष्टान्तः। तेजसि गुरुत्वासम्भवेन परिशेषतस्तत्र शक्तिसिद्धिरिति भावः। तैजसद्व्यणुकं निष्क्रिय-रूपस्याधिकरणमिति सिद्धसाधनता, अतीन्द्रियजातिमतो वायोश्चाधिकरणमित्यर्थान्तरता स्यात्तद्वार-णायातीन्द्रियसामान्यवदिति निष्क्रियेति चोक्तमतः शक्तिसिद्धिरिति कश्चित्। तदेतद्दूषयति—तन्नेति। तार्किकैः सर्वं योगिप्रत्यक्षं मन्यते तं प्रत्यतीन्द्रियविशेषणस्याप्रसिद्धत्वात् दृष्टान्ते साध्य-वैकल्यमिति भावः। ननु विमतं योगीन्द्रियं न गुरुत्वत्वे जातिविषयमिन्द्रियत्वादस्मच्चक्षुर्वदित्यतीन्द्रिय-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गुरुत्वजातिविषयमिन्द्रियत्वादस्मच्चक्षुर्वदित्यतीन्द्रियसिद्धिरिति चेन्न। योगिनमनङ्गीकुर्वतो मीमांसकस्याश्रयासिद्धेः, तत्सिद्धौ वा धर्मिग्राहकप्रमाणबाधात्। अस्तु तर्ह्यस्मदाद्यभिप्रायेणातीन्द्रियत्वविशेषणम्, मैवम्; अनुव्यवसायप्रत्यक्षगोचरतया सर्वस्यास्मदादिविशेषणस्वीकारेऽपि पूर्वोक्तदोषतादवस्थ्यात्। अनुव्यवसायेतरास्मदाद्यैन्द्रियकबुद्ध्यगोचरत्वाभिप्रायेणातीन्द्रियत्वविशेषणमिति चेत्, न; प्रमाणान्तरोपनीतविशेषणावगाहिविशिष्टज्ञानवादे सर्वेषामप्यैन्द्रियकत्वसम्भावनया पूर्वोक्तदोषानुत्तारात्। आश्रयपदस्य च समवाय्यर्थतायां भाट्टस्य समवायानङ्गीकारवादिनोऽप्रसिद्धिविशेणत्वात्, वह्नौ स्थितिस्थापकसंस्कारसिद्धेः, सिद्धसाधनत्वाच्च। ननु कथं सिद्धसाधनत्वम्, तत्सत्त्वे मानाभावादिति चेत्, मैवम्; विमतः, स्थितिस्थापकसंस्कारवान्, रूपवत्त्वात्कटवदित्यनुमानसद्भावात्। न च स्थितिस्थापककार्यवत्त्वमुपाधिः; उत्पन्नमात्रविनष्टकटादिषु कार्यानुपलम्भेऽपि तथाविधसंस्काराभ्युपगमेन साध्याव्याप्तेः। किं च यः स्वसिद्धान्तानुसारेण सिद्धसाधनतां ब्रूयात्, स कथमनुमानशतैरपि स्वसिद्धान्तात्प्रच्याव्येत? कथं वा तदीयसिद्धसाधनताभिधानं प्रत्युद्ध्रियेत?

अस्तु तर्हि स्थितिस्थापकेतरातीन्द्रियसामान्यवन्निष्क्रियाश्रय इति प्रयोग इति चेत्

सिद्धिरिति चेन्न; योगीन्द्रियस्यासिद्धत्वे आश्रयासिद्धेः सिद्धत्वे सर्वार्थग्राहकताप्रतिपादकशास्त्रादिप्रमाणैरेव योगीन्द्रियेषु साध्यस्यातीन्द्रियत्वस्य धर्मिग्राहकप्रमाणबाधाच्चेत्याह—योगिनमित्यादि। साध्यं विशेषयति—अस्तु तर्हीति। योगिभिन्नास्मदादीन्द्रियम्, न गुरुत्वत्वजातिविषयमिन्द्रियत्वादस्मच्चक्षुर्वदिति प्रयोगेऽपि मानसप्रत्यक्षविषयत्वमादायातीन्द्रियत्वासिद्धिदोषस्य सर्वस्य तादवस्थ्यात्। न च मानसप्रत्यक्षभिन्नत्वे सत्यस्मदाद्यैन्द्रियकबुद्ध्यविषयत्वाभिप्रायेणातीन्द्रियत्वविशेषणमिति वाच्यम्; व्योमशिवादीनां मते सुरभिचन्दनमित्यादिविशिष्टज्ञानानि घ्राणादिना प्रमाणान्तरेणोपनीतगन्धादिकमपि विषयीकुर्वाणानि दृश्यन्ते, तथा च सर्वेषामपि विषयाणामैन्द्रियकत्वसम्भावनयाऽप्रसिद्धविशेषणतादिदोषाणामनुद्धारात्। ज्ञानसन्निकर्षजन्यानां सुरभिचन्दनमिति चाक्षुषज्ञानानामपि गन्धादिविषयकत्वाभ्युपगमादिति भावः। किं च निरुक्तानुमाने साध्यशरीरे निविष्टस्याश्रयपदस्य समवाय्यर्थतायां भाट्टस्य समवायानङ्गीकारवादिनोऽप्रसिद्धविशेषणत्वात्, पूर्वोक्तरीत्या समवायित्यागनौ स्थितिस्थापकसंस्कारसिद्धेः सिद्धसाधनत्वाच्च। न चाग्नौ स्थितिस्थापकसंस्कारसत्त्वे मानाभावात्कथं सिद्धसाधनत्वमिति वाच्यम्, विमतोऽग्निः, स्थितिस्थापकसंस्कारवान्, रूपवत्त्वात्कटवदित्यनुमानस्य सद्भावात्। न च स्थितिस्थापककार्यवत्त्वमुपाधिः, तस्य दृष्टान्ते कटे साध्यव्यापकत्वे सति पक्षेऽग्नौ रूपवत्त्वस्य हेतोरव्यापकत्त्वमिति वाच्यम्, उत्पन्नमात्रविनष्टकटादिषु निरुक्तकार्यानुपलम्भेऽपि स्थितिस्थापकसंस्काराभ्युपगमेन साध्याव्यापकतया तस्योपाधित्वाभावात्। किं च स्वसिद्धान्तानुसारेण सिद्धसाधनतां ब्रुवाणस्यानुमानशतैरपि स्वसिद्धान्तात्पातयितुमशक्यत्वात्तदीयसिद्धसाधनताभिधानस्य प्रत्युद्धर्तुमशक्यत्वाच्च।

अथ स्थितिस्थापकेतरेति विशेषणोपादानेन साध्यं संघटयितुं शङ्कते—अस्तु तर्हीति। अत्र प्रयोगेऽपि

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मैवम्; तथापि कर्मप्रत्यक्षवादिनं प्राभाकरं प्रत्यर्थान्तरत्वापातात्, वह्नेरतीन्द्रियसामान्य वन्निष्क्रियकर्माश्रयत्वात्। कारणत्वादिति हेतोः शक्त्यानैकान्त्यात्, शक्तेश्च शक्त्यन्तरा भ्युपगमेऽनवस्थापातात्। जनकशक्तियोगिन एव कारणत्वेन विवक्षितत्वान्न शक्तौ वनैकान्तिकतेति चेत्, मैवम्; शक्तियोगित्वस्य विशेषणशक्त्यसिद्धावसिद्धेः, मानान्तरा त्तत्सिद्धौ कृतमनया ग्रन्थकथाकन्थाकदर्थनया, गुणादावनैकान्त्यं च। गुणादेरप्यतीन्द्रि सामान्यवन्निष्क्रियाश्रयत्वे च घटादिवद्द्रव्यत्वप्रसङ्गान्न यथोक्तशक्त्याश्रयत्वोपपत्तिः।

अस्तु तर्हि विवादाध्यासितः स्फोटः, उभयवादिसम्प्रतिपन्नस्फोटकारणातिरिक्तकार जन्यः, कार्यत्वाद्घटवदिति प्रयोग इति चेत्, मैवम्; प्रतिबन्धकाभावेन प्रतिवादिनो सम्प्रतिपन्नेन कारणेन सिद्धसाधनत्वात्, भावजन्य इति विशेषणेऽपीश्वरेण सिद्धसाध त्वात्। ननु माभूदर्थापत्तिः प्रमाणम्, मास्म भूदनुमानम्, 'व्रीहीन्प्रोक्षति, यूपं तक्ष्णो अग्निनादधीत' इत्याद्याः श्रुतयः एव प्रमाणम्। तथा हि व्रीहीनित्यादिवाक्येषु द्वितीय श्रुत्या ग्रामं गच्छतीत्यादिष्विव व्रीह्यादीनां कर्मतावगमात्। तेषु कश्चिदतीन्द्रि प्रोक्षणजन्योऽतिशयोऽस्तीत्यवसीयते, दृष्टस्य फलान्तरस्यादर्शनात्। स चायमतिश शक्तिरिति शक्तिवादिभिर्गृह्यत इति, मैवम्; संस्काराख्यादृष्टस्य चेतनगतस्याचेत व्रीह्यादिषु समवायासम्भवात्। घटविषयज्ञानजनितभावनाया घटविषयत्ववत् व्री प्रोक्षणाद्युद्भूतसंस्कारस्यापि तद्विषयक्रियाजन्यतामात्रेण तदीयत्वप्रतीत्युपपत्तेर्व्रीह्यादि

कर्माप्रत्यक्षवादिनं प्राभाकरं प्रत्यर्थान्तरतापातात्। प्राभाकरमतेऽप्रत्यक्षे निष्क्रिये कर्मण्यतीन्द्रि वत्त्वादिरूपस्यार्थस्य सत्त्वादित्याह—तथापीत्यादिना। शक्तौ कारणत्वहेतुरस्ति तत्र शक्त्यन्त भ्युपगमेऽनवस्थापातभिया साध्यं नास्तीति हेतोः शक्त्या व्यभिचाराच्च। न च वह्नौ दाहशक्ति संद्भावेऽपि जनकशक्तियोगिन एव कारणत्वेन विवक्षितत्वान्न शक्तौ व्यभिचार इति वाच्य विशेषणशक्त्यसिद्धौ शक्तियोगित्वस्यासिद्धेः, मानान्तरेण शक्तिरूपविशेषणस्य सिद्धे कृतं प्र विस्तारेण। गुणादेरप्यतीन्द्रियसामान्यवन्निष्क्रियाश्रयत्वे घटादिवद्द्रव्यत्वप्रसङ्गात् न यथो शक्त्याश्रयत्वं वह्नौ सिद्ध्यति, गुणादौ हेतुरस्ति निरुक्तं साध्यं च नास्ति तत्र व्यभिचार इति भा

शक्तिवादी प्रयोगान्तरमुद्भावयति—अस्तु तर्हीति। स्फोटकारणातिरिक्तकारणजन्य इत्य व्याघातवारणायोभयवादिसम्प्रतिपन्नेति ग्रहणं, साध्याप्रसिद्धिवारणाय स्फोटेत्युक्तम्। स्फोटः=द ताहृशकारणमुभयवादिसम्मतं प्रतिबन्धकाभावस्तत्र तव विप्रतिपत्तेरर्थान्तरतामाह—मैवमि मत्पक्षे सिद्धसाधनताप्यस्ति। भावजन्य इति विशेषणोपादानेऽपीश्वरेण सिद्धसाधनताऽपरिहा न च सहजशक्तावर्थापत्त्यनुमानयोः प्रमाणत्वाभावेऽपि आधेयशक्तावागमस्य प्रमाणत्वबलेन सहजशक्तिरपि सिध्यतीत्याशङ्कते—नन्विति। आगमेष्वाधेयशक्तिं संघटयति—तथाहीत्यादि व्रीहीनित्यादिवाक्येषु द्वितीयाश्रुत्या व्रीह्यादीनां कर्मत्वावगमेन तत्र प्रोक्षणजन्यः कश्चिदाधेया निश्चीयते। तत्रापि दृष्टफलादर्शनेन काचिददृष्टशक्तिः शक्तिवादिभिरभ्युपेयते इति चेन्न, आत्म गुणादृष्टस्यानात्मसु व्रीह्यादिष्वसम्भवात्, प्रोक्षणजन्यसंस्कारस्य कर्तृसमवेतत्वेन प्रोक्षणस्य

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शक्तिकल्पनायां प्रमाणाभावात्। तस्मान्न शक्तिसद्भावे प्रमाणमस्ति। तथाच प्रयुक्तं लीलावतीकारेण—'विवादाध्यासितं न निजरूपमात्रसम्बद्धातीन्द्रियसापेक्षम्, प्रमाणेन तथानुपलभ्यमानत्वात्, यत्प्रमाणेन यथा नोपलभ्यते न तत्तथाभूतं यथा नीलं पीतरूपम्' इति। अत्र च निजरूपमात्रसम्बद्धशब्देन द्विष्ठस्य सम्प्रयोगादेर्व्यावृत्तिः क्रियत इति।

अत्रोच्यते——न तावच्छक्तौ प्रमाणाभावः, यस्मात्——

परास्य शक्तिर्विविधा, सर्गाद्या भावशक्तयः।
इति श्रुतिस्मृतिमिता शक्तिः केन निवार्यते ॥२३॥

'न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते।
परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ॥'

'ते ध्यानयोगानुगता अपश्यन्देवात्मशक्तिं स्वगुणैर्निगूढाम्।'

'य एकोऽवर्णो बहुधा शक्तियोगात्',

'शक्तयः सर्वभावानामचिन्त्यज्ञानगोचराः।
यतोऽतो ब्रह्मणस्तास्तु सर्गाद्याऽभावशक्तयः ॥'

''सर्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः।
अचिन्त्यशक्तिश्च विभोर्विधिज्ञाः षडाहुरङ्गानि महेश्वरस्य ॥''

इत्यादिश्रुतिस्मृतिशतैर्गीयमाना शक्तिः शक्यते कथमपह्नोतुम्? न चैतानि वचांसि स्वरूपसहकारिमात्रप्रतिपादकानि; कार्यकरणादिसहकारिनिरासपुरःसरं तस्याः प्रतिपादनात्। न च स्वरूपत्वमपि शक्तेः; परास्येत्यादिषष्ठ्या स्वरूपातिरिक्तत्वप्रतिपादनात्, 'अस्य शक्तिर्विविधा' 'तास्तु शक्तयः' इति च नानात्वेन श्रूयमाणाया एकरूपब्रह्मत्वासम्भवाच्च।

क्याभावाच्च व्रीह्यादिषु शक्तिकल्पनायां प्रमाणाभावादित्युपसंहरति—तस्मान्नेति। अत्र लीलावतीकारस्य प्रयोगमप्याह—विवादेति। विवादाध्यासितम्=अग्न्यादिकम्। अतीन्द्रियसापेक्षं न भवतीत्युक्तेरीश्वरेच्छादृष्टादिसापेक्षत्वेन बाधः स्यात्तद्वारणाय निजरूपसम्बद्धेतिग्रहणम्। तावत्त्वे चादृष्टवदात्मसंयोगादिसापेक्षत्वेन बाधवारणाय मात्रपदम्। संयोगस्य द्विष्ठत्वेन व्यापकत्वाभावादित्याह—अत्रचेति।

शक्तौ प्रमाणाभावं निराचष्टे—न तावदिति। शक्तिसद्भावे श्रुतिप्रमाणमाह—परास्येत्यादि। संग्रहं विवृणोति—न तस्येति। ईश्वरस्य स्थूलशरीरं सूक्ष्मशरीरं च न विद्यते, परमेश्वरेण समोऽधिको वा श्रुत्यादिषु न दृश्यते, तथा च परमेश्वरस्य परा शक्तिर्विविधैव श्रूयते। एवं ज्ञानं बलं क्रिया चेत्येतत् सर्वं स्वाभाविकम्। ते ब्रह्मवादिनो ध्यानात्मकयोगानुगता अनाद्यनिर्वचनीयां शक्तिं सत्त्वादिगुणैर्निगूढामपश्यन्। स एको नामरूपादिवर्णैरहितः सन्नपि बहुप्रकारं वर्णान् विदधाति। स्मृतिं विशदयति—शक्तय इति। शक्तिशब्दः सहकारिस्वरूपमात्रपरं प्रतिषेधति—न चैतानीति। शक्तेर्ब्रह्मस्वरूपत्वाभावे हेतुमाह—परास्येति। षष्ठ्या शक्तेः ब्रह्मस्वरूपाद्भेदप्रतिपादनात्, बहुत्वाभिधानात्,

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

न चासां श्रुतिस्मृतीनामर्थवादत्वम्; उपक्रमोपसंहारादिलिङ्गैर्नेश्वरस्वरूपत्वाध्यवसायात्, नैयायिकादिभिरेतासामीश्वरस्वरूपपरत्वाभ्युपगमाच्च ।

अथैवमपि नार्थापत्त्यनुमाने विना तार्किकमन्यस्तुष्यति भवान्, तदर्थापत्त्यनुमानोपन्यासेन भवन्तं परितोषयामः। तथा हि—स्फोटादिकार्यान्यथानुपपत्तिलक्षणोदाहृतैवार्थापत्तिः। ननु तत्राप्युदितैवान्यथाप्युपपत्तिः। प्रतिबन्धकाभावसहकृतादेव वह्निस्वरूपात्कार्योत्पत्तेः। न च प्रागभावप्रध्वंसाभावादिविकल्पेनाभावस्याकारणत्वम्; शक्तावपि तत्प्रसङ्गस्य तुल्यत्वात्, अप्रतिबद्धाया एव शक्तेः कारणत्वादिति चेत्, मैवम्; विकल्पासहत्वात्। तथा हि—यदि प्रतिबन्धकाभावः कारणं न स्यान्न स्यात्तर्हि शक्तिरपि कारणमिति प्रतिकूलतर्कमात्रमिदम्? किं वा भवति च शक्तिः कारणं ततः प्रतिबन्धकाभावोऽपि कारणमिति विपर्यये पर्यवसानादभावस्य कारणत्वसाधकं वा? नाद्यः; तर्कमात्रस्योपालम्भानङ्गत्वात्। नेतरः; भवति च शक्तिः कारणमिति विपर्ययस्य शक्तिमनिच्छता वक्तुमशक्यत्वात्। न च परसिद्धेन परस्यानिष्टापादनम्; प्रमितप्रतियोगिकनिषेधवादिनः शक्तिरपि कारणं न भवेदित्येवम्विधनिषेधस्याप्यसिद्धेः। तथापि जल्पकथामवधीर्य प्रतिबन्धकाभावस्याकारणत्वे प्रतिबद्धापि शक्तिः किमिति कार्यं न जनयेदिति सुहृद्भावेन पृच्छतः किमुत्तरमिति चेत्, श्रूयतां तर्हि दर्शनरहस्यम्!—सतिपुष्कलकारणे कार्योत्पादविरोधिप्रतिबन्धकमिति हि शक्तिवादिनः। तेन न सामग्रीवैकल्यात्तत्र कार्यानुदयः, किन्तु विरोधिसद्भावादेव। न च सामग्रीवैकल्यमेव प्रतिबन्धः; लोकप्रसिद्धिविरोधात्। नहि कुशूलनिहितबीजानि क्षितिपवनपाथस्तेजस्संसर्गविरहितानि तन्तवो वा मञ्जूषानिहितास्तुरीवेमकुविन्दादिविरहिणः प्रतिबद्धा इति प्रतियन्ति लौकिकाः। सामग्रीविधुरतामात्रस्य

स्वेनैव स्वस्य भेदायोगादेकस्यानेकत्वायोगाच्चेति भावः। न चासां श्रुत्यादीनामर्थवादत्वमिति वाच्यम्, उपक्रमादितात्पर्यनिर्णायकलिङ्गैर्नेश्वरत्वनिश्चयात्, भेदवादिभिरप्येतासामीश्वरस्वरूपपरत्वाभ्युपगमाच्च।

अथार्थापत्त्यनुमाने विनाऽपरितुष्यमाणं तार्किकं तर्करसिकं ताभ्यामपि तोषयितुं शक्नुमः इत्याह—तथाहीति। पूर्ववादिनोक्तामन्यथोपपत्तिमनूद्य दूषयति—नन्विति। तत्रापि पूर्वपक्षं विकल्प्य निराकुरुते—विकल्पासहत्वादिति। नाद्यः, तर्कमात्रोपादानस्य दोषसाधकत्वानभ्युपगमात्। नापि द्वितीयः, शक्तिः कारणं भवतीति विपर्ययस्य शक्तिमनिच्छता पूर्ववादिना वक्तुमशक्यत्वात्। न च पराभिमतसिद्धेन परपक्षेऽनिष्टापादनमिति वाच्यम्, प्रमितप्रतियोगिकप्रतिषेधवादिनो नैयायिकादेः शक्तिरपि कारणं न भवतीत्येवंविधनिषेधस्यानुपपत्तेः। वस्तुव्यावृत्तिं जिज्ञासुः सन् पृच्छति—तथापीति। तत्त्वजिज्ञासुं प्रति दर्शनरहस्यं प्रतिपादयति—सतीत्यादिना। सति पुष्कलकारणे कार्योत्पादविरोधिप्रतिबन्धकं शक्तिवादिनो मन्यन्ते। एतेन सामग्रीवैकल्यस्य प्रतिबन्धकत्वाभावान्न ततः कार्यानुत्पादः, किन्तु विरोधिविद्यमानत्वादेव कार्यानुत्पाद इति भावः। सामग्रीवैकल्यस्य प्रतिबन्धकत्वं न लोकसिद्धम्। प्रसिद्धिविरोधं दर्शयति—नहीति। कुशूलं=धान्यागारः। पाथः=उदकम्। कुविन्दः=तन्तुवायः। तुरी=वेणुनलिका। वेम=लौहनिर्मितयन्त्रम्। सामग्रीवैकल्यमात्रस्य

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

च प्रतिबन्धतायाम् समस्तस्यापि हेतुजातस्य प्रतिबन्धाभावतयैवोपक्षीणत्वात् 'इदमस्य कारणमयं च प्रतिबन्धाभावः' इति परीक्षकाणां विशेषावधारणमेव न स्यात्। अभावस्याकारणत्वे कार्येणान्वयव्यतिरेकविरोध इति चेत्, मैवम्; अन्यथासिद्धत्वात्, 'अनन्यथासिद्धावन्वयव्यतिरेकौ कारणक्लृप्तिं कुर्वाते' इति न्यायात्। तर्ह्यनुपलब्धेरप्यभावोपलम्भहेतुता न भवेत्, विरोधिन्या भावोपलब्धेरभावतया तदन्वयव्यतिरेकयोरप्यन्यथासिद्धेर्वक्तुं सुकरत्वादिति चेत्, न; तद्व्यतिरेकेणाभावोपलम्भकारणानिरूपणात्। इन्द्रियमेव कारणमिति चेत्, न; तस्याभावेन सन्निकर्षाभावात्। संयोगसमवाययोस्तत्राभावात्, विशेषणविशेष्यभावस्य च सम्बन्धान्तरगर्भस्यैव प्रत्यक्षाङ्गत्वात्, न तत्राभावस्य प्रत्यक्षगम्यत्वम्; किंत्वनुपलब्धिगम्यतैवेति निश्चीयते। अन्यथायं पर्वतो वह्निमानित्यत्र वह्नेरपि संयुक्तविशेषणतया प्रत्यक्षत्वप्रसङ्गात्।

नन्वसम्बद्धस्यैवाभावस्येन्द्रियग्राह्यत्वमस्तु, तत्प्रतीतेरेन्द्रियान्वयव्यतिरेकानुविधायित्वेनापरोक्षत्वात्, गत्यन्तराभावच्चेति चेत्, मैवम्; अयोगिप्रत्यक्षप्रमिताविन्द्रियाणांसम्बद्धार्थग्राहकत्वनियमस्य निराकर्तुमशक्यत्वात्, अभावप्रतीतेरपरोक्षत्वस्यासिद्धत्वादिन्द्रियान्वयव्यतिरेकयोरधिकरणग्रहणमात्र एवोपक्षीणतयान्यथासिद्धत्वाच्च। नन्वधिकरणग्रहणमात्रोपक्षीणत्वमन्वयव्यतिरेकयोरयुक्तम्; अन्धस्य त्वगिन्द्रियेणोपनीतघटादौ रूपाभावप्रतीतिप्रसङ्गात्, अधिकरणस्य गृहीतत्वात्, इन्द्रियस्य चाभावाग्राहकत्वात्। तस्मादन्धस्य

प्रतिबन्धत्वे समस्तस्य हेतुजातस्य प्रतिबन्धतयैवोपक्षयादिदमस्य कारणमयं च प्रतिबन्धाभाव इति परीक्षकैर्विशेषस्यावधारयितुमशक्यत्वात्। प्रतिबन्धाभावस्याकारणत्वेऽन्वयव्यतिरेकविरोधमाशङ्कते अभावस्येति। विरोधिनिवर्त्तकत्वेन कार्यकारणभावानिश्चायकतयाऽन्यथासिद्धत्वान्न प्रतिबन्धाभावस्य कारणत्वं कल्पनीयमित्याह—मैवमित्यादिना। "अनन्यथासिद्धावन्वयव्यतिरेकौ कारणक्लृप्तिं कुर्वाते"इति न्यायात्। अन्यथासिद्धिशून्याभ्यामन्वयव्यतिरेकाभ्यां कार्यकारणभावो निश्चीयत तर्हि तदर्थः। तथासति पूर्ववादी पूर्वोक्तां प्रतिबन्दीं स्मारयति—तर्हीति। वैषम्येण प्रतिबन्दीं परिहरति—न, तदिति। तद्व्यतिरेकेण=अनुपलब्धिव्यतिरेकेण। इन्द्रियमेवाभावोपलब्धिकारणमिति चेन्न, इन्द्रियस्याभावेन सन्निकर्षाभावात्। सन्निकर्षाभावमेव दर्शयति—संयोगेति। विशेषणविशेष्यभावसम्बन्धस्य संयोगादिसम्बन्धान्तरगर्भतयैव प्रत्यक्षाङ्गत्वाभ्युपगमात्। तथा चाभावस्य न प्रत्यक्षगम्यत्वमपित्वनुपलब्धिगम्यत्वमेव। अन्यथा पर्वतो वह्निमानित्यादौ प्रत्यक्षधर्मिकानुमानोच्छेदप्रसङ्गः स्यादिति भावः।

ननु सम्बन्धमन्तरेणैवाभावस्येन्द्रियग्राह्यत्वमस्तु, अभावप्रतीतेरन्वयव्यतिरेकानुविधायित्वत्वाद्गत्यन्तराभावाच्चेति चेन्न, योगिभिन्नप्रत्यक्षप्रमायामिन्द्रियाणां सम्बन्धेनैव ग्राहकत्वनियमस्य प्रत्याख्यातुमशक्यत्वादभावोपलम्भस्यापरोक्षत्वस्यासिद्धत्वादिन्द्रियान्वयव्यतिरेकयोरधिकरणग्रहणमात्रेणैवोपक्षीणतयाऽन्यथासिद्धत्वाच्च। न चैवमन्धस्य त्वगिन्द्रियसंयुक्तघटादौ रूपाभावप्रतीतिः स्यात्; अधिकरणस्य त्वचागृहीतत्वात्, चक्षुरिन्द्रियस्य चाभावाग्राहकत्वात्। तस्माद् यदिन्द्रियवैकल्यादभावाग्रहणं तदिन्द्रियमेव तत्प्रतियोगिकाभावग्राहकं वक्तव्यमिति वाच्यम्, अभावस्य प्रतियोगिग्राहकेन्द्रियग्राह्यत्वमतेऽप्यनन्धस्यापि मेर्वादौ घटतद्रूपाद्यभावस्य चाक्षुषत्वप्रसङ्गात्।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रतियोगिग्राहकेन्द्रियाभावादेव रूपाभावप्रतीत्यनुदय इति वाच्यम्। तथा चाभावस्यैन्द्रियकत्वसिद्धिरिति चेत्, मैवम्; अभावस्य प्रतियोगिग्राहकेन्द्रियग्राह्यत्वमतेऽप्यन्धस्यापि मेर्वादौ घटतद्रूपाद्यभावस्य चाक्षुषत्वं किं न स्यात्? ननु तत्र प्रतियोगिनश्चाक्षुषत्वेऽप्यधिकरणस्याचाक्षुषत्वान्न तत्र रूपाभावश्चाक्षुष इति चेत्, एवं तर्हि मन्मतेऽपि नान्धस्य त्वगिन्द्रियगृहीते घटादौ रूपाभावप्रतीतिः। प्रतियोगिग्राहकेणाधिकरणस्य घटादेरग्रहणात्। तर्हि घ्राणागोचरकुसुमादौ वायौ वाऽचाक्षुषे गन्धस्य रूपस्य चाभावप्रत्यक्षो न स्यादितिचेत्, मा भूत्; तत्र प्रमाणान्तरवेद्यत्वेऽपि तद्व्यवहाराविरोधात्। न च सर्वत्र षष्ठप्रमाणवादिनामनुपलब्धिगम्य एवाभाव इति नियमः। व्यापकाभावाद्व्याप्याभावस्य कारणाभावेन कार्याभावस्य वाऽनुमेयत्वाङ्गीकारात्। उक्तं हि भट्टपादैः—

"नियम्यत्वनियन्तृत्वे भावयोर्यादृशी मते।
विपरीते प्रतीयेते त एव तदभावयोः॥" इति (श्लो०वा० ५/१२१)

तथाच ब्रह्मसिद्धौ मण्डनमिश्रैः "विपर्ययाभावस्तु युक्तोऽनुमातुं हेत्वभावे फलाभावः" इति तस्मादनुपलब्धेरनन्यथासिद्धान्वयव्यतिरेकबलादभावप्रतीतिहेतुता स्थलविशेषेऽवसीयते। प्रस्तुते च स्वपुष्कलकारणादेव कार्योत्पत्त्युपपत्तौ न प्रतिबन्धकाभावस्य कारणता, अन्योन्याश्रयता चास्य मते दुर्वारा। यद्यपि मण्यादेः कार्यप्रतिकूलत्वमन्वयव्यतिरेकावसेयम्, तथापि विसामग्रीरूपतालक्षणं यदिदं प्रतिबन्धत्वं तत्तदीयाभावस्य सामग्र्यन्तर्भावविज्ञानसापेक्षम्, प्रतिबन्धो विसामग्रीत्यङ्गीकारात्। तेन प्रतिबन्धत्वसामग्रीत्वयोरन्योन्यापेक्षयै-

---

न चात्र प्रतियोगिनो घटादेश्चाक्षुषत्वेऽप्यनुयोगिनोऽसन्निहितस्य मेर्वादेरधिकरणस्याचाक्षुषत्वान्न तत्र रूपाभावश्चक्षुष इति वाच्यम्, तत्र प्रतियोगिग्राहकेण चक्षुषाऽधिकरणस्य घटादेरग्रहणात्। न चैवं घ्राणागोचरपुष्पादौ गन्धस्य वायौ वाऽचाक्षुषे रूपस्य चाभावप्रत्यक्षाभावः स्यादिति वाच्यम्, तत्र प्रमाणान्तरेणानुमानेन वेद्यत्वेऽपि गन्धाद्यभावस्य व्यवहाराविरोधात्। नहि सर्वत्रानुपलब्धिप्रमाणवादिनाऽभावोऽनुपलब्धिप्रमाणगम्य एवेति नियमः। व्यापकाभावेन व्याप्याभावस्य कारणाभावेन कार्याभावस्य चानुमानगम्यत्वाङ्गीकारात्। व्यापकाभावेन व्याप्याभावे भट्टपादसम्मतिमाह—नियम्यत्वादिना। कारणाभावेन कार्याभावानुमाने ब्रह्मसिद्धिवाक्यमुदाहरति—विपर्ययेत्यादिना। अन्यथानुपपत्तिबलेनानुपलब्धेरभावप्रतीतिकारणतासमर्थनमुपसंहरति—तस्मादिति। प्रतिबन्धकाभावस्याकारणत्वे प्रमाणमाह—प्रस्तुते चेति। प्रतिबन्धाभावकारणवादिमते पूर्वोक्ताऽन्योन्याश्रयता दुर्वारा। प्रतिबन्धत्वं द्विविधं, कार्यप्रतिकूलत्वरूपं वैसामग्र्यभावरूपं चेति। तत्र मण्यादेः कार्यप्रतिकूलत्वमन्वयव्यतिरेकाभ्यामवसेयम्, किन्तु विसामग्रीरूपतालक्षणं प्रतिबन्धत्वमिति मते प्रतिबन्धत्वकारणत्वज्ञानयोः परस्पराश्रयता वारयितुमशक्येत्याह—यद्यपीत्यादिना। पूर्ववादी परस्पराश्रतापरिहारं पूर्वोक्तं स्मारयति—नन्विति। यथाऽन्वयव्यतिरेकाभ्यां वह्निस्वरूपं स्वातन्त्र्येण दाहं प्रतिकारणमेवं मण्यादेरभावे कारणताज्ञानं स्वातन्त्र्येणान्वयव्यतिरेकाभ्यां

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वाधिगतिरिति परस्पराश्रयता कथं न स्यात् ? ननु मण्याद्यभावस्य सामग्र्यन्तर्भावज्ञानसापेक्षमस्तु नाम मण्यादेर्विसामग्रीत्यज्ञानम्, तथापि तदभावस्यान्वयव्यतिरेकाभ्यामेव वह्निस्वरूपवत्सामग्र्यन्तर्भावावगतिसम्भवान्नान्योन्याश्रयतेति चेत्, मैवम्; विकल्पासहत्वात्। तथाहि—किं मण्याद्यभावाः प्रत्येकमन्वयव्यतिरेकाभ्यां कारणतया अवसीयन्ते? अथवा प्रतिबन्धाभावत्वोपाधिना क्रोडीकृताः ? नाद्यः; मण्याद्यभावानामनन्तानामुपसंग्राहकं विना प्रत्येकमन्वयव्यतिरेकाध्यवसानस्य पुरुषायुषेणाप्यशक्यत्वात्। नापि द्वितीयः; तथा सति विसामग्रीलक्षणप्रतिबन्धज्ञानाधीनप्रतिबन्धाभावत्वोपाधिज्ञानमन्तरेण मण्याद्यभावानां सामग्र्यन्तर्भावस्य दुरधिगमतयान्योन्याश्रयताया दुरुत्तरत्वात्। न च शक्तिपक्षे प्रतिबन्धासम्भवः; शक्तिमनभ्युपगच्छतामिव शक्तिमभ्युपगच्छतामपि कारणानां कार्यौदासीन्यस्यैव प्रतिबन्धतोपपत्तेः। वैसामग्र्यस्य प्रतिबन्धस्योदीरितरीत्या निरस्तत्वात्। अतः प्रतिबन्धाभावस्य कारणत्वासम्भवान्न कार्यार्थापत्तेरन्यथोपपत्तिः।

उपादानोपादेयभावनियमानुपपत्तिरपि शक्तौ प्रमाणमेव। ननु तत्र स्वभावभेदादेवोपपत्तेरन्यथोपपत्तिरुक्तेति चेत्, मैवम्; तथा सति सर्वत्र स्वभाववादपादप्रसारिकया सामान्यसमवायविशेषादेरपि पराकरणप्रसङ्गात्। तथाहि—सत्तायां स्वभावभेदादेव सदिति व्यवहारवत् द्रव्यादिष्वपि सद्व्यवहारोपपत्तौ सत्तासामान्यापलापः प्रसज्येत। एवं 'समवयवानयं घटः' इत्यादाविव सम्बन्धमन्तरेणापि गुणकर्मादेर्विशेषणत्वोपपत्तौ समवायापह्नवः स्यात्। विशेषाणां विशेषान्तरमन्तरेणैव व्यावृत्तिव्यवहारहेतुत्ववच्च नित्यद्रव्याणामपि स्वभावभेदादेव तथात्वोपपत्तौ विशेषपदार्थपरित्यागप्रसङ्गः।

कारणमित्यभ्युपगमे नान्योऽन्याश्रयतेति स्पष्टयति—मण्याद्यभावस्येति। तं विकल्प्य दूषयति—मैवमित्यादिना। आद्येऽनन्तानां मण्याद्यभावानामुपसंहारकमन्तरेण प्रत्येकमन्वयव्यतिरेकाभ्यां निश्चेतुमल्पज्ञपुरुषेण पूर्णायुषेणाप्यशक्यत्वम्। द्वितीयकल्पेऽन्योऽन्याश्रयतां दुर्वारामाह—तथासतीति। कारणाभावरूपप्रतिबन्धज्ञानाधीनमस्ति प्रतिबन्धाभावत्वोपाधिज्ञानं, निरुक्तसंग्राहकज्ञानं विनाऽनन्तमण्याद्यभावेषु कारणत्वं दुरधिगममित्यतः कारणत्वप्रतिबन्धकत्वयोरन्योन्यापेक्षतास्त्येवेति भावः। न च शक्तिपक्षेऽपि प्रतिबन्धकत्वं दुर्निरूप्यमिति वाच्यम्, शक्तिवादिनामपि अशक्तिवादिनामिव कारणानां कार्यौदासीन्यस्यैव प्रतिबन्धत्वोपपत्तेः। वैसामग्र्यस्य=सामग्र्यभावरूपप्रतिबन्धस्योक्तरीत्या निरस्तत्वात्। अतः प्रतिबन्धाभावस्य कारणत्वासम्भवान्न तेन कार्यार्थापत्तेरन्यथोपपत्तेः।

कार्यकारणभावनियमानुपपत्तिरपि शक्तिसद्भावे प्रमाणमिति द्वितीयार्थापत्तिमुपपादयति—उपादानेति। स्वभावभेदमादायान्यथोपपत्तिमुक्तां स्मारयति—नन्विति। सामान्यविशेषसमवायानामपलापं यथायथमुपपादयति—तथाहीत्यादिना। तथात्वोपपत्तौ=व्यावृत्तत्वोपपत्तावित्यर्थः। एवं कालादावपि सत्तासम्बन्धमन्तरेणव सत्त्वव्यवहारवदितरेषामपि तथात्वात्कालाद्यपलापप्रसङ्गः। अथ प्रमाणसत्त्वे वस्त्वन्तराधीन एव व्यावृत्तिर्व्यवहारः, प्रमाणाभावे स्वभावविशेषादेव व्यावृत्तिर्व्यव-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ यत्र यत्र प्रमाणमस्ति तत्र तत्र वस्त्वन्तराधीन एव तद्व्यवहारः; यत्र तन्नास्ति, तत्र तत्स्वभावभेदादेव व्यवहार इति व्यवस्थेति चेत्, हन्तैवमत्रापि प्रमाण सद्भावादेव स्वरूपातिरेकिणी शक्तिरङ्गीक्रियताम्, कृतं स्वभाववादपादावलम्बन-कातरतयेत्यलमतिविस्तरेण ।

अनुमानमपि तत्र प्रमाणम् । तथाहि--

स्थितिस्थापकधर्मान्यातीन्द्रियाद्विष्ठसंश्रयः ।
दहनो गुणयोगित्वाद् गुरुत्वाश्रयकुम्भवत् ॥ २४ ॥

वह्निरद्विष्ठातीन्द्रियस्थितिस्थापकेतरभावाश्रयः, गुणवत्त्वात्, घटवत् । न चेश्वरवादिना मतीन्द्रियत्वमसिद्धम्; प्रमाणान्तरोपनीतविशेषणानालम्बनानुव्यवसायेतरास्मदादिप्रत्य-क्षाविषयत्वस्यातीन्द्रियशब्दार्थस्य गुरुत्वादौ भावनादौ च प्रसिद्धत्वात्, 'गुरुत्वधर्माधर्म भावना अतीन्द्रियाः' इति प्रशस्तपादैरुक्तत्वात् । ननु किमिहाश्रयशब्देनाधारत्वमा विवक्षितम् ? उत तत्समवायित्वम् ? नाद्यः; वह्नेः कदाचित्परमाण्वाधारत्वसम्भवे सिद्धसाधनत्वात् । नापि द्वितीयः; समवायमनिच्छतो भाट्टस्याप्रसिद्धविशेषणत्वादिति चेत् मैवम्; समवायाङ्गीकारेऽपि स्वीयरूपादीनामिवायुतसिद्धतया वह्नेर्विशिष्टधर्माधारत्वस्या-श्रयशब्देन विवक्षितत्वात् । न चातीन्द्रियकर्माश्रयत्वेन मीमांसकस्यार्थान्तरता; शक्ति

हार इति व्यवस्था । अर्थात् नित्यद्रव्याणां व्यावर्त्तको विशेषः प्रमाणसिद्धः, किन्त्वनवस्थाभिया विशे व्यावर्त्तको नान्यो विशेषोऽभ्युपगम्यः इतिचेन्न शक्तावपि प्रमाणसत्त्वेनैव स्वरूपातिरेकिणी शक्ति-भ्युपेया, कृतं स्वभाववादशरणागत्येत्यलमतिविस्तरेण ।

एवमर्थापत्तिमुपपाद्यानुमानमप्युपपादयितुं श्लोकेनानुमानं संकलयति—स्थितिस्थापकेति पूर्वार्द्धेन साध्यनिर्देशः । दहनः=पक्षः । श्लोकार्थं विशदयति—वह्निरित्यादिना । आकाशादिसंयो वारणायाद्विष्ठेति । रूपादिवारणायातीन्द्रियेति । प्रत्यक्षयोग्यसावयववह्नेः पक्षत्वाद्द्व्यणुकादि गतरूपमादाय नार्थान्तरता । स्थितिस्थापकवारणाय स्थितिस्थापकेतरेति । अग्निनिष्ठस्यातीन्द्रिय काशादिप्रतियोगिकभेदस्य वारणाय भावपदम् । आश्रयपदेनायुतसिद्धितया सिद्धसम्बन्धित्वस्य विवक्षितत्वेन न वायवीयपरमाणुभिरर्थान्तरता । घटादिदृष्टान्ते गुरुत्वेन साध्यप्रसिद्धिः । न चेश्वरस्य योगिनां च सत्तावादिनां मतेऽतीन्द्रियत्वमप्रसिद्धमिति वाच्यम्; अतीन्द्रियशब्देन विवक्षितार्थस्य गुरुत्वादौ भावनादौ च प्रसिद्धत्वादित्याह—प्रमाणान्तरोपनीतेति । ज्ञानलक्षणसन्निकर्षजन्यत्वे सत्यनु व्यवसायभिन्नत्वे च सति अस्मदादिप्रत्यक्षाविषयत्वमिति तदर्थः । गुरुत्वादिभाष्योक्तौ भावनापदे स्थितिस्थापकत्वमप्युपलक्ष्यते । ननु निरुक्तानुमाने साध्यशरीरे निविष्टस्याश्रयपदस्याधारमात्रार्थे विवक्षितश्चेत्, तर्ह्यग्नेरपि कदाचित्परमाण्वाधारत्वसम्भवेन सिद्धसाधनत्वात् । आधारपदे समवायित्वविवक्षायां भाट्टमतेऽप्रसिद्धविशेषणत्वं स्यादिति चेन्न, समवायमनभ्युपगच्छतां भाट्टानां मतेऽपि यथाग्नौ स्वीयायुतसिद्धरूपादेराश्रयता तद्वद्विशिष्टधर्मस्याप्याश्रयताया आश्रयपदेन विवक्षित त्वादित्यर्थः । न च कर्माप्रत्यक्षवादिनः प्राभाकरस्याप्यर्थान्तरतोक्तेति वाच्यम्, शक्तिवादिनोर्भाट्ट

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वादिनोरपि प्राभाकरवद्भाट्टवेदान्तिनोः कर्मातीन्द्रियत्वस्यासिद्धत्वात् । विपक्षे च वह्निस्वरूपस्यैव कारणत्वात्प्रतिबन्धकाभावकारणत्वस्य पुरस्तान्निरस्तत्वात्, मन्त्रादिसमवधानासमवधानयोरविशेषेण कार्यजननप्रसङ्गो बाधकः । न चैवंविधधर्माश्रयत्वे गुणकर्मादेरपि द्रव्यत्वप्रसङ्गः; तेषां गुणानधिकरणत्वात् । न चैवंविधधर्माश्रयत्वाद् गुणाधिकरणत्वमपि स्यादिति वाच्यम्; प्रसङ्गस्य विपर्ययापर्यवसायित्वात् । न हि यद्गुणानधिकरणं तदेवंविधधर्माधिकरणं न भवतीति प्रतिवादिसम्प्रतिपन्नमुदाहरणमस्ति, येनायं प्रसङ्गो विपर्यये पर्यवसायी स्यात्; शक्तिव्यतिरिक्तस्य सर्वस्य पक्षकोटिनिक्षिप्तत्वात् । द्वितीयानुमानेऽपि मायावादिनं प्रति नेश्वरकारणत्वेन सिद्धसाधनता । तस्योभयवादिसम्मत कारणातिरिक्तत्वाभावादीश्वरकारणत्वस्य वेदान्तिभिरभ्युपगमात्, जन्यभावजन्य इति विशेषणान्तरप्रक्षेपेण भाट्टस्याप्यर्थान्तरपरिहारसम्भवात् । न चैवं सति नित्येषु शक्त्यभावप्रसङ्गः; अनित्येषु शक्तिसिद्धौ तद्दृष्टान्तावष्टम्भत एव नित्येष्वपि तत्सिद्धेः सलिलपरमाणुरूपादिवन्नित्येषु तस्याश्च नित्यत्वोपपत्तेः ।

व्रीहीन्प्रोक्षतीत्यादिद्वितीयाश्रुतिभिश्च व्रीह्यादिषु अतीन्द्रियशक्तिसद्भावसिद्धिः । न चादृष्टस्य चेतनधर्मस्याचेतनेषु व्रीह्यादिष्वसम्भवात् तद्विषयक्रियाजन्यतामात्रेण तदीयत्वप्रतिपत्त्युपपत्तेश्च द्वितीयाश्रुतिर्गौणीति वाच्यम्; धर्माधर्मलक्षणादृष्टविलक्षणस्यैव कस्यचिदतिशयस्य तण्डुलपिष्टपुरोडाशादिपरम्परया प्रधानापूर्वजननसामर्थ्यापरनामधे-

---

वेदान्तिनोरपि प्राभाकरवत् कर्मातीन्द्रियत्वस्याप्रसिद्धत्वात् । विपक्षेबाधकमाह—विपक्षे च । एवंविधधर्माश्रयत्वेन गुणादौ द्रव्यत्वप्रसक्तिं वारयति—न चैवंविधेति । गुणाधिकरणत्वं सम्भाव्य परिहरति—न चैवंविधधर्माश्रयत्वादित्यादिना । विप्रतिपन्नं गुणादिकम्, एवंविधधर्मानधिकरणं गुणानधिकरणत्वात् इत्युदाहरणाभावेन दूषणं विशदयति—नहीति । शक्तिभिन्नस्य सर्वस्य पक्षान्तर्गतत्वेनोदाहरणाभाव इत्यर्थः । विमतः स्फोटः, उभयवादिसम्प्रतिपन्नस्फोटकारणातिरिक्तकारणजन्यः, कार्यत्वात्, घटवदिति द्वितीयानुमाने पूर्ववादिनोक्तां सिद्धसाधनतां परिहरति—मायावादिनं प्रतीति । अनीश्वरवादिभाट्टमते जन्यभावजन्य इति विशेषणान्तरोपादानेनार्थान्तरतापरिहारसम्भवादितिभावः । नित्यगतनित्यशक्तावव्याप्तिं परिहरति—न चैवमित्यादिना । तथा नित्यानित्यवस्तुषु नित्यानित्यशक्तिस्वीकृतत्वेनैक्यरूपत्वं शक्तौ नाशङ्कनीयमितिभावः ।

आधेयशक्तावागमप्रमाणमाह—व्रीहीनिति । मुख्यार्थोपपत्तिद्वाराऽर्थान्तरत्वं वारयति—न चेत्यादिना । तत्र हेतुमाह—धर्माधर्मेति । अदृष्टं द्विविधं धर्माधर्मात्मकं प्रधानापूर्वजननसामर्थ्यात्मकं चेति । तत्र धर्माधर्मात्मकमदृष्टमस्माभिर्व्रीह्यादिषु नाभिमन्यतेऽपितु तद्विलक्षणमित्याह—तण्डुलेत्यादि । पुरोडाशः—प्रोक्षितव्रीहीणामवघातेन तण्डुलनिष्पत्तिस्तत्तण्डुलपिष्टचामालपौष्णजलमभिषिच्य कूर्माकारःपुरुडाशो गार्हपत्याग्नौ परिगणितकपालेषु निर्मीयते, तस्य पुरोडाशस्य नियतभागाहुतिराहवनीयाग्नौ प्रक्षिप्यते । एतत्परम्परया फलजनकप्रधानापूर्वजननसामर्थ्यं व्रीह्यादिष्वाधीयते । अतो व्रीहीनित्यत्र संस्काराधायकं प्रोक्षणमस्माकमभिमतम् । एतच्चादृष्टमन्तरेणानुपपन्नतया विधिवैयर्थ्य-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यस्याभ्युपगमात्। अन्यथा स्वरूपेणैव व्रीह्यादीनां तत्साधनत्वे प्रोक्षणादिविधानवैयर्थ्यप्रसङ्गात्, दृष्टस्यासम्भवे चादृष्टस्यैव कल्पनीयत्वात्, सम्भवति च मुख्ये लक्षणाश्रयणस्यानवकाशत्वात्। एतेन लीलावतीकारस्यापि निराकृतः प्रयोगः। प्रमाणानामागमार्थापत्त्यनुमानानां दर्शितत्वेन प्रमाणेनानुपलभ्यमानत्वादिति हेतोरसिद्धेः। तदेवमर्थप्रत्यायनशक्तिसद्भावात्पदानां तदभिहितेभ्यः पदार्थेभ्यः सन्निधानादिसहकारिवशात्पदार्थानामन्योन्यान्वयप्रतिपत्तिर्लक्षणया सिद्धयतीति सिद्धम्।

ननु पदानामेवान्योन्यान्वितस्वार्थाभिधायकत्वसम्भवे किमिति पदार्थानां लक्षणयान्योन्यान्वयप्रतिपत्तिजनकत्वमास्थीयते? तथा हि—योग्येतरान्वितस्वार्थेषु पदानामावापोद्धारदर्शनात्तत्रैव सामर्थ्यमध्यवसीयते। यद्यपि प्रतिप्रयोगं विशेषान्तरतत्संसर्गयोर्व्यभिचारः, तथापि योग्येतरान्वितस्य स्वार्थमात्रस्याव्यभिचारात्, प्रथमावगतयोग्येतरान्वितस्वार्थाभिधानसामर्थ्यानुसारेण प्रयोगान्तरेष्वपि तथैव कल्पयिष्यते।

ननु किमनभिहितेन पदार्थेनान्वितस्वार्थमवबोधयति गोपदम्? उत पदान्तराभिहितेन? नाद्यः; एकस्मादेव पदात्तत्तदर्थान्वितस्वार्थावबोधसंभवेन पदान्तरस्य वैयर्थ्यप्रसङ्गात्। न द्वितीयः; परस्पराश्रयप्रसङ्गात्। तथाहि—गामानयेत्यत्र गोपदं यावदानयपदे-

---

प्रसङ्गमाह—अन्यथेति। दृष्टार्थमदृष्टार्थमुभयार्थं चेति त्रिविधमङ्गमुच्यते। तत्र दृष्टार्थेष्वपि नियमादृष्टमभ्युपेयतेऽन्यथा केवलं दृष्टे विधिवैयर्थ्यं स्यात्। दृष्टस्यासम्भवेऽदृष्टकल्पनस्योचितत्वात्। अथविध्यन्यथानुपपत्त्या कल्पितमप्यदृष्टं चेतनात्मनि समवेतमभ्युपेयम् ननु व्रीह्यादिष्वत्यत आह—सम्भवति चेति। व्रीहीन् प्रोक्षतीत्यत्र द्वितीयाश्रुत्या प्रोक्षणेन व्रीहीणामेव संस्कार्यत्वं श्रूयते, तस्य चात्मनि कल्पनायां लक्षणाप्रसङ्गः, स चानुचित इतिभावः। ऐतेनागमार्थापत्त्यनुमानप्रमाणानां दर्शितत्वेननानुपलभ्यमानत्वहेतोरसिद्धतया श्रीवल्लभस्यापि प्रयोगो निराकृतो वेदितव्यः इत्याह—एतेनेति। वादार्थमुपसंहरन् शक्तिसाधनस्य समन्वयोपयोगमाह—तदेवमित्यादिना। तदभिहितेभ्यः पदैरेव स्वाभिहितपदार्थेभ्यो द्वारीभूतेभ्यः सन्निधियोग्यतादिसहकारिबलेन पदार्थानां लक्षणयाऽन्योन्यान्वयबोधः सिद्धयतीतियोजना।

अन्विताभिधानवादिनः प्रत्यवतिष्ठन्ते—नन्वित्यादिना। श्रौतत्वसम्भवे लक्षणा न युक्ता मुख्यामुख्ययोर्मुख्यस्यैवाभ्यर्हितत्वादित्यर्थः। पदानां स्वार्थाभिधायकत्वापेक्षयान्वितस्वार्थाभिधायकत्वस्वीकारे गौरवापत्तिरित्यतोऽन्विताभिधानवादिनः स्वाभिप्रायमाविष्कुर्वन्ति—तथाहीति। प्रमाणगर्भं गौरवं न दोषावहमित्यर्थः। तथा च 'गामानय', 'गां पश्ये'त्यादौ प्रतिप्रयोगे आनयनदर्शनादिविशेषस्य तत्संसर्गस्य च व्यभिचारेऽपि योग्येतरान्वितस्वार्थस्याव्यभिचारः। अतः प्राथमिकशक्तिग्रहो योग्येतरान्वितस्वार्थे भवतीति तदनुसारेण 'अश्वमानये'त्यादिप्रयोगान्तरेष्वपि तथैव कल्पयिष्यते।

अभिहितान्वयवादिनामाक्षेपमुद्भावयति—नन्वित्यादिना। गोपदं पदार्थेनानुक्तेनान्वितस्वार्थमवबोधयति चेत्तर्ह्येकस्मादेव पदात्तत्तदर्थावबोधसम्भवेन पदान्तरप्रयोगस्य वैयर्थ्यप्रसङ्गः। पदान्तरोक्तेनान्वितं स्वार्थं बोधयति गोपदमिति पक्षेऽन्योन्याश्रयप्रसङ्गः। तमेव सुस्पष्टयति—तथाहीति। न च प्रथमं गोपदं केवलं स्वार्थमभिदधाति, तदनन्तरं परस्परान्वितार्थमभिदधातीत्युच्यते

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गोपदार्थान्वितस्वार्थो नाभिधीयते, न तावत्तदन्वितस्वार्थमभिधातुमर्हति; एवं तदपि पदं यावत्स्वार्थान्वितमर्थं गोपदं नाभिदध्यात्, तावत्तदन्वितस्वार्थं नाभिधत्ते। ततश्च गोपदेन तदन्वितस्वार्थेऽभिहिते पश्चादानयपदेन तदन्वितः स्वार्थोऽभिधातव्यः,सति च तस्मिन् गोपदेन स्वार्थोऽभिधातव्य इति व्यक्तमेव परस्पराश्रयत्वम्। पदार्थमात्राभिधानपूर्वके तु तदन्विताभिधाने द्विरभिधानमप्रमाणमनुपपद्यमानं चापद्येत। ननु द्विरभिधानं न पदजातस्य,साहचर्यवशात्स्वार्थेषुप्रथमं स्मारकाणां पश्चादन्विताभिधायकत्वाभ्युपगमादिति चेत्, मैवम्; साहचर्यदर्शनदशायामन्वितानामेवानुभूततया तथैव स्मरणस्यावश्याश्रयणीयत्वात्। नहि पदं पदार्थमात्रप्रतिपत्तये प्रयुज्यते, किंतु व्यवहाराय, स चान्वित एवेति कथमनन्वितानामेवपदार्थानां पदेभ्यः स्मृतिः स्यात्? तथा च गां पश्येति प्रयोगे गोपदेन पूर्वानुभूतानयनान्वितस्वार्थस्य स्मारितत्वात्पश्येति पदमनाकाङ्क्षितार्थमसङ्गतं प्रसज्येत, एवं प्रासादं पश्येत्यत्र प्रासादान्वितस्वार्थाभिधायकत्वात्पश्येति पदस्य,न गोपदं तेन सम्बध्येत। तथा च वाक्यार्थः क्वापि परिनिष्ठतो न सिद्धयेत्। नन्वव्यभिचाराद्गोपदं स्वार्थमात्रमेव स्मारयति, नार्थान्तराणि, तेषां व्यभिचारित्वादिति चेत्, मैवम्; पट्वभ्यासादरप्रत्ययैराहिताया भावनायाः प्रबोधवत्याः स्मरणहेतुत्वाङ्गीकारात्। तत्प्रबोधस्य च व्यभिचारिण्यर्थान्तरे परिगणितप्रणिधानसाहचर्यादिजन्मनोऽविशेषात्। परिगणिता हि स्मृतिहेतवः "प्रणिधानाभ्यासलिङ्गलक्षणसादृश्यपरिग्रहाश्रिताश्रयसम्बन्धानन्तर्यवियोगैककार्यविरोधा-

---

तदा द्विरभिधानमनुपपद्यमानं च प्रमाणमापद्येत। ननु गामानयेत्यत्र गोपदं पूर्वं सास्नादिमत्त्वमर्थं स्मारयति, तदनन्तरमन्वितार्थमभिदधाति गोपदं, तेन पदस्य न द्विरभिधानं दूषणं प्रसज्ज्यत इति चेन्न, पदस्य स्वार्थेन साहचर्यदर्शनावसरेऽन्वितार्थस्यानुभूततया तथाविधस्मरणस्याप्यवश्यमाश्रयणीयत्वात्। अन्वितपदार्थैः सहैव साहचर्यमुपपादयति—नहि पदमिति। विपक्षेऽव्यवस्थामुपपादयति—तथा च गामिति। निरुक्तामव्यवस्थां सर्वेषु वाक्येष्वतिदिशति—तथा चेति। पदानां स्वार्थैः पदान्तरार्थैश्च सह साहचर्याविशेषेऽपि स्वार्थापेक्षया पदार्थान्तरवैषम्यं शङ्कते—नन्विति। उक्तरीत्या वैषम्येऽपि भूयोदर्शनाद्याहितसंस्कारोद्बोधादुत्पद्यमाना स्मृतिरन्वितानन्वितपदार्थयोर्वैषम्यं नोपपादयितुं प्रभवतीति परिहारमाह—मैवमिति। यद्यपि सकृद्गृहीतेऽपि विद्युतादौ पटुप्रत्ययः, वेदमन्त्रादावभ्यासप्रत्ययः, विचित्रेष्वादरप्रत्ययश्चस्मृतिहेतुः, तथाप्यप्रबुद्धसंस्कारस्य स्मरणाजनकतात्वादिति प्रबोधग्रहणमिति। तथा चोद्बुद्धसंस्कारस्य स्मृतिहेतुत्वाभ्युपगतत्वेन संस्कारोद्बोधस्य च व्यभिचारिण्यर्थान्तरेपि भगवदक्षपादेन परिगणितहेतुभिर्जन्मनोऽविशेषात्। परिगणितान् संस्कारोद्बोधकहेतून् सूत्रेण स्मारयति—प्रणिधानेत्यादिना। १–चित्तैकाग्रता, २–पौनःपुन्येनावर्तनं, ३–धूमादिः तेन व्याप्तिसंस्कारोद्बोधः, ४–धवलच्छत्रादिचिह्नं लक्षणं राजादिसंस्कारोद्बोधकं, ५–शुक्लभास्वरतादिसमानता रजतादि संस्कारमुद्बोधयति, ६–स्वस्वामिभावादिस्वीकारः कलत्रादिसंस्कारोद्बोधकः, ७–आश्रिताश्रयौ परस्परसंस्कारमुद्बोधयतः, ८–सहचारः सहचरितसंस्कारोद्बोधकः, ९–आनन्तर्यं पूर्वतनपदार्थसंस्कारोद्बोधकं, १०–वियोगः कामिन्यादौ, ११–एककार्यं समानक्रिया एकस्मात्कारणादुत्पन्नकार्याणामन्यतमसंस्कारस्य, १२–विरोधः सर्पनकुलादौ, १३–अतिशयो विशेषता, १४–व्याप्तिर्व्याप्य-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तिशयव्याप्तिव्यवधानसुखदुःखेच्छाद्वेषभयार्थित्वक्रियारागधर्माधर्माः" प्रामाणिकैः, अस्ति चेह योग्येतरान्वयस्यापि साहचर्यं स्मरणहेतुः। तस्मात्पदैरभिहिताः पदार्था एवाकाङ्क्षादिमन्तः परस्परान्वयं बोधयन्तीति युक्तमाश्रयितुम्।

मैवम्; त्वयापि पदार्थविषयाः प्रत्ययाः प्रमाणविपर्ययसंशयादिष्वनन्तर्भावात्स्मृतय एष्टव्याः, ताश्चान्वितगोचरा न स्वरूपमात्रगोचरा इति तुल्यो दोषः। न च वाच्यमभिधानतः स्मारितमेव वाक्यार्थान्वयि, न साहचर्यमात्रादिति; गङ्गायां घोषः प्रतिवसतीत्यादौ पदानभिहिततीरादीनां वाक्यार्थानन्वयप्रसङ्गात्। अभ्यासातिशयश्च पदार्थस्मरणहेतुः स च यथा पदानां स्वार्थेषु, न तथार्थान्तरेषु; तेषां व्यभिचारित्वात्। तथा च स्वरूपमात्रेणैव पदेभ्यः स्मारिताः पदार्थाः आकाङ्क्षादिमन्तः पदैरन्विता अभिधीयन्त इति न परस्पराश्रयता। नापि पदान्तरानाकाङ्क्षा; आकाङ्क्षा हि प्रतिपत्तुर्जिज्ञासा, सा चाभिधानापर्यवसानादभिहितार्थापर्यवसानाद्वा भवति। यथा वृक्ष इत्यत्र प्रातिपदिकार्थमात्रे प्रथमाविभक्तेस्स्मरणात्तेनैव तस्यान्विताभिधानासम्भवादन्यस्य चानभिधानादभिधानपर्यवसानायैवाकाङ्क्षा। यथा वा 'विश्वजिता यजेत' इत्यत्र कार्यस्य विषयकरणान्विततया प्रतीतस्यैवापर्य-

---

व्यापकयोः, १५–व्यवधानं प्रियतमव्यवहिते, १६–सुखं समानजातीयस्य स्वकारणस्य च, १७–दुःखमपि तथा, १८–इच्छा=वाञ्छा, १९–द्वेषः=तद्विपरीतः, २०–भयं=वैकल्यं, २१–अर्थित्वमर्थनीये, २२–अर्थित्वमप्राप्तेष्टवस्तुनोऽभिलाषा, २३–क्रियाकार्यम्, २४–रागः=आसक्तिः, २५–धर्मः विहितकर्मजन्यादृष्टं, २६–अधर्मः निषिद्धकर्मजन्यादृष्टम्, धर्माधर्मावपि शुभाशुभविषयसंस्कारोद्बोधकौ स्तः। प्रकृते कारणं दर्शयति—अस्ति चेहेति। तथा चान्विताभिधानपक्षं निरस्याहितान्वयवादी स्वपक्षमुपपादयन्नुपसंहरति—तस्मादिति।

अन्विताभिधानवादी स्वपक्षागतदोषं प्रतिबन्द्या परिहर्तुं प्रतिजानीते—मैवमिति। त्वयापि पदार्थविषयाः प्रत्ययाः प्रमाणे विपर्यये संशये वानाऽन्तर्भावयितुं शक्याः। तत्रानधिगतार्थगन्तृत्वाभावेन प्रमाणेनान्तर्भावः। अन्तर्भावे सति सर्वस्य सत्यत्वप्रसक्तिः। तथा यथार्थनिश्चयत्वेन भ्रमसंशययोरपि तेषां पदार्थप्रत्ययानां नान्तर्भावः। परिशेषात्स्मृतयस्तेऽभ्युपगन्तव्याः। ताश्च न स्वरूपमात्रविषयाः किन्त्वन्वितविषयाः एव त्वयाप्यभ्युपेयाः, तथासति तुल्यो दोषः। स्वपक्षे वैषम्यमाह—न च वाच्यमिति। अभिधानद्वारा अभिहिताः=स्मारिताः पदार्था वाक्यार्थान्वयिनो भवन्ति नेतरे साहचार्यमात्रात्स्मारिता इति नियमोऽस्ति, तथासति गङ्गायां घोष इत्यादौ शक्तिवृत्यानुक्तानां तीरादीनां वाक्यार्थानन्वयप्रसङ्गः। स्वपक्षे वैशिष्ट्यमाह—अभ्यासेति। तेनाभ्यासातिशयेन पदात् स्वार्थानां यथा स्मरणं न तथार्थान्तराणां, तेषां व्यभिचारित्वात्। अन्विताभिधानवादी स्वपक्षमुपपाद्य परस्पराश्रयतां वारयति—तथाचेति। एवमन्विताभिधानवादे पदान्तरानाकांक्षाऽपि नास्ति। आकाङ्क्षा हि प्रतिपत्तुर्जिज्ञासा, सा चाभिधानापूर्णतयाऽभिहितार्थापूर्णतया वा भवति। तयोरभिधानापर्यवसानोदाहरणमाह—यथा वृक्ष इति। अत्र "प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा (पा० २-३-४६)" इति पाणिनिस्मृत्या प्रथमा विभक्तेः प्रातिपदिकार्थमात्रं स्मर्यते, तेनैव 'सु' प्रत्ययेनान्विताभिधानासम्भवेनान्यस्य चानभिधानादभिधानपर्यवसानायैवाकाङ्क्षा "अस्तीति" पदस्य सम्पद्यते। अभिहितार्थपर्यवसानायोदाहरणमाह—यथा वेति। विषयो धात्वर्थः, स एव करणम्। एवं च "विश्वजिता यजेत"

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वसानाद्विशिष्टाधिकारिकल्पना। तदेवंभूताकाङ्क्षावशात्पदानामन्विताभिधानं न विरुध्यते। ननु तथापि पदानामन्विताभिधाने सामर्थ्यं न कल्पनीयम्, पदस्मारितानामेव पदार्थानामाकाङ्क्षादिवशादन्योन्यान्वयप्रत्यायकत्वोपपत्तेरिति चेत्, मैवम्; मानान्तराधिगतानां पदार्थानां वाक्यार्थप्रत्यायकत्वादर्शनात् । ननु--

'पश्यतः श्वेतिमारूपं ह्रेषाशब्दं च शृण्वतः ।
खुरनिक्षेपशब्दं च श्वेतोऽश्वो धावतीति धीः' ॥(श्लो० वा० वाक्य० ३५८)

इतिन्यायादस्त्येव पदार्थानां संसर्गबोधजनकत्वमिति चेत्; न; अनुमानादर्थापत्तेर्वा तत्र संसर्गावगमात् । तथाहि--एषां पदार्थानामेकाधिकरणतयावगतानां प्रत्यायकत्वेनानुमानानतिरेकः, विशकलितावगतानां वार्थान्तराभावे निश्चितेऽर्थापत्तिरेव परिशिष्यते, अनिश्चिते त्वनध्यवसाय एव । अपि च शब्दसामर्थ्याजन्यत्वे वाक्यार्थप्रत्ययस्य पदार्थाख्यं सप्तमं प्रमाणमभ्युपेयं स्यात्, प्रत्यक्षादिषु तस्यानन्तर्भावात् । किं च पदार्थानामनभिहितानां संसर्गबोधकत्वाभावादभिहितानामेव तदेष्टव्यम्, तथा च पदार्थानां संसर्गप्रत्ययजननसामर्थ्यम्, पदानां च पदार्थेषु तत्सामर्थ्याधानसामर्थ्यमिति द्वयं कल्पनीयमिति कल्पनागौरवमभिहितान्वयवादिनः, अन्विताभिधानवादिनस्तु पदानां योग्येतरान्वितस्वार्थाभिधानसामर्थ्यमेकमेव कल्पनीयमिति कल्पनालाघवमित्ययमेव पक्षः श्रेयानिति ।

अत्राभिहितान्वयवादिनः प्रत्यवतिष्ठन्ते--

विनाभिधेयस्मरणमन्वयाप्रतिपत्तितः । तत्तत्पदार्थस्मृतयस्तेषामन्वयबोधिकाः ॥२५॥

इत्यत्र कार्यस्य नियोगस्य विषयकरणान्विततत्वेन प्रतीतस्यापूर्णत्वाद्विशिष्टस्य नियोजस्याधिकारिणः कल्पना कर्तव्या, प्रतिपादितामाकाङ्क्षां प्रकृतेऽपि दर्शयति—तदेवं भूतेति। नन्वेवमभिहितपदार्थेभ्य एव संसर्गसिद्धौ तत्र पदानां सामर्थ्यकल्पनायां गौरवदोषं प्रतिवादी शङ्कते—ननु तथापीति । प्रमाणान्तरगृहीतपदार्थेष्वदर्शनेन पूर्वोक्तं गौरवं वारयति—मैवमित्यादिना। अथ पदार्थानां संसर्गबोधकत्वे भट्टपादसम्मतिं दर्शयति—पश्यत इति। तत्रानुमानात्संसर्गावगमं संगमयति—तथाहीति। अर्थापत्त्यापि तत्र निश्चिते पदार्थसंसर्गावगममाह—विशकलितेति। अर्थान्तराभावानिश्चितेऽनध्यवसाय एव। इदमत्राकूतम्—विमतःपदार्थोऽश्वः, श्वेतरूपत्वे सति ह्रेषाखुरनिक्षेपशब्दवत्त्वात्, सम्मतवत्, इत्येवंविधे न श्वेतादिविशेषणानां समानाधिकरणत्वेन प्रतीयमानतयानुमानेऽन्तर्भावः। श्वेतरूपादिविशेषणानां व्यधिकरणतयाप्रतीयमानानामर्थापत्त्यनतिरेकः, अर्थान्तराभावानिश्चितेऽनध्यवसाय एवेति भावः। किञ्च संसर्गबोधस्य शब्दाजन्यत्वेऽप्रामाणिकत्वप्रसङ्गः, क्लृप्तप्रत्यक्षादिषु षट्सु प्रमाणेष्वनन्तर्भावेन पदार्थसंज्ञकसप्तमप्रमाणाभ्युपगमप्रसङ्गो वा स्यादित्याह—अपि चेति। किं च पदस्मारितपदार्थानामेवेदं पदार्थबोधजननसामर्थ्यमित्यभ्युपगमेऽनेकशक्तिकल्पनं गौरवं स्यादित्याह—किं चेति। तदेष्टव्यम्=संसर्गबोधकत्वमेष्टव्यम्। तथा च त्वत्पक्षे सामर्थ्यद्वयं कल्पनं गौरवम्, अस्मत्पक्षेऽन्विताभिधानवादेऽन्वितस्वार्थेषु पदानामेकसामर्थ्याश्रयणाल्लाघवकल्पनामित्यस्मत्पक्षः श्रेयानिति।

अभिहितान्वयवादिनः स्वपक्षसाधनायान्वयव्यतिरेकौ प्रमाणमुपस्थापयन्ति श्लोकेन—विनेत्यादिना। अभिधेयपदार्थस्मरणमन्तरेण वाक्यार्थबोधानुपपत्त्या पदजन्यपदार्थस्मरणं, पदेनस्मृतपदार्थो वा

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पदकदम्बकश्रवणसमनन्तरमपि कुतश्चिन्मानसापराधादनुपजनितपदार्थस्मृतेर्वाक्यार्थप्रत्ययानुदयादुदयाच्चोपजातपदार्थस्मृतेरन्वयव्यतिरेकाभ्यां पदार्थस्मृतीनां वाक्यार्थप्रत्ययहेतुत्वं तावदवसीयते। न च पदार्थस्वरूपमात्रविषयस्मृतीनामन्योन्यान्वयबोधकत्वमनुपपन्नमन्यत्रादृष्टत्वादिति वाच्यम्। स्मरणमात्रस्य सामर्थ्याभावेऽपि समभिव्याहृतपदकदम्बकसमुपजनितपदार्थस्मृतीनामाकाङ्क्षादिसहकारिणीनां सम्भवत्येव तद्बोधकत्वम्, सहकारिभेदोपादानात्, कथमन्यथा संस्कारेन्द्रिययोरन्यत्र परस्परसंगतार्थाविषययोः प्रत्यभिज्ञायां पूर्वापरदेशकालसंसृष्टैकवस्तुबोधकत्वम्? परस्परसहकारितया तथात्वं तु प्रकृतेऽपि तुल्यम्। न च पदार्थस्मृतीनां वा पदार्थानामन्वयबोधकत्वे सप्तमप्रमाणाभ्युपगमप्रसङ्गः; लिङ्गप्रकरणस्थानानामिव शब्दप्रमाणान्तर्भावोपपत्तेः। ननु लिङ्गादिषु श्रुतिं कल्पयित्वैव विनियोगप्रतीतेः स्वीकाराच्छाब्दत्वं न विरुद्धचते, इह तु पदार्थस्मृतीनां स्मृतानां वा पदार्थानामन्वयबोधकत्वमिति वैषम्यम्। शब्दावगतपदार्थजन्यत्वेनान्वयप्रतीतेः शाब्दत्वे, चक्षुषावगतधूमजन्यस्यापि वह्निज्ञानस्य चाक्षुषत्वप्रसङ्ग इति चेत्, मैवम्; अन्वयप्रतीतिं जनयतां पदानामवान्तरव्यापारत्वात्पदार्थस्मरणानाम्। न च स्वव्यापारव्यवधानाद्व्यापारवतः करणत्वं विहन्यते; यागादीनामपूर्वव्यवधानेन फलसाधकानामकरणत्वप्रसङ्गात्। न च चक्षुषो लिङ्गज्ञानमवान्तरव्यापारः, अगृहीताविनाभावस्यानुमानानुदयात्, अचाक्षुषस्थलेऽपि लिङ्गस्य बोधकत्वात्। गुरुमतानुसारिभिरपि लिङ्गप्रकरणादीनामन्तरेणैव श्रुतिकल्पनं विनियोजकानां शब्दप्रमाणन्तर्भावाभ्युपगमाच्च।

वाक्यार्थबोधहेतुरभ्युपगन्तव्य इति श्लोकार्थः। श्लोकार्थं विशदयति—पदेत्यादिना। कदम्बकं=समूहः। अन्वयव्यतिरेकाभ्यां पदार्थस्मृतीनां वाक्यार्थबोधहेतुत्वं दर्शयति श्लोकार्थविशदीकरणेन—अन्वयेति। न चान्यत्रादृष्टचरत्वेन पदार्थस्वरूपमात्रगोचरस्मरणानां नान्वयबोधकत्वमुपपन्नमिति वाच्यम्, पदार्थमात्रस्मरणस्य वाक्यार्थबोधासामर्थ्येऽपि सहोच्चरितपदसमूहजन्यपदार्थस्मृतीनामाकांक्षादिसहकृतानामन्वयबोधकत्वमस्त्येव, पदार्थस्मृतौ सहकारिविशेषसम्बन्धात्। अन्यत्रादृष्टत्वेऽपि तथाविधकल्पनं प्रतिबन्द्या दर्शयति—कथमिति। पदार्थानां सप्तमप्रमाणत्वं पूर्वाशङ्कितं निराकुरुते—न च पदार्थेति। श्रुतिवाक्यसमाख्यानां शब्दरूपत्वेपि न लिङ्गप्रकरणस्थानानां शब्दरूपत्वं नापि शब्दात्पृथक्प्रमाणत्वं तद्वत्पदार्थस्मरणानां स्मृतपदार्थानां वा शब्दप्रमाणेऽन्तर्भावोऽभ्युपेयते इति। न चात्र लिङ्गादिभ्यो वैषम्यं दर्शयितुं शक्यमिति वाच्यम्, लिङ्गादिषु श्रुतिं कल्पयित्वा विनियोगप्रतीतिस्वीकारवदत्राप्यन्वयप्रतीतिं जनयता पदानामवान्तरव्यापारत्वेन पदार्थस्मरणाभ्युपगमेऽदोषात्। न च स्वव्यापारेण व्यवधानाद्व्यापारवतः करणत्वव्याघातः शङ्कनीयः, तथासति स्वर्गादिफलसाधकानां यागादीनां तज्जन्यापूर्वव्यापारव्यवधानेनाकारणत्वप्रसङ्गः। न च चक्षुषावगतधूमजन्यवह्निज्ञानस्य चाक्षुषत्वप्रसङ्गस्तत्र चक्षुषो लिङ्गज्ञानस्य व्यापारतयाऽभ्युपगमादिति वाच्यम्, अगृहीतव्याप्तिकस्य पुरुषस्यानुमानोदयाभावात्, अचाक्षुषस्थलेऽपि लिङ्गस्य स्वसाध्यबोधकत्वस्य दृश्यमानत्वात्। अत्र श्रुतिकल्पनां विनैव लिङ्गादीनां विनियोजकत्वमभ्युपगच्छतां गुरुणामपि सम्मतिमाह—गुरुमतेत्यादिना।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ननु त्वयाप्यभिहितान्वयवादे तिस्रः शक्तयः कल्पनीयाः; पदानां तावदर्थस्वरूपानुभवजननशक्तिः, अर्थानां चान्योन्यान्वयप्रत्यायनशक्तिः, तदाधानशक्तिश्चापरा पदानामिति। पदानां साहचर्येणार्थस्मारकत्वे पुनः शक्तिद्वयं कल्पनीयम्, पदार्थानामन्वयबोधनशक्तिः, तेषु तदाधानशक्तिश्च पदानाम्, अन्विताभिधाने तु पदानामन्योन्यान्वितस्वार्थाभिधानशक्तिरेकैवेति कल्पनालाघवमिति चेत्, मैवम्; त्वयाप्यर्थान्तरे तदन्वये स्वार्थे च पदशक्तीनां कल्पनीयत्वात्। न चार्थान्तरान्वितस्वार्थाभिधायकमपि पदं स्वार्थस्यैव वाचकम्, नार्थान्तरतदन्वययोर्जातिवाचकमपि पदं व्यक्तितदन्वययोरिवेति वाच्यम्; विकल्पासहत्वात्। तथा हि—किं जातिवाचकपदेन व्यक्तेरिव लक्ष्यत्वमर्थान्तरतदन्वययोः? उत वाच्यत्वम्? नाद्यः; पदानामन्विताभिधानभङ्गप्रसङ्गात्। न द्वितीयः वाच्यत्वे तयोरपि शक्तेरवश्यकल्पनीयतया गौरवस्य तादवस्थ्यात्। किंचैकैकस्य पदस्य श्रूयमाणस्य स्मर्यमाणस्य वा तत्तत्पदार्थस्मरणजननशक्तिः, पुनरेकस्मरणगोचराणां च तेषामेव पदानामन्योन्यान्वितपदार्थाभिधानशक्तिः, सकलपदगोचरस्य स्मरणस्य पदेष्वन्विताभिधानशक्त्याधानशक्तिश्चेति शक्तित्रयकल्पनान्विताभिधानवादेऽपि तुल्या। न चाभिहितान्वयवादेऽपि शक्तिकल्पनागौरवस्य तुल्यत्वात् विनिगमनाभाव आशङ्कनीयः; विशिष्टार्थप्रत्यायनप्रयुक्तपदकदम्बसमभिव्याहारान्यथानुपपत्त्या पदस्मारितानामर्थानामन्योन्यान्वयस्य लक्ष्यमाणत्वेनोपपत्तेः शक्तेरकल्पनीयत्वात्, 'अनन्यलभ्यः शब्दार्थः' इति न्यायात्! उक्तं च 'विशिष्टार्थप्रयुक्ता हि समभिव्याहृतिर्जनः' इति।

अभिहितान्वयवादे पूर्वोक्तं शक्तित्रयकल्पनाप्रयुक्तगौरवं परिहर्तुमाह—नन्विति। (१) पदानामर्थस्वरूपानुभवजननशक्तिः, (२) अर्थानामन्योऽन्यान्वयबोधनशक्तिः, (३) पदार्थनिष्ठान्वयबोधजनकताधानशक्तिश्च। कथञ्चित् साहचर्यवशात्पदार्थानां स्मृतिस्वीकारेऽपि पदार्थानामन्वयबोधनशक्तिः पदानां पदार्थनिष्ठान्वयबोधजनकताधानशक्तिश्चेति शक्तिद्वयकल्पनागौरवं तवमतेऽस्त्येव, ममत्वन्विताभिधानवादे पदानामन्योऽन्यान्वितस्वार्थाभिधानशक्तिरेकैवेति कल्पनालाघवमिति। अन्विताभिधानवादेऽपि शक्तित्रयकल्पनामापाद्य स्वपक्षे गौरवं शिथिलयति—मैवमिति। परपक्षे दोषमापादयति—त्वयापीति। न च गोत्वादिजातिवाचकं गवादिपदं गोव्यक्तितत्समवायात्मकान्वययोरवाचकमिव मन्मतेऽर्थान्तरान्वितस्वार्थाभिधायकमपि पदं स्वार्थमात्रस्यैव वाचकमिति वाच्यम्, विकल्पासहत्वात्। जातिवाचकपदेन व्यक्तेरिवार्थान्तरतदन्वययोर्लक्ष्यत्वस्वीकारे पदानामन्विताभिधानवादभङ्गप्रसङ्गः, वाच्यत्वाभ्युपगमे तयोरर्थान्तरतदन्वययोरपि शक्तेरवश्यकल्पनीयत्वेन तवमतेऽपि गौरवस्य तादवस्थ्यात्। कथञ्चिद्विशिष्टार्थबोधकत्वमिव पदेष्वेकैव शक्तिरिति स्वीकारे प्रकारान्तरेण शक्तित्रयमन्विताभिधानवादेऽप्यापादयति—किं चैकैस्येति। न चोभयत्रदोषाणां समानत्वे विनिगमकाभावेन कथमभिहितान्वयवादस्य श्रेयस्त्वमिति वाच्यम्, विशिष्टार्थबोधाय प्रयुक्तानां पदसमूहानां समभिहारान्यथाऽनुपपत्त्या पदैः स्मारितानामर्थानामन्योऽन्यान्वयस्य लक्ष्यमाणतयोपपत्तेस्तत्र शक्तेरकल्पनीयत्वात्। अत्राभ्युक्तसम्मतिमाह—अनन्यलभ्य इति। उक्तं चाचार्यमण्डनमिश्रैः—विशिष्टार्थेति। "सम्बन्धयोग्यरूपेण तस्मात्संसर्गभागिनः" इत्यत्र शेषग्रन्थः। सर्वे पदार्थाः पदस्मारितक्रियाकारकादिसंसर्गभागिनो भवन्ति, व्यवहारे विशिष्टार्थबोधाय पदानां समभिव्याहारादिति तदर्थः।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ननु नेयं लक्षणा भवितुमर्हति, तथाहि—

'वाच्यस्यार्थस्य वाक्यार्थे सम्बन्धानुपपत्तितः ।
तत्सम्बन्धवशप्राप्तस्यान्वयाल्लक्षणोच्यते ॥' इति । (प्र.पं.वाक्य.परि.पृ. १३)

न च 'ओदनं चैत्रः पचति पिठरे' इत्यादौ चैत्रपिठरादीनामर्थानां वाक्यार्थसम्बन्धानुपपत्तिः। न च पदार्थैर्लक्षितायाः पदार्थानामन्वितावस्थायाः पुनरन्वयान्तरशालिता, तेनेयं न लक्षणा तल्लक्षणविरहादिति चेत्, मैवम्; अव्यापकत्वादेतस्य लक्षणालक्षणत्वासंभवात्। न हि विषं भुङ्क्ष्वेत्यादावेतल्लक्षणमस्ति। तत्र सर्वेषां पदानां लक्षकत्वेन वाच्यार्थाभावात्, वाच्यार्थाविनाभूतस्य वाच्यार्थेन पुनरन्वयाभावाच्च। यदपि—

'मानान्तरविरोधे तु मुख्यार्थस्य परिग्रहे ।
मुख्यार्थेनाविनाभूते प्रतीतिर्लक्षणोच्यते ॥',

इति लक्षणालक्षणम्, तदप्यव्यापकम्। कुण्डपायिनामयने 'मासमग्निहोत्रं जुह्वती' त्येतल्लक्षणाऽव्यापकत्वात्, 'उपसद्भिश्चरित्वा मासमग्निहोत्रं जुह्वती' ति श्रूयमाणत्वात्, प्रसिद्धाग्निहोत्रे चोपसदामभावात्कर्मान्तरेऽग्निहोत्रशब्दः प्रसिद्धाग्निहोत्रसाधर्म्याल्लक्षणया वर्तते। न च तत्र मानान्तरविरोधः, तदर्थस्य मानान्तरागोचरत्वात्। तस्मात्पदानां पदार्थस्वरूपमात्रपरत्वे वाक्यप्रामाण्यानुपपत्तिरेव लक्षणाक्षेपिकेति तदेवं लक्षणं लक्षणायाः, सर्वलौकिकवैदिकलक्षणायां व्यापकत्वात्। तथा हि 'गङ्गायां घोषः प्रतिवसति, आदित्यो यूपः, कुण्ड-

---

पदानामर्थावगमे मुख्यवृत्तिं मन्वानोऽन्विताभिधानवादी परस्परान्वये पदानां लक्षणावृत्तिमाक्षिपति—ननु नेयमिति। तत्र लक्षणाभावप्रदर्शनाय शालिकनाथोक्तं लक्षणालक्षणमाह—वाच्यस्येति। गङ्गायां घोषः प्रतिवसतीत्यत्र वाच्यार्थस्य गंगादिरूपस्य घोषप्रतिवासादिरूपे वाक्यार्थेऽन्वयानुपपत्तौ सत्यां वाच्यार्थसम्बन्धवशात्प्राप्तस्य तीरादेरर्थस्य वाक्यार्थेऽन्वयो लक्षणोच्यते इति श्लोकार्थः। अतस्तीरादौ गङ्गादिपदानां लक्षणा वृत्तिरभ्युपेयते। प्रकृते "ओदनं चैत्रः पचति पिठरे" इत्यत्र च चैत्रपिठरादीनां वाक्यार्थसम्बन्धानुपपत्तिर्नास्ति। नापि वाक्यार्थद्वयमस्ति, येन लक्ष्यमाणवाक्यार्थस्य वाक्यार्थसम्बन्धः स्यात्, स्वेनैव स्वस्य सम्बन्धानुपपत्तिः, सम्बन्धस्य द्विष्ठत्वादिति लक्षणालक्षणविरहान्नेयं लक्षणेति चेत्, मैवमित्यादिनाऽभिहितान्वयवादी परिहरति—अव्यापकत्वादिति। अव्यापकत्वादेतस्य नाथोक्तलक्षणस्य लक्षणालक्षणत्वासम्भवादित्यर्थः। उक्तलक्षणाव्यापकदृष्टान्तमाह—नहि विषमिति। विषं भुङ्क्ष्वेत्यादौ सर्वेषां पदानां लक्षकत्वेन वाच्यार्थाभावात्, वाच्यार्थाविनाभूतस्य वाक्यार्थेन पुनरन्वयाभावाच्च। नहि भोजननिवृत्तिव्यतिरेकेणान्यो वाक्यार्थोऽस्ति येनान्वियादित्यर्थः। लक्षणान्तरमनूद्य दूषयति—यदपीति। यत्र मुख्यार्थस्य परिग्रहे मानान्तरविरोधः समुदेति, तत्र मुख्यार्थेनाविनाभूते प्रतीतिर्लक्षणोच्यते इति श्लोकार्थः। एतदपि लक्षणालक्षणमव्यापकमित्याह—तदपीति। तत्र स्थलं दर्शयति—कुण्डेत्यादिना। प्रसिद्धाग्निहोत्रे उपसदां होमानामभावात्कर्मान्तरेऽग्निहोत्रशब्दः प्रसिद्धाग्निहोत्रसाधर्म्याल्लक्षणया वर्तते। मानान्तरविरोधाभावमाह—न च तत्रेति। पराभिमतलक्षणालक्षणं दूषयित्वा सर्वानुमतं लक्षणमुपसंहारफलेन दर्शयति—तस्मादिति। लक्षणाक्षेपिका=लक्षणानियामिका लक्षणाबीजमित्यर्थः। लौकिकवैदिकलक्षणासु निरुक्त-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पायिनामयने मासमग्निहोत्रं जुह्वती'त्यादावस्ति पदार्थमात्रपरत्वे वाक्यप्रामाण्यानुपपत्तिः। ननु तत्र वाच्यार्थान्वयानुपपत्तिरप्यस्ति, तत्कथमिदमेव लक्षणमिति नियम्यते ? इति चेत्, नैवम्; वाच्यार्थान्वयानुपपत्त्यभावेऽपि लोकवेदयोर्लक्षणादर्शनात्। तथाहि लोके—

'सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः।
शूरश्च कृतविद्यश्च योऽभिजानाति सेवितुम् ॥'

इत्यादौ पदार्थानामन्वयसंभवेऽपि निष्प्रयोजने तात्पर्यासम्भवेन वाक्यप्रामाण्यानुपपत्तेः,प्रतीयमानवाक्यार्थं हित्वा शूरादित्वं सम्पदो हेतुरिति ध्वनिना सूच्यते। तथा च वेदे 'वायुर्वै क्षेपिष्ठा' इत्यादौ सम्भवत्येव वाच्यार्थान्वये कैमर्थक्यवशेन देवताप्राशस्त्यलक्षणया कर्मणः प्राशस्त्यं लक्ष्यते। तस्माद्वाक्यप्रामाण्यानुपपत्तिरेव लक्षणाक्षेपिकेति निश्चिनुमः। अस्ति चेहापि लोकानुसारतो विशिष्टार्थप्रत्यायनप्रयुक्तसमभिव्याहृतीनामर्थमात्रपरत्वे पदानां प्रामाण्यानुपपत्तिः। 'विशिष्टार्थयुक्ता हि समभिव्याहृतिर्जनः' इति न्यायात्। अस्ति च शब्दानामर्थरूपसम्बन्धवशप्राप्तिरन्विताव्स्थायाम्, तथा चार्थरूपबोधनसामर्थ्यान्नाधिकसामर्थ्यद्वयकल्पनापि।

ननु पदानां संस्कारोन्मेषमात्रोपयोगान्नाभिधातृत्वम्, पदार्थानाममपि स्ववाचकपदसंस्कारोन्मेषकाणां तत्स्मारकतयाभिधायकत्वप्रसङ्गादिति चेत्, न; पदानामेव पदार्थस्मारकाणामभिधातृत्वस्य लौकिकपरीक्षकप्रसिद्धिसिद्धस्यानिवारणीयत्वात्, शब्दविषयविज्ञानस्यैव पदार्थस्मरणजननशक्त्युपहितस्याभिधाव्यापारत्वेन स्वीकारात्, अन्यस्य च परिस्पन्द-

---

लक्षणालक्षणं संघटयति—तथाहीति। न चोक्तस्थलेषु वाच्यार्थानुपपत्तेरपि सम्भवे कथं वाक्यप्रामाण्यानुपपत्तिरेव लक्षणाबीजमिति वाच्यम्, त्वदीयाभिमतवाच्यार्थान्वयानुपपत्त्यभावेऽपि लोकवेदयोर्लक्षणादर्शनात्। लौकिकदृष्टान्तमाह—सुवर्णेति। सुवर्णमयीं पुष्पशालिनीं पृथिवीमुत पृथिवीं सुवर्णपुष्पां चिन्वन्ति। बहुसुवर्णमुपार्जयन्ति शूरकृतविद्यसेवका इत्यर्थः। वैदिकोदाहरणमाह—तथा च वेद इति। नहि वायोः क्षेपिष्ठत्वं मानान्तराविरुद्धमस्ति, किमर्थोऽयमिति कैमर्थ्यवशेन तत्र प्राशस्त्यं लक्ष्यते। तस्माद्वाक्यप्रामाण्यानुपपत्तिरेव लक्षणाबीजमिति नो निश्चयः। प्रकृते तल्लक्षणं संघटयति–अस्ति चेहापीति। वाक्यार्थस्वरूपाणां परस्परं यः सम्बन्धः तद्वशात्परस्परयान्वितावस्थायां शब्दानां प्राप्तिरस्तीतिभावः। सामर्थ्यद्वयकल्पनाप्रयुक्तमापेक्षमुपशमयति—तथा चार्थेति।

ननु पदानां न पदार्थवाचकत्वं तेषामर्थानुभवजनितसंस्कारोद्बोधमात्रोपयोगात्, अन्यथा पदार्थानामपि स्ववाचकपदानुभूतिजनितसंस्कारोद्बोधकानां स्ववाचकपदस्मारकतया वाचकत्वप्रसङ्गः स्यादिति चेन्न, पदपदार्थयोः परस्परं स्मारकत्वाविशेषेऽपि पदार्थस्मारकाणां पदानामेव वाचकत्वस्य लोकशास्त्रप्रसिद्धिसिद्धस्य निवारयितुमशक्यत्वात्, पदार्थस्मरणजननशक्तिविशिष्टस्य शब्दज्ञानस्यैवाभिधाव्यापारत्वेनाभ्युपगमात्, ततोभिन्नस्य परिस्पन्दप्रयत्नरूपस्य व्यापारस्य भाट्टाभिमते विभौ शब्दे नैय्यायिकादिसम्मते आकाशगुणे शब्दे वा चैतन्यानधिकरणे निरूपयितुं दुःशक्यत्वाच्च।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रयत्नलक्षणस्य व्यापारस्य विभौ विभुगुणे वा शब्दे चैतन्यानधिकरणे दुर्निरूपत्वात्। तस्मात्समभिव्याहृतपदकदम्बकस्मारितपदार्थानां परस्परान्वयप्रत्ययो लाक्षणिकः शाब्दश्चेति सर्वमवदातम्। तथाचोक्तं मीमांसावार्तिककारमिश्रैः—

'नविमुञ्चन्ति सामर्थ्यं वाक्यार्थेऽपि पदानि नः।
वाक्यार्थो लक्ष्यमाणो हि सर्वत्रैवेति च स्थितिः॥' इति। (श्लो.वा.वाक्य.२२१)

प्रयोगश्च—शब्दास्तात्पर्यविषयव्यतिषङ्गस्य लक्षकाः।
तत्तात्पर्याभिधानत्वात्क्ष्वेलं भुङ्क्ष्वेति शब्दवत्॥ २६॥

विवादपदानि पदानि, लक्षणया पदार्थानामन्योन्यान्वयप्रतिपत्तिपराणि, अन्वितप्रतिपत्तिपरत्वे सति पदत्वाद्विषं भुङ्क्ष्वेति पदकदम्बवत्।

न च पदानि स्वार्थपरित्यागेन लक्षणयान्वयप्रतिपत्तिपराणि उक्तसाधनत्वात् त्वदुदाहृतवाक्यवदित्याभाससमानयोगक्षेमता। अस्यैव त्वदुदाहृतानुमानवाक्यस्य स्वार्थपरित्यागापरित्यागयोस्तदनुपपत्तेः। तथा हि स्वार्थपरित्यागे विशिष्टसाध्यप्रतीत्यभावादेवाविघातकत्वात्, अपरित्यागे च तत्रैवानैकान्तिकत्वात्, मुख्यार्थबाधोपाधिप्रयुक्तत्वाच्च स्वार्थपरित्यागस्य। इह च बाधाभावान्न स्वार्थपरित्यागानुमानम्, तस्मादभिहितान्वयवाद एव श्रेयानिति केचिदाचार्याः। न चैवमपसिद्धान्तः; भाष्यकार सम्मतत्वात्। तथा च समन्वयसूत्रे वेदान्तवाक्यानि प्रस्तुत्य भाष्यकारः प्रतिपादयति स्म—"न च तद्गतानां पदार्थानां

अभिहितान्वयवादी स्वपक्षदोषपरिहारप्रसङ्गमुपसंहरति—तस्मादित्यादि। पूर्वोक्तरीत्या पदार्थानामन्वयबोधस्य लाक्षणिकत्वे शाब्दत्वे च सिद्धे भट्टपादसम्मतिमाह—तथा चोक्तमिति। अस्माकं मते पदानि वाक्यार्थविबोधाय सामर्थ्यं न परित्यजन्ति, यतो हि वाक्यार्थः सर्वत्र लक्ष्यमाण एव भवतीति स्थितिः। वाक्यार्थस्य लाक्षणिकत्वे प्रमाणमाह—प्रयोगश्चेति। शब्दास्तात्पर्यविषयान्वयस्य लक्षका इति प्रतिज्ञा, अन्वयबोधतात्पर्याभिधानत्वादिति हेतुनिर्देशः, विषं भुङ्क्ष्वेति वाक्यवदितिदृष्टान्तनिर्देशः। श्लोकसङ्कलितानुमानं विवृणोति—विवाद पदानीति। विषं भुङ्क्ष्वेत्यादौ सिद्धसाधनतावारणाय पक्षे विवादपदम्। अन्विताभिधानेनार्थान्तरतावारणाय लक्षणयेति साध्यविशेषणम्। पदार्थानामित्यनेनान्वयिनां ग्रहणं न तु स्वस्मारितानाम्, तेन दृष्टान्ते साध्यावैकल्यम्। पक्षे सामर्थ्यात् स्वस्मारितेभ्योऽन्यस्य सिद्धिः। गौरश्व इत्यादिपदैरनैकान्तिकतावारणाय हेतौ सत्यन्तदलम्। साध्यहेतुसम्बन्धपरलिङ्गवारणाय पदग्रहणम्।

अनुमानाभासमुद्भाव्य दूषयति—न च पदानीति। त्वदुदाहृतानुमानवाक्ये वाच्यार्थपरित्यागे विशिष्टसाध्यबोधकत्वाभावेनास्मदनुमानस्याविघातकत्वात्, वाच्यार्थापरित्यागे तत्रैव तव हेतावनैकान्तिकत्वात्। तथा च व्याघातकाभावेनास्मदनुमानेऽव्याघातः। विरुद्धानुमाने व्याप्यत्वासिद्धिमप्याह—मुख्यार्थेति। मुख्यार्थबाध एव वाच्यार्थपरित्यागप्रयोजकः। पक्षे मुख्यार्थबाधाभावान्न वाच्यार्थपरित्यागोऽनुमातुं शक्यः। अभिहितान्वयवादस्यश्रं स्वमुपसंहरति—तस्मादिति। केचिदाचार्याः=वाचस्पतिमिश्रादयः। शाङ्करभाष्यसंवादेनापसिद्धान्तापत्तिं वारयति-तथा चेत्यादिना। तद्गतानां=वेदान्तगतानाम्।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ब्रह्मस्वरूपविषये निश्चिते समन्वयेऽवगम्यमानेऽर्थान्तरकल्पनायुक्ता; श्रुतहान्यश्रुतकल्पनाप्रसङ्गात्"। तत्र च पदार्थानामेवान्योन्यान्वयप्रत्यायकता प्रतीयते, मण्डनमिश्रादिभिरप्यङ्गीकृतत्वात्।

'पदार्थान्तरतुल्यत्वाद्विध्याकाङ्क्षानिबन्धनः।
न संसर्गः पदार्थानां स्वशब्दैस्तु प्रकाशिताः॥
सम्बन्धयोग्यरूपेण तस्मात्सम्बन्धभागिनः।
विशिष्टार्थप्रयुक्ता हि समभिव्याहृतिर्जनः॥ ।(ब्र० सि० पृ० १११)

व्यवहारे भट्टनय इत्यङ्गीकारात् भट्टपादैश्च वाक्यार्थस्य सर्वत्र लाक्षणिकत्वस्वीकारात् 'वाक्यार्थो लक्ष्यमाणो हि सर्वत्रैवेति च स्थितिः' इति। तस्मात्पौरुषेयवाक्येभ्य इवापौरुषेयेभ्यो वेदान्तवाक्येभ्यो लक्षणया यथोक्तलक्षणं ब्रह्म सिद्धयतीति सिद्धम्।

ननु कथमपौरुषेयत्वं वेदान्तानाम्? तत्प्रतिपादकप्रमाणाभावात्। नन्वपौरुषेया वेदाः संप्रदायाविच्छेदे सत्यस्मर्यमाणकर्तृकत्वादात्मवदित्यनुमानमस्तीति चेत्, मैवम्; विशेषणासिद्धेः। पौरुषेयवेदवादिभिः प्रलये संप्रदायविच्छेदस्याभ्युपगमात्। अस्मर्यमाणकर्तृकत्वं च किमप्रमीयमाणकर्तृकत्वं विवक्षितम्? उत स्मरणागोचरकर्तृकत्वं? नाद्यः, "तस्माद्यज्ञात्सर्वहुत ऋचः सामानिजज्ञिरे। छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत," "त्रयो वेदा अजायन्त, ऋग्वेद एवाग्नेरजायत यजुर्वेदो वायोः सामवेद आदित्यात्," "इदं सर्वमसृजत ऋचो यजूंषि सामानि" इत्यादिश्रुतिभिः कर्त्तुः प्रमीयमाणत्वात्। नापि द्वितीयः; विकल्पासहत्वात्। तथाहि—किमेकेनास्मरणं विवक्षितम्? उत सर्वास्मरणम्? नाद्यः; मुक्तकश्लोकादावनैकान्तिकत्वात्। न द्वितीयः, सर्वास्मरणस्यासर्वज्ञविज्ञानाविषयत्वात्। ननु "वाचा विरूप! नित्यया" "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च

अर्थान्तरकल्पना=क्रियारूपार्थान्तरकल्पना। अर्थान्तरे तात्पर्याभ्युपगम्यमाने दोषमाह—श्रुतेति। मण्डनमिश्रादीनामप्यत्रस्वीकृतिमाह—पदार्थान्तरेति। पदार्थानां संसर्गो न विध्याकाँक्षानिबन्धनः, विधेरपि पदार्थान्तरतुल्यवात्। तस्मात्सम्बन्धयोग्यरूपेण स्वशब्दैः प्रकाशिताः पदार्थाः स्वयमेव संसर्गभागिनो भवन्ति। सम्बन्धयोग्यत्वेन पदार्थप्रकाशे हेतुमाह—विशिष्टार्थेति। वेदान्तिभिर्व्यवहारे भट्टनयाङ्गीकृते भट्टपादाभिमतिमाह—वाक्यार्थ इति। सप्रयोजनोपपादनं वादार्थमुपसंहरति—तस्मात्पौरुषेयेति।

वेदान्तानामपौरुषेयत्वमसृष्यमाणाः काणादादयः प्रत्यवतिष्ठन्ते—ननु कथमिति। जीर्णकूपादिषु व्यभिचारवारणाय हेतौ सत्यन्तदलम्। कालिदासादिवाक्येषु व्यभिचारवारणाय विशेष्यदलम्। निरुक्तापौरुषेयत्वानुमाने हेतोर्विशेषणासिद्धिं दर्शयति—पौरुषेयेति। अस्मर्यमाणकर्तृकत्वपदेनाप्रमीयमाणकर्तृकत्वं विवक्षितमिति चेत्, तर्हि नोचितम्, तस्माद्यज्ञादित्यादिश्रुतिभिः कर्तुः प्रमीयमाणत्वात्। स्मरणागोचरकर्तृकत्वस्य विवक्षायां विकल्पासहत्वेन दूषितत्वात्। विकल्पयति—तथाहीत्यादिना। तत्राद्ये प्रकीर्णश्लोकादावनैकान्तिकत्वम्। द्वितीये असर्वज्ञविज्ञानाविषयत्वापत्तिः। नित्यत्वप्रतिपादकागमविरोधेन सृष्टिश्रुतीनां पौरुषेयत्वप्रतिपादकानां वेदसम्प्रदायप्रवर्तकत्वपरमिति शङ्कते—नन्वित्यादिना। हे वृष्णे! नित्यया वाचा शोभनां स्तुतिं चोदयस्वेत्यर्थः। यः परमेश्वरः

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रहिणोति तस्मै", "नाचिकेतमुपाख्यानं मृत्युप्रोक्तं सनातनम्," "अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा" इत्यादिश्रुतिस्मृतिवाक्येभ्यो वेदस्य नित्यत्वावगमात् पौरुषेयत्वप्रतिपादकानि कल्पादौ तत्संप्रदायप्रवर्तकत्वपराणीति चेत्, मैवम्; "वाचा विरूप! नित्यया" इत्यस्य वाक्यस्य "वृष्णे चोदस्व सुष्टुतिम्" इति वाक्यशेषादग्निस्तुतिविधिपरत्वावगमात् अन्यार्थदर्शनस्य प्राप्त्यभावे प्रमाणत्वानुपपत्तेः 'यो वै वेदांश्च प्रहिणोति" इत्यस्य च पौरुषेयत्वापौरुषेयत्वयोः साधारणत्वात्, स्वयं निर्मायापि वेदानां प्रदानसंभवात्। 'मृत्युप्रोक्तं सनातनम्' इत्यस्य वाक्यस्य "उक्त्वा श्रुत्वा च मेधावी ब्रह्मलोके महीयते" इति वाक्यात् उपाख्यानानुवचनश्रवणप्रशंसापरत्वात्। "अनादिनिधना नित्या" इति स्मृतेश्च प्रतिमन्वन्तरं चैषा श्रुतिरन्या विधीयते' इति स्मृत्यन्तरविरोधेनानिर्णायकत्वात् एवं च नित्यत्वप्रतिपादकानामन्यार्थतया पौरुषेयत्वप्रतिपादकवाक्याबाधकत्वात् पौरुषेयत्वमेव वेदान्तानां निश्चिनुमः ।

अनुमानतोऽपि तथात्वमध्यवस्यामः,—वेदवाक्यानि, पौरुषेयाणि, वाक्यत्वात्, कालिदासवाक्यवदिति, वेदवाक्यान्याप्तप्रणीतानि, प्रमाणत्वे सति वाक्यत्वान्मन्वादिवाक्यवत्।

ननु—'वेदस्याध्ययनं सर्वं गुर्वध्ययनपूर्वकम् ।
वेदाध्ययनरूपत्वादधुनाध्ययनं यथा ॥' (श्लो० वा० वाक्य ३६६)

इत्यनुमानात्सप्रतिसाधनतेति चेत्, मैवम्; सर्ववेदाध्ययनपक्षीकारे दृष्टान्तासिद्धेः, अतीतकालीनाध्ययनपक्षीकारे चांशतः सिद्धसाधनत्वात्, सर्गकालीनाध्ययनपक्षीकारे सर्गमनङ्गीकुर्वतो मीमांसकस्याश्रयासिद्धेः ।

'भारताध्ययनं सर्वं गुर्वध्ययनपूर्वकम् ।
भारताध्ययनत्वेन सांप्रताध्ययनं यथा ॥'

इत्याभाससमानयोगक्षेमत्वात् । अथ तत्र कर्तृस्मृत्या बाधः—

कल्पादौ हिरण्यगर्भं विदधाति, तस्मै च विहिताय वेदानुपदिशति, न तु करोतीति मन्त्रार्थः । आदिनिधनरहिता नित्या वागुपदिष्टापरमात्मनेत्यर्थः । वेदानां पौरुषेयत्वप्रतिपादकस्य बाधकाभावान्नित्यत्वप्रतिपादकवाक्यस्यान्यार्थत्वाद्वेदान्तानां पौरुषेयत्वं निश्चितमिति ।

नित्यत्वानुमानागमौ प्रदूष्यानित्यत्वं च प्रसाध्यानित्यत्वेऽनुमानमपि दर्शयति—अनुमानेति । गीतिरूपेषु हुंफडादिस्तोभभागेषु चाश्रयासिद्धिवारणाय पक्षे वाक्यानीति विशेषणम् । वेदानामीश्वरनिर्मितत्वेऽप्यनुमानमाह—वेदेति । उन्मत्तवाक्ये व्यभिचारवारणाय हेतौ सत्यन्तदलम् । प्रत्यक्षादौ व्यभिचारवारणाय विशेष्यदलम् । सत्प्रतिपक्षतां शङ्कते—नन्विति । दूषयति—मैवमिति । सकलवेदाध्ययनस्य पक्षत्वे दृष्टान्तसिद्धिः, अतीतकालीनाध्ययनस्य पक्षत्वेंऽशतः सिद्धसाधनता, सर्गकालीनाध्ययनस्य च पक्षत्वे मीमांसकस्याश्रयासिद्धिश्चेति । आभाससमानयोगक्षेमात्मकं दौर्बल्यमाह—भारतेत्यादि । कर्तृस्मृत्या बाधमाह—अथेति । न केवलं स्मृत्या बाधः प्रत्युत श्रुतिभिरपि बाध इत्याह—

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'कृष्णद्वैपायनं व्यासं विद्धि नारायणं प्रभुम्। को ह्यन्यः पुण्डरीकाक्षान्महाभारतकृद्भवेत्?॥'

'तर्हि इहापि सकर्तृकताप्रतिपादकश्रुतिभिर्बाध इति समानम्। विपक्षे चाप्ताप्रणीतत्वात् बालोन्मत्तादिवाक्यवदप्रामाण्यप्रसङ्गो बाधकस्तर्कः। अथ बालोन्मत्तादिवाक्यानामनाप्तप्रणीतत्वेनाप्रामाण्यम्, इह तदभावादाप्तवाक्यवत्प्रामाण्यमुपपद्यत इतिचेत्, मैवम्; अनाप्ताप्रणीतवाक्यस्य जगत्याप्तप्रणीतत्वनियमदृष्टेः, अन्यथा वक्तुरभावे वाक्यस्योत्पत्तिप्रतीत्योरसंभवात्। अथाभिव्यक्तिरेव शब्दानां वक्तृव्यापारान्नोत्पत्तिः, मैवम्; एवं सति पाषण्डाद्यागमानामपि नित्यत्वप्रसङ्गात्। किं च शब्दोऽनित्यः कृतको वा, सामान्यवत्वे सत्यस्मदादिबाह्येन्द्रियप्रत्यक्षत्वात्, घटवदित्यनुमानेन शब्दानां कृतकत्वेन पौरुषेयत्वसिद्धिः। न च मीमांसकं प्रति, योगिव्यवच्छेदार्थमस्मदादिपदं व्यर्थम्, तेन योगिनामनभ्युपगमादिति वाच्यम्; स्वमते व्यभिचारनिवारणार्थत्वात्। तथा च चिरन्तनाचार्याणामपि स्वमते व्यभिचारनिवारणार्थं विशेषणोपादानं दृश्यते—नित्यः शब्दो, ध्वनिधर्मान्यत्वे सति श्रावणत्वात्, शब्दत्ववदिति। न हि वर्णानित्यत्ववादिमते वर्णातिरिक्ता ध्वनय उदात्तादयो वा तद्धर्माः सन्ति, ये व्यावर्तेरन्, स्वमते तु ध्वनेस्तद्धर्माणां चोदात्तादीनां सद्भावादुपपद्यते ध्वनिधर्मान्यत्वे सतीति विशेषणम्।

न चोपान्त्यादिशब्देषु भागासिद्धिः; श्रोत्रग्राह्यशब्दविशेषस्यैव पक्षीकरणात्। न चैवमपि विशिष्टधर्मिहेत्वोरसिद्धिस्तत्तच्छ्रोत्रेष्वेकस्यैव शब्दस्य समवायानङ्गीकारात्, एकस्य शब्दस्य बहूनां प्रत्यक्षत्वानुपपत्तेरिति वाच्यम्, शब्दनित्यत्वानुमानेऽप्यस्य दोषस्य तुल्यतया स्वव्याघातकत्वेन जात्युत्तरत्वापत्तेः; तथाहि—भवदिन्द्रियग्राह्यः शब्दः पक्षः? अस्मदिन्द्रियग्राह्यो वा? नाद्यः; प्रतिवादिनं प्रत्यसिद्धेः। न द्वितीयः; वादिनं प्रत्यसिद्धेः। तस्माल्लोकप्रसिद्धशब्दत्वजात्याधार एव शब्दो नित्यत्वसाधने पक्ष इति वाच्यम्। एवमनित्यत्व-

---

तर्हीति। पूर्ववादी शङ्कितोपाधित्वं निराचष्टे—विपक्षे चेति। वेदेऽनाप्तप्रणीतत्वाभावेन प्रामाण्यमुपपादयति—अथ बालेति। अतिप्रसक्त्या निरुक्तां शङ्कां वारयति—मैवमिति। नित्यत्वे सत्योपलब्ध्यनुपलब्धिप्रसङ्गं बाधकमुक्त्वाऽनित्यत्वेऽप्यनुमानमाह—किं चेति। ईश्वरप्रत्यक्षेष्वाकाशादिषु च व्यभिचारवारणायेन्द्रियप्रत्यक्षत्वादिति विशेषणम्। मनोग्राह्यात्मनि व्यभिचारवारणाय बाह्येति। योगिप्रत्यक्षपरमाण्वादिषु व्यभिचारवारणायास्मदादिपदम्। सामान्ये व्यभिचारवारणाय सत्यन्तदलम्। न च योगिनमनभ्युपगच्छतां मीमांसकानां मते योगिव्यावर्तनायास्मदादिविशेषणं व्यर्थमिति वाच्यम्, स्वमते व्यभिचारवारणाय तस्य सार्थक्यात्। तत्र चिरन्तनानां सम्मतिमाह—तथा चेति। चिरन्तनानुमाने ध्वनिषु तद्धर्मोदात्तादिषु च व्यभिचारवारणाय सत्यन्तं विशेषणम्। स्वमताभिमतं व्यभिचारवारकत्वमाह—नहीत्यादिना। वर्णपदं शब्दोपलक्षकम्। तस्माद्व्यभिचारनिवर्तकमपि हेतुविशेषणं सार्थकमिति भावः।

भागासिद्धिं पूर्वोक्तां वारयति—न चोपान्त्यादीति। उभयवादिसम्मतधर्मिहेत्वसिद्धिमनूद्य दूषयति—न चैवमित्यादिना। जात्युत्तरतामुपपादयति—तथाहीति। लोकप्रसिद्धः=श्रावणत्वेन लोक-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

साधनेऽपीति न कश्चिद्दोषः। न च स एवायं गकार इति प्रत्यभिज्ञाप्रत्यक्षविरोधात् कालात्ययापदिष्टमनित्यत्वानुमानम्; प्रत्यभिज्ञाया जातिविषयत्वेन व्यक्तिविषयत्वेन च संदिह्यमानया बाधकतानुपपत्तेः। ननु विवादाध्यासितः कालो, वेदाध्ययनयुक्तः, कालत्वात्, संप्रतिपन्नकालवदिति प्रत्यनुमानविरोध इति चेत्, मैवम्; विकल्पासहत्वात्; तथाहि—किं वेदप्रणयनात्प्राक्कालः? किं वा तदुत्पादोत्तरकालः? उत सर्गकालः पक्षीक्रियते? पक्षत्रयेऽपि मीमांसकस्य धर्म्यसिद्धिः, प्रथमे च प्रतिज्ञापदयोर्व्याघातोऽतिरिच्यते, कालिदासादिवाक्यपाठेऽप्येवमनुमानोत्थानादाभाससमानयोगक्षेमता चानुमानस्य। नन्वशरीरस्येश्वरस्य ताल्वादिविवृतिरूपवर्णोच्चारणासम्भवात्कथं तत्प्रणीतत्वं वेदस्येति चेत्, मैवम्; स्वभावतोऽशरीरस्यापि परमेश्वरस्य भक्तानुग्रहार्थं लीलाविग्रहग्रहणोपपत्तेः। तदेवं वेदपौरुषेयतानुमानस्य निरस्तसमस्तदूषणतया वेदाः पौरुषेया इति प्राप्तम्।

अत्र समाधिः—'श्रुतीनामीश्वराज्जन्म केवलं श्रुतिषु श्रुतम्।
मानान्तरोपलब्धेऽर्थे रचना तु न मीयते'॥ २७॥ इति।

किमिदं पौरुषेयत्वं नाम, यत्र श्रुतयः स्मृतयश्च प्रमाणत्वेनोदाहृताः? किं पुरुषाधीनोत्पत्तिमत्त्वं वेदानां पौरुषेयत्वम्? उत प्रमाणान्तरेणार्थमुपलभ्य विरचितत्वम्? तत्राद्योऽङ्गीक्रियते; आकाशवन्नित्यत्वेन सर्वगतत्वेन कालतो देशतश्च क्रमशून्यानां वर्णानामनित्योच्चारणप्रतिपत्तिक्रमविशिष्टानां पूर्वपूर्वक्रमानुस्मृतिनिमित्ततत्तत्सदृशोत्तरोत्तरक्रमवतां वेदशब्दवाच्यानां सांप्रतमपि पुरुषाधीनोत्पत्तिमत्तया सर्गसमयेऽपि श्रुत्या तथात्वस्य प्रतिपादयितुमुचितत्वात्। द्वितीयस्तु न; प्रमाणान्तरेणार्थमुपलभ्य तत्रेश्वरेण वेदा विरचिता इति

प्रसिद्धः। प्रत्यभिज्ञाप्रत्यक्षविरोधमाशङ्क्य परिहरति—न च स एवायमिति। प्रत्यनुमानमाशङ्क्य दूषयति—नन्विति। धर्म्यसिद्धेः प्रतिज्ञाविरोधाच्च प्रत्यनुमानस्य दूषितत्वात्। विमतः कालः, कालिदासवाक्याध्ययनयुक्तः, कालत्वात्, सम्मतकालवदिति कालिदासवाक्येऽप्येवमनुमातुं शक्यत्वात्वदुक्तानुमानस्याभाससमानयोगक्षेमतेति भावः। पूर्वपक्षोपसंहारमाह—तदेवमिति।

सिद्धान्ती निराकर्तुमुपक्रमते अत्र समाधिरिति। श्रुतिषु श्रुतीनामीश्वराज्जन्मैव श्रुतम्, तेन मानान्तरेणोपलभ्य वेदविरचनमनुमातुमशक्यमिति श्लोकार्थः। सविवरणं श्लोकं व्याचष्टे—किमिदमिति। वेदानां पौरुषेयत्वं नाम पुरुषाधीनोत्पत्तिमत्त्वमिति कल्पोऽस्माभिरभ्युपगम्यत एव। आकाशवत् शब्दोऽपि नित्यः सर्वगतश्च। तत्र वर्णानां देशतः कालतो वा क्रमो नोपपद्यते। वर्णेषु प्रतीयमानः क्रमोऽनित्योच्चारणेनानित्यवृत्त्यात्मकप्रतिपत्त्या वा सम्भवति, क्रमिकाभिव्यञ्जकेन वर्णानामभिव्यक्तिमात्रं भवति। तस्मात्पूर्वपूर्वक्रमानुस्मृतिनिमित्तेनोत्तरोत्तरक्रमवतां वेदशब्दवाच्यानां शब्दराशीनामधुनापि पुरुषाधीनोत्पत्तिमत्त्वेन सर्गारम्भेऽपि श्रुत्या तथाविधपौरुषेयत्वस्य प्रतिपादयितुमुचितत्वमित्याह—आकाशवदित्यादिना। एवं श्लोकस्य पूर्वार्द्धं व्याख्यायोत्तरार्द्धं व्याचष्टे—द्वितीय इत्यादिना। श्रुत्याऽप्रतिपादितत्वादश्रौतोऽपक्ष इति। न च पुरुषाधीनोत्पत्तिमत्त्वश्रवणान्यथानुपपत्त्यैव प्रमाणान्तरेणार्थमुपलभ्य विरचितत्वमनिच्छयाऽपि सिध्येदिति वाच्यम्; इदानीमस्मदादि-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रुतिभिरप्रतिपादितत्वात्, न च पुरुषाधीनोत्पत्तिमत्त्वश्रवणान्यथानुपपत्त्यैव प्रमाणान्तरेणार्थमुपलभ्य विरचितत्वं सिध्येत्; इदानीमस्मदादिभिरुच्चार्यमाणवेदवाक्येषु मालतीमाधवादिवाक्येषु च व्यभिचारात् । एतेन—प्रमाणभूतवाक्यस्य रचनान्यथानुपपत्त्या मानान्तरोपलब्धेऽर्थे विरचितत्वकल्पनापि प्रत्युक्ता, अस्मदादिभिरुच्चार्यमाणमन्वादिवाक्येषु व्यभिचारात् । किं च यदि विरचितत्वान्यथानुपपत्तिर्मानान्तरोपलब्धेऽर्थे रचनां कल्पयेत्, हन्तैवम् 'ऋग्वेद एवाग्नेरजायत यजुर्वेदो वायोः सामवेद आदित्याद्' इति वेदानामग्न्यादिभ्यो जन्मश्रवणात् तत्तत्कर्तृकतया ईश्वरकर्तृकत्वनियमो न स्यात् । अथ "तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे" इत्यादिवाक्ये वेदानामीश्वरकर्तृकत्वाधिगमादधिष्ठातृदेवतापरं तत्तद्वाक्यमिति कल्प्येत, तर्हि "ब्रह्म स्वयंभु, वाचा विरूप नित्यया, अनादिनिधना नित्या वागुत्सृष्टा" इत्यादिश्रुतिस्मृतिशतेभ्योऽपि वेदानां नित्यत्वावगमात् । तस्माद्यज्ञादित्यादिवाक्यं संप्रदायप्रवर्तकत्वपरमिति कल्पना न प्रकृतेऽपि दण्डवारिता । नन्वेषामन्यपरत्वान्नैतेभ्यो नित्यत्वसिद्धिरिति चेत्; मैवम्; देवताधिकरणन्यायेन प्रमाणान्तरप्राप्तिविरोधयोरसतोन्यपराणामपि स्वार्थे प्रामाण्योपपत्तेः ।

एतेन वाक्यत्वादिति पौरुषेयत्वानुमानमपि परास्तम् । पुरुषप्रणीतत्वमात्रसाध्ये सिद्धसाधनत्वात् । प्रमाणान्तरेणार्थमुपलभ्य विरचितत्वसाधने च मालतीमाधवादिष्वनैकान्ति-

---

भिरुच्चार्यमाणे वेदवाक्येषु मालतीमाधवादिकाव्यवाक्येषु च प्रमाणान्तरेणार्थमुपलभ्यास्मदादिभिर्विरचितत्वाभावेऽपि पुरुषाधीनोत्पत्तिमत्त्वस्योक्तरीत्या विद्यमानत्वेन व्यभिचारात् । नह्यत्रास्माभिर्विरचितत्वं कल्पनीयमावश्यकम् । एवं वेदे विरचितत्वं साध्यं नास्ति तत्र पूर्वोक्तरीत्या पुरुषाधीनोत्पत्तिमत्त्वमस्ति । अतः सुव्यक्तोऽत्र व्यभिचार इति भावः । पुरुषाधीनोत्पत्त्यनुपपत्त्या प्रमाणान्तरेणार्थमुपलभ्य विरचितत्वं कल्पनं निरस्य प्रमाणभूतवाक्यस्य रचनानुपपत्त्या तत्कल्पनं निराकर्तुमतिदिशति—एतेनेत्यादिना । अत्राप्यस्मदादिभिरुच्चार्यमाणेषु प्रमाणभूतमन्वादिवाक्येषु व्यभिचारस्य तादवस्थ्यात् । उत्पत्तिश्रुतेरन्यथासिद्धौ प्रतिबन्दीमाह—किं चेत्यादि । किं च विरचितत्वं विनोच्चारणं न सम्भवत्यतो मानान्तरोपलब्धेऽर्थे रचना कल्पनीया, चेत्तर्हि वेदानामजन्यादिभ्यो जन्मश्रवणादीश्वरकर्तृकत्वनियमभङ्गप्रसङ्गः स्यात् । न च वेदानामीश्वरादुत्पत्तिश्रवणात्तत्तद्वाक्यमधिष्ठातृदेवपरमभ्युपेयमिति वाच्यम्, "ब्रह्म स्वयम्भु" इत्यादि श्रुतिस्मृतिवाक्यशतेभ्योऽपि वेदानां नित्यत्वावगमात् ब्रह्म=वेदः । न च तस्माद्यज्ञादित्यादिवाक्यं सम्प्रदायप्रवर्तकत्वपरमिति वाच्यम्, अस्मत्पक्षेऽपि सम्प्रदायप्रवर्तकत्वकल्पनस्य दण्डवारिताभावात् । पूर्वपक्षाशयमनूद्य दूषयति—नन्वेषामिति । देवताधिकरणन्यायेन प्रमाणान्तरेण प्राप्तिविरोधयोरवर्तमानयोरन्यपराणामपि वाक्यानां स्वार्थे प्रामाण्योपपत्तेः । इन्द्रादिदेवविग्रहस्य न प्रमाणान्तरेण प्राप्तिर्नापि निषेधः । अतः प्राशस्त्यपराणामपीन्द्रादिदेवविग्रहावगमकवेदवाक्यानां स्वार्थे प्रामाण्यमुपपद्यते एवेति देवताधिकरणन्यायसारः ।

नाहं केवलं श्रुतिबलाद्वेदे पौरुषेयत्वं साधयामि किन्तु वाक्यत्वहेतुना पौरुषेयत्वं तत्रानुमिनोमि, तथा प्रयोगः—वेदाः, पुरुषप्रणीता, वाक्यत्वाद्, भारतादिवाक्यवदित्याह—एतेनेति । अत्रानुमाने सिद्ध-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2.

कत्वात् । तथा च प्रमाणत्वे सति वाक्यत्वादाप्तप्रणीतत्वानुमानेऽपि सिद्धसाधनता । आप्ते-नोच्चार्यमाणतया तत्प्रणीतत्वस्यापौरुषेयवादिभिरप्यभ्युपगमात् । प्रमाणान्तरेणार्थ-मुपलभ्य विरचितत्वानुमाने तु हेतोरन्यथासिद्धिः । अस्मदादिभिरुच्चार्यमाणेदानींतनवेद-वाक्यानामिव सर्गकालीनानामपि तेषामीश्वरेणोच्चार्यत्वमात्रेणापि प्रमाणवाक्यत्वोपपत्तौ प्रमाणान्तराधिगतिपूर्वकविरचितत्वस्यानुमातुमशक्यत्वात्, तस्य च सर्वज्ञत्वादतीतकल्पा-न्तरगतवेदापरोक्ष्यसम्भवात् । अविग्रहस्यापि तस्य भक्तानुकम्पितया लीलाविग्रहग्रहणेन तदुच्चारणोपपत्तेश्च । एतेन—सर्गकालीनाध्ययनस्य पूर्वपूर्ववेदाध्ययनपुरःसरत्वमपि समर्थनीयम् । न चाश्रयासिद्धिः; वेदान्तिभिः सर्गाङ्गीकारात् । न च भारताध्ययनस्य तथात्वप्रसङ्गेनाभाससमानयोगक्षेमता; तत्र दृढतरकर्तृस्मरणेन बाधात् । न चेहापि कर्तृश्रुत्या बाधः; तस्याः सम्प्रदायप्रवर्तकत्वपरतयाप्युपपत्तेः, अन्यथा नित्यत्वप्रतिपादक-वाक्यानामनवकाशत्वप्रसङ्गात्, भारतस्य नित्यत्वप्रतिपादकप्रमाणाभावाच्च ।

न च वेदानामनाप्ताप्रणीतत्ववदाप्तप्रणीतत्वमनुमातुं युक्तम्; आत्माकाशादौ व्यभिचारात् ।

प्राधनतां व्यभिचारितां च दर्शयति—पुरुषेत्यादिना । वेदाः, आप्तप्रणीताः, प्रमाणत्वे सति वाक्यत्वादिति द्वितीयानुमानेऽपि सिद्धसाधनतामाह—तथा चेति । सिद्धसाधनतां विकल्प्य विशदयति—आप्तेनेत्या-दिना । हेतोरन्यथासिद्धिमेव दर्शयति—अस्मदादीति । यथेदानीमस्मदादिभिर्वेदवाक्यान्युच्चार्यन्ते, तथा सर्गारम्भे परमेश्वरेण वेदवाक्यान्युच्चारितानीत्युच्चार्यत्वमात्रेणापि प्रमाणवाक्यत्वोपपत्तौ प्रमाणा-न्तरेणाधिगतिपूर्वकविरचितत्वस्यानुमातुमशक्यत्वात् । न च प्रलये प्रलीनस्य चिरकालातीतस्य संस्कारप्रमोषात् कथमीश्वरेणापि वेदा उच्चारयितुं शक्या इति वाच्यम्, तस्येश्वरस्य सर्वज्ञत्वेनातीत-कल्पान्तरगतवेदापरोक्षत्वसम्भवात् । न चैवमपि ताल्वादिकरणरहितस्याशरीरिणः परमेश्वरस्य वेदानां कर्तृत्वं सम्प्रदायप्रवर्तकत्वं न सम्भवतीति वाच्यम्; अविग्रहस्यापि परमेश्वरस्य भक्तानुक-म्पितया लीलाविग्रहधारणेन वेदोच्चारणोपपत्तेश्च । अभ्युगम्येदमुक्तम्, वस्तुतस्तु परमेश्वरेण शरीरमुपादाय न वेदा उपदिश्यन्ते, किन्त्वीश्वरानुगृहीतानामतीतकल्पानुष्ठितोपासनादिसाधनैः निरतिशयज्ञानसमृद्धानां हिरण्यगर्भादीनां बुद्धौ कल्पादौ यो वेदानामाविर्भावः, स किल परमेश्वरस्य वेदोपदेष्टृत्वम् । इदमेव "यो वै वेदांश्चेति श्रुतिवाक्येनोक्तं, न तत्र शरीरेण किञ्चित्कृत्यमिति भावः । सर्गकालीनं वेदाध्ययनं, पूर्ववेदाध्ययनपूर्वकं, वेदाध्ययनत्वात्, वर्तमानाध्ययनवदिति प्रयोगेन सर्गकालीनवेदाध्ययनस्य पूर्वपूर्ववेदाध्ययनपुरःसरत्वं समर्थितमित्याह—एतेनेति । न चोक्तप्रयोगे आश्रया-सिद्धिरिति वाच्यम्, वेदान्तिभिः, सर्गारम्भस्याङ्गीकारात्, मीमांसकान् प्रत्येवोक्तदोषसम्भवाच्च । एतेन वेदाध्ययनस्यानादित्वसिद्धौ वेदानामपौरुषेयत्वसिद्धिरिति भावः । न च सर्वं भारताध्ययनं गुर्व-ध्ययनपूर्वकं, भारताध्ययनत्वात्, आधुनिकाध्ययनवदित्यनुमानाभाससमानतेति वाच्यम्; दृढतरकर्तृ-स्मरणेन त्वदीयानुमानस्य बाधितत्वात्, अस्माकं वेदाध्ययनपक्षकानुमाने बाधाभावाच्च । "वेदांश्च प्रहिणोती"ति श्रुत्या सम्प्रदायप्रवर्तकत्वेनापि युक्तत्वात् । अन्यथा नित्यत्वप्रतिपादकवेदवाक्यानामनव-काशत्वप्रसङ्गात् । न चैवं भारतस्यापि सम्प्रदायप्रवर्तकत्वेनैव व्यासस्य स्मृत्या भारतस्याप्यपौरुषेयत्वा-पत्तिरिति वाच्या; महाभारतस्य नित्यत्वप्रतिपादकप्रमाणाभावाच्चेति ।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ शब्दत्वे सतीति विशेषणाददोषः, मैवम्; आप्तप्रणीततामात्रस्य पूर्वोक्तन्यायेन वेदेऽप्यङ्गीकारात्। न चैवं सति पाषण्डाद्यागमानामपौरुषेयत्वम्; मानान्तरेणार्थमुपलभ्य तत्तत्पुरुषविरचितत्वस्यसौगतादिभिः स्वयमेवाङ्गीकारात्प्रसिद्धेश्च। न च सामान्यवत्त्वे सत्यस्मदादिबहिरिन्द्रियप्रत्यक्षतया वर्णानां कृतकत्वानुमानम्; अस्मदादिबहिरिन्द्रियप्रत्यक्षस्य कालाकाशादेर्नित्यत्वेन भाट्टं प्रत्यनैकान्त्यात्, सत्प्रतिपक्षत्वाच्च। श्रोत्रं, नित्यद्रव्यग्राहकं, निरवयवेन्द्रियत्वात्, मनोवदिति भाट्टमतेन प्रयोगसंम्भवात्। न च श्रोत्रं, न नित्यद्रव्यग्राहकम्, अनित्यभूतविशेषगुणग्राहकं वा, बहिरिन्द्रियत्वादिन्द्रियत्वाद्वा चक्षुर्वदिति प्रत्यनुमानबाधः: प्रथमानुमाने नयनस्य नित्यगगनादिग्राहकत्वेन दृष्टान्तस्य साध्यवैकल्यत्वात्; द्वितीये च ध्वनिग्राहकतया सिद्धसाधनत्वात्। व्यक्तिभेदासिद्धौ च 'स एवायं गकारः' इति प्रत्यभिज्ञाया जातिविषयत्वकल्पनानुपपत्तेः, तद्विरोधश्च अनित्यत्वानुमाने दुर्वारः। न च। 'द्रुतो गकारो विलम्बितो गकारः' इति विरुद्धधर्म संसर्गित्वाद् गकारव्यक्तिभेदसिद्धिः;

न च वेदा आप्तप्रणीता, अनाप्ताप्रणीतत्वात्, सम्मतवदिति प्रयोगेन वेदानामाप्तप्रणीतत्वमनुमातुं शक्यमिति वाच्यम्; आत्माकाशादौ हेतौ व्यभिचारितत्वाच्च। अथोक्तानुमाने हेतौ शब्दत्वे सतीति विशेषणादनैकान्तिकताभाव इति चेन्न; आप्तोच्चरितत्वमात्रस्याप्तप्रणीततामात्रस्यास्मदादिभिरपि वेदेऽभ्युपगतत्वेन व्यभिचाराभावेपि सिद्धसाधनतादिदोषस्य तादवस्थ्यात्। पाषण्डाद्यागमानामपौरुषेयत्वं वारयति—न चैवं सतीति। तथोक्तं वर्णानामनित्यत्वं परिहरति—न च सामान्येति। भाट्टमतेदिक्कालाकाशेषु प्रत्यक्षत्वमभ्युपेयते। अत्र प्रयोगोऽप्यस्ति-दिक्कालाकाशाः, प्रत्यक्षाः, अमनस्त्वे सति विभुत्वादात्मवदिति। पार्थसारथिमिश्रैरप्युक्तं "यद्यपि न स्वातन्त्र्येण दिशः श्रोत्रग्राह्यत्वं, तथापि खे गृह्यमाणे तद्विशेषणतया दिगपि श्रोत्रेण गृह्यते इति दृष्टत्वादङ्गीक्रियते, कालवत् (शा. दी. तर्क. पृ. १३९) इति। अतो दिगादौ कृतकत्वसाध्यस्याभावेऽपि निरुक्तहेतोर्वर्तमानतया व्यभिचारः। वर्णानामनित्यत्वानुमाने सत्प्रतिपक्षतामाह—श्रोत्रमित्यादि। तथाहि "श्रोत्रं नित्यद्रव्यग्राहकं, निरवयवेन्द्रियत्वात्, मनोवदिति भाट्टमतानुसारेण प्रयोगः। अत्र प्रत्यनुमानं वारयति—न च श्रोत्रमित्यादिना। अनित्यो यो भूतविशेषगुणस्तस्य ग्राहकमित्यर्थः। वेदान्तिप्राभाकरयोर्मते सिद्धसाधनतावारणाय द्वितीयप्रयोगस्थसाध्यशरीरे अनित्येति विशेषणम्। शब्दादिनिष्ठद्वित्वमादाय भाट्टं प्रत्यर्थान्तरता, तद्वारणाय विशेषग्रहणम्। नभोगुणग्रहणाय भूतपदम्। मानसप्रत्यक्षात्मवादीनां मनसि व्यभिचारवारणाय बहिरिन्द्रियेत्युक्तम्। भाट्टमतानुसारेण प्रथमानुमाने दृष्टान्तस्य साध्यवैकल्यमाह—प्रथमेति। द्वितीयानुमाने सिद्धसाधनतामाह—द्वितीये चेति। भाट्टाः ध्वनिरूपानित्यविशेषगुणस्य ग्राहकं श्रोत्रमभ्युपगच्छन्त्येव। प्रमाणेन व्यक्तिभेदासिद्धौ "स एवायं गकारः" इति प्रत्यभिज्ञाया जातिविषयकत्वकल्पनानुपपत्तेः। अतः शब्दाभेदसाधकोक्तप्रत्यभिज्ञाप्रमाणेन विरोधोऽनित्यत्वानुमाने दुर्वारः। न च द्रुतो गकारो विलम्बितो गकार इति विरुद्धधर्मसंसर्गत्वानुभवेन गकारव्यक्तिभेदसिद्धिरिति वाच्यम्; तत्प्रतीतेर्ध्वनिविषयतया वर्णविषयत्वाभावेन प्रामाणिकविरुद्धधर्मसंसर्गस्यासिद्धेः। "नादवृद्धिपदाः" (जै. सू. १-१-१७) इति सूत्रे शाबरभाष्ये निगदितं यत्किल नादस्यैव वृद्धिर्न शब्दस्य। शब्दे प्रतीयमानां ह्रस्वत्वादिधर्माणां तदभिव्यञ्जकध्वनिनिष्ठत्वेन वर्णनिष्ठत्वाभावः। अतः प्रामाणिकविरुद्धधर्मसंसर्गस्यैव व्यक्तिभेदसाधकत्वाभ्युपगमेन प्रकृते

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तस्याः प्रतीतेर्ध्वनिविषयतया वर्णविषयत्वाभावेन प्रामाणिकविरुद्धधर्मसंसर्गस्यासिद्धेः। प्रातीतिकस्य च तस्य मणिकृपाणादिष्विवाननस्य भेदासाधकत्वात् वेदान्तवादिभिः सर्वस्य तद्विशेषितकालस्य चाङ्गीकारात्। अतीतकालशब्देन तत्पक्षीकारेणानुमानप्रवृत्तावपि न धर्म्यसिद्धिः। न चाभाससमानयोगक्षेमता; भारताध्ययनानामनादित्वनिरासेन पुरस्तान्निरस्तत्वात्। एवमपौरुषेयतया वेदान्तानामसंभाविताशेषपुरुषदोषसंसर्गेभ्यस्तेभ्यो विगलितनिखिलभेदविशुद्धब्रह्मप्रमितिः सिद्धचतीति सिद्धम्।

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीज्ञानोत्तमपूज्यपादशिष्यश्रीचित्सुखाचार्यमुनिविरचितायां प्रत्यक्तत्त्वप्रदीपिकायां

प्रथमः परिच्छेदः ॥

व्यक्तिभेदसाधकाभाव इत्याह—प्रातीतिकस्येति। पूर्ववादिनोक्तं सत्प्रतिपक्षत्वं परिहरति-वेदान्तवादिभिरिति। अतीतकालो, वेदाध्ययनयुक्तः, कालत्वात्, सम्प्रतिपन्नकालवदित्यनेनातीतकालशब्देन तस्य पक्षतयाऽनुमानप्रवृत्तिरपि न धर्म्यसिद्धिः। सिद्धान्तिप्रयुक्तानुमाने "सर्वं भारताध्ययनं गुर्वध्ययनपूर्वकं, भारताध्ययनत्वाद्, अधुनाध्ययनवदित्यनुमानाभाससमानयोगक्षेमता। भारताध्ययनानामनादित्वनिरासेनपुरस्तादेव निरस्तेतिभावः। वादार्थमुपसंहरन्प्रथमपरिच्छेदतात्पर्यं संगृह्णाति-एवमपौरुषेयतेति। अत्र च पुरुषदोषासम्भववर्णनमितरशब्ददोषासम्भवस्याप्युपलक्षणम्। तेन स्वतःप्रामाण्यवादातिरिक्तशक्तिवादाभिहितान्वयवादवेदापौरुषेयसिद्धार्थप्रामाण्यकारणकप्रामाण्यवादसङ्कलनं सञ्जातम्, विगलितनिखिलभेदग्रहणेनाखण्डवाक्यार्थप्रपञ्चमिथ्यात्वतदुपपादकभावाज्ञानतदुपयोगितमःख्यातिविशेषविचाराः संकलिताः। परिशुद्धब्रह्मग्रहणेन विज्ञानात्मस्वप्रकाशवादौ संकलिताविति प्रथमपरिच्छेदार्थः कृत्स्नः संकलित इति सर्वमवदातम्।

॥ श्रीशङ्करः प्रीयताम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यंयतीन्द्रकुलतिलक-
श्रीकैलासपीठाधीश्वरदशमाचार्यमहामण्डलेश्वर-
श्रीमत्स्वामिविद्यानन्दगिरिविरचितायां
प्रत्यक्तत्त्वप्रदीपिकाया व्याख्यारूपायां
छात्रतोषिण्यां प्रथमः परिच्छेदः।

॥ ॐ तत्सत् ॥

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

द्वितीयः परिच्छेदः

ननु कथं विगलितनिखिलभेदब्रह्मप्रतिपत्तिः ? प्रत्यक्षादिविरोधात् । तथा हि— प्रत्यक्षेण तावदिदमस्माद्भिन्नमिति नीलपीतादेर्भेदमध्यवस्यामः । अथ मतम्—किं प्रत्यक्षं भेदमेव गोचरयति ? उत वस्त्वपि ? तदापि भेदपूर्वकं तद्गोचरयेत् ? तत्पूर्वकं वा भेदम् ? युगपदेव वोभयम्? नाद्यः; धर्मिप्रतियोगिवस्तुप्रतिपत्तिमन्तरेण भेदस्य प्रत्येतुमशक्यत्वात् । अत एव न भेदग्रहपूर्वको वस्तुग्रहः । न च वस्तुग्रहपुरस्सरो भेदग्रहः,बुद्धेर्विरम्य व्यापाराभावात् । नापि युगपदुभयग्रहः; कार्यकारणबुद्ध्योर्यौगपद्यायोगात् । धर्मिप्रतियोगिप्रतिपत्तिर्हि भेदप्रतिपत्तेः कारणम्, सन्निहितेऽपि धर्मिण्यसन्निहितप्रतियोगिप्रतिपत्तिमन्तरेण भेदप्रतिपत्तिव्यतिरेकस्य वादिप्रतिवादिनोः सम्मतत्वादिति, मैवम्;स्वरूपभेदवादिनं प्रत्येतेषां विकल्पानाम नवसरदुःस्थत्वात्, वस्तुग्रहस्यैव भेदग्रहत्वात् । न च वस्तुस्वभावस्यैव भेदत्वे तद्ग्रहस्य प्रतियोग्यनपेक्षत्वप्रसङ्गः ? वस्तुस्वभावतया भेदस्यानपेक्षदृष्टिदृष्टस्य सविकल्पके

प्रत्यक्षादिप्रमाणेन भेदादिरुपवर्णितः ।
युक्त्या तत्प्रतिक्षेपाय द्वितीयः परिच्छिद्यते ॥

अथाद्वितीये ब्रह्मणि वेदान्तानां साधितेऽपि प्रामाण्ये भेदग्राहिप्रत्यक्षादिविरोधपरिहारमन्तरेण तत्र मिथ्यात्वलक्षणमप्रामाण्यं स्यादतो विरोधपरिहाराय द्वितीयः परिच्छेदोऽयमारभ्यते—ननु कथमित्यादिना । अत्र ब्रह्मात्मैक्यं वेदान्तशास्त्रप्रतिपाद्यो विषयः प्रथमपरिच्छेदेनोपपादितः । तत्र प्रतिवादिभिः समारोपितस्य दोषस्य विरोधस्य परिहाराय द्वितीयोऽयं परिच्छेदः । अतोऽनयोर्विषयविषयिभावसम्बन्धोऽवगन्तव्यः । तथा च केवलाद्वैतविरोधिनां प्रत्यक्षादिप्रमाणानां विद्यमानत्वे कथं सर्वभेदरहितब्रह्मप्रतिपत्तिः, यतो हि प्रत्यक्षेण तावन्नीलं पीताद्भिन्नमिति तयोर्भिन्नत्वं निश्चिनुमः । वेदान्ती पूर्ववादिनं पृच्छति—अथ मतमित्यादिना । तत्र प्रत्यक्षं धर्मिप्रतियोगिबोधमन्तरेणैव भेदं गृह्णातीति चेत्तर्हि तदशक्यम्, नहि क्वचिदप्यनुयोगिप्रतियोगिज्ञानं विना भेदग्रहणं सम्भवति । वस्तुग्रहणपक्षेऽपि विकल्पोऽयं समुत्तिष्ठति, यत्किल भेदपूर्वकं वस्तुग्रहणं, वस्तुपूर्वकं भेदग्रहणमुतयुगपदेवोभयग्रहणमिति । नाद्यः, धर्मिप्रतियोगिज्ञानमन्तरेण भेदस्य गृहीतुमशक्यत्वात् भेदपूर्वकं वस्तुग्रहणस्य दूरनिस्तत्वात् । नापि द्वितीयः, प्रत्यक्षं पूर्वं वस्तु गृह्णाति पश्चाद्भेदमिति बुद्धेर्विरम्यव्यापारादर्शनात् । नापि तृतीयः, कारणज्ञानं पूर्वं कार्यज्ञानं च परमिति युगपद्ग्रहणासम्भवात् । नहि कार्यकारणज्ञानं युगपदुपयुज्यते । भेदज्ञानस्य कारणमनुयोगिप्रतियोगिज्ञानं, तेन पूर्वं भवितव्यम् । दृश्यते हि सन्निहितेऽनुयोगिनि प्रतियोगिज्ञानमन्तरेण भेदज्ञानाभावः । पूर्वोक्तं सिद्धान्तिपक्षं पूर्ववादी प्रतिक्षिपति—मैवमित्यादिना । स्वरूपं भेद इति वादिनं प्रत्येतेषां विकल्पानामनवकाशत्वात् । वस्तुस्वभावो भेदः पूर्वं धर्मिप्रतियोगिनमपेक्ष्यैव गृह्यते । सविकल्पकव्यवहारदशायां प्रादेशमात्र-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

व्यवहारे प्रतियोगिसापेक्षत्वोपपत्तेः। दृश्यते हि प्रादेशमात्रपरिमाणवस्तुनोऽनपेक्षदृष्टिदृष्टस्य ह्रस्वं दीर्घमिति सविकल्पके व्यवहारे न्यूनाधिकपरिमाणवस्तुग्रहसापेक्षता। न च धर्मभेदवादिनं प्रत्यप्येते विकल्पाः प्रसरमर्हन्ति; युगपदुभयग्रहेऽपि विरोधाभावात्। असन्निहिते धर्मिणि प्रतियोगिनि वा युगपदुभयग्रहाभावेऽपि सन्निहितस्थले दण्डी देवदत्त इतिवदपर्यायेणैवोभयग्रहोपपत्तेः। न च धर्मभेदवादे तस्य तस्य भेदस्य भेदान्तरभेद्यत्वादनवस्थादोषापत्तिः; मूलक्षतेरभावात्, 'मूलक्षतिकरीं प्राहुरनवस्थां हि दूषणम्' इति न्यायात्।

ननु धर्मपक्षेऽपि धर्मिणो भेदेन प्रतिपन्नस्य प्रतियोगितायां परस्पराश्रयदोषः, स्तम्भात्कुम्भस्य भेदसिद्धौ, कुम्भात्स्तम्भस्य भेदसिद्धिरिति। अप्रतिपन्नभेदस्य तु प्रतियोगितायां दुष्परिहरः स्वात्मनोऽपि तत्प्रसङ्ग इति चेत्, मैवम्; विद्यमानभेदयोरपि स्वरूपेण च स्फुरतोर्धर्मिप्रतियोगित्वोपपत्तौ एकस्मिन्भेदग्रहप्रसङ्गाभावात्। ननु क्षीरनीरयोर्विद्यमानभेदयोरपि स्वरूपग्रहणे भेदग्रहो न दृश्यत इति चेत्; मैवम्; तत्र समानाभिहारलक्षणदोषप्रतिबन्धादेव तदग्रहोपपत्तेः। एतेन दूरस्थवनस्पत्योरपि भेदग्रहप्रसङ्गः प्रत्युक्तः। उक्तञ्च—

> 'अतिदूरात्सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात्।
> सौक्ष्म्याद्व्यवधानादभिभवात्समानाभिहाराच्च' ।। इति (सां० का ७)

परिमाणवस्तुनोऽनपेक्षदृष्टिदृष्टस्य यथा न्यूनाधिकपरिमाणग्रहस्यापेक्षा, तद्वदत्रापि बोध्या। नापि धर्मभेदवादिनं प्रत्यप्येते विकल्पाः प्रसरन्ति, युगपदुभयग्रहे विरोधाभवात्। अस्तु खलु धर्मिणि प्रतियोगिनि वाऽसन्निहिते युगपदुभयग्रहाभावः, तथापि यत्र देवदत्तो दण्डश्च सन्निहितस्तत्र दण्डी देवदत्त इति ग्रहणवदत्रापि युगपदुभयग्रहस्य विरोधाभावः। न च यथाऽनुयोगिवस्तुनि प्रतियोगिवस्तुनो धर्मो भेदस्तथा भेदप्रतियोगिकोऽपि भेदो धर्मस्वरूप इत्यभ्युपगम्येत, तर्हि तस्य तस्य भेदस्य भेदान्तरेण भिद्यमानत्वादनवस्थापत्तिः? मूलक्षतेरभावात्। न खल्वेवमभ्युपगमे प्राथमिकभेदग्रहस्य क्षतिर्भवति। "मूलक्षतिकरीं प्राहुरनवस्थां हि दूषणमि"ति न्यायात्।

धर्मो भेद इतिपक्षेऽनुयोगिप्रतियोगिज्ञानयोः परस्पराश्रयदोषमाशङ्कते—ननु धर्मपक्षेऽपीति। तं दोषमभिनयति—स्तम्भादिति। स्तम्भाद्भिन्नत्वेनावगतस्य घटस्य सिद्धौ घटाद्भिन्नत्वेनावगतस्य स्तम्भस्य सिद्धिरिति परस्पराश्रयतापत्तिः। नन्वनुयोगिनि स्वरूपेणावगतो भेदो न भेदेन। अतो नास्ति पूर्वोक्ताऽन्योऽन्याश्रयेति चेन्न; स्वस्मिन् स्वस्यापि भेदापत्तेर्दुष्परिहरत्वात्। सिद्धान्तिनोक्तं दोषं प्रत्याचष्टे—मैवमिति। विद्यमानयोरपि भेदयोः स्वरूपेण स्फुरणाभ्युपगमे परस्पराश्रयतानापत्तेः स्वस्मिन् स्वात्मनो भेदानापत्तेश्च। ननु भेदस्य न विद्यमानतामात्रत्वं भेदग्रहप्रयोजकं, विद्यमानभेदयोरपि नीरक्षीरयोः स्वरूपग्रहणे भेदाग्रहदर्शनादितिशङ्कते—ननु क्षीरेति। सति प्रतिबन्धे कार्यादर्शनेन तत्र समानवस्तुसम्मिश्रणात्मकदोषप्रतिबन्धकत्वादेव भेदाग्रहोपपत्तेः। अयमेव परिहारो दूरस्थवनस्पत्योरपि भेदग्रहप्रसक्तावतिदिश्यते—एतेनेति। तदुक्तं सांख्यकारिकायां—अतिदूरादित्यादि। पर्वतशिखरस्थवृक्षादावतिदूरात्, नेत्रस्थसलिलविन्दावतिसामीप्यात्, अन्धादेरिन्द्रियघातात्, तीव्रदुःखाद्युत्पत्तौ मनोऽनवस्थानात्, परमाण्वादावतिसूक्ष्मत्वात्, कुड्यान्तरवर्तिषु व्यवधानात्,

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

किं चैकस्यामेव निर्विकल्पिकायां संविदि भेदस्य भेदिनोश्च युगपत्प्रतिभासे सत्येकं भेदिनं प्रतियोगीकृत्यैतस्मादयं भिन्नस्सविकल्पकबोधोपपत्तौ कुतः परस्पराश्रयो दोषः? एतेन भेदभेदिनोर्भेदान्तरप्रतीतिमन्तरेण विशेषणविशेष्यभावासम्भवाद्भेदस्य विशेषणत्वेन विशेष्यत्वेन वा प्रतीतिनियमादनवस्था मूलक्षयकरी स्यादित्यपि प्रत्युक्तम्; विद्यमानभेदयोः स्वरूपेण स्फुरतोरेव धर्मिप्रतियोगित्ववद्विशेषणविशेष्यभावस्याप्युपपत्तेः। तदेवं प्रत्यक्षप्रमितिगोचरो भेदः।

अनुमानमपि लिङ्गविशेषात् लिङ्गिविशेषप्रत्यायकत्वाद्भेदे प्रमाणम्। आगमोऽपि शब्दान्तराभ्याससंख्यासंज्ञागुणप्रक्रियानामधेयैः कर्मोपासनादिभेदमेव बोधयति। उपमानमपि प्रत्यक्षदृष्टगवयसादृश्यविशिष्टपरोक्षगोविषयमनेन सदृशी मदीया गौरिति भेद मेव गृह्णाति। अर्थापत्तिरपि 'तिलेस्य एव तैलं पयस एव दधि' इति व्यवस्थान्यथानुपपत्तिप्रभवा भेदमेवालिङ्गते। योग्यानुपलब्धिरप्यन्योन्याभावलक्षणं भेदं बोधयत्येव। तदेवं भेदग्राहकप्रत्यक्षादिविरोधान्नाद्वैतं प्रतिपादयितुमर्हन्ति वेदान्ताः। प्रयोगश्च—घटः, घटनिष्ठमिथ्याभेदातिरिक्तभेदाश्रयः, दृश्यत्वात्, पटवत्।

अत्राभिदध्महे—सापेक्षत्वात्सावधेश्च तत्त्वेऽद्वैतप्रसङ्गतः।
एकाभावादसंदेहान्न रूपं वस्तुनो भिदा ॥१॥

दिवादीपादौ सूर्यप्रकाशेनाभिभवात्, जलाशये प्रक्षिप्तजलसम्मिश्रणादेव च यथावद्ग्रहणप्रतिबन्धो भवतीति तदर्थः। अन्यथापि परस्पराश्रयतादोषं परिहरति—किं चैकस्यामपीति। एकस्मिन्नेव निर्विकल्पकज्ञाने भेदस्यानुयोगिप्रतियोगिनोश्च युगपत्प्रतिभासेऽपि सविकल्पकदशायामेकं भेदिनं प्रतियोगीकृत्यायमस्माद्भिन्न इति बोधोपपत्तौ कुतोऽन्योऽन्याश्रयता? मूलक्षयकारिण्यनवस्थापरिहारोऽतिदिश्यते—एतेनेति। तं विवृणोति—विद्यमानेत्यादि। नहि सर्वत्र विशेषणतया विशेष्यतया वा भेदस्य प्रतीतिनियमः, येनैकस्य भेदस्य भेदान्तरेण भेद्यत्वादनवस्था प्रसज्ज्येत, नापि भेदधाराप्रवर्तमाने सति प्राथमिकभेदस्य क्षतिकारिण्यनवस्था स्यादिति।

न केवलं भेदस्य प्रत्यक्षप्रमाणगम्यत्वमपितु लिङ्गविशेषाल्लिङ्गिविशेषबोधकत्वादनुमानगम्यत्वमपि भेदेऽस्ति। कर्मोपासनयोर्मानसत्वादिप्रयुक्तवैषम्येण भेदो निर्दिष्टः। तत्प्रतिपादकागमोऽपि शब्दान्तराभ्यासादिभिः कर्मोपासनादिभेदमेव बोधयति। एवमुपमानार्थापत्त्यनुपलब्धिप्रमाणान्यपि भेदं बोधयन्त्येव। अतो भेदग्राहकप्रमाणविरोधान्न वेदान्ताः केवलाद्वैतं ब्रह्मप्रतिपादयितुं प्रभवेयुः। तद्विपरीतं भेदसत्यत्वेऽनुमानप्रयोगमप्याह—प्रयोगश्चेति।

स्वरूपभेद पक्षे चत्वारि दूषणानि सिद्धान्ती श्लोकेन संकलयति—सापेक्षत्वादिति। न रूपं वस्तुनो भिदेतिसर्वेषां हेतूनामन्वयः। भेदस्यानुयोगिप्रतियोगिसापेक्षप्रतीतिविषयत्वाद्वस्तुनश्च तन्निरपेक्षप्रतीतिविषयत्वान्नभेदो वस्तुस्वरूपमिति प्रथमो हेतुः। सप्रतियोगिकस्य भेदस्य वस्तुस्वरूपत्वे भेदद्वारा प्रतियोगिनामप्यनुयोगिस्वरूपत्वादद्वैतप्रसक्तिरिति द्वितीयः। "भिदिर् विदारणे" इति धातोर्व्युत्पन्नस्य भेदशब्दस्य विदारणार्थकस्य वस्तुस्वरूपार्थत्वे वस्तुनोऽपि विदीर्णतयैकाभावे तन्निमित्तकानेकाभावाच्च शून्यताप्रसक्तिरिति तृतीयो हेतुः। एवं भेदस्य वस्तुस्वरूपत्वेऽनुयोगिनिदृष्ट्य-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

न तावत्स्वरूपं भेदः; प्रतियोग्यनपेक्षत्वप्रसङ्गात् । न च प्रादेशमात्रपरिमाणस्य ह्रस्व-दीर्घादिव्यवहार इव सविकल्पकव्यवहारे भेदस्यापि प्रतियोगिसापेक्षत्वम्; वैषम्यात् । तथाहि—प्रादेशमात्रपरिमाणं स्वतो न्यूनाधिकं परिमाणाभ्यामेकद्रव्यसमवायविरोधिधर्म-द्वयविशिष्टतयोपलम्भे प्रतियोगिनमपेक्षते इत्यस्त्येव तत्र मेयभेदः । प्रकृते तु न तथा, स्वरूपस्यैव भेदत्वात् । यदि चास्मादयं भिन्न इति प्रतियोगिघटिततया प्रतीयमानो भेदो वस्तुनः स्वरूपं स्यात्, तदा तस्य सपरिकरस्य भेदस्य स्वरूपेऽन्तर्भावात्प्रतियोगिनोऽपि स्वरूपतया निमज्जनादद्वैतमेव पर्यवस्येत् । अथ प्रतियोगी भेदस्य स्वरूपे नान्तर्भूतः, किन्तु तटस्थ एव तन्निरूपकस्ततो नाद्वैतापत्तिरिति, मैवम्; प्रतियोगिनो भेदस्वभावानन्त-र्भावेऽपि स्वभावभूतस्य भेदस्य वस्तुस्वभाववदेवान्यनिरूप्यत्वानुपपत्तेः । किञ्च कुम्भं प्रति स्तम्भस्य यत्प्रतियोगित्वं तदपि स्तम्भस्य स्वरूपेऽन्तर्भूतं चेत्कुम्भस्यापि स्तम्भात्मना पर्य-वसानादद्वैतापत्तिः । धर्मत्वे च कुम्भोऽपि स्तम्भधर्मतामनुप्रविशेत्, कुम्भविशेषितस्य प्रतियोगित्वस्य स्तम्भधर्मत्वात् । अथ विशेष्यांशस्य धर्मतायामपि न विशेषणस्य तद्धर्मता, देवदत्तश्चित्रगुरित्यादौ बहुव्रीहिसमासाभिहितस्वामित्वस्य देवदत्तधर्मतायामपि गवां चित्र-

---

मात्रे तत्स्वरूपभेदोऽपि दृष्ट एवेति न तत्र सन्देहलेशः स्यादिति चतुर्थो हेतुः । अयं चान्तिमोहेतुर्विपर्य-यस्याप्युपलक्षणम् । विशेषाग्रहनिबन्धनौ हि संशयविपर्ययौ विशेषग्रहणे सति न स्यातामिति चतुर्थ-हेतुतात्पर्यमिति । क्रमेण चतुरो हेतून् श्लोकविवरणेन विशदयति—न तावदिति । वैषम्यमुपपादयति तथाहीति । प्रादेशमात्रपरिमाणं वस्तुन्यूनाधिकपरिमाणाभ्यां सहैकद्रव्ये समवायविरोधियद्ध्रस्व-दीर्घात्मकं धर्मद्वयं तद्विशिष्टतयाऽस्य प्रादेशमात्रपरिमाणस्य द्रव्यस्य प्रतीतावेवास्ति प्रतियोगि-ग्रहापेक्षा, न स्वरूपमात्रप्रतीतावित्यतो न भेदस्य तदुदाहरणं भवितुमर्हति । अतस्तत्र दृष्टान्ते मेयभेदोऽस्ति । प्रकृते तु स्वरूपस्यैव भेदत्वादिति दृष्टान्तदार्ष्टान्तियोर्वैषम्यं सुस्पष्टम् । इत्थं प्रथमं हेतुं व्याख्याय द्वितीयं हेतुं व्याचष्टे—यदि चेति । यदि घटात्पटो भिन्न इति प्रतियोगिविशिष्टतया प्रतीयमानो भेदोऽनुयोगिवस्तुनः स्वरूपं स्यात्तदा न केवलं भेदो धर्मिणि निमज्ज्येत, अपितु तत्प्रति-योगिनोऽपि तत्रानुयोगिनि निमज्जनादद्वैते सर्वेषां पर्यवसानं स्यादिति । ननु न प्रतियोगी भेदस्य विशेषणं, किन्तूपलक्षणं तेनानुयोगिन्यनन्तर्भूतस्य प्रतियोगिनो न धर्मिस्वरूपतेत्याह—अथ प्रतियोगीति । परिहरति—मैवं, प्रतियोगिन इति । तदा धर्मिस्वरूपवदेव धर्मिस्वरूपभेदोऽपि प्रतियोगिनाऽनिरूपणीयः, स्वरूपनिरूपणस्यान्यानपेक्षत्वात् । किं च भेदस्वरूपस्यानुयोगिनः कुम्भस्य या प्रतियोगिता स्तम्भे वर्तते, सा स्तम्भस्य स्वरूपं चेत्तर्हि कुम्भविशिष्टस्य प्रतियोगित्वस्य स्तम्भ-रूपतया तद्विशेषणीभूतस्य कुम्भस्य स्तम्भेऽन्तर्भावादद्वैतापत्तिद्वारा । भेदस्य धर्मत्वपक्षे दूषणमाह—धर्मत्व इति । कुम्भविशिष्टस्य प्रतियोगित्वस्य धर्मिस्तम्भधर्मत्वे विशेषणीभूतः कुम्भोऽपि स्तम्भ-धर्मतामन्तर्भवेदिति । अथ लोके तथा दर्शनाभावान्नकुम्भः स्तम्भधर्मतामापद्येतेत्याशङ्कते—अथ विशेष्येति । यथा चित्रगुर्देवदत्त इत्यत्र चित्रा गावो यस्येति षष्ठ्या देवदत्तस्य विशेषणं स्वामित्व-मुच्यते, तथासत्यपि स्वामित्वविशेषणीभूतानां चित्रगवां देवदत्तस्य न विशेषणत्वं भवति, तद्वदत्रापि द्रष्टव्यम् । यस्य मते भेदमात्रमविद्याऽप्यस्तमप्रामाणिकमत एव निरस्तविशेषणादिव्यवहारोऽपि

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तायाश्च देवदत्ताद्भिन्नत्वेन धर्मत्वादर्शनादिति, सत्यम्; एषा विभीषिका तदा समुन्मिषेद्यदि लोके क्वापि कमपि भेदं परमार्थसत्यमभ्युपगच्छेम। यदा पुनरद्वैतमेव परमार्थमवलम्ब्य समस्तं भेदजातं प्रत्याचिख्यासामः, तदा घटस्य स्तम्भधर्मतायां गवां देवदत्तधर्मतायां वा कं विशेषमवलोकयसि ? येनैवमुपालभसे। दृष्टचरं चैतत् विशिष्टस्य धर्मतायां विशेषणानामपि तद्धर्मत्वं तेषु तेषु बहुषु स्थलेषु। तद्यथा शब्दोऽनित्यः, भावत्वे सति कृतकत्वात्। शब्दो नित्यः, ध्वनिधर्मान्यत्वे सति श्रावणत्वात्; अनित्यः शब्दः, सामान्यवत्त्वे सति अस्मदादिबाह्येन्द्रियग्राह्यत्वादित्यादिषु। तदेवं स्तम्भस्य कुम्भधर्मता कुम्भस्यापि स्तम्भ धर्मतेति सर्वस्यान्योन्यधर्मतायामशेषवस्तुधर्मकमेकमेव धर्मि पर्यवस्येत्, न चैवमुपलभ्यते। किञ्च विदारणात्मक भेदस्य भावस्वभावतायां न किञ्चनैकं वस्तु स्यात्। अभेदै-कार्थसमवायिन्या एकताया भेदेन विरोधात्। परमाणुरपि नैक इति न तत्समाहाररूपोऽनेकोऽपि स्यात्। भेदस्य च वस्तुस्वभावत्वेऽन्यापेक्षत्वनिरासादेव "अन्यापेक्षं वस्तुस्वरूपं भेदो नतु केवलमतो नोक्तदोषः" इत्यपि निरस्तम्। यदि च स्वरूपं भेदस्तदा धर्मिणि दृष्टे स्वरूपं दृष्टं न क्वचिदपि संशयावकाशः, तथा विपर्ययस्यापि। भेदस्वभावस्य वस्तुनस्तथैवावभाषनात्तस्मान्नस्वरूपभेदे प्रत्यक्षं प्रमाणम्।

तथा धर्मभेदेऽपि—युगपद्ग्रहणायोगादनवस्थाप्रसङ्गतः।
परस्पराश्रयत्वाच्च धर्मभेदेऽपि नाक्षधीः ॥२॥

निष्प्रामाणिकः। अथ सोऽपि पक्षान्तःपाती न निश्चायकपथमारोढुमर्हति—सत्यमिति। किं चादर्शनादिति नियमतः, क्वाचित्की वा ? अन्त्ये व्याप्त्यभावादेवाप्रसक्तिः। आद्येऽसिद्धिरित्याह—दृष्टचरं चैतदिति। अत्र भावत्वस्य, ध्वनिधर्मान्यत्वस्य, सामान्यवत्त्वस्य च हेतुविशेषणस्य शब्दरूपेपक्षे वृत्तित्वं दृश्यते। तथा च विशिष्टस्य धर्मत्वे विशेषणानामपि तेषु तेषु बहुषु स्थलेषु पक्षधर्मत्वमविरुद्धम्। एवं च स्तम्भकुम्भादेरन्योऽन्यधर्मतायामशेषवस्तुधर्मकमेकमेव पर्य्यवस्येदिति। एकाभावादिति तृतीयं हेतुं श्लोकस्थं विशदयति—किं चेति। "भिदिर्" विदारणे इतिभिद्धातोर्निष्पन्नस्य भेदशब्दस्य धर्मिभावस्वभावत्वे नैकं किञ्चनवस्तु सिध्येत। अभेदमात्रसहचरिण्या एकताया भेदेन सहविरोधात्। यदा परमाणुरपि नैकः सिद्धस्तदा बौद्धाभिमतः परमाणुसमुदायरूपोऽनेकोऽपि न स्यात्। एतेन "अन्यानपेक्षं वस्तुस्वरूपं भेदो, न तु केवलमतो नोक्तदोष" इत्यपि निरस्तम्। अत्र नोक्तदोष इत्यनेनाद्वैतप्रसक्तिं वारयति। असन्देहादिति चतुर्थं हेतुं विशदयति—यदि चेति। यथा दृष्टे देवदत्ते न तत्र सन्देहो भवत्येवंस्वरूपभेदवादिमते स्वरूपग्रहे तन्मात्रभेदस्यापि गृहीतत्वेन न तत्र सन्देहलेशावकाशः।

एवं स्वरूपभेदं प्रदूष्य धर्मभेदपक्षेऽपि त्रीणि दूषणानि श्लोकेन संकलयति—युगपदित्यादि। धर्मभेदेऽपि धर्मिप्रतियोगिभेदानां युगपद्ग्रहणायोगान्न तत्र प्रत्यक्षज्ञानं प्रमाणम्। यद्यपि दण्डदेवदत्तौ समानानुभवयोग्यत्वेन युगपद्गृह्येते, तथापि न तयोस्तदैव विशेषणविशेष्यभावो गृहीतुं शक्यः, विशिष्टज्ञानस्य विशेषणविशेष्यज्ञानाधीनत्वात्। तथैव विशेषणं विशेष्यं विशेषणविशेष्ययोग्यतां

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यद्यपि दण्डदेवदत्तौ तुल्योपलम्भयोग्यत्वेन युगपद् गृह्येते, तथापि न तयोर्विशेषणविशेष्यभावस्तदैव प्रत्येतुं युक्तः; विशिष्टप्रत्ययस्य विशेषणविशेष्यस्वरूपप्रत्ययाधीनत्वात्—

'विशेषणं विशेष्यं च सम्बन्धं लौकिकीं स्थितिम् ।
गृहीत्वा संकलय्यैतत्तथा प्रत्येति नान्यथा' ॥(न्या. ली. पृ. ७०)

इति भट्टमतानुसारिभिः स्वीकारात् । तथा तार्किकैरपि—"समवायिनः श्वैत्यात् श्वैत्यबुद्धेः श्वेतबुद्धिस्ते कार्यकारण भूते" इति काणादसूत्रात् । अस्यायमर्थः—पटसमवायिनः श्वैत्याच्छौक्ल्यगुणात्कर्मकारणभूतात्तस्मिन्गुणे शौक्ल्यमिति मतिरुपजायते, तस्याश्च श्वैत्यबुद्धेर्हेतोर्गुणविशिष्टे शुक्लमिदमिति बुद्धिरुपजायते, ते च बुद्धी कार्यकारणभूते इति। तथाच सुरभिचन्द्रनमिति सौरभस्य गुणस्य घ्राणेन्द्रियैकगोचरस्य, चन्दनस्य लोचनगोचरस्यैकेन्द्रियाविषयत्वात्क्रमेण गृहीतयोरेव विशेषणविशेष्यभावप्रतीतिरित्यनिच्छताप्यपेयम्, तथाच सर्वत्र विशेषणविशेष्यभावप्रतीतावयमेव न्याय इत्यस्मादिदं भिन्नमिति धर्मिप्रतियोगिज्ञानपुरस्सरमेव तद्विशिष्टभेदज्ञानमेष्टव्यम्, तथाच सति न युगपदुभयग्रहसम्भवः । भेदभेदिनोश्च भेदेऽनवस्थापि तदवस्थैव । न चानन्तभेदाभ्युपगमेऽपि मूलक्षतेरभावादनवस्थाऽदोषाय; भेदस्य 'इदमतो भिन्नमयमनयोर्भेद' इति वा विशिष्टत्वेनैव प्रतीतिनियमात्, भेदेनैव च प्रतिपन्नस्य विशेषणत्वात् । ततश्च पूर्वपूर्वभेदप्रतीतिमन्तरेणोत्तरोत्तरभेदप्रतीतेरसम्भवात् युगपदनन्तभेदप्रतीतेरयोगाच्च जातैव मूलक्षतिः । अथ विद्यमानभेदस्य स्वरूपेण गृहीतस्य विशेषणतोपपत्तौ भेदाप्रतीतिः किं करिष्यतीति ? तन्न, क्षीरनीरयोर्दूरस्थवनस्पत्योश्च तथात्वाप्रतीतेः । न च तत्र दूरत्वादिदोषप्रतिबन्धात्तदग्रह इति वाच्यम्; विद्यमानभेदयोरपि भेदेनाप्रतीतौ विशेषणविशेष्यभावाग्रहे सिद्धे कारणविशेषोपन्यासस्य निष्प्रयोजकत्वात् । नह्युभयवादिसम्मतं तथाविधं स्थलमस्ति, यत्र विद्यमानभेदयो

गृहीत्वा तत्संकलनं च कृत्वा विशिष्टधीर्भवति, नान्यथेति भट्टपादावलम्बिभिरभ्युपगमात् तार्किकैरपि "शुक्लः पट" इति विशिष्टबुद्धौ शुक्लरूपं ज्ञातं सत्कारणं भवतीतिस्वीकृतम् । तथा काणादसूत्रम् । समवायिन इति (वै. सू. ८।१।६) अस्तु तर्हि भिन्नेन्द्रियग्राह्ययोर्विशेषणविशेष्ययोः नियमो न तथैकेन्द्रियग्राह्येषु नियम इत्यत आह—तथा च सर्वत्रेति । विमतं विशिष्टप्रत्यक्षं, विशेषणादिज्ञानोत्तरकालीनं, विशिष्टज्ञानत्वात्, सुरभिचन्दनमितिविशिष्टप्रत्यक्षवदित्यनुमानं प्रयोक्तव्यम् । सर्वत्रैहक्प्रतीतौ समान एव नियम इत्यवधेयम् । युगपद्ग्रहणायोगादिति प्रथमं हेतुमुपपाद्य द्वितीयहेतुमुपपादयति—भेदभेदिनोश्चेति । न च मूलक्षतेरभावान्नानन्तभेदाभ्युपगमोऽनवस्थादोषकरः इत्यत आह—ततश्चेति । पूर्वोक्तानवस्थापरिहारमुद्भाव्य प्रत्याचष्टे—अथेत्यादि । स्वरूपतो गृहीतस्य विद्यमानभेदस्य धर्मिणि विशेषणतोपपत्तौ पूर्वपूर्वभेदप्रतीतिर्नावश्यकीति न च वाच्यम्; नीरक्षीरादि विद्यमानभेदस्य स्वरूपेणाप्रतीतेः । विद्यमानभेदस्यापि भेदेनाप्रतीत्या विशेषणविशेष्यभावाग्रहे सिद्धे दूरत्वादिदोषप्रतिबन्धकस्य कारणविशेषोपन्यासस्य निष्प्रयोजनत्वात् । नह्यावयोरभिमतमेतादृशं स्थलं केनचिद् दर्शयितुं शक्यम्, यत्र विद्यमानभेदयोः स्वरूपग्रहणमात्रेण विशेषणविशेष्यभावग्र

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्वरूपप्रतिपत्तिमात्रेण विशेषणविशेष्यभावग्रहणम् । एतेन भिन्नतया प्रतिपन्नयोरेव धर्मिप्रतियोगिभाव इतीतरेतराश्रयदोषो वज्रलेपायते । न च निर्विकल्पिकायां सम्विदि भेदस्य भेदिनोश्च युगपदङ्गुलित्रयवदवभासनादिदमस्माद्भिन्नमिति सविकल्पकव्यवहारोपपत्तेः कथमितरेतराश्रयतेति वाच्यम्; निष्प्रतियोगिकस्य भेदस्य प्रमाणागोचरत्वात्, नित्यं प्रतियोगिघटित एव तस्मिन्प्रमाणप्रसरात् ।

कश्चायं धर्मभेदः ? किमन्योऽन्याभावः ? किं वा वैधर्म्यम् ? उत पृथक्त्वम् ? आहोस्विद्भिन्नलक्षणयोगित्वम् ? तत्र तावत्—

नान्योन्याभावरूपोऽयं द्वैताभावप्रसङ्गतः ।
तादात्म्यस्याप्यमानत्वात्प्रतियोग्यनिरूपणात् ॥३॥

अन्योन्याभावोऽपि हि यस्माद्भेदस्तं प्रतियोगिनमपि धर्मतया स्वस्मिन्नन्तर्भावयेत् । तथाच विश्वप्रतियोगिघटितान्योऽन्याभावस्य वस्तुनो भेदेऽनवस्थाप्रसङ्गात्, वस्तु तावन्मात्रत्वे कथं नाद्वैतं पर्यवस्येत्? किञ्च तादात्म्यप्रतियोगिकाऽभावोऽन्योऽन्याभाव इति तद्वादिभिरभ्युपेयते, तथाचाभावप्रतियोगिभूतस्तम्भकुम्भयोस्तादात्म्यं यदि न प्रमाणगोचरस्तदा कथं तदभावः प्रामाणिकः स्यात्? एवं कुम्भस्य विश्वप्रतियोगिकं तादात्म्यमादावेव प्रमितमित्यद्वैतसिद्धावूर्ध्वमपि तद्विरोधिनोऽन्योऽन्याभावग्रहस्य न समुदयः स्यात्, उपजीव्यविरोधात् । ननु कुम्भः स्तम्भो नभवतीति स्तम्भप्रतियोगिकोऽभावो यः कुम्भमाश्रितः सोऽन्योन्याभाव इति कथमप्रमितप्रतियोगित्वप्रसक्तिः? मैवम्, प्रतियोगिभेदाभावादन्योन्याभावसंसर्गाभावयोर्भेदा-

---

सम्भवतीति । परस्पराश्रयत्वादिति तृतीयं भेदाग्रहकारणं विशदयति—एतेनेति । भेदेन प्रतीयमानयोरेव वस्तुनोर्धर्मिप्रतियोगिभावनियमः सुनिश्चित इत्यन्योऽन्याश्रयदोषो वज्रलेपो भवति । परिहारान्तरं निराकुरुते—न च निर्विकल्पिकायामिति । निष्प्रतियोगिकस्य भेदस्य सत्त्वे प्रमाणाभाव इत्यर्थः । तस्मिन=भेदे ।

सामान्यतो धर्मभेदं प्रदूष्य विशेषतोऽपि दोषान् दर्शयितुं विकल्पचतुष्टयमुत्थापयति—कश्चायमिति । तत्र भेदविषयेऽन्योऽन्याभावरूपे प्रथमविकल्पे दोषं श्लोकेन संकलयति—नान्योऽन्येत्यादि । नायं भेदोऽन्योऽन्याभावरूपो भवितुमर्हति, द्वैताभावप्रसक्तेः, विश्वप्रतियोगिकाऽन्योऽन्याभावस्यानुयोगिस्वरूपत्वाभ्युपगमे प्रतियोगिनो विश्वस्य धर्मिरूपवस्तुमात्रत्वेन निखिलद्वैतस्याभावप्रसङ्गात् धर्मत्वे पूर्वोक्तानवस्थापत्तेश्च । किञ्चान्योऽन्याभावस्य स्वरूपमपि निरूपयितुमशक्यम् । न च तादात्म्यप्रतियोगिकोऽभावोऽन्योऽन्याभाव इति वाच्यम्; घटपटयोस्तादात्म्यस्य प्रमितत्वे सर्वत्राद्वैतप्रसङ्गात्, अप्रमितत्वे तादात्म्यप्रतियोगिकान्योऽन्याभावस्याप्रमाणिकत्वेनादोषात् । एवं विश्वप्रतियोगिकान्योऽन्याभावस्योपपादनाय पूर्वं विश्वतादात्म्योपपादनमावश्यकं, तस्य प्रमाणसिद्धत्वेऽसिद्धत्वे च पूर्वोक्ताद्वैतप्रसक्तिस्तुल्यैव । प्रतियोगिनोऽनिरूपणादिति द्वितीययोजनां दर्शयितुं शङ्कते—ननु कुम्भ इति । अथ न तादात्म्यप्रतियोगिकाभावोऽन्योऽन्याभावः, किन्तु घटादिप्रतियोगिकाभावोऽन्योऽन्याभावो नोऽभिमतः, अतो नाप्रसिद्धप्रतियोगिकत्वमस्मदुक्तभेदे प्रसज्यत इति चेन्न; प्रतियोगिभेदा-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भावप्रसङ्गात् । स्तम्भः कुम्भे नास्ति, कुम्भः स्तम्भो न भवतीत्युभयत्रापि स्तम्भस्यैव प्रतियोगिताङ्गीकारात् । प्रतियोगिनिष्ठोऽभावोऽत्यन्ताभावः; प्रतियोग्यनिष्ठत्वे सत्यकादाचित्कोऽभावोन्योऽन्याभाव इति लक्षणभेदादभावयोर्भेद इति चेत्, मैवम्; यत्किञ्चित्प्रतियोगिनिष्ठत्वन्यान्योऽन्याभावेऽपि भावादतिव्याप्तेः । स्वप्रतियोगिनिष्ठत्वं विवक्षितमिति चेत्, मैवम्; स्वशब्देनात्यन्ताभावोपादानेन तत्प्रतियोगिनिष्ठत्वस्यान्योऽन्याभावेऽपि भावेनातिव्याप्तेस्तदवस्थत्वात् । पटे घटो नास्तीत्यत्यन्ताभावस्य घटः प्रतियोगी, पटप्रतियोगिकान्योऽन्याभावोऽपि घटे वर्त्तत इति । किञ्चेदं प्रतियोगित्वम् ? निरूपकत्वं चेत् ? धर्मिणोऽपि प्रतियोगित्वप्रसङ्गः । अथ पञ्चम्यन्तशब्दवाच्यत्वम्, तर्हि घटः पटो न भवतीत्यत्रान्योन्याभावे पटस्य प्रतियोगिता न स्यात्, पञ्चम्यन्तशब्देनानिर्देशात् । अथ धर्मिणोऽन्यत्वे सति निरूपकत्वं प्रतियोगित्वम्, तदपि न; प्रतियोगित्वस्यानिरूपणादेव धर्मिप्रतियोगिकान्यत्वस्याद्याप्यसिद्धेः । तदेवं नान्योऽन्याभावो भेदः ।

नापि द्वितीयः; वैधर्म्ये वैधर्म्यान्तराभ्युपगमेऽनवस्था । अनभ्युपगमे वा वैधर्म्ययोरेकतापत्त्या तद्धर्मिणोरप्येकतापत्तावद्वैतप्रसङ्गः । नापि तृतीयः; पृथक्त्वे पृथक्त्वान्तराभावादेव धर्मिणस्तस्यैकतापत्तेः । किञ्च पृथक्त्वस्य गुणत्वान्निर्गुणेषु पृथक्त्वगुणासम्भवेन भेदो न स्यात् । तत्रान्योऽन्याभावनिबन्धनो भेदव्यवहार इति चेत्तर्हि द्रव्येष्वपि तन्निबन्ध-

---

भावेनान्योऽन्याभावसंसर्गाभावयोर्भेदाभावप्रसङ्गात् । तत्र प्रतियोग्यभेदं दर्शयति—स्तम्भः कुम्भे नास्तीत्यादिना । भूतले घटो नास्ति, भूतलं न घट इति संसर्गाभावाऽन्योऽन्याभावयोरुभयोरपि भूतलस्यैव प्रतियोगित्वाभ्युपगमात्तयोः सम्बन्धस्य प्रतियोगित्वेऽनन्तर्भावाच्च । लक्षणभेदात्तयोर्भेदं शङ्कते—प्रतियोगिनिष्ठ इति । अथ स्वस्मिन् स्वस्यावर्तमानतयाऽत्यन्ताभावः स्वप्रतियोगिन्यावर्तेतेत्यतः स्वप्रतियोगिनिष्ठोऽभावोऽत्यन्ताभावः, स्वप्रतियोग्यवर्तमानत्वे सति सदा वर्तमानोऽभावोऽन्योऽन्याभाव इति लक्षणभेदान्निरुक्ताभावयोर्भेद इति चेन्न; प्रतिनिष्ठत्वपदेन यत्किञ्चित्प्रतियोगिनिष्ठत्वाभ्युपगमेऽन्योऽन्याभावेऽपि तस्य सत्त्वात्तत्रातिव्याप्तिप्रसङ्गात्, स्वप्रतियोगिनिष्ठत्वोक्तौ स्वशब्देनात्यन्ताभावोपादानेन तत्प्रतियोगिनिष्ठत्वस्य भेदेऽपि सत्त्वात्तत्रातिव्याप्तेस्तादवस्थ्यात् । पटे घटो नास्तीत्यत्यन्ताभावस्य घटः प्रतियोगी, तत्रैव घटे पटप्रतियोगिकान्योऽन्याभावोऽप्यस्त्येव अत्यन्ताभावप्रतियोगिनिष्ठत्वमेवान्योऽन्याभावस्येति—पटे घटो नास्तीति । किं च प्रतियोगित्वं चेन्निरूपकत्वं तर्हि धर्मिणोऽपि प्रतियोगित्वापत्तिः; पञ्चम्यन्तपदवाच्यत्वं प्रतियोगित्वं चेत्तर्हि घट पटो नेति पञ्चम्यन्तपदवाच्यत्वाभावेनात्रान्योऽन्याभावे पटस्य प्रतियोगिता न स्यात् । न धर्मिभिन्नत्वे सति निरूपकत्वं प्रतियोगित्वमिति वाच्यम्; धर्मिप्रतियोगिकभिन्नत्वस्याद्याप्यसिद्धेरिति नान्योऽन्याभावो भेदः ।

वैधर्म्यं भेद इति द्वितीयकल्पं दूषयति—नापि द्वितीय इति । वैधर्म्ये वैधर्म्यान्तरस्वीकारेऽनवस्था, अन्यथाऽद्वैतापत्तिः । तृतीयं कल्पं दूषयति—नापीति । अनवस्थाभिया पृथक्त्वे पृथक्त्वान्तरानभ्युपगमे तथैवाद्वैतापत्तिः । पूर्वापेक्षयात्राधिकं दूषणमाह—किञ्चेति । निर्गुणेषु गुणेषु पृथक्त्वाख्यगुणस्य वृत्तित्वासम्भवेन तत्र भेदो न स्यात् । न च गुणेषु भेदव्यवहारोऽन्योऽन्याभावप्रयुक्त इ-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एव तद्व्यवहारोऽस्तु कृतं पृथक्त्वेन, तत्सत्तावेदकप्रमाणाभावाच्च । अथाकाशः, स्पर्शवद्गुणासमवायिकारणाद्विष्ठगुणयोराश्रयः, द्रव्यत्वाद्, भूतत्वाद्वा पटारम्भकतन्तुवत् । तेन वियद्गतयोरेकत्वपृथक्त्वयोः सिद्धि मानमनोहरकारः प्रत्यतिष्ठिपदिति चेत्, न; वेदान्तिनं प्रति दृष्टान्तस्य साध्यविकलवात्, तेन कारणगुणानां कार्ये गुणान्तरारम्भस्यानभ्युपगमात्, स्पर्शवत्त्वोपाध्युपहतत्वाच्च ।

नचान्त्यावयविनामनारम्भकत्वादेव तादृशगुणानधिकरणानामपि स्पर्शवत्त्वेन साध्यसमव्याप्त्यभावादेवानुपाधित्वम्; विषमव्यापकोपाध्यङ्गीकारेऽपि दोषाभावात् । न चैतत्पर्वतान्यत्वादेः पक्षेतरत्वन्याप्युपाधित्वप्रसङ्गो दोषः; य एतत्पर्वतोऽसावनग्निमानिति व्यतिरेकासिद्ध्यैव तस्य दुष्टत्वात् ।

'एकसाध्यविनाभावे मिथः सम्बन्धशून्ययोः ।
साध्याभावाविनाभावी स उपाधिर्यदत्ययः ॥'

इति चोपाधिलक्षणस्य समासमव्यापकयोस्तुल्यत्वात् । "समवावः, समवेतः, सम्बन्धत्वात्,संयोगवदिति प्रयोगे सम्बन्धत्वे सति समवेतत्वे कार्यत्वमुपाधिरिति विषमव्यापकोपाधेरुद्योतकराचार्यैरङ्गीकारात् । अपि चान्योन्याभावादयो भेदाः किं भिन्नमेव धर्मिणं परिरभन्ते ? उताभिन्नम् ? नाद्यः, अनन्तभेदाभ्युपगमप्रसङ्गात् । अस्तु, किं नः छिन्न-

---

वाच्यम्; द्रव्येष्वपि तथात्वात्कृतं पृथक्त्वगुणस्वीकारेण । पृथक्त्वस्य सत्त्वावगमे प्रमाणाभावाच्च । अथ वियद्गतयोरेकत्वपृथक्त्वयोः सिद्धये मानमनोहरकारीयं प्रयोगमुत्थापयति—अथाकाश इति । तस्याभिप्रायोऽयम्—स्पर्शवद्द्रव्यगतगुणं प्रत्यसमवायिकारणभूतौ यौ द्वावद्विष्ठगुणौ तयोराश्रयो नभः, द्रव्यत्वाद्भूतत्वाद्वा, पटारम्भकतन्तुवत् । यथाऽत्र दृष्टान्ते द्रव्यत्वं भूतत्वं चास्ति, तत्रैकत्वं पृथक्त्वं च साध्यमप्यस्ति । अत्रानुमाने सिद्धान्ती साध्यवैकल्यं दर्शयति—नेत्यादिना । तथा व्याप्यत्वासिद्धिमप्याह—स्पर्शवत्त्वेति ।

नन्वन्त्यावयविनां निरुक्तसाध्यान्तर्वर्तिगुणानधिकरणानां घटादीनामनारम्भकत्वादेव स्पर्शवत्त्वाद्युपाधिना सह समव्याप्त्यभावादेवानुपाधित्वमिति चेन्न; विषमव्याप्तिस्वीकारेणादोषात् । न चैवंसति सद्धेतुस्थलेऽपि पक्षेतरत्वस्योपाधित्वप्रसक्तिरिति वाच्यम्; यत्र पक्षेतरत्वाभावस्तत्र साध्यवत्त्वाभाव इत्यनिश्चयेन पक्षेतरत्वस्य साध्यव्यापकत्वाभावात् । अत्रोदयनाचार्योक्तलक्षणमाशङ्क्य निराचष्टे—एकसाध्येति । परस्परं सम्बन्धशून्ययोर्धर्मयोरेकेन साध्येनाविनाभावे निरुच्यमाने यस्याभावः साध्याभावेन व्याप्तः, स तदभावप्रतियोगी उपाधिः । अत्र मिथः सम्बन्धशून्ययोरित्यनेन साधनाव्यापकत्वमुच्यते । अत्रापि साध्याभावोपाध्यभावयोर्व्याप्यव्यापकः प्रतीयते । अनेनापि साध्यस्य व्यापकोपाधिरिति सिध्यति । अस्योपाधिलक्षणस्य समासमव्यापकयोः समत्वम् । समवायः समवेतः, सम्बन्धत्वात्संयोगवदित्यत्रप्रयोगे सम्बन्धत्वे सति समवेतत्वे च सति कार्यत्वमुपाधिरितिविषमव्याप्तधर्मस्योपाधित्वमुद्योतकराचार्यैरभ्युपेयते । इदानीं सर्वस्य धर्मभेदस्य साधारणमाश्रयं निरूपयितुमशक्यमिति दूषयति—अपि चेति । किं पूर्वोक्ता भेदा भिन्नमाश्रयमालिङ्गन्तेऽभिन्नं वा ? नाद्यः, अनन्तभेदस्वीकारापत्तेः । तथासति क्रमेण तेषामनन्तभेदानां धर्मिणा सह सम्बन्धाभ्युपगमे

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मिति चेत्, शृणु—क्रमेण तेषां धर्मिणा सम्बन्धे धर्मिणश्च घटादेः कादाचित्कत्वेन तत्सम्बन्धासम्भवः। सम्भवे वाऽतीतानागतानां च भेदानां क्रमसम्बन्धाय घटोऽनादिरनन्तश्च स्यात्। अथ युगपदेव धर्मिणा सर्वे भेदास्सम्बद्धयेरन्, तर्हि भिन्ने भेदस्थितिरिति पक्षक्षतिः; भेदसम्बन्धं विना तस्य भिन्नत्वानुपपत्तेः। तत्सम्बन्धेनैव च भिन्नत्वे, किंभेदविशिष्टे किंभेदस्थितिरिति नियामकाभावादेकोऽपि भेदो न भवेत्। उत्तरोत्तरेणैव च भेदेन पूर्वपूर्वभेदोपयोगोपपत्तावनन्तभेदाभ्युपगमोऽपि निष्फलः स्यात्। एवमपि भेदाः स्वीक्रियेरन्, यदि भेदपरम्पराभरमन्थरा कापि संविदुदयमासादयेत्। तथाचाहुः खण्डनकाराः—

"प्राग्लोपाविनिगम्यत्वप्रमाणापगमैर्भवेत्।
अनवस्थितिमास्थातुरचिकित्सा त्रिदोषता॥" इति। (खं० पृ० २०७)

न द्वितीयः; अभिन्नेऽपि चेद् भेदो निविशेत्तदा तदपि नैकं स्यादित्येकाभावादनेकमपि न सिद्धयेत्।

नापि वैलक्षण्यं भेदः, आत्माश्रयत्वात्। नानालक्षणयोगो हि वैलक्षण्यम्, नानात्वं च भिन्नत्वापरपर्यायमद्याप्यसिद्धम्, तेन च तत्सिद्धौ तत्सिद्धिरिति। किञ्च नानालक्षणयोगोऽपि दुर्निरूपः तथा हि—द्रव्यादीनां षण्णां लक्षणानि नानाविधान्यभ्युपगम्यन्ते।

तत्र तावद्गुणाश्रयो द्रव्यमित्यलक्षणम् यतः—

अव्याप्तेरप्यतिव्याप्तेर्द्रव्यं नैव गुणाश्रयः।
आद्ये क्षणे गुणाभावाद् गुणादावपि वीक्षणात्॥४॥

धर्मिघटादेरनित्यत्वेन सह सम्बन्धासम्भवः स्यात्। सम्भवे चातीतानागतानन्तभेदानां क्रमेण सम्बन्धयितुं घटोऽप्यनादिरनन्तश्चाभ्युपेयः स्यात्। युगपद्धर्मिणा सह सर्वेषां भेदानां सम्बन्धाभ्युपगमे भिन्न भेदस्थितिरिति प्रतिज्ञा हीयेत, विनिगमकाभावादेकोऽपि भेदो न सिध्येत, अनन्तभेदकल्पना निष्फला च स्यात्। अनन्तभेदकल्पने प्रमाणाभावमपि दोषमाह—एवमपीति। उक्तदोषत्रयं श्रीहर्षोक्त्या समर्थयति—तथा चाहुरिति। प्राग्भेदलोपो, विनिगमकाभावः, प्रमाणाभावश्चेति भेदानवस्थां स्वीकर्तुस्त्रिदोषताचिकित्सामतिक्रामति। भेदोऽभिन्नमाश्रयमालिङ्गते इति पक्षं दूषयति—न द्वितीयः।

भिन्नलक्षणयोगित्वं भेद इति धर्मभेदविकल्पं चतुर्थं दूषयति—नापीति। नानात्वं भिन्नत्वं चेति समानार्थत्वादद्याप्यसिद्धत्वेनात्माश्रयत्वप्रसङ्गात्, तत्सिद्धौ तत्सिद्धिरिति तात्पर्यम्। लक्षणानां दुर्निरूपितत्वेन नानालक्षणयोगित्वरूपभेदोऽपि दुर्निरूप्य इत्याह—किं चेति।

तत्रादौ द्रव्यलक्षणं दूषयति—तत्र तावदिति। गुणाश्रयत्वं द्रव्यत्वमिति द्रव्यलक्षणाभ्युपगमे दूषणानि श्लोकेन संकलयति—अव्याप्तेरित्यादि। उत्पन्नं द्रव्यं क्षणं निर्गुणं निष्क्रियं च तिष्ठतीति नियमेनोत्पत्तिकालावच्छिन्ने घटादौ जन्यद्रव्ये गुणासत्त्वेनाव्याप्तेः। "चतुर्विंशतिर्गुणाः" इति गुणादिष्वपि संख्यागुणान्वितत्वदर्शनेनातिव्याप्तेः। "नवैव द्रव्याणीतिवद् बाधकादर्शनेन गुणादिषु

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

उत्पन्नमात्रं द्रव्यं क्षणमगुणं तिष्ठतीत्यङ्गीकारादव्याप्तेः। गुणादिष्वपि चतुर्विंशतिर्गुणाः इत्यादिसंख्यागुणान्वयवीक्षणादतिव्याप्तेः। न च तत्र संख्यावत्त्वप्रतीतिर्विभ्रमः, नवैव द्रव्याणीत्यादाविव बाधकादर्शनात्। अथ मतम्, आस्तामिदमृजुपथप्रस्थितानां दूषणाभिधानम्, अस्माकं पुनरभिनववक्रनयवर्त्मानुसारिणां नैषा विभीषा समुन्मिषति, यतो गुणवत्त्वात्यन्ताभावानधिकरणतामेव गुणाधिकरणतामाचक्ष्महे, तेन नाव्याप्तिर्नाप्यतिव्याप्तिः। गुणादीनां पञ्चानामपि निर्गुणत्वनिष्क्रियत्वे इति प्रशस्तपादभाष्यदर्शनादिति, मैवम्; तत्रैवात्यन्ताभावेऽतिव्याप्तेः। सोऽपि हि गुणवत्त्वात्यन्ताभावस्तस्यानधिकरणम्, स्वस्य स्वस्मिन्नवृत्तेः। अथानेकत्वादत्यन्ताभावानामत्यन्ताभावेप्यत्यन्ताभावोऽस्ति, मैवम्; विकल्पासहत्वात्। किमेकैकगुणवत्त्वात्यन्ताभावानधिकरणत्वं द्रव्यलक्षणम्? उत सर्वगुणवत्त्वात्यन्ताभावानधिकरणत्वम्? नोभयम्; उभयत्राप्यव्याप्तेः। तथाहि—रूपादीनां गुणानामनेकत्वात्तदेकगुणाधिकरणस्यापि तदितरगुणात्यन्ताभावाधिकरणत्वादेव तदत्यन्ताभावानधिकरणत्वाभावात्। सर्वगुणवत्त्वात्यन्ताभावानधिकरणत्वस्य सर्वस्मिन्नसम्भवात्। सति हि सर्वगुणाधिकरणत्वे सर्वगुणात्यन्ताभावानधिकरणता स्यात्। न च सर्वगुणाधिकरणत्वमेकैकस्यास्तीति कथं नाव्याप्तिः? अथ चतुर्विंशतिगुणानामन्यतमगुणवत्त्वात्यन्ताभावानधिकरणता विवक्षिता, तदपि न, अन्यतमशब्देन रूपादेरेकैकस्य सर्वस्य वा विवक्षायां पूर्वाभिहिताव्याप्तिदोषस्य तदवस्थत्वात्।

किञ्चास्मिन्नपि वक्रलक्षणे गुणादिष्वपि सङ्ख्यापृथक्त्वगुणयोः प्रतीतेः कथं नातिव्याप्तिः? न च प्रशस्तपादभाष्यं मनुवचनम्, येन निर्गुणता गुणादीनां प्रामाणिकी स्यात्। न च

संख्यावत्त्वप्रतीतेरभ्रान्तत्वात्। न च गुणवत्त्वात्यन्ताभावानधिकरणत्वमेव गुणाधिकरणत्वपदेनाभिमतमिति वक्रमार्गेण गन्तॄणामस्माकं नये दूषणाभिधानस्याशक्यत्वेनाव्याप्त्यतिव्याप्त्योरसम्भव इति वाच्यम्; स्वस्मिन् स्वस्यावृत्तेर्गुणवत्त्वात्यन्ताभावोऽपि गुणवत्त्वात्यन्ताभावानधिकरणमिति तत्रात्यन्ताभावेऽतिव्याप्तेस्तादवस्थ्यात्। न च गुणवत्त्वात्यन्ताभावानामनेकत्वेनात्यन्ताभावेऽत्यन्ताभावोऽस्त्येवेति वाच्यम्; एकैकगुणवत्त्वात्यन्ताभावानधिकरणत्वं द्रव्यत्वमित्युक्तौ रूपादिगुणानामनेकत्वादेकगुणाधिकरणस्यापि द्रव्यस्य तदितरगुणात्यन्ताभावाधिकरणत्वेनैव तवाभिमतस्य गुणात्यन्ताभावानधिकरणत्वाभावात्तत्राव्याप्तेः। सर्वगुणात्यन्ताभावानधिकरणत्वस्य सर्वस्मिन्नसम्भवेनाव्याप्तेस्तदवस्थत्वात्। नहि कस्यचिद्द्रव्यस्य सर्वगुणाधिकरणत्वमस्ति, येन तत्र गुणात्यन्ताभावानधिकरणता सम्भाव्येत। नियतपक्षं प्रदूष्यानियतपक्षं दूषयितुमाह—अथेति। ननु चतुर्विंशतिगुणानामन्यतमगुणवत्त्वात्यन्ताभावानधिकरणत्वं निरुक्तद्रव्यलक्षणेन विवक्षितमिति चेन्न, अन्यतमपदेन रूपादेरेकैकस्य सर्वस्य वा विवक्षितत्वे पूर्वोक्ताव्याप्तेस्तादवस्थ्यात्।

वक्रलक्षणेऽतिव्याप्तिमप्याह—किञ्चास्मिन्निति। गुणादिष्वपि संख्यापृथक्त्वयोर्गुणयोः प्रतीतेरतिव्याप्तिस्तदवस्थैव। न च प्रशस्तपादभाष्येण रूपादिगुणानां निर्गुणत्वं निष्क्रियत्वं च स्वीकर्तुं शक्यमिति वाच्यम्; तस्य मनुवाक्यवत्प्रामाण्याभावात्। न च गुणेषु गुणाभ्युपगमेऽनवस्थापत्तेः संख्यापृथक्त्वयोस्तत्रप्रतीतिर्भ्रान्तिरिति वाच्यम्; रूपादिषु संख्यापृथक्त्वाभ्युपगमेऽपि संख्यापृथक्त्व-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मन्तव्यम्, गुणेष्वपि गुणाभ्युपगमेऽनवस्थाप्रसक्तेः सङ्ख्यापृथक्त्वप्रतीतिर्भ्रान्तिरिति; रूपादिषु तदभ्युपगमेऽपि सङ्ख्यापृथक्त्वयोस्सङ्ख्यापृथक्त्वान्तरानभ्युपगमेनैवानवस्था- परिहारात्। यथा भवतां सम्बन्धे सम्बन्धान्तरमङ्गीकुर्वतामपि समवाये तदनभ्युपगमादेवान- वस्थापरिहारः। द्रव्यगतसङ्ख्यापृथक्त्वाभ्यामेव तदेकार्थसमवायलक्षणप्रत्यासत्त्या गुणा- दिष्वपि तद्व्यवहारोपपत्तौ व्यर्था तत्कल्पनेति चेत्, मैवम्; विपर्ययस्यापि सुवचत्वात्। अथ गुणानामनेकत्वेऽपि द्रव्यस्यैकत्वदर्शनात्कथं गुणसङ्ख्यया द्रव्ये तद्व्यवहारः? तर्हीहापि माध्यस्थ्यमवलम्ब्य किमिति न दीयते दृष्टिः? नवैव द्रव्याणि चतुर्विंशतिर्गुणा इति सङ्ख्यावैषम्यात्—अथावान्तरद्रव्यसङ्ख्यासंभवनिमित्तोऽयं व्यवहारः, तर्हि परार्द्ध- सङ्ख्याव्यवहारोऽपि गुणेषु स्यात्। द्रव्येषु तत्संभवात्, द्रव्यगतसत्तासामान्यादिभिरेव गुणकर्मणोरपि सद्व्यवहारोपपत्तौ तत्र सत्तासामान्यकल्पनावैयर्थ्यप्रसङ्गाच्च। एतेन समवायिकारणं द्रव्यमित्यपास्तम्। जातमात्रस्य तदभावात्, तदत्यन्ताभावानधिकरणत्वस्य चात्यन्ताभावे एव व्यभिचारात्, रूपादिगुणानामपि सङ्ख्यापृथक्त्वसमवायिकारणत्व- संभवात्।

अस्तु तर्हि द्रव्यत्वजातियोगित्वं द्रव्यलक्षणम्, न; यतः—

> द्रव्यत्वजातियोगित्वमपि नो द्रव्यलक्षणम्।
> तज्जातिव्यञ्जकाभावात्तन्मानस्यानिरूपणात् ॥५॥

द्रव्यत्वं जातिमभ्युपगच्छता तज्जातिव्यञ्जकं किंचिदवश्यमभ्युपेयम्, न च तन्निरूप-

---

योस्तदनभ्युपगमेनैवानवस्थापरिहारसम्भवात्। अत्र वैशेषिकपक्षेऽपि समानोपपत्तिमाह—यथा भवतामिति। अन्यथोपपत्तिमाशङ्क्य परिहरति—द्रव्यगतेति। तथा हि द्रव्यगतसंख्यापृथक्त्वा- भ्यामेव तदेकार्थसमवायरूपसम्बन्धेन गुणादिष्वपि संख्यापृथक्त्वव्यवहारसिद्धे गुणादिषु संख्यापृथक्त्व- कल्पना नावश्यकीति चेन्न; निरुक्तकल्पनापेक्षया विपरीतकल्पनस्यापि सुवचत्वात्। न च गुणनानात्वेन तदाश्रयद्रव्यस्यैकत्वान्न गुणवृत्तिसंख्याप्रयुक्तो द्रव्ये संख्याव्यवहारः समुचित इति वाच्यम्; नवैव द्रव्याणि चतुर्विंशतिगुणा इति संख्यावैषम्यदर्शनेन त्वदुक्तेरनुपपत्तेः। न च द्रव्यगता- वान्तरचतुर्विंशतिसंख्यासद्भावेन गुणेषु चतुर्विंशतिसंख्योपपत्तिरिति वाच्यं; तथासति गुणेषु परार्द्ध- संख्याव्यवहारस्याप्युपपत्तेः। अतिप्रसङ्गान्तरमप्याह—द्रव्यगतसत्तेति। गुणकर्मणोः सत्तासामान्या- देरप्यनभ्युपगमप्रसङ्ग इतिभावः। एवमुत्पन्नमात्रद्रव्यस्य समवायिकारणत्वासम्भवेन समवायि- कारणत्वं द्रव्यलक्षणमित्यप्यपास्तम्। अव्याप्तिमुक्त्वातिव्याप्तिं दर्शयति—तदत्यन्ताभावेति। समवा- यिकारणत्वात्यन्ताभावानधिकरणत्वं तदत्यन्ताभावेऽतिव्याप्तं, रूपादिगुणेष्वपि संख्यापृथक्त्व- समवायिकारणत्वसम्भवेनातिव्याप्तं चेतिभावः।

लक्षणान्तरं शङ्कते—अस्तु तर्हीति। अथास्तु द्रव्यत्वजातिमत्त्वं द्रव्यलक्षणमिति चेन्न; द्रव्यत्वजाति- मत्त्वस्य व्यञ्जकत्वस्य निरूपयितुमशक्यत्वात्। द्रव्यत्वजातिमत्त्वव्यञ्जकप्रमाणयोरभावं श्लोके संकलयति—द्रव्यत्वेति। तज्जातिव्यञ्जकाभावं विशदयति—द्रव्यत्वं जातिमिति। गुणव-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सुशकम्; गुणविशिष्टस्य तद्व्यञ्जकत्वे विशेषणभूतस्य गुणस्यापि तद्व्यञ्जकतया द्रव्यत्वापत्तेः। रूपादीनामपि सङ्ख्यादिगुणवतां तद्व्यञ्जकतया द्रव्यत्वप्रसङ्गाच्च । एतेन समवायिकारणस्यापि तद्व्यञ्जकता निरस्ता । स्वातन्त्र्येण प्रतीतियोग्यत्वं व्यञ्जकमिति चेत्, किमिदं स्वातन्त्र्यम्? किमाश्रयप्रतीतिमन्तरेण प्रतीतियोग्यत्वम् ? उतानाश्रितत्वमेव? नाद्यः; शब्दादेरपि तत्सम्भवात् । न द्वितीयः; अवयविनामद्रव्यत्वापत्तेस्तेषामवयवाश्रितत्वात् । तदेवं न व्यञ्जकं द्रव्यत्वजातेः ।

नापि प्रमाणमस्ति । द्रव्यं द्रव्यमित्यनुगतप्रत्ययः प्रमाणमिति चेत् न; सुवर्णमुपलभ्य मृत्तिकामुपलभमानस्य लौकिकस्य तदेवेदं द्रव्यमिति प्रत्ययाभावात् परीक्षकाणां चानुगतप्रत्यये विप्रतिपत्तेः । रत्नतत्त्वमिवोपदेशसहकृतप्रत्यक्षेणैव द्रव्यत्वमीक्षत इत्यपि स्वशिष्यधीबन्धनमेव, रत्नतत्त्वस्येव जातेः सर्वपरीक्षकासम्मतत्वात् । धर्माधर्मयोरदृष्टत्वजातेरभ्युपगमप्रसङ्गाच्च, अदृष्टमदृष्टमित्युभयोरप्यनुगतप्रत्ययदृष्टेः ।

यदपि लीलावतीकारमतम्—"आकाशकालदिशः सत्तेतरजातिमत्यः, संयोगविभागजनकत्वात्कर्मवत् । नच कर्मत्वमप्रसिद्धम् । चलतीत्यनुगतप्रत्ययवेद्यत्वादिति" । तदपि मन्दम्, कर्माप्रत्यक्षवादिनां चलतीति प्रत्ययस्य संयोगविभागप्रवाहविषयतया कर्मविषयतानङ्गीकारात्कर्मत्वासिद्धौ दृष्टान्तस्य साध्यविकलत्वात् । आत्मा शाबलेयवृत्त्यवृत्तिशाबलेयनिष्ठजातिमान्संयोगित्वाच्छाबलेयवत् । जलादेश्च पक्षतुल्यत्वान्न तेन व्यभिचारः ।

समवायिकारणत्वं, स्वातन्त्र्येण प्रतियोगित्वं वा जातिमत्त्वव्यञ्जकमितिविकल्पं सम्भाव्य दूषयति—गुणविशिष्टस्येति । विकल्पद्वयं प्रदूष्य तृतीयं दूषयति—स्वातन्त्र्येणेति । तत्राश्रयप्रतीतिमन्तरेण प्रतीतियोग्यत्वं स्वातन्त्र्यमित्युक्तौ शब्दस्य, वायुस्पर्शस्य, गन्धरसयोश्चेति गुणानामपि तादृशस्वातन्त्र्यसम्भवेन तद्व्यञ्जकतया द्रव्यत्वप्रसक्तिरितिभावः । शब्दादेरपि स्वाश्रयाकाशादिप्रतीतिमन्तरेण प्रतीतियोग्यत्वरूपस्वातन्त्र्यस्य विद्यमानत्वादित्यर्थः। अनाश्रितत्वं स्वातन्त्र्यमिति पक्षे घटादिसावयवद्रव्यानामद्रव्यत्वापत्तेरित्यतो द्रव्यत्वजातिव्यञ्जकमसिद्धमिति ।

तन्मानस्यानिरूपणादिति पादं विशदयति—नापि प्रमाणमिति। तत्र प्रत्यक्षं प्रमाणमाशङ्क्य निराचष्टे—द्रव्यमिति। द्रव्यं द्रव्यमिति प्रत्ययस्य प्रमाणत्वे सुवर्णं दृष्ट्वा मृत्तिकाद्रष्टुर्लौकिकस्य पुरुषस्य तदेवेदं द्रव्यमिति प्रतीत्यभावात्, परीक्षकाणां विदुषामद्याप्यनुगतप्रतीतौ विप्रतिपत्तेः। अथ "जातिसमुदायस्य रत्नतत्त्ववद्भानादि"ति श्रीवल्लभोक्त्या व्युत्पन्नपुरुषस्य रत्नतत्त्वमिव जातेर्मानमित्युक्तौ स्वशिष्यबुद्धौ व्यामोहोऽयं केवलं, रत्नतत्त्ववज्जातेः सर्वपरीक्षकाणामैक्यमत्याभावात् । तदेवेति बुद्धौ जातिव्यञ्जकत्वाभ्युपगमेऽदृष्टमदृष्टमिति प्रतीतिबलेन धर्माधर्मयोरप्यदृष्टत्वजातिस्वीकारप्रसङ्गात् ।

प्रत्यक्षं निरस्य द्रव्यत्वजातिसिद्धावनुमानप्रमाणमपि निराचष्टे—यदपीति । लीलावतीकारसम्मतप्रयोगमाह—आकाशेति । चलतीत्यनुगतप्रतीत्या सत्ताभिन्नकर्मत्वजातिः कर्मणि दृष्टान्ते सिद्ध्यति । प्राभाकरमतेनात्र दृष्टान्ते साध्यवैकल्यमाह—तदपि मन्दमिति । प्राभाकरैः चलतीति प्रतीतेः संयोगविभागविषयत्वमभ्युपेयते, न कर्मविषयत्वमितिभावः । द्रव्यत्वजातिसिद्धौ त्रीण्यनुमानान्तराणि-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding:IKS-MoE-Grant-2

तथा, सत्ता दिक्कालाकाशनिष्ठजातेरन्या, मेयत्वात्पटवत् । आत्माऽनात्मवृत्तिरूपावृत्ति जातिमान्, रूपान्यत्वे सति सामान्यवत्त्वाद्घटवदिति द्रव्यत्वजातिसिद्धिरितिचेत्, मैवम् संयोगित्वहेतोर्वेगवत्त्वोपाधिहतत्वात् । मेयत्वहेतोश्च सत्तामनङ्गीकुर्वतामाश्रयासिद्धेः दिक्कालाकाशनिष्ठजातित्वेन तस्या एव विवक्षितत्वे चाप्रसिद्धविशेषणत्वाच्च । प्रमेयत्व गुणवत्त्वज्ञानाधारत्वोपाधिभिरेव यथायोग्यं सद्द्रव्यमात्मेति व्यवहारोपपत्तौ तत्तत्सा मान्यस्वीकारवैयर्थ्येन सामान्यवत्त्वहेतोरप्यसिद्धेः । तदेवं जातौ व्यञ्जकप्रमाणयोर सम्भवेनाकाशवृत्तिसत्ताऽवान्तरजातियोगि, क्रियासमानाधिकरणसत्ताऽवान्तरजातियोगि, संयोगवद्वृत्तिसत्ताऽवान्तरजातियोगि द्रव्यमित्येवमादीनि जातिपुरस्कारप्रवृत्तानि महा विद्यालक्षणानि निरस्तानि वेदितव्यानि ।

तथा गुणलक्षणमपि न युक्तं लक्षयामः ।

सामान्यवानगुण इत्याद्यप्यस्य न लक्षणम् ।
अन्योऽन्याश्रयतापत्तेर्गुणस्याद्याप्यसिद्धितः ॥६॥

"सामान्यवानगुणः संयोगविभागयोर्निरपेक्षो न कारणं गुणः" इति कन्दलीकारस्य गुणलक्ष तावदयुक्तम्; सिद्धे गुणे अगुण इति लक्षणसिद्धिस्तत्सिद्धौ च गुणसिद्धिरितीतरेतराश्रय त्वदूषणग्रस्तत्वात् । यत्तु लीलावतीकारेणोक्तम्—"सामान्यवानचलनात्मकः समवायि कारणताहीनो गुणः" इत्यपि न; रूपादीनामपि समवायिकारणत्वस्य दर्शितन्याये

शङ्कते—आत्मेत्यादिना । तत्रादौ व्याप्यत्वासिद्धिमाह—मैवमिति । दृष्टान्ते शाबलेये गवि गोत्वे साध्यमस्ति, तत्र वेगवत्त्वमुपाधिरस्तीति साध्यव्यापकत्वं पक्षे आत्मनि संयोगित्वहेतोः सत्त्वेऽपि वेगवत्त्वोपाध्यभावेन साधनाव्यापकत्वमिति व्याप्यत्वासिद्धिरिति । सत्ताजातिमनभ्युपगच्छतां मते द्वितीयहेतावाश्रयासिद्धिः । दिक्कालाकाशनिष्ठजातिपदेन द्रव्यत्वजातेरेव विवक्षितत्वेऽप्रसिद्धविशेष णतापि स्यात् । तृतीयहेतौ स्वरूपासिद्धिमाह—मेयत्वगुणवत्त्वेति । अयमत्राभिप्रायः—प्रमेयत्वरूपा खण्डोपाधिना सदिति व्यवहारो, गुणवत्त्वोपाधिना द्रव्यमिति व्यवहारो, ज्ञानाधारत्वोपाधिना चात्मेति व्यवहारः सम्पद्यते । अतः सामान्यवत्त्वहेतोरसिद्धिः । तस्मात्सत्तात्मत्वद्रव्यत्वादिजात्य भ्युपगमस्य वैयर्थ्यम् । एतेन महाविद्यारीत्या प्रवृत्तानि जातिघटितलक्षणानि त्रीण्यपि निरस्तानि वेदितव्यानीति ध्येयम्।

गुणलक्षणवत्त्वप्रयुक्तभेदसिद्धिं निराचष्टे—तथागुणलक्षणमपीति । तत्रादौ कन्दलीकाराद्यभि मतलक्षणं दूषयितुमाह—सामान्यवानिति ।

श्लोकोक्तं लक्षणं विशदयति—सामान्येत्यादिना । तत्र सामान्येऽतिव्याप्तिवारणाय सामान्यवानिति । द्रव्यवारणायागुण इति । कर्मण्यतिव्याप्तिवारणाय संयोगेत्यादिविशेषणम् । एतल्लक्षणेऽन्योन्याश्रयतां संगमयति—सिद्ध इति । तत्र चतुर्थपादेन हेतुमाह— गुणस्येति । अन्योऽन्याश्रयतावारणाय श्रीवल्लभलक्षणमनुवदति—यत्त्विति । रूपत्वादिव्याप्य पूर्वोक्तरीत्या एकत्वादेः समवायिकारणत्वस्य प्रदर्शितत्वेन समवायिकारणताहीनमप्येतल्लक्षणम सम्भवमिति । गुणात्कर्मणो भेदासिद्धौ कर्मव्यावृत्तेरयुक्तत्वेन किरणावलीयं लक्षणमप्ययुक्तम्, अन्यथा

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सम्भवात्तद्धीनतालक्षणस्य लक्षणांशस्यासम्भावितत्वात् । सामान्यवान्स्पर्शरहितो-द्रव्याश्रयः कर्मातिरिक्तो गुण इत्यपि न; गुणात्कर्मणो भेदासिद्धौ कर्मव्यावृत्तेरयुक्तत्वात् । अन्यथा रूपातिरिक्तो रसातिरिक्त इत्यपि विशेषणोपादानप्रसङ्गात् । तथा च गुणपदार्थे किरणावलीकारः 'तस्माद्वरो भूषणः कर्मापि गुणस्तल्लक्षणयोगात्' इति ।

ननु गुणत्वजातियोगी गुणः, न च व्यञ्जकाभावः; सामान्यवत्त्वे सति संयोगविभाग-कार्यद्वयाजनकत्वस्यैव गुणत्वव्यञ्जकत्वात् । नापि गुणत्वजातौ प्रमाणाभावः, संयोगः, संयोगत्वातिरिक्ताऽवान्तरजातिमान्, जातिमत्त्वात्कर्मवदिति तत्सिद्धिरिति चेत्, अत्र ब्रूमः—

गुणत्वजातियोगोऽपि न भवेद्गुणलक्षणम् ।
अन्योऽन्याश्रयदुष्टत्वाज्जातेस्तद्व्यञ्जकस्य च ॥७॥

सिद्धे हि सत्तासामान्ये गुणत्वसामान्ये वा तद्विशिष्टव्यञ्जकसिद्धिस्तत्सिद्धौ च सामान्यसिद्धिरिति परस्पराश्रयत्वात्, अनिष्टवियोगेष्टसंयोगोद्देशेनानुष्ठानसमुपजनितधर्मे संयोगविभागहेतौ लक्षणस्यासम्भवित्वात्, तथाभिचारादिजनिते दुरिते शत्रोरिष्टवियोगानिष्टसंयोगहेतौ च लक्षणस्यासम्भवित्वात् । न च तयोर्निमित्तत्वेनैव जनकत्वम्, नतु समवायिकारणतयाऽसमवायिकारणतया वेति वाच्यम्; आत्मनिष्ठसंयोगविभागहेतोरदृष्टस्य कार्यैकार्थसमवायिनोऽसमवायिकारणलक्षणोपपत्तेः, समवायित्वासमवायित्वकारणभेदस्याद्याप्यसिद्धेश्च । नापि तत्र प्रमाणम्; जातिमत्त्वहेतोरसिद्धेः । कर्मत्वादेरसिद्धौ दृष्टान्तस्य साध्यविकलत्वात् । गुणत्वजातेरसिद्धौ 'संयोगाजन्यसंयोगासमवायिकारणावृत्तिसंयोगासमानाधिकरणजातिमान्विभागाजन्यविभागासमवायिकारणावृत्तिविभागासमानाधिकरणजातिमान्गुणः' इत्येवमादीनि जातिपुरस्कारप्रवृत्तानि गुणलक्षणानि निरस्तानि ।

तथा कर्मलक्षणमपि दुर्लक्ष्यम् । न तावत्संयोगविभागयोरनपेक्षकारणं कर्मेति । यतः--

---

रूपरसादिव्यतिरिक्तत्वस्यापि गुणव्यवस्थापकत्वप्रसङ्गात् । तथा च गुणपदार्थनिरूपणावसरे किरणावल्यामुक्तं "कर्मणो गुणस्य भेदसिद्धौ कर्मैव गुण इति गुणलक्षणं युक्तमिति भावः" ।

अथ गुणत्वजातेर्व्यञ्जकप्रमाणयोरभावेन गुणत्वजातिघटितमपि न गुणलक्षणमित्याह—ननु गुणत्वेति । गुणत्वजातिव्यञ्जकस्य तत्साधकप्रमाणस्य चाभावमुपसंगृह्णाति—गुणत्वजातीति । तत्रान्योऽन्याश्रयतां विशदयति—सिद्धे हीति । व्यञ्जकस्याव्यापकतां चाह—अनिष्टेति । न चेष्टसंयोगानिष्टवियोगरूपकार्यद्वयाजनकत्वं न निमित्तकारणत्वेनापितु समवाय्यसमवायिकारणतयेति वाच्यम्; आत्मनिष्ठसंयोगविभागजनकादृष्टस्य कार्यैकार्थसमवायिनोऽसमवायिकारणलक्षणोपपत्तेः,समवायित्वाविकारणभेदस्याद्याप्यसिद्धेश्च । एवं गुणत्वजातिव्यञ्जकत्वं प्रदूष्यानुमानं दूषयति—नापीति । जातिमत्त्वहेतोरसिद्धे नेदमनुमानं गुणत्वजातौ मानमिति भावः । दृष्टान्ते साध्यवैकल्यमप्याह—कर्मत्वादेरिति । एतेन जातिपुरस्कारप्रवृतान्यपि गुणलक्षणानि निरस्तानीत्याह—संयोगाजन्येत्यादि ।

क्रमप्राप्तं कर्मलक्षणं निराकर्तुमनुक्रामति—तथा कर्मेति । तत्रादौ श्रीधराचार्योक्तं कर्मलक्षणं दूषयति—न तावदिति । द्रव्यवारणायानपेक्षेति पदम् । संयोगविभागयोरनपेक्षतया यो हेतुः तत्कर्मेति

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यथाश्रुतेऽसंभवित्वान्निरुक्तेरप्ययुक्तितः ।
नानपेक्षतया हेतुः कर्म योगविभागयोः ॥८॥

नानपेक्षतया संयोगविभागहेतुत्वं कर्मणः; समवायिकारणेश्वरेच्छादेशकालादृष्टापेक्षणात्। अथैवं निरुच्यते—पश्चाद्भावि निमित्तं नापेक्षते कर्म, तेन चेश्वरेच्छासमवायिकारणादयो व्यावर्त्यन्ते, तेषां पूर्वभावितया पश्चाद्भावित्वाभावादिति, मैवम्; उत्तरसंयोगे कर्तव्ये पश्चाद्भाविन्याः पूर्वसंयोगनिवृत्तेरपेक्ष्यमाणत्वात् । पश्चाद्भाविभावरूपं निमित्तं नापेक्षत इति चेत्, न; पूर्वसंयोगनिवृत्तिक्षणस्य भावस्यैव पश्चाद्भाविनोऽप्यपेक्ष्यमाणत्वात्। यदनन्तरं संयोगविभागयोरुत्पत्तिस्तत्कर्मेति च कर्मलक्षणे तत्सामग्र्यामपि तत्सम्भवादतिव्याप्तिः । न च कर्मैव सामग्री; तथा सति विभागोत्पत्तिसमसमयमेव पूर्वसंयोगनिवृत्तेरुत्तरसंयोगस्य चोत्पत्तिप्रसङ्गात्, सत्यां सामग्र्यां कार्ये विलम्बायोगात् । अस्तु तर्हि संयोगविभागयोरसमवायिकारणं कर्मेति लक्षणम् । न च संयोगविभागयोरतिव्याप्तिः, तयोरेकैककारणत्वात्, अत्र चोभयकारणत्वस्य विवक्षितत्वादिति चेत्, मैवम्; कर्मविशेषे लक्षणस्याव्याप्तेः । तथाहि—यदा पटारम्भकावयवतन्त्वादिनिष्ठेन कर्मणावयवान्तराद्विभागोद्भवः, तस्मिन्समये तदारब्धावयविनिष्ठं कर्म यदि भवति, तदावयवान्तरविभागादवयव्यारम्भकसंयोगनिवृत्तिसमयेऽवयविकर्मणा तस्मिन्नेवावयविनि यतः कुतश्चिद्विभागो जायते । तत्र समवायिकारणावयवसंयोगनिवृत्त्यनन्तरमवयविनो नाशान्नोत्तरसंयोगोत्पत्तिः, संयोगिनोऽवयविन एवाभावात् । तत्रावयविनिष्ठस्य कर्मण उभयासमवायिकारणत्वाभावादव्याप्तिः कथं न भवेत् ? न चावयवकर्मानन्तरमवयविनि कर्म न जायत इति वाच्यम्; हस्तचलनानन्तरं देवदत्तचलनस्य; शाखाचलनानन्तरं शाखिचलनस्य दृष्टत्वात् । न चोत्तरसंयोगानुत्पत्तौ कर्मणोऽनुपयोग्यत्वप्रसङ्गः; विभागजननेनापि

लक्षणम् । यथाश्रुतेऽसम्भवित्वं, निरुक्तेरव्याप्यसिद्धमिति श्लोकयोजना । श्लोकं विशदयति—नानपेक्षतयेति । न च संयोगविभागयोरितरानपेक्षकारणं कर्मेति कर्मलक्षणं वक्तुं युक्तमितिवाच्यम्; यथाश्रुतेऽसम्भवित्वात् । न च पश्चाद्भाविनिमित्तं नापेक्ष्यते यत्तत्कर्मेति; उत्तरसंयोगोत्पत्तौ पश्चाद्भाविन्याः पूर्वसंयोगनिवृत्तेरपेक्षादर्शनात् । न च भावरूपं पश्चाद्भाविनं निमित्तं नापेक्षते, तेन पूर्वसंयोगनिवृत्तेर्ध्वंसरूपतया तदपेक्षत्वेऽपि न दोष इति वाच्यम्; कर्मापेक्षया पश्चाद्भाविनोऽपि पूर्वसंयोगनिवृत्तिक्षणस्य भावस्यैव कर्मोत्पत्तेरपेक्ष्यमाणत्वात् । न चानन्तरं संयोगाद्युत्पत्तिकारणं कर्मेति विशेषणत्वेऽदोष इति वाच्यम्; संयोगादिसामग्र्यामपि तत्सम्भवेनातिव्याप्तेः । लीलावतीकारसम्मतं कर्मलक्षणं दूषयितुमुद्भावयति—अस्तु तर्हीति । संयोगविभागयोरेकैककारणत्वसत्त्वेऽपि उभयकारणत्वाभावेनातिव्याप्त्यभाव इति । तथापि कर्मविशेषेऽव्याप्तिमाह—मैवमित्यादिना । तां संगमयति—तथाहीति । हस्तचलनानन्तरं देवदत्तचलनस्य शाखाचलनान्तरं शाखिचलनस्य च दृष्टत्वेनावयवकर्मानन्तरमवयविनिष्ठकर्मावश्यम्भावीति भावः । न चोत्तरसंयोगोत्पत्त्यभावेऽपि कर्मणो

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पुरुषार्थत्वोपपत्तेः । न हि यावदशेषप्रयोजनसिद्धिस्तावद्वस्तुनोऽवस्थाननियमः; बीजादेरङ्कुराद्यजननेऽपि नाशाद्युपलम्भात् ।

अस्तु वोभयकारणत्वं कर्मणः, तथाप्यसमवायिकारणता निरूपणीया । समवायिकारणप्रत्यासन्नमवधृतसामर्थ्यं तदसमवायिकारणमिति चेत्, केयं प्रत्यासत्तिः ? कार्यैकार्थसमवायः, कारणैकार्थसमवायश्चेति चेत्, न; विकल्पासहत्वात् । तथाहि—उभयविधप्रत्यासन्नता असमवायिकारणशब्देन कर्मलक्षणेऽपि विवक्षिता ? उतान्यतरा ? नाद्यः; अनङ्गीकारादसम्भवाच्च । न ह्यन्त्यावयविनिष्ठस्य कर्मणः संयोगविभागसमवायिकारणेनान्त्यावयविना सहैकस्मिन्नर्थे समवायः सम्भवति, कर्मण एकद्रव्यमात्रवृत्तित्वात् । न द्वितीयः; कारणैकार्थसमवायस्यानङ्गीकारादेव । कार्यैकार्थसमवायस्य तु लक्षणान्तर्भावेऽतिव्याप्तेः । यन्निष्ठौ संयोगविभागौ तन्निष्ठतया संयोगविभागयोर्यत्कारणं तत्कर्मेति हि तथालक्षणार्थः सम्पद्येत । तथा चात्ममनसोः संयोगविभागजनकादृष्टेऽतिव्याप्तिः कथं न स्यात् ? कार्येण संयोगविभागाख्येन सह तज्जनकादृष्टस्यात्मन्येकस्मिन्नर्थे समवायात् । गुणान्यत्वे सतीति विशेषणादयमदोष इति चेत्, न; तदोभयकारणताभिधानस्य वैयर्थ्यापातात्, गुणान्यत्वपदेनैव विभागजनकविभागस्य संयोगजनकसंयोगस्य च व्यवच्छेदात् । एवं विभागाजन्यविभागासमवायिकारणं कर्मेत्यपि लक्षणं निरस्तम्; असमवायिकारणताया दुर्निरूपत्वात् । विभागाजन्यत्वविशेषणं च व्यर्थम्; व्यवच्छेद्याभावात् । न च विभागजविभागव्यवच्छेदार्थमिति वाच्यम्, कर्मण एव तदुत्पत्तौ विभागजविभागस्यैवाप्रामाणिकत्वात् ।

नुपयोग्यत्वप्रसक्तिरिति वाच्यम्; विभागजननेऽपि तत्कर्मणः सार्थक्योपपत्तेः । अशेषप्रयोजनसिद्धिपर्यन्तं वस्तुनोऽवस्थाननियमो बीजादेरङ्कुराद्यजनने नाशदर्शनेन बाधित इत्याह—नहि यावदिति ।

अधुनातिव्याप्तिं दर्शयितुमसमवायिकारणतां निष्कर्षति—अस्तु वेत्यादिना । प्रसिद्धमसमवायिकारणलक्षणमाह—समवायकारणेति । असमवायिकारणलक्षणघटितप्रत्यासत्तिं निरूपयितुं दुःशकमिति पृच्छति—केयमिति । विकल्पासहं स्फुटयति—तथाहीति । तत्रैका लघ्वी, ततोऽन्या महती । यद्युभयविधप्रत्यासत्तिरसमवायिकारणशब्देन कर्मलक्षणेऽपि विवक्षिता, तर्हि सानङ्गीकारपराहताऽसम्भवी चेत्युपेक्षणीया । पटगतसंयोगकारणं पटनिष्ठमेव न तन्तुनिष्ठम् । तस्मान्न कारणैकार्थप्रत्यासत्तिः साध्वीति भावः । अन्यतरपक्षे लघुलक्ष्येऽतिव्याप्तिमाह—कार्येति । अदृष्टेऽतिव्याप्तिं दर्शयितुं तल्लक्षणं निष्पादयति—यन्निष्ठाविति । अदृष्टस्य सकलकार्यसाधारणकारणतयात्ममनसोरपि संयोगविभागजनकतया तत्रातिव्याप्तेः । कार्यैकार्थसमवेतत्वमदृष्टे सम्पादयति—कार्येणेति । अदृष्टस्य स्वकार्येण संयोगविभागाख्येन सह सकलकार्यजनकस्यात्मन्येकस्मिन्नर्थे समवायात् । गुणान्यत्वविशेषणोपादाने तदुभयकारणत्वाभिधानं व्यर्थमिति । उक्तदोषमन्यत्राप्यतिदिशति—एवं विभागेति । व्यवच्छेद्याभावेन विभागाजन्यत्वविशेषणस्य व्यर्थत्वात्, असमवायिकारणत्वस्य दुर्नि-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ननु यत्तावदिह वंशावयवेषु प्रवर्तमानं कर्म, तद्द्रव्यारम्भकसंयोगविरोधिनं विभाग-मुत्पादयत्तदैव नाकाशादिभिः सह विभागमुत्पादयति, यस्मादाकाशादिविभागजनक-कर्मणो द्रव्यारम्भकसंयोगविरोधिविभागानारम्भकत्वेन व्याप्तमुपलभ्यते नलिनदलेषु, न हि तत्र द्रव्यविनाशः प्रत्यक्षाधिगतः; तदेवेदं नलिनमिति प्रत्यभिज्ञानात्। नाप्यनु-मानतः; दध्यादिष्विव व्यूहान्तरस्य तदुन्नायकस्य लिङ्गस्यादर्शनात्। तथा च पद्मपत्रस्य पत्रान्तराद्विभागः उपलभ्यमानो न द्रव्यारम्भकसंयोगविरोधी, किन्तु स्पर्शवद्द्रव्यसंयो-जात्कर्मण उत्पन्नो यः संयोगः सत्येव द्रव्ये द्रव्यारम्भके च संयोगे पद्मपत्रयोर्वर्तते, तमेव निवर्तयति, यथांगुल्योर्विभागः प्रयत्नोत्पादितं संयोगमेव निवर्तयति न तु द्रव्यारम्भकं संयोगम्, तस्मादंगुलिविभागवत्पद्मपत्रक्रियाजनितो विभागो न द्रव्यारम्भकसंयोगविरो-धीति व्याप्तिनिश्चये प्रयोगः—"विवादाध्यासिता वंशदलक्रिया, नाकाशादिविभागा-रम्भिका, द्रव्यारम्भकसंयोगविरोधिविभागारम्भकत्वाद्यन्नैवं न तदेवं यथा पद्मपत्र-क्रिया'। एककर्महेतुकत्वे च विभागयोर्द्रव्यारम्भकसंयोगविरोधित्वाविरोधित्ववैलक्षण्य-मनुपपन्नम्, कारणावैचित्र्ये कार्यवैचित्र्यस्याकस्मिकत्वप्रसङ्गादिति विपक्षे बाधकस्तर्कः। तदेयमवयवक्रिया अवयवविभागकाले पश्चाद्वा नाकाशादिविभागमारभते। तस्मादा-काशवंशावयवयोर्विभागो न क्रियाजः। न चासमवायिकारणमन्तरेण कार्योत्पत्तिः शक्याभ्युपगन्तुम्। न चान्तरेण क्रियामन्यदसमवायिकारणमवयवविभागातिरिक्तं शक्यमुपपादयितुम्। अवयवविभागस्त्ववशिष्यते। स च तस्य प्रत्यासन्न एकार्थसम-

---

रूप्यत्वाच्चेति भावः। विभागजविभागस्य त्रैविध्येऽपि कर्मण एव सकलविभागोत्पत्तौ विभागजविभाग-स्यैवाप्रामाणिकत्वात्। नहि कोऽपि विभागजो विभागोऽस्ति, यद्वारणाय तद्विशेषणं सार्थकं स्यात्।

नन्ववयवगतं कर्म किमवयवान्तराद्विभागोत्पत्तिकाले एवाकाशादिभ्यो विभागमारभते भिन्नकाले वा? आद्य तदैव तत्कर्माकाशादिभ्यो विभागमुत्पादयितुं नार्हति, यतोहि यस्मिन् कर्मणि नभोविभागजनकत्वमस्ति, न तत्र द्रव्यारम्भकसंयोगविरोधिविभागजनकत्वमस्ति। एतादृग्व्याप्ते-र्नलिनोदलेषु दृश्यमानत्वात्। तदेवेदं कमलदलमिति प्रत्यभिज्ञानात्तत्र द्रव्यविनाशो न प्रत्यक्षाधिगतः। विकसत्कमलकुड्मलादौ तदाऽदर्शनाच्चैतदवधारणीयम्। नाप्यनुमानेन कमलदलगतविभागो द्रव्यारम्भकसंयोगविरोधित्वं साधयितुमर्हति। दुग्धापेक्षया दध्यादिषु यथाऽऽकारान्तरं दृश्यते, तथात्राकारान्तरं तदुन्नायकं लिङ्गं दृश्यते, किन्तु चन्द्रकिरणरूपस्पर्शवद्द्रव्यसंयोगजनितात्संको-चात्मकात्कर्मणो यो जातः संयोगः स सत्येव द्रव्ये द्रव्यारम्भके च संयोगे कमलदलयोर्वर्तते, तमेव संयोगं पूर्वोक्तविभागो निवर्तयति। यथाऽङ्गुल्योर्विभागः प्रयत्नसाध्यसंयोगमेव निवर्तयति, न त्वङ्गुलीरूपद्रव्यारम्भसंयोगम्। एवं व्याप्तिनिश्चये प्रयोगमाह—विवादेति। विपक्षे बाधकमाह—एककर्मेति। उपपादितं कर्मारम्यत्वमुपसंहरति—तदेवमिति। पूर्वोक्तां व्यवस्थां द्वितीयविकल्पे अति-दिशति—पश्चाद्वेति। प्रसक्तप्रतिषेधे सत्यन्यत्राप्रसङ्गाच्छिष्यमाणे सम्प्रत्ययः परिशेष इति न्यायेना-न्यत्राप्रसङ्गमुक्त्वा शिष्यमाणे सम्प्रत्ययमाह—अवयवविभागेति। एवं विभागजविभागस्य तद्व्यावर्त्तये कर्मलक्षणे विभागाजन्यत्वं विशेषणं सार्थकमिति पूर्वपक्षः।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वायादिति सिद्धो विभागजो विभागस्तद्व्यावृत्त्यर्थं च विभागाजन्यत्वविशेषणमिति चेत्,

मैवम्; व्याप्तेरसिद्धत्वादनध्यवसितत्वतः ।
यौगपद्यप्रतीतेश्च प्रत्यक्षत्वमुपेयुषाम् ॥६॥

न तावदाकाशादिविभागजनकस्य कर्मणो द्रव्यारम्भकसंयोगविरोधिविभागानुत्पादकत्वं क्वचित्प्रत्यक्षसिद्धम्; आकाशादिविभागस्यातीन्द्रियस्य क्रियान्वयव्यतिरेकयोः प्रत्यक्षतोऽधिगन्तुमशक्यत्वाद्व्याप्त्यसिद्धेः । अनध्यवसितश्चायं हेतुः; आकाशादिविभागनारम्भके रूपादौ सत्यपि सपक्षे ततो व्यावृत्तत्वात् । अपि च क्रमकल्पनेयमनुपपन्ना; आकाशादिविभागप्रत्यक्षवादिनां विभागद्वयस्यापि यौगपद्यप्रतीतेः । नच शतपत्रपत्रशतव्यतिभेदानुभववद्विभ्रमोऽयमनुभवः,बाधकाभावात् । न चोपन्यस्तानुमानं बाधकम्, तस्यानध्यवसितत्वेनापहस्तितत्वात् 'विवादाध्यासितं विभागजन्यगुणाधिकरणं नित्यद्रव्यत्वादात्मवत् । अस्ति ह्यात्मनो विभागविषयं प्रत्यक्षज्ञानं तत्कर्मकारकजन्यं तेन न साध्यविकलो दृष्टान्तः' इति मानमनोहरकारोक्तमनुमानं बाधकमिति चेत्, मैवम्; वेदान्तिनं प्रति हेतोरसिद्धेः । तेनात्मव्यतिरिक्तनित्यानङ्गीकारात्, आत्मनो गुणानधिकरणत्वेन दृष्टान्तस्य साध्यविकलत्वाच्च । किंच नित्यविशेषणं व्यर्थम्; जीवाकाशव्यतिरिक्तस्य द्रव्यजातस्य विभागजन्यगुणाधिकरणतया विप्रतिपद्यमानस्य पक्षीकृततया पक्षव्यापकद्रव्यत्वहेतुमात्रेणैव साध्यसिद्धेर्नित्यपदव्यावर्त्याभावात् । अस्तु तर्हि द्रव्यत्वमात्रं हेतुरिति चेत्, न; विभुत्वोपाध्युपहतत्वात् । न च दिक्कालेश्वरेषु पक्षैकदेशेषु साधनव्यापकता; पक्षीकृतपरमाण्वादिषु तदभावात् ।

सिद्धान्ती तत्रानुमानं दूषयितुं कर्मजत्वसम्भवेन परिशेषं विघटयति श्लोकेन—मैवमित्यादिना । आकाशादिविभागस्याप्रत्यक्षतया कर्मणस्तज्जनकत्वमपि न प्रत्यक्षमतस्तत्र न प्रत्यक्षसिद्धा व्याप्तिरित्याह—व्याप्तेरित्यादि । रूपादौ सपक्षे साध्यमाकाशादिविभागानारम्भकत्वमस्ति, किन्तु तत्रोक्तहेतुर्नास्तीत्याह—अनध्यवसितत्वतः । आकाशप्रत्यक्षवादिभिर्वंशदलयोर्विभागस्याकाशवंशदलविभागस्य च हेतुहेतुमद्भावकल्पनां विनैव यौगपद्यप्रतीतिरभ्युपेयते इत्याह—यौगपद्येति । श्लोकार्थं स्फोरयति—न तावदिति । न चोक्तविभागद्वयस्यप्रतीतिर्विभ्रम इति कल्पयितुं शक्य इत्याह—न च शतपत्रेति । न चोक्तानुमानं पूर्वोक्तयौगपद्यप्रतीतेर्बाधकमिति वाच्यम्; तदनुमानस्य हेतोरनिश्चितत्वेन पराहतत्वात् । विवादाध्यासितपदेन परमाण्वादिनित्यद्रव्यं ग्राह्यम् । आत्मनि दृष्टान्ते विभागजन्यविभागविषयकं ज्ञानमस्ति, तत्र नित्यद्रव्यत्वमप्यस्ति, न तत्र दृष्टान्ते साध्यवैकल्यमिति मानमनोहरकारोक्तमनुमानं बाधकत्वेनोपस्थापयति पूर्ववादी—विवादाध्यासितमित्यादि । अत्रानुमाने वेदान्ती स्वरूपासिद्धिमुद्घाटयति—मैवमित्यादिना । साध्यवैकल्यमप्याह—आत्मन इति । हेतौ विशेषणासिद्धिमाह—किञ्चेति । नित्यपदं विहाय द्रव्यत्वस्य हेतुत्वे त्वदुक्तानुमाने विभुत्वोपाधिरस्ति । न च पक्षान्तःपातिदिगादिषु तस्य साधनव्यापकताऽप्यस्तीति वाच्यम्; पक्षीकृतपरमाण्वादिषु विभुत्वोपाध्यभावेन साधनाव्यापकत्वात् ।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

किञ्च कर्मणो द्रव्यारम्भकसंयोगविरोधिविभागजनकस्य नभोभागविभागजनक... द्रव्यारम्भकसंयोगजनकस्य तदजनकसंयोगजनकत्वमङ्गुल्याकाशसंयोगजनककर्मण ... न स्यात्, तथा च तन्तुद्वयसंयोगजनकात्कर्मणस्तन्त्वाकाशसंयोगो न स्यात्। नन्वङ्गुल्या-काशसंयोगाच्छरीराकाशसंयोगवत्तन्त्वयवाकाशसंयोगादेव तन्त्वाकाशसंयोगोपपत्तेर्नायं दो... इति चेत्, एवं तर्हि द्व्यणुकजनकसंयोगासमवायिकारणात्परमाणुकर्मणः परमाण्वाकाश-संयोगो न भवेत्, न हि तत्रावयवसंयोगात्परमाण्वाकाशसंयोगः, निरवयवत्वात्। अपि चैवं वंशदलावयवाकाशविभागादेव दलाकाशविभागोपपत्तेर्दलयोर्विभागस्याकाशविभागं प्रति हेतुता न स्यादिति दलयोर्विभागादाकाशविभागः स्वाभिमतो न सिद्ध्येत्, तस्मादसमवायिकारणापेक्षिणो वंशदलाकाशविभागस्य वंशदलक्रियैवासमवायि-कारणमिति न पारिशेष्याद्विभागस्य विभागजनकत्वसिद्धिः। न च कर्मैकहेतुक... विभागयोरुक्तवैलक्षण्यानुपपत्तिः; कर्मैकहेतुकयोः संयोगविभागयोरिव वैलक्षण्योपपत्तेः; तस्माद्विभागजविभागाभावात्तद्व्यावृत्त्यर्थं विभागाजन्यत्वविशेषणं कर्मलक्षणे व्यर्थम्; व्यञ्जकप्रमाणयोर्निरस्तत्वाच्च कर्मत्वजातेरभावे तद्योगित्वमपि लक्षणं परास्तम्।

सामान्यस्य दुर्लक्षत्वाच्च तद्विशिष्टानि लक्षणानि सर्वाण्यपि निरस्तानि वेदितव्यानि। तथाहि किमिदं सामान्यम्? किमनुवृत्तप्रत्ययकारणम्? उतानुवृत्तप्रत्ययप्रमाणकम्? अथवानुवृत्तत्वम्? आहोस्विन्नित्यत्वे सत्यनुवृत्तत्वम्? अथवा नित्यमेकमनेकसमवेतम्? तत्र-

अतिव्याप्त्या निराकुर्यादाद्यं पक्षचतुष्टयम्।
अनेकत्वानिरुक्तेश्च पक्षमन्त्यं प्रतिक्षिपेत्॥१०॥

आभासतुल्ययोगक्षेमतामाह—किंच कर्मण इति। विमतं कर्म, न द्रव्यानारम्भकसंयोगजन... द्रव्यारम्भकसंयोगजनकत्वात्, यन्नैवं तन्नैवं, यथाङ्गुल्याकाशसंयोगजनकं कर्मेत्यप्यनुमातुं शक्यमि... समुदायार्थः। न चेष्टापत्तिः। इष्टापत्त्यभ्युपगमे गूढाभिसन्धिमाह—तथा चेति। तथासति तन्तुद्व... संयोगजनककर्मणस्तन्त्वाकाशसंयोगो न स्यात्। गूढाभिसन्धिमज्ञात्वैव पुनराशङ्कते—नन्वङ्गुल्येति। यथा संयोगजसंयोगविशेषो देहाकाशसंयोगस्तद्देहावयवाङ्गुल्याकाशसंयोगादेव जायते, न तु कर्म... तथैव तन्त्ववयवसंयोगादेव तन्त्वाकाशसंयोगोऽपि जायेत, तथासति नैवमुक्तदोष इति। गूढाभिप्रा-मुद्घाटयति—एवं तर्हीति। निरवयवत्वेन परमाण्वाकाशसंयोगो न परमाण्ववयवसंयोगात्स्यादि-भावः। अनिष्टान्तरमप्याह—अपि चैवमिति। एवं च कर्मजन्यत्वसम्भवात्परिशेषासिद्धिमुपसंहरति—तस्मादिति। विपक्षे निरुक्तबाधकं तर्कं खण्डयति—न चेति। यथा कर्मैकहेतुत्वेऽपि संयोगविभाग... वैलक्षण्यं तथा निरुक्तविभागयोरपि वैलक्षण्यमुपपद्येत। प्रासङ्गिकविचारमत्रोपपादयति—तस्माद्विभागेति। न च कर्मत्वजातिमत्त्वं कर्मत्वमिति शिवादित्यमिश्रोक्तं कर्मलक्षणमिति ... युक्तं; कर्मत्वजातिसिद्धौ व्यञ्जकप्रमाणयोर्निरस्तत्वादित्याह—व्यञ्जकेति।

सामान्यस्य दुर्लक्ष्यत्वेन तदवान्तरकर्मत्वादिसामान्यानां दुर्लक्ष्यतरत्वेन तद्घटितलक्षणस्य दुर्ल... तमत्वेन सामान्यं निराकर्तुं प्रारभते—सामान्यस्येति। तत्रविकल्पपञ्चकमुद्भाव्य—तथाहीति।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नतावदाद्यः; सामग्र्यां तदेकदेशेषु चातिव्याप्तेः, तेषामपि तत्प्रत्ययकारणत्वात्। नापि द्वितीयः, अनुवृत्तप्रत्ययस्य स्वकारणानुमापकतया कारणस्यापि तत्प्रमाणकत्वादितिव्याप्तेः; न तृतीयः; अनुवृत्तत्वस्य संयोगादिष्वपि भानात्, नापि चतुर्थः; नित्येष्वनेककार्यवृत्तिषु परमाणुषु व्यभिचारात्। नापि पञ्चमः; विकल्पासहत्वात्। तथाहि—किमनेकत्वसंख्याविशिष्टेषु समवेतत्वमनेक समवेतत्वम्? उताश्रयप्रतियोगिकान्योऽन्याभाववत्समवेतत्वम्? आहोस्वित्स्वाश्रयप्रतियोगिकान्योऽन्याभाववत्समवेतत्वम्? न प्रथमः; गुणकर्मवृत्तिसामान्येष्वव्याप्तेः, अद्रव्यत्वेन गुणकर्मणोः संख्यानधिकरणत्वात्। नापि द्वितीयः, अन्त्यैर्विशेषैः परमाणुरूपैश्च व्यभिचारात्; तेषामपि यत्किंचिदाश्रयप्रतियोगिकान्योऽन्याभाववत्समवेतत्वात्। न तृतीयः; स्वशब्देन जातिविवक्षायामात्माश्रयत्वप्रसङ्गात्। नित्यत्वं च स्वप्रच्युत्यनुपलक्षितसत्तायोगित्वम्? प्रध्वंसप्रतियोगित्वानधिकरणत्वं वा? स्वप्रध्वंसप्रतियोगित्वानधिकरणत्वं वा? न प्रथमः; जातेर्जात्यनधिकरणत्वेन लक्षणस्यासम्भवित्वात्। न द्वितीयः; विकल्पासहत्वात्। किं तत्प्रतियोगित्वं यदनधिकरणत्वं नित्यतामभिदधासि? किं तन्निरूपकत्वम्? उत तेन सहानवस्थितत्वम्? नाद्यः; जातेर्ध्वंसोऽन्य इत्यत्र जातेरपि ध्वंसनिरूपकत्वात्। न द्वितीयः; सत्ताद्रव्यत्वपृथिवीत्वानां घटध्वंसेन सह पृथिव्यामनवस्थानात्। नापि तृतीयः; जातिप्रध्वंसस्यैवाप्रसिद्धतया तत्प्रति-

---

तत्राद्यपक्षचतुष्टयेऽतिव्याप्तिं दर्शयन् श्लोकस्य पूर्वार्द्धं व्याचष्टे—नतावदित्यादिना। अनुगतप्रतीतिकारणं सामान्यमितिप्रथमलक्षणं सामग्र्यां तदेकदेशधर्मादिष्वतिव्याप्तिः। द्वितीये यथाऽनुवृत्तप्रत्ययः स्वकारणत्वेन सामान्यमनुमापयति, तथा सामग्रीं तदेकदेशाञ्चेति तेष्वतिव्याप्तिः। तृतीयेऽनुवृत्तित्वं नामानेकवृत्तित्वं, तस्य संयोगविभागद्वित्वादिषु वर्तमानतया तत्रातिव्याप्तिः। नित्यत्वे सत्यनेकवृत्तित्वमिति चतुर्थलक्षणे नित्येष्वनेककार्यवृत्तिषु परमाणुषु समवाये चाप्यतिव्याप्तिः। पञ्चमलक्षणं दूषयितुमुत्तरार्द्धं विकल्प्य व्याचष्टे—तथाहीति। त्रिषु विकल्पेषु न प्रथमः, संख्यानधिकरणयोर्गुणकर्मणोरद्रव्यत्वेन गुणकर्मनिष्ठगुणत्वादिसामान्येष्वतिव्याप्तेः। आश्रयप्रतियोगिकभेदविशिष्टसमवेतत्वमिति नद्वितीयः, अन्त्यविशेषेषु परमणुरूपेषु चातिव्याप्तेः। विशेषादीनामपि गुणादिप्रतियोगिकभेदाश्रयेषु परमाणुषु समवेतत्वादित्यर्थः। स्वाश्रयप्रतियोगिकभेदविशिष्टसमवेतत्वमिति न तृतीयः, स्वशब्देन जातिरेव ग्राह्या, तथा च जातिलक्षणे जातिप्रवेशेनात्माश्रयत्वप्रसङ्गात्। एवमनेकसमवेतत्वानिरुक्त्या सामान्यलक्षणं प्रदूष्य नित्यत्वानिरुक्त्यापि तद्दूषयति—नित्यत्वं चेति। इदं च दूषणं सूत्रस्थचशब्देन सूचितम्। स्वविनाशानुपलक्षितसत्तायोगित्वं न नित्यत्वमित्याह—न प्रथमः। प्रध्वंसप्रतियोगित्वानधिकरणत्वमपि न नित्यत्वं; विकल्पासहत्वादित्याह—न द्वितीयः। प्रतियोगित्वं ध्वंसनिरूपकत्वं चेर्त्तार्ह जातेरन्योध्वंस इति प्रयोगे जातेरपि ध्वंसनिरूपकत्वादसम्भवापत्तिः। ध्वंसेन सहानवस्थितत्वं तत्प्रतियोगित्वं चेर्त्तार्ह द्वितीयविकल्पेऽप्यसम्भवापत्तिर्दुर्वारा। यद्यपि कपाले घटध्वंसेन सह सत्तादीनां सामानाधिकरण्यमस्ति, तथापि तन्त्वादिरूपपृथिव्यादौ सामानाधिकरण्यादसमानाधिकरणत्वानधिकरणत्वमिति वक्तव्यम्, तथा चासम्भवापत्तिस्तदवस्थैव। स्वं=जातिः, स्वध्वंसप्रतियोगित्वानधिकरणत्वं नित्यत्वमित्यपि न सम्भवति, जातिध्वंसस्यैवासिद्धतया तत्प्रति-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

योगित्वस्याप्रसिद्धेः। ननु ब्रह्मणि तवापि नित्यत्वं सिद्धं तत्किं जातावपलपसि? मैवम्; ब्रह्मणो निर्धर्मकतया नित्यत्वधर्मानधिकरणत्वात्। कथं तर्हि तद्व्यपदेश इति चेत्; विनाशस्य दुर्निरूपत्वादिति ब्रूमः। ननु घटादेरपि विनाशो दुर्निरूपः, सत्यम्; स्वरूपेण परमार्थस्य तदनिरूपणे नित्यत्वव्यपदेशात्, घटादेश्चातथात्वात्। त्वं पुनः सामान्यादीनां त्रयाणां स्वात्मसत्त्वं बुद्धिलक्षणत्वमित्यादिभाष्यदर्शनान्नित्यत्वं साधर्म्य-मिच्छसि।

अस्तु तर्हि मनस्त्वात्मत्वातिरिक्तनित्यमात्रसमवेतान्यत्वे सति समवेतं सत्तानाश्रयः सामान्यमिति। सामान्यलक्षणमिति चेत्, न; यतः—

जातेरव्याप्यसिद्धेश्च सत्तादेरप्यसिद्धितः।
तदनाश्रयतान्यत्वलक्षणेऽन्योऽन्यसंश्रयः ॥११॥

जातिमात्रलक्षणसिद्धौ सत्तात्मत्वमनस्त्वसिद्धिस्तत्सिद्धौ चात्मत्वमनस्त्वातिरिक्तेति सत्तानाश्रय इति लक्षणविशेषणसिद्धिरिति परस्पराश्रयता। तथाहि- घटवृत्तिवृत्तित्वे सत्यात्मवृत्तिर्जातिः सत्तेति परैरभ्युपेयते, न धर्ममात्रं भावमात्रं वा। धर्ममात्रत्वे घटवृत्तिरूपादेरात्मनश्चान्योन्याभावेऽतिव्याप्तेः। भावमात्रत्वे वाऽपरजातिमत्त्वलक्षणे धर्मे गुणकर्मणोरात्मनि च वर्तमानेऽतिव्याप्तेस्तादवस्थ्यात्, अतः परिशेषादेवंविशेषिता जातिः सत्ते-

योगित्वासिद्धेः। निर्धमकब्रह्मणि नास्माकं नित्यत्वधर्मोऽभिमतः, तस्य विनाशस्य दुर्निरूपत्वान्नित्यत्वव्यपदेशः। न चैवं घटादावपि विनाशो निरूपयितुमशक्य इति वाच्यं; यद्रूपेण परमार्थस्य विनाशो दुर्निरूप्यं, न तद्रूपेण घटादौ नित्यत्वं साधयितुं शक्यमित्यदोषात्। त्वया तु सामान्यादीनां त्रयाणां स्वात्मसत्त्वं बुद्धिलक्षणत्वमकार्यत्वमसामान्यविशेषवत्त्वं नित्यत्वमर्थशब्दानभिधेयत्वं चेति प्रशस्तपादभाष्यानुमतमभ्युपेयते। एतेन नित्यत्वे सत्यनेकसमवेतमिति मानमनोहरीयलक्षणमपि निरस्तम्।

शिवादित्यमिश्रोक्तमात्मत्वमनस्त्वातिरिक्तं यन्नित्यमात्रसमवेतं, तदन्यत्वे सति समवेतमिति सामान्यलक्षणं दर्शयति—अस्तु तर्हीति। अभावसमवाययोरतिव्याप्तिवारणाय समवेतमित्युक्तं। सत्तानाश्रयः समवेतमित्युक्तेऽन्त्यविशेषेष्वतिव्याप्तिस्तद्वारणाय नित्यमात्रसमवेतान्यत्वे सतीति दलम्। नित्यमात्रसमवेतमितिदलमात्मत्वमनस्त्वयोरतिव्याप्तं तद्वारणायात्मत्वमनस्त्वातिरिक्तेति विशेषणम्। सामान्यलक्षणेऽन्योऽन्याश्रयदोषं दर्शयितुं हेतून् संकलयति—जातेरित्यादि। अन्योन्याश्रयं विशदयितुमुपक्रमते—जातिमात्रेति। जातिसामान्यसिद्धे सति जातिविशेषसत्तारूपात्मत्वमनस्त्वादीनां सिद्धिः, सत्तादिसिद्धे सति तदतिरिक्तत्वसत्तानाश्रयत्वविशेषणस्य सिद्धिरिति परस्पराश्रयतेतिभावः। सत्तां लक्षयति—तथाहीति। घटादिद्रव्ये गुणादयो वर्तन्ते, तत्र गुणत्वादीनां वृत्तित्वे सत्यात्मवृत्तिर्जातिः सत्तेति तार्किकैरभ्युपेयते। जातेर्धर्ममात्रत्वाभ्युपगमे घटवृत्तिरूपादेरात्मनश्चान्योऽन्याभावेऽतिव्याप्तिः। अर्थात् घटवृत्तिवृत्तित्वे सत्यात्मवृत्तिर्धर्मः सत्तेतिसत्तालक्षणाङ्गीकारे घटवृत्तिगुणादेरात्मनश्चान्योऽभावेऽतिव्याप्तिरितिभावः। भावमात्रस्य सत्तात्वे गुणकर्मणोरात्मनि चापरजातिमत्त्वलक्षणे वर्तमाने धर्मेऽतिव्याप्तिश्च तदवस्था। अतः परिशेषतो घटवृत्तिवृत्तित्वे सत्यात्मवृत्तिर्जातिःसत्तेत्येवाभ्युपेया। तथा चान्योऽन्याश्रयत्वं दुर्वारम्। एवमात्मत्वमनस्त्वलक्षणे

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वाच्यम्, तथासति कथं नान्योन्याश्रयता ? तथात्मत्वमनस्त्वलक्षणे च ? तथा हि––घटावृत्तित्वे सत्यात्मनिष्ठात्यन्ताभावाप्रतियोगिनी जातिरात्मत्वम्, एवमाकाशावृत्तित्वे सति मनोनिष्ठात्यन्ताभावाप्रतियोगिनी जातिर्मनस्त्वम्, नतु धर्ममात्रं भावमात्रं वा। तदुभयनिष्ठान्योऽन्याभावे बहुत्वसङ्ख्यायां च व्यभिचारात्, तथा च तदतिरिक्तत्वलक्षणे कथं न प्राचीनदोषानुषङ्गः ? कथं च सत्सदित्यबाधितप्रत्यये सति सत्ताया गोत्वादावभावः ? न चैकार्थसमवायात्सदिति प्रत्ययः; गुणकर्मणोरपि तथोपपत्तौ सत्ताऽभावप्रसङ्गात् । सत्तासमवाययोः सदिति व्यवहाराभावप्रसङ्गाच्च। विवादाध्यासितं सत्तारहितमपरजातिरहितत्वात्; सत्तावदिति बाधकमिति चेत्, मैवम्; सद्गोत्वं सदश्वत्वमित्यादिप्रत्यक्षविरोधे कालात्ययापदिष्टत्वात्, अन्यथा गुणकर्मणी सत्तारहिते अद्रव्यत्वात्सत्तावदित्यपि स्यात् । अथ तत्रानुभवविरोधः, स न प्रकृतेऽपि दण्डवारितः । तस्मादसम्भवित्वात्सत्तानाश्रय इत्यलक्षणमेतत् ।

विशेषलक्षणमपि दुर्निरूपम् । तथाहि––'नित्येष्वेव द्रव्येष्वेव वर्तन्त एव ये ते विशेषाः' इति न लक्षणम्, यतः––

नित्यद्रव्यैकवृत्तित्वमयोगपरिहारतः ।
न लक्षणमतिव्याप्तेस्तवात्मत्वमनस्त्वयोः ॥१२॥

आत्मत्वं मनस्त्वं च नित्यद्रव्येष्वेव वर्तत एवेति तयोरतिव्याप्तिः । ननु कालाकाशादिषु नित्यान्तरेष्वसत्वान्न तत्सर्वत्र नित्येषु वर्तते विशेषास्तु नैवम्, वर्तन्त एवेति नियमादिति चेत्, न; प्रतिविशेषमव्याप्तेः,सर्वेषां विशेषाणां सर्वत्राभावात् । यज्जातीयमेवं स विशेष इति लक्षणार्थं इति चेत्, न; विशेषत्वजातेरनङ्गीकरणात् । उपाधेर्विवक्षितत्वाददोष

न्योऽन्याश्रयतां योजयति—तथाहि घटेत्यादिना। सत् सदित्यनुगताबाधितप्रत्ययेन सत्तासामान्याभ्युपगमे गोत्वं सद्, द्रव्यत्वं सदित्यनुगताबाधितप्रतीत्या गोत्वादावपि सत्ताभ्युपगमप्रसक्ति.। न च सत्तया सहैकस्मिन्नर्थे गवादौ समवायात् सदिति प्रतीतिरिति वाच्यम्; गुणकर्मणोरपि तथोपपत्तौ सत्ताभावप्रसङ्गात्। सत्तासमवाययोः सदिति व्यवहाराभावप्रसङ्गाच्च। तयोरपि सदिति प्रत्ययस्यैकार्थसमवायादेव सम्भवादित्यर्थः। पूर्वोक्तस्थलेऽनुमानेनातिव्याप्तिं बाधितुं शङ्कते—विवादेति। विवादाध्यासितम्। गोत्वमितिपक्षः। नहि पक्षेऽत्रान्या कापि जातिरस्ति। नाप्यत्र स्वरूपासिद्धिरिति। एतदनुमानं बाधदोषेण दूषयति—मैवमित्यादिना। अन्यथाऽद्रव्यत्वहेतुना गुणकर्मणोरपि सत्ताऽभावस्यानुमातुं शक्यत्वात्। अनुभवविरोधस्तु प्रकृतेऽपि न दण्डवारितः। शिवादित्यमिश्रलक्षणमुपसंहरति—तस्मादिति

कन्दलीकारोक्तं विशेषलक्षणमनूद्य श्लोकेन दूषयति—नित्यद्रव्यवृत्तित्वमित्यादिना। अयोगपरिहारतः=वर्तते एवेत्यर्थः। अस्य विशेषलक्षणस्यात्मत्वमनस्त्वयोरपि सत्त्वेनातिव्याप्तिः। श्लोकोक्तं दोषं विशदयति - आत्मत्वमिति। ननु नित्यान्तरेषु कालदिगादिषु मनस्त्वादेरसत्त्वेन सर्वत्र न नित्येषु तदस्ति, विशेषास्तु सर्वनित्यद्रव्येषु सन्त्येवेति न पूर्वोक्तरीत्याऽतिव्याप्तिरिति चेन्न, प्रत्येकं विशेषेष्वव्याप्तेः। नहि सर्वेषां विशेषाणां सर्वत्र विद्यमानताऽस्ति, येन विशेषेषु निरुक्तं विशेषलक्षणं

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इति चेत्, न; तदुपाधिसिद्धौ तदुपजीविनो लक्षणस्य वैयर्थ्यापातात्, असिद्धौ च लक्षणस्य दुरवधारणत्वात् ।

एकद्रव्याः स्वभावसन्तो विशेषा इत्यपि न लक्षणम्; एकद्रव्यत्वस्य दुर्निरूपत्वात् । तथाहि—किमिदमेकद्रव्यत्वम्? किमेकत्वसंख्याविशिष्टद्रव्यसमवेतत्वम्? उताद्विष्ठत्वम्? नाद्यः, द्रव्यनिष्ठसामान्येष्वतिव्याप्तेः; तान्यपि ह्येकत्वसंख्याविशिष्टद्रव्यसमवेतानि स्वभावसन्ति च, सत्तासामान्यरहितत्वात् । नापि द्वितीयः; विकल्पासहत्वात् । तदपि क्वचिद्वृत्तित्वे सत्यन्यावृत्तित्वम्? उताश्रयप्रतियोगिकान्योन्याभाववदवृत्तित्वम्? न प्रथमः; प्राचीनदोषानुषङ्गात्; सामान्यान्यपि हि किञ्चिन्निष्ठत्वे सति तदन्यावृत्तीनि, सर्वत्रावृत्तेः । अत एव न द्वितीयः; सर्वावृत्तित्वेनाश्रयप्रतियोगिकान्योन्याभाववदवृत्तित्वस्यापि सामान्येषु भावात् । स्वाश्रयप्रतियोगिकान्योऽन्याभाववद्वृत्तित्वानधिकरणत्वं विवक्षितमिति चेत्; न, स्वशब्देन विशेषविवक्षायामात्माश्रयप्रसङ्गात् । एतदात्मवृत्तित्वे सत्येतदन्यनित्यद्रव्यावृत्तिरेतद्विशेष इति प्रतिव्यक्तिलक्षणं विवक्षितमिति चेत्, न; अन्योन्याश्रयत्वात् । नित्यद्रव्याणां भेदाधिगतिहेतवो विशेषाः परैरभ्युपगम्यन्ते । ततश्च विशेषसिद्धौ नित्यद्रव्याणां भेदाधिगतिस्तत्सिद्धौ च विशेषाधिगतिरिति कथं नान्योन्याश्रयः? अन्यत एव चेद्भेदाधिगमस्तदा विशेषाधिगमो व्यर्थः स्यात् ।

संघटयितुं शक्यम् । विशेषवृत्तिविशेषत्वजातेरनङ्गीकारेण यज्जातिविशिष्टपदार्थो नित्यद्रव्येषु वर्तते तज्जातिविशिष्टः पदार्थो विशेष इत्यपि वक्तुमशक्यम् । न च माभूद्विशेषत्वजातिः, विशेषत्वमुपाधिमादाय विशेषेषु पूर्वोक्तामव्याप्तिं वारयितुं शक्नुम इति वाच्यम्; विशेषत्वोपाधिनैव विशेषत्वं विशेषाणां लक्षणं सम्भवतीति विशेषत्वोपाधिघटितोक्तलक्षणाभिधानस्य वैयर्थ्यापत्तेः ।

श्रीवल्लभोदयनयोर्विशेषलक्षणमनूद्य दूषयति—एकद्रव्या इत्यादि । एकद्रव्यमात्राश्रितत्वे सति सत्ताशून्यत्वे च सति पदार्थत्वं विशेषलक्षणमित्यपि वक्तुं न युक्तम्; एकद्रव्यत्वस्य निरूपयितुमशक्यत्वात् । तत्र विकल्पमाह—तथाहीति । तयोर्नाद्यः, एकत्वसंख्याविशिष्टद्रव्यसमवेतेषु द्रव्यत्वादिसामान्येष्वतिव्याप्तेः । नापि द्वितीयः, विकल्पासहत्वेनाद्विष्ठत्वस्य निरूपयितुमशक्यत्वात् । तत्र हि क्वचिद्वृत्तित्वे सत्यन्यावृत्तित्वमद्विष्ठत्वमित्युक्तौ पूर्वोक्तदोषप्रसक्तिः । अनुगतसामान्यपि हि तथा, न तेषां सामान्यानां सर्वत्र वृत्तित्वमस्ति । नाप्याश्रयप्रतियोगिकान्योऽन्याभाववदवृत्तित्वमद्विष्ठत्वम्; पूर्वोक्तरीत्या सामान्येषु विशेषलक्षणस्यातिव्याप्तेः । तेषामपि हि द्रव्यादिषु वृत्तित्वे सति सामान्यादिष्ववर्तमानत्वेन पूर्वोक्ताद्विष्ठत्वातिप्रसक्तिस्तुल्यैव । न च स्वाश्रयप्रतियोगिकान्योन्याभाववद्वृत्तित्वानधिकरणत्वविवक्षायां नोक्तस्थलेष्वतिव्याप्तिरितिवाच्यं; स्वशब्देन विशेषस्य विवक्षितत्वे आत्माश्रयत्वप्रसक्तेः, प्रतिविशेषव्यक्तेर्लक्षणत्वेऽन्योन्याश्रयप्रसक्तेश्च । अन्योऽन्याश्रयं विशदयति—नित्येति । नित्यद्रव्यभेदबोधहेतवो विशेषा इति परैर्विशेषलक्षणमभ्युपेयते । विशेषसिद्धौ नित्यद्रव्यभेदसिद्धिस्तत्सिद्धौ विशेषाधिगतिरित्यन्योऽन्याश्रय इतिभाव । यदि नित्यद्रव्याणां भेदाधिगमः केनचिदन्येन स्यात्तर्हि विशेषाधिगमो व्यर्थः स्यादिति ।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आत्मत्वमनस्त्वातिरिक्तत्वे सति नित्यमात्रसमवेतः सत्तारहितो विशेष इत्यपि न लक्षणम्; परममहत्त्वसामान्येऽतिव्याप्तेः। अस्ति हीदं परममहदिदं परममहदित्यनुवृत्तप्रत्ययबोध्या परममहत्परिमाणेषु परममहत्त्वं जातिः। न च तत्र व्यञ्जकाभावः, नित्यमहत्परिमाणस्यैव तद्व्यञ्जकत्वात्। तर्हि तेनैव परममहद्व्यवहारोपपत्तौ व्यर्था जातिकल्पनेति न च वाच्यम्; व्यञ्जकमादाय जातिनिरासे गोत्वादेरपि प्रत्याख्यानप्रसङ्गात्। न चैवं परमाणुत्वजातेरभ्युपगमप्रसङ्गः; तत्र पृथिवीत्वादिना परापरभावस्यानिरूपणात्। यदि पृथिवीत्वं परम्, तर्हि परमाणुत्वस्य पृथिवीत्वाव्यभिचारात्सलिलादिपरमाणुषु परमाणुत्वं न स्यात्। अथापरम्, तर्हि परमाणुत्वस्य परत्वे पृथिवीत्वं परमाणुत्वं न व्यभिचरेदिति सर्वा पृथिवी परमाणुरेव स्यात्, तेन न परमाणुत्वं जातिः; न चैवमत्र बाधकमस्तीति परममहत्त्वजातौ भवेदेवातिव्याप्तिः। नित्यमात्रसमवेतत्वं च किञ्चिन्नित्यसमवेतत्वम्? सर्वनित्यसमवेतत्वं वा? उभयथापि लक्षणस्याव्याप्तिः। सर्वेषां विशेषाणां एकनिष्ठत्वाभावाच्च।

किं चात्र प्रमाणम्? "समानजातिगुणकर्मकार्याः परमाणवोऽन्योन्यव्यावर्तकधर्मसमवायिनः, द्रव्यत्वात्, गवादिवत्।" तथा "सत्तासामान्यसमवायातिरिक्तभावासंसर्गिणी,

---

शिवादित्यमिश्रोक्तं विशेषलक्षणमुद्भाव्य दूषयति—आत्मत्वेत्यादि। सत्तारहितो विशेष इत्युक्ते समवायाभावयोरतिव्याप्तिस्तद्वारणाय समवेत इति। सामान्ये वारणाय नित्यमात्रेति। आत्मत्वमनस्त्वयोरतिव्याप्तिवारणाय सत्यन्तदलमिति। इदं परममहदिदं परममहदित्यनुगतप्रतीत्या परममहत्परिमाणेषु परममहत्त्वं जातिस्तत्रोक्तस्य विशेषलक्षणस्यातिव्याप्तिः। परममहत्त्वजात्यभिव्यञ्जकं नित्यपरममहत्परिमाणम्। नच परममहत्त्वजात्यभिव्यञ्जकत्वेन नित्यपरममहत्परिमाणस्याभ्युपगमे तेनैव परममहद्व्यवहारसिद्धौ तत्र व्यर्था परममहत्त्वजातिकल्पनेति वाच्यं; व्यञ्जकमादाय कस्याश्चिज्जातेर्निराकर्त्तुमयुक्तत्वात्। अन्यथा गोत्वादेरपि प्रत्याख्यानप्रसङ्गात्। पृथिवीत्वादिना परापरभावस्य निरूपयितुमशक्यत्वेन न परमाणुत्वजात्यभ्युपगमप्रसङ्गः। तमेव संगमयति—यदीति। तथाहि पृथिवीत्वं परं परमाणुत्वं चापरमित्यभ्युपगम्यमाने यत्र जलादिपरमाणुषु पृथिवीत्वं नास्ति, तत्र व्यापकाभावेन परमाणुत्वाभावप्रसङ्गः। अथ पृथिवीत्वमपरं परमाणुत्वं च परं, तर्हि पृथिवीत्वस्य स्वव्यापकपरमाणुत्वाव्यभिचारात्सर्वा पृथिवीपरमाणुरेव स्यात्। तस्मात्परमाणुत्वजातिरभ्युपगन्तुमशक्या, किन्तु परममहत्त्वजातिस्वीकारे न किञ्चिद्बाधकमस्ति। अतस्तत्रातिव्याप्तिप्रसक्तिर्दुर्वारा। एवं विशेषलक्षणे समुदायदोषमभिधायावयवानिरूपणादपि विशेषलक्षणमसम्भवमित्याह—नित्यमात्रेत्यादिना। नित्यमात्रसमवेतत्वं यद्येकनित्यवृत्तित्वं चेत्तर्हि सर्वविशेषाणामेकनित्यद्रव्यवृत्त्यभावेन सर्वविशेषेष्वव्याप्तिः। सर्वनित्यवृत्तित्वं नित्यमात्रसमवेतत्वेन विवक्षितं चेत्तर्हि एकैकविशेषस्य सर्वनित्यद्रव्यावृत्तेरसम्भवापत्तिरितिभावः।

अथविशेष प्रमाणाभावमुपपादयति—किंचात्रेति। तत्रादौ लीलावतीकारोक्तमनुमानद्वयं शङ्कते—समानेत्यादि। द्वन्द्वादौ श्रूयमाणं पदं प्रत्येकमभिसम्बद्ध्यते, तेन समानजातिमन्तः, समानगुणवन्तः, समानकर्मवन्तः, समानकार्यवन्तश्च परमाणवः पक्षान्तर्भूताः। तत्र व्यावर्तका विशेषा एव। दृष्टान्ते गवि सन्ति खलु व्यावर्तकास्तदवयवाः, पक्षे परमाणुषु तदभावाद्विशेषा एव व्यावर्तका

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

जातित्वाद्, गोत्ववत्" इति लीलावतीकारोन्नीतमनुमानं प्रमाणमिति चेत्, मैवम्, आद्यप्रयोगे पृथक्त्वेन सिद्धसाधनत्वात्। नच वाच्यम्—"पृथक्त्वस्य पृथक्त्वान्तरसदृश्यत्वान्न ततो व्यावृत्तत्वबुद्धिसिद्धिः; या हि यतो व्यावृत्तिबुद्धिः, सा न तत्सदृशधर्मकार्या, यथाश्वात्कुञ्जरस्य, तदणोरपि नाण्वन्तराद्व्यावृत्तबुद्धिः सदृशधर्मकार्या" इति अयं विशेषोऽयं च विशेषः, इति विशेषेष्वपि सदृशबुद्धेः स्वीकारात्। द्वितीयोऽपि प्रयोगः—

आश्रयासिद्धिदुष्टत्वादप्रसिद्धविशेषणात्।
प्रमाणतामश्नुवीत न प्राभाकरभाट्टयोः ॥१३॥

सत्ताजातेरनङ्गीकारात्प्राभाकरं प्रत्याश्रयासिद्धिरुदिता। एवं समवायस्य चानङ्गीकाराद्भाट्टं प्रति समवायातिरिक्तभावासंसर्गिणीत्यप्रसिद्धविशेषणः पक्षः। विशेषाख्यभावानभ्युपगमेऽपि तदसंसर्गित्वसिद्धेरर्थान्तरता च। किञ्च सामान्यसमवायातिरिक्तभावशब्देन द्रव्यगुणकर्माण्यभिधीयन्ते? किं वा विशेषाः? भावमात्रं वा? नाद्यः; अपसिद्धान्तापातात्, सत्ताया द्रव्यगुणकर्मसुवृत्तेः स्वयमङ्गीकृतत्वात्। न द्वितीयः; विशेषाणामद्याप्यसिद्धेरप्रसिद्धविशेषणत्वात्। नापि तृतीयः, विकल्पासहत्वात्। असंसर्गित्वपदेन किं संसर्गितामात्रं विवक्षितम्? उत संसर्गित्वात्यन्ताभावाधिकरणत्वम्? नाद्यः; सिद्धसाधनत्वात्, अतीतानागतव्यक्तिभिः सत्ताया अप्यसंसर्गित्वस्वीकारात्। नापि द्वितीयः; दृष्टान्तस्य साध्यविकलत्वात्, गोत्वस्यापि किञ्चिद्भावसंसर्गित्वेन तदत्यन्ताभावाधिकरणत्वाभावात्।

नान्य इति भावः। द्वितीयप्रयोगे—सामान्यसमवायाभ्यां भिन्ना भावेष्वसमवायिनीति यत् साध्यशरीरविवरणं स भावपदार्थो विशेषः। षट्सु भावपदार्थेषु मध्ये द्रव्यादिषु त्रिषु सत्ता, शेषेषु सामान्यसमवायातिरिक्तभावपदार्थो विशेष इति भावः। यस्माद्भावात्सत्ता व्यावर्तते, सोऽन्त्यो विशेषः। उभयत्र दोषमुद्भाव्य दूषयति—मैवमिति। आद्ये पृथक्त्वमादाय सिद्धसाधनता। नित्यद्रव्यव्यावर्तकं पृथक्त्वमपि भवितुमर्हति, कृतं निरुक्तरीत्या विशेषपदार्थस्वीकारेण। न च पृथक्त्वं व्यावृत्तिबुद्धिजनकं पृथक्त्वस्य पृथक्त्वान्तरसदृशत्वादित्याह—न च वाच्यमिति। तथा सति विशेषेष्वपि सदृशबुद्धेरभ्युपगमेन तत्रापि व्यावर्तकत्वाभावप्रसङ्ग इत्याह—अयं विशेष इति। द्वितीयप्रयोगे विशेषसाधकानुमाने दूषणानि श्लोकेन संकलयति—आश्रयेत्यादि। प्राभाकरमतेनाश्रयासिद्धिर्भाट्टमतेनाप्रसिद्धविशेषणता च दोषोऽस्ति। भाट्टमते समवायानभ्युपगमेन समवायघटितलक्षणं विशेषस्य निर्धारयितुमशक्यम्। उभयसाधारणमर्थान्तरमाह—विशेषाख्येति। द्वित्र्यसंसर्गिता सत्तायाः। तथा वस्तुनोऽसंसर्गितया वस्त्वभावेन चेति। प्रकृते भाववस्तुविशेषस्याभावादप्यसंसर्गित्वसिद्धेरर्थान्तरतेत्यर्थः। प्रकारान्तरेणाप्रसिद्धविशेषणतामाह—किंच सामान्येति। त्रिषु विकल्पेषु नाद्यः, अपसिद्धान्तापातात्। अपसिद्धान्तापत्तिं स्फुटयति—सत्ताया इति। द्वितीयेऽप्रसिद्धविशेषणतां प्रदर्श्य तृतीयं दूषयति—नापि तृतीयः। तत्र विकल्प्य दूषयति—असंसर्गित्वपदेनेत्यादिना। प्रथमे सिद्धसाधनतां स्फुटयति—अतीतेत्यादि। द्वितीये साध्यवैकल्यं दर्शयति—गोत्वस्यापीति। गोत्वस्यापि यत्किञ्चिद्गोरूपभावसंसर्गित्वेन तत्रात्यन्ताभावाधिकरणत्वाभावाद् दृष्टान्ते साध्यवैकल्यम्

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आकाशं गुणसामान्यव्यतिरिक्तसमवायि, द्रव्यत्वाद्धटवदिति मानमनोहरकारोक्तमनुमानान्तरमस्तीति चेत्, मैवम्; प्राभाकरं प्रति शक्त्या सिद्धसाधनत्वात्; तेन शक्तेर्गुणसामान्यव्यतिरिक्ताया वियदाश्रयताश्रयणात्। समवायमनभ्युपगच्छतोर्भाट्टवेदान्तिनोरप्रसिद्धविशेषणत्वात्, वेगवत्त्वोपाध्युपहतत्वाच्च। तस्मान्न विशेषलक्षणमपि साधु।

नापि समवायलक्षणम्। तथाहि—"अयुतसिद्धानामाधार्याधारभूतानामिह प्रत्ययहेतुर्यः सम्बन्धः स समवायः" इति समवायलक्षणपरं परेषां भाष्यम्। अस्य चायमर्थः—युतसिद्धिरुभयोरपि सम्बन्धिनोः परस्परपरिहारेण पृथगाश्रयाश्रयित्वम्, सा ययोर्नास्ति तावयुतसिद्धौ; तयोः सम्बन्धः समवायः, यथा तन्तुपटयोः। तत्र यद्यपि तन्तवः स्वारम्भकावयवाश्रितास्तथापि पटस्य तन्त्वाश्रितत्वान्न द्वयोः परस्परपरिहारेण पृथगाश्रयाश्रयित्वम्। तेनानित्यानां द्वयोः पृथगाश्रयाश्रयित्वं युतसिद्धिः, अयुतसिद्धिस्तु तद्विपरीता। नित्यानां तु पृथग्गमनयोगित्वं युतसिद्धिस्तद्विपरीतायुतसिद्धिः, यथाकाशद्रव्यत्वयोः। तत्रायुतसिद्धयोः सम्बन्ध इत्येतावति लक्षणे सुखस्य धर्मस्य च कार्यकारणभावसम्बन्धोऽपि समवायः स्यात्। आत्मैकाश्रिततया तयोरयुतसिद्धत्वात्तदर्थमाधार्याधारभूतानामिति पदम्। एवमप्याकाशस्याकाशपदस्य च वाच्यवाचकसम्बन्धः समवायः स्यात्तन्निवृत्त्यर्थमिह प्रत्ययहेतुरिति पदम्। नहि तस्मात्सम्बन्धादिहेदमिति बुद्धिर्जायते, केवलाकाशस्यैव प्रतीतेः। आधार्याधारभूतानामिह प्रत्ययहेतुरित्येतावति लक्षणे कुण्डबदरसम्बन्धेऽतिव्याप्तिस्तन्निवृत्त्यर्थम-

मिति भावः। मानमनोहरकारीयमनुमानमाह—आकाशमित्यादि। अत्र प्रयोगे—दृष्टान्ते घटे कर्मणा साध्यप्रसिद्धिः, पक्षे च कर्माभावाद्विशेषसिद्धिः। मानमनोहरीयमनुमानं दूषयति—मैवमिति। गुणसामान्याभ्यां व्यतिरिक्तस्यैव समवायित्वमिति साध्येन विवक्षितोऽर्थः, तथा च प्राभाकरेण गुणसामान्याभ्यां व्यतिरिक्तायाः शक्तेर्वियदाश्रयताभ्युपगमेन सिद्धसाधनत्वात्। भाट्टवेदान्तिनोर्मतेऽप्रसिद्धविशेषणतामाह—समवायमिति। व्याप्यत्वासिद्धिमप्याह—वेगवत्वेति। अतो लक्षणप्रमाणयोरभावेन न विशेषलक्षणं साध्विति।

समवायस्य दुर्निरूप्यत्वेन दुर्लक्ष्यत्वमित्याह—नापीति। तत्रादौ प्रशस्तपादोक्तं समवायलक्षणं दूषयितुमनुवदति—तथाहीति। उभयोः परस्परं परित्यज्य (परिहारेण) पृथगाश्रयाश्रितत्वं युतसिद्धत्वं तदिह नास्ति, परस्य स्वसम्बन्धितन्तुव्यतिरिक्तानाश्रितत्वात्। स्यात्तावदनित्यानामवयवावयविनोः पृथगाश्रयाश्रितत्वं युतसिद्धत्वं तद्विपरीतयोरयुतसिद्धत्वं, नित्यानां तु पृथग्गमनयोगित्वं युतसिद्धत्वं तद्विपरीताऽयुतसिद्धिः। यथाऽऽकाशद्रव्यत्वयोरयुतसिद्धसम्बन्धः समवायः। नहि तत्रान्यतरत्वस्यापि पृथग्गतिमत्त्वमस्ति। यद्यप्यात्मात्मैकाश्रिततया सुखधर्मयोः कार्यकारणभावसम्बन्धेन समवायत्वं प्रतिभाति, तथापि सुखधर्मयोराधाराधेयभावो नास्ति, तेन न तयोः सम्बधः समवायः। एतद्व्यवच्छेदायाधाराधेयभूतानामितिपदम्। एवमाकाशस्याकाशपदस्य च समवायत्ववारणायेह प्रत्ययहेतुरिति दलम्। कुण्डबदरसम्बन्धे समवायलक्षणस्यातिव्याप्तिवारणायायुतसिद्धानामिति पदम्। इत्थं समस्तभाष्यं समवायलक्षणपरमेवेति कन्दलीकारश्रीधराचार्याभिमतम्। विशेषणविशेष्यभावसम्बन्धे व्यभिचारदर्शनात्समवायलक्षणं श्लोकेन

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust Funding: IKS-MoE-Grant-2

युतसिद्धानामिति पदम् । तेन समस्तमेवेदं समवायलक्षणम्, इति कन्दलीकारः, तदसत्—

न स्यादयुतसिद्धयादि समवायस्य लक्षणम् ।
विशेषणविशेष्यत्वसम्बधे व्यभिचारतः ।।१४।।

इह भूतले घटाभाव इति विशेषणविशेष्यभावलक्षणेऽपि सम्बन्धे लक्षणस्यातिव्याप्तिः । अस्ति हि तत्रायुतसिद्धिर्भूतलघटाभावयोः, भूतलस्य स्वावयवाश्रितत्वेऽप्यभावस्य भूतलातिरिक्ताश्रयाभावात् । अस्ति चाधार्याधारभाव इह प्रत्ययश्च । अथ भावयोरीदृशः सम्बन्धः समवायः, तथापीह पटे रूपसमवायो रूपसमवायवान्पट इति विशेषणविशेष्यभावे लक्षणस्यातिव्याप्तिः, उक्तलक्षणस्य तत्रापि सम्भवात् । अथ गुणगुणिनोः क्रियाकारकयोरवयवावयविनोर्जातिजातिमतोर्विशेषतद्वतोश्च यः सम्बन्ध उक्तरूपः समवाय इति चेत्, न; तेषामेवान्योन्यविशेषणविशेष्यभावेऽतिव्याप्तेः । तत्र समवायस्यैवेहप्रत्ययहेतुत्वं नेतरस्येति चेत्, न; एवमपीहाकाशे शब्द इत्यत्रेह शब्दस्याकाशस्य च वाच्यवाचकसम्बन्धे इह प्रत्ययहेतावतिव्याप्तेस्तादवस्थ्यात् । तत्र हि गुणगुणिनोराधार्याधारभूतयोरयुतसिद्धयोरिह प्रत्ययहेतुरिहेतिशब्दाकाशयोरस्ति वाच्यवाचकलक्षणः सम्बन्धः । किञ्चाधार्याधारभूतानामिति व्यर्थं विशेषणम् । अयुतसिद्धयोरिहप्रत्ययहेतुः सम्बन्ध इत्येतावत्यपि लक्षणे भवतामव्याप्त्यतिव्याप्त्यभावात्, अनाधार्याधारभूतयोरिह प्रत्ययस्यैवानुदयात् । अस्तु तर्ह्येतावल्लक्षणमिति चेत्, न; तत्रापि प्रागुक्तवाच्यवाचकसम्बन्धेऽतिव्याप्तेः ।

भवतु तर्ह्यर्वाचीनमतानुसारेण नित्यः सम्बन्धः समवाय इति लक्षणमिति चेत्, न

निराचष्टे—नस्यादित्यादिना । इह भूतले घटाभाव इत्यनयोः सम्बन्धेऽतिव्याप्तिः । तादृशःसम्बन्धो भावयोरेव विवक्षितश्चेत्तर्हि पटस्य पटरूपसमवायस्य च रूपसमवायवान् पट इत्यत्र विशेषणविशेष्यभावसम्बन्धे निरुक्तलक्षणस्य सत्त्वेनातिव्याप्तिरिति भावः । लक्षणान्तरमाशङ्क्य दूषयति—अथ गुणेति । गुणगुणिनोः क्रियाक्रियावतोरित्यादिषु पञ्चस्थलेषु निरुक्तसमवायसम्बन्धाभ्युपगमे तेषां मिथो विशेषणविशेष्यभावसम्बन्धेऽतिव्याप्तिः । स्यात्किल विशेषणविशेष्यभावव्यवहारो न चात्रेहप्रत्ययहेतुत्वं समवायस्येष्टमिति चेन्न; तथासतीहाकाशे शब्द इत्यत्रेहशब्दस्याकाशस्य चार्थस्य वाच्यवाचकभावसम्बन्धेऽतिव्याप्तेस्तादवस्थ्यात् । यतोहीह शब्दोगुणो नभश्चार्थो गुणी तयोरयुतसिद्धसम्बन्धोऽप्यस्त्येव । इहशब्दाकाशार्थयोर्वाच्यवाचकसम्बन्ध इहप्रत्ययहेतुरस्त्येवेति भावः । किं चेह प्रत्ययहेतुरित्यनेनैवाधाराधेयभावस्यापि सिद्धत्वेन समवायलक्षणे आधाराधेयभूतानामिति विशेषणं व्यर्थमित्याह—किं चेत्यादि । इष्टापत्तावपि प्रागुक्तवाच्यवाचकभावसम्बन्धेऽतिव्याप्तिस्तदवस्थैवेति ।

श्रीवल्लभवादिवागीश्वरसर्वदेवानां सम्मतमुदयनेनसमर्थितं समवायलक्षणमुद्भाव्य दूषयति—भवत्विति । अनित्यप्रतियोगिकविशेषणविशेष्यसम्बन्धेऽतिव्याप्तिवारणाय लक्षणे नित्यपदमस्तु, तथापि नित्यात्मतत्त्वप्रतियोगिकविशेषविशेष्यसम्बन्धेऽतिव्याप्तिस्तदवस्थैव । किं च प्रतियोगिनोरनित्यत्वेऽपि न तत्र विशेषणविशेष्यसम्बन्धोऽनित्यः । अन्यथा समवायस्यापि प्रतियोगिनोरनित्यत्वेऽनित्यत्वप्रसङ्ग

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विशेषणविशेष्यभाव एव व्यभिचारात् । सोऽनित्यः, प्रतियोगिनोरनित्यत्वादिति चेत्, तथापि नित्यप्रतियोगिकविशेषण विशेष्यभावे व्यभिचारस्य तुल्यत्वात्, प्रतियोगिनोरनित्यत्वेन सम्बन्धानित्यत्वापादनस्य सम्वायेऽपि समानत्वाच्च । भावरूपत्वे सतीति विशेषणादयमदोष इति चेत्, न; अजसंयोगे व्यभिचारात् । स एव नास्तीति चेत्, मैवम्; प्रमाणसिद्धत्वात्—आकाशमात्मना संयुज्यते संयोगित्वाद्घटवत् । न च क्रियावत्त्वमूर्तत्वादिरुपाधिः तद्व्यतिरेकेऽसंयोगित्वस्यैवोपाधित्वात् । किञ्चाकाशमात्मना संयुज्यत इत्यात्मसम्बन्धाधार इति साध्ये क्रियावत्वमूर्तत्वयोरुपाधित्वमेव नास्ति, आत्मनि साध्याव्याप्तेः । तस्मादुक्तयुक्त्या न समवायस्य लक्षणसम्भवः ।

प्रमाणमपि तत्र प्रत्यक्षम् ? अनुमानं वा ? नाद्यः; तदभावात् । इह तन्तुषु पट इति प्रत्यक्षमस्तीति चेत्, न; विचारासहत्वात् । समवायो ह्याधारबुद्धिं कुर्याद् ? आधेयबुद्धिं वा? उभयबुद्धिं वा ? सर्वथापि नोपपद्यते । तन्तुपटयोरुभयोरप्याधारबुद्धेराधेयबुद्धेरुभयबुद्धेश्च विशेषेण प्रसङ्गात् । जातिजातिमन्तौ मिथःसम्बद्धावित्यस्त्येवानुभवान्तरमिहेति चेत्, मैवम्; विकल्पासहत्वात् । तथाहि—अस्मिन्ननुभवे समवायस्तदीयत्वेन वान्यदीयत्वेन वा स्वरूपेण वा प्रथत इति वक्तव्यम् ? नाद्यः; तदीयत्वस्य संबन्धान्तरायत्तत्वेनानवस्थापातात् । न द्वितीयः; अन्यत्रैव संबन्धबोधप्रसङ्गात् । न तृतीयः; क्वचिदपि सम्बन्धप्रत्ययानुपपत्तेः । असत्येव सम्बन्धे तदीयत्वमनुभवसिद्धमिति चेत्, न, जात्यादेरप्यसत्येव सम्बन्धे तदीयत्वानुभवप्रसङ्गात्, असत्ख्यातिप्रसङ्गाच्च । असत्येव सम्बन्धे सम्बन्धिभ्यां

स्तुल्यः । भावत्वविशेषणोपादानेऽपि प्रमाणसिद्धत्वेनाजयोराकाशात्मनोः संयोगेऽतिव्याप्तिः । अथाकाशमात्मना संयुज्यते, संयोगित्वात् घटवदित्यनुमाने न क्रियावत्त्वरूपमूर्त्तत्वमुपाधिं घटयितुं शक्नुयादिति । तत्रोपाध्यभावेन साध्याभावानुमानावसरे व्यतिरेकेऽसंयोगित्वस्यैवोपाधित्वात् । यथाऽत्माऽऽकाशेन न संयुज्यतेऽमूर्त्तत्वाद्रूपवदित्यत्रासंयोगित्वमुपाधिरस्ति । एवं च व्यतिरेकव्याप्तिभङ्गात्साध्योपाध्योरपि व्याप्तिभङ्गः । किं चाकाशमात्मना संयुज्यते इत्यनुमाने आत्मसंयोगित्वरूपसाध्यस्यात्मसम्बन्धाख्यमर्थो विवक्ष्यते यदा, तदा त्वया क्रियावत्त्वाद्युपाधिर्घटयितुं न शक्येत । आत्मनि सम्बन्धाधारत्वरूपसाध्यस्य सत्त्वेऽपि क्रियावत्त्वोपाध्यभावेन साध्याव्यापकत्वात् । समवायलक्षणनिषेधमुपसंहरति—तस्मादिति ।

समवायसाधकं प्रमाणं निराकर्तुमुपक्रमते—प्रमाणमपीति । अथेहतन्तुषु पट इति प्रत्यक्षं नात्र प्रसरति, समवायस्य विषयतयाऽऽधारबुद्धिजनकत्वस्वीकारे आधेयेऽपि तथात्वात्, आधेयबुद्धिजनकत्वे आधारेऽप्याधेयबुद्धित्वप्रसङ्गात्, उभयबुद्धिजनकत्वाभ्युपगमे तन्तुपटयोरुभयोरुभयबुद्धित्वप्रसङ्गाच्च । अथ जातिजातिमन्तौ मिथः सम्बद्धावितिप्रत्यक्षान्तरमपि समवायसिद्धौ न प्रमाणं भवितुं शक्यम्; विकल्पासहत्वात् । तथाहि समवायस्य जातिजातिमदधीनत्वेन भानस्वीकारेऽनवस्थापत्तिः, अन्यसम्बन्धित्वेन प्रतीत्यभ्युपगमे जातेरन्यत्रैव सम्बन्धभानप्रसङ्गः—स्वीरूपेण=अपराधीनत्वेन समवायस्य प्रतीतिस्वीकारे च क्वचिदप्यनुयोगिनि प्रतियोगिनि वा समवायस्य सम्बन्धप्रत्ययानुपपत्तिः । अनवस्थामुद्धरति—असत्येवेति । सम्बन्धान्तरं विनैव समवायस्य जात्यादिसम्बन्धित्वावगमे

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

निरूपणात्तदीयत्वव्यवहारे जातेरपि सम्बन्धान्तरमन्तरेण व्यक्त्या निरूपणात्तदीयत्वव्यवहारप्रसङ्गः। नानुमानमपि; लिङ्गाभावात्। विवादाध्यासित इहप्रत्ययः सम्बन्धपुरःसरोऽबाधितेह प्रत्ययत्वादिहकुण्डे बदराणीतिप्रत्ययवदित्यनुमानमस्तीति चेत्, न; विशेषणविशेष्यभावाधाराधेयभावसम्बन्धादिना सिद्धसाधनत्वात्। विशेषणविशेष्यादेरेव मूलसम्बन्धपुरःसरत्वं सिषाधयिषितमिति न सिद्धसाधनत्वमिति चेत्, न; इहभूतले घटाभाव इत्यस्मिन्नेव विशेषणविशेष्यभावप्रत्ययेऽनैकान्त्यात्।

यच्च लीलावतीकारेणानुमानमुक्तम्— "जात्यादिगोचरो विशिष्टव्यवहारः सम्बन्धनियतो भावमात्रविषयाबाधितविशिष्टव्यवहारत्वात्सघटं भूतलमिति व्यवहारवत्, सामानाधिकरण्यज्ञानमबाधितसम्बन्धज्ञानपुरःसरमबाधितसामानाधिकरण्यज्ञानत्वाद्दण्डकुण्डले देवदत्तसंसृष्टे इति ज्ञानवत्" इति, तदप्युक्तम्; प्रागुक्तनीत्या सिद्धसाधनत्वात्। अथ विशेषणविशेष्यभावादेः सम्बन्धत्वमेव नास्ति; अद्विष्ठत्वात्, द्विष्ठत्वे चोभयत्रापि विशेषणबुद्धेर्विशेष्यबुद्धेश्चाविशेषेण जननप्रसङ्गात्; एवमाधाराधेयभावोऽपि, ततो न सिद्धसाधनतेति चेत्,

---

जात्यादेरपि समवायसम्बन्धमन्तरेणैव तदीयत्वव्यवहारप्रसङ्गात्, समवायाभ्युपगमस्य वैयर्थ्यापत्तेश्च दूषणान्तरमाह—असत्ख्यातीति। असत्समवायप्रतीतिप्रसङ्गश्चेत्यर्थः। समवायस्य स्वसम्बन्धिनं सम्बन्धाभावेऽपि स्वसम्बन्धिभ्यां निरूपणीयत्वेन तदीयत्वव्यवहाराभ्युपगमे जातेरपि सम्बन्धमन्तरेणैव व्यक्त्या तन्निरूपणात्तदीयत्वव्यवहारसम्भवेन कृतं समवायकल्पनयेति भावः। प्रत्यक्षं प्रदूष्यानुमानं दूषयति—नानुमानमिति। अनुमानं शङ्कते—विवादेत्यादिना। तत्र निरुक्तानुमाने कुण्डबदरादिवज्जातिव्यक्त्यादिषु संयोगाभावात्समवायसिद्धिरिति भावः। दूषयति—नेति। नेदमनुमानं समवायसाधकं, जात्यादेर्विशेषणविशेष्यभावाधाराधेयभावसम्बन्धादिना सिद्धसाधनत्वात्। ननु विशेषणविशेष्यभावादेरपि मूलसम्बन्धसमवायपुरःसरत्वेन सिसाधयिषितत्वान्नसिद्धसाधनत्वमिति चेन्न; इहभूतले घटाभाव इत्यत्रैव सम्बन्धान्तरपूर्वकत्वेन विशेषणविशेष्यभावप्रत्यये व्यभिचारदर्शनात्।

लीलावतीकारोक्तमनुमानद्वयमुद्भाव्य दूषयति—यच्च लीलावतीति। तत्राघटं भूतलमित्यादिबाधवारणाय जात्यादिगोचर इति पक्षविशेषणम्। अबाधितविशिष्टव्यवहारत्वादित्युक्ते, अघटं भूतलमितिविशिष्टव्यवहारे व्यभिचारवारणाय भावमात्रेति हेतुविशेषणम्। पीतःशङ्ख इत्यादिव्यवहारे व्यभिचारवारणायाबाधितेतिपदम्। इमौ घटपटाविति व्यवहारवारणाय विशिष्टपदम्। सघटं भूतलमिति दृष्टान्ते संयोगमादाय साध्यप्रसिद्धिः, पक्षे संयोगाभावात्साध्यसिद्धिः। द्वितीयप्रयोगे अबाधितसामानाधिकरण्यज्ञानं पक्षः, अन्यथा भ्रमस्थले बाधासिद्ध्योः प्रसङ्गात्। इदं रजतं ह समवेतमित्यादिवदारोपितसम्बन्धज्ञानेनार्थान्तरतावारणायाबाधितपदम्। तादृशस्थलेषु व्यभिचारवारणाय हेतावबाधितपदम्। घटः पट इत्यादि ज्ञानेऽतिव्याप्तिवारणाय सामानाधिकरण्यपदम्। तद्दूषयति—प्रागुक्तेति। ननु सम्बन्धस्य द्विष्ठत्वेनोभयत्रापि विशेषणविशेष्यबुद्ध्योरविशेषेणोत्पत्तिप्रसङ्गः, अद्विष्ठत्वाभ्युपगमे विशेषणविशेष्यभावादेः सम्बन्धत्वाभावप्रसङ्गश्चेत्यतो न सिद्धसाधनतेति चेन्न; संयोगस्य द्विष्ठत्वेऽपि कुण्डे बदराणीत्यादौ यथा कुण्डे केवलमाधारत्वं बदरेष्वाधेयत्वं प्रतिनियतबुद्धिजनकं एवमिह तन्तुषु पट इत्यत्र समवायस्य द्विष्ठत्वेऽपि तन्तुष्वाधारत्वं पटस्य चाधेयत्वं प्रतिनियतबुद्धिजनकं, तद्वदत्रापि बुद्धिवैचित्र्यजननोपपत्तेः प्रतिवादिनाभ्युपगतस्य बाधनभ्युप-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मैवम्, द्विष्ठत्वेऽपि कुण्डे बदराणीति प्रतिनियताधाराधेयभावबुद्धिजनकसंयोगवत्, तन्तुषु पट इति प्रतिनियतप्रतीतिजनकसमवायवच्च बुद्धिवैचित्र्यजननोपपत्तेः, प्रतिवादिनाङ्गीकृतस्य बाधनङ्गीकारमात्रेण सिद्धसाधनतायाः परिहर्तुमशक्यत्वात् । किञ्चेदमबाधितत्वं सर्वानुमानेषु विवक्षितम्? किं प्रत्यक्षेणाबाधितत्वम्? उत युक्त्या? किं वा व्यवहारे बाधराहित्यम्? नाद्यः; नीलं नभः प्रादेशिकः सवितेत्यादिविशिष्टव्यवहारे व्यभिचारात् । नापि द्वितीयः; युक्तिबाधविरहस्यात्राप्यसिद्धेः । तथाहि—समवायः स्वतन्त्रः? परतन्त्रो वा? नाद्यः, समवायिभ्यामसम्बन्धे पदार्थान्तरवत्तद्धटकत्वाभावप्रसङ्गात् । नापि द्वितीयः; सम्बन्धिभ्यां सम्बन्धे सम्बन्धान्तरसापेक्षत्वेनानवस्थाप्रसङ्गात् । अथ समवायः सम्बन्धिभ्यां सम्बन्धे सम्बन्धान्तरं नापेक्षते, तस्य सम्बन्धिसम्बन्धनपरत्वात्, नहि तस्मिन्सति सम्बन्धिनावसम्बद्धौ भवतोऽतो नानवस्थेति चेत्, न; संयोगस्याप्युक्तनीत्या सम्बन्धान्तरानपेक्षत्वप्रसङ्गात् । नापि तृतीयः; नीलं नभ इत्यादावपि व्यवहारे बाधाभावेन व्यभिचारस्य तादवस्थ्यात् ।

घटस्तद्वृत्त्यनित्यान्यभावसम्बन्धवानयम् ।
सम्बन्धित्वादितिस्याच्चेन्नाभावे व्यभिचारतः ॥१५॥

अयं घट एतद्घटनिष्ठानित्यत्वानधिकरणभावरूपसम्बन्धवान्सम्बन्धित्वात्पटवदिति चेत्, मैवम्; अभावे हेतोर्व्यभिचारात्, तस्यापि विशेषणविशेष्यभावसम्बन्धेन सम्बन्धित्वाङ्गीकारात् । अथ भावत्वादिति हेतुः; तथापि समवाये व्यभिचारात् । द्रव्यत्वादिति प्रयोगेऽपि संयोग-

---

गममात्रेण सिद्धसाधनत्वस्य वारयितुमशक्यत्वाच्च । एवं सिद्धसाधनतामुक्त्वाऽनुमानत्रयहेतुष्वबाधितत्वविशेषणप्रयुक्तदोषानाह—किञ्चेदमिति । अबाधितत्वपदेन प्रत्यक्षेणाबाधितत्वं विवक्षितं चेत्तर्हि नीलं नभः प्रादेशिकः सवितेत्यादिविशिष्टव्यवहारे सम्बन्धपूर्वकत्वं साध्यं नास्ति तत्राबाधितयुक्तो हेतुरस्तीतिहेतौ व्यभिचारः । युक्त्याऽबाधितत्वमद्याप्यसिद्धमिति स्वरूपासिद्धिः । समवायस्य स्वसम्बन्धिभ्यामसम्बद्धत्वे तटस्थपदार्थान्तरवत्तन्तुपटयोर्योजकत्वाभावप्रसक्तेः समवायस्य परतन्त्रत्वेऽनवस्थाप्रसङ्गाच्च । अथ सत्तावत्समवायस्य सम्बन्धान्तरानपेक्षत्वे संयोगस्याप्युक्तनीत्या सम्बन्धान्तरानपेक्षत्वप्रसङ्गः । अबाधितपदस्य व्यवहारे बाधाभावार्थाभ्युपगमे नीलं नभ इत्यादिव्यवहारेऽपि नभसि नीलत्वबाधाभावेन व्यभिचारस्य तादवस्थ्यम् ।

अनुमानान्तरं श्लोकेन दर्शयति—घट इत्यादिना । श्लोकोक्तमनुमानं विशदयति—अयं घट इति । एतद्घटनिष्ठत्वे सत्यनित्यानधिकरणत्वे सति भावरूपत्वे च सति सम्बन्धवत्त्वं साध्यत्वेन विवक्षितमित्यर्थः । विशेषणविशेष्यादिरूपाभावात्मकसम्बन्धेऽर्थान्तरतावारणाय भावपदम् । भावरूपसम्बन्धवानित्युक्ते संयोगेऽर्थान्तरतावारणायानित्यानधिकरणत्वमित्युक्तम् । तथात्वे चाप्रसिद्धविशेषणता स्यात्तद्वारणायैतद्घटनिष्ठत्वमुक्तम् । घटान्तरसंयोगे साध्यप्रसिद्धिरस्त्येव । निरुक्तसाध्याभावाधिकरणेऽभावे सम्बन्धित्वहेतोर्वर्तमानतया व्यभिचारः । तस्याभावस्यापि विशेषणविशेष्यभावसम्बन्धेन सम्बन्धित्वाभ्युपगमात् । पूर्वोक्तप्रयोगे भावत्वस्य हेतुत्वे समवाये व्यभिचारः, द्रव्यत्वस्य चापि

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नित्यतापादकतयार्थान्तरत्वप्रसङ्गः। न चानित्यस्य घटादेर्नित्यसम्बन्धाधिकरणत्वानुपपत्तिः; समवायाधारत्ववत्तदुपपत्तेः। अतो यथा समवायस्य स्वभावसामर्थ्यादिवात्मनि परत्र च सम्बद्धव्यवहारहेतुत्वम्, एवं गुणगुण्यादेरपि स्वभावसामर्थ्यादेव सम्बद्धव्यवहारहेतुत्वोपपत्तेर्न कल्पनागौरवानवस्थादुःस्थसमवायस्वीकारावकाशः। तदेवं लक्षणासम्भवात्प्रमाणाभावाच्च न समवायस्य द्रव्यादिभ्यो भेदसिद्धिः। अतो न क्वापि लक्षणभेदाद्भेदसिद्धिरिति सिद्धम्।

अन्ये मन्यन्ते—माभूल्लक्षणभेदाद्भेदः, तथापि सामर्थ्यासामर्थ्यलक्षणविरुद्धधर्मसंसर्गाद्बीजादीनां भेदः सिद्धयति। तथाहि—यदि कुसूलनिहितं बीजं तदानीमङ्कुरजनने समर्थम्, तर्हि तदैवाङ्कुरं जनयेत्, यद्यदा यज्जननसमर्थं तत्तदैव तत्करोति यथा सामग्री, न च कुर्वदुपलभ्यते, तस्मादसमर्थम्, सहकारिसमवधाने च समर्थमिति, सामर्थ्यासामर्थ्यलक्षणविरुद्धधर्मसंसर्गः। न च समर्थस्यापि सहकारिसमवधानाभावादजनकत्वमिति संदिग्धव्यतिरेकिता; जनकस्वभावत्वे तस्य सहकारिसमवधानाभावेऽपि स्वभावविरोधादेवाजनकत्वानुपपत्तेः। सहकारिसमवधाने जनकमजनकं चान्यदेति स्वभाव इति चेत्, मैवम्; एकस्यानेकस्वभावतानुपपत्तेः। किञ्च यदि सहकारिसमवधानमपि स्वभावान्तर्भूतम्, तदा तदपि तदैव संपद्येत, स्वभावस्यानपायात्। अथाजनकत्वं स्वभावः, तदा न कदाचिदप्य-

---

हेतुत्वे संयोगात्मकसम्बन्धे नित्यतापादकतयाऽर्थान्तरत्वप्रसक्तिः। न चानित्यस्य घटादेर्नित्यसम्बन्धानुपपत्तेरर्थान्तरतेति वाच्यम्; समवायाधारत्ववन्नित्यसमवायसम्बन्धस्यापि घटादेरनित्यस्य सम्बन्धित्वोपपत्तौ दोषाभावात्। पूर्ववादिनो भिक्षुकपादप्रसारणं परिहरन्सिद्धान्ती प्रसङ्गमुपसंहरति—अतो यथेत्यादिना। समवायदूषणमुपसंहरति—तदेवमिति। मिथो भिन्नलक्षणयोगित्वं भेद इतिपक्षदूषणमुपसंहरति—अतो न क्वापीति। किं लक्षणानां तावदनुगतं लक्षणं नास्ति। न च सजातीयविजातीयव्यावर्तकमनुगतं लक्षणमिति वाच्यम्, सामान्यादिलक्षणेष्वव्याप्तेः। नहि सामान्यादयो जातिमन्तो येन सामान्यादिसजातीयमन्यत्तैर्लक्षणैर्व्यवच्छेद्यं स्यात्। सामान्यादिषु जातित्वाभ्युपगमेऽनवस्था स्यात्। एवमुपाधिलक्षणस्याप्यनिरुक्तेर्नोपाधिमादाय भेदः साधयितुं शक्यः। तस्माज्जात्युपाधिभ्यां वादीन्द्रादिभिरुत्प्रेक्ष्यमाणान्यपि लक्षणानि निरस्तानि वेदितव्यानीति भावः।

अथ बौद्धास्तावन्मन्यन्ते इत्याह—अन्ये मन्यन्त इति। स्वाभिमतमुद्घाटयति—कुसूलनिहितं=धान्यागारस्थितं बीजमङ्कुरोत्पादनेऽसमर्थं, तदेव बीजं सहकारिसमवधानेऽङ्कुरोत्पादने समर्थं भवति। तस्मात्सामर्थ्यासामर्थ्यरूपविरुद्धधर्मसंसर्गाद्बीजादीनां भेदसिद्धिः। तत्र पररीत्या प्रयोगः—कुसूलनिहितं बीजमङ्कुरजनने समर्थं चेत्तर्हि कथं तदा नाङ्कुरं जनयति। तस्माद्बीजमङ्कुरोत्पादनेऽसमर्थम्। अतो निरुक्तरीत्या विरुद्धधर्मसंसर्गाद्बीजादीनां भेदसिद्धिः। सन्दिग्धानैकान्तिकतामाह—न चेति। जनकस्वभावत्वाङ्गीकारे स्वभावविरोधानुपपत्तिमाह—जनकेति। कालभेदाज्जनकत्वाजनकत्वस्वभावभेदमाह—सहकारीति। एकस्यानेकस्वभावत्वानुपपत्त्या दूषयति—मैवमिति। स्वश्चासौ भावश्चेति स्वभाव इत्यत्र कर्मधारयसमासेनासाधारण इत्यर्थः। एवं सहकारिसमवधानासमवधानव्यवस्थया जनकत्वाजनकत्वयोरेकत्र व्यवस्थापि न सम्भवतीत्याह—किञ्च यदीति। अजनकत्वस्वभा-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ङ्कुरं जनयेत् । अथ सहकारिसमवधानानन्तरभाविनः कार्यात्समनन्तरपूर्वक्षणवर्तित्वं स्वभावः; तर्हि कुसूलनिहितावस्थायामपि बीजस्य यथावर्णितस्वभावो भवेत्, तत्स्वभावस्य-तदानीमभावे स्वभावपरित्यागप्रसङ्गात् । अथ सहकारिसमवधानं न स्वभावः; तर्हि तत्कारणस्योपकरोति ? न वा ? न चेद्, अनपेक्षणीयत्वम् । उपकरोति चेत्, उपकारो वस्तुनो भिन्नः ? न वा? भिन्नत्वे प्राप्ताप्राप्तविवेकेन स एव कार्यजनक इति न स्थिरस्य कारणता । अभिन्नत्वे तु पूर्वावस्थस्य वस्तुनःसांप्रतमुपकाराभिन्नतयोत्पत्त्यसंभवाद्वस्त्वन्तरोत्पत्तेः क्षणिकस्यैव कारणताप्रसङ्गः । उपकारस्य वस्तुतन्मात्रत्वे च सहकारिसमवधानात्पूर्वमपि तद्भावात्तदापि कार्यजननम्, सहकारिसमवधानवैयर्थ्यं च प्रसज्येत । अथोपकारो वस्तुनस्तत्वान्यत्वाभ्यामनिर्वचनीयः; तदा तस्यैव कारणत्वमिति न वस्तुनः कारणता । न च वस्तुनोऽप्यन्वयव्यतिरेकित्वात्कारणता; केवलव्यतिरेकाभावात्—सत्युपकारे वस्त्वभावापराधेन कार्याभावानुपलम्भात् । तदेवं सामर्थ्यासामर्थ्यलक्षणविरुद्धधर्मसंसर्गाज्जनकाजनकयोर्भेदसिद्धिः । प्रयोगश्च—कुसूलस्थं बीजं सहकारिमध्यमध्यासीनाद्भिन्नं विरुद्धधर्मसंसृष्टत्वाद्दहनतुहिनवत् । तथा कुसूलस्थं बीजमङ्कुरजनकबीजाद्भिन्नं कार्याव्यवहितातीतक्षणातिरिक्तक्षणसम्बन्धित्वाद्घटवत् । एतामेव व्याप्तिमुपजीव्य यत्सत्तत्क्षणिकमित्य-

---

पक्षमपि दूषयति—अथेति । स्वभावपरित्यागासम्भवमाह—तत्स्वभावस्येति । सहकारिसमवधानं न स्वभाव इति पक्षं विकल्प्य दूषयति—अथ सहकारीति । सहकारिसमवधानस्योपकारकत्वपक्षमपि विकल्प्य दूषयति—उपकार इति । उपकारस्य वस्तुनो भिन्नत्वे स्थिरस्याकारणत्वमाह—भिन्नत्व इति । अन्वयव्यतिरेकाभ्यामुपकारस्यैव कारणत्वमिति भावः । अभिन्नत्वपक्षमपि दूषयति—अभिन्नत्वेत्विति । उपकारस्य बीजाभिन्नत्वे पूर्वनिष्पन्नबीजस्येदानीमुपकाराभिन्नतयोत्पत्त्यसम्भवादभिनववस्त्वन्तरस्योत्पत्तिस्वीकारे क्षणिकस्यैव कारणत्वप्रसक्तिः। वस्तुन उपकाराभेदं प्रदूष्योपकारस्य वस्तुनोऽभेदं दूषयति—उपकारस्येति । अत्र पक्षे दोषद्वयं संघटयति—तदापीत्यादिना-प्रसज्येतेत्यन्त्येनेति । उपकारस्य बीजवस्तुनो भेदाभेदपक्षं दूषयति—तदा तस्यैवेति । न चान्वयव्यतिरेकाभ्यां वस्तुनोऽपि कारणत्वमभ्युपगतमिति वाच्यम्, वस्तुसत्त्वे कार्यसत्त्वमित्यन्वयसत्त्वेऽपि केवलवस्तुनो व्यतिरेकाभावात्, वस्त्वभावे कार्याभाव इति व्यतिरेको नास्तीति भावः । केवलव्यतिरेकं विशदयति—सत्युपकार इति । यथा बीजसत्त्वेऽप्युपकाराभावादनुत्पत्तिरभ्युपेयते, न तथोपकारसत्त्वेऽपि वस्तुनोऽभावापराधादनुत्पत्तौ दृष्टान्तोऽस्तीति, तथासत्यभेदवादिनो व्याघातात् । तस्माद्विरुद्धधर्माध्यासाद्भेदसिद्धिः। भेदसिद्धौ प्रमाणं दर्शयति—प्रयोगश्चेति । अत्र बीजं पक्षस्तस्य कुसूलस्थं विशेषणमिति। अत्र विशेषणानुपादाने बीजमात्रस्य पक्षत्वे यत्किंचिद्बीजस्य बीजाद्भेदसाधनेऽर्थान्तरता, स्वस्मात्स्वस्य भेदप्रसक्त्या बाधापत्तिः, स्वरूपासिद्धिश्च दोषाःस्युः, तद्वारणाय कुसूलस्थमिति पक्षविशेषणम् । तथा यस्मात्कस्माद्वस्तुनो भेदसाधने बीजत्वावच्छिन्नबीजाद्भेदसाधने चार्थान्तरतावारणाय सहकारिमध्यमासीनादिति साध्यविशेषणमिति । अत्र बीजादिति पदमप्यध्याहार्यम् । भेदसिद्धौ प्रयोगान्तरमाह—तथेति । अत्राप्यङ्कुरजनकबीजाद्भिन्नत्वाभिन्नत्वाभ्यां विवादास्पदं बीजं पक्षः । अत्रानुमाने हेतुशरीरे कार्यपदेन कार्यापेक्षयेत्यर्थो बोध्यः, अतीतपदं=स्वान्योऽन्याभावरहितेऽङ्कुरजनकबीजे व्यभिचारवारकमिति । क्षणिकत्वे मानमाह—एतामेवेति । क्षणिकत्वानुमाने प्रत्यभिज्ञाविरोधमुद्भाव्य

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नुमानेन क्षणिकतामाचक्षते क्षणभङ्गवादिनः । नच 'य एवाहं रूपमद्राक्षं स एवाहमिदा स्पर्शमनुभवामि' इति 'स एवायं घटः' इत्यादिप्रत्यभिज्ञाविरोधः, सामग्रीभेदात्पारोक्ष्या पारोक्ष्यलक्षणविरुद्धधर्मसंसर्गाच्च प्रत्यभिज्ञानस्यैकत्वानुपपत्तेः । तथाहि—सा मे मात स मे पितेत्यादाविन्द्रियनिरपेक्षस्य संस्कारस्य स्मरणकारणत्वादयं घट इत्यादिप्रत्यक्षज्ञानेषि न्द्रियस्यसंस्कारनिरपेक्षस्य कारणतावगमादुभयोः संभूय कारणतानुपपत्तिः । स इत्ययमि च पारोक्ष्यापारोक्ष्यविरुद्धधर्मसंसर्गस्य स्फुटमुपलम्भाच्च । ज्ञानभेदात्प्रत्यभिज्ञायाः प्रत्यक्ष त्वाभावान्न प्रकृतानुमानस्य प्रत्यक्षविरोधः, तस्माद्विरुद्धधर्मसंसर्गाद्वस्तूनां भेदसिद्धिरिति

अत्रोच्यते—

सिद्धे भेदे विरोधे च धर्मयोर्धर्मिभेदधीः ।
तयोर्नाद्यापि संसिद्धिर्धर्मिभेदस्तदा कुतः ? ॥१६॥

अशेषभेदानपाकुर्वतोऽद्वैतवादिनो यदा भेदमात्रमेव नास्ति, तदा कुतो धर्मयोर्भेदः कुतस्तरां विरोधः ? कुतस्तमां च तदधीनो धर्मिभेदाध्यवसायः? अन्यतो वा भेदविरोधयो सिद्धौ तत एव धर्मिभेदसिद्धिः, कृतमनुमानेनाजागलस्तनायमानेन विरुद्धधर्माध्यासेन कश्चायं धर्मयोर्विरोधः, येन विरुद्धधर्मसंसर्गित्वेन भेदोऽभिधीयते ? किं सहानवस्थायित्वम् वध्यघातकभावो वा ? भावाभावरूपत्वं वा तदत्यन्ताभावसमानाधिकरणत्वं वा ? प्रथ किमेकस्मिन्काले सहानवस्थायित्वम् ? उतैकस्मिन्नधिकरणे ?नाद्यः; एकस्मिन्नपि क्ष धर्मिभेदेन जनकत्वाजनकत्वयोः सहावस्थानात् । नेतरः; एकजनकस्याप्यन्याजनकत्वे जनकत्वाजनकत्वयोरेकस्मिन्नधिकरणे सहभावात् । एककार्यप्रतियोगिजनकत्वाजनकत्वयोर

दूषयति—न चेत्यादिना—एकत्वानुपपत्तेरित्यन्त्येन । एकत्वसाधकं प्रत्यभिज्ञानं निराचष्टे तथाहीति । विरुद्धधर्माध्यासे विप्रत्तिपत्तिशङ्कां वारयति—स इति । फलितार्थमाह—ज्ञानभेदादिति प्रत्यक्षत्वाभावादिति । समस्तस्येतिशेषः । धर्मभेदवादमुपसंहरति—तस्मादिति ।

भेदवादेऽन्योऽन्याश्रयदोषं सिद्धान्ती श्लोकेनापातयति—सिद्धे भेद इति । जनकत्वाजनकत्वादि रूपयोर्धर्मयोर्मिथोभेदसिद्धे सति विरोधसिद्धे च सति धर्मिभेदज्ञानं निश्चितं स्यात्, किन्त्वद्यापि तयोर्धर्मयोर्भेदविरोधौ न सिद्धौ स्तः कुतोधर्मिभेदसिद्धिज्ञानं स्यादिति श्लोकार्थः । श्लोकार्थं विशदयति—अशेषेत्यादिना । प्रत्यक्षादिना धर्मयोर्भेदेविरोधे च सिद्धे प्रकृतानुमानस्य वैयर्थ्यमाह— अन्यतो वेति । भेदासिद्धया विरोधासिद्धिमुक्त्वाऽधुना विरोधस्य दुःसाध्यत्वं विकल्प्योपपादयति— कश्चायमित्यादिना । चतुःषु विकल्पेषु प्रथमेऽयं प्रश्नो जागर्ति, यत्किलैकस्मिन् काले विरुद्धधर्मयोः सहानवस्थायित्वमुच्यते, उतैकस्मिन्नधिकरणे । नाद्यः, धर्मि भेदेनैकस्मिन्नपि क्षणे जनकत्वाजनकत्व योर्विरुद्धधर्मयोः सहावस्थानसम्भवात् । नापि द्वितीयः, कस्यचिज्जनकस्यैकं प्रति जनकत्वेऽपि तदन्यं प्रत्यजनकत्वदर्शनात् । यथैक एव कुम्भकारो घटं जनयति न पटमिति लोके दृश्यते । न चैकमेव कार्यं प्रत्येकस्यैव वस्तुनो जनकत्वाजनकत्वयोः सहानवस्थानं विरोधपदार्थ इति वाच्यम्; स्थायि त्वादिनामेकस्यैकं प्रत्येव भिन्नकालावच्छेदेन जनकत्वाजनकत्वयोरभ्युपगमात् । क्षणभङ्गवादि

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कत्र धर्मिणि सहानवस्थायित्वमिति चेत्, न;स्थायिवादिनं प्रत्यसिद्धेः। क्षणभङ्गवादिनोऽपि तत्कार्यजनकस्यैकस्य क्षणान्तरे तदजनकत्वेन तयोरेकत्रैव वस्तुनि साहित्यात्। नापि द्वितीयः, वध्यघातकभावस्य युगपदेकधर्मिनिष्ठयोरेव धर्मयोः सम्भवेनाश्रयभेदासाधकत्वात्। नापि तृतीयः; कार्यभेदं प्रति जनकत्वाजनकत्वयोर्भावाभावरूपयोरेकस्मिन्नपि भावात्, एककार्यप्रतियोगिजनकत्वाजनकत्वयोरेकस्मिन्वस्तुनि क्षणभेदेन भावाच्च। नापि चतुर्थः; स्थायिवादिनं प्रत्यसिद्धेः।

किञ्च सहकारिसमवधाने यः कार्यमुत्पादयति,स भावः सहकारिविरहकाले तत्र समर्थः ? न वा ? समर्थश्चेत् ? तदापि जनयेत्, न चेत्? तदेव वस्तु शक्तमशक्तं चेति दुर्निवारो विरोधः। सहकारिविरहकाले सोऽसन् नत्वसमर्थ इति चेत्, न; सहकारिविरहकाले येयमसद्रूपता सा सहकारिसन्निधानकालेऽपि विद्यते ? न वा ? विद्यते चेत्, स्वकाल एवासत्त्वप्रसङ्गः। न चेत् ? न तर्हि सहकारिविरहकाले तदसद्रूपम्, असद्रूपाभावेऽप्यस्य भावात्। अथैकमेव वस्तु सहकारिभावाभावयोः सदसद्व्यवहारयोग्यम्; तथैव तर्हि स्थिरमपि शक्ताशक्तव्यवहारयोग्यमिति तुल्यम्, न चासामर्थ्यं विहायान्यदसत्त्वमस्ति । अथैकस्मिन्नेव वस्तुनि सहकारिसमवधानानन्तरं कार्यजननस्वभावता तद्विरहे चासमर्थस्वभावतेत्युभय-

---

प्रत्यपि निरुक्तभेदासिद्धिमाह—क्षणभङ्गेति । तथा चैकमेव बीजं तत्कालीनमङ्कुरं जनयति नान्यकालीनमिति त्वयापि सहावस्थानमनुमतमिति भावः । निरुक्तविकल्पचतुष्टये वध्यघातकपक्षं दूषयति—नापि द्वितीयः । एकस्मिन्नधिकरणे वर्तमानयोरेव धर्मयोर्वध्यघातकभावसम्भवेन न तयोराश्रयभेदसाधकत्वं सम्भवतीति भावः । भावाभावरूपत्वकल्पं दूषयति—नापि तृतीयः । विषयभेदेन वर्तमानयोर्जनकत्वाजनकत्वयोः सत्यपि भावाभावरूपत्वे न विरोधः । यथा घटाभावः परश्चेत्यनयोर्भावाभावरूपत्वेऽपि न विरोधः, तयोः परस्परनिषेधरूपत्वाभावादितिभावः कालभेदेनैकस्मिन्नपि वस्तुनि एककार्यत्वावच्छिन्नप्रतियोगिकजनकत्वाजनकत्वयोर्वर्तमानत्वदर्शनात् । जनकत्वाजनकत्वयोः परस्परात्यन्ताभावसामानाधिकरण्यं कल्पं प्रतिषेधति—नापि चतुर्थः । स्थायिवादिमते जनकत्वमजनकत्वं चैकत्र वर्तते इति नियमोऽभ्युपेयते, न तं प्रति तयोर्मिथोऽत्यन्ताभावसामानाधिकरण्यमुदाहर्तुं शक्यम् ।

सिद्धान्ती स्वपक्षे विरुद्धधर्माध्यासं निराकृत्य परपक्षे तमारोपयति—किंचेति । यद्वस्तु सहकारिसमवधानसमये कार्यं जनयति, तद्वस्तु सहकारिविरहदशायां कार्यजनने प्रभवति, न वा आद्ये, सामग्रीविरहकालेऽपि कार्यं जनयत्येव । द्वितीये तदेव वस्तु शक्तमशक्तं चेति विरोधो वारयितुमशक्यः। सहकारिविरहकाले वस्त्वभावकल्पं दूषयति—सहकारीति । वस्तुनोऽसद्रूपतायाः सहकारिसन्निधानकाले विद्यते एवेति तर्हि स्वकाले एवासत्त्वप्रसक्तेः । नो चेत् ? तर्हि सहकारिविरहकाले तद्वस्तु नासद्रूपम्; असद्रूपाभावकालेऽपि तस्य वस्तुनो भावात् । अथ सहकारिसमवधानासमवधानाभ्यामेकमेव वस्तु सदसद्व्यवहारालम्बनं स्यादित्यत्र नास्ति विरोध इत्याशङ्कते—अथैकमेवेति । सामर्थ्यासामर्थ्ययोरपि तन्न्यायस्य तुल्यत्वमाह—तथैवेति । नह्यसामर्थ्याद्भिन्नं किञ्चिदसत्त्वं नाम वस्त्वस्तीत्येकस्यैव वस्तुनः सामर्थ्यासामर्थ्यव्यवहारयोग्यत्वं कुतो न स्यादिति । सामर्थ्यं हि सत्त्वमभ्युपेयते, तस्माद्भिन्नमसामर्थ्यमसत्त्वमिति भावः । यद्यपि सहकारिसन्निधानानन्तरं कार्यजनन-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मप्यविरुद्धम्; तुल्यमिदमस्मन्मतेऽपि तथापि सहकारिसमवधाने यत्समर्थरूपं तदेव चेत्प्रा- प्यस्ति पूर्वमपि कार्यप्रसवप्रसङ्ग इति चेत्, न; सहकारिविरहे यत्तव कार्येऽसमर्थं रूपं तदेव चेत्सहकारिसमवधानेऽपि ततोऽजननप्रसङ्ग इति तुल्यत्वात् । न च सहकारिणां स्वभावेऽन्त- र्भावः, येन गलेपादुकान्यायेन तेषामपि तदैव समुदयः स्यात्किन्तु भवन्मते समर्थक्षणोत्पाद- कानां क्षितिपवनपाथस्तेजसामिव सहकारितैव । न च सहकारिकृतोपकारस्य भेदाभेद- विकल्पानुपपत्तिः; वस्तुनस्तत्त्वान्यत्वाभ्यामनिर्वचनीयत्वात्, लोकसिद्धकारणताया अप्रत्या- ख्येयत्वात् । न च केवलव्यतिरेकाभावः; उपकारवस्तुनोर्भेदानभ्युपगमात्, उपकारकारण- ताया एव वस्तुकारणताभ्युपगमात् । प्रयोगस्तु धर्मयोर्विरोधनिरासेनैव निरस्तः । अनै- कान्तिकश्च; सहकारिमध्यमध्यासीनस्य विरुद्धधर्मसंसृष्टत्वेऽपि स्वतो भेदाभावात्, कार्याव्यवहितातीतक्षणातिरिक्तक्षणसम्बन्धितत्वादित्यपि हेतुः स्थायिवादनो मते तस्यैव तथाविधक्षणसम्बन्धित्वात्तस्मिन्नेवानैकान्तः । तदेवं प्रसङ्गतद्विपर्यययोरपास्तत्वा- त्क्षणिकत्वानुमानं दूरोत्सारितम् ।

किञ्चेदं क्षणिकत्वम् ? किं क्षणसम्बन्धित्वम् ? क्षणान्तरासम्बन्धित्वे सति क्षण- सम्बन्धित्वं वा ? क्षणान्तरमात्रासम्बन्धित्वे सति क्षणसम्बन्धित्वं वा ? उत्पत्तिक्षण- सत्त्वं वा ? स्वोत्पत्तिक्षणे सत्त्वं वा ? स्वोत्पत्तिक्षणमात्रसत्त्वं वा ? एकक्षणावस्थायि-

---

स्वभावता, सहकारिसमवधानाभावे च कार्यजननासमर्थस्वभावतेत्यावयोर्मते तुल्यं, तथापि तवस्थायि- वादिनो मते भिन्नत्वमस्तीत्याह—तथापीति । तथासति सामर्थ्यस्य सदा सत्त्वेन सहकारि- सन्निधानात्पूर्वमपि कार्यजननप्रसङ्ग इति चेन्न तवसौगतमतेऽपि सहकारिविरहकाले यथा बीजं कार्यजननेऽसमर्थं, तथैव सहकारिसन्निधानेऽपि कार्याजननप्रसङ्गस्तुल्यः । न वयं सहकारि वस्तुस्वभावेऽन्तर्गतं मन्यामहे, येन सहकारिणां समवधानमपि वस्तुस्वरूपमिव पुरस्तादेवाभ्युपेयं स्यात् । सौगतमते समर्थक्षणोत्पादकानां क्षित्यादीनामिव सहकारितामात्रमेवाभ्युपेयते । उपकार- कत्वपक्षे निरुक्तं दोषमनूद्य परिहरति—नच सहकारिकृतेति । वस्तुनोऽनिर्वचनीयत्वेऽपि लोकसिद्ध- कारणत्वस्य निराकर्तुमयुक्तत्वात् । न च वस्त्वभावे कार्याभाव इति केवलव्यतिरेकाभावद्वस्तुनः कारणताभाव इति वाच्यम्; अनिर्वचनीयवादिमते द्वयोरुपकारवस्तुनोर्भेदानभ्युपगतत्वात्, नहि कारणतासिद्ध्येऽन्वयव्यतिरेकात्मकस्तर्को नान्तरीयकः, उपकारणताया एव वस्तुकारणताभ्युपगमात् । धर्मयोर्विरोधनिराकरणेनानुमानप्रयोगो निरस्तः, क्षेत्रस्थबीजे निरुक्तसाध्याभावस्य सत्त्वेऽपि विरुद्ध- धर्मसंसृष्टत्वरूपहेतोर्वर्तमानतया व्यभिचाराच्च । द्वितीयानुमानेप्यऽनैकान्तिकतामाह— कार्याव्यवहितेति । स्थायिवादिमते कुसूलस्थस्यैव बीजस्य तथाविधक्षणसम्बन्धित्वेनाङ्कुरजनकत्वा- भ्युपगमात् । तत्र साध्याभावेऽपि हेतोः सत्त्वादिति व्यभिचारो दुर्वारः । यत्सत्तत्क्षणिकमित्यनुमानेऽपि पूर्वोक्तं दोषमतिदिशति—तदेवमिति ।

साध्यनिष्ठक्षणिकत्वं निराकर्तुं विकल्पयति—किं चेत्यादिना । अष्टसु विकल्पेषु (१) नाद्यः, अनेकक्षणावस्थितस्य घटस्यापि क्षणसम्बन्धित्वाभ्युपगमेन सिद्धसाधनत्वात् । क्षणान्तरासम्बन्धित्वे सति क्षणसम्बन्धित्वपक्षो (२) द्वितीयो नोचितः; क्षणान्तरासम्बन्धित्वानेकक्षणसम्बन्धित्वयोरविरोधे

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वा ? अनेकक्षणानवस्थायित्वविशेषितं वा ? न तावत्प्रथमः; सिद्धसाधनत्वात्, अनेकक्षणावस्थायिनोऽपि घटादेः क्षणसम्बन्धित्वात् । न द्वितीयः; अर्थान्तरत्वात्, क्षणान्तरासम्बन्धित्वेऽप्यनेकक्षणसम्बन्धित्वाविरोधात् । घटादीनामनेकक्षणसम्बन्धिनामपि स्वप्रध्वंसादिक्षणासम्बन्धित्वस्याभ्युपगमात् । न तृतीयः; व्याघातात्, तत्सम्बन्धिक्षणस्यापि क्षणविशेषत्वेन क्षणान्तरत्वे सति क्षणान्तरमात्रासम्बन्धाभावात् । न चतुर्थः; सिद्धसाधनत्वात्, अनेकक्षणसम्बन्धेप्युत्पत्तिक्षणसम्बन्धाविरोधात् । अत एव न पञ्चमः । नापि षष्ठः; स्वशब्देनाङ्कुराद्येकैकविवक्षायां तदुत्पत्तिक्षणमात्रसत्त्वस्य घटादिष्वभावेन क्षणिकत्वाभावप्रसङ्गात् । सर्वविवक्षायां तु लक्षणासम्भवित्वम्, एकैकस्य सर्वोत्पत्तिक्षणसत्त्वासम्भवेन तन्मात्रसत्त्वासम्भवात् । नापि सप्तमः; अनेकक्षणसत्त्ववादिभिरप्येकक्षणावस्थायित्वाङ्गीकारात् । नाप्यष्टमः; प्रध्वंसाद्यनेकक्षणानवस्थायित्वस्यैकक्षणावस्थायिनि स्थायिन्यपि सम्भवात् । उत्पत्तिक्षणानन्तरक्षणवर्तिध्वंसप्रतियोगित्वं क्षणिकत्वमित्यपि न; स्थिराणामपि यस्य कस्यचिदुत्पत्त्यनन्तरक्षणवर्तिध्वंसप्रतियोगित्वोपपत्तेः । एतेन स्वोत्पत्त्यनन्तरक्षणवर्तिध्वंसप्रतियोगित्वमपि निरस्तम्; स्वशब्दखण्डनस्य पूर्ववदत्रापि तुल्यत्वात् । अथास्य घटस्यैतद्घटोत्पत्त्यव्यवहितानन्तरक्षणवर्तिध्वंसप्रतियोगित्वं क्षणिकत्वमेवं प्रतिव्यक्तिक्षणिकत्वलक्षणमूहनीयमिति चेत्, मैवम्; एवंविधक्षणिकत्वसाधने सत्त्वसाधनस्यानैकान्तिकत्वापातात्; नह्यतीतानागतानां च सतामेतदुत्पत्त्यव्यवहितानन्तरक्षणवर्तिध्वंसप्रतियोगित्वमस्ति । तत्तद्ध्वंसानामेतद्घटोत्पत्त्यनन्तरक्षणेऽनुत्पन्नत्वात् । एतेनोत्प-

---

र्थान्तरत्वात्; तत्र दृष्टान्तमाह—घटादीनामित्यादिना । क्षणान्तरमात्रासम्बन्धित्वे सति क्षणसम्बधित्वमिति । (३) तृतीयपक्षोऽसमीचीनः; मिथो विरोधात् । विरोधं संघटयति—तत्सम्बन्धीति । उत्पत्तिक्षणे सत्त्वमिति चतुर्थपक्षं दूषयति—(४) न चतुर्थः । अनेकक्षणसम्बद्धे वस्तुन्युत्पत्तिक्षणसम्बन्धाविरोधात् । अनेकक्षणविद्यमानस्य स्थिरस्याप्युत्पत्तिक्षणसत्त्वसम्भवादेव स्वोत्पत्तिक्षणसत्त्वमपि क्षणिकत्वं न सम्भवतीत्याह—(५) न पञ्चमः । तत्र सिद्धसाधनमित्यर्थः । नापि स्वोत्पत्तिक्षणमात्रसत्त्वमित्याह—(६) नापि षष्ठ इति । स्वशब्दार्थस्य निर्वक्तुमशक्यत्वेनास्यापि लक्षणाभावात् । (७) नापि सप्तमः, एकक्षणावस्थायित्वपक्षे सिद्धसाधनत्वात् । सिद्धसाधनत्वेनैवान्तिमं दूषयति—(८) नाप्यष्टमः । अनेकक्षणानवस्थायित्वे सत्येकक्षणावस्थायित्वेऽपि सिद्धसाधनत्वादित्यर्थः । लक्षणान्तरं दूषयति—उत्पत्तिक्षणेति । तत्राप्युत्पत्तिशब्देन स्वपरसाधारणो यथाश्रुतोऽर्थोऽभिप्रेतः ? स्वोत्पत्तिक्षणो वा ? आद्यऽर्थान्तरदूषणमाह—स्थिराणामपीति । द्वितीयं विकल्पमपि विकल्प्य दूषयति । तत्र स्वशब्देन साधारणतया ध्वंसप्रतियोगित्वविवक्षायां पूर्ववदेवार्थान्तरता । प्रतिनियतः कश्चिद् ध्वंसप्रतियोगीत्युक्तौ षष्ठपक्षोक्ताव्याप्तिरिति भावः । ननु प्रतिव्यक्तिवृत्तिक्षणिकत्वं भिन्नं भिन्नमभिप्रेतमिति न पूर्वोक्ताव्याप्तिरित्याह—अथास्येति । यत्सत्तत्क्षणिकमितिविधया क्षणिकत्वसाधने सत्त्वहेतावनैकान्तिकत्वापातात् । तामेवानैकान्तिकतामुपपादयति—नह्यतीतेति । एतद्घटोत्पत्त्यनन्तरक्षणे तत्तद्ध्वंसानामनुत्पन्नत्वात् । पूर्वोक्तं दोषं लक्षणान्तरेऽतिदिशति—एतेनेति ।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्तिक्षणध्वंसासमानकालीनत्वं क्षणिकत्वमित्यपि निरस्तम्; यत्किंचिदुत्पत्तिक्षणध्वंसासमानकालीनत्वस्य स्थायिष्वपि भावात्, स्वशब्देन विशेषणेऽपि पूर्वोक्तदोषानुषङ्गात्, प्रतिव्यक्तिलक्षणे च सत्त्वसाधनस्यानैकान्तिकत्वात्। घटत्वात्पटत्वादित्यादिप्रयोगसाधनाभ्यूहने चानागतघटपटादिष्वनैकान्तिकता तदवस्थैव। सर्वश्चायमुदितो हेतुकलापः पूर्वोदितप्रत्यभिज्ञाप्रत्यक्षविरोधितया कालात्ययापदिष्टः। यत्पुनरुक्तं सामग्रीभेदाद्विरुद्धधर्मसंसर्गाच्च प्रत्यभिज्ञाज्ञानस्यैकत्वानुपपत्तिरिति, तदयुक्तम्; सम्प्रयोगसंस्कारयोः सम्भूयसामग्रीत्वात्। न चान्यत्र सम्प्रयोगसंस्कारयोः प्रत्येकमन्योन्यनिरपेक्षयोः कारणत्वादेकज्ञानकारणतानुपपत्तिः; यस्मात्——

अन्यत्र लिङ्गेन्द्रिययोरन्योन्यनिरपेक्षयोः।
दृष्टं सम्भूयकारित्वं विशिष्टानुमितिं प्रति ॥ १७॥

श्रूयमाणस्य स्मर्यमाणस्य वा लिङ्गस्याक्षनिरपेक्षस्यानुमानज्ञानहेतुत्वं दृष्टम्, दृष्टं चेन्द्रियस्यानपेक्षस्यापरोक्षज्ञानकरणत्वम्, तथापि सम्भूयोभाभ्यामयं पर्वतो वह्निमानित्येकमनुमानज्ञानं जायमानमुपलभामहे। नह्यन्तरेणेन्द्रियसम्प्रयोगमयमिति पुरोवर्त्याकारोपलम्भसम्भवः। न च विरुद्धधर्मसंसर्गाद्भेदः। अस्मिन्नेवानुमानवेदने वह्निमानिति चायमिति च पारोक्ष्यापारोक्ष्यविरुद्धधर्मसंसर्गोपलब्धेः। तदेवं प्रत्यभिज्ञाज्ञानस्यैकत्वेन प्रामाण्यसम्भवात्तद्विरुद्धं (न) भेदानुमानं कालात्ययापदिष्टं न भेदप्रत्यायनायालम्।

कथं च व्याप्यव्यापकभावभेदोपलम्भाधीनात्मलाभमनुमानमसिद्धे भेदे भेदं गोचरयेत्? आगमोऽप्यभिधानाभिधेयभेदावगमपुरःसरस्तस्मिन्नेवासिद्धे कथं तत्र प्रामाण्यमश्नुवीत?

अतिदिष्टदोषं विवृणोति—यत्किंचिदित्यादिना। पूर्वोक्तदोषपदेनाव्याप्तिरुच्यते। विशेषलक्षणविवक्षायां सत्त्वहेतावव्याप्तेस्तादवस्थ्यात्। घटत्वात्पटत्वादित्यादिहेतुत्वविवक्षायामनागतघटादिष्वनैकान्तिकता तदवस्थैवेत्याह—घटत्वादित्यादिना। बाधदोषमप्याह—सर्वश्चायमिति। प्रत्यभिज्ञायामेकत्वानुपपत्तिं प्रतिक्षिपति—यत्पुनरुक्तमित्यादिना। सम्प्रयोगसंस्कारयोः सम्भूयैकज्ञानजनकत्वं समर्थयति—सम्प्रयोगेति। तत्र दृष्टान्तमाह—अन्यत्रेति। श्लोकार्थं विशदयति—श्रूयमाणस्येत्यादिना। लिङ्गस्येन्द्रियस्य चानुमित्युत्पत्तौ सम्भूयजनकत्वं दृश्यते। अन्यथा अयं पर्वतो वह्निमानिति प्रतिज्ञा नोपपद्येत। परोक्षत्वापरोक्षत्वरूपविरुद्धधर्माध्यासात्पूर्वोक्तं भेद प्रतिक्षिपति—न विरुद्धेति। अनुमाने प्रत्यभिज्ञाबाधं समर्थितं प्रसङ्गमुपसंहरति—तदेवमित्यादिना।

भेदशङ्कितानुमानसमुदायस्य साधारणं दोषं दर्शयति—कथंचेत्यादिना। व्याप्यव्यापकभावभेदज्ञानाधीनं प्रवर्तमानमनुमानं कथमसिद्धे भेदे भेदं साधयितुं शक्नुयात्। अनुमानेन भेदसिद्धिर्व्याप्यव्यापकभावभेदोपजीव्यमनुमानमित्यन्योऽन्याश्रयत्वादिति भावः। इदमेव दूषणमागमेऽप्याह—आगमोऽपीति। तस्मिन्नेवासिद्धे=वाच्यवाचकयोर्भेदासिद्धे कथमागमोऽपि निरुक्तो भेदसाधने प्रामाण्यं प्राप्नुयात्। भेदसिद्धिं विना यजेत, जुहोति, ददातीत्यादिशब्दान्तरादिकमपि सिद्धशब्दादिभेदोपजीव्यं कथं कर्मोपासनादिभेदमवबोधयेत्। एतेषामुदाहरणानि प्रथमपरिच्छेदे मिथ्यात्व-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शब्दान्तरादिकमपि सिद्धशब्दादिभेदोपजीवनेन प्रवर्तमानं तदसिद्धौ कथं कर्मोपासनादिभेदमावेदयेत्? न हि भेदासिद्धौ यजतिददातिजुहोत्यर्थानां भेदः सिद्धयति, येन 'धात्वर्थभेदे सर्वत्र विज्ञेयं भावनान्तरम्'—इति वार्तिककारोक्तो भावनाभेदः सिद्धयेत् । उपमानमपि मानान्तरावसितगोगवयादिवस्तुद्वयावच्छिन्नसादृश्यगोचरत्वात्, तदसिद्धौ न वस्तु भेदावभासनाय प्रभवति । तिलेभ्य एव तैलं पयस एव दधीत्यर्थक्रियान्यथानुपपत्तिप्रभवत्वादर्थापत्तिरपि नान्तरेण तिलादिकारणभेदावभासं व्यवस्थासिद्धिरित्यन्योन्यसंश्रयान्न कारणभेदावभासे प्रामाण्यं भजते । अभावोऽपि नेदमिह, नेदमिदमिति धर्मिप्रतियोगिभेदाधीनसिद्धिर्न वस्तुभेदं साधयत्यन्योन्याश्रयात् ।

अपि च—मानाधीना मेयसिद्धिर्मानसिद्धिश्च लक्षणात् ।
तच्चाध्यक्षादिमानेषु गीर्वाणैरपि दुर्भणम् ॥१८॥

प्रत्यक्षादिप्रमाणाधीना तत्प्रमेयव्यवस्थितिः, प्रमाणानि च लक्षणाधीनाधिगमानि; लक्षणं च दुर्निरूपणम् । तथाहि—तत्र न तावदिन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यभिचारीत्यक्षपादोदितं प्रत्यक्षलक्षणं घटते । अव्यभिचारित्वस्य दुरधिगमत्वात् । तदव्यभिचारित्वं किमदुष्टसामग्रीजन्यत्वेन ज्ञायते ? किं वा बाधरहितत्वेन ? आहोस्वित्प्रवृत्तिसामर्थ्येन ? उतान्येन केनचित् ? न प्रथमः; अप्रत्यक्षसामग्रीनिष्ठदोषाभावस्याध्यक्षेणाध्यवसातुमशक्य-

---

निरूपणावसरे दर्शितानीति तत्रैव द्रष्टव्यम् । अत्र वार्तिककारोक्तं वचनं प्रमाणमाह—धात्वर्थभेदे इति । "उत्पत्त्यैकानुरक्ताहि नान्येनाप्यनुरज्यते" इति श्लोकशेषः । स्वरूपतो भावनाया एकत्वेऽपि उत्पत्तिवाक्यगतधात्वर्थभेदेन भिन्ना सा भावना भिद्यते इत्यर्थः । उपमानेऽपि निरुक्तं न्यायमतिदिशति—उपमानमपीति । प्रत्यक्षेण निश्चितं यद्गोगवयादिवस्तुद्वयं तत्प्रतियोगिकसादृश्यविषयत्वाद्भेदसिद्धिं विना तदुपमानमपि वस्तुभेदं साधयितुं नालमितिभावः । अर्थापत्तेरपि भेदेऽप्रामाण्यमाह—तिलेभ्य इत्यादिना । अर्थापत्तिरपि न कारणभेदप्रकाशने प्रमाणं भवितुमर्हति, तिलेभ्य एव तैलं पयस एव दधीत्यर्थक्रियानुपपत्तिप्रभवत्वात् । सा च तिलादिकारणभेदज्ञानं विना व्यवस्थां कर्तुं न प्रभवतीत्यन्योऽन्याश्रयत्वात् । अभावप्रमाणमपि नेदमिह, नेदमिदमित्यनुयोगिप्रतियोगिभेदाधीनसिद्धम्, न वस्तुभेदं साधयितुं प्रभवतीत्यन्योऽन्याश्रयत्वात् ।

दुर्निरूप्यमाणैः प्रत्यक्षादिप्रमाणैर्विरोधं परिहर्तुमुपक्रमते—अपि चेत्यादि । श्लोकार्थं विशदयति—प्रत्यक्षादीति । न्यायदर्शनसूत्रोक्तं प्रत्यक्षलक्षणं प्रथमं दूषयति—तत्र न तावदिति । अनुमानादिवारणायाद्यं दलम् । सुखादिवारणाय ज्ञानपदम् । शुक्तिरजतादिज्ञानेऽतिव्याप्तिवारणायाव्यभिचारीतिविशेषणम् । यदंशः प्रत्यक्षलक्षणोपयोगी, तस्यैव चित्सुखाचार्यैः पठितत्वान्नात्र लक्षणे सूत्रोक्तः सर्वांशः पठितः । प्रत्यक्षलक्षणं दूषयति—अव्यभिचारित्वस्येति । लक्षणस्यैकदेशस्य दुरधिगमत्वेन न तद्घटितलक्षणस्य दुरधिगमत्वमित्यर्थः । अव्यभिचरितत्वांशं विकल्प्य दूषयति—तदव्यभिचरितत्वमित्यादिना । विकल्पचतुष्टये नाद्यः, निर्दुष्टसामग्रीजन्यत्वलक्षणेऽप्रत्यक्षसामग्रीनिष्ठदोषाभावस्य प्रत्यक्षेण निश्चेतुमशक्यत्वात् । नापि इदं ज्ञानं, निर्दुष्टसामग्रीजन्यं, ज्ञानत्वादितिज्ञानाख्यलिङ्गेन, निर्दुष्टसामग्रीजन्यत्वमनुमातुं शक्यं, ज्ञातमात्रेण निर्दुष्टसामग्रीजन्यत्वसाधने भ्रमज्ञानेषु व्यभिचारात् ।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्वात्। नापि ज्ञानाख्यलिङ्गेन, ज्ञानमात्रेणादुष्टसामग्रीजन्यत्वसाधने विभ्रमज्ञानैरनैकान्तिकत्वात्। नाप्यव्यभिचरितज्ञानेन तदवगमः; परस्पराश्रयत्वात्, अदुष्टकरणजन्यत्वेन ज्ञानस्याव्यभिचरितत्वसिद्धिरव्यभिचरितत्वज्ञानाच्चादुष्टकरणजन्यत्वसिद्धिरिति। नापि द्वितीयः; विकल्पासहत्वात्। किं सर्वपुरुषबाधरहितत्वम्? उत प्रतिपत्तुः? नाद्यः; सर्वपुरुषबाधरहितत्वस्यासर्वज्ञाविज्ञेयत्वात्। न द्वितीयः; प्रतिपत्तुर्देशान्तरगमननिधनादिना बाधानुदये तदीयमरुमरीचिकाविभ्रमाणामप्यर्थाव्यभिचारित्वप्रसङ्गात्। नापि तृतीयः; तस्याप्यनिरुक्तेः। तथाहि—प्रवृत्तिर्नाम पुंसः समीहा, चेष्टा, तस्याः फलेनोदकादिनाभिसम्बन्धः प्रवृत्तिसामर्थ्यम्; तेनोदकादिविज्ञानस्यार्थाव्यभिचारित्वमवगम्यत इति स्थितिः। तच्चेदं प्रवृत्तिसामर्थ्यं लिङ्गत्वादवगतं सदव्यभिचारित्वं बोधयतीति वाच्यम्। तथा सति किं ज्ञानमात्रावगतं सत्तदव्यभिचरितां विज्ञानस्यावगमयेद्? उताव्यभिचारिज्ञानावगतम्? नाद्यः; भ्रान्तिस्वप्नादिज्ञानेनानैकान्त्यात्। नापि द्वितीयः; परस्पराश्रयत्वात्। किञ्चायमन्वयव्यतिरेकी हेतुः? केवलव्यतिरेकी वा? नाद्यः; सर्वज्ञानानामव्यभिचारित्वे विप्रतिपन्नं प्रति सपक्षासम्भवात्। अस्तु तर्हि द्वितीयः; तथाचार्यवाचस्पतेस्तात्पर्यटीकायां प्रयोगः—'विवादाध्यासितं ज्ञानमर्थाव्यभिचारि, समर्थप्रवृत्तिजनकत्वात्, यदि पुनरेवं नाभविष्यन्न समर्थां प्रवृत्तिमकरिष्यद्यथा प्रमाणाभासः' इति, मैवम्; हेतोर्विरुद्धत्वात्। दृश्यते हि मणिप्रभायां मणिबुद्ध्या प्रवर्तमानस्य मणिप्राप्तेः प्रवृत्तिसामर्थ्यं, न चाव्यभिचारित्वम्। उक्तं हि—

ज्ञानत्वहेतोर्भ्रमेऽपि वर्तमानत्वमित्यर्थः। नाप्यव्यभिचरितज्ञानेन निर्दुष्टसामग्रीजन्यत्वमधिगन्तुं शक्यम्, अन्योऽन्याश्रयत्वात्। अन्योऽन्याश्रयमेव संगमयति—अदुष्टेति। बाधरहितत्वेनाव्यभिचारित्वावगमं द्वितीयं कल्पं निराचष्टे—नापीति। तत्र जिज्ञासते, किं सर्वेषां पुरुषाणां दृष्ट्या बाधरहितत्वेनाव्यभिचारित्वावगमः उत प्रतिपत्तृमात्रस्य दृष्ट्या तदवगमः। आद्येऽसम्भवमाह—सर्वपुरुषेति। द्वितीये विभ्रमेऽतिव्याप्तिमाह—प्रतिपत्तुरिति। निधनादिना—अत्रादिपदेन स्वस्थस्यापि जिज्ञासाभावो ग्राह्यः। प्रवृत्तिसामर्थ्येनेति तृतीयं कल्पं दूषयति—नापि तृतीयः। अनिरुक्तिं सुस्पष्टयति—प्रवृत्तिरित्यादिना। पुंसः समीहा=चेष्टा प्रवृत्तिः, तस्याश्चेष्टायाः फलेनोदकादिनाऽभिसम्बन्धः प्रवृत्तिसामर्थ्यं, तेन सामर्थ्येनोदकादिविज्ञानस्याऽर्थाव्यभिचारित्वमवगम्यते इति वस्तुस्थितिः। तच्चेदं प्रवृत्तिसामर्थ्यं लिङ्गमवगतं सदव्यभिचारित्वं बोधयतीति वक्तव्यम्। तत्रापीयं जिज्ञासोदेति—किं तत्प्रवृत्तिसामर्थ्यं ज्ञानमात्रलिङ्गेनावगतं सद्विज्ञानस्याव्यभिचारितामवगमयेत्, अथवाऽव्यभिचारिज्ञानत्वेनावगतं सद्विज्ञाननिष्ठाव्यभिचारितागमकं तत्प्रवृत्तिसामर्थ्यमिति विकल्प्याद्येऽनैकान्तिकतामाह—भ्रान्तीति। द्वितीये परस्पराश्रयतामाह—नापि द्वितीयः। अवगम्यतां नामाव्यभिचारितानुमापकः प्रवृत्तिसामर्थ्यलक्षणो हेतुः, स किमन्वयव्यतिरेकी; उत केवलव्यतिरेकी? आद्ये दृष्टान्तासम्भवमाह—सर्वेति। द्वितीये वाचस्पतिमिश्रसमर्थितेऽपि कल्पे हेतोर्विरोधदोषमाह—हेतोरिति।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

"मणिप्रदीपप्रभयोर्मणिबुद्ध्याभिधावतोः।
मिथ्याज्ञानाविशेषेऽपि विशेषोऽर्थक्रियां प्रति" । इति (प्रमा०वा०३/५७)

कश्चायं फलाभिसम्बन्धः ? ज्ञानप्रतिभासितार्थस्य प्राप्तिः ? उत तज्जातीयस्य ? नाद्यः; वृषभमहिषपरिवर्तनादिना क्रियाविभागन्यायेन विज्ञानावभासितसलिलावयविनो विनाशेन ज्ञानस्य फलाभिसम्बन्धाभावप्रसङ्गात् । न द्वितीयः; प्रहतारादिविज्ञाने तस्य तज्जातीयस्य वा प्राप्त्यभावात् । नापि चतुर्थः;अन्यदप्यनुमानान्तरम्? उत प्रत्यक्षम्? नाद्यः; लिङ्गस्याव्यभिचरितत्वलक्षणसाध्येन व्याप्तिग्रहणदशायामेवाव्यभिचारस्य गृहीतत्वे पुनरनुमानानुपयोगात्, अगृहीतत्वे वानुमानस्याप्रवृत्तेः। न द्वितीयः; ज्ञानग्राहकेणैव मानसप्रत्यक्षेण तस्यार्थाव्यभिचारित्वग्रहणेऽभ्यासदशायामिवानभ्यासदशायामपि संशयानुदयप्रसङ्गात् ।

किञ्चेदमव्यभिचारित्वं नाम विज्ञानस्य ? किं प्रमात्वापरपर्याया जातिः ? उतोपाधिः ? न तावज्जातिः; जातिसङ्करप्रसङ्गात् । तथाहि सर्वं ज्ञानं धर्मिण्यभ्रान्तं प्रकारे तु विपर्यय इति वदद्भिरिदं रजतमिति विभ्रमज्ञानमिदमंशे प्रमाणमप्रमाणं च रजतांशेऽभ्युपगम्यते परीक्षकैः, तथाच—

"अन्योऽन्यपरिहारेण भिन्नव्यक्तिनिवेशिनोः ।
सामान्ययोः समावेशो जातिसङ्कर उच्यते ।।"

इत्युक्तन्यायेन स्मृतौ प्रमात्वपरिहारेणैवाप्रमात्वस्य वृत्तेरप्रमात्वपरिहारेण च प्रत्यक्षादौ

तत्र धर्मकीर्तिवाक्यं सम्वादयति—मणिप्रदीपेत्यादि ।

सम्प्रति सर्वज्ञानानुगतं प्रवृत्तिसामर्थ्यमशक्यनिरूपणमित्याह—कश्चायमिति । फलाभिसम्बन्धं=साफल्यं विकल्प्य दूषयति—फलाभिसम्बन्ध इति । तत्र ज्ञानप्रतिभासितार्थस्य प्राप्तिरूपकल्पं दूषयति—नाद्य इति । ज्ञानप्रतिभासितार्थस्य सजातीयस्य प्राप्तिरूपं द्वितीयं कल्पं दूषयति—न द्वितीयः । सत्यपि प्रहतारादिविज्ञाने न तद्ग्रहादेर्नापि तत्सजातीयस्य च प्राप्तिर्भवति । अन्येन केनचित्प्रमाणेनाव्यभिचारित्वावगम इति तुरीयपक्षं दूषयति—नापि चतुर्थः । अत्रान्यत्पदेनानुमानान्तरं विवक्षितं, प्रत्यक्षं वा । आद्ये येन लिङ्गेनाव्यभिचारित्वमनुमीयते, तत्र लिङ्गे व्याप्तिग्रहकालेऽव्यभिचारस्य गृहीतत्वे पुनस्तत्रानुमानानुपयोगः, अगृहीतत्वे चानुमानस्य प्रवृत्त्यभावः, नहि हेतौ साध्यनिरूपितव्याप्तिग्रहं विना क्वाप्यनुमानं प्रवर्तमानं दृश्यते इति भावः । प्रत्यक्षपक्षं दूषयति—नद्वितीयः । तत्रापि बाह्यप्रत्यक्षस्य दूषितत्वेनासम्भवापत्तेरुक्तत्वात् । ज्ञानग्राहकेणैव मानसप्रत्यक्षेण ज्ञानग्रहणवज्ज्ञानगताव्यभिचारित्वस्य पूर्वमेव निर्णीतत्वेऽनभ्यासदशायमपि संशयानुत्पत्तिप्रसङ्गः स्यात् ।

इत्थमव्यभिचारित्वस्य ज्ञापकाभावेनासिद्धिमुक्त्वाऽव्यभिचारित्वस्य दुर्निरूप्यत्वमाह—किञ्चेदमिति । ज्ञाननिष्ठाव्यभिचारित्वं न प्रमात्वनामिकाजातिर्वक्तुं शक्या, साङ्कर्यदोषप्रसङ्गात् । तथाहि प्रमात्वरूपमव्यभिचारित्वं न जातिः । इदं रजतमित्यादिविभ्रमेषु धर्म्यंशेऽव्यभिचारित्वरूप-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रमात्ववृत्तेरेकस्यां विभ्रमव्यक्तावुभयसमावेशे कथं न जातिसङ्करः स्यात् ? उपाधिश्च बाधितत्वाविसंवादित्वादिः प्रागुक्तप्रकारेणैवापाकरणीयः; अस्तु वा यथाकथंचिदवि रितरमणीयमव्यभिचारित्वम्, तथापीश्वरज्ञानेऽव्याप्तिः । तस्य नित्यत्वादेवेन्द्रियसन्नि जन्यत्वात् । जन्यप्रत्यक्षलक्षणमिति चेत्, तथाप्यनुमितावतिव्याप्तिः, मनोलक्षणेन्द्रियस्या लक्षणेनार्थेन सन्निकर्षादनुमितेर्जायमानत्वात् । संयुक्तेऽर्थ इति विशेषणान्नाति व्याप्तिरिति चेत्, न, युक्तावस्थायामुपजायमानपरमाणुविषययोगिप्रत्यक्षेऽव्याप्ते अयोगिप्रत्यक्षलक्षणमिति चेत्, न; प्रत्यभिज्ञाने तत्तांशेऽव्याप्तेः । तत्रापि संयुक्तविशेषण लक्षणः सन्निकर्षोऽस्तीति चेत्, मैवम्; अयमग्निमान्पर्वत इत्यनुमानेऽतिव्याप्ते तत्रापि संयुक्तविशेषणतालक्षणसन्निकर्षस्य तत्तांश इव सद्भावात् । लिङ्गाद्यजन्य सतीति विशेषणाददोष इति चेत्, न; इन्द्रियार्थसन्निकर्षपदवैयर्थ्यप्रसङ्गात् तेनाप्यतद्व्यावृत्तिमुखेन लिङ्गाद्यजन्यत्वमेवोच्यत इति चेत्, न; यत्किंचिदपेक्ष सर्वस्यापि लिङ्गत्वसम्भवेन लक्षणस्यासम्भवित्वप्रसङ्गात् । पारोक्ष्यानधिकरण प्रत्यक्षफलं तत्करणं च प्रत्यक्षप्रमाणमिति सूत्रेण सूत्रितं लक्षणमिति चेत्, न; प्रमात्वपरो

प्रमात्वाभ्युपगमादितरांशे प्रकारे चाप्रमात्वाभ्युपगमात् । परस्परविरोधिनोरुभयोरेकत्र ज्ञाने वर्तमा तया साङ्कर्यप्रसङ्गः । साङ्कर्यं नाम परस्परविरोधिनोर्धर्मयोरेकत्र समावेश इति । प्रमात्वं विहायाप्रमा स्मृतौ वर्तते, तथाऽप्रमात्वं विहाय प्रमात्वं प्रत्यक्षादौ । इदं रजतमित्यत्र तूभयोरेकत्र भ्रमव्य समावेशेन साङ्कर्यान्नाव्यभिचारित्वं प्रमात्वरूपा जातिर्भवितुं शक्येतिभावः । नाप्यव्यभिचारि मुपाधिर्भवितुमर्हति, अबाधितत्वासंवादितत्वस्योपाधेः प्रागुक्तरीत्याऽपाकरणीयत्वात् । तथा सर्वेषां पुंसां दृष्ट्याऽबाधितत्वमसंवादितत्वं च विवक्षितं ? प्रतिपत्तृमात्रदृष्ट्या वा ? उभ दोषस्योक्तत्वादिति भावः । अवयवशः प्रत्यक्षलक्षणं दूषयित्वा समुदिते प्रत्यक्षलक्षणे दू दर्शयितुमारभते—अस्तु वेत्यादि । ईश्वरप्रत्यक्षे निरुक्तलक्षणस्याव्याप्तिं संगमयति—तस्येति अनीश्वरप्रत्यक्षस्यैव लक्षणत्वेऽप्यनुमितावतिव्याप्तेर्वारयितुमशक्यत्वात् । अनुमितावपि निरुक्तल संगमयति—मनोलक्षणेति । नचेन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं संयुक्तेऽर्थे प्रत्यक्षमिति लक्षणं विवक्षि मिति वाच्यम्, युक्तयोगिनामिन्द्रियार्थसन्निकर्षमन्तरेणैव परमाण्वादिविषयकप्रत्यक्षेऽव्याप्ते अयोगिप्रत्यक्षस्य लक्षणत्वे प्रत्यभिज्ञाने तत्तांशेऽव्याप्तेः । न च प्रत्यभिज्ञानेऽपि संयुक्तविशेषण सन्निकर्षस्य वर्तमानतयाऽव्याप्तिः शङ्कनीयेति वाच्यम्, अयं पर्वतो वह्निमानित्यनुमानेऽतिव्याप्ते तत्रापि संयुक्ते पर्वतेऽग्नेर्विशेषणत्वस्याभ्युपगमात् । इन्द्रियार्थसन्निकर्षपदस्य वैयर्थ्यप्रसङ्गभिया लिङ्गाद्यजन्यत्वविशेषणोपादानं दोषवारकं सम्भवतीति भावः । न चेन्द्रियार्थसन्निकर्षजन्ये लिङ्गादिजन्यत्ववारणाय लिङ्गाद्यजन्यत्वमेवोच्यते इति वाच्यम्, चक्षुरादेरपि यत्किञ्चिद लिङ्गत्वेन सर्वप्रत्यक्षाणामपि लिङ्गजन्यत्वप्रसक्तेरित्याह—न यत्किञ्चिदपेक्षयेति । फल लक्षणं शङ्कते—पारोक्ष्येति । "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि" (न्या. द. १।१।३) इति प्रमाकरणं प्रमाणम्, प्रमा च परोक्षत्वानधिकरणमिति प्रत्यक्षफलं तत्करणं प्रत्यक्षप्रमाणमिति सू सूचितं लक्षणमिति । अनुमित्यादिवारणाय पारोक्ष्यानधिकरणेत्युक्तम् । भ्रमविशेषवारणाय प्रमापद अत्र लक्षणनिरुक्तावसम्भवदोषमाह—न, प्रमात्वेति । प्रमात्वस्य जातित्वमुपाधित्वं चा

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्वयोर्दुर्निरूप्यत्वेन तदधीननिरूपणस्यापि लक्षणस्य दुर्निरूपत्वात्। न च प्रमात्वस्य जातित्वेन निरुक्तिः; भ्रमज्ञाने जातिसङ्करस्योक्तत्वात्। न तत्रेदमंशादिप्रत्यये प्रमात्वं जातिः, किंतूपाधिनिबन्धनः प्रमाव्यवहार इति चेत्, न; सर्वप्रमाव्यवहारस्यापि तथात्वोपपत्तौ जातेरपलापापत्तेः। न चैवं गोत्वापलापप्रसङ्गः; जातिमन्तरेणोपाधिमात्रनिबन्धनतया गोव्यवहारस्य क्वचिदप्यनङ्गीकारात्। मृद्गवादौ गोव्यवहारो न जातिनिबन्धनो नाप्युपाधिनिबन्धनः किंत्वौपचारिक इति न किञ्चिद्दुष्यति।

न च प्रमात्वजातेर्व्यञ्जकमस्ति। तथाहि—तत्किमबाधितानुभूतित्वम्? किं वा यथार्थानुभूतित्वम्? आहोस्विदव्यभिचार्यनुभूतित्वम्? अविसम्वाद्यनुभूतित्वं वा? संशयविपर्ययव्यतिरिक्तस्मृतित्वानधिकरणज्ञानत्वं वा? एतद्घटज्ञानवृत्तित्वे सत्येतद्धूमजन्यवह्निज्ञानवृत्तिसंशयावृत्तिजातिमत्त्वं वा। न प्रथमः; इदानीं बाधविरहस्यातिप्रसञ्जकत्वात्। कालान्तरे बाधविरहस्य दुरवधारणत्वात्, सर्वपुरुषाबाधस्य पुरस्तादेव निरस्तत्वात्। न द्वितीयः; यथार्थत्वानिरुक्तेः, तत्किमर्थसत्तामात्रविषयत्वम्? उत यावत्प्रतीयमानार्थसत्त्वम्? आहोस्विदबाधितार्थवत्त्वम्? न तावदर्थसत्तामात्रविषयत्वम्; भ्रमस्यापि प्रमात्वप्रसङ्गात्। नापि यावत्प्रतीयमानार्थसत्त्वम्, प्रत्यभिज्ञायामतीतानागतानुमानेषु वैधज्ञाने च तदभावेन तेषामप्रमात्वापातात्। अबाधितार्थवत्त्वं तु पुरस्तादेवापहस्तितम्, नापि तृतीयः; ज्ञानार्थयोर्विभिन्नदेशकालयोर्धूमाग्न्योरिवाविनाभावा-

---

निरुक्तदूषणं वारयितुमशक्यमित्याह—न प्रमात्वस्येत्यादिना। न चैवं गोत्वादिजात्यपलापप्रसङ्गः शङ्कनीयः, जातिमन्तरेणोपाधिमात्रनिमित्ततया गोव्यवहारस्य क्वचिदप्यनङ्गीकारात्। मृन्निर्मितगवादौ गोव्यवहारो जात्युपाधिनिबन्धनमन्तरेणैवौपचारिकत्वेन सम्भवे न किञ्चिदपि दूषणमिति।

व्यञ्जकाभावादपि प्रमात्वजातिं निराकुरुते—न च प्रमात्वजातेरिति। षड्धा विकल्प्याद्यं दूषयति—न प्रथम इति। (१) अबाधितानुभूतित्वं प्रमात्वजात्यभिव्यञ्जकमिति नोचितम्, एतत्कालबाधविरहस्याबाधितानुभूतित्वपदेन विवक्षितत्वे एतत्कालबाधविरहे भ्रमेऽपि सत्त्वेनातिव्याप्तेः। कालान्तरे बाधविरहस्य विवक्षितत्वेऽवधारयितुं दुःशक्यत्वात्। सर्वपुरुषदृष्टयामबाधस्य पुरस्तादेव निराकृतत्वात्। असर्वज्ञाविज्ञेयत्वादित्यर्थः। (२) यथार्थाभूतित्वमबाधितत्वमिति न द्वितीयः, यथार्थत्वस्य निर्वक्तुमशक्यत्वात्। तत्र त्रिधा विकल्पमाह—तत्किमर्थेत्यादिना। तत्राद्यं दूषयति—न तावदिति। आद्येऽर्थसत्तामात्रविषयत्वस्य यथार्थत्वाभ्युपगमे भ्रमस्यापि प्रमात्वप्रसङ्गः। भ्रमज्ञानेऽपीदमंशस्यार्थस्य सत्त्वात्तत्रापि व्यञ्जकविद्यमानत्वेन व्यङ्ग्यप्रमात्वप्रसक्तेरित्यर्थः। द्वितीयं दूषयति—नापीति। यावत्प्रतीयमानार्थसत्त्वं यथार्थत्वमित्युक्तौ प्रत्यभिज्ञायां प्रत्यभिज्ञानोदयकाले तत्ताविशिष्टार्थस्याविद्यमानतयाऽप्रमात्वापत्तिः। अतीतानागतानुमानेषु तदानीमर्थाभावेन, विधिवाक्यजन्यज्ञानेऽपि साध्यार्थविषयत्वात्तदानीमभावेन च तयोरप्यप्रमात्वप्रसक्तिरव्याप्तिरित्यर्थः। मूलद्वितीयान्तर्गतं तृतीयं दूषयति—अबाधितार्थवत्त्वमिति। एतस्य प्रथमविकल्पनिराकरणेन निराकृतत्वात्। (३) अव्यभिचार्यनुभूतित्वमिति तृतीयं कल्पं दूषयति—नापि तृतीयः। किं यत्रार्थस्तत्र ज्ञानमिति देशतोऽव्यभिचारित्वं विवक्षितमुत यदार्थस्तदाज्ञानमिति कालतोऽव्यभिचारित्वं विवक्षितम्? उभयं वारयति—ज्ञानार्थयोरिति। सुखादिषु देशतो, वर्तमानवस्तुषु

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भावात्। चतुर्थे पि पक्षे ज्ञानान्तरेण तथैवोल्लिख्यमानत्वम् ? विपरीततया वाऽनुल्लि- ख्यमानत्वमविसंवादित्वम् ? नाद्यः; रजतं रजतमिति धारावाहिकविभ्रमेष्वपि भावात्। न द्वितीयः; असञ्जातबाधस्यापि भ्रमस्य प्रमात्वापातात्। नापि पञ्चमः; संशयविपर्यय- व्यतिरिक्तस्मृतित्वानधिकरणज्ञानत्वस्य विभ्रमेऽपि धर्म्यंशेऽभावात्। अन्यथा "सर्वं ज्ञानं धर्मिण्यभ्रान्तं प्रकारे तु विपर्ययः" इत्यभ्युपगमपरित्यागप्रसङ्गात्। संशयविपर्ययस्मृती- नामनिरुक्तेश्च तदतिरिक्तत्वमपि दुर्भणम्।

तत्र किमनवधारणज्ञानं संशयः? विरुद्धोभयकोटिसंस्पर्शिज्ञानं वा? अनिर्द्धारितत्वविशे- षितं वा जिज्ञासाजनकं मिथ्याज्ञानं वा? विपर्ययेतरमिथ्याज्ञानं वा? संशयत्वजाति- योगि वा? सर्वथापि न निरूपणपथमवतरति।

अनिरुक्तेरवधृतेरतिव्याप्तेर्द्वयोरपि।
अव्याप्तेर्विभ्रमाभेदाज्जातिसाङ्कर्यसक्तितः ॥१६॥

नाद्यः; अवधारणानिरुक्तावनवधृतत्वस्याप्यनिरूपणात्। तथाहि—किं ज्ञानमात्रमवधारणम्? उत एकाकारप्रतिनियतम्? आहोस्वित्संशयविरोधिज्ञानं वा? संशयविरोधिप्रमाणज्ञानं वा? आद्ये व्याघातः;ज्ञानं भवति न भवति चेत्युक्तत्वात्। द्वितीये चित्रः पटश्चैत्रो मैत्रश्चेत्यादि- प्रमाणज्ञानानामपि संशयत्वापातः, एकाकारप्रतिनियमाभावात्। नापि तृतीयचतुर्थौ; संशयानिरुक्तौ तद्विरोधस्यानिरुक्तेः। किं चैवंसति संशयविरोधिज्ञानादन्यज्ज्ञानं संश-

च कालतोऽविनाभावस्य सत्त्वेऽपि सर्वप्रमितीनां तथात्वाभावेन तास्वव्याप्तिरित्यर्थः। (४) चतुर्थ- कल्पेऽविसंवाद्यनुभूतित्वपक्षेऽविसंवादित्वं विकल्प्याद्यं दूषयति—नाद्य इति। न तावज्ज्ञानान्तर- समर्थितविषयकत्वमाद्यमुचितम्? इदं रजतमितिभ्रमज्ञानस्यापि पुनरिदं रजतमिति भ्रमज्ञानेन समर्थनं भवति। तथः चैवंविधधारावाहिकविभ्रमेषु तथाविधत्वात्तत्रातिव्याप्तिः। असंजातबाध- कत्वमविसंवादित्वमिति द्वितीयोऽपि न श्रेयान्? असंजातबाधस्य भ्रमस्यापि प्रमात्वापत्तेः। (५) नापि संशयविपर्ययातिरिक्तस्मृतित्वानधिकरणत्वं पञ्चमं प्रमात्वजातेरभिव्यञ्जकम्, तस्य विभ्रमेऽपि धर्म्यंशे सत्त्वेनातिव्याप्त्या प्रमात्वप्रसङ्गात्। विपक्षे दोषमाह—अन्यथेति। किं च संशयविपर्ययस्मृतीनां निर्वचनाभावात्तदतिरिक्तत्वमपि प्रमात्वजातेरभिव्यञ्जकमिति वस्तुमशक्य- मिति भावः।

तत्र तावत्संशयलक्षणानि विकल्पयितुमुपक्रमते। षड्धाविकल्पमानमपि संशयलक्षणं न निरूपणपथमारोहतीति सम्भवद्दूषणानि श्लोकेन संकलयति—अनिरुक्तेरित्यादि। प्रथमेऽवधृते- निरुक्त्याऽनवधारणस्याप्यनिरुक्तेरसिद्धिः। द्वितीयतृतीययोरतिव्याप्तिः। चतुर्थेऽव्याप्तिः। पञ्चमे विभ्रमाभेदात्। षष्ठे च जातिसङ्करप्रसक्तित इति संग्रहश्लोकयोजना। तत्राद्ये (१) कल्पे विकल्पयितुमारभते—तथाहीत्यादिना। ज्ञानमात्रमवधारणमितिपक्षे ज्ञानत्वानधिकरणं ज्ञानमव- धारणज्ञानमित्यस्यार्थोऽयं यत्किल अज्ञानरूपज्ञानमिति। तथा च वदतो व्याघातः। यदज्ञानं तत्कुतो वा ज्ञानं भवितुमर्हति। एकाकारतानियतज्ञानमवधारणमिति द्वितीयपक्षे "चित्रः पटः" "चैत्रो मैत्रश्च" इत्यादि प्रमाणज्ञानस्यानवधारणत्वं संशयत्वं वा प्रसज्येत। नह्येतत्प्रमाणज्ञानमेकाकारं नियतमस्ति

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इत्यापतेत् । तथाचानुत्पन्नसंशयस्य संशयाविरोधितया, जायमानप्रमाणज्ञानमपि संशयः स्यात् । नापि द्वितीयः, भेदाभेदशीतोष्णादिविषयप्रमाणज्ञानानां विरुद्धोभयकोटिसंस्पर्शिनां संशयत्वप्रसङ्गात् । नापि तृतीयः; निर्धारणानिरुक्तावनिर्धारितत्वस्यैवानिरुक्तेः; । अनिर्धारितत्वशब्देन कोटिद्वयस्याव्यवस्थितत्वं विवक्षितमिति चेत्, तदेव विविच्यताम् ! किमव्यवस्थितत्वं कोटिद्वयस्य स्वरूपम्? उत धर्मः? न प्रथमः; कोटिद्वयस्वरूपनिश्चयस्यापि संशयत्वापत्तेः । नापि द्वितीयः; तादृग्धर्मविशिष्टकोटिद्वयग्राहिज्ञानविषयप्रमाया अपि संशयत्वापातात् । नापि चतुर्थः; अजिज्ञासोरपि स्थाण्वादौ संशयदर्शनेन लक्षणस्याव्यापित्वात् । नापि पञ्चमः; विकल्पासहत्वात् । तथाहि—संशयस्य विपर्यासाद्विषयविशेषेण ? कारणविशेषेण ? जातिविशेषेण वा भेदः स्यात्? नाद्यः; विषयविशेषानिरुक्तेः तथाहि——न तावदुभयविधिर्विषयः,एतौ स्थाणुपुरुषाविति समुच्चयनिश्चयस्यापि संशयत्वापातात् । नाप्युभयनिषेधः; न स्थाणुर्न पुरुष इति प्रत्ययप्रसक्तेः । नाप्यन्यतरनिषेधः; तदितरावधारणापत्तेः । नाप्युभयविधिनिषेधौ; स्थाणुर्भवति न भवति पुरुषो भवति न भवतीत्युभयविधिनिषेधावधारणप्रसङ्गात् । नित्योऽनित्यो वेत्यत्रैकतरनिषेधस्यान्यतरविधिरूपतयोभयविधिनिषेधयोरसम्भवाच्च । न द्वितीयः; कारणविशेषानिरुक्तेः । स हि सामग्री वा? तदेकदेशो-

---

एतेष्वनेकाकारत्वस्योपलम्भात् । नापि तृतीयचतुर्थौ, संशयस्य निर्वचनाभावे तद्विरोधस्य निर्वक्तुमशक्यत्वात् । किं चैवंसति संशयविरोधिज्ञानादन्यस्य ज्ञानस्य संशयत्वापत्तिः । तथा चानुत्पन्नसंशयस्य पुरुषस्योत्पन्नं निर्णयज्ञानमपि संशयपथमापतेत् । (२) विरुद्धोभयकोटिसंस्पर्शिज्ञानं संशयः इति द्वितीयकल्पेऽपि दोषमाह—नापि द्वितीयः । तत्र विरुद्धोभयकोटिसंस्पर्शित्वेन भेदाभेदादिविषयप्रमाणज्ञानानां संशयत्वप्रसङ्गः । (३) अनिर्धारितविशेषितं ज्ञानं संशय इति तृतीयकल्पेऽपि दोषमाह—नापि तृतीयः । निर्धारणानिर्वचनेनानिर्धारितत्वस्य निर्वक्तुमशक्यत्वात् । ननु चानिर्धारितत्वशब्देन कोटिद्वयस्याव्यवस्थितत्वं विवक्षितम्मिति. चेत्तर्हि कोटिद्वयमेव विविच्यताम् । अव्यवस्थितत्वं कोटिद्वयस्य स्वरूपमित्युक्तौ कोटिद्वयस्वरूपनिश्चयस्यापि संशयत्वापत्तिः । अव्यवस्थितत्वं कोटिद्वयस्य धर्मश्चेत्तर्हि तादृशाव्यवस्थितत्वरूपधर्मविशिष्टकोटिद्वयग्राहिज्ञानविषयकप्रमात्मकस्यानुव्यवसायस्यापि संशयापत्तिः । (४) जिज्ञासाजनकं मिथ्याज्ञानं संशय इति चतुर्थकल्पेऽपि दोषमाह—नापि चतुर्थः । अजिज्ञासोरपि पुरुषस्य तत्र तत्र संशयदर्शनेनैतल्लक्षणस्याव्यापकत्वापत्तेः । (५) विपर्ययेतरमिथ्याज्ञानं संशय इत्यत्रापि दोषमाह—नापि पञ्चमः । तत्र विकल्प्य दूषणं वक्ति—तथाहीति । संशयस्य विपर्यासाद्भेदप्रयोजको विषयविशेषो वा कारणविशेषो वा जातिविशेषो वा । नाद्यः, तस्यानिरुक्तिं विकल्प्य निराचष्टे—न तावदिति । संशयस्य विषयो नोभयविधिः, तथासति एतौ स्थाणुपुरुषाविति समूहालम्बननिश्चयस्यापि संशयत्वापत्तिः । नाप्युभयनिषेधः संशयस्य विषयः, तथासति न स्थाणुर्न पुरुष इति प्रतीतिः स्यात् । नाप्यन्यतरनिषेधः संशयस्य विषयः, तदान्यतरावधारणापत्तेः । नाप्युभयविधिनिषेधौ संशयस्य विषयौ, तथासति स्थाणुर्भवति, न भवति; पुरुषो भवति न भवति, इत्युभयविधिनिषेधावधारणप्रसङ्गः । नित्योऽनित्योवेत्यत्रैकतरनिषेधस्यान्यतरविधेः सुतरां सिद्धतयोभयविधिनिषेधयोरसम्भवाच्च । कारणविशेषनिबन्धनो विपर्ययात्संशयस्य भेद इति पक्षं दूषयति—न द्वितीयः । कारणविशेषस्य संशयभेदप्रयोजकस्य निर्वक्तुमशक्यत्वात् ।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वा ? नाद्यः, अतीन्द्रियत्वेन तस्याः प्रत्यक्षत्वायोगात्। लिङ्गाभावेनानुमानतोऽप्यसिद्धेः। न च संशयज्ञानं लिङ्गम्; तस्येदानीमेव निरूप्यमाणत्वात्। नापि द्वितीयः; प्रत्यक्षस्य तदेकदेशस्य साधारणधर्मदर्शनादेः स्वविषयतयानुव्यवसायप्रत्यक्षजनकत्वेनातिव्यापकत्वात्, अप्रत्यक्षस्य च तदेकदेशस्य सामग्रीनिरासेन निरस्तत्वात्। नापि तृतीयः; जातिसङ्करापत्तेः। अयं स्थाणुः पुरुषो वेत्यत्र धर्म्यंशे तस्यैव ज्ञानस्य निश्चितत्वम्, विशेषांशे विकल्पांशे च संशयत्वमित्येकस्यैव ज्ञानस्य विरुद्धजातिद्वयलिङ्गिनः प्रसङ्गात्। एतेन षष्ठोऽपि पक्षो निरस्तः। तस्मान्न संशयलक्षणनिरुक्तिः।

नापि विपर्ययस्य। तथाहि—मिथ्याध्यवसायो विपर्ययः, इति भूषणकारभाषितं लक्षणं तावदयुक्तम्, मिथ्यात्वानिर्वचनात्—तत्किमप्रमात्वम्? उतार्थव्यभिचारित्वमथोपदर्शितार्थाप्रापकत्वम्? अर्थक्रियाशून्यत्वं वा?

आद्यकल्पेष्व तिव्याप्तेरव्याप्तेश्चान्त्ययोर्द्वयोः।
न मिथ्याध्यवसायत्वं विपर्यासस्य लक्षणम् ॥२०॥

नाद्यः; अप्रमात्वे सत्यध्यवसायरूपायां स्मृतावतिव्याप्तेः। न द्वितीयः; देशतः कालतोऽर्थव्यभिचारिषु प्रमाणज्ञानेष्वपि विपर्ययत्वप्रसङ्गात्। न तृतीयः; चन्द्रतारकादिप्रमाणज्ञानेष्वतिप्रसक्तेः। इदं रजतमित्यादिज्ञानेषु चोपदर्शितेदमंशप्रापकत्वादव्याप्तेः।

अत्र कारणशब्देन पूर्णसामग्रीकारणस्य विवक्षायां तस्या अतीन्द्रियत्वेन प्रत्यक्षत्वायोगात्। लिङ्गाभावेन कृत्स्नसामग्र्या अनुमानेनापि साधयितुमशक्यत्वात्। न च संशयज्ञानरूपकार्यात्संशयसामग्री तत्रानुमातुं शक्येति वाच्यम्; तस्याद्यापि निरूप्यमाणत्वात्। सामग्र्येकदेशस्य विपर्ययात्संशयस्य भेदकत्वस्वीकारपक्षे तदेकदेशः प्रत्यक्षगम्यस्तदगम्यो वेति विकल्पते। नाद्यः, सामग्र्येकदेशस्य प्रत्यक्षस्योच्चैस्त्वादिसाधारणदर्शनादेः स्वविषयकानुव्यवसायात्मकप्रत्यक्षजनकत्वेनातिव्यापकत्वात्। तस्यानुव्यवसायस्यापि संशयसामग्र्येकदेशोच्चैस्त्वादिसाधारणदर्शनजन्यत्वात्। नापि द्वितीयः, प्रत्यक्षागम्यस्य संशयसामग्र्येकदेशस्य सामग्रीनिरासेन निरस्तत्वात्। तृतीयपक्षं जातिविशेषघटितं दूषयति—नापि तृतीयः, जातिसांकर्यदोषापत्तेः। साङ्कर्यं संघटयति—अयं स्थाणुरिति। संशयत्वजातियोगिज्ञानं संशय इति षष्टकल्पेऽपि साङ्कर्यदोषमतिदिशति—एतेनेति। संशयलक्षणनिर्वचनमुपसंहरति—तस्मान्नेति।

प्रमात्वजात्यभिव्यञ्जकपञ्चमकल्पान्तर्भूतं विपर्ययपदार्थं दूषयितुं प्रतिजानीते—नापि विपर्ययस्येति। तत्र भूषणकारोक्तं विपर्ययलक्षणं निराकुरुते—तथाहीति। "मिथ्याध्यवसायो विपर्ययः" (न्यायसार पृ० २) इति लक्षणमयुक्तं, मिथ्यात्वानिरुक्तेः। सर्वेषु विकल्पेषु दूषणानि श्लोकेन संकलयति—आद्येत्यादिना। आद्ये त्रिषु कल्पेष्वतिव्याप्तिरन्त्ययोर्द्वयोरव्याप्तिरिति श्लोकयोजना। श्लोकार्थं विशदयति—नाद्यः, मिथ्यात्वमप्रमात्वं चेत्तर्हि निश्चयरूपायां स्मृतावतिव्याप्तिः, तत्राप्रमात्वमिथ्यात्वं चेत्युभयोर्विद्यमानत्वात्। द्वितीयकल्पं दूषयति—न द्वितीयः। अर्थव्यभिचारित्वं मिथ्यात्वमिति पक्षे देशतः कालतोऽर्थव्यभिचारिषु प्रमाणज्ञानेष्वपि निरुक्तार्थव्यभिचारित्वमिथ्यात्वलक्षणस्यातिव्याप्तिः। तृतीयकल्पं दूषयति—न तृतीयः। उपदर्शितार्थाप्रापकत्वं मिथ्यात्वमितिपक्षे चन्द्रता-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नापि चतुर्थः; मिथ्याऽहिदंशप्रतिसूर्यकाद्यनेकार्थानां निधनप्रकाशनाद्यर्थक्रियादर्शनात् । न च ज्ञानमेवार्थक्रियाकारि नार्थ इति वाच्यम्, ज्ञानमात्रस्य तद्धेतुत्वेऽतिप्रसङ्गात्, अर्थविशेषितस्य तद्धेतुत्वे चार्थस्यापि तद्धेतुत्वापातात् । तदेवं तृतीयचतुर्थयोरव्याप्तिः । 'अतस्मिंस्तदिति प्रत्ययो विपर्ययः' इत्युद्द्योतकरीयमपि लक्षणमयुक्तम्; अतिव्याप्तेः——भवति हि वल्मीकादौ स्थाणुर्वा पुरुषो वेति संशयः, न स्थाणुर्न पुरुष इत्युभयबाधदर्शनात् अतस्मिंस्तदिति प्रयत्यः, न चासौ विपर्ययः । अतस्मिन्निति च स्वात्यन्ताभावाधिकरणे तदिति प्रत्ययविवक्षायां संयोगविभागशब्दात्मविशेषगुणेषु प्रदेशवृत्तिषु स्वात्यन्ताभावसमानाधिकरणेषु प्रमारूपोऽपि प्रत्ययो विपर्ययः स्यात् । एतेन बाध्यं ज्ञानम्, दुष्टकरणजन्यं वा ज्ञानं विपर्यय इति लक्षणं निरस्तम्; संशयेऽतिव्याप्तेर्दर्शितत्वात्, बाधानिरुक्तेश्च । किं विरोधिप्रमाणज्ञानं बाधः ? किं वा विपर्ययविरोधिप्रमाणज्ञानम् ? विषयापहारो वा ? आद्ये पूर्वोत्तरप्रमाणज्ञानानां वध्यघातकलक्षणेऽतिव्याप्तिः । द्वितीये परस्पराश्रयता । न तृतीयः; तथाहि——विषयापहारो नाम पूर्वज्ञानोपदर्शितार्थासत्त्वबोधनमात्रम् ? उत तथा प्रमितिः ? उत यद्देशकालविशिष्टतया यत्प्रतीतं तस्य तत्रैवासत्त्वबोधनम् ? नाद्यः; नायं देवदत्तो न जीवतीति विभ्रमप्रत्ययेन देवदत्तादिप्रत्ययानां बाधितत्वेनाप्रमात्वप्रसङ्गात् । न द्वितीयः;

रकादिप्रमाणज्ञानेष्वतिव्याप्तिः, इदं रजतमित्यादिज्ञानेषु चोपदर्शितेदमंशप्रापकत्वादव्याप्तिः । चतुर्थेऽव्याप्तिदोषमाह—नापि चतुर्थः । अर्थक्रियाशून्यविषयकत्वस्य मिथ्यात्वाभ्युपगमे भ्रमज्ञानविषयमिथ्यासर्पदंशेन निधनं दर्पणादिप्रतिबिम्बितसूर्येण प्रकाशो द्वितीयसूर्यदर्शनेन वाऽर्थक्रिया दृश्यते, तत्र त्वदभिमतमिथ्यात्वाभावादव्याप्तिरित्यर्थः । न च तत्रार्थक्रियाशून्यत्वेऽपि ज्ञानस्यैवार्थक्रियाकारित्वाभ्युपगमेन न तत्र लक्षणाव्याप्तिरिति वाच्यम्; ज्ञानमात्रस्यार्थक्रियाकारित्वाभ्युपगमेऽन्यज्ञानस्यापि मरणादिरूपसाधकत्वप्रसक्तिः, ज्ञानविशेषणीभूतस्यार्थस्यापि तादृशफलसाधकत्वप्रसङ्गश्च स्यात् । श्लोकोक्तामन्तिमयोरव्याप्तिमुपसंहरति—तदेवमिति । साम्प्रतमुद्योतकारोक्तंलक्षणं दूषयति—अतस्मिन्निति । रजतत्वाभाववति शुक्त्यादौ रजतत्वप्रकारको बोधो विपर्यय इत्युक्तौ संशयेऽतिव्याप्तिः । तथाहि वल्मीकादौ स्थाणुर्वा पुरुषो वेति संशयः 'न स्थाणुर्न पुरुष इत्युभयबाधदर्शनादतस्मिन्तदिति प्रत्ययो भवति, नासौ भ्रमः । न चोक्तलक्षणेन स्वात्यन्ताभावाधिकरणे तदिति बोधस्य विवक्षेति वाच्यम्; अव्याप्यवृत्तिषु संयोगविभागशब्दलक्षणविशेषगुणेषु स्वात्यान्ताभावसमानाधिकरणेषु प्रमारूपबोधस्यापि विपर्ययत्वप्रसङ्गः स्यात् । एतेन संशयेऽतिव्याप्तिदर्शनेन बाध्यं ज्ञानं, दुष्टकरणजन्यं वा ज्ञानं विपर्यय इति लक्षणं निरस्तम् । बाधानिरुक्तेश्चापि निरुक्तं विपर्ययलक्षणं निरस्तं वेदितव्यम् । तत्र विरोधिप्रमाणज्ञानं बाध इत्युक्तौ उत्तरोत्तरज्ञानैर्बाधितेषु पूर्वपूर्वज्ञानेष्वतिव्याप्तिः । विपर्ययविरोधिप्रमाणज्ञानं बाध इति कल्पे विपर्ययावगमे विपर्ययघटितबाधावगमो बाधावगमे तद्घटितविपर्ययावगमश्चेति परस्पराश्रयतापत्तिश्च । विषयापहारो बाधश्चेति तृतीयकल्पेऽपि पूर्वज्ञानोपदर्शितार्थासत्त्वबोधनमात्रं ? तथाविधप्रमितिः ? उत यद्देशकालविशिष्टतया यत्प्रतीतं तस्य तत्रैवासत्त्वबोधनम् ? नाद्यः, यदैकस्य देवदत्त इति जीवति स इति देवदत्तादिप्रत्ययो जातः, अन्यस्य नायं देवदत्तो नापि जीवतीति भ्रमज्ञानं जातमिति भ्रमज्ञानेनोत्तरवर्त्तिना पूर्वदेवदत्तादिज्ञानानां बाधितत्वेनाप्रमात्वप्रसङ्गात् । द्वितीयेऽ-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

देशान्तरकालान्तरयोस्तदसत्त्वप्रमित्या घटादिज्ञानानामप्रमात्वप्रसङ्गात् । नापि तृतीयः; देशकालविषयबाधेष्वव्याप्तेः । देशकालयोर्देशकालान्तराभावात् । यत्तदादिशब्दानां च सर्वविषयत्वे कतिपयविषयत्वे चाव्याप्तिरेव । एतेन फलापहारोऽपि व्याख्यातः । अनुत्पन्नफलस्यापि ज्ञानस्य बाध्यत्वाङ्गीकाराच्च । विपर्ययत्वजातियोगी विपर्यय इत्युपलक्षणम्; इदं रजतमित्यादौ धर्म्यंशे प्रत्यये जातिसङ्करप्रसङ्गात् । तस्मान्न विपर्ययस्य लक्षणं पश्यामः ।

तथा स्मृतेरपि । तथाहि—किं प्रमाकरणाजन्यत्वे सति संस्कारजन्यं ज्ञानं स्मृतिः? उत द्वोषाजन्यत्वविशेषितम् ? अथवा स्वसमानविषयसंस्कारजन्यं ज्ञानम् ? किं वा प्रमित्यवृत्तिपदजन्यज्ञानवृत्तिजातिमद् ? आहोस्वित्स्मृतित्वजातियोगि ?

आद्ये कल्पेऽधिकव्याप्तेर्द्वयोश्चासम्भवित्वतः ।
तुर्येऽतिव्याप्तिश्चान्त्येऽभावाद्व्यञ्जकमानयोः ॥ २१ ॥

नाद्यः; भ्रमस्यापि स्मृतित्वप्रसङ्गात् । तस्यापि प्रमाणाजन्यत्वे सति संस्कारजन्यत्वात् । नापि द्वितीयः, असम्भवित्वापातात्, संस्कारस्यापि स्वसामग्र्यनुमापकतया प्रमाकरणत्वात् । नापि तृतीयः; असम्भवित्वादेव, सा मे माता स मे पितेत्यादिस्मृतीनां पूर्वानुभवसंस्काराधिकविषयत्वात् । नहि पूर्वानुभवे स इत्याकारः; अयमितिवर्तमानताया एवानुभवात् । न च स इत्याकारः कारणान्तरोपनीतः, पदात्पदार्थस्मृतौ हरिहरादिस्मृतौ चाभा-

तिव्याप्तिमाह—देशान्तरेति । अनित्यानां परिच्छिन्नानां वस्तूनां कालान्तरे देशान्तरे चासत्त्वप्रमितिरस्तीति घटादिप्रमाणज्ञानेष्वतिव्याप्तिः । तृतीयकल्पेऽव्याप्तिमाह—नापि तृतीयः । देशकालयोर्देशान्तरकालान्तरासम्बद्धयोस्तद्देशकालविषयकबाधेष्वव्याप्तेः । यत्तच्छब्दानां सर्वविषयकत्वेऽसम्भवापत्तिः, कतिपयविषयकत्वे चाव्याप्तिरित्यपि बोध्यम् । पूर्वोक्त दोषं लक्षणान्तरेऽप्यतिदिशति—एतेनेति । भ्रमज्ञानस्य प्रवृत्त्यादिकं फलमस्ति । अनुत्पन्नस्य तादृशफलस्यापि ज्ञानस्य बाध्यत्वाभ्युपगमाच्च । विपर्ययत्वजातिविशिष्ट ज्ञानं विपर्यय इत्यपि न लक्षणम्, इदं रजतमित्यादौ धर्म्यंशत्वमादाय संशयत्ववदत्रापि जातिसाङ्कर्यप्रसङ्गात् । विपर्ययलक्षणनिराकरणमुपसंहरति—तस्मान्नेति ।

प्रमात्वजात्यभिव्यञ्जकनिरूपणावसरे स्मृतित्वघटितपञ्चमकल्पे समागतं स्मृतित्वं निराकर्तुमुपक्रमते—तथा स्मृतेरपीति । स्मृतिलक्षणं विकल्पयति—तथाहीत्यादिना । तत्र प्रथमलक्षणे प्रत्यभिज्ञादिष्वतिव्याप्तिवारणाय सत्यन्तदलम् । अननुभूतविषयकभ्रमेऽतिव्याप्तिवारणाय विशेष्यदलम् । पञ्चसु लक्षणेषु सम्भावितदूषणानि श्लोकेन संकलयति—आद्ये कल्प इत्यादिना । प्रमाकरणाजन्यत्वे सति संस्कारजन्यं ज्ञानं स्मृतिरिति नाद्यः, भ्रमज्ञानेऽतिव्याप्तेः । दोषाजन्यत्वे सति प्रमाकरणाजन्यत्वे च सति संस्कारजन्यं ज्ञानमिति द्वितीयः कल्पोऽपि नोचितः, असम्भवदोषदुष्टत्वात् । संस्कारस्यापि स्वसामग्र्यनुमापकत्वेन प्रमाकरणत्वात् । इदं दूषणं प्रथमपक्षेऽपि तुल्यम् । अत्र लक्षणे भ्रमेऽतिव्याप्तिवारणाय प्रथमसत्यन्तदलम् । स्वसमानविषयकसंस्कारजन्यं ज्ञानं स्मृतिरिति तृतीयोऽपि न सम्यक्; असम्भवित्वादेव । असम्भवं संघटयति—सा मे इत्यादिना । स्मृतावधिकविषयतां वारयितुं शङ्कते—न च स इत्यादिना । ननु सा मे माता, स मे पितेत्यादौ स इत्याकारो न संस्कारोपनीतः

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वादिति वाच्यम्; तत्कारणानिरूपणात् । सोऽयं देवदत्त इति प्रत्यभिज्ञाप्रत्यये तदित्यंशस्य संस्कारानुपनीतत्वे सत्ययमित्याकारस्य च संयोगमात्राधीनतया विशिष्टप्रत्यभिज्ञास्वरूपासिद्धप्रसङ्गात् । अनुमिततत्तायां स इत्यभिलाप इति चेत्, न; संस्कारस्य प्रत्यभिज्ञां प्रत्यकारणत्वप्रसङ्गात् । स इत्यंशेऽनुमानस्यैव सहकारित्वात् । तं घटं स्मरामित्यनुव्यवसायानुपपत्तेश्च । न हि तत्रानुमानव्यवधानमस्ति, तथा सति स्मरणस्यातीतत्वेनानुव्यवसायविषयत्वानुपपत्तेः । संस्कारस्यासंविद्रूपत्वात्, निर्विषयत्वाच्च समानविषयत्वासिद्धिः । न ह्यसंविद्रूपस्य सविषयत्वम् । इच्छादिषु तज्जनकज्ञानविषयेण सविषयत्वोपचारात् । तर्हि संस्कारजनकानुभवसमानविषयत्वे सति संस्कारजन्यत्वं लक्षणार्थ इति चेत्; न; तत्तांशे समानविषयताया: खण्डितत्वात् । गरुडादिसाक्षात्कारे चातिव्याप्तेः, तस्य दीर्घकालनैरन्तर्योपचितसंस्कारविषयविषयत्वात् । नापि चतुर्थः; अनाप्तवाक्योत्थविभ्रमप्रत्ययेऽनेकार्थाक्षादिपदजन्यसंशये चातिव्याप्तेः । नापि पञ्चमः; तज्जातौ व्यञ्जकप्रमाणानिरूपणात् । तदेवं संशयविपर्ययस्मृतीनामनिरुक्तौ तदतिरिक्तत्वविशेषणं दुर्निरूपम् । नापि षष्ठः, तथाहि—एतद्घटज्ञानवृत्तित्वे सत्येतद्धूमजन्यवह्निज्ञानवृत्तिसंशयावृत्तिजाति-

---

किन्तु कारणान्तरोपनीतः, नहि पदात्पदार्थस्मृतौ हरिहरादिस्मृतौ च स इत्याकारोऽवभासते इति वाच्यम्, तत्कारणान्तरस्य निरूपयितुमशक्यत्वात् । सोऽयं देवदत्त इति प्रत्यभिज्ञाप्रतीतौ स इत्यंशस्य संस्कारानुपनीतत्वाङ्गीकारे सत्ययमित्याकारस्य संयोगसन्निकर्षमात्राधीनतया विशिष्टप्रत्यभिज्ञास्वरूपासिद्धिप्रसङ्गात् । न चात्र तत्तांशोऽनुमानेनावभासत इति वक्तुं शक्यः, प्रत्यभिज्ञां प्रति संस्कारस्य कारणत्वभङ्गप्रसङ्गात् । तत्ताया आनुमानिकत्वे दूषणान्तरमाह—तं घटं स्मरामीति । न च प्रथमतो घटस्मरणं, ततस्तत्तानुमानं, पश्चात् तं घटं स्मरामीत्यनुव्यवसाय इति वाच्यम्: तथासति स्मरणस्यातीतत्वेनानुव्यवसायानुपपत्तेः । अनुव्यवसायकाले घटस्मरणस्य नष्टत्वेनानुव्यवसायविषयत्वायोगात् । संस्कारस्य ज्ञानरूपत्वाभावेन सविषयकत्वाभावेन च तत्र समानविषयत्वोक्तिः सर्वथैवासङ्गता । नहि कुत्रचिदसंविद्रूपस्य कस्यचित् सविषयत्वं दृष्टम्, इच्छादिष्वपि तज्जनकज्ञानविषयेणैव सविषयत्वस्योपचारमात्रस्याभ्युपगम्यमानत्वात् । न चोक्तस्मृतिलक्षणस्य संस्कारजनकानुभवसमानविषयत्वे सति संस्कारजन्यत्वमर्थं इति वक्तुं शक्यम्, तत्तांशे समानविषयत्वस्य निराकृतत्वात्—समानविषयत्वमन्यूनानतिरिक्तविषयत्वम् । निरुक्तलक्षणेऽतिव्याप्तिमाह—गरुडादीति । गरुडादिध्यानाज्जायमानो गरुडादिसाक्षात्कारः पूर्वपूर्वभावजनितस्तत्र संस्कारजनकपूर्वानुभवस्य गरुडसाक्षात्कारस्य च समानविषयमस्ति, किन्तु स न स्मृतिरितिभावः । नहि तत्साक्षात्कारिज्ञानं स्मृतिः, तथासति वदतोव्याघात इत्यर्थः । प्रमित्यवृत्तिपदजन्यज्ञानवृत्तिजातिमज्ज्ञानं स्मृतिरिति चतुर्थलक्षणमप्यसङ्गतमित्याह—नापि चतुर्थः । शाब्दप्रमित्यादावतिव्याप्तिवाराणाय प्रमित्यवृतीतिविशेषणम् । अनाप्तोच्चरितवाक्यजन्यभ्रमज्ञानेऽनेकार्थादक्षादिपदाज्जायमाने संशये च चतुर्थलक्षणस्यातिव्याप्तिः । स्मृतित्वजातियोगित्वं स्मृतित्वमितिलक्षणं दूषयति—नापि पञ्चमः । स्मृतित्वजातिव्यञ्जकप्रमाणस्य निरूपयितुमशक्यत्वात् । प्रासङ्गिकस्य प्रकृतोपयोगमाह—तदेवमिति । एतद्घटज्ञानवृत्तित्वे सत्येतद्धूमजन्यवह्निज्ञानवृत्तिसंशयावृत्तिजातिमत्त्वं प्रमात्वजात्यभिव्यञ्जकमित्यपि षष्ठं न युक्तमित्याह—नापि षष्ठः । एतच्च घटज्ञानं चेति प्रत्यक्षज्ञानविशेषितो विवक्षितः ।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मत्त्वमित्यपि न; विकल्पासहत्वात् । तथा हि—किं घटज्ञानवह्निज्ञानशब्दाभ्यां ज्ञानमा विवक्ष्यते ? किं वा प्रमात्वेन व्यवह्रियमाणम् ? आहोस्विदबाधितप्रमाव्यवहारास्पदम् नाद्यः; विभ्रमज्ञानानामप्येवं भावात् । नापि द्वितीयः; उक्तदोषानुषङ्गात्, विभ्रमज्ञाने ष्वपि तात्कालिकप्रमात्वव्यवहारदर्शनात् । नापि तृतीयः; अबाधितत्वस्य दुर्निरूपताया प्रागेवाभिहितत्वात् । तदेवं प्रमात्वस्य न निरुक्तिः ।

नापि परोक्षतायाः; तस्या जातित्वे जातिसङ्करप्रसङ्गात् । तथाहि—किं प्रमात्व परम्, पारोक्ष्यमपरम् ? विपरीतं वा ? नाद्यः; पारोक्ष्यभ्रमाभावप्रसङ्गात् । यत्र परोक्ष त्वजातिर्व्याप्या, तत्र व्यापकं प्रमात्वमस्त्येवेति नियमात् । नापि द्वितीयः; तथा सति प्रमात्वं परोक्षतां न व्यभिचरेदिति प्रत्यक्षप्रमाऽभावप्रसङ्गात् । न च विभ्रमेषूपाधि निबन्धन एव परोक्षत्वव्यवहारः; तथा सति सर्वत्र तन्निबन्धनतयैव तद्व्यवहारोपपत्ते जातिकल्पनावैयर्थ्यप्रसङ्गात् । तदेवमन्योन्यपरिहारेण वर्तमानयोर्मनोगगनवर्तिनोर्मूर्तत्व भूतत्वयोः पृथिव्यादाविवैकत्र समावेशे जातिसङ्करः स्यात् । न च परोक्षताया

एतच्च धूमजन्यवह्निज्ञानं चेत्यत्रानुमानज्ञानविशेषः । तयोर्वर्तमानत्वे सति संशयावृत्तिर्या जाति प्रमात्वं तदधिकरणत्वं प्रमात्वव्यञ्जकमित्यर्थः । संशयावृत्तित्वे सति परोक्षापरोक्षानुभववृत्तिजाति मत्त्वमिति संक्षेपेण निरुक्तलक्षणार्थः । तच्च न युक्तम्; विकल्पासहत्वात् । लक्षणवृत्तिद्वितीय ज्ञानान्तविशेषणशब्दार्थं विकल्पयति—किं घटज्ञानेत्यादिना । घटज्ञानवह्निज्ञानशब्दाभ्यां ज्ञानमा विवक्ष्यते इति नाद्यः; भ्रमज्ञानेष्वपि तथात्वव्यवहारदर्शनात् । प्रमात्वेन व्यवह्रियमाणमिति द्वितीयपक्षेऽपीदमेव दूषणमतिदिशति—उक्तदोषेति । भ्रमज्ञानेष्वपि तात्कालिकप्रमात्वव्यवहार दर्शनात् । अबाधितप्रमाव्यवहारास्पदमिति तृतीयकल्पं दूषयति—नापि तृतीयः । तत्राबाधितत्वस्य दुर्निरूपितायाः पूर्वमेवोक्तत्वात् ।

अथ परोक्षत्वानधिकरणप्रमाकरणं प्रत्यक्षप्रमाणमिति लक्षणे (पृ० ३००) प्रमात्वं दुर्निरूपि तत्वमुक्तं, सम्प्रति परोक्षत्वं दुर्निरूपितं प्रतिज्ञातामुपपादयति—नापि परोक्षताया इति । परोक्षताया जातित्वस्वीकारे समायातं साङ्कर्यं संघटयति—तथाहीति । परोक्षत्वमपरं प्रमात्वं परमितिपक्षे यत्र व्याप्यं तत्र व्यापकमिति नियमेन व्याप्यपरोक्षत्वस्य व्यापकं प्रमात्वमित्यवश्यम्भावित्वात्पारोक्ष्य भ्रमाभावप्रसङ्गापत्तिः । यदि प्रमात्वमपरं परोक्षत्वं च परमित्यभ्युपगम्येत तर्हि व्याप्यव्यापक भावनियमात् प्रमात्वं कदाचिदपि स्वव्यापकपरोक्षतां न परित्यजेदिति प्रत्यक्षप्रमाभावप्रसङ्गः । न च परोक्षत्वस्य व्यापकमेव प्रमात्वमभ्युपेयते विभ्रमेषु परोक्षत्वव्यवहारो जातिनिबन्धनोऽपि तूपाधि निबन्धनः इति वाच्यम्; सर्वत्रौपाधिनिबन्धनतया व्यवहारोपपत्तौ जातिकल्पनावैयर्थ्यप्रसङ्गात् । प्रतिपादितसङ्करं सोदाहरणमुपसंहरति—तदेवमिति । भूतत्वं विहाय मूर्तत्वं मनसि मूर्तत्वं विहाय भूतत्वं नभसीत्यन्योऽन्यपरिहारेण वर्तमानयोर्भूतत्वमूर्तत्वयोरेकत्र पृथिव्यादिचतुष्टये समावेशेन यथा साङ्कर्यं तथा प्रकृते प्रमात्वपरोक्षत्वयोरपि तुल्यं साङ्कर्यमिति भावः । नियतव्यञ्जकाभावादपि परोक्षत्वं न जातिरित्याह—न चेति । अत्रेन्द्रियार्थसन्निकर्षाजन्यत्वे सति प्रमात्वस्य परोक्षत्व

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

जातेर्व्यञ्जकमस्ति; तत्किमिन्द्रियार्थसन्निकर्षाजन्यत्वे सति प्रमात्वम् ? उत लिङ्गादिप्रमाकरणजन्यत्वम् ? नाद्यः; ईश्वरज्ञानस्यापि परोक्षत्वप्रसङ्गात् । नापि द्वितीयः; स्मृतेः परोक्षत्वाभावप्रसङ्गात् । एतेन परोक्षत्वस्योपाधित्वमपि निरस्तम् । व्यञ्जकनिरासेन तयोरुपाधित्वस्यापि निरस्तत्वात् । ईश्वरज्ञानवृत्तित्वे सत्ययोग्यनुव्यवसायातिरिक्तपरमाणुप्रमित्यवृत्तिजातिः साक्षात्त्वं तदधिकरणं प्रत्यक्षमित्यपि न; यतः—

प्रमितेर्दुर्निरूपत्वाद्व्यञ्जकस्यानिरूपणात् ।
साक्षात्त्वं जातिसाङ्कर्यान्न प्रत्यक्षस्य लक्षणम् ॥ २२ ॥

प्रमितेरेवानिरूपणे परमाणुप्रमित्यवृत्तिविशेषणस्य दुर्ज्ञानत्वात्, इन्द्रियार्थसन्निकर्षजन्यत्वादेश्चाभिव्यञ्जकस्यापास्तत्वात्, साक्षात्त्वस्य च प्रमात्वेन परापरभावाभावाज्जातिसङ्करप्रसङ्गाच्च नेदमपि प्रत्यक्षलक्षणम् ।

सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमित्यपि न प्रत्यक्षलक्षणम्; प्रत्यक्षाभासेऽपि सत्त्वात् । वृत्तिकारमतेन तत्सतोर्व्यत्ययेऽपि लक्षणस्याव्याप्तिः, अतिव्याप्तिर्वा । तथा हि—यदाभासविज्ञानं तद्यदि तत्सम्प्रयोगादेव भवति तत्समीचीनं प्रत्यक्षमिति तदा सूत्रार्थः । तत्र किं प्रतिभासमानेनाकारेण कृत्स्नेन सम्प्रयोगाज्जायमानत्वं विवक्षितम् ? उतैकदेशेनापि ? नाद्यः; सोऽयं देवदत्त इति प्रत्यभिज्ञायां तत्तांशे सम्प्रयोगाभावादव्याप्तेः । न च तत्रापि तत्तांशे संयुक्तविशेषणतालक्षणः सम्प्रयोगोऽस्तीति वाच्यम्; षष्ठप्रमाणवादिना

जातिव्यञ्जकत्वाभ्युपगमे परमेश्वरज्ञानस्यापि परोक्षत्वप्रसङ्गः । लिङ्गादिप्रमाकरणजन्यत्वस्य परोक्षत्वजातिव्यञ्जकत्वस्वीकारे स्मृतेः परोक्षत्वं न स्याद् व्यञ्जकाभावात् । एतेन परोक्षत्वस्य जातित्वनिराकरणेनोपाधित्वमपि निराकृतम् । व्यञ्जकत्वनिराकरणेन तयोरिन्द्रियार्थसन्निकर्षाजन्यप्रमात्वलिङ्गादिप्रमाणजन्यत्वयोरुपाधित्वस्यापि निरस्तत्वात् । प्रत्यक्षप्रमाणफलस्य लक्षणान्तरं शङ्कते—ईश्वरज्ञानेति । अत्र प्रत्यक्षत्वजात्यधिकरणं प्रत्यक्षम् । तत्र प्रत्यक्षत्वस्य लक्षणमीश्वरेत्यादि । तदलक्षणमिति दूषणानि श्लोकेन संकलयति—प्रमितेरित्यादिना । प्रमितेर्दुर्निरूपत्वाद्, व्यञ्जकस्यानिरूपणात् जातिसाङ्कर्यान्न साक्षात्त्वं प्रत्यक्षस्य लक्षणमिति योजना । तत्र तावत्प्रमितेर्दुर्निरूपत्वं विवृणोति—प्रमितेरेवेति । व्यञ्जकस्यानिरूपणं विशदयति—इन्द्रियार्थेति । तृतीयं हेतुं विवृणोति—साक्षात्त्वस्य चेति । प्रमात्वेन सह साक्षात्त्वस्य परापरत्वाभावाज्जातिसाङ्कर्याच्च नेदमीश्वरज्ञानवृत्तित्वादिकं निरुक्तं प्रत्यक्षलक्षणम् ।

मीमांसकाभिमतं प्रत्यक्षलक्षणं निराचष्टे—सत्सम्प्रयोग इति । सतावर्तमानेनार्थेनेन्द्रियाणां सम्प्रयोगे सति पुरुषस्य यद्बुद्धिजन्मतत्प्रत्यक्षमित्यपि न प्रत्यक्षस्य लक्षणं सम्भवति, प्रत्यक्षाभासेऽतिव्याप्तेः । वृत्तिकारमतेन तत्सतोः पदयोर्मिथो व्यत्यासेऽपि लक्षणस्याव्याप्त्यतिव्याप्ती दर्शयितुं सूत्रार्थमाह—तथाहीति । विकल्प्य दूषयति—तत्र किमित्यादिना । प्रथमकल्पे प्रत्यभिज्ञावृत्तितत्तांशे सम्प्रयोगाभावादव्याप्तिः, तत्तांशे संयुक्तविशेषणतारूपसन्निकर्षाभ्युपगमेऽपि दोषमाह—न च तत्रापीत्यादिना । द्वितीयकल्पेऽपि विभ्रमेषु लक्षणस्य सत्त्वादतिव्याप्तिः । तत्सम्प्रयोग इत्यत्र समित्युप-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तस्य प्रत्यक्षतानङ्गीकारात्। अङ्गीकारे वा निर्घटं भूतलमित्यत्र तथाभूतसन्निकर्षंभावाद्‌-भावस्य प्रत्यक्षतोपपत्तौ षष्ठप्रमाणाभ्युपगमवैयर्थ्यापातात्। न द्वितीयः; विभ्रमेष्वपि ... भावादतिव्याप्तेः; तत्राप्यधिष्ठानसम्प्रयोगस्य भावात्। अथोच्येत—सम्प्रयोग इत्यत्र समिति विशेषणेन दुष्टेन्द्रियसम्प्रयोगजन्यत्वस्य व्यावर्तितत्वाद्दुष्टेन्द्रियसम्प्रयोगजन्येषु विभ्रमेषु नातिव्याप्तिः। यथाहुर्भट्टपादाः—

'सम्यगर्थे च संशब्दो दुष्प्रयोगनिवारणः।
प्रयोग इन्द्रियाणां च व्यापारोऽर्थेषु कथ्यते॥
दुष्टत्वाच्छुक्तिकायोगो वार्यते रजतेक्षणात्।' इति। (श्लो० वा०४।३८)

तदपि न; उक्तोत्तरत्वात्, प्रत्यभिज्ञायां तत्तांशेन तथाभूतसम्प्रयोगाभावादव्याप्तेः, इन्द्रियेषु दोषाभावस्य प्रागुक्तन्यायेन दुरवधारणत्वात्। तदेवं प्रत्यक्षलक्षणं प्रत्युक्तम्।

नाप्यनुमानस्य लक्षणं निरूपयितुं शक्यम्। तथाहि—करणपक्षे तृतीयलिङ्गपरामर्शः, परामृश्यमानं वा लिङ्गमनुमानमिति नैयायिकाः। न तावत्तृतीयलिङ्गपरामर्शोऽनुमितेः करणम्; अव्यापारत्वात्। व्यापारवत एव हि सर्वत्र करणत्वम्, तदिह महानसादौ धूम-धूमध्वजयोः प्रथमं सम्बन्धं गृहीतवतः। शिखरिशिखरपरिवर्तितया पुनस्तमेव धूममव-लोकयतस्तदनुचानुसंहितव्याप्तेर्योऽयं लिङ्गविषयः परामर्शः 'तथा चायं धूमवान्' इति न तस्य व्यापारान्तरमुपलभामहे, येन तस्यानुमितिकरणता स्यात्। न च व्याप्तस्य पक्षधर्मता-

---

सर्गबलेनातिव्याप्तिं वारयति—अथोच्येतेत्यादिना। सम्प्रयोगशब्दस्य सम्यक् प्रयोगोऽर्थः, तेन भ्रमेष्वनतिव्याप्तिस्तत्र दुष्टेन्द्रियसम्बन्धेन सम्यक् प्रयोगाभावादित्यर्थः। अत्र वार्तिकसम्मतिमाह—यथाहुरित्यादि। इन्द्रियार्थसम्बन्धः प्रयोगशब्दार्थः, समीचीनार्थे प्रचलितः समित्युपसर्गो दुष्टप्रयोग-निवारको भवति, दुष्टत्वादिन्द्रियाणां शुक्तिकया सह योगो वार्यते, रजतेक्षणादिन्द्रियाणां च दुष्टत्वं निश्चीयते इति श्लोकार्थः। अनेनापि प्रत्यक्षत्वाय सम्प्रयोगः समर्थितः। तदपि न लक्षणम्, उक्तो-त्तरमेव स्पष्टयति—प्रत्यभिज्ञायामिति। इन्द्रियेषु दोषाभावस्य दुष्टसामग्रीजन्यत्वावधारणनिरसन-रूपेण प्रागुक्तन्यायेन दुरवधारणात्। इन्द्रियसम्प्रयोगयोरतीन्द्रियतयाऽप्रत्यक्षत्वेन दोषाभावस्य ग्रहीतु-मशक्यत्वात्। प्रत्यक्षनिराकरणमुपसंहरति—तदेवमिति।

क्रमप्राप्तमनुमानलक्षणं निराकर्त्तुमुपक्रमते—नाप्यनुमानस्येति। प्रमाणखण्डनस्य प्रकृतत्वा-त्तार्किकानुमितिकरणलक्षणं दूषयितुं तदुद्भावयति—करणपक्ष इति। अनुमीयतेऽनेनेत्यनुमानमिति करणपक्षे तृतीयलिङ्गपरामर्शो वा परामृश्यमानं लिङ्गं वानुमानमिति नैयायिकानामभिमतं वाचस्पतिमिश्रोदयनाचार्याभ्यां समर्थितम्। तत्र न तावत्तृतीयलिङ्गपरामर्शोऽनुमितेः करणं भवितुं शक्यम्; तस्य व्यापारशून्यत्वात्। व्यापारवदसाधारणं कारणं करणमिति करणलक्षणम्, तच्च व्यापारशून्ये तृतीयलिङ्गपरामर्शे न सङ्घटते। तथाहि प्रथमं महानसादौ धूमाग्न्योः सम्बन्धं गृहीतवतः पुरुषस्य कालान्तरे पर्वतशिखरस्थं धूमं पश्यतो व्याप्तिस्मरणं "तथाचायमि"त्याकारकं भवति। इदमेव तृतीयलिङ्गपरामर्शोऽभिधीयते। नातः परं कञ्चिद्व्यापारमुपलभामहे येन तृतीयलिङ्गपरा-मर्शस्यानुमितिकरणत्वमभ्युपगम्येत। न खलु व्याप्तिविशिष्टस्य पक्षधर्मतावगमानन्तरमनुमानोद-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वगमेऽप्यनुमानानुदयस्त्वयाभ्युपगम्यते, येन व्यापारान्तरं तत्र कल्प्येत। अथानुसंहित-व्याप्तिकस्य लिङ्गविषयो निर्विकल्पकप्रत्ययः करणं तस्य 'तथाचायं धूमवान्' इति सविकल्पकप्रत्ययो व्यापारः, मैवम्; शब्दानुमानाभ्यामवगतलिङ्गेष्वव्याप्तेः, आदावेव सविकल्पकेन तेषां विषयीकरणात्, शब्दानुमानयोर्निर्विकल्पकप्रत्ययाजनकत्वात्। अथोच्येत –तस्मादयमग्निमानिति निगमनेन तस्मादित्युपनयार्थस्य लिङ्गाधिकरणत्वस्य परामर्शात्; उपनयार्थस्य पूर्वभाविनस्तृतीयलिङ्गपरामर्शस्य तज्जनकतया तद्व्यापारोपपत्तिरिति, तदपि न; आप्तवाक्यादस्ति धूम इत्यधिगतवतोऽपि विनैव तस्मादिति परामर्शमात्रादस्ति धूमध्वज इति प्रतीतेरुदयात्। न चैषा प्रतीतिः प्रत्यक्षा; अनैन्द्रियकत्वात्। नापि शाब्दी; आप्त-वाक्यस्य धूमसद्भावमात्रपर्यवसितत्वात्। नापि स्मृतिः; तत्राग्निसद्भावस्य पूर्वमननुभूत-त्वात्। अतः परिशेषादनुमितिरेवेत्यास्थेयम्, तत्कथं तत्र व्यापारसम्भवः? लिङ्गपरामर्शस्य करणत्वेन प्रमाणेषु ज्ञाताज्ञातकरणविभागश्च न स्यात्। नयनादीनामेव हि करणत्वमज्ञात-तया, ज्ञाततया तु लिङ्गशब्दादीनामिति विभागः परामर्शस्य करणतायां न सिद्ध्येत्। न च परामर्शोऽपि ज्ञाततया करणम्; ज्ञानस्य निलीनस्यैव नयनादिवत्स्वरूपफलजनकताङ्गी-कारात्, अन्यथाऽनवस्थाप्रसङ्गात्। अथ परामृश्यमानं लिङ्गमनुमितेः करणम्। तदपि न; तत्रासीद्धूम इत्याप्तादुपश्रुत्य वह्निरपि तत्रासीदित्यनुमितावविद्यमानस्य करणत्वानुपपत्तौ तत्परामर्शस्यैव कारणतायास्तस्यावश्याश्रयणीयत्वात्। एकप्रयोजकतानुरोधेन धूमादेर्वर्त-मानत्वदशायामपि तत्परामर्शस्यैव कारणतायाः स्वीकरणीयत्वात्।

किञ्चेदं लिङ्गम्; यस्य परामर्शः परामृश्यमानं वा लिङ्गमनुमितिकरणम्? व्याप्ति-

---

विलम्बस्तवाभिमतो, येन व्यापारान्तरं तत्र कल्प्येत। कथञ्चिन्निर्विकल्पकस्योक्तपरामर्शस्यानुमिति-करणत्वमुद्भाव्य दोषमाह—अथेत्यादिना-मैवमित्यन्त्येनेति। नहि शब्दानुमानाभ्यां निर्विकल्पक-प्रत्ययः क्वचिदप्युत्पद्यते, तयोरादित एव सविकल्पकप्रत्ययजनकत्वाभ्युपगमात्। न च तस्मादित्युप-नयगतलिङ्गपरामर्शस्य व्यापारः अयमग्निमानिति निगमनमिति शङ्कामुद्भाव्य दूषयति—अथोच्येते-त्यादिना। आप्तवाक्यादवगतो धूमो न प्रत्यक्षस्य विषयः, अनैन्द्रियकत्वात्, नापि शाब्दी प्रमाविषयः, आप्तवाक्यस्य धूमसद्भावसद्भावमात्रपर्यवसायित्वात् नापि स्मृतेर्विषयः, तत्राग्निसद्भावस्य पूर्वमन-नुभूतत्वात्। तस्मात्परिशेषादनुमितिरभ्युपेया। तत्र व्यापारासम्भवमाह—तत्कथमिति। लिङ्ग-परामर्शस्यानुमितौ दोषान्तरमाह—लिङ्गपरामर्शस्येति। उदयनाचार्याभिमतमनुमितिकरणमाशङ्क्य दूषयति—अथ परामृश्यमानमिति। परामृश्यमानलिङ्गस्यानुमितिकरणत्वाभ्युपगमेऽतीतादिलिङ्गे-नानुमितिर्न स्यात्। तस्माल्लिङ्गपरामर्शस्यैवानुमितिकरणत्वम्। तस्योक्तदोषदूषितत्वेनानुमान-प्रमाणस्य लक्षणं निर्वक्तुमशक्यमिति।

एवं लिङ्गमङ्गीकृत्य लिङ्गपरामर्शस्य करणत्वं निराकृतं, सम्प्रति लिङ्गनिरूपणादपि लिङ्ग-परामर्शस्य करणत्वासम्भवाभिप्रायेणाह—किञ्चेदं लिङ्गमिति। लिङ्गलक्षणं दूषयितुं व्याप्ति

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पक्षधर्मतावल्लिङ्गमिति चेत्, केयं व्याप्तिः? किमविनाभावः? किंवा स्वाभाविकः सम्बन्धः निरुपाधिकः सम्बन्धो वा ? नाद्यः; विकल्पासहत्वात् । तथाहि—

किं व्यक्त्योरथवा जात्योस्तद्वतोर्वा विशेषयोः ।
व्याप्तिस्त्वयेष्यते किं वा साध्यसाधनवत्त्वयोः ?॥२३॥
सा न व्यक्त्योस्तदानन्त्यान्न जात्योस्तदसम्भवात् ।
न तद्वतोरुक्तदोषान्न चतुर्थोऽनिरूपणात् ॥२४।

किं धूमधूमकेतनस्वलक्षणयोर्व्याप्तिः ? उत धूमत्ववह्नित्वजात्योः ? अथ तज्जातीययोः आहोस्वित् धूमवत्त्ववह्निमत्त्वयोः नाद्यः; व्यक्तीनामनन्तत्वात्तत्र सम्बन्धग्रहणासम्भवात् नह्यसर्वज्ञेन सर्वा व्यक्तयो विशेषतो ज्ञायन्ते । अथ व्याप्तिग्रहणसमये सामान्यलक्षणा प्रत्यासत्त्या तास्ता व्यक्तयस्तत्तदिन्द्रियैरवभासन्ते, अन्यथा सर्वोपसंसारवती व्याप्तिरे नावगता इत्यानुमानिकोपादानादिव्यवहारविरहविरोधप्रसङ्गात्; न हि परिदृश्यमानकद लीफलादेः प्रत्यक्षेण दृष्टमिष्टसाधनत्वम्, येनैतदुपाददीत । किं नामानुमेयम् ? न च प्रति बन्धसिद्धिमन्तरेणानुमानप्रवृत्तिः, न चान्तरेण विशेषप्रतिभासं तन्नियमावगमः, तत्सिद्ध व्याप्तिग्रहणसमये एव सकलविशेषाः प्रतिभासन्ते,तदयुक्तम्; प्रमेयत्वाभिधेयत्वयोर्व्याप्ति गृह्णतः सर्वज्ञत्वप्रसङ्गात् । ननु प्रमेयतया सर्वं ज्ञायते न तु रूपान्तरेणेति चेत्, मैवम् रूपान्तरस्यापि प्रमेयत्वाधारतया ग्रहणप्रसङ्गात्, अप्रमेयत्वे च सप्तमरसादिवत्तदसिद्धेः। येन येन रूपेण यद्यदस्ति तेन तेनाकारेण तत्तत्प्रमेयमिति स्यादेव सर्वज्ञता। किञ्च

विकल्पयति—केयं व्याप्तिरिति । तत्राविनाभावो व्याप्तिरिति पक्षं दूषयति—नाद्य इति । विकल्पा सहत्वेन विकल्पं दोषं च श्लोकाभ्यां सङ्कलयति—किं व्यक्त्योरित्यादिना । तद्वतोः=जातिविशिष्ट व्यक्त्योः । साध्यसाधनवत्त्योः=वह्निमत्त्वधूमवत्त्वयोः । (१) नाद्यः, व्यक्तीनामानन्त्यादसर्वज्ञ व्यक्त्योरविनाभावसम्बन्धरूपव्याप्तिग्रहणाशक्तेः। (२) न द्वितीयः, अग्नित्वधूमत्वयोर्जात्योः सामानाधिकरण्याभावेन निरुक्तव्याप्तसम्भवाभावात् । (३) नापि तृतीयः, उक्तानन्त्यदोषादेव। (४) नापि चतुर्थः, तस्यानिरूपणात् । श्लोकौ व्याचष्टे—किं धूमेत्यादिना । आद्ये, व्यक्तीनामानन्त्येना सर्वज्ञेन सम्बन्धग्रहणासम्भवेऽपि विशेषतो व्यक्तयो व्याप्तिग्रहणसमये सामान्यलक्षणाप्रत्यासत्त्या तत्त दिन्द्रियैरवभासेरन् । विपक्षे दोषमाह—अन्यथेति । उपादानादीनामानुमानिकत्वं दर्शयति—नहि परिदृश्यमानेत्यादिना। दृश्यमाने कदलीफलादौ प्रत्यक्षेणेष्टसाधनत्वं न दृश्यते, किन्त्वनुमीयते। न च व्याप्तिसिद्धिं विनाऽनुमानप्रवृत्तिः सम्भवति, न च साध्यसाधनरूपव्यक्तीनां विशेषतो व्यक्तिशः प्रतिभानमन्तरेण व्याप्तिग्रहसम्भवः। सर्वव्यक्तिवृत्तिव्याप्तिग्रहसमर्थनमुपसंहरति—तत्सिद्धमिति। आद्यं कल्पं दूषयति—तदयुक्तमिति। सामान्यलक्षणाप्रत्यासत्त्या प्रमेयत्वाभिधेयत्वयोर्व्याप्तेर्ग्रहीतुः सर्वज्ञत्वप्रसङ्गात् । न च प्रमेयत्वादिना सर्वेषां ज्ञातत्वेऽपि घटत्वादिविशेषरूपेणाज्ञातत्वान्नोक्तदूषण मितिवाच्यम्; घटत्वादिरूपान्तरस्यापि प्रमेयत्वाधारतया ग्रहणप्रसङ्गस्य तादवस्थ्यात् । तेषाम प्रमेयत्वाभ्युपगमे रसषट्कभिन्नद्रव्यादे रसत्वस्याप्रमेयत्वासिद्धिवद्रूपान्तरस्यासिद्धेः । सर्वज्ञताप्राप्ति निगमयति—येन येनेति । किञ्च सामान्यलक्षणाप्रत्यासत्त्या महानसादौ साध्यसाधनसाहचर्यदर्शन

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

व्याप्तिसंदर्शनसमय एवाशेषग्रहणे पर्वतनितम्बगोचरोऽपि कृशानुर्गृहीत एवेति पुनर्धूमदर्शने तस्य स्मृतिगोचरतैव स्यान्नत्वनुमेयता। नापि द्वितीयः; यद्धूमत्वं यत्र वा धूमत्वं तद्वह्नित्वं तत्र वा वह्नित्वमिति नियमासम्भवात्; तयोर्भिन्नत्वाद्भिन्नाधिकरणत्वाच्च। नापि तृतीयः; व्यक्तीनामिव तद्वतामपि अनन्तत्वात्सम्बन्धग्रहणानुपपत्तेः। अस्तु तर्हि चतुर्थः; न हि तत्र सम्बन्धग्रहणानुपपत्तिः, धूमवत्त्ववह्निमत्त्वलक्षणयोरुपाध्योः कतिपयव्यक्तिग्रहणेऽपि गोत्वादिजातीनामिव ग्रहणोपपत्तेरिति चेन्मैवम्; सम्भवेऽपि तत्संवेदनस्य, तत्समय एव पर्वतनितम्बसम्बन्धिनो वह्निमत्त्वस्य गृहीतत्वात्पुनरनुमानाप्रवृत्तेः। वह्निमत्त्वमात्रमेव धूमवत्त्वव्यापकतया गृहीतम्, न तु पर्वतगतवह्निमत्त्वमिति चेत्, तत्किमिदानीं बहूनि वह्निमत्त्वानि? हन्तैवं धूमवत्त्वान्यपि बहून्येवेति तदानन्त्यात् सम्बन्धग्रहणानुपपत्तिस्तदवस्थैवेति घट्टकुट्यां प्रभातमनुसरति! अथैकैव धूमवत्ता एकैव वह्निमत्ता न सा पर्वतसम्बन्धिनी गृहीता, अतः सैवानुमानालम्बनमिति चेत्, मैवम्; विकल्पासहत्वात्। तथाहि—सम्बन्धसंवेदनसमये यत्र यत्र धूमवत्त्वं तत्र तत्र वह्निमत्त्वमिति वीप्साविषयतया पर्वतादिप्रदेशोऽपि प्रतीतो न वा? आद्ये पर्वतेऽपि वह्निमत्त्वमधिगतमिति कृतमनुमानेन। द्वितीये तु पर्वते धूमवत्त्वस्य प्रतीतावपि वह्निमत्त्वप्रतीतिर्न स्यात्, । व्याप्तेरगृहीतत्वादित्यलमतिप्रसङ्गेन। कश्चायमविनाभावः? किं साधनसद्भावेन साध्यसद्भावः? किं वा साध्याभावेन साधनाभावः? उतोभयम्? नाद्यः, केवलव्यतिरेकिणि तदभावात्, पक्षादन्यत्रापि भावे केवलव्यतिरेकित्वव्याकोपात्। नापि द्वितीयः; केवलान्वयिन्यभावात्। न तृतीयः; अन्वयव्यतिरेकिणि तद्भावेऽपीतरयोस्तदभावात्।

कालेऽशेषग्रहणस्वीकारे पर्वतशिखरवृत्तिर्वह्निरपि गृहीत एव पुनर्धूमदर्शने वह्नेःस्मृतिविषयतैव स्यात्किमर्थं तत्र वह्नावनुमेयताभ्युपेया। धूमत्ववह्नित्वजात्योर्व्याप्तिरिति कल्पं दूषयति—नापि द्वितीयः। तयोर्भिन्नस्वभावत्वेन भिन्नाधिकरणत्वेन च सर्वानुमतत्वाद्व्याप्तिनियमासम्भवात्। जातिविशिष्टतद्व्यक्त्योर्व्याप्तिरिति पक्षं दूषयति—नापि तृतीयः। व्यक्तिवज्जातिविशिष्टव्यक्तीनामप्यानन्त्येन सम्बन्धग्रहणानुपपत्तेः। धूमवत्त्ववह्निमत्त्वयोर्व्याप्तिरिति चतुर्थकल्पं दूषयति—अस्तु तर्हि चतुर्थ इति। धूमवत्त्ववह्निमत्त्वरूपयोरुपाध्योः गोत्वादिजातिवद् ग्रहणसम्भवेऽपि तस्मिन्नेव समये पर्वतनिष्ठस्य वह्निमत्त्वस्यापि गृहीतत्वेन पुनरनुमानाप्रवृत्तेः। नच धूमवत्त्वव्यापकतया वह्निमत्त्वमात्रस्य गृहीतत्वेऽपि पर्वतवृत्तिवह्निमत्त्वमगृहीतमेवेति वाच्यम्, तथासति वह्निमत्त्वमिव धूमवत्त्वस्याप्यनेकत्वेनानन्त्याद् घट्टकुटिप्रभातन्यायेन व्याप्तिग्रहणानुपपत्तेस्तादवस्थ्यात्। नच धूमवत्ता वह्निमत्ता चैकैकैव, न सा पर्वतसम्बन्धिनी गृहीता, सैव वह्निमत्ताऽनुमेयेति वाच्यम्, विकल्पासहत्वात्। विकल्पमुद्भाव्य दूषयति—तथाहीति। यत्र-यत्र धूमवत्त्वं तत्र तत्राग्निमत्त्वमिति वीप्साविषयत्वेन पर्वतादिप्रदेशस्यापि प्रतीयमानत्वे पर्वतेऽग्निमत्त्वमधिगतमेव कृतमनुमानेन। पर्वतादिप्रदेशस्य तथाऽप्रतीतौ पर्वते धूमवत्त्वस्य प्रतीतावपि वह्निमत्त्वस्य प्रतीतिर्न स्यात् पूर्णतया व्याप्तेरग्रहणादिति। अथाविनाभावशब्दार्थं विकल्प्य दूषयति—कश्चायमिति। केवलान्वयिपक्षे केवलव्यतिरेकिणि हेतौ

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतेन स्वाभाविकः सम्बन्धो व्याप्तिरिति द्वितीयः कल्पोऽपि परास्तः, तत्रापि जातिव्यक्त्यादिविकल्पानां दूषणानां तुल्यत्वात्, स्वाभाविकशब्दार्थानिरुक्तेश्च। स्वाभाविकशब्देन किं सम्बन्धिस्वभावजन्यत्वं विवक्ष्यते ? यद्वा तत्स्वभावाश्रितत्वमथवा तत्स्वभावप्रयुक्तत्वम् ? आहोस्वित्तद्व्याप्यत्वम् ? किं वा तदनतिरिक्तत्वम् ? नाद्यः एकार्थसमवायेन रसाद्रूपानुमाने तत्सम्बन्धस्य समवायस्याजन्यत्वेनाव्याप्तेः, व्यभिचारिणोर्घटपटयोः संयोगेऽतिव्याप्तेश्च; तस्य तद्रूपत्वेऽपि व्याप्तिरूपत्वाभावात्। नापि द्वितीयः; घटपटयोः संयोगे संयोगिस्वभावाश्रिते व्यभिचारात्। नापि तृतीयः; प्रयुक्तत्वशब्देन जन्यत्वविवक्षायामाद्यपक्षोक्तदूषणप्रसङ्गात्, तद्व्याप्तत्वविवक्षायां तु व्याप्तेरद्याप्यनिरुक्तेरात्माश्रयः। अत एव न चतुर्थः। किञ्च सम्बन्धस्य व्याप्यत्वे सम्बन्धिनोस्तद्व्यापकत्वेनाभिमतयोः क्वचित्तदधिकदेशकालावस्थानसम्भवेन सम्बन्धं विनाप्यवस्थानोपपत्तौ व्यभिचारात्तदेकतरदर्शनेनान्यतरानुमानं न स्यात्। नापि पञ्चमः; भूतलघटाभावयोर्विशेषणविशेष्यभावलक्षणसम्बन्धेऽतिव्याप्तेः। तस्य परैस्तदतिरिक्तत्वानङ्गीकारात्, समवायतद्वतोः सम्बन्धे च। रसाद्रूपानुमानादावेकार्थसमवायेऽव्याप्तेः, तस्य सम्बन्धिस्वरूपातिरिक्तस्यापि व्याप्तित्वात्।

तादृशव्याप्त्यभावः, पक्षादन्यत्र हेतुसाध्यसद्भावे केवलव्यतिरेकित्वभङ्गप्रसङ्गः। व्यतिरेकिव्याप्तिपक्षोऽसमीचीनः केवलान्वयिन्यभावात्। अन्वयव्यतिरेकि पक्षं दूषयति—न तृतीयः। अन्वयव्यतिरेकिणि हेतौ तादृशव्याप्तिसत्त्वेऽपि केवलान्वयिनि केवलव्यतिरेकिणि च हेतौ तादृशव्याप्तेरभावादिति न व्याप्तिर्निरूपयितुं शक्येतिभावः।

एवमविनाभावो व्याप्तिरिति पक्षं निराकृत्य द्वितीयेऽपि तदेव दूषणमतिदिशति—एतेनेति। तदेव विवृणोति—तत्रापीति। स्वाभाविकः सम्बन्धो व्याप्तिरितिकल्पेऽपि व्यक्त्योर्जात्योस्तद्विशिष्टयोर्वा निरुक्तव्याप्तिरिति दोषाणां तुल्यत्वात्, स्वाभाविकशब्दार्थस्य निर्वक्तुमशक्यत्वाच्च। अत्र पक्षेऽसाधारणमपि दूषणमाह—स्वाभाविकेति। अत्र पञ्चधाविकल्पेषु सम्बन्धिस्वभावजन्यत्वमिति नाद्यः कल्पः, विमतं रूपवद्, रसवत्त्वादित्यत्रैकार्थसमवायेन रसवत्त्वाद्रूपवत्त्वानुमाने ह्येकार्थसमवाय एव व्याप्तिरूपसम्बन्धः, तस्याजन्यत्वेन तल्लक्षणाव्याप्तेर्व्यभिचारिणोर्घटपटयोः संयोगेऽतिव्याप्तेश्च। घटपटसंयोगस्य सम्बन्धिरूपेण जन्यत्वेऽपि व्याप्तिरूपत्वानभ्युपगमात्। सम्बन्धिस्वाभावाश्रितः सम्बन्धो व्याप्तिरिति द्वितीयकल्पेऽपि घटपटयोः संयोगेऽतिव्याप्तिमाह—नापि द्वितीयः। संयोगिस्वरूपघटपटाश्रिते संयोगसम्बन्धेऽतिव्याप्तेः। नापि सम्बन्धिस्वभावप्रयुक्तत्वं तदिति तृतीयकल्पो युक्तः, प्रयुक्तत्वशब्देन जन्यत्वविवक्षायामाद्यपक्षोक्तदोषप्रसक्तेः, संयोगेऽतिव्याप्तिरित्यर्थः। व्याप्तत्वविवक्षायामद्यापि व्याप्तेऽनिरुक्तेरात्माश्रयतापत्तेः। चतुर्थेऽपि दोषमात्माश्रयमतिदिशति—अत एवेति। किञ्च सम्बन्धिभ्यां व्याप्तः सम्बन्धश्चेत्तर्हि सम्बन्धिनोर्व्यापकयोरधिकदेशवृत्तित्वं सम्भाव्यते, तथा सति सम्बन्धं विनापि तयोः सम्बन्धिनोः स्थितिः स्यात्। एवं चान्यतरदर्शनादन्यतरानुमानं न स्यादितिभावः। सम्बन्धिस्वरूपानतिरिक्तत्वमिति पञ्चमकल्पेऽपि दोषमाह—नापि पञ्चमः। घटाभाववद्भूतलमित्यत्र भूतलघटाभावयोर्विशेषणविशेष्यभावरूपसम्बन्धेऽतिव्याप्तेः।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अतोऽनौपाधिकः सम्बन्धो व्याप्तिरिति तृतीयः कल्पो न युक्तः; तत्रापि सम्बन्धिनोर्दुर्निरूपत्वात्, इतरेतराश्रयप्रसङ्गाच्च। उपाधिर्हि साधनाव्यापकत्वे सति साध्यव्यापकः, एवं च व्याप्तिसिद्धावुपाधिसिद्धिस्तत्सिद्धौ च तद्रहितसम्बन्धस्य व्याप्तित्वसिद्धिरिति कथं नान्योन्याश्रयत्वम्? अथ मतं साध्यव्यापकत्वं नामोपाधेरदृष्टव्यभिचारसाध्यत्वम्, नतु वस्तुतो व्यापकत्वम्, तस्मान्नेतरेतराश्रयत्वमिति, मैवम्। व्यभिचरितसाध्यस्यापि वस्तुगत्यापाततोऽदृष्टव्यभिचारसाध्यत्वापत्तेस्तस्याप्युपाधित्वप्रसङ्गात्। साध्यव्यभिचारदर्शनविषयत्वात्यन्ताभाववत्त्वं विवक्षितमिति चेत्, न; तस्य दुरवधारणत्वात्। नहि देशान्तरे कालान्तरे पुरुषान्तरे वा तयोर्व्यभिचारदर्शनं न भविष्यतीत्येवेति शक्यं विज्ञातुमसर्वज्ञेन। किञ्च व्याप्तिग्रहणसमयेऽग्निमत्त्वादेर्निश्चितत्वेन साध्यत्वाभावात्साध्यव्यापक उपाधिरिति निर्धारयितुमशक्यम्। व्यापकत्वमिह साध्यशब्देन विवक्षितमिति चेत्, न; व्याप्त्यनवगमे व्यापकत्वानिरुक्तेः।

एतेन साध्यवन्निष्ठात्यन्ताभावाप्रतियोगित्वं साध्यव्यापकत्वं साधनवन्निष्ठात्यन्ताभावप्रतियोगित्वं साधनाव्यापकत्वमित्याधुनिकानां वक्रनयोऽपि निराकृतः; साध्यसाधनयोरनिरुक्तेरेव। तद्रूपेण सम्भावितत्वमुभयत्रापि विवक्षितमिति चेत्, मैवम्, तद्रूपस्यानिरुक्तौ तद्रूपेण सम्भावितत्वस्यापि दुर्भणत्वात्।

विशेषणविशेष्यभावरूपसम्बन्धस्य परैरतिरिक्तत्वानभ्युपगमात्। समवायसमवायवतोः सम्बन्धे स्वरूपे चातिव्याप्तेः। अव्याप्तिमप्याह—रसादिति। रूपरसयोः सम्बन्धस्य समवायस्य सम्बन्धिस्वरूपातिरिक्तत्वेन लक्षणाव्याप्तेरिति।

निरुपाधिकः सम्बन्धो व्याप्तिरिति तृतीयं पक्षं निराचष्टे—अनौपाधिकः इति। तत्रापि निरुक्तव्यक्त्यादिभिः सम्बन्धिनोर्दुर्निरूपत्वात्। उपाधिघटितलक्षणेऽन्योऽन्याश्रयत्वाच्च। साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधित्वमिति व्याप्तिसिद्धिमन्तरेणोपाधिसिद्धेरभावात्। अन्योऽन्याश्रयतां वारयितुं शङ्कते—अथ मतमिति। अदृष्टव्यभिचारसाध्यत्वम्। उपाधिना सह साध्यस्य व्यभिचारो न दृष्टः इत्येतावन्मात्रं साध्यव्यापकत्वं न तु वास्तविकम्। तदपि दूषयति—मैवमिति। वस्तुगत्याव्यभिचरितसाध्यस्यापि आपाततोऽदृष्टव्यभिचारसाध्यत्वापत्तेस्तस्याप्युपाधित्वप्रसङ्गात्। अथ यत्र धर्मे साध्यव्यभिचारदर्शनस्यात्यन्ताभावः स धर्मः उपाधिपदेनाभिमत इति चेन्न, तस्य देशान्तरे कालान्तरे पुरुषान्तरेवोपाधिना सह साध्यस्य व्यभिचारदर्शनं न भविष्यतीति विज्ञातुमशक्यत्वादसर्वज्ञेन। अथोपाधेरग्निमत्त्वं प्रति व्यापकत्वग्रहणसमये पर्वतादावग्निमत्तादेः सिद्धत्वेन साध्यत्वाभावादित्याह—किञ्चेति। न च धूमवत्त्वादेर्व्यापकतयाऽग्निमत्त्वादेः साध्यत्वं विवक्षितमिति वाच्यम्; व्याप्तिज्ञानाभावे व्यापकत्वस्य निर्वक्तुमशक्यतयाऽन्योऽन्याश्रयतापत्तेर्दुर्वारत्वात्।

अत्र शिवादित्यमिश्रेणोक्तेऽपि परिहारे दोषमतिदिशति—एतेनेति। अस्यापि साध्यसाधनाधीननिरूपितत्वेन तत्प्रयुक्तपूर्वोक्तदोषोऽशक्यपरिहार इत्याह—साध्यसाधनयोरिति। नच तद्रूपेण=साध्यत्वेन सम्भावितं साध्यं साधनत्वेन च सम्भावितं साधनं विवक्षितमिति वाच्यम्, तद्रूपस्य निर्वचनासम्भाविते तद्रूपेण सम्भावितत्वस्य निरुक्तलक्षणस्य दुर्भणत्वात्।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवतु नाम या काचन व्याप्तिः, तस्या व्याप्तेरनुमितेश्च व्याप्तिरेष्टव्येत्यात्माश्रयः सत्यामेव व्याप्तावनुमितिभावादसत्यामभावात् । किञ्च तद्व्याप्तिग्राहकं प्रमाणम् ?

न प्रत्यक्षमशक्यत्वान्नानुमाप्यनवस्थितेः ।
नागमस्तदृते भावान्नोपमाऽतत्प्रमेयतः ॥२५॥
नार्थापत्तिरनन्यत्वादनुमाफललोपनात् ।
नाभावो दुर्निरूपत्वान्न तर्कस्तर्कबाधनात् ॥२६॥

न तावत्प्रत्यक्षं व्याप्तिग्राहकम्, सर्वव्यक्तिनिष्ठस्यान्वयस्य व्यतिरेकस्य वा सर्वव्यक्ती नामग्रहे ग्रहीतुमशक्यत्वात्, तद्ग्रहे वाऽनुमानस्य वैयर्थ्यात् । नाप्यनुमानम्; अनवस्थानात् अन्तरेण व्याप्तिग्रहमनुमानानुदये । तत्तद्व्याप्तिग्राहकानुमानपरम्पराया दुर्वारत्वात् नाप्यागमः, वेदाप्तवचनाकर्णनविधुराणामपि व्याप्तिदृष्टिदृष्टेः । नाप्युपमानम्; तत् सादृश्यमात्रविषयतया व्याप्तिज्ञप्तावजागरूकत्वात् । नाप्यर्थापत्तिः; तस्या अनुमानानति रेकात् । अतिरेकेऽपि तयानुमानावसेयार्थाधिगतेरनुमानस्यानुदयप्रसङ्गात् । तथा हि— व्यापकव्यतिरेकेण व्याप्यस्यानुपपत्तिरिहार्थापत्तिरभिमता, तथा च तयैवानुपपत्त्या लिङ्गि नोऽधिगतौ कृतमनुमानेन । नाप्यभावः; एवं हि स प्रमाणयितव्यः—यदि वह्निर्धर्मिव्य

एवं व्याप्तिलक्षणं निरस्यात्माश्रयादितर्कबाधादपि व्याप्तेरनुमित्यङ्गत्वं साधयितुं दुःशक मित्याह—भवतु नामेति । व्याप्तेरनुमितेश्चान्वयव्यतिरेकाभ्यां व्याप्तित्वस्वीकारे तयोरात्माश्र तापत्तेः । न च व्याप्तौ किञ्चन प्रमाणमपि निरूपयितुं शक्यमित्याह—किञ्चेति । सम्भवत्प्रमाणा श्लोकाभ्यां निराचष्टे—न, प्रत्यक्षमित्यादिनेति । सर्वव्यक्तिनिष्ठव्याप्तेरसर्वज्ञेन ग्रहीतुमशक्यात्व प्रत्यक्षेण व्याप्तेरधिगमः । नाप्यनुमानेन व्याप्तेरधिगमः, अन्योऽन्याश्रयादनवस्थानाच्च । ना व्याप्तावागमः प्रमाणम्, आगमव्यापाराभावेऽपि पामरादिष्वप्यनुमित्युदयदर्शनात् । नाप्युपमा तत्र प्रमाणम, अनुमितेरुपमानाविषयत्वात् । नाप्यर्थापत्तिर्व्याप्तौ प्रमाणं, अनुमानाभिन्नत्वादर्थापत्तेः अर्थापत्तितोऽनुमानस्य भिन्नत्वाभ्युपगमे तयैवानुमितिविषयाधिगमेऽनुमानस्य निष्फलत्वापत्तेः नाप्यनुपलब्धिस्तत्र प्रमाणम्; तस्या दुर्निरूप्यत्वात् । नापि तर्कस्तत्र मानम्; तर्क व्याप्तिमूलत्वेऽनवस्थारूपतर्कबाधादिति श्लोकयोः समासार्थः । श्लोकसङ्ग्रहं विशदयति— तावदित्यादिनेति । व्याप्तिग्राहकं प्रत्यक्षं निराकुरुते—सर्वव्यक्तीति । प्रत्यक्षेण सर्वव्यक्तीनामग्र सर्वव्यक्तिनिष्ठयोरन्वयव्यतिरेकयोर्ग्रहीतुमशक्यत्वात् । अनुमानेऽनवस्थामेव विवृणुते— अन्तरेणेति । अनुमानापेक्षितव्याप्तिग्रहे द्वितीयाद्यनुमानानामपेक्षितत्वेऽनवस्थाया दुर्वार त्वात् । नाप्यागमः, वेदाप्तवाक्यश्रवणविधुराणामपि व्याप्तिग्रहदर्शनात् । उपमानं सादृश्यमा गोचरयति न तु व्याप्तिम् । अर्थापत्तेरनुमानाभिन्नत्वेन तत्र पृथक् प्रमाणत्वाभावात्, भिन्नत्वे तयैवानुमितिविषयावसेयेऽनुमानानुदयप्रसङ्गात् । व्यापकाभावे व्याप्यानुपपत्तिरेवेहार्थापत्तिरि व्याप्यानुपपत्त्यैव वह्न्यादेर्लिङ्गिनोऽधिगमेऽलमनुमानेन । अनुपलब्धिं दूषयति—नाप्यभाव इति अनुपलब्धेरसम्भवं दर्शयितुं तत्प्रवृत्तिप्रकारं दर्शयति—एवं होति । वह्निर्धर्मी, धूमश्च तस्य धर्मः । तथा स्वधर्मिव्यतिरेकेण धूमधर्मस्यास्तित्वं स्यात्तर्हि वह्न्यभावादपि धूमोपलम्भ

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रेकेण धूमः स्यात्तदा तथोपलम्भः स्यात्तदभावान्नायं तद्व्यतिरेकेणेति । तच्च न । तथाहि—किं सर्वेषां व्यभिचारानुपलम्भः ? किं वा स्वस्यैवानुपलम्भः ? उत योग्यानुपलम्भः? नाद्यः; सर्वानुपलम्भस्य निश्चे तुमशक्यतया संशयानिवृत्तेः । न द्वितीयः; व्यभिचारात् । नहि नगरगतेन स्वेनानुपलब्धमित्येतावतारण्यकोपलब्धगवयादेरपलापसम्भवः । नापि तृतीयः । सार्वत्रिकयोग्यानुपलब्धेरसम्भवात् । उक्तं च लीलावतीकारेण—

"सर्वादृष्टेश्च संदेहात्स्वादृष्टेर्व्यभिचारतः ।
योग्यादृष्टेरसत्त्वाच्च प्रतिबन्धो न सिध्यति ॥" इति (न्या०ली०पृ०२५२)

नापि विपक्षबाधकतर्कात् । तर्कस्य व्याप्तिमूलत्वेनानवस्थानात्, अतन्मूलत्वे च मूलशैथिल्येन तर्काभासत्वात् । अथ मतम्, यदि धूमोऽग्निं व्यभिचरेदकारणः सन्नित्यः स्यात्, न स्यादेव वा, न तु कदाचित्स्यात् । न च विनापि कारणं कार्यं शङ्कितुं शक्यम्; व्याघातात्—तदेव हि कार्यं यत्कारणाधीनस्वात्मलाभम्, अतः कार्यं च कारणरहितं चेति व्याघातः । तदेव चाशङ्कितव्यं यस्मिन्नाशङ्क्यमाने क्रियाव्याघातादयोपि नावतरन्तीति, मैवम्; अस्यापि तर्कस्य व्याप्तिमूलत्वेन तदसिद्धावसिद्धेः । तथाहि—यत्कार्यं तत्कारणपूर्वकमिति व्याप्तौ सिद्धायां यदकारणं तन्नित्यं स्यादिति प्रसङ्गप्रसरात्, सैवाद्यापि न सिद्धा । सर्वकार्यकारणव्यक्तिग्रहणस्याशक्यत्वात्, कतिपयव्यक्तिग्रहणे चादृष्टवज्रस्य पार्थिवत्वलोहलेख्यत्वयोरिव व्याप्तेरनिश्चयात् । नन्वेवंभूतोपि व्यभिचारो यत्र न दृश्यते,

---

स्यात्, किन्तु वह्न्यभावे धूमो नावभासते । अतो न वह्निमन्तरेण धूमः क्वापि वर्तते । अभावप्रमाणस्य प्रवृत्तिप्रकारं प्रदर्श्य सम्प्रति तं दूषयति—तच्च नेति । दूषयितुं विकल्पमाह—किं सर्वेषामित्यादिनेति । प्रथमकल्पे संशयनिवृत्तिः । द्वितीये कल्पे व्यभिचारदोषं संघटयति—नहि नगरगतेनेति । योग्यानुपलब्धिकल्पे तृतीयेऽसम्भवमाह—नापीति । तत्र लीलावतीकारसम्मतिमाह—उक्तं चेति । सर्वपुरुषाणां व्यभिचारानुपलब्धिः सन्दिग्धाऽस्ति, प्रतिपत्तुरेवानुपलब्धौ व्यभिचारः, योग्यानुपलब्धावसम्भव इति श्लोक योजना प्रतिबन्धो = व्याप्तिः । विपक्षबाधकतर्कमन्तिमं पक्षं निराकुरुते—नापीति । व्याप्तिमूलके तर्केऽनवस्था, अतन्मूलके तर्के तर्काभासत्वम् । उदयनोक्तं बाधकं तर्कमुद्भाव्य दूषयति—अथ मतमित्यादिनेति । यदकारणकं तत्सदेकरूपमाकाशवदसदेकरूपं वाऽऽकाशपुष्पवच्च । तथा च धूमोऽग्निं व्यभिचरेच्चेत्तर्हि नित्यसत्वासत्त्वयोरन्यतरप्रसक्तिः स्यादित्यर्थः । कारणमन्तरेण कार्यसत्त्वाभ्युपगमे प्रसक्तं व्याघातं सङ्गमयति—तदेव हीति । व्याघाताद्भयमुक्तं प्रत्याह—तदेव चेति । अत्र कल्पेऽपि पूर्वोक्तं दोषं परिहर्तुमशक्यमाह—मैवमित्यादिनेति । अस्यापि तर्कस्य व्याप्तिमूलकत्वेनान्योऽन्याश्रयस्य तादवस्थ्यात् । तमेव संघटयति—तथाहीति । कतिपयव्यक्तिग्रहणेऽपि व्याप्त्यसिद्धौ दृष्टान्तमाह—अदृष्टवज्रस्येति । विमतं लोहलेख्यं पार्थिवत्वादित्यत्र स्तम्भादिकतिपयव्यक्तौ व्यभिचारादर्शनेऽपि व्याप्तिनिश्चयाभावस्तदवस्थः, प्रशिथिलावयवारब्धत्वोपाधिपराहतत्वात् । अथ कतिपयव्यक्तिषु सहचारदर्शनाद् व्यभिचारादर्शने उपाधिनिरूपणाभावे च सति व्याप्तिनिश्चयो भवेदित्युक्तौ वाचस्पत्युक्तोपालम्भ-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कतिपयव्यक्तिषु सहभावः प्रदृश्यते, न चोपाधिर्निरूप्यते, तत्र व्याप्तिर्निश्चीयते, तत्रैवं सति, "अन्यत्र व्याप्तिग्रहणमन्यत्र चानुमितिरिति । एवं च ष(प)ण्डकमुद्वाह्य मुग्धायाः पुत्र-प्रार्थनमिव" इति वाचस्पतेरुपालम्भोऽप्यनवकाशः, व्याप्तेः सर्वत्रैकत्वात्तस्याश्च कतिपय-व्यक्तिषु गृहीतत्वात् । गृहीतव्याप्तिकलिङ्गसामर्थ्यादेव सन्दिग्धसाध्यधर्मिणि व्यापकस्या-प्रतीतिः सिद्धेति चेत्, मैवम्; व्यभिचारादर्शनस्योपाध्यनिरूपणस्य च दुर्निरूपत्वात्, सर्वादृष्टेश्च संदेहादिति न्यायस्योभयत्रापि तुल्यत्वात्; उपाधेश्च व्याप्तिनिरूपणमन्तरेण दुर्निरूपत्वस्य दर्शितत्वात् । किञ्च विनापि धूमध्वजं धूमोऽन्यस्मादपि हेतोर्भविष्यतीति शङ्कायाः कः प्रतीकारः ? अथ मन्यसे विभिन्नसामग्रीजन्यत्वे धूमस्यैकजातीयताप्रतीतिः स्यादिति, मैवम्; इन्द्रियत्वगलिङ्गादिजन्यविज्ञानस्येव तृणारणिमणिप्रभवस्याऽऽशुशुक्षणेरिव चैकजातीयतोपपत्तेः । तस्मान्न व्याप्तिलक्षणं नापि तद्ग्राहकं प्रमाणमस्तीति सिद्धम् ।

पक्षधर्मत्वमपि दुर्निरूपम् । तथा हि—कोयं पक्षो, यद्धर्मता पक्षधर्मता ? संदिग्धसा-ध्यधर्मा धर्मीति चेत्, किं वादिप्रतिवादिनोः संदेहः ? किं वा मध्यस्थानाम् ? नाद्यः, निश्चितौ हि वादं कुरुत इति स्वीकारात्, नापि द्वितीयः; तेषामपि दर्शनद्वयतत्त्ववेदिनां संदेहानुपपत्तेः; किञ्चान्तरेणापि संशयं धूमदर्शनमात्रादग्निमनुमिमानस्य संदेहविशेषि-तधर्मिणि हेतोरवृत्तेः पक्षधर्मत्वाभावादनुमानानुदयप्रसङ्गः । एतेन ज्ञापनीयधर्मविशिष्टो धर्मी पक्ष इति प्रत्युक्तम्; स्वार्थानुमाने प्रज्ञापनाभावात् । प्रमित्सितधर्मविशिष्टः प-इत्यपि न; अप्रमित्सतोऽप्यनिष्ठविषयेऽनुमानोदयदर्शनात् । साध्यधर्मविशिष्टः प-इत्यपि न; साध्यपदेन संदिग्धत्वप्रज्ञापनीयत्वप्रमित्सितत्वाद्यन्यतमविवक्षायामुक्तदोषा-

---

माह—तत्रैवं सतीति । महानसीयधूमेव्याप्तिग्रहणं पर्वतीयधूमादनुमितिरिति तथैव परिहासयोग्यं प-पुत्रोत्पादनेऽसमर्थं षण्डकमुद्वाह्य मुग्धायाः पुत्रोत्पादनाप्रार्थना । न चात्र मिश्रोक्तपरिहासावकाशोऽस्ति व्याप्तेः सर्वत्रैकत्वेन कतिपयव्यक्तिषु गृहीतत्वात् । तथा गृहीतव्याप्तिकलिङ्गसामर्थ्यादेव पर्वते वह्निव्यापकस्यानुमितिः स्यादिति चेन्न, व्यभिचारदर्शनोपाधिनिरूपणाभावयोर्दुर्निरूप्यत्वात् उभयत्र लीलावतीकारोक्तस्य "सर्वादृष्टेश्च सन्देहादि"ति न्यायस्य तुल्यत्वात् । व्यभिचारवदुपा-वपि सर्वादर्शनस्य समानत्वादित्यर्थः । न च वह्निमन्तरेणापि धूमोऽन्यस्मादुत्पद्येतेति शङ्कनीयमि-वाच्यम्; इन्द्रियलिङ्गादिजन्यविज्ञाननिष्ठैकजातिवत्तृणारणिमणिप्रभूतवह्निनिष्ठैकजातिवच्च विभि-सामग्रीजन्यधूमेऽपि समानजातीयतोपपत्तेः । व्याप्तिनिराकरणमुपसंहरति—तस्मान्नेति ।

सम्प्रति पक्षधर्मतारूपलिङ्गावयवं निराचष्टे—पक्षधर्मत्वमपीति । सन्दिग्धसाध्यधर्माधर्मि-पक्षस्य लक्षणं परार्थानुमाने निरस्य स्वार्थानुमानेऽव्याप्तिमाह—किञ्चेति । अथ प्रज्ञापनीयधर्मविशि-धर्मीपक्ष इतिपक्षलक्षणेऽपि पूर्वोक्तं दोषमतिदिशति—एतेनेति । स्वार्थानुमाने शब्दप्रयोगपूर्वकं सा-प्रज्ञापनाभावात् । नापि प्रमातुमिष्टधर्मविशिष्टः पक्ष इति पक्षलक्षणं युक्तमिति, प्रमाज्ञाने-विरहिणोऽप्यनिष्टविषयेऽनुमानोदयदर्शनात् । दुर्गन्धादिलिङ्गककुजपाद्यनुमाने निरुक्तपक्षलक्षणाव्या-रित्यर्थः । सर्वज्ञोयं लक्षणमुद्भाव्य निराचष्टे—साध्यधर्मेति । अत्रापि साध्यपदेन पूर्वोक्त-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

षङ्गात् । अप्रमितत्वं साध्यत्वमिति चेत्, न,प्रमाणसंप्लववादिनो नैयायिकस्य प्रमितेऽप्यनुमानप्रवृत्तेः, अनुमितेऽप्यनुमानप्रवृत्तेश्च । न च तत्रापि तत्तत्कालविशिष्टतयानधिगतिः; कालानुमाने तदभावात् ।

अस्तु वा यः कश्चित्पक्षस्तथापि तद्धर्मता दुरधिगमा । तथाहि—पक्षाश्रितत्वं पक्षधर्मत्वं चेत्, तथा सति प्रमेयत्वहेतौ तन्न स्यात्, प्रमेयत्वस्य प्रमाविषयत्वलक्षणस्य ज्ञानज्ञेयानतिरिक्तत्वाभ्युपगमेन तदाश्रितत्वायोगात् । प्रमान्योन्याभाववत्त्वं प्रमेयत्वं ततस्तस्य ज्ञानज्ञेयाश्रितत्वमुपपन्नमिति चेत्, न; अन्योन्याभावस्यैकत्वे तस्य तदवृत्तौ प्रमेयत्वहेतुना कस्यचित्प्रत्यक्षत्वानुमानं न स्यात्; तस्यैवान्योन्याभाववत्त्वाभावात् । अनेकत्वे चान्योन्याभावानां सर्वान्योन्याभाववत्त्वं प्रमेयशब्दप्रवृत्तिनिमित्तम्? उतान्यतमवत्त्वम् ? नाद्यः; सर्वग्रहणासम्भवात् । न द्वितीयः: अन्यतमशब्देन निर्धारितैकविशेषोक्तौ तदितरप्रमेयशब्दप्रवृत्त्ययोगात् । एकं निमित्तमन्तरेण बहुष्वेकशब्दप्रवृत्तौ गोत्वादेरपलापप्रसङ्गात् । व्याप्तिबलेन प्रवृत्ताया व्यापकसामान्यविषयायाः प्रतीतेर्विशेषपर्यवसानाय व्याप्यस्य सामर्थ्यं पक्षधर्मतेति चेत्, मैवम्; विकल्पासहत्वात् । किं प्रथमं सामान्यमात्रालम्बना प्रतीतिर्या सा सामर्थ्यात्पश्चाद्विशेषमवगाहत इति ब्रूषे ? किं वा विशेषविषयप्रतीतिरनन्तरं जायत इति ? नाद्यः; प्रतीतेर्विरम्यव्यापारापत्तेः । न द्वितीयः; प्रमाणान्तरप्रसङ्गात् । किञ्च पक्षधर्मता चेद्विशेषप्रत्यायिका,केवलव्यतिरेकी तर्हि निरवकाशः स्यात्;शब्दः क्वचि-

---

विवक्षायां पूर्वोक्तदोषापत्तिरेव । अप्रमितत्वस्य साध्यत्वे एकस्मिन् प्रमेये कतिपयप्रमाणप्रवृत्तिं मन्यमानानां नैयायिकानां प्रमितेऽप्यनुमानप्रवृत्तेरनुमितेऽप्यनुमानप्रवृत्तेश्च । न च तत्रापि तत्तत्कालविशिष्टत्वेन साध्यानधिगतिरिति वाच्यम्, कालविषयकानुमानेऽन्यकालवैशिष्ट्यासम्भवात् ।

पक्षलक्षणं निरस्याधुना पक्षधर्मतालक्षणं निरस्यति—अस्तु वेति । पक्षधर्मतां दुरधिगमयति—तथाहीति । पक्षाश्रितत्वं पक्षधर्मत्वं दूषयति—प्रमेयत्वहेताविति । प्रमाविषयत्वरूपस्य स्वरूपसम्बन्धविशेषस्य प्रमेयत्वस्य ज्ञानज्ञेयभिन्नत्वानभ्युपगमेन पक्षाश्रितत्वायोगात् । न च प्रमाभेदवत्त्वं प्रमेयत्वमित्यभ्युपगमेन ज्ञानज्ञेयाश्रितत्वमुपपद्येतेति वाच्यम्, अन्योऽन्याभावस्यैकत्वे स्वस्मिन् स्ववृत्त्यभावेनान्योऽन्याभावस्य भेदानिष्ठत्वे प्रमेयत्वहेतुना । कस्यचिदन्योऽन्याभावस्य प्रत्यक्षत्वानुमानं न स्यात्, नहि तत्रान्योऽन्याभावेऽन्योऽन्याभावरूपमेयत्वमस्ति, येन प्रमेयत्वहेतुना भेदे भेदप्रत्यक्षत्वानुमेयं स्यात् । अन्योऽन्याभावस्यानेकत्वे सर्वान्योऽन्याभावस्याश्रयता प्रमेयशब्दवाच्या, उतान्यतमान्योऽन्याभावाश्रयता प्रमेयशब्दवाच्येति विकल्प्य दूषयति—नाद्यः । असर्वज्ञेन गृहीतुमशक्यत्वात् । अन्यतमपक्षं दूषयति—न द्वितीयः, अन्यतमशब्देन यस्यैकस्य निर्धारितविशेषस्योक्तौ तदितरेषु प्रमेयशब्दप्रयोगायोगात् । अनियमेन कदाचित्कश्चित्प्रवृत्तिनिमित्तमित्युक्तौ दोषमाह—एकमिति । लक्षणान्तरमनुसरति—व्याप्तिबलेनेति । एतदपि लक्षणं विकल्प्य दूषयति—नाद्यः, शब्दबुद्धिकर्मणां विरम्यव्यापाराभावाज्जातस्य पुनर्जन्माभावाच्च । नहि प्रतीतिः पूर्वं सामान्यमात्रमालम्बते पश्चात् सामर्थ्याद्विशेषमवगाहते इति वक्तुं युक्तम् । द्वितीयकल्पं निराचष्टे—न द्वितीयः । विशेषविषयं बुद्ध्यन्तरं जायते चेत्तर्हि तत्प्रमाणान्तरमेव । पक्षधर्मतायां विशेषप्रत्यायकत्वे बाधकान्तरमाह—किञ्चेति ।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दाश्रितो गुणत्वादित्यादिसामान्यतो दृष्टानुमानेषु हेतोः पक्षधर्मताबलादेवाष्टद्रव्यातिरिक्त-द्रव्याश्रितत्वस्यापि सिद्धेः। बाधकान्तराधीनमेव तदितराष्टद्रव्याश्रितत्वनिरसनमित्यु-भयवादिसम्प्रतिपन्नतया तदितराश्रितत्वनिरासेऽपि केवलव्यतिरेकिणो निरवकाशत्वात्।

तदेवं न व्याप्तिर्नापि पक्षधर्मता शक्यनिरूपणेति व्याप्तिपक्षधर्मतावल्लिङ्गतत्परामर्शो-ऽनुमानमिति लक्षणं न सिद्धयतीति सिद्धम्। शाब्दव्युत्पत्तिशून्यस्य स्मृतिकरणिका प्रमि-तिरनुमितिस्तत्करणमनुमानमित्यपि न लक्षणम्; व्युत्पन्नस्यानुमितौ तत्करणे चाव्याप्तेः। तादृशप्रमितिवृत्तिप्रमात्वावान्तरजात्यधिकरणज्ञानमनुमितिस्तत्करणमनुमानमिति चेत्, न; प्रमात्वजातेः पुरस्तादेव निरस्तत्वात्। एतेन—

"अनुमेयेन सम्बद्धं प्रसिद्धं च तदन्विते।
तदभावे च नास्त्येव तल्लिङ्गमनुमापकम्।" (वै०भा०पृ०१००)

"अनुमानं त्रिरूपाल्लिङ्गतोऽर्थदृक्" "ज्ञातसम्बन्धस्यैकदेशदर्शनादेकदेशान्तरे बुद्धिः" इत्येव-मादीनि वैशेषिकवैभाषिकजैमिनीयलक्षणान्यपि प्रत्युक्तानि; पक्षधर्मत्वसपक्षसत्त्वव्याप्यव्या-पकसम्बन्धानां पुरैव निरस्तत्वात्। तदेवं नानुमानलक्षणमपि निर्वोढुं शक्यमिति सिद्धम्।

पक्षधर्मताया विषयविशेषसमर्पकत्वस्वीकारे केवलव्यतिरेकिणो वैयर्थ्यप्रसङ्गात्। सामान्यतोदृष्टानु-मानेन साध्यप्रसिद्धिसम्भवे केवलव्यतिरेकिणा विषयविशेषः समर्थ्यते। यथा शब्दः क्वचिदाश्रितो गुणत्वादिति किञ्चिदाश्रितत्वे सिद्धे केवलव्यतिरेकिणाष्टद्रव्यातिरिक्तद्रव्याश्रितत्वं साध्यते, तद्वयर्थं स्यात्। सामान्यतोदृष्टहेतोः पक्षधर्मताबलादेवाष्टद्रव्यातिरिक्तद्रव्याश्रितत्वस्यापि सिद्धेः। प्रकारा-न्तरेण केवलव्यतिरेकिणः सार्थक्यमाशङ्कते—बाधकान्तराधीनमेवेति। आकाशव्यतिरिक्ताष्टद्रव्या-श्रितत्वनिरसनार्थत्वात्तस्य केवलव्यतिरेकिणः सार्थक्यमिति बोध्यम्। आकाशातिरिक्तपृथिव्या-द्याश्रितत्वनिरासेऽपि केवलव्यतिरेकिणो निरवकाशत्वं तदवस्थमिति।

व्याप्तिपक्षधर्मतानिराकरणस्यात्रोपयोगप्रसङ्गमुपसंहरति—तदेवमिति। तर्करीत्याऽनुमिति-करणमनुमानमिति लक्षयित्वाऽनुमितेर्लक्षणमाह—शाब्देति। शब्दशक्तिग्रहशून्यस्य पुरुषस्य स्मृति-करणजन्या प्रमितिरनुमितिस्तत्करणमनुमानमित्यपि लक्षणं न युक्तम्, व्युत्पन्नपुरुषस्यानुमितौ तत्करणे च व्याप्त्यभावात्। न चोक्तप्रमितिनिष्ठप्रमात्वरूपावान्तरजात्यधिकरणज्ञानमनुमिति-स्तत्करणमनुमानम्, शाब्दव्युत्पत्तिमन्निष्ठानुमितितत्करणयोः संग्रहार्थं तादृशेति विशेषणं, व्युत्पन्नानु-मितावपीदं प्रमितित्वमस्त्येव। अत्र लक्षणे प्रत्यक्षभ्रमसंशयवारणाय प्रमात्वावान्तरजातिर्विशेषणं, प्रत्यक्षागमवारणाय तादृशप्रमितिविशेषणम्। अत्रापि पूर्वोक्तदोषं स्मारयति—प्रमात्वजातेरिति। निरुक्तानुमानलक्षणनिराकरणं प्रशस्तपाददिङ्नागशबरस्वामिसम्मतलक्षणेष्वतिदिशति—एतेनेति। पक्षेऽनुमेयेन सम्बद्धं, सपक्षेऽनुमेयेन सह प्रसिद्धं, तदभावे=विपक्षे यन्नास्त्येव तल्लिङ्गमनुमिति-करणमिति प्रशस्तपादलक्षणस्य संग्रहार्थः। दिङ्नागसूत्रमाह—अनुमानमिति। शबरस्वामिलक्षणमाह—ज्ञातसम्बन्धस्येत्यादिना। पक्षसत्त्वात्सपक्षसत्त्वाद्विपक्षव्यावृत्तत्वाच्च लिङ्गादर्थदर्शनमनुमानमिति वैभा-षिकाणां सूत्रकारस्य सूत्रार्थः। व्याप्तिरूपसम्बन्धदर्शिनः पुरुषस्य धूमविशिष्टपर्वतैकदेशदर्शनेन वह्निविशिष्टपर्वतैकदेशान्तरस्य ज्ञानमिति शबरस्वामिनोऽभिप्रायः। अतः पक्षसत्त्वादिसम्बन्धानां पुरा निरस्तत्वेनैतानि लक्षणानि निराकृतानि वेदितव्यानि।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतेन परार्थानुमानमपि प्रत्युक्तम्; स्वार्थानुमानमुपजीव्य तत्प्रवृत्तेः । तथाहि—प्रतिज्ञाहेतूदाहरणोपनयनिगमनरूपपञ्चावयवात्मकं तत् । तत्र तावत्पक्षवचनं प्रतिज्ञा इत्यलक्षणम् ।

पूर्वोदितेन न्यायेन पक्षस्यैवानिरूपणे ।
कथं तद्वचनं वाच्यं प्रतिज्ञेति विपश्चिता ॥२७॥

किं पक्षप्रतिपादकं वचनमात्रं प्रतिज्ञा ? प्रतिपिपादयिषया वा तद्वचनम् ? उत हेत्वाकाङ्क्षाजनकम्? किं वा साध्यधर्मविशिष्टधर्मिप्रतिपादकम्? तदेव हेत्वाकाङ्क्षाजनकत्वविशिष्टम्? निगमनान्यत्वविशिष्टं वा ? नाद्यः; अयं पक्ष इत्यादेरपि वचनस्य प्रतिज्ञात्वप्रसङ्गात्, पक्षलक्षणवचनस्यापि तत्त्वप्रसक्तेश्च । अत एव न द्वितीयः; प्रतिपादनेच्छया पक्षवचनत्वस्यतत्रापि भावात् । न तृतीयः; कस्मादयं पक्ष इत्यादेरपि तत्त्वप्रसङ्गात् । नापि चतुर्थः; निगमनस्यापि तद्भावप्रसङ्गात् । नापि पञ्चमः; कस्मादयं साध्यधर्मवानिति वचनस्यापि तथात्वापातात् । अप्रश्नरूपं तथाभूतवचनं विवक्षितमिति चेत्; न; आक्षेपवचनस्यापि प्रश्नं मन्दानं प्रति तद्रूपत्वात्, लक्षणवचनेऽपि व्यभिचाराच्च । नापि षष्ठः, परस्पराश्रयप्रसङ्गात्—उपनयानन्तरं प्रतिज्ञावचनं निगमनम्, सहेतुकं प्रतिज्ञावचनमिति वा लक्षणम्, तथा च प्रतिज्ञासिद्धौ निगमनसिद्धिस्तत्सिद्धौ च तदन्यत्वविशेषितप्रतिज्ञासिद्धिरिति कथं न परस्पराश्रयः ? तस्मान्न प्रतिज्ञालक्षणनिरुक्तिः । नापि हेतोः । तथा हि—किं लिङ्गवचनं हेतुः ? उत तृतीयापञ्चम्योरन्यतरविभक्त्यन्तम् ? साधनत्वख्यापकं लिङ्गवचनं वा? नाद्यः; अस्ति लिङ्गमयं धूम इत्यादेरपि वचनस्य हेतुत्वप्रसङ्गात् । नापि द्वितीयः;

परार्थानुमानस्य निराकृतत्वेऽपि भूयो दोषाधिकविवक्षयाऽतिदेशमाह—एतेनेति । स्वार्थानुमानोपजीव्यपरार्थानुमाननिराकरणाय पूर्वं प्रतिज्ञां निराकुरुते श्लोकेन—पूर्वोदितेनेति । प्रतिज्ञेति विपश्चिता कथं पक्षवचनं वक्तव्यमित्युत्तरार्द्धयोजना । अधुनाऽधिक दोषदर्शनाय प्रतिज्ञालक्षणानि विकल्पयति—किं पक्षेत्यादिना । षट्सुविकल्पेषु (१) न तावत् पक्षप्रतिपादकं वचनमात्रं प्रतिज्ञेति वक्तुं युक्तम्, अयं पक्ष इति वाक्येषु पक्षलक्षणवाक्ये च निरुक्तप्रतिज्ञालक्षणस्यातिव्याप्तेः । अयं पक्ष इति वचनमपि पक्षप्रतिपादकम् । तथैव पक्षलक्षणवचनेऽप्यतिव्याप्तिरित्याह—पक्षलक्षणेति । प्रतिपादनेच्छया पक्षलक्षणवचनस्य द्वितीये प्रतिपिपादयिषयेति लक्षणेऽतिव्याप्तेरेव (२) न द्वितीयकल्पोऽपि युक्तः । (३) नापि हेत्वाकाँक्षाजनकमिति प्रतिज्ञेति तृतीयः पक्षः, कस्मादयं पक्ष इत्यादिवाक्यस्यापि हेत्वाकाँक्षाजनकत्वात् । (४) नापि साध्यधर्मविशिष्टधर्मिप्रतिपादकं प्रतिज्ञेति प्रतिज्ञा; निगमनेऽतिव्याप्तेः । (५) नापि हेत्वाकाँक्षाजनकं साध्यरूपधर्मविशिष्टधर्मिप्रतिपादकं वचनं प्रतिज्ञेति पञ्चमो युक्तः, कस्मादयं साध्यधर्मवानित्यादिवाक्येऽप्यतिव्याप्तेः । न चाप्रश्नरूपं तथाभूतं वचनं प्रतिज्ञेतिवाच्यम्; आपेक्षवचनेऽतिव्याप्तेस्तादवस्थ्यात् । प्रश्नं मन्वानं प्रति निराकरणवाक्यस्य तथात्वाकाँक्षाजनकत्वात् । (६) नापि निगमनान्यत्वविशिष्टं वाक्यं प्रतिज्ञेति षष्ठः कल्पः, अन्योऽन्याश्रयतादोषप्रसक्तेः । परस्पराश्रयतां संघटयति—उपनयानन्तरमिति । अनुमानस्य द्वितीयमवयवं निराचष्टे—नापि हेतोः ? न तावल्लिङ्गवचनं हेतुरिति वक्तुं युक्तं, धूमोऽयमिति लिङ्गमस्तीति

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अन्यतरशब्देनैकस्य द्वयोर्वाभिधाने तल्लक्षणस्याव्याप्तेः। न तृतीयः;साधनशब्देन हेतुविवक्षायामात्माश्रयात्,तृतीयापञ्चम्योरन्यतरान्तार्थाभिधाने पूर्वोक्तदोषापत्तेः;लिङ्गविवक्षायां त्वेतल्लिङ्गमस्ति वास्य लिङ्गमित्यादेरपि वचनस्य तथात्वापातात्। नाप्युदाहरणलक्षणम्; दृष्टान्तानिरुक्तौ तद्वचनमुदाहरणमिति वक्तुमयुक्तत्वात्। तथाहि—किं लौकिकपरीक्षकाणां यत्र बुद्धिसाम्यं स दृष्टान्तः? किं वा निश्चितसाध्यसाधनवान्?नाद्यः,स्वर्गापूर्वदेवतादीनां लौकिकासम्मतानामपि दृष्टान्तत्वात्। नापि द्वितीयः; निश्चतसाध्यसाधनाभाववतो वैधर्म्यदृष्टान्तत्वाभावप्रसङ्गात्। साध्यसाधनशब्दाभ्यां तदभावयोरपि संग्रहाददोष इति चेत्, न, निश्चितत्वानिरुक्तेः। तथाहि—किं वादिनो निश्चयः?उत प्रतिवादिनः? किं वा सर्वेषाम्? नाद्यः; साध्यधर्मिणोऽपि दृष्टान्तत्वप्रसङ्गात् वादिनस्तत्र निश्चयसद्भावात्। न द्वितीयः, विकल्पासहत्वात्। किं निश्चयमात्रम्? किं वानुमितिकालविशेषितो निश्चयः? आद्ये, कालान्तरे निश्चितसाध्यसाधनवतोऽपि कालान्तरेऽन्यथाभूतस्य दृष्टान्तत्वप्रसङ्गात्। न द्वितीयः; कालस्य निश्चितसाध्यसाधनवतोऽपि दृष्टान्तत्वाभावप्रसङ्गात्काले कालविशेषितनिश्चयस्याभावात्। नापि तृतीयः; सर्वनिर्णयस्यासर्वज्ञेन निश्चेतुमशक्यत्वात्। यो यदा निश्चितसाध्यसाधनवान्स तदा दृष्टान्त इत्ययुक्तम्; यदा तदेति कालाभिधाने काले तदभावात्, यत्तच्छब्देन चानुगतरूपस्य तद्वतो वाभिधाने तयोरेव प्रत्येक

वचनस्यापि हेतुत्वापत्तेः। नापि तृतीयापञ्चम्योरन्यतरविभक्त्यन्तं वचनं हेतुः; अन्यतरशब्देनैकस्य द्वयोर्वाऽभिधाने तल्लक्षणस्याव्याप्तेः। अर्थात् तृतीयान्तग्रहणे पञ्चम्यन्तलक्षणे, पञ्चम्यन्तग्रहणे तृतीयान्तलक्षणेऽव्याप्तिरिति भावः। नापि तृतीयः कल्पः साधनत्वख्यापकं लिङ्गवचनमिति साधनपदेन हेतोरुक्तावात्माश्रयदोषप्रसङ्गात्। तृतीयापञ्चम्योरन्यतरविभक्त्यन्तार्थाभिधाने पूर्वोक्तदोषापत्तेः। तथा साधनशब्देन हेतुत्वविवक्षायां त्वेतल्लिङ्गमस्ति वाऽस्य लिङ्गमित्यादेरपि वाक्यस्य तत्त्वेनातिव्याप्तेः। अनुमानस्य तृतीयमवयवं निराकुरुते—नाप्युदाहरणेति। दृष्टान्तलक्षणं विकल्प्य दूषयति—तथाहीत्यादिनेति। लौकिकपरीक्षकाणां यत्र बुद्धिसाम्यं सदृष्टान्तः इति नाद्यः पक्षो युक्तः स्वर्गस्यापूर्वाणां देवतादीनां च लौकिकासम्मतानामपि दृष्टान्तत्वेन निर्धारितत्वदर्शनात्। नापि द्वितीयो निश्चितसाध्यसाधनवान् दृष्टान्तः, निश्चितसाध्यसाधनयोरभावाधिकरणे वैधर्म्यदृष्टान्तेऽव्याप्त्यापत्तेः। न च साध्यसाधनशब्दाभ्यां तदभावयोरपि संग्रहान्नोक्तव्यतिरेकिदृष्टान्तेऽव्याप्तिरिति वाच्यम्; निश्चितत्वस्य निर्वक्तुमशक्यत्वात्। निश्चितत्वनिर्वचनं विकल्प्य दूषयति—तथाहि किमिति। वादिनो निश्चये प्रथमकल्पे पक्षस्यापि दृष्टान्तत्वप्रसङ्गात्, तत्र वादिनो दृष्ट्या साध्यस्य निश्चितत्वात्। प्रतिवादिनो निश्चये द्वितीयकल्पेऽपि निश्चयमात्रमपेक्षितं चेत्तर्हि यदा प्रतिवादिनः कालान्तरे साध्यनिश्चयेऽप्यनुमितिसमये साध्यसन्देहः सञ्जातस्तस्य पक्षस्यापि दृष्टान्तत्वाभ्युपगमप्रसङ्गात्। अनुमितिकालविशेषितो निश्चयो द्वितीयकल्पोऽपि न युक्तः, काले कालविशेषणाभावेन कदाचिदपि कालस्य दृष्टान्तयितुमशक्यत्वात्। सर्वेषां निश्चयकल्पेऽपि दोषमाह—नापि तृतीयः; सर्वनिर्णयस्यासर्वज्ञेन निश्चेतुमशक्यत्वात्। यो यदेत्यादिलक्षणे यदातदेत्यंशं दूषयित्वा यः स इत्यंशमपि दूषयति—यत्तच्छब्देनेति। दृष्टान्तनिरासस्योदाहरणनिरासशेषतामाह—

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मदृष्टान्तत्वापातात् । एवं दृष्टान्तानिरुक्तौ तत्प्रतिपादकं वचनमुदाहरणमित्ययुक्तम् । नाप्युपनयलक्षणम् । तथाहि——किं दृष्टान्तानन्तरं हेतुवचनमुपनयः ? किंवा दृष्टान्ते प्रसिद्धाविनाभावस्य साधनस्य दृष्टान्तोपमानेन पक्षे व्याप्तिख्यापकं वचनम् ? व्याप्तस्य पक्षधर्मताप्रतिपादकं वा ? नाद्यः; दृष्टान्तवचनानन्तरं धूमवत्त्वादित्यपि वचनस्योपनयत्वप्रसङ्गात् । नापि द्वितीयः; दृष्टान्तवैधर्म्येण न तथा चायमधूमवानित्यादिवचनस्यानुपनयत्वप्रसङ्गात् । उपमानशब्देन च साधर्म्यवैधर्म्ययोरुभयोर्विवक्षितत्वेऽन्यतरवचनस्यानुपनयत्वप्रसङ्गः । दृष्टान्ताविनाभावलक्षणयोः पुरस्तान्निरस्तत्वाच्च । नापि तृतीयः; व्याप्तो धूमः पक्षेऽस्तीति वचनस्यापि तथात्वप्रसङ्गात्, व्याप्तिपक्षधर्मतयोश्च पुरैव निरासात् । नापि निगमनलक्षणम् । तत्किमुपनयानन्तरं प्रतिज्ञावचनम् ? उत सहेतुकं प्रतिज्ञावचनम् ? नाद्यः; उपनयान्तरमग्निमान्पर्वत इत्येतावद्वचनस्यापि निगमनत्वप्रसङ्गात् । नापि द्वितीयः; व्युत्क्रमोदितस्यापि तथात्वापातात्, प्रतिज्ञाहेत्वोश्च ? पुरैव निरासात् । किञ्च——

अनुमानाङ्गयोः सिद्धेर्व्याप्तिपक्षगतत्वयोः ।
उदाहृतेरुपनयात् पञ्चावयवता मुधा ॥२८॥

पञ्चावयववाक्यमपि न प्रयोजनवदवश्यमिति पश्यामः । साधनानुपयुक्तवचनस्याधिकनिग्रहत्वात् । तथाहि—वादिप्रतिवादिनोः पक्षप्रतिपक्षसमयबन्धस्वीकारसमनन्तरं प्रतिवादिनः किमत्र प्रमाणमिति प्रमाण एव जिज्ञासा । यावदङ्गविशिष्टं च प्रमाणं तावदेव

एवमिति । अनुमानावयवं चतुर्थं दूषयति—नाप्युपनय—लक्षणं सम्भवति । अत्रापि विकल्पमुद्भाव्य दोषमाह—तथाहीति । तत्र दृष्टान्तानन्तरं हेतुवचनमुपनय इति प्रथमकल्पे दृष्टान्तवचनानन्तरं धूमवत्त्वादिति वचनस्याप्युपनयत्वप्रसङ्गात् । दृष्टान्ते प्रसिद्धव्याप्तिकस्य साधनस्य दृष्टान्तोपमानेन पक्षे व्याप्ति प्रतिपादकवचनमुपनय इति द्वितीयकल्पे वैधर्म्यदृष्टान्तानन्तरभाविवैधर्म्योपनये उपनयलक्षणाव्याप्त्यापत्तेः । किञ्चोपमानशब्देन वैधर्म्यमपि विवक्षितं चेत्तर्हि तत्रैकैकाव्याप्तिरित्याह—उपमानशब्देनेति । अत्र कल्पे दूषणान्तरमाह – दृष्टान्तेति । नापि व्याप्तस्य पक्षधर्मताप्रतिपादकवचनमुपनय इति तृतीयकल्पो युक्तः, व्याप्तो धूमः पक्षेऽस्तीति वचनस्याप्युपनयत्वप्रसङ्गात् । तथा व्याप्तिधर्मतयोश्च पूर्वं निरस्तत्वादिति । पञ्चममवयवं निराचष्टे—नापि निगमनेति । अत्रापि विकल्पं सम्भाव्य निराकुरुते—तत्किमुपेति । तत्र नाद्यः, उपनयानन्तरमग्निमानयं पर्वत इत्येतावद्वचनस्यापि निगमनत्वापत्तेः । नापि विपरीतक्रमेण प्रयुक्तो द्वितीयः कल्पो युक्तः, विपरीतक्रमेणोदितस्योपनयानन्तरमग्निमानयं तस्मादित्यस्य वचनस्यापि निगमनत्वापत्तेः । एतल्लक्षणघटकयोः प्रतिज्ञाहेत्वोश्च पुरस्तादेव प्रत्याख्यातत्वात् ।

किञ्च पञ्चावयवसिद्धौ प्रमाणाभावात्तत्प्रयोजनस्य द्वाभ्यामेव व्याप्तिपक्षधर्मतयोरुदाहरणोपनयाभ्यां सिद्धेरवशिष्टावयवानामभ्युपगमस्य वैयर्थ्यमित्याह—किञ्चेत्यादिना । अनुमानाङ्गयोर्व्याप्तिपक्षधर्मतयोरुदाहरणोपनयाभ्यामेव सिद्धेः पञ्चावयवता वृथेति श्लोकयोजना । एतदेव विशदयति—पञ्चेति । पञ्चावयवानामनुपयोगं प्रदर्श्य निग्रहस्थानमप्याह—साधनेति । द्वाभ्यां सिद्धस्यंवान्येभ्योऽपि साधनेऽधिकनामकं निग्रहस्थानं प्रसज्येत । एतदेव विवेचयन्विशदयति—तथाहीत्यादिना । एतावन्ति निग्रहस्थानानि उद्भावनीयानीत्यादिरूपः समयबन्धः=अपशब्दो

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वक्तव्यम्, अङ्गं च द्वयमेव—व्याप्तिः; पक्षधर्मता चेति, तच्चोभयमुदाहरणोपनयाभ्यामेवा-भिहितमिति किमपरमवशिष्यते, यदर्थमुपाददीत ? ननु पक्षधर्मत्वं सपक्षसत्त्वं विपक्षाद्व्या-वृत्तिरबाधितविषयत्वमसत्प्रतिपक्षत्वं चेति पञ्चरूपाणि हेतोरवश्यं वक्तव्यानि, अन्यथाऽ-सिद्धविरुद्धानैकान्तिकानध्यवसितकालात्ययापदिष्टप्रकरणसमानामनिरासे हेतोरसाधकत्व-प्रसङ्गात्। तत्र यद्यपि व्याप्तिपक्षधर्मताप्रदर्शनेन रूपत्रयोपपादनादसिद्धविरुद्धानैकान्ति-कानि परिहृतानि, तथापि बाधितविषयत्वसत्प्रतिपक्षत्वयोरवशिष्टयोर्निरासे कालात्ययाप-दिष्टप्रकरणसमयोर्हेत्वाभासयोः परिहाराय निगमनमपेक्षणीयमेव, स च तस्मादयमग्निमानेव, न पुनस्तस्मादन्यस्माद्वानग्निमानपीति निगमनेनावद्योत्यत इति चेत्, मैवम्; पूर्वमेव हि सिद्धत्वादसम्भवित्वाच्च। तथाहि—साधनसद्भावे साध्यसद्भावनियमलक्षणान्वयव्याप्ते: साध्याभावे साधनाभावलक्षणव्यतिरेकव्याप्तेश्चोदाहरणेनैव प्रदर्शितत्वेन कालात्ययापदिष्ट-स्यानैकान्तिकेऽन्तर्भूतस्य कृत एव परिहारः। बाधिते पक्षे वर्तमानो हेतुर्हि कालात्ययाप-दिष्टः, बाधश्च पक्षनिष्ठसाध्याभावनिश्चय एवेति निश्चितसाध्याभाववद्वृत्तिः कथमनै-कान्तिको न स्यात् ? ननु साध्याभावनिश्चयो बाधः, स च पृथग्दूषणम् अनैकान्तात्; निश्चिते साध्याभावे तद्वृत्ति वर्तमानोऽनैकान्तिकः, ततश्च पुरःस्फूर्तिकबाधेनैवोपहतो हेतुः कथमनैकान्तिकेन पुनरुपहन्येत ? नहि मृतो मार्यत इति चेत्; हन्तैवं बाधवदेव विपक्ष-ग्राहकप्रमाणमपि पृथक् दूषणं स्यात्। प्रमिते विपक्षे तदुपजीविनस्तद्वृत्तेरनैकान्तिकत्वा-ङ्गीकारात्। व्याप्तिपक्षधर्मताप्रहारेणैव च सर्वदूषणजातस्य दूषणता, अन्यथा

वर्जनीयः। निगमनस्याधिकोपयोगमाह—नन्वित्यादिना। पक्षनिरूपितवृत्तित्वं हेतौ पक्षधर्मता, वादिप्रतिवादिसम्मतसपक्षसत्त्वं हेतौ, विपक्षाद्व्यावृत्तित्वमबाधितत्वमसत्प्रतिपक्षत्वमिति हेतावव-वक्तव्यानि। नेयं राजाज्ञेत्याह—अन्यथेति। हेतौ निरुक्तपक्षसत्त्वादिपञ्चरूपाभावे क्रमेणासिद्धयादि-दोषाणामनिरासे हेतावसाधकत्वप्रसङ्गात्। तत्र यद्यपि व्याप्तिपक्षधर्मतयोः प्रदर्शनेन पक्षसत्त्व-सपक्षसिद्धत्वविपक्षासत्त्वानां त्रयाणां रूपाणामुपादानेनासिद्धिविरोधानैकान्तिकतावारणं सम्भवति, तथापि बाधितविषयत्वसत्प्रतिपक्षतयोरनिरासे बाधसत्प्रतिपक्षयोर्हेत्वाभासयोः प्राप्तिरस्त्येव, तत्परिहाराय निगमनमावश्यकमेव। तयोः परिहारश्च तस्मादेव, अग्निमानेवेति निगमननिष्ठ-नियमैः सूच्यते इति चेन्न, निगमनमन्तरेणैवोक्तदोषनिराकरणादबाधितत्वनिरूपणासम्भवाच्च। अन्यथासिद्धिं विवृणोति—तथाहीत्यादिना। अन्वयव्यतिरेकव्याप्त्योरुदाहरणेनेव प्रदर्शितेन बाधितस्या-नैकान्तिकेऽन्तर्भूतस्य परिहारः कृत एव। बाधिते पक्षे वर्तमानो हेतुर्बाधितः प्रोच्यते, बाधो नाम पक्षनिष्ठसाध्याभावनिश्चय एवेत्यतो निश्चितसाध्याभावाधिकरणे विद्यमानो हेतुरनैकान्तिकः कथं न स्यादितिभावः। बाधानैकान्तिकयोर्भेदमाह—नन्विति। बाधानैकान्तिकयोः समर्थितं भेद-मतिप्रसङ्गेन दूषयति—हन्तैवमिति। न च बाधदोषवत्कथं विपक्षग्राहकप्रमाणं पृथक् दूषणं स्यादिति वाच्यम्; प्रमाणाधिगते विपक्षे विपक्षग्राहकप्रमाणोपजीविनो विपक्षवृत्तेरनैकान्तिक-त्वाभ्युपगमात्। व्याप्तिपक्षधर्मतयोर्नाशकतयैव बाधादीनामपि दूषणताऽस्ति। एवमनभ्युपगमेऽति-प्रसङ्गमाह—अन्यथेति। सिद्धसाधनता हि सिद्धस्य साध्यत्वाभावेन पक्षत्वविघटकतया दूषणमुपेयते,

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सिद्धसाधनताया अपि पृथग्दूषणत्वप्रसङ्गात्। सा हि सिद्धस्य साध्यत्वाभावेन पक्षत्वप्रच्युत्या दूषणमुपेयते, तथा बाधोऽपीति। अबाधितविषयत्वस्य दुर्निरूपत्वाच्च। पक्षे विषयापहारलक्षणबाधस्य प्रमितौ तदभावस्य वक्तुमशक्यत्वात्, अप्रमित्तौ चाप्रमितप्रतियोगितया तदभावस्यासिद्धेः। तदुक्तमभियुक्तैः—

'बाधश्च पक्षे विषयापहारो यद्यस्ति नाबाधितताऽत्र सिद्धा।
नोचेदसिद्धप्रतियोगिकत्वादेतस्य सिद्धिर्न कथञ्चन स्यात्॥' इति

सत्प्रतिपक्षप्रकरणसमावप्यसम्भविनावेव, निरुपाधेस्त्वनुमानद्वयस्यैकत्रासम्भवित्वात्, सम्भवे वा वस्तुनो द्वैरूप्यापत्तेः। प्रकरणसमेऽपि वस्तुनो द्वैरूप्यापत्तिरेव, पक्षविपक्षयोर्व्याप्तिग्राहकप्रमाणसद्भावात्। अन्यतरग्राहकप्रमाणाभावे च तत एव व्याप्तिभङ्गात्। किञ्च नित्यः शब्दोऽनित्यः शब्दो वा, पक्षयोरन्यतरत्वात्सपक्षवदित्येवंरूपोऽसाविष्यते, तत्र चार्थभेदान्न पक्षप्रतिपक्षयोरेकरूपो हेतुः। नित्यत्वप्रतिज्ञायां नित्यस्यानित्यत्वप्रतिज्ञायामनित्यस्य सपक्षशब्देनाभिधानात्। शब्दसाम्यमात्रेण च हेतोरेकरूपत्वे गोशब्दवाच्यत्वाद्वागादीनामपि विषाणित्वानुमा प्रसज्येत। तदेवं व्याप्तिपक्षधर्मताभ्यामेव सकलहेत्वाभासनिरासे नावयवान्तरकृत्यमस्तीति पश्यामः, तेन पञ्चावयववाक्यं परार्थानुमानमिति प्रत्युक्तम्।

उपमानलक्षणमपि दुर्घटम्, तथाहि—नगरानुभूतचरगोपिण्डस्य वनमुपेयुषः साक्षाद्गवयमीक्षमाणस्यानेन सदृशी मदीया गौरिति प्रत्यक्षदृष्टगवयसादृश्यविशिष्टासन्निकृष्टगोपिण्डग्रहणमुपमानमिति मीमांसकाः। नचेदं स्मरणम्, पुरा गोपिण्डमात्रानुभवेऽपि प्रति-

---

तथैव बाधस्यापि दूषणता स्वीकृतेतिभावः। निगमननिराकरणायासम्भवित्वाच्चेति यदुक्तं तद्विवृणुते—अबाधितेति। बाधप्रतियोगिनः पक्षे प्रमितावप्रमितौ च नेदं सम्भवतीति भावः। अत्र वृद्धसम्मतिमाह—तदुक्तमित्यादि। यदि पक्षे विषयापहारो बाधोऽस्ति तर्ह्यत्राबाधिता न सिद्धा स्यात्, पक्षेऽबाधश्चेत्तर्ह्यप्रसिद्धप्रतियोगिकत्वेन बाधस्य सिद्धिः कथञ्चन न स्यादिति श्लोकयोजना। असत्प्रतिपक्षत्वस्यापि दुर्निरूपताप्रदर्शनाय तत्प्रतियोगिनो दुर्निरूप्यत्वमाह—सत्प्रतिपक्षेति। निरुपाधिकस्यानुमानद्वयस्यैकत्रासम्भवेन सत्प्रतिपक्षो न सम्भवति। सम्भवे च वस्तुनो द्वैरूप्यापत्तेः। तथा प्रकरणसमेऽपि वस्तुनो द्वैरूप्यापत्तिरेव। पक्षविपक्षोभयत्रव्याप्तिग्राहकप्रमाणस्य विद्यमानत्वात्। तयोरन्यतरपक्षे ग्राहकप्रमाणाभावे तस्मादेव प्रमाणाद्व्याप्तिभङ्गप्रसङ्गात्। प्रकरणसमलक्षणासम्भवमुपपादयितुमाह—किञ्चेति। नित्यः शब्दः पक्षसपक्षान्यतरत्वात् सपक्षवत्, शब्दोऽनित्यः पक्षसपक्षान्यतरत्वात्, सपक्षवदित्यत्रार्थभेदात्पक्षप्रतिपक्षयोर्हेतुर्नैकरूपः। नित्यत्वप्रतिज्ञायां नित्यस्यानित्यत्वप्रतिज्ञायां चानित्यस्य पदार्थस्य सपक्षशब्देनाभिधानात्। न च शब्दसाम्यमात्रेण हेतोरेकरूपत्वमिति वाच्यम्, तथासति वाणी विषाणवती, गोपदवाच्यत्वा सास्नादिमद्गोवदिति रीत्या वागादीनामपि विषाणित्वानुमानप्रसङ्गात्। परार्थानुमानावयवानां नैरर्थक्यसमर्थनमुपसंहरति—तदेवमिति। अवयवनिराकरणस्यानुमाननिराकरणायोपयोगमाह—तेन पञ्चेति।

प्रत्यक्षानुमानयोर्निराकरणानन्तरं क्रमप्राप्तमुपमानं निराचष्टे—उपमानलक्षणमपीति। मीमांसकसम्मतमुपमानलक्षणं सोपपादनमनुवदति—तथाहीत्यादिना। उपेयुषः=प्राप्तस्य। तत्र गवय-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

योगिगवयाद्यनवगतत्वेन तत्सादृश्यविशिष्टतयाननुभवात् । नाप्यनुमानम्; तद्व्याप्तलिङ्गा-भावात्। नापि शाब्दम्; अन्तरेणापि शब्दव्यवहारमुपपत्तेः । मैवम्;

भूयोऽवयवसामान्यं सादृश्यं यच्च गोगतम् ।
विज्ञातमविकल्पेन प्रत्यभिज्ञायते यतः ॥२९॥

न तावत्तौतान्तिकमते सादृश्यमस्ति पदार्थान्तरम्, किंतु भूयोवयवसामान्ययोग एव। तदुक्तम्— "सादृश्यस्य च वस्तुत्वं न शक्यमपबाधितुम् ।

भूयोवयवसामान्ययोगो जात्यन्तरस्य तत् ॥"इति(श्लो०वा०उप१८) तच्च बुद्ध्यनारूढेऽपि प्रतियोगिनि गोत्ववन्निर्विकल्पकेनाकलितं पुनर्गवयस्य प्रतियोगि-दर्शने परामृश्यते सविकल्पकेन, तत्किमपरमवशिष्यते यत्रोपमानमिष्येत ? ननु निर्विकल्पके नापि न सादृश्यमनुभूतं सविकल्पकवत्तस्यापि तदाकलने प्रतियोगिसापेक्षत्वादिति चेत्, न; हस्तवितस्त्यादिवत्कर्णखुरादिसामान्यस्य स्वरूपावधारणे प्रतियोगिनिरपेक्षत्वात्। अन्यथा भेदस्यापि निर्विकल्पकेनाकलनाभिनिवेशो भवतां प्रलीयेत ।

निष्टगोसादृश्यज्ञानस्य प्रतियोगिगोपिण्डज्ञानसापेक्षत्वादुक्तमनुभूतचरगोपिण्डस्येति । युगपत्प्रत्यक्षा-वगतगोगवयस्थलवारणायासन्निकृष्टपदम् । न चारण्यस्थस्य पुरुषस्य तदा पूर्वदृष्टजन्यसंस्कारजन्य-तयाधुना ज्ञानमिदं स्मरणमिति वाच्यम्; पूर्वं गोपिण्डमात्रानुभवेऽपि गोप्रतियोगिगवयाद्यनवगतत्वेन गवयप्रतियोगिकसादृश्यविशिष्टगोपिण्डस्याननुभवात् । अनुमानेऽनन्तर्भावयितुमाह—नाप्यनुमान-मिति । व्याप्तिलिङ्गयोरभावान्नेदं ज्ञानमनुमानेऽन्तर्भावयितुं शक्यमित्यर्थः । शाब्देऽप्यनन्तर्भाव-माह—अन्तरेणापीति । मीमांसकसमर्थितमुपमानं दूषयति—मैवमिति । द्रव्यादिचतुष्टयतत्त्ववादि-भाट्टस्य मते भूयोऽवयवानां खुरत्वकर्णत्वादिसामान्यानि गोगवयावयवेषु वर्तमानानि, तत्र सादृश्यं गोगतं पूर्वं निर्विकल्पकेन विज्ञातं तदेव प्रतियोगिनो ग्रहणेन सविकल्पकत्वेन प्रत्यभिज्ञायतेऽतो न पृथक् प्रमाणमिदमिति श्लोकयोजना । श्लोकं विशदयति—न तावदित्यादिना । प्राभाकरमते सादृश्यं द्रव्याद्भिन्नमस्तीत्यतस्तौतान्तिकमितिपदम् । तौतान्तिकाः=भाट्टाः । भाट्टमते भूयोऽवयवसामान्ययोग एव सादृश्यं न सामान्यपदार्थादतिरिक्तम् । तत्र श्लोकवार्तिकसम्मतमाह—तदुक्तमिति । गवयादि-विजातीयवस्तूनां भूयोऽवयवसामान्ययोग एव सादृश्यमुच्यते, तस्य सादृश्यस्य वस्तुत्वमपबाधितुं न शक्यं भाट्टमतानुसारिभिरिति श्लोकयोजना । तच्च सादृश्यं स्वप्रतियोगिनि गवये बुद्ध्यानवगतेऽपि गोत्ववत्पूर्वं निर्विकल्पकेनावगतं पश्चात्प्रतियोगिनो गवयस्य दर्शने सति सविकल्पकज्ञानेन गृह्यते, तत्र किमवशिष्यते, यदर्थमुपमानमिष्यते । न च यथा सविकल्पकं सप्रतियोगिकं सादृश्यमेव गृह्णाति न तु प्रतियोगिनिरपेक्षं तथा निर्विकल्पकमपि प्रतियोगिसापेक्षमेव सादृश्यं गृह्णीयादिति वाच्यम्; हस्तवितस्त्यादिपरिमाणविशेषे वस्तुनि दीर्घत्वादिव्यवहाराय प्रतियोगिग्रहणापेक्षितत्वेऽपि स्वरूपा-वधारणे प्रतियोगिग्रहणानपेक्षत्वात् । एवं कर्णखुरादिसामान्यस्वरूपावधारणे प्रतियोग्यनपेक्षत्वमस्ति। अन्यथा निर्विकल्पकबोधेन भेदग्रहणाभिनिवेशो भवतां प्रलीयते । स्वीकृतं भवद्भिः—निर्विकल्पक-बोधेऽपि द्वयात्मकस्यापि वस्तुनः ।

ग्रहणं लक्षणाख्येयं ज्ञात्रा शुद्धं तु गृह्यते । (श्लो.वा.प्र.११८)

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ये तु प्रतिजानते——सादृश्यं नाम पदार्थान्तरम्, तद्धि न द्रव्यम्, गुणवृत्तित्वात्, अत एव न गुणोऽपि, नापि कर्म, नापि सामान्यादित्रयम्; तत्रापि वृत्तेः। नापि शक्तिः,शक्तेरप्रत्यक्षत्वात्प्रत्यक्षत्वाच्च सादृश्यस्य। नापि संख्या, संख्यावृत्तित्वात्,इदमेकत्वमेकत्वान्तरसदृशमिदं च द्वित्वं द्वित्वान्तरसदृशमिति तत्रापि व्यवहारात्। तच्च सविकल्पकैकवेद्यम्,इदमनेन सदृशमिति प्रतियोगिघटितस्यैव व्यवहारनियमदर्शनादिति, मैवम्; विकल्पासहत्वात्। तत्किं स्पर्शवत्? उत न? आद्ये द्रव्यत्वम्। द्वितीये, एकवृत्तित्वे गुणकर्मविशेषाणामन्यतमत्वम्। अनेकवृत्तित्वे तु सामान्यसमवाययोरन्यतरत्वापत्तिः। एतेन पदार्थान्तरत्वं संख्याया अपि प्रत्याख्येयम्। यत्पुनः षट्पदार्थान्तर्भावे सामान्यादिवृत्तित्वं न स्यादिति, तत्र ब्रूमः——किमिदं प्रसङ्गमात्रम्? उत विपर्ययपर्यवसायितया प्रमाणमेव? नाद्यः; तर्कमात्रस्यासाधकत्वात्। न द्वितीयः; सामान्यमेव सादृश्यमिति वादिनं प्रति सामान्यवृत्तित्वस्यासिद्धेः। ननु गवयत्वमिव गोत्वमित्यनुभवादेव सादृश्यस्य सामान्यवृत्तिता सिद्धेति चेत्; किमनुभवादेव सिद्धिः? उताबाधितात्? नाद्यः; गगननीलिमादेरपि सिद्धिप्रसङ्गात्। न द्वितीयः; प्रतिवादिनं प्रत्यबाधासिद्धेः। किञ्च यत्र सौवर्णकर्णाभरणया सौवर्णकर्णाभरणासदृशीत्युपमीयते,तत्र द्रव्यं सादृश्यम्, न च तद्गुणवृत्ति। तथा रसः पनसशर्करयोः सादृश्यम्,तस्य च द्रव्यवृत्तित्वेन गुणवृत्तित्वादित्यसिद्धो हेतुः। यत्र च हंसगमनेन

भाट्टमतं प्रदूष्य प्राभाकरमतं दूषयितुमारभते—ये तु प्रतिजानीत इत्यादिना। द्रव्यगुणकर्मसामान्यविशेषसमवायशक्तिसंख्याऽपूर्वसादृश्यरूपाः पदार्थाः प्राभाकरैः परिगणितास्तत्र परिशेषतः सादृश्यस्य पदार्थान्तरत्वं प्रसाधितं यत्तदनुवदति—तद्धीति। केतकीगन्धसदृशः सर्पगन्धः इत्यादौ गुणवृत्तित्वात्सादृश्यं न द्रव्यम्। गुणवृत्तित्वादेव गुणोऽपि न सादृश्यं, गुणा निर्गुणाः सन्तीति भावः। गुणकर्मवृत्तित्वात् सादृश्यं न कर्म। सामान्यादिष्वपि वर्तमानतया न सामान्यादित्रयं सादृश्यम्। नापि सादृश्यं शक्तिः, शक्तेरप्रत्यक्षत्वात्। संख्यायामपि सादृश्यमनन्तर्भावयति—नापि संख्येति। नापि सादृश्यमपूर्वत्वम्, चोदनालक्षणत्वाभावात्। तच्च प्रत्यभिज्ञायामन्तर्भावयितुमशक्यं सविकल्पकैकवेद्यम्, अनेन सदृशमिदमिति सप्रतियोगिकस्यैव व्यवहारनियमदर्शनादिति चेन्न, विकल्पासहत्वात्। सादृश्यस्य पदान्तार्थान्तरत्वं दूषयितुं विकल्पयति—तत्किमिति। सादृश्यस्य स्पर्शवत्त्वस्वीकारे गुणादीनां निर्गुणत्वेन परिशेषतो द्रव्यत्वम्। स्पर्शरहितत्वपक्षेऽप्येकवृत्तित्वे गुणकर्मविशेषाणामन्यतमं सादृश्यं स्वीकार्यं स्यात्। अनेकवृत्तित्वे तु सामान्यसमवाययोरन्यतरत्वापत्तिः। संख्यायामपि पदार्थान्तरत्वनिराकरणमतिदिशति– एतेनेति। षट्पदार्थेष्वनन्तर्भावे यदुक्तं कारणं दूषयति—यत्पुनरिति। प्रसञ्जनमात्रं=प्रसञ्जनरूपतर्कमात्रम्। प्रथमकल्पं दूषयति—तर्केति। न द्वितीयः, सामान्यमेव सादृश्यमिति वादिनं प्रति सादृश्यस्य सामान्यवृत्तित्वासिद्धेः। तत्रापि गवयत्वमिव गोत्वमित्यनुभवमपि विकल्प्य निराचष्टे—किमनुभवादेवेत्यादिना। द्रव्यादित्रयानन्तर्भावे गुणवृत्तित्वं हेतुं निराकुरुते—किञ्चेत्यादिना। यत्र सौवर्णकर्णाभरणया युवत्या सौवर्णकर्णाभरणा सदृशीत्युपमीयते, तत्र द्रव्यमेव सादृश्यम्। तथा रसः पनसशर्करयोः सादृश्यं, तस्यापि द्रव्यवृत्तित्वेन गुणवृत्तित्वादित्यसिद्धो हेतुः। एवमन्यत्रापि हेतुत्वासिद्धिं साम्यमाह—यत्र च हंसेति। यदा सादृश्यस्य वस्तुत्वमेव

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

हंसगमनमुपमीयते तत्र कर्मैव साहश्यमिति तत्रापि हेतोरसिद्धिः। किञ्च दृश्ये प्रतियोगि धर्मिस्वरूपग्रहणमेवाभावव्यवहारनिदानमिच्छन्किं नेच्छसि अधिगतविषयस्य गोस्वरू धारणमेव साहश्यव्यवहारकारणमिति ? भवतु वा यत्किञ्चित्सादृश्यम्, तथापि गोपिण्ड तद्विशिष्टताप्रतीतिरनुमानमेव किं न स्यात् ? सा गौर्गवयसदृशी गोत्वात् गवयेन सहोपल मानगवान्तरवदिति प्रयोगोपपत्तेः। गवयोपलम्भसहकालमप्रमीयमाणगवान्तरस्य गव सदृशी गौरित्यवगतिरूपमिति चेत्, मैवम्; अर्थापत्तेरेव तत्रापि प्रामाण्योपपत्तेः। गवय ष्ठगोसादृश्यस्य परिदृश्यमानस्य गोगवयसादृश्यव्यतिरेकेणानुपपत्तेः। न च गवयनिष्ठं गो दृश्यमप्रत्यक्षमप्रत्यक्षत्वात्प्रतियोगिनो गोरिति वाच्यम्। स्मर्यमाणेऽपि प्रतियोगिनि धर्मि हणादेव साहश्यस्य भेदवत्प्रत्यक्षत्वोपपत्तेः। सादृश्यज्ञानकरणमुपमानमित्यभ्युपगच्छता साहश्यप्रतीतेरवश्याभ्युपेयत्वात्। तथाचार्थापत्त्यैव तत्प्रतीत्युपपत्तेः कृतमुपमानेन; अन्य वैधर्म्यप्रतीतेरपि प्रमाणान्तरत्वप्रसङ्गः। तथाहि—यत्र परोक्षादपरोक्षे भवति वैधर्म्यवि स्तस्मादयमन्यथेति, भवति एतस्मादन्यथा स इत्यपि मतिः, सापि प्रमाणान्तरं स्यात्। सा पत्तिरिति चेत्, प्रकृतेऽपि समानम्। यथोदितमुदयनेन—

"साधर्म्यमिव वैधर्म्यं मानमेवं प्रसज्जते।
अर्थापत्तिरसौ व्यक्तमिति चेत्प्रकृते न किम्॥" इति (न्या० कु० ३।

तदास्तां मीमांसकाभिमतोपमानापाकरणप्रपञ्चः, नैयायिकोदीरितमुपमानमपि दुर्नि पम्। अनवगतसङ्गतिसंज्ञासमभिव्याहृतवाक्यार्थप्रमितिरुपमितिस्तत्करणमुपमानमिति

नास्ति तदा पदार्थान्तरत्वं दूरापेतमित्याह—किञ्चेति। विषयो=गवयः। योग्ये प्रतियोगिनि सत्य योगिस्वरूपग्रहणमात्रमेवाभावव्यवहारकारणं मन्यमानोऽधिगतगवयस्य पुरुषस्य गोस्वरूपमात्रग्रहणं साहश्यव्यवहारकारणं कुतो न मन्यते। अतो गवयज्ञानात्पूर्वमेव गोसादृश्यज्ञानं भवतीति भावः सम्प्रति सादृश्यप्रमाकरणस्य प्रमाणान्तरत्वं दूषयति—भवतु वेति। तत्रानुमानेऽन्तर्भाव्यप्रयोगमाह सा गौरिति। सा मदीया गौर्गवयसदृशी, गोत्वात्, सहोपलभ्यमानगोगवयवदित्यादि। नन्वनुपल गोपिण्डपुरुषं प्रत्युपमानोपयोगं शङ्कते—गवयोपलम्भेति। तत्रार्थापत्तेरन्तर्भाव्य प्रमाणान्तरानुपपत्तेः परिदृश्यमानस्य गवयनिष्ठगोसादृश्यस्य गोगवयसादृश्यं विनानुपपत्तेः। न च गोरूपप्रतियोगि नस्तदाऽप्रत्यक्षतया गवयनिष्ठगोसादृश्यमप्यप्रत्यक्षमिति वाच्यम्; स्मर्यमाणेऽपि प्रतियोगि भेदग्रहणवद् धर्मिग्रहणमात्रादेव सादृश्यस्य प्रत्यक्षत्वोपपत्तेः। न च सादृश्यं प्रत्यक्षायोग्यमिति वाच्यम् सादृश्यज्ञानस्य करणमुपमानमित्यभ्युपगच्छताऽपि त्वया सादृश्यप्रतीतेरवश्यमभ्युपगम्यमानत्वात् एवमनुपपत्तिं समर्थयित्वार्थापत्तिमुपसंहरति—तथाचेति। एवमनङ्गीकारेऽतिप्रसङ्गमाह—अन्यथेति अतिप्रसङ्गं स्फोरयति—तथाहीति। यत्र परोक्षवस्तुनो वैधर्म्यज्ञानमपरोक्षे वस्तुनि भवति तस्मा यमन्यथेति, तत्र स एतस्मादन्यथेत्यपि मतिर्भवति, सा मतिरपि प्रमाणान्तरं स्यात्। दोषमुद्धा परिहारसाम्यमाह—सार्थेति। अत्रोदयनसम्मतिमाह—साधर्म्यमिवेति। एवं साधर्म्यमिव वैधर्म्यमपि पृथक्मानं प्रसज्जते। असावर्थापत्तिरिति चेद् व्यक्तं प्रकृतेऽपि किं नेति श्लोकयोजना।

सम्प्रति नैयायिकाभिमतमुपमानं फलविवेचनपूर्वकं दूषयितुमाह—अनवगतेति। उपमितिकर

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वर्णयन्ति। तथाहि—नागरिकस्य यादृशी गौस्तादृशो गवय इति श्रुतातिदेशवचसः कानने वस्तुतो गोसदृशं गवयमालोकयतो नूनमयमसौ गवयपदाभिधेयो यः पुराप्तेन गोसदृशो गवय इत्युपदिष्ट इति प्रमितिरुपजायते। नचेयमागमजा, अपरिदृष्टगवयस्यापि प्रसङ्गात्। भवत्येवाप्तवचनात्सामान्यतस्तन्निश्चय इति चेत्, मैवम्; सामान्यतः प्रतीतावपि व्यक्तिविशेषस्य तत्पदाभिधेयत्वाप्रतीतेः। अन्यथा योयो धूमवानसावसावग्निमानित्याप्तवचनाधिगताविनाभावस्य पर्वते वह्निप्रतीतिरागमजैव स्यात्। अस्तु तर्हि प्रत्यक्षेणैव गवयशब्दवाच्यत्वाधिगतिरिति चेत्, मैवम्, अश्रुतातिदेशवाक्यस्यापि प्रसङ्गात्। उपदेशसंस्कारसध्रीचीनं प्रत्यक्षमेव रत्नतत्त्वस्येव तदवगतिहेतुरिति चेत्, न; वाच्यत्वस्य प्रत्यक्षानवगाह्यत्वात्। नहि प्रत्यक्षेऽपि घटे घटशब्दवाच्यता प्रत्यक्षा, येन प्रकृतेऽपि तथा स्यात्। नाप्यनुमानतस्तदधिगतिः; गोसादृश्यस्य गव्यपि सम्भवेन विपक्षवृत्तित्वात्। नार्थापत्तिः, अनुमानाव्यतिरेकादिति चेत्, मैवम्; अनुमानतस्तथात्वप्रतीत्युपपत्तेः। तथाहि—

वाचको गवयस्यायं तत्र वृत्त्यन्तरेऽसति।
वृद्धैः प्रयुज्यमानत्वाद्गोत्वे गौरिति गोरिव ॥३०॥

यो यत्रासति वृत्त्यन्तरे वृद्धैः प्रयुज्यते स तस्य वाचकः; यथा गोशब्दो गोत्वस्य, प्रयुज्यते

मुपमानं तत्रोपमितिलक्षणमाह—गवय इति संज्ञाया यस्याः स्वार्थेन सह वाच्यवाचकभावः सङ्गतिरनवगता, साऽनवगतसङ्गतिसंज्ञा, तया सहोच्चारितं यद्वाक्यं यथा गौस्तथागवय इति, तस्य प्रतिपाद्यो गवयशब्दार्थः, तच्छब्दवाच्यताप्रमोपमितिरित्यर्थः। अत्र शाब्दप्रमितिवारणायानवगतेतिदलम्। प्रत्यक्षानुमितिव्यभिचारवारणाय वाक्यार्थग्रहणम्। उपमानलक्षणं विशदयति—तथाहीति। श्रुतातिदेशवचसः=आरण्यकपुरुषाद्यथा गौस्तथागवय इति वाक्यं श्रुतवतः। तस्य शाब्देऽनन्तर्भावमाह—न चेयमिति। अतिप्रसक्तिं वारयितुं शङ्कते—भवत्येवेति। सामान्यतः प्रतीतिसत्त्वेऽपि व्यक्तिविशेषस्य गवयस्य गवयपदवाच्यत्वाप्रतीतेः। अन्यथाऽनुमित्यादावपि शब्दजन्यत्वप्रसक्तिं दर्शयति—अन्यथेति। अत्र प्रत्यक्षत्वापत्तिमाशङ्क्य परिहरति—अस्त्वित्यादिना। अतिदेशवाक्योपदेशसहकृतप्रत्यक्षप्रमाणजन्यत्वमाशङ्क्य परिहारमाह—उपदेशेत्यादिना। रत्नतत्त्वेऽवयवविशेषस्य रूपविशेषस्य सामान्यविशेषस्य च प्रत्यक्षयोग्यत्वेपि प्रकृते वाच्यवाचकभावस्य न प्रत्यक्षयोग्यता, घटादावदर्शनात्, वाच्यत्वस्य च वृद्धव्यवहाररूपानुमानैकावसेयत्वादित्याह—वाच्यत्वस्येति। नहि घटे प्रत्यक्षप्रमाणगम्येऽपि घटशब्दवाच्यत्वं प्रत्यक्षत्वमभ्युपेयते, येन प्रकृते तथात्वमभ्युपगन्तुं शक्यम्। नापि गवयो गवयपदवाच्यः, गोसदृशत्वादित्यनुमानेन गवयपदवाच्यत्वमनुमेयमिति वाच्यम्, गोसदृशत्वस्य हेतोर्गोरूपविपक्षेऽपि सम्भवेन व्यभिचारित्वात्। नापि वाच्यत्वग्रहोऽर्थापत्त्या सम्भवति, तस्या अनुमानाभिन्नत्वादिति।

सिद्धान्ती नैयायिकोपमानलक्षणं दूषयितुं प्रतिजानीते—मैवमिति। अनुमानेन तथात्वप्रतीतिं श्लोकेनोपपादयति—वाचक इति। यत्र गवयशब्दस्य लक्षणा गौणी च वृत्तिर्नास्ति तत्र गवयशब्दो गवयार्थस्य वाचकस्तत्र वृद्धैः प्रयुज्यमानत्वात्, यथा गोत्वे गोशब्दो वृद्धैः प्रयुज्यते इति श्लोकार्थः। श्लोकसंग्रहं विशदयति—यो यत्रेति। न च हेतोर्विशेषणस्यासति वृत्त्यन्तरे इत्यस्यासिद्धिरिति

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

चायमसति वृत्त्यन्तरे गवयशब्दः पुरोवर्तिनि, तस्मात्तस्य वाचक इत्यनुमानादेव सम्बन्धाधिगतिसिद्धेः। न च विशेषणासिद्धो हेतुः; शङ्क्यमानगोसादृश्यस्य गवयशब्दप्रवृत्तिनिमित्तत्वानुपपत्तेः, अप्रतीतगूनामारण्यकानां गोसादृश्यानधिगतौ गवय इति व्यवहाराभावप्रसङ्गात्। गवयत्वस्यापि निमित्तत्वाददोष इति चेत्, मैवम्, अप्रतीतगोपदार्थस्य गवयत्वं निमित्तम्, प्रतीतगोस्तु तत्सादृश्यं निमित्तमित्युभयत्र शक्तिकल्पनायां गौरवप्रसङ्गात्, गोविशेषितसादृश्यस्य गवयशब्दप्रवृत्तिनिमित्तत्वे गवि तत्सादृश्ये च शक्तिः कल्पनीयेत्यपि गौरवं स्यात्। अन्यथोपमानस्य मानान्तरत्वेऽपि गवयशब्दस्य गोसादृश्यस्य निमित्तताशङ्कायाः दुष्परिहरत्वात्, गवयत्वं निमित्तीकृत्य गवयशब्दोऽत्र प्रवृत्त इत्युपमानादपि निर्धारणा न सिद्ध्येत्। किञ्चानवगतसङ्गतित्वविशेषणं व्यर्थम्; अभ्युपगतप्रमाणसंप्लववादिनः प्रत्यक्षाधिगतेऽपि पुनः प्रत्यक्षवदनुमितेऽप्यनुमानवच्चोपमितेऽपि पुनरुपमानप्रवृत्त्युपपत्तेः। अपि च 'इह प्रभिन्नकमलोदरे मधूनि मधुकरः पिबति' इत्यत्राप्रसिद्धमधुकरपदार्थस्य प्रसिद्धेतरपदार्थस्य च प्रसिद्धपदसमभिव्याहारान्मधुकरशब्दार्थप्रतीतिवद्गवयशब्दार्थप्रतीतिः किं न स्यात्? न च सर्वत्र समभिव्याहारादधिगतिरुपमितिः, तत्करणस्य सादृश्यज्ञानस्य तत्राभावात्। असत्यपि च सादृश्यज्ञाने संज्ञासंज्ञिसम्बन्धप्रतिपत्तिरेवोपमितिरित्याधुनिकतानुप्रवेशे सूत्रवार्तिकप्रसिद्धसिद्धान्तविरुद्धाभ्युपगमो वज्रलेपायते। तथा च भगवदक्षपादप्रणीतं सूत्रम्——'प्रसिद्धसाधर्म्यात्साध्यसाधनमुपमानम्' इति। व्याख्यातं चैतदुद्द्योतकरेण वार्तिककृता——'आगमाहितसंस्कारस्मृत्यपेक्षं सादृश्यज्ञानमुपमानम्' इति। अथावधीरितापसिद्धान्तप्रसङ्गभीतेरियं पृथिवीशब्दवाच्या गन्धवत्त्वाद्यत्रैवं तत्रैवमित्यादिकेवलव्यतिरेक्यनुमानमपि संज्ञासंज्ञिसम्बन्धप्रतिपत्तिफलमुपमानमापद्येतेत्यलमतिविस्तरेण।

वाच्यम्; सन्दिग्धगोसादृश्यस्य कदाचिदपि गवयशब्दप्रवृत्तिनिमित्तत्वानुपपत्तेः, अदृष्टगूनामारण्यकानां गोसादृश्यानधिगतौ गवय इति व्यवहाराभावप्रसङ्गात्। न च गवयत्वस्यापि गोपदप्रवृत्तिनिमित्तत्वेनाप्रतीतगोपदार्थानामारण्यकानां व्यवहारः कुतो न स्यादिति वाच्यम्, उभयत्र शक्तिकल्पनायां गौरवप्रसङ्गादित्याह—मैवमित्यादिना। गौरवान्तरमप्याह—गोविशेषितेति। गोविशेषणे गोप्रतियोगिकसादृश्ये विशेष्ये च शक्तिकल्पनायां महद्गौरवं स्यादिति भावः। उपमानस्य मानान्तरत्वे दोषमाह—अन्यथोपमानस्येति। निरुक्तोपमानलक्षणेऽव्याप्तिमाह—किञ्चानवगतेति। प्रमाणसम्प्लववादिनस्तवमतेऽनुमितेऽप्यर्थेऽनुमानप्रवृत्तिवदनुमितेऽप्युपमानप्रवृत्तिसम्भवात्तस्मिंश्चानवगते विशेषणासिद्धिरिति भावः। सादृश्यबोधकपक्षं प्रदूष्य वैसादृश्यबोधकपक्षमपि दूषयति—अपिचेह। तृतीयं व्युत्पत्त्यौपाधिकधर्ममात्रबोधकपक्षं दूषयति—न च सर्वत्रेति। आधुनिकसम्मतोपमानेऽक्षपादसूत्रादिविरोधमाह—असत्यपीति। प्रसिद्धेन गवा गवयस्य साधर्म्यात् प्रज्ञापनीयस्य गवयशब्दवाच्यस्य ज्ञापनमुपमानमिति सूत्रार्थः। तत्र वार्तिकव्याख्यानं दर्शयति—आगमेत्यादि। आगमो=अतिदेशवाक्यम्। आहितः=उत्पादितः। तादृशसंस्कारजन्यस्मृत्यपेक्षं सादृश्यज्ञानमुपमानमिति वार्तिकार्थः। अवधीरिता निर्गताऽपसिद्धान्तरूपनिग्रहस्थानप्रयुक्ताभीतिर्यस्मात् तस्य मते, इयं पृथिवीशब्दवाच्या

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शाब्दप्रमाणमपि दुर्निरूपम् । तथाहि 'शास्त्रं शब्दविज्ञानादसन्निकृष्टेऽर्थे विज्ञानम्' इति मीमांसकाः । शब्दविषयं विज्ञानं शब्दविज्ञानं तस्मादसन्निकृष्टेऽर्थे श्रोतुरनधिगतेऽबाधिते च विषये यद्विज्ञानं तच्छाब्दप्रमाणमिति यावत् । उक्तं हि वार्तिककारैः—

असन्निकृष्टवाचा च द्वयमत्र जिहासितम् ।
ताद्रूप्येण गृहीतत्वं तद्विपर्ययतोऽपि वा ॥' इति ।(श्लो०वा०अनु० ५५, ५६)

यद्वा शब्दाज्जनितं पदार्थविषयं यद्विज्ञानं तस्मादसन्निकृष्टेऽर्थे बुद्धिः शाब्दमिति । तदयुक्तम्; शब्दलिङ्गकवक्तृविशेषानुमानेऽतिव्याप्तेः । भवति हि बहिष्ठस्याध्ययनध्वनिश्रवणाद्भवनान्तर्वर्तिपुरुषविशेषानुमानम् । द्वितीयेऽपि धूमादिपदात्तदर्थविज्ञाने धूमध्वजादौ जायमानानुमानादावतिव्याप्तिः । लिङ्गाद्यजन्यत्वे सतीति विशेषणाददोष इति चेत्, तर्हि तावदेवास्तु लक्षणं किमनेन शब्दविज्ञानादित्यादिना विशेषणेन कण्ठशोषकरेण?

कश्चायं शब्दो नाम यद्विज्ञानादसन्निकृष्टेऽर्थे बुद्धिः । न तावत्पदम्; पदमभ्यधिकाभावात्स्मारकान्न विशिष्यत इति स्वयमेव तस्यासन्निकृष्टार्थविज्ञानजनकत्वानभ्युपगमात् । नापि वाक्यम्; तस्यानिरुक्तेः । तथाहि—किं पदसमुदायमात्रं वाक्यम् ? उक्तंकार्थप्रति-

---

गन्धवत्त्वाद्, यन्नैवं तन्नैवमिति केवलव्यतिरेक्यनुमानेऽपि निरुक्तोपमानलक्षणस्यातिव्याप्तिप्रसक्तिमाह—अथावधीरितेत्यादि ।

अथ क्रमप्राप्तं शब्दप्रमाणं निराकर्तुं प्रतिजानीते—शाब्देति । तत्र शबरस्वामिसम्मतं लक्षणं दूषयितुमुद्भावयति—तथाहीति । ननु परार्थानुमाने निरुक्तशब्दप्रमाणलक्षणस्यातिव्याप्तिं परिहर्तुं भाष्यलक्षणं व्याकुरुते—शब्दविषयं विज्ञानमित्यादिना । नखल्विह शब्दजन्यविज्ञानं विवक्षितम्, अपितु शब्दविषयकं ज्ञानमेव । तेनानुमानेऽतिव्याप्तिरित्यर्थः। असन्निकृष्टपदं व्याकुरुते=श्रोतुरिति । तत्र वार्तिककृतां सम्मतिमाह—असन्निकृष्टवाच्येति । भाष्यस्थासन्निकृष्टपदेन धर्मद्वयं जिहासितं विवक्षितमस्ति । तच्च ज्ञातत्वरूपेण बाधितत्वरूपेण च गृहीतत्वमिति भावः । अर्थादज्ञातोऽबाधितश्च विषयोऽसन्निकृष्टशब्देन विवक्षित इति । उभयवादसाधारण्येन भाष्यं संयोज्य साम्प्रतमभिहितान्वयवादानुसारेण भाष्यं योजयति—यद्वेति । पदात्पदार्थस्मरणस्य शब्दाभासस्य च वारणायासन्निकृष्टाबाधितेति विशेषणद्वयम् । प्रत्यक्षानुमानादिवारणाय शब्दविज्ञानादिति । तत्राद्यं दूषयति—तदयुक्तमिति । शब्दलिङ्गाज्जायमानेऽनुमाने व्यक्तिविशेषेऽतिव्याप्तेः । एतदेव स्फोरयति—भवति हीति । द्वितीये धूमादिशब्दधूमजन्यधूमज्ञानेनोत्पादितवह्निविषयकानुमानेऽति याप्तिः । न च लिङ्गाद्यजन्यत्वे सतीति विशेषणान्नदोष इति वाच्यम्; तदतिरिक्तविशेषणस्य वैयर्थ्यप्रसङ्गात् ।

अधुनावयवशो निर्वाच्यमाणमपि शब्दप्रमाणं निराकर्तुमुपक्रमते—कश्चायमिति । प्रकृतोपयोगितामुपपादयति—यद्विज्ञानादिति । शास्त्रप्रमाणत्वेन विवक्षितं पदं वा वाक्यं वेति विकल्पाद्यं दूषयति—न तावत्पदमिति । पदं स्मारकमात्रमिति वार्तिकेन दर्शयति—पदमित्यादिनेति । व्युत्पत्तिसमयगृहीतादर्थादभ्यधिकार्थबुद्धेः पदेभ्योऽभावान्नसम्बन्धिदर्शनादिपदार्थस्मारकापेक्षया पदेषु वैशिष्ट्यमस्तीतिभावः, अन्यथाऽगृहीतसङ्केतिकस्यापि बोधकत्वप्रसङ्गादिति तात्पर्यम् । एतेन पदेषु स्वयमेवासन्निकृष्टार्थविज्ञानजनकत्वं निराकृतमित्याह—स्वयमेवेति । द्वितीयं दूषयितुं वाक्यलक्षणं

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पादकत्वावच्छिन्नः पदसमुदायः ? उताकाङ्क्षासन्निधियोग्यतावन्ति पदानि। नाद्यः;
गौरश्वः पुरुषो हस्तीत्यादेरपि वाक्यत्वप्रसङ्गात्। नापि द्वितीयः; अर्थस्यैकत्वविषयत्वा-
वच्छिन्नत्वानामनिरुक्तेः। तत्रैकत्वं नाम किमेकत्वसंख्यावत्त्वम्? उताभेदः? किं वा स्व-
रूपमेव? नाद्यः; गौरश्वः पुरुष इत्यादेरप्येकत्वसंख्याविशिष्टतया तद्वाचकपदसमुदायस्या-
वाक्यत्वप्रसङ्गात्; एकत्वादिसंख्याप्रतिपादकवाक्याव्यापनाच्च; नह्येकत्वद्वित्वादावेकत्व-
संख्यान्तरमस्ति, येन तत्प्रतिपादकपदसमूहो वाक्यं स्यात्। न द्वितीयतृतीयौ; गौरश्वः
पुरुष इत्यादावभेदस्वरूपयोर्भावात्। विषयविषयिभावस्य च पूर्वमेव निरस्तत्वात्। किञ्च
दमवच्छिन्नत्वम्? विशिष्टत्वमिति चेत्, तदेव किम्? विशेषणेन सम्बद्धत्वमिति चेत्
सम्बद्धत्वमित्यत्रापि सम्बन्धेन विशिष्टत्वोक्तावात्माश्रयता। विशेषणव्यावृत्तसम्बन्धाधा-
रत्वोक्तौ को दोषः? इति चेत्, व्यावृत्तशब्देन विशिष्टत्वोक्तावात्माश्रयता प्रथमे;
विशेषणविशेष्ययोः प्रत्येकं विशिष्टत्वापत्तिः द्वितीयः, सम्बन्धस्य च विशिष्टत्वाभावः
तृतीयः, तस्य सम्बन्धान्तराभावात्, भावे वानवस्था। किञ्च विशेषणविशेष्यतत्सम्बन्धेभ्यो
विशिष्टं भिन्नमभिन्नं वा? नाद्यः; अनुपलम्भपराहतत्वात्, दण्डिनमानयेत्युक्तेऽन्यस्य
वानयनप्रसङ्गाच्च। नापि द्वितीयः; त्रयाणामपि प्रत्येकं विशिष्टत्वात्। दण्डादीनामन्यत-
मानयने दण्डी समानीत इति व्यवहारप्रसङ्गात्।

किञ्चेदं विशेषणं नाम यद्विशेषितं तत्त्वान्तरं स्यात्? व्यावर्तकमिति चेत्
किं व्यावृत्तेर्भेदस्य जनकम्? उत तत्प्रतीतेः? नाद्यः; असम्भवात्। नहि कठो-

---

विकल्पयति—तथाहीति। तत्राद्येऽतिव्याप्तिमाह—गौरश्व इति। द्वितीयं दूषयितुं पुनरपि विकल्प-
यति—अर्थस्येति। द्वितीयलक्षणघटकार्थगतमेकत्वं, विषयत्वमवच्छिन्नत्वमपि निर्वक्तुमनर्हम्। तत्रै-
त्वमेकत्वसंख्यावत्त्वमिति स्वीकारे गौरश्वः पुरुष इत्यादीनां गवादिपदार्थानामप्येकत्वसंख्याविशिष्टत्वा-
तद्वाचकत्रिपदसमुदायस्यापि वाक्यत्वापत्तिः, एकत्वादिसंख्याप्रतिपादकेष्वव्याप्त्यापत्तिः। अव्याप्तिं
स्फोरयति—नह्येकत्वेति। नाप्येकत्वमभेदः स्वरूपं वा द्वितीयतृतीयपक्षौ स्तः, प्रथमपक्षोक्तातिव्याप्ति-
व्याप्तिदोषस्यात्रापि सत्त्वात्। गौरश्वपुरुष इत्यादावभेदस्य भावात्स्वरूपस्य च सत्त्वाच्च।
एवमेकत्वं निरस्य विषयविषयित्वे प्रपञ्चमिथ्यात्वनिरूपणोक्तनिराकरणं स्मारयति—विषयेति।
अवच्छिन्नत्वं निराकुरुते—किञ्चेदमिति। विशेषणेन सम्बन्धत्वं विशिष्टत्वमेवावच्छिन्नत्वमित्यु-
क्तावात्माश्रयतापत्तिः। विशेषणव्यावृत्तसम्बन्धाधारत्वोक्तौ व्यावृत्तशब्देन विशिष्टत्वविवक्षायामात्मा-
श्रतातदवस्थैको दोषः प्रत्येकं विशिष्टत्वापत्तिर्द्वितीयः, सम्बन्धस्य विशिष्टत्वाभावस्तृतीयो दोषः।
नहि सम्बन्धस्य सम्बन्धान्तरोऽस्ति, सम्बन्धान्तरसत्त्वे चानवस्था। विशिष्टत्वरूपमपि दुर्निरूप-
मित्याह—किञ्चेति। विशेषणविशेष्यतत्संसर्गेभ्यो विशिष्टं भिन्नमित्युक्तावनुपलम्भपराहत-
व्यवहारविरोधश्चेत्याह—दण्डिनमित्यादि। विशेषणादिभ्यो विशिष्टमभिन्नमिति पक्षे त्रयाणामपि
प्रत्येकं विशिष्टत्वात्। दण्डादीनामन्यतमानयने दण्डी समानीत इति व्यवहारप्रसक्तेः।

किञ्च विशेषणं व्यावर्तकं चेत्तर्हि तद्व्यावृत्तेर्जनकमुत व्यावृत्तिप्रतीतेर्जनकम्। आद्येऽसम्भवं
विवृणुते—नहीत्यादिना। द्वितीये नेत्रादेरपि विशेषणत्वप्रसक्तिः। तदिष्टापत्तौ कथानारम्भप्रसङ्गः

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कुठारधारया तरोरिव देवदत्तस्य दण्डकुण्डलादिना विधीयते द्वैधीभावः। नापि द्वितीयः; नयनादेरपि भेदप्रतीतिजनकस्य विशेषणत्वप्रसङ्गात्। तदपि क्वचित्कस्यचिद्भवत्येव विशेषणमिति चेत्, हन्त तर्हि वस्तुमात्रमित्येव विशेषणलक्षणमस्त्वलमनया प्रन्थकथाकन्थया। अस्तु तर्हि विषयीक्रियमाणतया यद्व्यावृत्तिबुद्धिजनकं तद्विशेषणलक्षणमिति चेत्, मैवम्; विशेष्येऽपि प्रसङ्गात्। तदन्यत्वे सतीति विशेषणाददोष इति-चेत्, न; उपलक्षणेऽपि प्रसङ्गात्, विशेषणसिद्धौ तदुपजीविनो विशेष्यस्य सिद्धिस्ततश्च ततोऽन्यत्वेन विशेषणसिद्धिरिति परस्पराश्रयता। एतेन 'स्वबुद्धया रज्यते येन विशेष्यं तद्विशेषणम्' इति भट्टपादीयमपि लक्षणं परास्तम्; परस्पराश्रयताया दर्शितत्वात्। यत्पुनरुदयनेनोदीरितम्—'सामानाधिकरण्येन प्रतीयमानं विशेषणम्, व्यधिकरणतया प्रतीयमानमुपलक्षणम्' इति, तदप्यसत्, विकल्पासहत्वात्। किमार्थिकं सामानाधिकरण्यं विवक्षितम्? उत शाब्दम्? नाद्यः; असम्भवात्। नह्यस्ति दण्डदेवदत्तयोः शौक्ल्यपटयोश्चैकाधिकरण्यम्, तयोः प्रतिनियताधिकरणत्वात्। दण्डित्वदेवदत्तत्वयोरैकाधिकरण्यमस्ति दण्डिन एव देवदत्तत्वादिति चेत्, तर्हि तयोरेवास्तु विशेषणविशेष्यभावो नतु दण्ड-देवदत्तयोः। नहि दण्ड एव दण्डी। न द्वितीयः; तत्किमेकविभक्तिकानेकपदाभिधेयत्वम्? उत भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे वृत्तिः? न प्रथमः; असम्भवादेव। नहि विशेषणविशेष्यभावेन प्रसिद्धयोर्दण्डदेवदत्तयोर्दण्डो देवदत्त इत्येकविभक्तिकानेकपदाभिधेयत्वमस्ति। नापि चरमः; दण्डी देवदत्त इत्यत्रैवादर्शनात्। नहि यथा शुक्लः पट इति शुक्लगुणं पटत्वं च निमित्तीकृत्य पदद्वयं पटे प्रवृत्तम्, तथा दण्डित्वं दण्डं वा निमित्तीकृत्य

विशेषणस्य लक्षणान्तरमाह—अस्तु तर्हीति। विषयीक्रियमाणं व्यावृत्तिबुद्धिजनकं यत्तद्विशेषणमिति स्वीकारे विशेष्येऽपि विशेषणत्वप्रसङ्गः। विशेष्यान्यत्वे सतीति विशेषणत्वे उपलक्षणेऽति व्याप्तिः। विशेषणविशेष्ययोः सिद्धौ परस्पराश्रयतामाह—विशेषणसिद्धाविति। परस्पराश्रयं दोषं लक्षणान्तरेष्वप्यतिदिशति—एतेनेति। उदयनरीत्या विशेषणोपलक्षणयोर्भेदमनूद्य निराकुरुते—यत्पुनरिति। विशेषणलक्षणे जटी तापस इतिवद्विशेषणविशेष्ययोरार्थिकं सामानाधिकरण्यं विवक्षितं चेदसम्भवापत्तिः। तदेव विवृणुते—नह्यस्तीति। दण्डदेवदत्तयोः शुक्लत्वपटयोश्च प्रतिनियताधिकरणत्वदर्शनेनैकाधिकरण्याभावात्। सत्यपि दण्डित्वदेवदत्तत्वयोरैकाधिकरण्ये तयोरेव विशेषणविशेष्यभावोऽस्तु न तु दण्डदेवदत्तयोः। दण्डित्वस्य दण्डिनिष्ठधर्मत्वात्, दण्डस्य च दण्डित्वाभावमाह—नहि दण्ड एव दण्डीति। नापि (शाब्दसामानाधिकरण्यमिति) द्वितीयः कल्पः, अत्रापि विकल्प्य दूषयति—न प्रथमः इति। असम्भवं संघटयति—नहीति। तथासति दण्डो देवदत्तः, नैल्यमुत्पलमिति प्रयोगः स्यात्। चरमेऽव्याप्तिमाह—दण्डी देवदत्त इति। शुक्लः पट इति शुक्लगुणं पटत्वं च निमित्तीकृत्य यथा पदद्वयं पटे प्रवर्तते, न तथा दण्डित्वं दण्डं वा प्रवृत्तिनिमित्तीकृत्य दण्डपदं देवदत्ते प्रवर्तते, येन दण्डो देवदत्तः इत्यत्र समानाधिकरणता स्यात्। यद्यपि दण्डी देवदत्तः इत्यत्र दण्डित्वं निमित्तीकृत्य दण्डीशब्दो देवदत्ते प्रवर्तते, तथापि न दण्डित्वं देवदत्तस्य विशेषणं, देवदत्तस्य

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दण्डपदं देवदत्ते प्रवृत्तम्, येन समानाधिकरणता स्यात्। दण्डित्वं निमि कृत्य दण्डिशब्दो देवदत्ते प्रवृत्त इति चेत्, प्रवर्ततां नाम, नतु तद्विशेष दण्डविशिष्टरूपत्वात्तस्य। किञ्च जटी तापसो जटाभिस्तापस इति वैकल्पिकप्रति भात्रेण विशेषणोपलक्षणव्यवहारमङ्गीकुर्वाणः "सर्व एवायं मानमेयादिव्यवहारो बुद्ध रूढेन धर्मधर्म्यादिभावेन, न बहिः सदसत्त्वमपेक्षते" इति सौगतमतानुप्रवेशमात्मनस्ता कंमन्यो नालोचयते। एतेन सम्बद्धमेव व्यावर्तकं विशेषणमसम्बद्धमपि व्यावर्तकमु लक्षणमित्यपि परास्तम्।

अस्तु वा भवदिच्छया यत्किञ्चनावच्छेदकमवच्छिन्नं च, तथापि किं तत्पदमि विवेचनीयम्, यत्समुदायो वाक्यम्? ननु प्रसिद्धिसिद्धमेव सुप्तिङन्तं पदमिति, कि विवेचनीयमिति चेत्, मैवम्; एकैकस्य मिलितस्य वा लक्षणत्वे सुबन्तेऽपि तिङन्त तिङन्तेऽपि सुबन्तस्योभयोरुभयत्र चाव्याप्तेः। उभयान्यतरदिति चेत्, न; अन्यतरशब्दे कैकस्य मिलितस्य वाभिधाने पूर्वदोषानुषङ्गात्। उभयान्यान्यदिति चेत्, न उभयश नोभयत्वसंख्याविशिष्टत्वविवक्षायामन्यशब्देन चान्यत्वाधिकरणत्वविवक्षायामुभयो तत्सम्भवेन पूर्वोक्तदोषानतिवृत्तेः। अपि च सुप्तिङन्तं पदमिति यत्र सुप्ति स्तस्तत्पदम्? यत्र वा तौ विधित्सितौ, तत्पदम्? नाद्यः; विभ सत्त्वस्य विशेषणत्वेऽव्ययानां लुप्तविभक्तिकानामपदत्वप्रसङ्गात्। उपलक्षणत्वे प्रातिपदिकस्यापि पदत्वम्, भाविनापि विनाशेन विनाशी घट इतिवद्भाविनापि विभ सत्त्वेनोपलक्षितत्वोपपत्तेः। अत एव न द्वितीय; एतेन विभक्त्यन्ताः वर्णाः पदमित निरस्तम्। ननु शाब्दप्रतीत्यजन्यशाब्दप्रतीतिजनकं वर्णात्मकं पदमिति लक्षणम्, अत्र शाब्दप्रतीतिजन्यशाब्दप्रतीतिजनकं वाक्यं प्रथमविशेषणेन व्यावर्त्यते, द्वितीयेन

दण्डविशिष्टरूपत्वं नतु दण्डित्वविशिष्टरूपत्वम्। किञ्च विशेषणोपलक्षणयोर्वैचित्र्यं प्रतीतिमात्रप्र नार्थभेदप्रयुक्तं, तथासति नैयायिकानां सौगतमतानुप्रवेशप्रशक्तिः स्यादिति सदृष्टान्तमाह किञ्च जटी तापस इत्यादिना। लक्षणान्तरेऽप्येतद्दूषणमतिदिशति—एतेनेति। व्यावर्तकत्व निर्वक्तुमशक्यत्वादितिभावः।

एवं चावच्छिन्नत्वं निराकृत्य पदसमुदायघटक पदपदार्थं निराचष्टे—अस्तु वेति। पाणि पदलक्षणं दूषयितुमुद्भावयति—नन्विति। तदेतद्दूषयति—मैवमिति। सुप्तिङन्तं पदमिति ल दूषयित्वा सम्प्रति तदन्तत्वानिरुक्त्यापि पदलक्षणं दूषयति—अपिचेति। तद्गुणसंविज्ञानबहुव्रीहि विशेषणतया विभक्तिसत्त्वविवक्षायामव्ययेष्वव्याप्तिः। उपलक्षणत्वकल्पं दूषयति—उपलक्ष चेति। यत्र सुप्तिङौ स्तस्तत्पदं दूषयित्वा यत्र विधित्सितौ ताविति पक्षं दूषयति—अत एवे प्रातिपदिकमात्रस्यापि पदत्वप्रसङ्गात्। निरुक्तदोषमन्यस्मिन् लक्षणेऽप्यतिदिशति—एतेनेति विभक्तेर्विभक्त्यन्तत्वस्य च निर्वक्तुमशक्यत्वादिति भावः। आधुनिकरीत्या सपदकृत्यं पदल

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रत्यक्षानुमानादावतिव्याप्तिर्व्युदस्यते, वर्णात्मकत्वविशेषणेन चादृष्टेश्वरादि । तदिहाधुनिकलक्षणे न कोऽपि दोष इति चेत्, मैवम्; विकल्पासहत्वात्—तत्किं शब्दशब्देन पदं विवक्षितम्? उत वाक्यम्? नाग्रिमः, पदस्याद्याप्यसिद्धेः । न पश्चिमः; पदासिद्धौ तस्याप्यसिद्धेः नाप्याकाङ्क्षासंनिधियोग्यतावन्ति पदानि वाक्यमिति तृतीयः पक्षः; आकाङ्क्षायाः पुरुषधर्मस्याचेतनेषु पदेष्वभावात् । आकाङ्क्षा हि जिज्ञासा, उक्तं हि—

'अन्वितस्याभिधानार्थमुक्तार्थघटनाय वा ।
प्रतियोगिनि जिज्ञासा या साकाङ्क्षेति गीयते ॥' इति (प्र० पं० परि० पृ०७)

योग्यतापि किं पदानामेव सहप्रयोगयोग्यत्वम्? उतान्योन्यान्वययोग्यार्थत्वम्? नाद्यः; वह्निना सिञ्चेदित्यादावपि सहप्रयोगदर्शनात् । नापि द्वितीयः; वाक्याभासेऽपि प्रसङ्गात् । नद्यास्तीरे फलानि सन्तीति विप्रलम्भकवाक्यस्थपदानामप्यन्यन्योन्यान्वयोग्यार्थकत्वात् । अन्यथा प्रामाणिकवाक्येऽपि तेषामनन्वयापत्तेः । प्रमाणान्तरविरोधादिह पदार्थानामन्वययोग्यता नास्तीति चेत्, न; संसर्गाभावेपि संसर्गयोग्यस्वभावस्याखण्डितत्वात् ।

अस्तु वा यत्किञ्चिदविचारितरमणीयं पदम्, तत्समूहश्च वाक्यम्, तथापि कुत्र प्रमाणम्, इति विवेचनीयम्?

शब्दो मानं विवक्षायां ज्ञानेऽर्थे वा भवन्भवेत् ।
नाद्यौ तद्व्यभिचारित्वान्नान्त्यः सङ्गत्ययोगतः ॥३१॥

न तावद् 'देवदत्त गामभ्याज' इति पदनिचयस्तद्विवक्षायां तज्ज्ञाने वा लिङ्गतया मानम्, व्यभिचारित्वात् । श्रान्तस्य पिपासोः पानीयविवक्षायां कुकुदं देहिति प्रयोगदर्शनात् ।

पुष्णावयति—ननु शाब्दति । विकल्पासहत्वेनास्यापि दूषितत्वमाह—तत्किमित्यादिना । किं पदसमुदायमात्रं वाक्यमित्यादिना त्रिधाविकल्पेषु द्वौ दूषयित्वा सम्प्रति तृतीयं दूषयति—नाप्याकाँक्षेति । आकाँक्षापदस्य जिज्ञासार्थः शालिकनाथेनाभिहित इत्याह—अन्वितस्येति । वृक्ष इत्यत्रान्वितस्याभिधानार्थं, विश्वजिता यजेतेत्यादावुक्तार्थस्य यागस्य सामञ्जस्याय प्रतियोगिविषयिणी या पुंसो जिज्ञासा सैवाकाँक्षेति गीयते इति श्लोकार्थः । योग्यतामपि विकल्प्य दूषयति—योग्यतापीति । सा किं पदगता पदार्थगता वेति प्रथमेऽतिव्याप्तिमाह—वह्निनेति । तयोरपि सहप्रयोगयोग्यतास्त्येवान्यथा योग्यताकार्यसहप्रयोगो न स्यादित्यर्थः । द्वितीयेऽतिव्याप्ति दर्शयति—नद्यास्तीर इति । अस्य वाक्यार्थस्य बाध्यमानत्वेऽपि तत्तत्पदार्थस्याबाध्यमानत्वमाह—अन्यथेति । प्रतारकवाक्यस्थपदार्थानां संसर्गाभावेऽपि संसर्गयोग्यस्वभावस्य निराकर्तुमशक्यत्वात् ।

एवं शाब्दविज्ञानादसन्निकृष्टेऽर्थे विज्ञानं शास्त्रमिति लक्षणे शब्दविज्ञानादित्यंशो निरूपयितुमशक्य इत्युक्तं, सम्प्रति तदपेक्षार्थविज्ञानमित्यत्रार्थशब्दार्थोपि विचारासह इत्याह—अस्तु वेत्यादिना । कस्मिन्नर्थे शब्दप्रमाणमिति विवेचनीयम्? मानं भवन्शब्दः पदार्थसंसर्गविवक्षायां लिङ्गतया भवेत्, ज्ञानेऽर्थे वा इति पूर्वार्द्धयोजना । नाद्यौ, ताभ्यां शब्दस्य व्यभिचारित्वात् । नान्त्यः, पदार्थेषु संगत्ययोगेन तत्संसर्गरूपवाक्यार्थेऽपि प्रामाण्यायोगादित्युत्तरार्द्धयोजना । संग्रहश्लोकं

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अन्यथा जानतोऽपि विप्रलम्भकस्यान्यथाप्रयोगदर्शनाच्च । आप्तवाक्यमेव तयोर्लिङ्गं भवे-रदिति चेत्; अस्तु तर्हि तदर्थस्यैव प्रतिपादकत्वं तस्य, तेनाव्यभिचारात् । किञ्च वाक्यं वाक्यार्थेनाविशेषितज्ञानविवक्षयोर्मानम् ? उत विशेषितयोः । नाद्यः; व्यवहाराभाव-प्रसङ्गात् । द्वितीये तु तद्विशेषणभूतोऽर्थः केनाधिगतः ? इति वाच्यम् न तावत्प्रत्यक्षेण नदीतीरे फलसत्तायाः श्रोतुरिन्द्रियासन्निकृष्टत्वात् । नानुमानेन; तद्व्याप्तलिङ्गा-भावात् । नाप्येतदवगतिः स्मृतिः; पूर्वमननुभूतत्वात् । नाप्युत्प्रेक्षा; तस्याः प्रत्यक्षानुमान-योरनन्तर्भावात् । नापि संशयः; कोटिद्वयानवलम्बित्वात् । नापि विपर्ययः, तत्र प्रवृत्तस्य तत्प्राप्त्यभावप्रसङ्गात् । शब्दादेव तु तदधिगमे परस्पराश्रयता, अनुमानवैयर्थ्यं च अनधिगमे तु तद्विशिष्टज्ञानानुमानायोगः । नागृहीतविशेषणा विशेष्ये बुद्धिरिति न्यायात् नापि तृतीयः; अर्थेन शब्दसङ्गत्यभावात्—शब्दार्थयोरेकदेशकालत्वनियमाभावात् । वाच्य-वाचकलक्षणः सम्बन्धोऽस्तीतिचेत्; वाचकत्वं नाम तद्विषयप्रतीतिजनकत्वम् वाच्यत्वं तज्जन्यप्रतीतिविषयत्वं, तदेवासति सम्बन्धे कथं स्यादिति पर्यनुयोगे तस्मादेव (इद-तद्भवतीति ब्रुवाणः पण्डितगोष्ठीषु कथं नापत्रपेत् ? अन्तरेण च सम्बधं शब्दस्यार्थविशेष-प्रतीतिजनकत्वेऽध्यक्षानुमानयोरपि सम्बन्धसमर्थनवैयर्थ्यापातः ।

कस्य चायं शब्दो वाचकः ? किं जाते ? उत व्यक्तेः ? किं वा जातिविशेषिताया व्यक्तेः ? नाद्यः; विशेषविषयव्यवहाराभावप्रसङ्गात् । अथ जातावेवावसितसङ्गतिकानि पदान्यनाकलितविशेषायास्तस्या बोद्धुमशक्यत्वात्तत्रापर्यवसितव्यापाराणि विशेषानपि बोधयन्तीति मतम्, तदपि न; विकल्पासहत्वात् । तथाहि—प्रथमं जातिमात्रमवबोध्यापरं

विशदयति—न तावदित्यादिना । विवक्षायां व्यभिचारमुदाहृत्य ज्ञाने व्यभिचारं दर्शयितुमुदाहरति—अन्यथा जानतोऽपीति । नन्वाप्तवाक्यमेव निरुक्तविवक्षाज्ञानयोर्लिङ्गं न तु वाक्यमात्रमिति, चेत्तर्हि तत्रैवार्थे प्रतिपादकत्वमाप्तवाक्यस्यास्तु, तेनार्थेनाव्यभिचारात् । इतोऽपि विवक्षाज्ञानयोः शब्दे प्रामाण्यं शङ्कते—किञ्च वाक्यमित्यादिना । किं केवलज्ञानविवक्षयोर्वाक्यं प्रमाणम् ? उत तत्तद्वा-क्यार्थविशेषितज्ञानविवक्षयोः ? व्यवहाराभावप्रसङ्गेनाद्यं दूषयति—नाद्य इति । नहि ज्ञानमात्रस्य विवक्षामात्रं च प्रतिपत्त्या गवाननादौ प्रवृतिः कस्यचित्सम्भवतीत्यर्थः । द्वितीये विशेषणीभूतोऽर्थः केन प्रमाणेनाधिगत इति वक्तव्यम् । प्रत्यक्षानुमानस्मृत्युत्प्रेक्षासंशयविपर्ययकल्पं दूषयित्वा शब्दाधि-गमादिपक्षमपि दूषयति—शब्दादेवेत्यादिना । अर्थे प्रमाणं शब्द इति तृतीयं पक्षं दूषयति—नापि तृतीयः । शब्दार्थयोः समानदेशकालनियमाभावात्पदार्थेन शब्दस्य सम्बन्धाभावादित्यर्थः । सम्बन्धं विनार्थस्य वाच्यत्वं शब्दस्य वाचकत्वमिति पण्डितगोष्ठीषु वक्तुं परिहासास्पदं भवेत् । तथासति प्रत्यक्षानुमानयोरपि सम्बन्धसमर्थनवैयर्थ्यापातः इत्याह—अन्तरेण चेति ।

शब्दस्य वाचकत्वाङ्गीकारेऽपि जाते, व्यक्ते, जातिविशिष्टव्यक्तेर्वा शब्दस्य वाचकत्वे दोषमाह—नाद्य इत्यादिना । आद्ये व्यक्तिविशेषे व्यवहारभावप्रसङ्गः स्यात् । यद्यपि जातावेव पदानां शक्ति-रवसिता, तथापि व्यक्तिबोधं विना जातेर्बोधयितुमशक्यतया पदानां व्यक्तिविशेषेऽपि बोधकत्व-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वसानादनन्तरं विशेषमवबोधयन्ति ? किं वान्तर्भावितविशेषामेव जातिम् ? नाद्यः; पदबुद्ध्योर्विरम्य व्यापाराभावात् । द्वितीयेऽपि विशेषेषु पदानां शक्तिरस्ति ? न वा ? अस्ति चेत्, जातिरेव शब्दार्थ इत्यभ्युपगमभङ्गप्रसङ्गः । अस्तु तर्हि जातिरेव वाच्या, व्यक्तिस्तु तदविनाभावाल्लक्ष्येति चेत्, मैवम्; अविनाभावासिद्धेः । किं गोत्वजातेर्व्यक्तिमात्रेणाविनाभावः ? किं वा गोव्यक्त्या ? नाद्यः; गोत्वजातेर्घटादिव्यक्तिभिरविनाभावाभावात् । न द्वितीयः; आत्माश्रयत्वात् । गोत्वजातिविशिष्टायां गोत्वस्य वर्तनाङ्गीकारात् । विशिष्टस्य लक्ष्यत्वे विशेषणभूताया जातेर्लक्ष्यत्वप्रसङ्गात् । एतेन सास्नावता विशेषेणाविनाभाव इत्यपि प्रत्युक्तम्; किञ्च सापि शक्तिरनधिगता न कार्याय पर्याप्तेति तदधिगतिरवश्याश्रयणीया । न च सा शक्या, विशेषाणामानन्त्याद् व्यभिचाराच्च । नास्ति चेद् व्याघातः—तत्रासमर्थानि बोधयन्ति च तानीति । अपि च जातिरेव शब्दार्थ इति नियमे कालाकाशदिगादिशब्दानामवाचकत्वप्रसङ्गात्, कालाकाशादौ कालत्वादिजातेरभावात् । यत्र सम्भवति तत्र जातिरितरत्र तु व्यक्तिरिति व्यवस्थेति चेत, न; पाचकादिशब्दानामुपाधिपरत्वस्वीकारात् । अस्तु तर्हि त्रितयं शब्दार्थ इति चेत्, न; जातिशब्दार्थत्वदोषाणामुपाधिष्वपि तुल्यत्वात् । न च त्रितयस्य मिलितस्यैकैकस्य वा शब्दार्थत्वप्रयोजकता; व्यभिचारित्वात्, अन्यतमत्वस्य च खण्डितत्वात् । एतेत व्यक्तेरपि शब्दार्थता प्रत्याख्याता; आनन्त्यव्यभिचारयोस्तत्रापि तुल्यत्वात्, विशिष्टस्यापि व्यावृत्तत्वाविशेषाद्व्यक्तेरिव तस्यापि शब्दार्थता

मस्त्येवेत्यपि वक्तुं न युक्तम् । तत्र विकल्पासहत्वं दर्शयति—तथाहीति । पूर्वं पदानि जातिमात्रमवबोध्य पश्चाद्विशेषं बोधयन्तीति पक्षे पदबुद्ध्योर्विरम्य व्यापारः क्वापि न दृश्यते । द्वितीये व्यक्तिगर्भितजातिं युगपदेव पदानि बोधयन्तीति पक्षेऽपि व्यक्तौ पदशक्तिस्वीकारे सिद्धान्तभङ्गप्रसङ्गः । न च जातावेव शक्तिः, व्यक्तिबोधो लक्षणयाऽभ्युपेयते इति वाच्यम्; अविनाभावस्यासिद्धेः । तत्र गोत्वजातेर्व्यक्तित्वावच्छिन्नव्यक्त्यासहाविनाभाव इत्युक्ते तव गोत्वजातेर्न घटादिव्यक्तिभिरविनाभावोऽभिप्रेतोऽस्ति । केवलं गोव्यक्त्या सह गोत्वजातेरविनाभाव इत्यत्रात्माश्रयत्वम् । गोत्वजातिविशिष्टायां गोत्वस्य वृत्तित्वाभ्युपगमात् । जातिविशिष्टव्यक्तेर्लक्ष्यत्वे तद्विशेषणीभूतजातेरपि लक्ष्यत्वप्रसङ्गात् । आत्माश्रयतावारणायाविनाभावान्तरमुद्भाव्य दूषयति—एतेनेति । किञ्च यया कया चाविनाभावाभ्युपगमेऽपि सा शक्तिरनधिगता सती न कार्यं निर्वोढुं शक्नोति, तदर्थमधिगमोऽवश्यं स्वीकार्यः । न च सा शक्या, व्यक्तीनामानन्त्यात्, व्यभिचाराच्च । तादृशी शक्तिर्नास्ति चेत्तदा व्याघातः । व्याघातं दर्शयति—तत्रेति । अपि च जातिरेव शब्दार्थ इति नियमे कालाकाशदिगादिशब्दानामेकैकवृत्तितयाऽवाचकत्वप्रसङ्गः स्यात् । सम्भवस्थले जातौ पदानां शक्तिरन्यत्र तु व्यक्ताविति व्यवस्थापि न सम्भवति ? पाचकादिशब्दानां जातिव्यक्तिभिन्नोपाधिपरत्वाभ्युपगमात् । निरुक्तत्रिषु पदानां शक्तिस्वीकारेपि दोषमाह—जातीति । मिलितस्य त्रितयस्यैकैकस्य वा शब्दार्थप्रयोजकत्वे व्यभिचारः, अन्यतमत्वस्य पूर्वमेव निरस्तत्वमिति । जातिशब्दार्थपक्षोक्तं दूषणं व्यक्तिशब्दार्थपक्षेऽतिदिशति—एतेनेति । दोषं स्मारयति—आनन्त्येति । जातिविशिष्टव्यक्तेः शब्दार्थत्वे व्यक्तिपक्षोक्तं दोषमतिदिशति—विशिष्टस्येति । न च सर्वव्यक्तिष्वनुगतमेव जाति-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

निरसनीया। अथ जातिवैशिष्टयं सर्वत्रानुगतमेव शब्दार्थः, तदापि जातेः शब्दार्थतायामु दूषणं न प्रत्युद्ध्रियेत। किञ्च वाच्यत्वमर्थस्य धर्मः, वाचकत्वं च पदस्य, तथा च प्रतिव नियते वाच्यत्वे वाचकत्वे च सबन्धवाचो युक्तिः कुतस्त्या? एतेन साङ्केतिकः शब्दार्थ सम्बन्ध इत्यपि परास्तम्; सङ्केतस्यापि जातौ व्यक्तौ विशिष्टे वाभिहितन्यायेन दु त्वात्। तस्माच्छास्त्रं शब्दविज्ञानादसन्निकृष्टेऽर्थे बुद्धिरिति लक्षणमलक्षणम्।

तथाप्तवाक्यं शब्दप्रमाणमिति नैयायिकानामपि।

आप्तोदीरितवाक्येषु मालतीमाधवादिषु।
व्यभिचारान्न तद्युक्तमाप्तत्वस्यानिरुक्तितः ॥३२॥

स्वकपोलकल्पितमालतीमाधवादिवाक्येषु प्रामाण्याभावादतिव्याप्तिः। नहि पुराप्त सन्नाटकनाटिकादिप्रबन्धविरचनमात्रेणानाप्तो भवति भवभूतिः। उक्तं चैतदुम्बेकेन- 'यदाप्तोऽपि कस्मैविदुपदिशति, न त्वयाननुभूतार्थविषयं वाक्यं प्रयोक्तव्यम्, यथाङ्गुल हस्तियूथशतमास्ते, इति तत्रार्थव्यभिचारः स्फुटः" इति। कश्चायमाप्तो नाम? यथादृष्टा वादीति चेत्, न; भ्रान्तवाक्येऽपि प्रसङ्गात्, प्रमाणदृष्ट इति विशेषणेऽपि प्रमाणदृष्ट प्रमादादिनान्यथाकथनेऽपि प्रसङ्गात्। प्रमाणेन यथादृष्टं तथावादीति चेत्, मैवम्; एक तथाभूतवादित्वेप्यंशान्तरेऽन्यथाभूतवादिन्यपि प्रसङ्गात्। यावत्प्रमाणदृष्टं तावत एव वक्ता इति चेत्, न; अज्ञातसंदिग्धानुवादादिवाक्यप्रयोक्तुरनाप्तत्वप्रसङ्गात्। अथ निर्दोष आप्त इति चेत्, मैवम्; आप्तानामपि क्वचिद्रागादिदोषसम्भवात्। यत्र विषये यो निर्दोषः

वैशिष्ट्यं शब्दार्थ इति वाच्यम्; जातिशब्दार्थपक्षोक्तदोषानुद्धारात्। दूषितपक्षे दूषणान्तरमाह किञ्चेति। वाचकत्वमर्थस्य धर्मः, वाच्यत्वं पदस्य धर्मः, तयोर्वैयधिकरण्येन कथं सम्बन्धो व शक्यः। नैयायिकाभिमतं सम्बन्धं दूषयति—एतेनेति। मीमांसाभिमते शाब्दप्रमाणलक्षणे दूष मुपसंहरति—तस्मादिति।

नैयायिकाभिमतं शब्दप्रमाणं दूषयति—तथेति। अत्रातिव्याप्तिमसिद्धिं च श्लोकेनोपपादयति आप्तेत्यादिना। आप्तोच्चरितेषु मालतीमाधवादिष्वतिव्याप्तेर्नाप्तवाक्यं नैयायिकसम्मतं प्रम भवितुमर्हति, आप्तत्वस्य निर्वक्तुमप्यशक्यत्वाच्चेति श्लोकयोजना। व्यभिचारं विशदयति स्वकपोलेति। नन्वौत्प्रेक्षिकार्थकवचसामाप्तवाक्यत्वानभ्युपगमेन न मालतीमाधवादिवाक्येष्व व्याप्तिर्दातुं युक्तेति चेत्तत्राह—नहि पुरेति। नह्येवं वक्तुं युक्तं यत्किल भवभूतिः पूर्वमाप्त आसी किन्तु नाटकादिप्रबन्धरचनामात्रेणानाप्तः सञ्जात इति। एतदेव दूषणमुम्मेकभट्टोक्त्या समर्थयति उक्तमिति। भवभूतिः=उम्मेकभट्टः। श्लोकस्य चतुर्थपादं स्फुटयति—कश्चायमिति। न यथादृष्टार्थवादीति तल्लक्षणमिति वाच्यम्, भ्रान्तवाक्येऽतिव्याप्तेः। भ्रान्तोऽपि यथाऽदर्शि वदतीत्यर्थः। न च प्रमाणदृष्टार्थवक्ताऽऽप्त इत्युक्ते न भ्रान्तवाक्येऽतिव्याप्तिरिति वाच्यम्; प्रमा दृष्टस्य वस्तुनः कदाचित्प्रमादादिनाऽन्यथा वक्तुं सम्भवेन तत्रातिव्याप्तेः। प्रमाणेन यथा तथा वदनमित्युक्तेऽप्यतिव्याप्तिमाह—एकदेशमिति। यावान्भागः प्रमाणेन दृष्टस्तावतो भाग

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तत्राप्त इति चेत्; न; यत्तच्छब्दयोर्विशेषविषयत्वेनासाधारण्यादव्याप्तेः । तस्मादाप्तवाक्यमागम इत्यप्यलक्षणम् । यथार्थवाक्यं शब्दप्रमाणमित्यपि न; यथार्थत्वस्य प्रमितिखण्डनावसर एव खण्डितत्वात् । एतेन 'समयबलेन सम्यक्परोक्षानुभवसाधनं शब्दः' इति भूषणस्यापि लक्षणमपास्तम्; ऊर्ध्वीकृततर्ज्जन्या दशसंख्यानुमाने शङ्खध्वनौ चानुविधेयपुरुषाभिप्रायानुमापके व्यभिचारात्, समयसम्यक्त्वयोश्च पूर्वमेव निरासात् । तदेवं शब्दलक्षणमपि दुर्भणमिति सिद्धम् ।

तथार्थापत्तिलक्षणमपि । अन्यथानुपपन्नदर्शनादुपपादके बुद्धिरर्थापत्तिः । यथा जीवतो देवदत्तस्य गृहान्तरभावमवलोक्य बहिरवस्थानज्ञानम् । नन्विदमनुमानमेवास्तु, देवदत्तो बहिरस्ति, जीवनवत्त्वे सति गृहेऽभवात्, संप्रतिपन्नवदिति चेत्, मैवम्; देवदत्तप्रतियोगिकाभावस्य गृहाधिकरणतया देवदत्तधर्मत्वाभावात् । गृहनिष्ठाभावप्रतियोगित्वं हेत्वर्थ इति चेत्, मैवम्; यदा जीवन्नस्तिक्वचिद्देवदत्त इत्याप्तवाक्यादनिर्धारितदेशविशेषनिष्ठतया देवदत्तसत्तावगता ग्रामाद्बहिरवस्थितेनैव चैत्रेण, स च तदागत्य गृहान्तस्तदभावमालोक्य बहिःसत्त्वमनुमिमीत इति वाच्यम्, तच्चानुपपन्नम्; साधारणदेशमात्रावस्थानविषयस्यागमस्यार्थापत्त्या यावन्न बहिर्देशसत्ताविषयत्वं परिकल्प्यते, तावदागमापबाधितविषयतयानुमानस्यानुत्थानात् । कल्पिते तु बहिर्देशविषयत्वेऽनुमानात्प्रागेवार्थापत्तिर्लब्धप्रमेयेति कुतमनुमानेनेति भाट्टाः प्रतिपेदिरे; तदिदमसुन्दरम् ।

वक्ताऽऽप्त इत्युक्तेऽज्ञातसन्दिग्धानुवादादिवाक्यानां प्रयोक्तुरनाप्तत्वप्रसङ्गात् । आप्येष्वपि क्वचिद्रागादिसम्भवेन यत्तच्छब्दप्रवेशेऽपि दोषानतिक्रमादित्यर्थः । तस्मादाप्तवाक्यमागमप्रमाणमित्यपि लक्षणं न युक्तम् । यथार्थत्वस्य प्रमात्वव्यञ्जकनिराकरणसमये निराकृतत्वेन यथार्थवाक्यं शब्दप्रमाणमित्यप्यलक्षणमेव । भूषणकारोक्तलक्षणेऽपि दोषमतिदिशत—एतेनेति । तथाहि समयबलेन=संकेतबलेनोर्ध्वीकृता तर्जन्यङ्गुलिर्दशसंख्यामनुमापयति, तत्रानुमाने त्वल्लक्षणस्यातिव्याप्तिः । सेनाध्यक्षस्य शङ्खध्वनिसंकेतेन तदभिप्रायानुमापकेऽपि त्वल्लक्षणातिव्याप्तिः । समयस्य सम्यक्त्वस्य च पूर्वमेव निराकृतत्वात् । शब्दप्रमाणनिराकरणमुपसंहरति—तदेवमिति ।

एवं प्रत्यक्षानुमानोपमानशब्दप्रमाणलक्षणानिनिराकृत्याधुना भाट्टप्राभाकराभिमतामर्थापत्तिं निराकुरुते—तथेति । तत्रार्थापत्तिलक्षणे दुर्भणत्वं दर्शयितुमाह—अन्यथेति । सा च द्विविधा, दृष्टार्थापत्तिश्रुतार्थापत्तिभेदात् । तत्राद्यामुदाहरति—यथा जीवत इति । अत्र वैशेषिकादयोऽर्थापत्तिमनुमानान्तर्भावयन्ति—नन्विदमिति । मीमांसकस्तत्परिहरति—मैवमिति । देवदत्तप्रतियोगिकाभावस्य गृहानुयोगिकतया देवदत्तरूपपक्षेऽसत्त्वेन स्वरूपासिद्धेः । गृहानुयोगिकाभावस्य हेतुत्वेऽपि दोषमाह—यदा जीवन्निति । नैयायिकस्य निरुक्तानुमाने मीमांसकोऽनुपपत्तिं दर्शयति—साधारणेति । अर्थापत्त्या जीवतो देवदत्तस्य बहिः सत्त्वकल्पनामन्तरेणागमापबाधितविषयतयाऽऽप्तवाक्यरूपागमेनानुमानानुत्थानादिति भावः । अर्थापत्त्या तस्य बहिः सत्त्वविषयत्वे कल्पितेऽनुमानात्पूर्वमेवार्थापत्त्या मेयसिद्धौ कृतमनुमानेनेति भाट्टैः प्रतिपादितम्; तत्सिद्धान्ती दूषयति—तदिदमित्यादिना । अत्रार्थापत्तिप्रवृत्तिर्व्यतिरे-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आगमस्य बहिर्देशविषयत्वस्य कल्पनात् ।
प्रागेव देवदत्तस्य गृहेऽभावो मितो न वा ॥३३॥
आद्येऽनुमानं तेनैव निष्प्रत्यूहं प्रवर्तताम् ।
द्वितीये कल्पकाभावादर्थापत्त्युदयः कुतः ॥३४॥

भाट्टानामप्याप्तवाक्यस्य बहिर्देशविषयत्वकल्पनात्प्रागेव देवदत्तस्याभावः प्रमितः अप्रमितो वा ? प्रमितत्वे तत एवानुमानोदयादलमर्थापत्तिप्रकल्पनादुर्व्यसनेन । द्वितीये कल्पकाभावात् कुतोऽर्थापत्तेरुदयः ? इयांस्तु विशेषः—प्रत्यक्षाभाववादिनो मते प्रत्यक्ष… स्यागमाद्बलीयस्त्वादागममवगणय्यापि प्रत्यक्षाधिगतगृहाभावलिङ्गेन भवति बहिर्देव… सत्त्वानुमानम् । अभावप्रमाणाधिगम्यत्वे पुनरभावस्यागमाद्दुर्बलतया तद्विरोधिगृ… भावस्यैव प्रमातुमशक्यतया नार्थापत्तिः प्रसरति, सदुपलम्भकप्रमाणप्रत्यस्तमय एवाभा… प्रमाणप्रवृत्त्यङ्गीकारात् । यथाहुः—

"प्रमाणपञ्चकं यत्र वस्तुरूपे न जायते ।
वस्तुसत्तावबोधार्थं तत्राभावप्रमाणता ॥" इति (श्लो० वा०अ०…

किञ्च यद्यस्य कल्पकमिष्यते, तत्तेनाविनाभूतमिष्यते ? न वा ? आद्ये भङ्ग्यन्तरेण भव… प्यनुमानमेवाभिहितमिति, न प्रमाणान्तरावकाशः । द्वितीयेऽप्यनियतमेव यत्किञ्चित्कल… येदिति नार्थापत्तिप्रमेयसिद्धिः । अनुपपद्यमानस्योपपादकासत्त्वे विरोधो गमक इति ना… मानमिति चेत्, मैवम्; अनुपलब्धेरप्यनुपलभ्यमानसत्त्वे विरोध एवाभावगमक इत्यभा…

णैवागमबाधं निरस्यानुमानप्रवृत्तिं द्वाभ्यां श्लोकाभ्यामाह—आगमस्येति । अर्थापत्त्याऽऽप्तवाक्य… गमस्य बहिःसत्त्वविषयकत्वकल्पनातः पूर्वमेव देवदत्तस्य गृहासत्त्वं प्रमितं, न वा ? आ… तेनैवागमस्य निरुद्धत्वादनुमानं निरापदं प्रवर्तताम्, न तत्रानुमाने आगमस्य बाधकत्वं, द्विती… कल्पकाभावात्कुतोऽर्थापत्तेरुदयः इति योजना । श्लोकौ विशदयति—भाट्टानामित्यादिना । वस्तुत… त्वदीयार्थापत्त्युदयात्तार्किकानुमानोदये वैलक्षण्यं दर्शयति—इयांस्त्विति । यस्य प्रत्यक्षाभाववादि… नस्तार्किकस्य मते प्रत्यक्षमागमाद्बलवत्तरमागमं तृणाय मत्वा देवदत्तस्य गृहासत्त्वं साधयति, त… च प्रत्यक्षसिद्धगृहासत्त्वलिङ्गेनानुमानं देवदत्तस्य बहिः सत्त्वसाधने प्रभवति । यस्य मते… भावोऽनुपलब्धिप्रमाणगम्यस्तस्य मतेऽनुपलब्धेरागमाद्दुर्बलत्वेनागमविरोधिगृहासत्त्वस्य प्रमातुमशक्य… तया नार्थापत्तिरुदेति । भावपदार्थोपलम्भकपञ्चप्रमाणास्तमये सत्येवाभावप्रमाणप्रवृत्त्यभ्युपगमात्… अत्र मिश्रपादरचितवार्त्तिकसम्मतिमाह—तथाहुरिति । वस्तुसत्ता = भावरूपता । तदवबोधार्थमित्यर्थः… अर्थापत्तेरनुदयं विकल्पपूर्वकमुपपादयति—किञ्चेति । यद् = गृहासत्त्वं, यस्य = बहिः सत्त्वस्य… तेन = कल्प्येन । बहिर्भावेन गृहासत्त्वं कल्पकमविनाभूतमिष्यते चेत्तर्हि तदेवाविनाभूतं व्याप्ति… स्वरूपं सदनुमित्युत्पादकं स्यात् । न तत्र प्रमाणान्तरावकाशः, नो चेदविनाभूतं तर्ह्यनियतमे… यत्किञ्चित् कल्पयेदिति नार्थापत्त्या प्रमेयसिद्धिः । अनुपपद्यमानस्य = गृहासत्त्वस्य । उपपादका… सत्त्वे = बहिर्भावासत्त्वे यो विरोधः, स एवाभावगमको नानुमानमभावावगमकमिति शङ्कते… अनुपपद्येति । तदेतदनिष्टान्तरापत्त्या परिहरति—मैवमिति । अनुमानापलापश्च स्यादित्याह…

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मानापह्नवप्रसङ्गात् । धूमोऽपि धूमध्वजस्यासत्त्वे विरोधादेव तद्गमक इत्यनुमानविलयापत्तेश्च । यत्र कार्यकारणभावं विनाऽविनाभावादेव गमकत्वं रसरूपादौ तत्र भवत्येवानुमानं लब्धावकाशमिति चेत्, न; तत्रापि रूपासत्त्वे रसस्य विरोधादेव गमकत्वोपपत्तेः ।

कश्चायं विरोधः ? (१) किं प्रमाणयोः ? (२) उत प्रमाणत्वेनाभिमतयोः ? (३) अनिर्णीतप्रामाण्याप्रामाण्ययोर्वा ? (४) सामान्यप्रवृत्तप्रमाणेन विशेषप्रवृत्तप्रमाणार्थबाधसंशयो वा ? (५) तर्कयोरेव वा ?

तदसिद्धिरतिव्याप्तिः सक्तिः सप्रतिसाधने ।
असम्भवोऽतर्कता च दोषास्तेषां क्रमादमी ॥३५॥

न तावदाद्यः; उभयोः प्रामाण्ये विरोधस्य विरोधे वा प्रामाण्यस्यैवासम्भवादसिद्धेः, अन्यथा वस्तुनो द्वैरूप्यापत्तेः । नापि द्वितीयः; अभिमतशब्देन भ्रमाभिधाने ज्ञानमात्रविवक्षायां वा भ्रमज्ञानयोः प्रमाणत्वेन गृहीतयोर्विरोधाद्विभिन्नविषयत्वकल्पनाया अप्यर्थापत्तित्व प्रसङ्गात् । नापि तृतीयः; वायुर्बाह्यकरणाप्रत्यक्षः अरूपिद्रव्यत्वात् कालादिवत्, वायुः प्रत्यक्ष उपलभ्यमानस्पर्शाधिष्ठानत्वात् घटादिवदित्यनिर्णीतप्रामाण्याप्रामाण्ययोरनुमानयोर्विरोधेऽप्यर्थापत्तेरुदयप्रसङ्गात् । नापि चतुर्थः; असम्भवात् । नहि यद्यत्र विशेषतः प्रमितं तस्य तत्रापि तद्विपरीतप्रमाणविषयत्वसंशयः । न खलु स्थाणुरयमिति निश्चयेऽपि स्थाणुर्वा पुरुषो वेति संशेरते जनाः । नापि पञ्चमः; मिथोविरोधेन तर्कयोरेवाभासत्त्वात् । किञ्चोपपादकेन येन विनानुपपद्यमानत्वं तत्प्रमितम् ? न वा ? प्रथमे गृहीतग्राहिकार्थापत्तिर्न प्रमा स्यात्; द्वितीये तु विशेषणासिद्धेः तद्विशेषितानुपपद्यमानार्थप्रतीतौ कल्पकाभावान्नार्थापत्तिरुदयमासादयेत् इत्यलमतिविस्तरेण ।

धूमोऽपीति । नच यत्र रूपरसादौ कार्यकारणभावं विनाऽविनाभावादेव रूपस्य गमको रसस्तत्रानुमानं लब्धावकाशं भवतीति वाच्यम्; तत्रापि रूपाभावे रसस्य विरोधादेव गमकत्वोपपत्तेः ।

पूर्वमुपपादकोपपाद्ययोर्विरोधोऽर्थापत्तिरित्युक्तस्तादृशविरोधस्य प्रमाणान्तरेष्वपि सत्त्वेन तत्रातिव्याप्तिरुक्ता । सम्प्रति विरोधस्य निरूपयितुमशक्यतया विरोधं विकल्पयति—कश्चायमिति । पञ्चधा विकल्पे क्रमेण पञ्चदूषणानि श्लोकेन सङ्कलयति—तदसिद्धिरित्यादिना । तत्र द्वयोः प्रमाणयोविरोध इत्याद्ये द्वयोः प्रामाण्ये विरोधस्यासम्भवापत्तिः, उभयोर्विरोधे प्रामाण्यस्यासम्भवापत्तिश्चेति, अन्यथा वस्तुनो विरुद्धद्वैरूप्यापत्तेरिति विरोधासिद्धिः । प्रमाणत्वेनाभिमतयोः पदार्थयोर्विरोध इति द्वितीयपक्षेऽभिमतशब्देन भ्रमस्य ज्ञानमात्रस्य वाभिधानेऽतिव्याप्तिमाह—प्रमाणत्वेनेति । अनिर्णीतप्रामाण्याप्रामाण्ययोरिति तृतीयकल्पे सप्रतिसाधनतायामतिप्रसक्तिरित्याह—वायुर्बाह्येति । सामान्यतः प्रवृत्तशब्दप्रमाणेन विशेषप्रवृत्तानुपलब्धिप्रमाणविषयस्य गृहासत्त्वस्य बाधे संशय इति चतुर्थकल्पेऽसम्भवमाह—नापि चतुर्थ इति । तमेव संघटयति—नहीति । द्वयोस्तर्कयोरेव वेति पञ्चमकल्पे तादृशतर्कयोस्तर्काभासत्वमाह—मिथो विरोधेनेति । अन्यरीत्याऽर्थापत्तिं दूषयति—किञ्चोपपादकेति । येन देवदत्तस्य बहिः सत्त्वेन विना गृहासत्त्वं नोपपद्यते, तस्य देवदत्तबहिः सत्त्वस्य प्रमितत्वे गृहीत-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अभावाख्यं प्रमाणमपि दुर्निरूपम् । एवं हि वर्णयन्ति—योग्यानुपलब्धिकरणकमर्था वज्ञानमभावः, यथेह भूतले घटो नास्तीति ज्ञानम् । न चेदं प्रत्यक्षम्, इन्द्रियसंनिकर्षज त्वात् । नह्यभावेनेन्द्रियसन्निकर्षः संयोगः समवायो वा संभवति; तयोर्भावधर्मत्वात् नापि विशेषणविशेष्यभावः, तस्यापि मूलसम्बन्धगर्भतया तन्निवृतौ निवृत्तेः । अन्तरेण मूलसम्बन्धं विशेषणविशेष्यभावाङ्गीकारेऽपि तस्य प्रत्यक्षाङ्गतायाः पुरैव निरासात् नचेदमनुमानादावन्तर्भवति; चक्षुरादिवदनुपलब्धेरज्ञायमानाया एव करणत्वात् । अन्य नुपलब्धेरप्यनुपलब्ध्यन्तरोपलभ्यमानतायामनवस्थानादिति ।

तदयुक्तम्— केवलानुपलम्भस्य व्यभिचारिनिवारिणी ।
योग्यता चेत्कुतो न स्यादनुमानमभावधीः ॥३६॥

अनुपलम्भमात्रस्य सुषुप्त्यादावभावज्ञानाजनकतया तद्व्यभिचारवारणाय योग्यानुपल रिति विशेष्येतेति चेत्, तर्हि योग्यानुपलब्धेर्धूमादिवदव्यभिचारितयाऽभावज्ञानजनक पपत्तौ कुतः प्रमाणान्तरता? न चाज्ञायमानतया करणत्वेनानुमानाद्बहिर्भावः, अन्यथानव प्रसङ्गादिति वाच्यम्; स्वतः सिद्धसाक्षिप्रसादादेवोपलब्धिवदनुपलब्धेरपि सिद्धावनव

ग्राहकत्वेनार्थापत्तेर्वैयर्थ्यं स्यादित्याह—प्रथम इति । अप्रमितत्वे विशेषणासिद्धिमाह—द्वितीये लि तदा बहिःभावविशेषणासिद्ध्या बहिर्भावविशिष्टानुपपद्यमानार्थाप्रतीतौ कल्पकाभावेनार्थापत्त्यनु प्रसङ्गः स्यात् । श्रुतार्थापत्तिरपि पूर्वोक्तरीत्या निराकृता । सा चानुपपद्यमानवाक्यैकदेशद वाक्यैकदेशकल्पनारूपा । यथा "पीनो देवदत्तो दिवा न भुङ्क्ते" इत्यादि । श्रुतार्थापत्ति करणमितिशब्देन सूचयन्नुपसंहरति—इत्यलमिति ।

अथ भाट्टाभिमतमनुपलब्धिप्रमाणं दूषयितुमुपक्रमते—अभावाख्यमिति । ते चैवं वर्ण योग्यानुपलब्धिकरणकमर्थाभावज्ञानमभावप्रमाणम् । शाब्दानुमानिकाभावज्ञानेऽतिव्याप्तिवारण नुपलब्धिकरणकमिति दलम् । अयोग्यस्यानुपलब्धिमात्रादभावमात्रवारणाय योग्यपद विशेषणम् । तत्रोदाहरणमाह—यथेहेति । अभावेनेन्द्रियसन्निकर्षसंयोगसमवायाद्यसम्भवान्नेदं प्रत्य न्तर्भावयितुं शक्यम् । संयोगसमवाययोर्भावधर्मत्वात् । विशेषणविशेष्यसंसर्गं दूषयति—तस्यापी मूलसंयोगादिसम्बन्धं विना विशेषणविशेष्यभावस्वीकारेऽपि तस्य विशेषणतादिसंसर्गस्य प्रत्य ताङ्गत्वस्य पुरैव निराकृतत्वात् । नचेदमनुमानेऽन्तर्भावयितुं युक्तम्, ज्ञायमानलिङ्गस्यैवानुमि करणत्वाभ्युपगमात् । अनुपलब्धेस्त्वाज्ञायमाना एव चक्षुरादिवत्करणत्वस्वीकारात् । वि दोषमाह—अन्यथेति ।

अभावप्रमाणं दूषयितुं सिद्धान्ती प्रतिजानीते—तदयुक्तमिति । श्लोकेनाभावप्रमाणमनुमा न्तर्भावयितुमाह—केवलेत्यादिना । केवलानुपलम्भस्याभावबोधहेतुत्वे सुषुप्त्यादौ व्यभिचारः स्या द्वारणाय योग्यतेति विशेषणमनुपलब्धिप्रमाणे प्रक्षिप्यते त्वया । तथा सति धूमादिवद्व्यभि णाभावबोधकत्वात्तज्जन्याभावज्ञानं कुतो नानुमानेऽन्तर्भवतीति श्लोकयोजनेति । श्लोकार्थं विशदय अनुपलम्भमात्रस्येत्यादिना । न चानवस्थाभियाऽज्ञायमानतया करणत्वेनानुपलब्धेर्नानुमानेऽन्त इति वाच्यम्; स्वतःसिद्धसाक्षिप्रसादादेव वृत्तिरूपज्ञानवद्वृत्तिरूपज्ञानाभावात्मकानुपलब्धेरपि सि सत्यामनवस्थाविरहात् । अन्यथाऽनवस्थायास्तवापि दुष्परिहरत्वात् । अनवस्थादुष्प

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दुःस्थताऽभावात् । अन्यथानवस्थायास्तत्रापि दुरुत्तरत्वात् । तथाहि—अनुपलब्धेः सर्वथानवगतत्वे तत्करणत्वस्य दुरधिगमत्वात्तदधिगतिरवश्याश्रयणीया । सापि चेदनुपलम्भान्तरात्सिद्ध्येत्तदपि तथैवेति कथं नानवस्था ? एवं तत्र तत्र प्रमाणानुपन्यासे तत्तदनुपलम्भसत्ताया एवासिद्धिः । प्रपञ्चितं चैतत्पुरस्तात् ।

भवतु वा भिन्ने वानुपलब्धिरनुमानात्तथापि नाभावः प्रमितिकरणम्: विकल्पासहत्वात् । तथाहि—किमुपलब्धेः प्रागभावोऽनुपलब्धिः ? उत प्रध्वंसः ? किं वान्योन्याभावः ? अत्यन्ताभावो वा ? नाद्यः; दृष्टनष्टे घटे उपलब्धिप्रागभावाभावेऽप्यभावप्रमितिदृष्टेः । नापि द्वितीयः; प्रागभावात्यन्ताभावप्रमित्यनुत्पत्तिप्रसङ्गात् । प्रतियोग्युपलब्धेरसञ्जातत्वादेव तत्प्रतियोगिकप्रध्वंसाभावात् । नापि तृतीयः; सत्यपि घटोपलम्भे तदभावप्रतीतिप्रसङ्गात् । नापि चतुर्थः; दृष्टनष्टाद्यभावे प्रमित्यनुदयापत्तेः । एतेनोपलम्भसंसर्गाभावः करणमित्यपि निरस्तम्; तत्रापि प्रागभावादिविकल्पानामप्रतिबद्धप्रसरत्वात्, अन्यतमत्वखण्डनस्य पूर्वमेव कृतत्वात् । नचानुपलब्धेः करणत्वम्; अवान्तरव्यापारानिरूपणात् । नच प्रतियोगिस्मरणमधिकरणग्रहणं वा तद्व्यापारः। ततस्तयोर्भावविषययोरनुपलम्भाजन्यत्वात् । तज्जन्यस्तज्जन्यजनको व्यापार इति हि तद्विदः । केवलानुपलम्भस्य तदजनकत्वेऽपि योग्यताविशिष्टस्यास्त्येव तज्जनकता, तत्तदविनाभूतेतरप्रमाकरणसाकल्यं हि योग्यतेत्यङ्गीकारादिति चेत्; तर्हि भावप्रमितीनामिन्द्रियादिसहकृतभावानुपलम्भकारणजन्यतया

सङ्गमयति—तथाहीत्यादिना । त्वत्पक्षे प्रमाणानुपन्यासे वस्तुसत्ताऽसिद्धिमाह—एवं तत्र तत्रेति । एवंविधाऽनवस्था स्वप्रकाशवादादौ विस्तरेणोपपादितेत्याह—प्रपञ्चितमिति ।

एव प्रौढवादेनानुमानेऽभावप्रमाणमन्तर्भाव्यदूषणमुक्त्वानन्तर्भावेऽपि नैतस्य प्रमाणत्वमुपपादयितुं शक्यमिति भाट्टान्प्रत्याह—भवतु वेत्यादिना । तत्र विकल्पमाह—तथाहीति । चतुर्धाऽभावेषु किंरूपानुपलब्धिः ? घटोपलब्धिप्रध्वंससमये घटोपलब्धिप्रागभावाभावेऽप्यभावप्रमितिदर्शनादित्याह—नाद्यः । उपलब्धिध्वंसोऽभावप्रमितिकरणमितिपक्षं दूषयति—नापि द्वितीयः । तत्र हेतुमाह—प्रागभावेति । अत्यन्ताभावस्य नित्यतया तद्ध्वंसाभावादिति । उपलब्धरन्योन्याभावपक्षं दूषयति—नापि तृतीयः । घटोपलम्भसमयेऽपि तदुपलब्धिघटयोरन्योऽन्याभावस्य सत्त्वेन घटाभावप्रमितिः स्यादित्यर्थः । उपलब्ध्यत्यन्ताभावपक्षे चतुर्थे दोषमाह—दृष्टेत्यादि । दृष्टः सन् यो घटो नष्टः स दृष्टनष्टस्तदभावस्य प्रमितिर्न स्यात् । प्रागभावादिव्यभिचारेऽपि संसर्गाभावस्याव्यभिचारादित्यतोऽतिदिशति—एतेनेति । अतिदेशं विशदयति—तत्रापीति । संसर्गस्य प्रागभावादिविकल्पजालस्य तुल्यत्वादित्यर्थः । किञ्चावान्तरव्यापारानिरूपणादपि नानुपलब्धेः प्रमाकारणत्वं निरूपयितुं शक्यम् । न च प्रतियोगिस्मरणाधिकरणग्रहणयोस्तद्व्यापारत्वमिति वाच्यम्; तयोर्भावविषयकत्वेनानुपलम्भाजन्यत्वात् । अनुपलब्धिजन्यत्वे सत्यनुपलब्धिजन्याभावप्रमितिजनकत्वे सत्येव तयोर्व्यापारत्वेनाभ्युपगन्तुं शक्यत्वादित्याह—तज्जन्य इति । न च योग्यताविशिष्टस्यानुपलम्भस्यैव प्रतियोगिस्मरणादिव्यापारजनकत्वं स्यादिति घटादिप्रतियोगिनस्तदविनाभूतेन्द्रियसन्निकर्षाच्चेतरप्रमाकरणं हि योग्यतेत्यङ्गीकारादिति वाच्यम्; भावविषयप्रमा-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तासु तासु प्रमास्वसाधारणकरणत्वप्रवादः प्रत्यस्तमियात् । कश्चायमनुपलम्भः, प्रमाभावः ? किं वा ज्ञानमात्राभावः ? नाद्यः; इदं रजतमिति रजतारोपस्थ रजताभावप्रमित्यजनक रजतप्रमाभावेऽतिव्याप्तेः अन्यथा रजतारोप एव न स्यात् नापि द्वितीयः; शङ्खधवलिमप्रतिसंधानवतः पीत इति भ्रमानुदयप्रसङ्गात् ।

अपि च यत्राभाव एव लक्षणतो दुर्निरूपः, कुतस्तत्रेदं प्रमाणमिदं प्रमेयमिति विचारावतारः ? तथाहि—कोयमभावः ? (१) भावादन्यो वा ? (२) भावत्वानधिकरणं वा (३) भावविरोधी वा ? (४) भावेन स्वभावप्रत्यासन्नो वा ? (५) नास्तीति प्रत्ययविषयो वा ? (६) प्रतियोगिसापेक्षनिरूपणो वा ? (७) अस्तीति बुद्धेरविषयो वा (८) निर्विकल्पकबुद्धेरविषयो वा ? (९) भावलक्षरहितो वा ? नाद्यः; भावस्यापि भावान्यत्वेनातिव्याप्तेः । न द्वितीयः; अनधिकरणपदेनाधिकरणत्वाभावविवक्षायामात्माश्रयत्वात् । न तृतीयः; किञ्चिद्भावविरोधस्य भावेऽपि सद्भावादतिव्याप्तेः, सर्वभावविरोधित्वस्याभावेऽप्यभावेनासम्भवित्वात् । न खलु घटाभावः सर्वभावविरोधी, सति घटाभावे विश्वाभावप्रसङ्गात् । विरोधिशब्देन च तादात्म्यासहिष्णुत्वविवक्षायां भावेष्वपि भावात् नापि चतुर्थः, समवायादावपि भावात् । नापि पञ्चमः; इह भूतले घटो नास्तीति घटभूतलयोरपि विशिष्टाभावबुद्धिविषयत्वात्, अनुगताकारानिरूपणाच्च । नापि षष्ठः ह्रस्वदैर्घ्यादिष्वपि भावात् । न सप्तमः; घटस्याभावोस्तीत्यभावस्याप्यस्तिप्रत्ययविषयत्वेनासम्भवित्वात् । नाप्यष्टमः; ब्राह्मणत्वादिष्वपि भावात् ।

ज्ञानानामिन्द्रियादिसहकृतभावानुपलब्धिकारणजन्यत्वेन तत्तत्प्रमास्वसाधारणकारणत्वप्रसिद्धिसमाप्ति प्रसङ्गात् । अनुपलम्भ इत्यत्र नञर्थं विकल्प्य दूषयति—कश्चायमिति । अनुपलम्भपदेन प्रमाऽभाव इत्युक्ते इदं रजतमिति रजतभ्रमस्थले रजताभावप्रमितेरजनके रजतविषयकप्रमाया अभावेऽतिव्याप्तिः । अन्यथा=रजतप्रमोत्पत्तिस्वीकारे रजतारोप एव न स्यात् । अनुपलम्भपदेन ज्ञानमात्रस्याभावोक्ते शङ्खधवलिमानं स्मरतः पुरुषस्य पीतः शङ्ख इति भ्रमानुदयप्रसङ्गात् ।

अधुना प्रसङ्गागतोऽभावो दुर्निरूपयितुमारभ्यते—अपिचेत्यादिना । यत्राभावोऽपि दुर्निरूप्यस्तत्र प्रमाणप्रमेयादिविचारस्य का कथेति तावदभावं विकल्पयति—तथाहीति । नवधाविकल्पेषु न तावदाद्यः भावादन्यस्मिन्भाववस्तुन्यतिव्याप्तेः । नापि भावत्वानधिकरणमभाव इति द्वितीयः, आत्माश्रयत्वापत्तेरित्याह—अनधिकरणेति । नापि भावविरोधीति तृतीयः पक्षः, अतिव्याप्तेरसम्भवित्वाच्चेत्याह—किञ्चिद्भावेत्यादिना । भावेऽपि=गोत्वाश्वत्वादावित्यर्थः । असम्भवं संघटयति—न खल्विति । त्रिधापि भावविरोधित्वविवक्षायां भावेष्वतिव्याप्तिरित्याह—विरोधिशब्देनेति । नापि भावेन स्वभावप्रत्यासन्न इति चतुर्थः पक्षः, अनवस्थादिदोषभिया समवायस्य समवायिभ्यां स्वभावव्यतिरेकेण सम्बन्धान्तराभावात्समवायादावपि सत्त्वात् । नापि नास्तीतिप्रतीतिविषयत्वमिति पञ्चमः पक्षः, घटभूतलादिभावेऽतिव्याप्तेरित्याह—इहेत्यादिना । नापि प्रतियोगिसापेक्षनिरूपण षष्ठः पक्षः, ह्रस्वदीर्घत्वादिष्वतिव्याप्तेः । नापि सप्तमः पक्षः, अस्तीति प्रतीतेरविषयत्वे लक्षणस्यासम्भवापत्तेरित्याह—घटस्येति । नापि निर्विकल्पकबुद्धेरविषयत्वमित्यष्टमः पक्षः, ब्राह्मणत्वादि

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

"संस्थानेन घटत्वादि ब्राह्मणत्वादि जन्मतः ।
क्वचिदाचारतश्चापि सम्यग्राजानुपालितात् ॥ (श्लो०वा०वन०२१)
तैलाद्धृतं विलीनं च गन्धेन च रसेन च ।" (श्लो० वा० वन० २७)

इत्यादिन्यायेन तेषामपि सविकल्पकमात्रविषयत्वात् । न च नवमः; राहित्यशब्देनाप्यभावाभिधानादात्माश्रयत्वापत्तेः । किञ्च किञ्चिद्भावलक्षणरहितत्वे च भावेष्वपि प्रसङ्गः, सर्वभावलक्षणरहितत्वशब्देन च सर्वभावलक्षणत्वानधिकरणत्वविवक्षायामेकैकस्यापि भावस्यतत्वादतिव्याप्तिः । सर्वभावलक्षणाभावाधिकरणत्वाभिधाने च तेष्वेव लक्षणाभावेष्वव्याप्तिः । तेषां स्वाधिकरणत्वाभावात् । तेष्वभावान्तराभ्युपगमे चाननुगमप्रसङ्गः ।

किञ्चेदं भावत्वं यदनधिकरणत्वमभावः ? (१) किमस्तीति प्रत्ययविषयत्वम् ? (२) नास्तीति प्रत्ययाविषयत्वं वा ? (३) प्रतियोग्यनपेक्षनिरूपणत्वं वा ? (४) निर्विकल्पबुद्धिबोध्यत्वं वा ? (५) षड्लक्षणलक्षितत्वं वा ? (६) षड्लक्षणान्यतमलक्षणलक्षितत्व वा ? नाद्यः; घटस्याभावोऽस्तीत्यस्तिप्रत्ययविषयत्वेनाभावेऽतिव्याप्तेः । न द्वितीयः; भूतले घटो नास्तीति प्रत्ययविषयस्यापि घटादेर्भावत्वात् । न तृतीयः; प्रतियोग्यपेक्षनिरूपणे ह्रस्वदीर्घत्वादावव्याप्तेः । न चतुर्थः; निर्विकल्पबुद्धेः प्रागूर्ध्वमपि घटादेर्भावात् । तदत्यन्ताभावानधिकरणत्वे चात्यन्ताभाव एवातिव्याप्तिः । तत्राप्यत्यन्ताभावान्तराभ्युपगमे लक्षणस्याननुगमः । न पञ्चमः; षड्लक्षणलक्षितत्वस्य प्रत्येकं द्रव्यादिष्वभावेनाव्याप्तेः । न षष्ठः; अन्यतमत्वस्य प्रागेव निरस्तत्वात् ।

कश्चायं प्रागभावः ? विनाश्यभावः इति चेत्, न; विनाशिशब्देनोत्पत्तिमदभाव-

---

ष्वपि त्वल्लक्षणस्यातिव्याप्तेः । अत्र भट्टपादसम्मतिमाह—संस्थानेत्यादिसार्द्धश्लोकेन । कम्बुग्रीवादिमत्त्वाभिव्यञ्जकसंस्थानेन घटत्वादि, मातृपितृज्ञानतो ब्राह्मणत्वादि, युधिष्ठिरादिसम्यग्राजानुपालितादाचाराच्च निश्चेयम् । तैलाद्भिन्नं विलीनं घृतं गन्धेनाघ्रातेन भक्षितेन रसेन च निश्चीयते । निरुक्तन्यायेन ब्राह्मणत्वादीनामपि सविकल्पकमात्रविषयत्वमित्यर्थः । नापि भावलक्षणरहितत्वमिति नवमः पक्षः, राहित्यशब्देनाप्यभावोक्तावात्माश्रयत्वप्रसङ्गात् । किं चात्र भावलक्षणरहितत्वकल्पे यथायथमतिव्याप्तिरव्याप्तिरसम्भवश्चापि दोषाः सन्तीत्याह—किञ्च किञ्चिदित्यादिना चाननुगमप्रसङ्ग इत्यन्तेन ।

किं चाभावघटकीभूतं भावत्वमपि दुर्निरूप्यमिति षड्धाविकल्पयति—किं च भावत्वमित्यादिना । तत्रास्तीति प्रतीतिविषयत्वं प्रथमलक्षणं घटाभावेऽतिव्याप्तमित्याह—नाद्यः । नास्तीति प्रतीत्यविषयत्वं द्वितीयलक्षणं भूतले घटो नास्तीति प्रतीतिविषयस्य घटादेर्भावत्वेन तत्राव्याप्तम् । प्रतियोग्यनपेक्षनिरूपणीयत्वमिति तृतीयलक्षणं ह्रस्वत्वादावव्याप्तम् । निर्विकल्पकबुद्धिबोध्यत्वमिति । चतुर्थलक्षणं घटादावव्याप्तमित्याह—निर्विकल्पकबुद्धेरित्यादि । कथञ्चित्तत्राव्याप्तिवारणेऽतिव्याप्तिमाह—तदत्यन्ताभावेति । षड्लक्षणलक्षितत्वमिति पञ्चलक्षणं प्रत्येकं द्रव्यादिष्वव्याप्तमित्याह—षड्लक्षणेति । अन्यतमत्वघटितषष्ठलक्षणस्य प्रागेव निरस्तत्वात् ।

एवमभावसामान्यस्य लक्षणं निरस्याभावविशेषस्य लक्षणमपि निराकर्तुमाह—कश्चायमिति ।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वत्त्वाभिधाने लक्षणस्यासम्भवित्वात्। नहि प्रागभावस्य घटव्यतिरेकेणोत्पत्तिमानन्यो भावो निवृत्तिरन्यस्यानुपलम्भात्; 'अपोह्यमाने चाभावे भाव एवावशिष्यते' इत्यभ्युप माच्च। नन्वनिवृत्ते प्रागभावे घटजन्मन एवासम्भवादन्यैव निवृत्तिरभ्युपेया। न वार्तिकवचनविरोधः, निवृत्त्या प्रागभावेऽपोह्यमाने तत्प्रतियोगी घटादिरवशिष्ट एवेत्ययोगव्यवच्छेदपरत्वात्। अन्यथाऽभावापह्नवमात्रेण भावशेषे प्रागभावसमये प्रध्वं सस्यासम्भवात्, प्रध्वंससमये च प्रागभावस्याभावाद्भावावशेषः प्रसज्येत इति चे मैवम्; त्वदुक्तेन न्यायेनानिवृत्ते प्रागभावे तन्निवृत्तेरपि जन्मासम्भवात्, तत्र निवृत्त्यन्तराभ्युपगमे चानवस्थापातात्। तस्मादुभयत्रानुपपत्तिसाम्येऽपि घट एव प्रागभावनिवृत्तिरित्यङ्गीकरणीयम्, कल्पनालाघवात्। तथा चासम्भवित्वदोषस्तदव एव। अस्तु वा प्रागभावस्य घटादन्यैव निवृत्तिस्तथापि प्रध्वंसेऽतिव्याप्तिस्तस्या विनाशित्वात्। न च ध्वस्तस्योन्मज्जनापत्तिः; प्रध्वंसवदेव तत्तत्प्रध्वंसमालाया अ प्रध्वस्तभावविरोधित्वात्। तवापि कथमन्यथा प्रागभावोन्मज्जनप्रसङ्गपरिहारः यत्पुनरुक्तं लीलावतीकारेण—'असम्भवद्विरुद्धधर्मसंसर्गप्रत्यभिज्ञानबाधितत्वात् कल्प नालाघवाच्च न प्रागभावप्रध्वंसयोरुत्पत्तिविनाशौ' इति, तदसत्; कपालचूर्णरजः प्रभृतीनां सम्भवद्विरुद्धधर्मसंसर्गाणां भिन्नतयैव प्रत्यक्षत्वात् त्वदुक्तप्रत्यभिज्ञाया असिद्धेः; प्रत्यक्ष सिद्धे च भेदे कल्पनालाघवन्यायस्यानवसरदुःस्थत्वात्। तथाच पौराणिकमुदाहरणम्

प्रध्वंसवारणाय विनाशिपदम्। घटादिवारणायाभावपदम्। तत्र विनाशिपदेन जन्यत्वविशिष्टाभा वत्त्वोक्तेऽसम्भवापत्तेः। न खलु प्रागभावस्य निवृत्तिर्घटव्यतिरेकेणोत्पद्यमानोऽन्योऽभावोऽनुभ पथमारोहति। भाट्टान्प्रत्याह—अपोह्यमाने चाभावे इति। अभावनिवृत्तौ भाव एवावशिष्यते इ भट्टपादैरभ्युपगमादन्यस्यानुपलम्भाच्च। असम्भवं वारयितुमाह—नन्विति। प्रागभावेऽनिवृ घटजन्मासम्भवाद् घटाद्भिन्नैव प्रागभावनिवृत्तिरभ्युपगन्तव्या। उक्तवार्त्तिकं त्वयोगव्यवच्छेदपर अन्यथा=अभावापलापस्य भावस्वरूपत्वाभ्युपगमे प्रागभावावसरे प्रध्वंसस्यासम्भवात्, प्रध्वंसका च प्रागभावस्याभावाद्भावात्मकप्रतियोगिनोऽवशेषत्वापत्तिरिति चेन्न, त्वदुक्तन्यायेन प्रागभावेऽनिवृ प्रागभावनिवृत्तेरपि जन्मासम्भवात्। तथा चात्माश्रयदोषः। तद्वारणाय कारणभूताद्भिन्नं कार्यभूतानिवृत्तिरित्यभ्युपगमेऽनवस्थापत्तिः। सिद्धान्तिपक्षे कल्पनालाघवमाह—तस्मादुभयत्रेति अतो निरुक्तस्य प्रागभावलक्षणस्यासम्भवित्वमाह—तथाचेति। असम्भवमुपेक्ष्यातिव्याप्तिमाह— अस्तु वेति। तथासति ध्वंसस्यापि विनाशितया तत्रातिव्याप्तिः। न चैवं ध्वस्तस्योन्मज्जना पत्तिरिति वाच्यम्, प्रथमध्वंसवदेव तत्तत्प्रध्वंसपरम्पराया अपि प्रध्वस्तघटादिप्रतियोगिविरोधि त्वात्। अन्यथा तवमतेऽपि प्रागभावप्रतियोगिघटे नष्टे प्रागभावोन्मज्जनप्रसङ्गस्य तुल्यत्वात् अत्र लीलावतीकारमतमनूद्य दूषयति—यत्पुनरित्यादिना-अनवसरदुःस्थत्वादित्यन्तेन। तथा च ध्वंसो नश्येत् कृतकत्वात् प्रागभावोऽपि जायेत विनाशित्वादित्याशङ्क्याह—असम्भवादिति। "यद्वि विरुद्धधर्मसंसर्गासम्भवं तेन प्रत्यभिज्ञानेन निरुक्तानुमानयोर्बाधात्कल्पनालाघवाच्च न प्रागभाव प्रध्वंसयोरुत्पत्तिविनाशौ" इति, मैवं, सम्भवद्विरुद्धधर्मसंसर्गाणां कपालचूर्णादीनां भिन्नत्वे

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'मही घटत्वं घटतः कपालिका कपालिकाचूर्णरजस्ततोऽणुः' इति । उत्पत्तिमानभावो ध्वंस इत्यप्यलक्षणम्; पिण्डादेर्घटप्रागभावत्वेनास्मदभिमतस्योत्पत्तिमत्त्वात्तदतिरिक्तस्य चानुपलब्धेः ।

तादात्म्यप्रतियोगिकोऽभावोऽन्योन्याभाव इत्यपि न; घटपटयोस्तादात्म्यस्यैवाप्रमितत्वेन प्रमितनिषेधनियमवादिनस्तन्निषेधस्याशक्यत्वात् । प्रमिते घटे प्रमितपटत्वप्रतिषेधे च भूतले घटनिषेधवत्संसर्गाभावापत्तेः । प्रतियोग्यनिष्ठो नित्योऽभावोऽन्योन्याभाव इत्यपि न, विकल्पानुपपत्तेः । प्रतियोगिशब्देन किमन्यदुच्यते ? किं वा निरूपकः ? विरोधी वा ? नाद्यः; धर्मिणोऽपि स्वास्मदन्यत्वेनासम्भवित्वात् । धर्मिव्यतिरिक्ते न वर्तत इति विवक्षितमिति चेत्, न; अत्यन्ताभावेऽतिव्याप्तेः । यत्र-यत्र वर्तते तस्यैव धर्मितया ततोऽन्यत्र तस्यावृत्तेः । न द्वितीयः; धर्मिणोऽपि निरूपकतया तत्रावृत्त्यसम्भवात् । धर्मिव्यतिरिक्तनिरूपकावृत्तित्वं विवक्षितमिति चेत् न; धर्मिणोऽपि धर्म्यन्तरादन्यत्वात् । धर्मित्वानधिकरणे न वर्तत इति चेत् न; असम्भवित्वात्, निर्धर्मकस्य वस्तुनोऽसम्भवेन प्रतियोगिनोऽपि धर्मित्वात् । नापि तृतीयः; विरोधस्य दुर्घटतायाः पूर्वमेवाभिहितत्वात् । अस्तु वा यः कश्चिदविचारितरमणीयः प्रतियोगी, तथापीदं भवान्पृष्टो व्याचष्टाम्, किमेको जगत्यन्योन्याभावः ? किं वा बहवः ?

सर्वस्य प्रतियोगित्वाद्दुर्लभा तदनिष्ठता ।
द्विधाप्यात्माश्रयत्वाच्च न स्वशब्दो विशेषणम् ॥ ३७ ॥

त्वदुक्तप्रत्यभिज्ञाऽसिद्धेः, प्रत्यक्षेण भेदसिद्धे कल्पनालाघवन्यायस्यानुपपत्तेश्च । घटादिध्वंसानां नानात्वे विष्णुपुराणसम्मतिमाह—मही घटत्वमिति । एवं प्रागभावलक्षणं प्रदूष्य प्रध्वंसाभावलक्षणमपि दूषयति—उत्पत्तिमानिति । तस्य प्रागभावेऽतिव्याप्तिमाह—पिण्डादेरित्यादि ।

क्रमेणान्योऽन्याभावं दूषयितुं तल्लक्षयति—तादात्म्येति । तन्निषेधति—नेति । अत्राधिकविवक्षया भेदखण्डनप्रस्तावोक्तं स्मारयति—घटपटयोरिति । नहि भवताऽप्रमितप्रतियोगिकनिषेधोऽभ्युपेयते । तथा च प्रमिते घटे प्रमितपटत्वप्रतिषेधे चान्योऽभावाभावापत्त्या भूतले घटो नास्तीति घटनिषेधवत्संसर्गाभावप्रसङ्गः स्यात् । लक्षणान्तरमाशङ्क्य दूषयति—प्रतियोग्यनिष्ठ इति । अत्यन्ताभावेऽतिव्याप्तिवारणाय प्रथमदलम् । प्रागभावप्रध्वंसयोरतिव्याप्तिवारणाय द्वितीयदलम् । नित्यत्वं नामोत्पत्तिविनाशरहितत्वम् । प्रागभावस्योत्पत्तिरहितत्वात्प्रध्वंसस्य विनाशाभावाच्च । द्विधाविकल्प्य तावदाद्यं दूषयति—नाद्य इति । अन्योऽन्याभावस्य धर्मिणोऽपि स्वस्माद्भिन्नत्वेनासम्भवापत्तेः न चानुयोगिव्यतिरिक्तेऽन्योन्याभावो न वर्तत इति विवक्षितमिति वाच्यम्, अत्यन्ताभावेऽतिव्याप्तेः । यत्र यत्रात्यन्ताभावो वर्तते स एव धर्मी, ततोऽन्यत्रात्यन्ताभावस्यावृत्तेरितिभावः । निरूपकत्वं प्रतियोगित्वमितिपक्षेऽसम्भवापत्तिमाह—न द्वितीयः । न च धर्मिभिन्नत्वे सति निरूपकावृत्तित्वमन्योऽन्याभावत्वमिति वाच्यम्; एकस्य धर्मिणो धर्म्यन्तराद्भिन्नत्वात् । न च धर्मित्वानधिकरणेऽवर्तमानोऽभावोऽन्योऽन्याभाव इति वाच्यम्, असम्भवापत्तेः । तमेव विशदयति—निर्धर्मकस्येति । विरोधी प्रतियोगीति पक्षं दूषयति—नापीति । किं सर्वाभावेन ? किं वा किञ्चिदभावेन विरोधीति

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अन्योऽन्याभावस्य सर्वत्रैकत्वे सर्व एव धर्मी सर्व एव प्रतियोगीति कथं तदनिष्ठता सम्भवे बहुत्वेऽपि यत्किञ्चिदपेक्ष्य धर्मिणोऽपि प्रतियोगित्वात्तदनिष्ठत्वासम्भवस्तदवस्थः। स्वप्र योग्यनिष्ठ इति च विशेषणे स्वशब्दाभिधेयस्यान्योन्याभावस्याद्याप्यसिद्धेः कथं नाश्र श्रयः ? एतेन प्रतियोगिनिष्ठोऽभावोऽत्यन्ताभाव इत्यपि निरस्तम्; प्रतियोग्यनिष्ठ णात्। प्रतिपादितन्यायेन सर्वस्य प्रतियोगित्वेनान्योन्याभावस्यापि प्रतियोगिनिष्ठत्व विशेषणवैयर्थ्यात्, प्रागभावप्रध्वंसयोरपि तत्सम्भवादतिव्याप्तेश्च।

किंचाभाव एव दुर्निरूपः, कुतस्तत्र तत्प्रमाणलक्षणभेदाद्भेदचिन्तावतारः ? तथा –यादृशे भूतलादौ धर्मिणि घटाभावोऽभ्युपेयते, तादृशस्यैवाभावव्यवहारनिदानत्वम क्रिमतिरिक्ताभावकल्पनया ? अस्ति तावद्भावाभावोदासीनमाश्रयस्वरूपम्। अन्य कोदृशेऽभावः सम्बध्येत। न तावद्भाववति; भावाभावयोरविरोधापत्तेः। नाप्य भाववति; आत्माश्रयत्वादनवस्थाप्रसङ्गाच्च। ननु किमिदं प्रतिकूलतर्कमात्रम् ? इ विपर्ययपर्यवसायितयोदासीनाश्रयस्वरूपोपस्थापकम् ? नाद्यः; अनुग्राह्यप्रमाणविरहिणस्त र्कस्य साधनबाधनानङ्गत्वात्। न द्वितीयः; सम्बध्यते चाभाव इति विपर्ययपर्यवसानस्य भावमनिच्छतोऽसिद्धेः; सघटं भूतलमिति भावव्यवहारस्यापि प्रतिक्षेपकतया स्वव्याघा करत्वेन जात्युत्तरतापत्तेः। तथाहि–किं भाववति भावः ? किं वा तदभाववति ? इ

विकल्प्य प्रागेव दूषितत्वात्। प्रकारान्तरेण प्रतियोग्यनिष्ठतां दुर्घटयितुमाह—अस्तु वेति। अन्यो न्याभावस्यकत्वं बहुत्वं च दूषयितुं श्लोकेन दूषणं संकलयति—सर्वस्येति। अन्योऽन्याभाव द्विधाप्येकत्वे बहुत्वे च सर्वस्य प्रतियोगित्वात्प्रतियोग्यनिष्ठता दुर्लभा स्यात्। द्वितीये चात्माश्र त्वप्रसङ्गान्न स्वशब्दो विशेषणमिति श्लोकयोजना। श्लोकं विशदयति—अन्योऽन्येति। अत्यन्ता भावलक्षणेऽभ्युक्तं दोषमतिदिशति—एतेनेति। प्रतियोगिपदं यत्किञ्चिन्निष्ठान्योऽन्याभाववारक अतिदिश्यमानं विशदयति—प्रतिपादितेति। अत्यन्ताभावस्य प्रतियोगिनिष्ठत्वविशेषणस्य वैय तल्लक्षणस्य प्रागभावप्रध्वंसाभावयोरपि प्रतियोगिनिष्ठत्वसम्भवादतिव्याप्तिश्च।

अधुना लक्ष्यीभूतेऽभावे प्रमाणं निराचष्टे—किञ्चाभाव एवेति। अभावे प्रमाणाभा संघटयति—तथाहीति। नहि भूतलातिरिक्तमभावस्य किञ्चित्स्वरूपमस्ति। घटाभावस्य भूतल स्वरूपानभ्युपगमे कीदृशे भूतलेऽभावःसम्बध्येतेत्याह—अन्यथेति। घटवति भूतले घटाभावाभ्युप विरोधः, घटाभाववति घटाभावाभ्युपगमे चात्माश्रयत्वमनवस्थाप्रसङ्गश्च। अत्र लीलावतीकारप दूषयितुमुत्थापयति– ननु किमिदमिति। तथा च तावदिदं प्रतिकूलतर्कमात्रोपस्थापकमिति व युक्तम; अनुग्राह्यप्रमाणशून्यस्य तर्कस्य साधनबाधनाङ्गत्वाभावात्। विपर्ययपर्यवसायितां दूषयति– न द्वितीय इति। यद्यत्र भूतलौदासीन्यं न स्यात्तर्हि नाभावो भूतलेन सम्बध्येतेति तर्कः, सम्बध्य चाभावस्तस्मादौदासीन्यमिति च विपर्ययः। सम्बध्यते चाभाव इत्यभावमनिच्छता वक्तुमशक्य अप्रमिताभाववादिमतेऽप्रसिद्धविशेषणतापातादिति भावः। तर्कस्य प्रतिक्षेपकतामुपपाद जात्युत्तरतां विशदयति– किं भाववतीति। न तावद्भाववति भूतले भावो वक्तुं शक्यः, आत्माश्र त्वादनवस्थानाच्च। नाप्यभाववति भूतले भावो वक्तुं युक्तः, विरोधात्। तस्माद्भावाभावाश्र

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विकल्पदूषणयोस्तत्रापि तुल्यत्वादिति चेत्, मैवम्; अस्याः प्राभाकरविभीषिकाया लोकप्रसिद्धभावाभावव्यवहारिणं मायावादिनं प्रत्यनुत्थानात् । तथाह्यवधीरितसत्त्वासत्त्वानां हेत्वादीनां लोकप्रसिद्धं स्वरूपमात्रमुपादाय सर्वोऽयं मायावादिनः प्रमाणप्रमेयव्यवहारः, कस्तत्र परवादिप्रसिद्धं विपर्ययपर्यवसानमाश्रित्य प्रत्यवतिष्ठमानस्योपालम्भसम्भवः ? एतेन भावव्यवहारप्रतिबन्दिग्रहः परास्तः; तत्रापि दुर्घटतायाः स्वीकृतत्वात् । तदेवमवधीरितभावाभावभूतलादेरुपलम्भादेवाभावव्यवहारसम्भवे तदतिरिक्ताभावाभ्युपगमो निष्प्रमाणक एव । ननु कथं निष्प्रमाणकता ? चक्षुश्चाक्षुषभावातिरिक्तग्राहकमिन्द्रियत्वाद् घ्राणवत्, निर्घटं भूतलमिति विज्ञानमेतद्विज्ञानालम्बनभावमात्रातिरिक्तालम्बनमेतद्भावमात्रालम्बननिर्विकल्पकेतरज्ञानत्वात्सघटं भूतलमिति ज्ञानवदिति प्रमाणे जाग्रत इति चेत्, मैवम्; भावातिरिक्तग्राहकं भावातिरिक्तालम्बनमिति च तात्त्विकपदार्थान्तरस्य प्रसाधनम् ? उत व्यवहारिकस्य ? आहोस्वित्साधारणस्य ? आद्ये दृष्टान्तस्य साध्यविकलता, इतरयोश्च सिद्धसाधनता । तदेवं प्रमाणलक्षणानां दुर्निरूपत्वादविचारितरमणीय एवायं प्रमाणव्यवहार इति सिद्धम् ।

करणस्वरूपानिरूपणाच्च प्रमितिकरणं प्रमाणमित्यपि न; तथा हि—किं (१) कारका-

---

मौदासीन्यमेव भूतलं भावाश्रय इति लीलावतीकारपक्षमनूद्य दूषयितुं सिद्धान्ती प्राह—मैवमित्यादिना । तथा च प्रमाणसिद्धमेव साधनं दूषणभूषणाङ्गं, ननु प्रतीतिमात्रसिद्धमिति प्राभाकरीयमतं तत्रेयं प्राभाकरीया विभीषिका दर्शयितुं शक्या, तस्या मां लोकप्रसिद्धभावाभावव्यवहारिणं मायावादिनं प्रत्युत्थापयितुमशक्यत्वात् । तदेव विशदयति—तथाह्यवधीरितेति । एवं जात्युत्तरमपि निराकृतमित्याह—एतेनेति । दृढतरयुक्तिभिस्तात्त्विकाभावप्रतिक्षेपकं प्रसङ्गमुपसंहरति—तदेवमिति । मानमनोहरकारीयमनुमानमभावसाधकं दूषयितुमनुवदति—ननु कथमिति । आद्यानुमानेऽप्रसिद्धविशेषणतावारणाय चाक्षुषग्रहणम् । चाक्षुषत्वानधिकरणं गन्धमादाय दृष्टान्ते साध्यप्रसिद्धिः । अनुमानान्तरमाह—निर्घटमिति । द्वितीयानुमाने भावमात्रत्वानधिकरणमेवैतद्विज्ञानमभावःसिद्धः । सघटं भूतलमिति दृष्टान्ते त्वेतद्विज्ञानालम्बनत्वानधिकरणत्वमादाय साध्यप्रसिद्धिः । निर्घटं भूतलमिति ज्ञानस्यालम्बनभूतो यो भूतलात्मकोऽभावस्तन्निष्ठगुणसामान्यादिश्च तन्मात्रालम्बनं यन्निर्विकल्पकं ज्ञानं तद्व्यतिरिक्तत्वे सति ज्ञानत्वं हेतुत्वं विवक्षितम् । अत्राप्रसिद्धविशेषणतावारणाय साध्यशरीरे एतद्विज्ञानपदम् । एतद्विज्ञानालम्बनीभूतभूतलादिर्निर्विकल्पके व्यभिचारवारणाय निर्विकल्पकेतरेतिपदम् । घटादिव्यभिचारवारणाय ज्ञानपदम् । अत्र साध्यं विकल्प्य दूषयति—मैवमित्यादिना । निरुक्तानुमानाभ्यां तात्त्विकं पदार्थान्तरं सिसाधयिषति ? व्यावहारिकम् ? उतोभयसाधारणम् । नाद्यः, दृष्टान्ते साध्यवैकल्यात् । नापि द्वितीयतृतीयौ, सिद्धसाधनत्वात् । प्रमाणखण्डनोपयोगं दर्शयति—तदेवमिति । तस्मान्नवास्तवाद्वैतागमस्य तद्विरोध इति सिद्धम् ।

पुनरपि प्रमाणान्तर्गतं करणं खण्डयति—करणेति । न केवलं प्रमितेरनिरूपणात्करणलक्षणं निराकृतमपितु किरणस्वरूपमपि निरूपयितुं दुःशकम् । तथाहि प्रमितिकरणं प्रमाणमित्यत्र करणलक्षणं सप्तधाविकल्प्य न तावत्कारकान्तरेऽचरितार्थं कारकं करणमिति करणलक्षणं युक्तम् । अत्र

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

न्तरेऽचरितार्थं कारकं करणम् ? उत (२) अयोगव्यवच्छेदेन फलसाधनम् ? (३) कर्तृ-व्यापारगोचरो वा ? (४) व्यापारवत्त्वे सति फलाव्यभिचारि वा ? (५) चरमव्यापा-वा ? (६) अनन्तरफलं वा ? (७) यदभावात्कर्तृकर्मणी क्रियां न जनयतस्तद्वा ? नाद्यः कुठारादौ कारकान्तरे चरितार्थस्य हस्तादेरकरणत्वप्रसङ्गात् । न च तदकरणमेव; करे-कुठारेण देवदत्तश्छिनत्तीति करकुठारयोः करणत्वप्रसिद्धेस्तुल्यत्वात् । अन्यथा कर्मक-करणसम्प्रदानापादानाधिकरणेष्वनन्तर्भावाद्धस्तादेः सप्तमकारकत्वाङ्गीकारापत्तेः । कार-कान्तर इत्यत्रान्तरशब्देन करणं वा ? कर्तृकर्मणी वा विवक्ष्येते ? न तावत्करण-करणस्यैवाद्याप्यसिद्धेरात्माश्रयत्वात् । नेतरे, तयोरेवातिव्याप्तेः । न हि कर्ता कर्तरि च-रितार्थः, नापि कर्मणि कर्म; तयोः करणे चरितार्थत्वाङ्गीकारात् । नापि द्वितीय-सामग्र्यामतिव्याप्तेः । तस्यां सत्यां नियमेन फलस्य भावात् । अपूर्वादिव्यवहितफल-यागादेरकरणत्वापत्तेश्च । न तृतीयः; कर्तुरात्मनः प्रयत्नाख्यव्यापारकर्मणि शरीरे तदव्या-पाराकरणे लक्षणस्य सद्भावात् । साक्षादिति विशेषणे च आत्मनो मनश्चालनव्यापा-मनसः करणत्वप्रसङ्गः । न च तत्र मनः करणम्; तद्व्यापारे कर्मतयैवावस्थानात् । हस्ता-दिव्यापारव्यवधानेन कर्तृव्यापारगोचरे कुठारादावव्याप्तेश्च । न चतुर्थः; कर्तुरपि करणत्व-प्रसङ्गात् । तस्यापि करणादिव्यापारवत्तः फलाव्यभिचारित्वात् । अव्यवहितफलादर्श-नान्न तस्य फलाव्यभिचारितेति चेत्, न; हस्तादेर्यागादेश्च व्यवहितफलस्याकरणत्वाप-तात् । एतेन पञ्चमषष्ठविकल्पावप्यपास्तौ; चतुर्थपक्षोक्तदोषानुषङ्गादेव । ना-

---

कर्तृकर्माधिकरणवारणाय कारकान्तरेऽचरितार्थमिति पदम् । सर्वासु क्रियासु नियतत्वं कर्त्रादीनां, सम्प्रदानापादानयोर्न सर्वत्र नियतत्वं, तथापि तयोरतिव्याप्तिवारणाय कारकमिति पदम् । आद्यं दूषयति—नाद्य इति । तत्र हस्तादावव्याप्तिमाह—कुठारादाविति । इष्टापत्तिं दूषयति—न च तदिति । हस्तादौ करणत्वानङ्गीकारे सप्तमकारकत्वप्रसक्तिमाह—अन्यथेति । समुदायं प्रदूष्यावयवं दूषयति—कारकान्तर इति । करणलक्षणान्तर्गतान्तरशब्देन करणविवक्षा न युक्ता; तस्यैवाद्याप्य-सिद्धत्वेनात्माश्रयत्वात् । नापि कर्तृकर्मणी विवक्ष्येते; तयोरेवातिव्याप्तेः । तामेव संघटयति—नहीत्यादिना । अयोगव्यवच्छेदेन फलसाधनं करणमिति द्वितीये कल्पे सामग्र्यामतिव्याप्तिरपूर्वादि-व्यवहितफलके यागादावव्याप्तिश्च । नापि कर्तृव्यापारगोचरः करणमिति तृतीयं लक्षणं युक्तं, शरीरचलनायात्मनिष्ठप्रयत्नाख्यव्यापारे तद्विशिष्टशरीरे चातिव्याप्तेः । तयोः कर्तृविषयत्वेऽपि न करणत्वमभ्युपेयते । यद्यपि साक्षात्कर्तृव्यापारविषयत्वविवक्षायां नोक्तकर्मणि तद्विशिष्टशरीरे वातिव्याप्तिस्तथापि मनसि मानसक्रियाकरणत्वापत्तिः । न च तत्र मनः करणं, मानसव्यापारे मनसः कर्मतयैवावस्थानात् । कुठारादावव्याप्तिं चाप्याह—हस्तादीति । नापि व्यापारवत्त्वे सति फलाव्यभिचारित्वं करणत्वमिति चतुर्थकल्पो युक्तः, कर्तुरपि करणादिव्यापारवत्त्वे सति फलाव्यभिचारित्वेन करणत्वप्रसङ्गात् । फलव्यापारयोरव्यवहितत्वविवक्षायां हस्तादौ यागादौ चाव्याप्तिमाह—अव्यवहितेत्यादिना । चरमव्यापारमनन्तरफलमिति पञ्चमषष्ठपक्षयोरपि चतुर्थ-पक्षोक्तं दोषमतिदिशति—एतेनेति । नापि यदभावात्कर्तृकर्मणी क्रियां न जनयतस्तदिति सप्तम-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दृष्टेश्वरेच्छादेरपि करणत्वप्रसङ्गात् । तद्भाव एव क्रियानिष्पत्तेः । तदेवं करणानिरुक्तेः प्रमाकरणं प्रमाणमित्यलक्षणम् ।

अथाधुनिकनीत्या कर्तृत्वानधिकरणत्वे सति प्रमासार्वत्रिकं कारकं प्रमाकरणम् । न च कर्तृत्वानिरुक्तिः, प्रयत्नात्यन्ताभावानधिकरणत्वस्य तत्त्वात् । नापि सार्वत्रिकत्वानिरुक्तिः । प्रमाकारकाप्रमाकारकावृत्तिप्रमाकारकनिष्ठात्यन्ताभावाप्रतियोगित्वस्यैव सार्वत्रिकत्वपदेनाभिलापात् । न च कारकत्वानिरुक्तिः; व्यापारवत्कारणं कारकमिति निर्वचनात् । न च व्यापारानिरुक्तिः; तज्जन्यस्तज्जन्यजनको व्यापार इति हि तन्निरुक्तेरिति मतम्, मैवम्; सर्वस्योदीरितखण्डनालङ्घनाऽजङ्घालत्वात् । तथा हि—न तावत्प्रयत्नात्यन्ताभावानधिकरणत्वम्, विकल्पासहत्वात् । प्रयत्नात्यन्ताभावः किमेकः? अनेको वा? एकत्वे तत्रैवातिव्याप्तिः; तस्य तदनधिकरणत्वेऽपि कर्तृत्वाभावात् । नापि भावत्वे सतीति विशेषणाददोषः, भावत्वस्य प्रागेव निरस्तत्वात् । अत्यन्ताभावानामनेकत्वेऽपि सर्वप्रयत्नात्यन्ताभावानधिकरणत्वं लक्षणम् ? उत यत्किञ्चित्प्रयत्नात्यन्ताभावाधिकरणत्वम् ? न प्रथमः, लक्षणस्यासम्भवित्वात् ; स्वप्रयत्नात्यन्ताभावानधिकरणत्वेऽपि चेतनान्तरप्रयत्नात्यन्ताभावाधिकरणत्वात् । न चरमः; प्राचीनदोषानुषङ्गात् । किञ्चैकदेशवृत्तीनां संयोगविभागशब्दात्मविशेषगुणा-

---

लक्षणं युक्तम्; अदृष्टेश्वरेच्छादौ कर्तृकर्मणोश्चातिव्याप्तेः । तयोरपि स्वाभावे क्रियाजनकत्वाभावात् । सोपयोगं करणलक्षणनिराकरणमुपसंहरति—तदेवमिति ।

सम्प्रति नवरीत्यापि करणलक्षणोक्तौ न दोषानतिक्रामतीत्याह—अथाधुनिकेति । इदं च जीवप्रमाणलक्षणम् । सार्वत्रिककर्तृकारकेऽतिव्याप्तिवारणाय प्रथमदलम् । कर्मण्यतिव्याप्तिवारणाय चरमदलम् । नहि सर्वा प्रमा कर्मजन्या, अनुमित्यादिषु कर्माभावादित्यर्थः । अवयवशोऽपि चिन्तनं दोषवैशद्याय पूर्वपक्षी कुरुते—न च कर्तृत्वेत्यादिना । तत्रापि सुषुप्तिप्रलयादावव्याप्तिवारणायात्यन्ताभावानधिकरणपदम् । प्रमायां कारकस्य सार्वत्रिकतां निर्वक्ति—प्रमाकारकेति । प्रमाकारकाप्रमाकारकोभयोरवृत्तित्वे सति प्रमाकारकानुयोगिकात्यन्ताभावाप्रतियोगित्वं सार्वत्रिकत्वमित्यर्थः । प्रमेयत्वादिवारणाय—प्रमाकारकेत्यादि । प्रमेयत्वादेः सर्ववृत्तितया प्रमाकारकेन्द्रियादिवृत्तित्वे सत्यप्रमाकारकदोषादिवृत्तित्वमिति । प्रमाकारकादिराहित्यविशेषणोपादाने प्रमेयत्वादावतिव्याप्तिवारणं भवति । तावन्मात्रोक्तौ च प्रमाकारकैकदेशवृत्तिषु तत्कादाचित्कवृत्तिषु चाप्रमाकारकवृत्तिषु चातिव्याप्तिः स्यात्तद्वारणाय द्वितीयदलम् । कारकत्वं च व्यापारवत्कारणमिति निरुक्तेः । तज्जन्यत्वे सति तज्जन्यजनकत्वमिति व्यापारनिर्वचनम् । कारकवारणाय तज्जन्येति । क्रियायामतिव्याप्तिवारणाय तज्जन्यजनकेति । एवं करणलक्षणमुपपाद्य दूषयति—मैवमिति । आधुनिकोक्तलक्षणस्य कथितमहासागरतटे प्राप्तुमशक्यत्वं संघटयति—तथा हीति । प्रयत्नात्यन्ताभावस्यैकत्वेन स्वाधिकरणत्वाभावादित्यर्थः । प्रयत्नात्यन्ताभावेऽतिव्याप्तिः । तत्र हेतुमाह—तस्येति । भावत्वस्य प्रागेव निरस्तत्वान्न तद्विशेषणं दोषवारकम् । अत्यन्ताभावानामनेकत्वेऽसम्भवित्वमुपपादयति—स्वप्रयत्नेति । नह्येकस्यैव सर्वपुरुषप्रयत्नाः सम्भवन्ति, सर्वेषु सर्वशक्तित्वप्रसङ्गात् । चरमकल्पे प्राचीनदोषानुषङ्गमाह—न चरम इति । किञ्च स्वीयसिद्धान्तविरुद्धं कर्तृलक्षणमाह—किञ्चेति ।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नामव्याप्यवृत्तित्वं नाम स्वात्यन्ताभावसमानाधिकरणत्वमित्युपगच्छतां कथमात्म प्रयत्नात्यन्ताभावानधिकरणत्वं सम्भवेत् ? प्रयत्नात्यन्ताभावस्यापि तत्रैव वृत्तेः। न स्वतन्त्रः कर्तेत्यपि युक्तम्; स्वातन्त्र्यानिरुक्तेः । तथाहि—किं कारकान्तरनिरपेक्षतया फलजनकत्वं स्वातन्त्र्यम् ? किं वा कारकाप्रयोज्यत्वे सति तत्प्रयोक्तृत्वम् ? नाद्यः; असम्भवात्, न हि करणादिनिरपेक्षस्य कर्तुः फलसाधकता दृष्टचरी। न द्वितीयः; सेश्वरवादे सर्वचेतनानामीश्वरप्रयोज्यत्वात् । अनीश्वरवादेऽपि राजादिप्रेरितभृत्यादेरकर्तृत्वापत्तेः न च तत्र शरीरादेरेव प्रेर्यत्वम्, नात्मन इति वाच्यम्; चेतनविशिष्टस्य शरीरस्य प्रेर्यत्वे चेतनस्यापि प्रेर्यत्वात् प्रेरकत्वं च तदनुकूलप्रयत्नाधारत्वम्, तच्चेश्वरे जीवविषयमस्त्येव । न चेश्वरव्यतिरिक्तकारकाप्रयोज्यत्वम्; अनीश्वरवादे विशेषणवैयर्थ्यात्, भृत्यादेस्तु पूर्वोक्तन्यायेनाकर्तृत्वप्रसङ्गाच्च । प्रमात्वानिरुक्तेरेव तद्विशेषितसार्वत्रिकत्वानिरुक्तिः । तज्जन्यस्तज्जन्यजनको व्यापार इत्यपि न; तच्छब्देन सर्वस्य कारणस्याभिधाने लक्षणस्यासम्भवित्वात् । न ह्येको व्यापारः सर्वकारणजन्यः, सर्वकारणजन्यजनको वा। कारणविशेषाभिधाने तु लक्षणस्याननुगमः । तदेवं प्रत्यक्षादिप्रमाणानां दुर्निरूपत्वाज्जगत्कारणब्रह्मात्मतत्त्वप्रतिपत्तिपराणां वेदान्तवचसां न तद्विरोधगन्धोपीति सिद्धम् ।

ननु तथापि न ब्रह्मणो जगत्कारणत्वम्, परमाणूनामेव जगत्समवायिकारणत्वात्। ननु परमाणव एव न सन्ति, प्रमाणविधुरत्वात् । न तावदणुपरिमाणतारतम्यं क्वचिद्विश्रान्तम्; परि

प्रसङ्गागतं कर्तृलक्षणान्तरमपि निरस्यति—न च स्वतन्त्र इति। स्वातन्त्र्यानिरुक्तिं विकल्प्य दूषयति—तथाहि किमिति। तत्प्रयोक्तृत्वं=कारकप्रयोक्तृत्वमित्यर्थः। आद्येऽसम्भवं विशदयति—नहीति। द्वितीये तार्किकमतेऽस्मदादिकर्तृत्वव्याप्तिमाह—सेश्वरेति। अनीश्वरवादेऽपि भृत्यादिकर्तृत्वाव्याप्तिरित्यर्थः। चेतनविशिष्टस्य शरीरस्य प्रेर्यत्वेन चेतनस्यापि प्रेर्यत्वं सुतरां सिद्धम् प्रेरकत्वं चेति=भृत्यदेहप्रेरणानुकूलभृत्यनिष्ठप्रयत्नोत्पत्त्यनुकूलप्रयत्नवत्त्वं प्रेरकत्वं यथा लोके राजनि, तथा जीवप्रयत्नजननानुकूलं प्रयत्नवत्त्वात्मकं प्रेरकत्वमीश्वरेऽपि सम्भवतीति भावः। न चेश्वरभिन्नकारकाप्रयोज्यत्वं स्वातन्त्र्यमिति वाच्यम्; अनीश्वरवादे विशेषणवैयर्थ्यात्, पूर्वोक्तरीत्या भृत्यादेरव्याप्तेश्च । प्रमासार्वत्रिकत्वनिर्वचनमपि दूषयति—प्रमात्वेति । व्यापारलक्षणमपि दुष्टमित्याह—तज्जन्येति। तच्छब्देन कारणमात्राभिधानेऽसम्भवम्, कारणविशेषाभिधाने लक्षणानुगमाभावश्च । एवं सामान्यतो विशेषतश्च प्रमाणानां दुर्निरूपताप्रतिपादनस्योपयोगं विरोधपरिहरमाह—तदेवमिति।

ब्रह्मात्मतत्त्वं जगत्कारणममृष्यमाणा वैशेषिकादयोऽधुना प्रत्यवतिष्ठन्ते—ननु तथापीति। परमाणूनामेव जगत्समवायिकारणत्ववादिमते नेश्वरस्य जगत्कारणत्वाभ्युपगमस्य वैयर्थ्यम्, तस्य निमित्तकारणत्वाभ्युपगमात् । ननु न लोकसिद्धं परमाणुकारणत्वमादाय ब्रह्मकारणत्वं निराकर्तुं शक्यम्, तथासति विप्रतिपत्त्यभावप्रसङ्गात् । नापि वादिसिद्धं तथात्वं, तथात्वे कस्यचित् प्रमाणस्यासम्भावित्वादित्याक्षिपति—नन्विति। परमाणुसिद्धौ प्रयोगमाह—न तावदणु

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

माणतारतम्यत्वात्। महत्परिमाणतारतम्यवदित्यनुमानं मानम्; अणुपरिमाणशब्देनाणुनिष्ठ-परिमाणविवक्षायां त्वदभिमताणूनामेव सिद्धौ तत्परिमाणस्य तत्तारतम्यस्य वाऽप्रसिद्धत्वा-दाश्रयासिद्धेः, तेषु परिमाणतारतम्यानङ्गीकाराच्च । महत्त्वापकर्षतारतम्यस्य च क्वचिद्विश्रान्तिसाधने त्रसरेणुष्वेव तद्विश्रान्तिसिद्धेः सिद्धसाधनत्वात् ।

"जालान्तरगते भानौ योऽणीयो दृश्यते रजः ।
परं तत्परमाणूनां परिमाणं प्रचक्षते ॥" इति

ब्रह्माण्डपुराणे दर्शनादिति चेत्, मैवम्, त्रसरेणुः सावयवश्चाक्षुषद्रव्यत्वान्महत्त्वे सति क्रियावत्त्वाद्वा घटवदिति सावयवत्वानुमाने महत्त्वापकर्षस्य तत्र विश्रान्त्यनुपपत्तेः । पृथिवीत्व नित्यवृत्ति घटवृत्तिजातित्वे सति पटवृत्तिजातित्वात्सत्तावत् । अयं घट एतदति-रिक्तानित्यमूर्तातिरिक्तमूर्तान्यः, प्रमेयत्वात्पटवदिति प्रयोगसम्भवाच्च । नच निरवयवयोः संयोगाभावादसमवायिकारणभावे कथं कार्यद्रव्यारम्भकत्वमिति वाच्यम्; परमाण्वसिद्धौ तत्पक्षीकारेणासंयोगित्वस्य साधयितुमशक्यत्वात्; सिद्धौ च धर्मिग्राहकप्रमाणबाधात्, द्रव्य-त्वेन घटादिवत्संयोगित्वानुमानाच्च । न च सावयत्वमुपाधिः, अर्थतः पक्षेतरत्वात् । कार्य-

---

परिमाणेति । अत्रानुमानेऽणुपरिमाणशब्देनाणुनिष्ठपरिमाणविवक्षायामाश्रयासिद्धिमाह—त्वदभि-मतेति । अणुषु परिमाणतारतम्यं न तवाप्यभिमतम् । महत्त्वपरिमाणापकर्षतारतम्यस्य निरुक्ता-नुमानेन क्वचिद्विश्रान्तिसाधने त्रसरेणुः तथासिद्धे सिद्धसाधनत्वात् । अत्र पुराणवचनप्रमाणमाह—जालान्तरेति । जालम्=वातायनम् । भानुः=किरणः । त्रसरेणुष्वेव परिमाणापकर्षं प्रचक्षते । तार्किकाः सिद्धसाधनतां प्रतिक्षिपन्तः पूर्वानुमानं समर्थयति—मैवमिति । त्रसरेणूनां सावयवत्वेन तत्र महत्त्वपरिमाणापकर्षतारतम्याभावमनुमानेन साधयितुं परमाणून् प्रमाणयति—त्रसरेणुरित्यादिना । प्रथमानुमाने रूपादौ व्यभिचारवारणाय द्रव्येतिपदम् । आत्मादौ व्यभिचारवारणाय चाक्षुषग्रहणम् । द्वितीयानुमानस्य हेतौ परमाणुवारणाय सत्यन्तदलम् । विभुद्रव्यवारणाय हेतौ विशेष्यदलम् । अनेन परमाणुषु त्रसरेण्ववयवत्वं प्रसाधितं, सम्प्रतिसाक्षात्परमाणुसाधकं सर्वदेवीयमनुमानमाह—पृथिवीत्वमिति । जातित्वे सतित्युक्ते संयोगत्वकर्मत्वादौ व्यभिचारस्तद्वारणाय घटवृत्तीतिपदम् । तथात्वे घटत्वेऽनैकान्तिकतावारणाय पटग्रहणम् । एवं पटत्वेव्यभिचारवारणाय घटग्रहणम् । महाविद्यानुमानमप्याह—अयं घट इति । एतद्घटातिरिक्तत्वे सति यदनित्यं मूर्त्तं तत्त्वानधिकरणं यन्मूर्त्तं ततोऽन्य इति साध्यपदार्थः । एतद्घटातिरिक्तमनित्यं मूर्त्तं पटादि ततोऽन्यः पक्षीभूत एतद्घटः तस्मादन्यः पट इत्यतो दृष्टान्ते साध्यप्रसिद्धिः । तत्र दृष्टान्ते एतद्घटातिरिक्तप्रभावादेव साध्यप्रसिद्धिः सम्भवति, किन्तु पक्षे एतद्घटे नैतद्घटातिरिक्तत्वमस्ति । अतः पक्षे साध्यसिद्धये नित्यं द्रव्यमवश्यमभ्युपेयम् । तस्मादेवैतदतिरिक्तादनित्यमूर्त्तंपटादतिरिक्तं नित्यं मूर्तं द्रव्यं ततो भिन्नः पक्ष इति साध्यसमन्वयः । समवायिकारणासमवायिकारणाभ्यां कार्यद्रव्यं प्रारभ्यते । न च, निरवयवयोः परमाण्वोः संयोगः सम्भवति, संयोगरूपासमवायिकारणाभावे कथं परमाण्वोः कार्यद्रव्यारम्भकत्वमिति वाच्यम्; निरवयवपरमाण्वनङ्गीकारे पक्षाभावात्तत्रासंयोगित्वस्य साधयितुमशक्यत्वात्, अङ्गीकारे च धर्मिग्राहकप्रमाणबाधात् । एवं बाधकं निरस्य तत्संयोगित्वे साधकं प्रमाणमाह—द्रव्यत्वेनेति ।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

द्रव्यत्वं वा समवेतत्वे सति द्रव्यत्वं वा सावयवत्वम्। तथा च द्रव्यत्वेनैव साध्यव्या- सिद्धायां कार्यपदस्य समवेतपदस्य च जन्यत्वेन सकर्तृकत्वानुमाने शरीरिजन्यत्वो- शरीरिपदस्येव साधनाव्यापकत्वमात्रप्रयोजनस्योपादाने कथं न पक्षेतरता? साध्यव्या- सत्यां साधनाव्याप्त्यर्थं यत्र विशेषणमुपादीयते, स पक्षेतर इति तल्लक्षणात्। न च द्विती- योगासम्भवात्प्रथिमानुपपत्तिर्दोषः; द्व्यणुके प्रथिमाभावसाधने दोषाभावात्, तस्याणुत्वा- त्र्यणुके तु कारणबहुत्वादेव महत्त्वोपपत्तिः, द्व्यणुकानां सावयवत्वेन संयोगोपपत्तिश्च।

न चावयविन एवाभावात्तदारम्भानुपपत्तिः; एकस्थूलनीलावभासो बाह्ये प्रमा- त्वाद्रूपदर्शनवदित्यवयविसिद्धेः। न चार्थान्तरता; विकल्पासहत्वात्। तथाहि- परमाणुसमूहालम्बनत्वमभिप्रेतम्? उतावयवसंहतिगोचरत्वम्? नाद्यः; परमाणूनामती- याणामस्मदादिप्रत्यक्षगोचरताऽयोगात्। नापि द्वितीयः; अवयवानामनेकत्वादेक- प्रत्ययगोचरत्वासम्भवात्। समुदायस्यैकत्वाददोष इति चेत्, न; तस्यावस्तु वाद; वस्तु- च तस्यैवावयवित्वात्; संज्ञामात्रे विवादः स्यात्। यत्प्रकाशते तज्ज्ञानं यथा ज्ञान- प्रकाशते च विवादाध्यासितमित्युनुमानात्सर्वस्य विज्ञानमात्रत्वसिद्धौ साध्यविक- दृष्टान्त इति चेत्; न, उभयवादिसम्प्रतिपन्नस्य धर्मिणोऽभ्युपगमेऽपसिद्धान्तापत्तेः, अन-

---

तथा च परमाणवः, संयोगवन्तो, द्रव्यत्वात्, घटवदित्यनुमानेन परमाणुषु संयोगित्वं साध- शक्यम्। न चात्रानुमाने सावयवत्वमुपाधिरिति वाच्यम्, तस्यार्थतः पक्षेतरत्वेनोपाध्यनर्हत्वा- यथा—क्षित्यङ्कुरादिकं सकर्तृकं कार्यत्वाद् घटवदित्यनुमाने शरीरिजन्यत्वं नोपाधिः, तस्य वि- भागजन्यमात्रोक्तौ दृष्टान्ते साध्यव्यापकत्वसिद्धे शरीरिग्रहणं विशेषणं केवलं पक्षीकृताङ्कुरा- साधन यापकत्वपरिहारार्थमिति पक्षेतरत्वम्। एवं सावयवत्वं नाम कार्यद्रव्यत्वं वा समवेतत्वे- द्रव्यत्वं वा। तत्र दृष्टान्ते घटे संयोगित्वसाध्यस्य व्यापकं द्रव्यत्वमात्रमिति सिद्धे कार्यत्वं समवे- वा निरुक्तोपाधिविशेषणं पक्षीकृतपरमाणुषु साधनव्याप्तिवारणार्थं तस्मात्पक्षेतरत्वं तदितिभा- पक्षेतरत्वस्य लक्षणमाह—साध्यव्याप्ताविति। न च निरवयवस्य परमाणोः संयोगे सत्येकेन- माणुना संयुक्ते परमाणौ परमाणवन्तरसंयोगो न स्यात्, निरवयवस्य संयुक्तप्रदेशातिरिक्त- भावात्, तावन्मात्रे एव द्वितीयसंयोगेऽपि तदारब्धकार्ये पृथुत्वं न स्यादिति वाच्यम्। द्व्यणु- णुत्वाभ्युपगमेनेष्टत्वात्, त्र्यणुकादौ कारणबहुत्वादेव महत्त्वोपपत्तेश्च। त्र्यणुकसमवायिका- द्व्यणुकानां सावयवत्वेन संयोगोपपत्तौ न कापि हानिः।

अवयविनां निष्प्रमाणतामाशङ्क्य परिहर्तुमाह—न चावयविन इति। अवयविसद्भावे प्र- मनोहरकारायमनुमानमाह – एकेत्यादि। एकं, स्थूलं, नीलं चेत्यवभासो विज्ञानाद्बहिर्भूते प्रमेय- सौगतमते विज्ञानस्य स्वग्राहकत्वेनार्थान्तरतावारणाय बाह्यपदम्। अत्रार्थान्तरतावारणाय विकल्पा- तथाहीति। निरुक्तप्रतीतिः परमाणुसमूहं गोचरयति चेत्तर्हि परमाणूनामतीन्द्रियाणामस्मदा- प्रत्यक्षगोचरत्वं न स्यात्। अवयवसंघातविषयत्वं वारयति—नापि द्वितीयः। समुदायस्य तत्प्रती- विषयत्वं दूषयति—तस्यावस्तुत्वादिति। वस्तुत्वेऽवयवित्वाततिरिक्तत्वात्संज्ञामात्रे विवादः स्या- विज्ञानवादी निरुक्तानुमाने दृष्टान्तस्य साध्यवैकल्यं शङ्कते—यत्प्रकाशते इति। विज्ञानाति-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पगमे चाश्रयासिद्धिः। यत्प्रकाशते तदुभयवादिसिद्धं कविज्ञानमात्रम्, प्रकाशते च विवादाध्यासितमिति ज्ञानाद्वैतप्रसञ्जकतयाऽऽभाससमानयोगक्षेमत्वाच्च। न च कम्पाकम्पावृतत्वानावृतत्वरक्तत्वारक्तत्वलक्षणविरुद्धधर्मसंसर्गात्तदाश्रयस्यैकत्वानुपपत्तिः; अवयवानां कम्पे तदावरणे तद्रक्तत्वे चावयविनोऽतद्रूपत्वेनैकस्य विरुद्धधर्मसंसर्गासिद्धेः। न चावयवावयविनोश्चलाचलयोर्युतसिद्धिप्रसङ्गः; विकल्पासहत्वात्। (१) किं भेदो युतसिद्धिः? (२) किं वा पृथगाश्रयाश्रितत्वम्? (३) पृथक्क्रियावत्त्वं वा? (४) परस्परसंयोगविभागवत्त्वं वा? न प्रथमः; अवयवावयविनोर्भेदाभ्युपगमेन सिद्धसाधनत्वात्। अत एव न द्वितीयः; अवयविनोऽवयवाश्रयत्वेप्यवयवानां स्वारम्भकावयवाश्रितत्वात्। न तृतीयः; पृथक्क्रियावत्त्वस्योभयोरिष्टत्वात्, एकद्रव्यं कर्मेति सूत्राच्च। न चतुर्थः; चलाचलयोरपि घटहिमाचलयोः परस्परसंयोगविभागानधिकरणत्वात् अवयवावरणेऽवयविनोऽनावरणपूर्ववत्कृत्स्नप्रतीतिः स्यादिति चेत्, सत्यम्; कृत्स्नः प्रतीयत एव तस्यैकत्वात्। तथात्वे द्विहस्तत्वादि किमिति न प्रतीयत इति चेत्; तदुचितावयवसन्निकर्षस्य तत्प्रतीतिहेतोरभावात्। रक्तत्वं तु महारजनादेरेव द्रव्यान्तरस्य नाप्यवयवानामिति दूरनिरस्तो विरुद्धधर्मसंसर्गः। तथापि तत्संयोगाद्रक्तिमप्रतीतिः सर्वत्र किं न स्यादिति चेत्, न; संयोगस्याव्याप्यवृत्तित्वात्।

नन्ववयवेषु वर्तमानोऽवयवी किं वा कात्स्न्र्येन वर्तते? उतैकदेशेन? नाद्यः; शृङ्गेणापि

रूपाद्यभ्युपगमेऽपसिद्धान्तापत्तिरन्यथाश्रयासिद्धिश्चेत्याह—उभयेत्यादि। आभाससमानक्षेमतामाह—यत्प्रकाशते इति। विज्ञानवादिनोऽनेकानि विज्ञानानि मन्यन्ते, तेष्वेकत्वसाधनं यथानुमानाभासस्तथैव ज्ञानमात्रसाधनमपि। न च कम्पादिविरुद्धधर्माणां संसर्गात्तदाश्रयस्यैकत्वानुपपत्तिः, अवयवेभ्योऽवयविनो भिन्नत्वात्। कम्पादिविरुद्धधर्माणां भागनिष्ठत्वात्। न चावयवेषु चलनादिकमवयविष्वचलनादिकं चेत्युभयरूपताभ्युपगमे तयोर्युतसिद्धित्वप्रसङ्ग इति वाच्यम्; विकल्पासहत्वात्। विरुद्धधर्मवत्त्वेऽपि चतुर्धा विकल्प्य युतसिद्धिं वारयति—नाद्यः, अनयोर्भेदाभ्युपगमेन सिद्धसाधनत्वात्। द्वितीयेऽतिदिष्टं सिद्धसाधनत्वं विशदयति—अवयविन इति। उभयोः पृथक्क्रियावत्त्वस्येष्टत्वे (एकद्रव्यं कर्मेति वै० १।१।१७) सूत्रं प्रमाणमाह—न तृतीय इत्यादिना। एकमेव द्रव्यं समवायिकारणं यस्य कर्मणस्तदेकद्रव्यमिति सूत्रार्थः। परस्परसंयोगविभागवत्त्वं युतसिद्धत्वमिति पक्षं दूषयति—न चतुर्थः। चलाचलत्वाभ्यां संयोगविभागवत्त्वापादने व्यभिचारस्थलमाह—घटहिमाचलयोरिति। नहि घटहिमाचलयोःचलाचलत्वसत्त्वे तयोः परस्परं संयोगो विभागो वास्ति। न चावृतेऽवयवेऽवयविनोऽनावरणे सति कथं नानावरणदशायामिव सम्पूर्णं वस्त्रादिकं प्रतीयते इति वाच्यम्; अवयविनो द्रव्यस्यैकत्वेन कृत्स्नप्रतीतौ नानिष्टापत्तेः। न चैवं सति द्विहस्तादिप्रतीतिः स्यादिति वाच्यम्; आवृतावयवेन सहेन्द्रियसन्निकर्षाभावात्। न चैकस्यावयविनोऽभ्युपगमे कथं तत्र रक्तत्वादिविरुद्धधर्मसंसर्ग इति वाच्यम्; हरिद्रादेर्द्रव्यान्तरस्यैव रक्तत्वादिधर्माश्रयत्वेनाभ्युपगमान्न वस्त्रावयवाणां रक्तत्वादिधर्माश्रयत्वमिति तत्र विरुद्धधर्मसंसर्गो दूरनिरस्त इति भावः। न च हरिद्रादिसंयोगात्कथं न सर्वत्र रक्तत्वप्रतीतिः, संयोगस्याव्याप्यवृत्तित्वात्।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्तनकार्यकरणप्रसङ्गात्, अवयविनः कार्येणान्वयात्, युगपदनेकत्र वृत्तावनेकवृत्तिरूपादिवदनेकत्वप्रसङ्गाच्च। नापि द्वितीयः; आरम्भकावयवव्यतिरिक्तैकदेशाभावात्, भावे वानन्तावयवतया मेरुसर्षपयोस्तुल्यपरिमाणतापत्तेः; अवयवावयविनोर्दूरविप्रकर्षप्रसङ्गाच्चेति चेत्; मैवम्; विकल्पस्यानवसरदुःस्थत्वात्। नह्येकस्मिन्नेवावयविनि समस्तोऽसमस्तो वेति विकल्पः कल्पते, बहूनां हि समस्तताऽसमस्तता वा सम्भवेत्। किञ्चायं वृत्तिविकल्पः स्वसिद्धां व्याप्तिमवलम्ब्योत्तिष्ठति? उत परसिद्धाम्? नाद्यः; सौगतैः सर्वस्य क्षणिकत्वेनाश्रयाश्रयिभावानभ्युपगमात्। वेदान्तिभिरपि कार्यस्य कारणे कल्पितत्वमभ्युपगच्छद्भिर्वृत्तेरनभ्युपगमात्। नापि द्वितीयः, तेनाप्यनङ्गीकारात्। यद्वर्तते तत्संयोगेन समवायेन वा वर्तते इति परोऽङ्गीकरोति, न तु कार्त्स्न्यैकदेशाभ्याम्। अस्तु वा कार्त्स्न्येन वृत्तिस्तथापि न शृङ्गेण स्तनकार्यकरणप्रसङ्गः; तत्तदवयवविशिष्टस्यैवावयविनस्तत्तत्कार्यप्रसवसमर्थत्वात्। सर्वश्चायं प्रसङ्गहेतुराश्रयासिद्धः; अवयविनोऽनङ्गीकारात्, अङ्गीकारे वा धर्मिग्राहकप्रमाणबाधः। परसिद्धेन परस्यानिष्टापादनमिति चेत्, न; परस्यापि प्रमाणतः सिद्धावसिद्धौ च पूर्वोक्तदोषद्वयानतिवृत्तेः। अस्त्येवेतरस्यापि कल्पनाकल्पितो धर्मीति चेत्, न, कल्पनायाः सर्वत्राव्याहतप्रसरतयाऽऽश्रयासिद्ध्यादिदोषप्रमोषप्रसङ्गात्। तदेवं परमाणूनामेव द्व्यणुकादिक्रमेण निश्चितनिखिलजगत्कारणतोपपत्तौ न ब्रह्मणस्तत्कारणत्वकल्पनावकाश इति।

अत्रोच्यते—

अर्थान्तरत्वादाद्यस्य परस्योपाधिमत्त्वतः।
अन्त्यस्याभासतुल्यत्वात्प्रतिसाधनरोधनात् ॥३८॥

सुगता आक्षिपन्ति—नन्ववयवेष्विति। अवयवेषु क्रमशः सामस्त्येनावयविसत्त्वाभ्युपगमे शृङ्गेनापि स्तनकार्यकरणप्रसङ्गः, युगपदनेकत्र वृत्तावनेकवृत्तिरूपादिवदनेकत्वप्रसङ्गश्च। एकदेशेनावयवेषु तस्यावयविनः सत्त्वाभ्युपगमे कार्यद्रव्यारम्भकावयवभिन्नैकदेशाभावात्, कोशावयवेषु वर्तमानासेः कोशावयवभिन्नावयवत्वदर्शने नात्रापि तथाविधं कल्पनीयमिति चेत्तर्हि—मेरुसर्षपयोस्तुल्यपरिमाणत्वापत्तिः। अवयवावयविनोः स्वतन्त्रसत्त्वस्वीकारे तयोर्मध्येऽनन्तावयवैर्व्यवधानप्रसङ्गश्च। अवयवित्ववादि वृत्तिविकल्पदोषं परिहरति—मैवमिति। बौधानामकाण्डताण्डवं दर्शयति—नह्येकस्मिन्निति। किञ्च सौगतवेदान्तिवैशेषिकानामन्यतममतेनापि कार्त्स्न्येन वर्तते? एकदेशेन वा? इति वृत्तिविकल्पानुपपत्तिं दर्शयति—किञ्चायमिति। तेनाप्यनङ्गीकारात्—तार्किकेणाप्यनङ्गीकारात्। प्रसङ्गहेतुः=अनिष्टापादको हेतुरित्यर्थः। त्वयावयविनोऽनङ्गीकारात्। न च मम मतेऽवयविनोऽनङ्गीकारेऽपि परसिद्धेन परस्मिन्ननिष्टापादनमिति वाच्यम्; विपक्षाभिमतपदार्थस्यापि प्रमाणतः सिद्धत्वेऽसिद्धत्वे च पूर्वोक्तबाधाश्रयासिद्धिदोषयोस्तादवस्थ्यात्। सौगतेनापि कल्पिताश्रयाङ्गीकारेऽतिप्रसक्तिमाह—कल्पनाया इति। मिथ्यात्ववादे प्रथमपरिच्छेदेऽयमर्थो निरूपितः पूर्वपक्षमुपसंहरति—तदेवमिति।

आरम्भवादं निराकर्तुं प्रतिजानीते—तत्रोच्यते इति। परमाणुसाधकानुमानेषु दूषणानि श्लोकेन

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यत्तावन्महत्त्वापकर्षतरतमभावस्य क्वचिद्विश्रान्तिसाधनम्, तदर्थान्तरम्, त्रसरेणुष्वेव तस्य विश्रान्तेः। न च चाक्षुषद्रव्यत्वात् महत्त्वे सति क्रियावत्त्वाद्वा तेषामपि सावयवत्वानुमानात्तत्र विश्रान्त्यनुपपत्तिः; आद्यस्य योगिचक्षुर्गोचरेषु परमाणुष्वनैकान्तिकत्वात्। नचास्मदादीति विशेषणोपादानाददोषः; परमाणुनामिदानीमेव साधनीयतया तद्व्यावृत्त्यर्थं विशेषणस्य वैयर्थ्यात्। द्वितीयेऽपि महत्त्वे सतीति विशेषणस्य परमाण्वसिद्धौ वैयर्थ्यात्। यत्तु पृथिवीत्वस्य नित्यवृत्तित्वानुमानम्,तत्र पृथिवीव्यतिरिक्ताधेयत्वमुपाधिः;सत्ताया अपि नित्यवृत्तित्वानङ्गीकारात् साध्यविकलश्च दृष्टान्तः। अयं घट एतदतिरिक्तानित्यमूर्तातिरिक्तमूर्तान्य इत्यनुमानमाभाससमानम्, अयं घट एतदतिरिक्तानित्यसावयवातिरिक्तसावयवान्यो, मेयत्वादित्यपि प्रयोगस्य सुवचत्वात्। पृथिवीत्वमनित्यमात्रवृत्ति, पृथिवीमात्रवृत्तित्वात्, घटत्ववदिति प्रतिप्रयोगसम्भवाच्च। न च पृथिवीनिष्ठात्यन्ताभावाप्रतियोगिजात्यन्यत्वमुपाधिः, व्यतिरेकव्याप्त्यसिद्धेः साध्याव्यापकत्वात्, सत्ताद्रव्यत्वयोरपि नित्यवृत्तित्वाप्रतिपत्तेः। न च निरवयवेषु सम्प्रयोगसम्भवः; येनासमवायिकारणसम्पत्त्या द्रव्यारम्भः

संकलयति—अर्थान्तरत्वादिति। परमाणुसाधकेषु त्रिधानुमानेष्वाद्येऽर्थान्तरता, द्वितीये सोपाधिकता, चरमे चाभाससमानता सत्प्रतिपक्षता च प्रसज्यन्ते। संग्रहं विशदयति—यत्तावदिति। ननु त्रसरेणवः सावयवाः, चाक्षुषद्रव्यत्वात्, महत्त्वे सति क्रियावत्त्वाद्वा घटवदिति प्रयोगे योगिचक्षुर्गोचरेषु परमाणुदिक्कालादिषु हेतुसत्त्वेऽपि सावयवत्वरूपसाध्याभावादनैकान्तिकता, द्वितीयहेतौ सत्यन्तविशेषणस्य परमाण्वसिद्धौ वैयर्थ्यमिति। श्लोकस्य द्वितीयपादं विवृणुते—यत्त्विति। पृथिवीत्व नित्यवृत्ति, घटवृत्तिजातित्वे सति पटवृत्तिजातित्वात् सत्तावदित्यनेन पृथिवीत्वे (परमाणुरूप) नित्यवृत्तित्वानुमाने पृथिवीभिन्नवृत्तित्वमुपाधिः। सत्तात्मकदृष्टान्ते नित्यवृत्तित्वसाध्यस्य व्यापकः पृथिवीभिन्नजलादिवृत्तित्वोपाधिरस्ति, पक्षे साधनसत्त्वेऽपि पृथिवीभिन्नवृत्तित्वोपाधिर्नास्तीति लक्षणसमन्वय इति सोपाधिकत्वमाह—तत्र पृथिवीति। वेदान्तिमते साध्यवैकल्यमप्याह—सत्ताया इति। आकाशादिप्रपञ्चस्यानित्यत्वेन तत्र सत्तायाः कल्पितत्वं, तथात्मनः सद्रूपतया न तत्र सत्तावृत्तित्वमितिभावः। श्लोकोत्तरार्द्धं विशदयति—अयं घट इति। महाविद्यानुमानं स्वपक्षवत्परपक्षस्यापि साधकमित्याह—प्रयोगस्य सुवचत्वादिति। तदित्थम्-स्वपक्षपरपक्षाणामेषां पारिप्लवावहा। आरादेव परित्याज्या महाविद्याभिसारिका ॥१॥ संप्रतिसाधनतया चतुर्थपादं विवृणोति—पृथिवीत्वमिति। अत्र सत्प्रतिपक्षे व्याप्यत्वासिद्धिमुद्भाव्य दूषयति—न च पृथिवीति। पटादिरूपपृथिव्यां न सत्तापृथिवीत्वात्यन्ताभावोऽस्ति, किन्तु घटत्वात्यन्ताभावोऽस्ति, तस्य प्रतियोगिघटत्वमप्रतियोगि पृथिवीत्वसत्तादिकं तद्भिन्नं घटत्वादिकं तच्च दृष्टान्ते घटत्वेऽनित्यमात्रवृत्तिरूपसाध्यव्यापकं, पक्षे पृथिवीत्वे हेतुसत्त्वेऽपि पूर्वोक्तोपाध्यभावात्साधनाव्यापकमित्युपाधिं वारयति—व्यतिरेकासिद्धेः। अर्थात् सकलपृथिवीनिष्ठा या जातयस्ताः सर्वाः पृथिवीनिष्ठात्यन्ताभावाप्रतियोगिन्यस्तदन्यत्वोपाधिर्वक्तुमशक्यः, तस्य साध्यव्यापकत्वं दर्शयितुमशक्यत्वात्। सत्ताद्रव्यत्वादेरपि वेदान्तिमते नित्यब्रह्मनिष्ठात्यन्ताभावप्रतियोगित्वेन न तस्य साध्यव्यापकत्वदर्शनस्थलत्वमितिभावः। निरवयवपरमाणुषु संयोगरूपासमवायिकारणासम्भवेन द्रव्यारम्भकत्वमनुमातुमशक्यम्।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सम्भाव्येत । परमाणुपक्षीकारासम्भवेऽपि संयोगित्वं सावयवमात्रवृत्ति, संयोगिमात्रवृत्तित्वात् घटत्ववदिति सम्प्रयोगोपपत्तेः । न च द्रव्यत्वेन संयोगित्वानुमानम्, उभयवादिसिद्धस्य धर्मिणोऽभावात् । न च संयोगित्वं निरवयववृत्ति, संयोगिनिष्ठात्यन्ताभावाप्रतियोगित्वान्मेयत्ववदिति सप्रतिसाधनता; संयोगिव्यापिनि सावयवत्वधर्मे परस्परनैकान्त्यात् । न च द्वितीयसंयोगानुपपत्तिदोषः, पार्थिवाप्यपरमाण्वोः संयुक्तयोः सजातीयाण्वन्तरसंयोगात् द्व्यणुकोत्पत्तौ द्वितीयसंयोगस्यावश्याभ्युपेयत्वात्, कारणाकारणसंयोगेकार्याकार्यसंयोगस्येष्टत्वाच्च ।

न चावयवी कश्चित्सम्भवति, यः परमाणुभिरारभ्यते । न चैकस्थूलनीलावभासो बाह्यप्रमेत्यनुमानात्तत्सिद्धिः; यादृगवयवानामवयव्यारम्भकताभ्युपेयते, तेषामेवैकस्थूलनीलावभासगोचरत्वोपपत्तेरर्थान्तरत्वात् । न चानेकेषामेकप्रत्ययविषयत्वानुपपत्तिः; एकप्रावरणाद्यर्थक्रियाहेतुत्वोपाधौ बहूनामपि तन्तूनामेकप्रत्ययत्वोपपत्तेः । दृश्यते हि बहूनामपि वर्णानामेकार्थप्रतिपत्तिहेतुत्वोपाधावेकं पदमिति बुद्धिगोचरता । कम्पाकम्पावरणानावरणरक्तारक्तत्वलक्षणविरुद्धधर्मसंसर्गादवयविन एकत्वानुपपत्तेश्च । न चावयवानां तथात्वेऽप्यवयविनोऽतथात्वम्; तथात्वे सति युतसिद्धिप्रसङ्गात् । न च युतसिद्धेरनिरुक्तिः; घटपटयोरिव द्रव्ययोः समवायायोग्यत्वस्य युतसिद्धिपदेनाभिलापात् । न च युतसिद्धत्वे भागभागिव्यवहारगोचरत्वानुपत्तिः । पदवाक्यादिवदुपपत्तेः । यत्तूक्तं नावयविनोऽवयवानां वा रक्तत्वम्, किन्तु महारजनादिद्रव्यस्यैव तत्संयोगस्याव्याप्यवृत्तित्वादेव रक्तारक्तव्यवहारो विभागश्च सिद्ध्यतीति, तदसत्; अव्याप्यवृत्तित्वस्यानिरुक्तेः । तत्किं प्रदेशवृत्तित्वम् ? उत स्वात्यन्ताभावसमानाधिकरणत्वम् ? नाद्यः, आरम्भकप्रदेशाति-

---

मम मतेन प्रतिप्रयोगः सम्भवतीत्याह—परमाणुपक्षीति । उभयवादिसिद्धस्य धर्मिणोऽभावात्—परमाणुषु द्रव्यत्वेन संयोगित्वमनुमातुं न शक्यम् । वेदान्ती सप्रतिसाधनतामुद्भाव्य दूषयितुमाह—न च संयोगित्वमित्यादिना । संयोगिव्यापके सावयवत्वधर्मे साध्याभावसत्त्वेऽपि हेतुभावात्सव्यभिचारित्वात् । द्वितीयसंयोगानुपपत्तिदोषं वारयति—पार्थिवाप्येति । स्वीयामुत्पत्तिप्रक्रियां समर्थयति—कारणाकारणेति ।

पूर्ववादिनोक्तमवयविसाधनं दूषयितुं प्रक्रमते—न चावयवीत्यादिना । मानमनोहरकारीयानुमानस्यार्थान्तरतामाह—न चैकेति । अनेकेषामेकप्रतीतिविषयत्वे दृष्टान्तमाह—एकप्रावरणेति । प्रावरणादि=आच्छादनादि । दृष्टान्तरान्तरमाह—दृश्यते हीति । विरुद्धधर्मसंसर्गरूपतर्कं विरोधमपि समर्थयति—कम्पेति । पूर्वोक्तं पूर्वपक्षाशयं दूषयति—न चावयवानामिति । तथात्वे=कम्पादिमत्त्वे । युतसिद्धिनिरुक्तिं सदृष्टान्तामाह—घटपटयोरिवेति । युतसिद्धत्वेऽपि भागभागिव्यवहारोपपत्तौ दृष्टान्तमाह—पदवाक्यादिवदिति । अवयवावयविनोरपि रक्तत्वारक्तत्वपरिहारं पूर्वोक्तमनूद्य दूषयति—यत्तूक्तमित्यादिना । अव्याप्यवृत्तित्वं विकल्प्य दूषयति—नाद्यः। अव्याप्यवृत्तित्वं नाम प्रदेशवृत्तित्वं चेत्तर्हि तत्रारम्भकदेशाद्भेदेनावयविनः प्रदेशान्तरं न सम्भवति । संयोगस्य प्रदेशवृत्तित्वेऽवयविनो न संयोगाधिकरण-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

केणावयविनः प्रदेशान्तराभावात् । प्रदेशवृत्तित्वे संयोगस्य, अवयविनः सर्वत्र संयोगानधिकरणत्वप्रसङ्गात्, प्रदेशतद्वतोर्भिन्नत्वात् । न द्वितीयः; भावस्य स्वात्यन्ताभावसमानाधिकरणत्वे भावाभावविरोधोच्छेदप्रसङ्गात् । प्रतियोगिसमानदेशकालत्वेऽत्यन्ताभावस्यान्योन्याभावत्वप्रसङ्गाच्च । न च नेदमिह नेदमिदमिति विलक्षणबुद्धिवेद्यत्वाद्भेदः; असति प्रमेयवैलक्षण्ये बुद्धिवैलक्षण्यासंभवात् । न च प्रतियोगिनिष्ठानिष्ठत्वेन विशेषः; तस्याभावप्रकरण एवापाकरणात् । किञ्चावयवेष्ववयवी व्यासज्य वर्तते यथा द्वित्वादि, किं वा प्रत्येकं परिसमाप्य ? यथा पराभिमता जातिः । आद्ये बहुत्वसंख्यादिवदेव समस्तावयवानामग्रहणे न गृह्येत । द्वितीये जातिवदेव पट इति प्रत्ययः प्रत्यवयवं स्यात्, तस्यैव च कार्यान्वयात् शृङ्गेणापि स्तनकार्यकरणप्रसङ्गः । स्तनाद्यवयवविशिष्टस्यैव तत्तत्कार्यकरणत्वान्नातिप्रसङ्ग इत्यपि न वाच्यम्; यादृशसंस्थानेष्ववयवी समवेत इष्यते, तेषामेव तत्तत्कार्यकरणत्वोपपत्तेरवयविनो वैयर्थ्यप्रसङ्गात् । किञ्चावयविनः प्रत्यवयवं परिसमाप्य वृत्तौ कतिपयावयवनाशेऽपि जातिवदसाववतिष्ठेत । समवायिकारणमन्तरेण कथमवस्थानमिति चेत्; तर्हि प्रत्यवयवं परिसमाप्य वृत्तावपि सकलसमवायिकारणसहित एवावतिष्ठेत, तथा च शृङ्गेणापि स्तनकार्यप्रसङ्गः पूर्वोक्त एवानुवर्तते, तत्तदवयवविशिष्टस्यैव तत्र तत्र भावात् । प्रत्यवयवं निखिलावयवोपलम्भश्च स्यात् । तदित्थं वृत्तिविकल्पस्य परसिद्धव्याप्त्युपजीवित्वात्स्वसिद्धां परसिद्धां वेति विकल्पोऽनवसरदुस्थ एव ।

त्वमित्याह—प्रदेशेति । प्रदेशतद्वतोः—अवयवावयविनोर्भिन्नत्वेनावयववृत्तिसंयोगाभ्युपगमेऽपि नावयविनः संयोगाधिकरणत्वमित्यतो न परमाणुभिर्द्व्यणुकादेरवयविनो जन्मसम्भवमिति । नापि स्वात्यन्ताभावसमानाधिकरणत्वमिति द्वितीयः कल्पः सम्भवतीत्याह—न द्वितीयः, भावस्य=संयोगनामकस्य स्वात्यन्ताभावाधिकरणवृत्तित्वे भावाभावयोर्विरोधोच्छेदप्रसङ्गात् । अत्यन्ताभावान्योन्याभावलक्षणयोः साम्यप्रसङ्गापत्तिमाह—प्रतियोगिसमानेति । न च तयोर्विलक्षणप्रतीतिगोचरत्वेन भेदः; प्रमेयवैलक्षण्यमन्तरेण प्रतीतिवैलक्षण्यस्यासम्भवात् । न चात्यन्ताभावः स्वप्रतियोगिनिष्ठो, नान्योऽन्याभावस्तथेति तयोर्भेद इति वाच्यम्, अभावनिराकरणप्रकरणे प्रतियोगित्वादीनां निराकृतत्वात् । किञ्च द्वित्वादिवद्व्यासज्यवृत्त्यावयवेष्ववयवी वर्तते ? उत जातिवत्प्रत्येकं परिसमाप्यते ? नाद्यः, बहुत्वसंख्यादिवदेव सर्वावयवाग्रहणेऽवयविनोऽग्रहणप्रसङ्गात् । नापि द्वितीयः, जातिवदेव प्रत्यवयवं पट इति प्रतीतिप्रसङ्गात् । यथा प्रतिव्यक्ति गौर्गौरिति गोत्वजातिरनुवर्तते, तथैव प्रतितन्तु पटःपट इति प्रतीतिप्रसङ्गः स्यात् । एवं तत्तदवयवेषु कार्यजनकतया शृङ्गेणापि स्तनकार्यकरणप्रसङ्गः स्यात् । अतिप्रसक्तिं वारयति—स्तनाद्यवयवेति । सिद्धान्ती तत्तदवयवैः कार्यसम्पत्तिसम्भवेऽवयविनो वैयर्थ्यमाह—तादृशेति । अस्मिन्नेव पक्षेऽनिष्ठान्तरं वर्णयति—किञ्चावयविन इति । कतिपयावयवनाशेऽपि न जातिवदवयवी स्थातुं शक्यः, समवायिकारणं विना कार्यावस्थानं न सम्भवति चेत्तर्हि प्रत्यवयवं परिसमाप्य वृत्तित्वेऽवयवी सर्वावयवयुक्त एवावतिष्ठेत, तथा चातिप्रसक्तेस्तादवस्थ्यमित्याह—शृङ्गेणापीति । दोषान्तरमप्याह—प्रत्यवयवमिति । इत्थं प्रतिवादि-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

न च सर्वस्यास्य प्रसङ्गस्यावयविनः प्रमाणसिद्धावसिद्धौ च धर्मिग्राहकप्रमाणबाधा- श्रयासिद्धिदोषौ; यतः—

प्रमितत्वस्य वैयर्थ्यात्सिद्धस्यैवाश्रयत्वतः ।
देहात्मतावन्नियमाल्लक्षणैश्च व्यवस्थितेः ॥ ३९ ॥

प्रसिद्धतामात्रेणाश्रयत्वोपपत्तौ प्रमाणविशेषणवैयर्थ्यात् । न चैवमवयविनः शशविषाण- तुल्यता; अपरोक्षप्रतीतिगोचरत्वेनार्थक्रियाकारितया च तद्वैलक्षण्यात् । न च कल्पना- कोशस्य निरङ्कुशप्रसरतयाऽतिप्रसङ्गः; देहात्मभाववत्प्रतिनियमोपपत्तेः । न हि देहा- दावात्मभावः कल्पित इति घटादावपि कल्प्यते । न च कल्पितोऽपि सोऽर्थक्रिया- कारीति भवति शुक्तिरजताद्यर्थक्रियाकारि । एवमनभ्युपगमे कथायामप्रवृत्तिरेव स्यात्; उभाभ्यां धर्मिणः प्रमाणसिद्धत्वेनानङ्गीकारात् । तवापि प्रतिपक्षस्य प्रमितावप्रमितौ च निषेधानुपपत्तेश्च । उभयवादिसम्प्रतिपन्नलक्षणैरेव धर्मिहेतुदृष्टान्ततदाभासव्य- वस्थोपपत्तौ सत्यत्वानङ्गीकारेऽप्यतिप्रसङ्गाप्रसङ्गात् । एकस्यानेकवृत्तेरवयविनो निरासे- नैव संयोगविभागद्वित्वद्विपृथक्त्वसामान्यादयोऽपि परास्ता वेदितव्याः ।

संयोगादिस्वरूपानिरुक्तेश्च । तथा हि– (१) किमप्राप्तयोः प्राप्तिः संयोगः ? (२) अनित्यः सम्बन्धो वा ? (३) जन्यत्वविशेषितो वा ? (४) अव्याप्यवृत्तित्वविशेषितो वा ? (५) द्रव्यासमवायिकारणवृत्तिगुणत्वावान्तरजातीयो वा ? सर्वथापि नोपपद्यते।

अन्योऽन्यसंश्रयापत्तेरतिव्याप्तिप्रसङ्गतः ।
अव्याप्तेरजसंयोगे द्रव्यत्वाद्यनिरूपणात् ॥ ४० ॥

मतप्रसिद्धां व्याप्तिमवलम्ब्य पूर्वोक्तविकल्पसम्भवे वृत्तिविकल्पापेक्षितव्याप्तौ स्वमतसिद्धां परमतसिद्धां वेति विकल्पोऽकाण्डताण्डवोऽभ्युपेय इति ।

दोषान्तरमनूद्य वारयति–न च सर्वस्येति । अवयविविषये सर्वस्य प्रसङ्गस्यानिष्ठापादकस्या- वयविनः प्रमितौ धर्मिग्राहकप्रमाणेन बाधोऽप्रमितौ चाश्रयासिद्धिरिति दोषौ श्लोकेन वारयति– प्रमितत्वस्येति । प्रतीतिमात्रसिद्धस्याश्रयत्वसम्भवे तत्र प्रमितत्वस्य वैयर्थ्यम् । यथा कल्पितत्वा- विशेषेऽपि देहात्मत्वादेरेवार्थक्रियाकारित्वं, न रजतादेः । एतादृङ्नियमे लक्षणोपपत्त्यादयो निमित्तमिति श्लोकार्थः । श्लोकं विशदयति—प्रसिद्धतेति । श्लोकस्योत्तरार्द्धं विवृणोति—न च कल्पेनेति । यथा देहघटादिषु कल्पितत्वाविशेषेऽपि देहेष्वात्मत्वं कल्प्यते, न घटादिषु तथात्व- कल्पना । न च कल्पितरजतादिवद्देहादिष्वप्यर्थक्रियाकारित्वाभावाभ्युपगमे कथायां प्रवृत्तिर्न स्यादिति वाच्यम्; उभाभ्यां वादिप्रतिवादिभ्यां धर्मिणः प्रमाणसिद्धत्वेनाङ्गीकारात् । अन्यथा प्रतिपक्षस्य प्रमितावप्रमितौ च तवापि निषेधानुपपत्तेश्च । श्लोकस्य चतुर्थपादं विशदयति– उभयवादिति । अवयविन्युक्तं न्यायं संयोगादिष्वप्यतिदिशति—एकस्येति । अत्रादिपदेन- त्रित्वादिग्राह्यम् ।

अधुना प्रसङ्गागतं संयोगादिकं निराचष्टे—संयोगादीति । न केवलमवयविवदनेकवृत्तित्वेन संयोगादेरनुपपत्तिरपितु स्वरूपानिरुक्तेश्चापि । संयोगस्य पञ्चधा लक्षणेषु सम्भावितदोषान्

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

न तावदाद्यः; अप्राप्तिशब्देन संयोगाभावविवक्षायामात्माश्रयत्वात् । सम्बन्धाभावविवक्षायां तन्तुपटयोः सम्बन्धेऽतिव्याप्तेः । न हि पटोत्पत्तेः प्राक्पटस्य तन्तुभिः सम्बन्धोऽस्ति, सम्बन्धिनः पटस्यैवाभावात् । समवायस्य नित्यत्वादसत्यपि सम्बन्धिनि स भवतीति चेत्; तर्हि पटस्य कारणेषु तन्तुषु सदा समवायात्प्रागपि सत्त्वप्रसङ्गः, तथा तन्त्वादीनामपि कारणानामिति न किञ्चित्कादाचित्कं स्यात् । अथापि कार्यविशेषितः प्राक् नास्तीति चेत्, तर्ह्यप्राप्तयोः प्राप्तिरिति सोऽपि संयोगः स्यात् । अप्राप्तयोः सतोरिति विशेषणाददोष इति चेत्, न; सदसतोः सम्बन्धासम्भवेन सिद्धस्यैव पटस्य समवाय इत्यवश्याभ्युपेयत्वात् पूर्वदोषानतिवृत्तेः, अजसंयोगेऽव्याप्तेश्च । स एव नास्तीति चेत्, न; आकाशादिकमात्मना संयुज्यते, संयोगित्वात् घटवदिति प्रमाणसिद्धत्वात् । न च मूर्तत्वादिरत्रोपाधिरस्ति; व्यतिरेकासिद्धेः । यदमूर्तं तदात्मना न संयुज्यते यथा रूपमिति व्यतिरेकः, तत्र चासंयोगित्वस्यैवोपाधितया व्यतिरेकासिद्धेः । मूर्तत्वं चावच्छिन्नपरिमाणाधिकरणत्वम्, ततश्च परिमाणाधिकरणत्वेनैव व्याप्तिसिद्धेरवच्छिन्नविशेषणस्य पक्षमात्रव्यावृत्तिप्रयोजनस्य पक्षेतरता । अत एव न द्वितीयतृतीयौ; अजसंयोगाव्याप्तेः, क्रयादिजन्यस्वस्वामिसम्बन्धादिष्वतिव्याप्तेश्च । तेषां जन्यत्वादनित्यत्वाच्च । नैते सम्बन्धाः, स्वत्वस्वामित्वादीनां द्विष्ठत्वाभावादिति चेत्,

---

श्लोकेनाक्षिपति—अन्योऽन्येति । अन्योऽन्याश्रयातिव्याप्त्यव्याप्त्यादिदोषप्रसङ्गाद् द्रव्यत्वाद्यनिरूपणाच्च निरुक्तपञ्चधापि संयोगलक्षणं नोपपद्यते । प्रथमलक्षणेऽन्योऽन्याश्रयदोषमाह—अन्योऽन्येति । द्वितीये तन्तुपटादिसमवायेऽतिव्याप्तिरित्याह—अतिव्याप्तीति । आद्यचतुःषु दोषमाह—अजसंयोगेऽव्याप्तेः । पञ्चमे दोषमाह—द्रव्यत्वाद्येति । श्लोकं विशदयति—न तावदित्यादिना । अत्रात्माश्रयवदन्योऽन्याश्रयस्याप्युपलक्षणम् । अप्राप्तिशब्देन सम्बन्धाभावविवक्षितत्वे समवायेऽतिव्याप्तिमाह—सम्बन्धेति । अतिव्याप्तिं वारयितुं शङ्कते—समवायस्येति । तथासति पटस्य स्वकारणेषु तन्तुषु तन्त्वादीनामपि स्वस्वकारणेषु समवायात्प्रागपि सदा सत्त्वप्रसङ्गान्न किञ्चित् कादाचित्कं स्यात् । न च निष्प्रतियोगिकस्य समवायस्य सदा सत्त्वेऽपि पटादिकार्यविशिष्टस्य समवायस्य कार्योत्पत्तेः प्रागसत्त्वमिति वाच्यम्; अप्राप्तयोः प्राप्तिरिति संयोगलक्षणवत्समवायस्यापि संयोगलक्षणाभिन्नत्वप्रसङ्गात् । न च विद्यमानयोरप्राप्तयोः प्राप्तिः संयोग इति न संयोगलक्षणस्य समवायेऽतिव्याप्तिरिति वाच्यम्; समवायेऽतिव्याप्तेस्तादवस्थ्यादित्याह—सदसतोरिति । किञ्चाकाशादिकमात्मना संयुज्यते, संयोगित्वाद्, घटवदिति प्रमाणसिद्धेऽजसंयोगेऽव्याप्तिरप्यस्तीत्याह—अजसंयोग इत्यादिना । अत्र साध्यव्यतिरेकव्याप्त्यभावेन साध्यव्यापकत्वाभावान्नात्र मूर्तत्वादिकमुपाधिरित्याह—न च मूर्तत्वादीति । अर्थात् यदमूर्तं न तदात्मसंयोगि यथारूपमिति व्यतिरेकिव्याप्तौ रूपादिदृष्टान्तेऽसंयोगित्वमात्मसंयोगित्वाभावरूपसाध्यस्य व्यापकम्, आकाशे चामूर्तत्वस्य सत्त्वेऽपि न तत्रासंयोगित्वमिति साधनाव्यापकत्वमिति । मूर्तत्वं नामावच्छिन्नपरिमाणाधिकरणत्वमिति पूर्वोक्तव्याप्त्यसिद्धे मूर्तत्वं पक्षेतरत्वसमं नात्रोपाधित्वं सम्भवतीति भावः । अत्रादिद्वितीयतृतीयलक्षणयोरव्याप्तिमाह—अत एवेति । श्लोकेनोक्तामतिव्याप्तिमाह—क्रयादीति । अत्रादि-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तत्किमिदानीं विशेषणविशेष्यभावोऽपि न सम्बन्धः ? तथा च सुव्याहृतं विशेषणविशेष्यभावसम्बन्धादभावसमवाययोर्ग्रहणमिति । अपि चैवं समवायोऽपि सम्बन्धो न स्यात्; घटः पटेन संयुक्तः पटश्च घटनेतिवत्तन्तुषु पटः समवेतः पटे च तन्तवः समवेता इति तुल्यरूपव्यवहाराभावात् । तन्तुपटौ सम्बद्धावित्यस्त्येव व्यवहार इति चेत्, समं समाधानम्; स्वस्वामिनौ सम्बद्धाविति व्यवहारात् । नापि चतुर्थः; अजसंयोगाऽव्याप्तेः न हि निरवयवेषु नित्येषु सन्ति प्रदेशाः; यानव्याप्यायमेकदेशे वर्तेत । नापि पञ्चमः द्रव्यस्यासमवायिकारणानां जातेश्चानिरुक्तौ तद्विशेषितलक्षणासिद्धेः । अपि च—

> संयोगस्यापृथक्त्वेऽपि व्याहारव्यवहारयोः ।
> समवाय इवोत्थानाद्वृथा सामान्यकल्पना ॥४१॥

यथा तत्तत्सम्बन्धिनिरूपणाधीननिरूपणोऽपि समवायस्तत्र तत्रैको नित्यश्च, संयोगोऽपि तथा किं न स्यात् ? तद्भेदव्याहारव्यवहारयोः समवायवदुपपत्तेः । तेन जातेरसम्भवात् गुणत्वावान्तरजातीय इतीदं लक्षणमेव न सम्भवति । नन्वन्यतरकर्मणोभयकर्मणा संयोगे

सम्बन्धस्य द्विष्ठत्वेन स्वत्वस्वामित्वादीनां द्विष्ठत्वाभावेन नात्रातिव्याप्तिः शङ्कनीयेति वाच्यम् अपसिद्धान्तापत्तिप्रसङ्गात् । तमेव सङ्गमयति—तत्किमिति । समवाये सम्बन्धत्वाभावं दर्शयति— पदेन स्वस्वामिसम्बन्धादयोऽपि गृहीतव्याः । तत्रातिव्याप्तिं संघटयति—तेषामिति । न अपि चैवमिति । यथा घटपटयोः सम्बन्धो मिथो दृष्टस्तथा न तन्तुपटयोः परस्परं सम्बन्धो दृश्यते इति तुल्यव्यवहाराभावात् । तन्तुपटौ सम्बद्धाविति व्यवहारवत्स्वस्वामिसम्बन्धेऽपि तुल्यत्वमाह— समं समाधानमिति । अव्याप्यवृत्तिः सम्बन्धः संयोग इति चतुर्थलक्षणं दूषयति—नापि चतुर्थ शिवादित्यमिश्रलक्षणं दूषयति—नापि पञ्चमः । एतल्लक्षणघटकासमवायिकारणानां जातेश्चानिरुक्तौ तद्विशिष्टलक्षणस्यासिद्धेः । गुणत्वव्याप्यसंयोगत्वजातौ प्रमाणाभावं दर्शयति—अपि चेति अपृथक्त्वे=नानात्वाभावेऽपि । व्याहारः=घटसंयोगः पटसंयोग इत्यादिभिन्नभिन्नशब्दप्रयोगः व्यवहारः=भिन्नाभिन्नाप्रतीतिः । यथा च भिन्नभिन्नसम्बन्धिभिर्निरूप्यमाणोऽपि समवायः एको नित्यश्च तथा संयोगोऽपि किं न स्यात् । अनुयोगिप्रतियोग्यधीनसमवायभेदव्यवहारवत्संयोगेऽपि भेदव्यवहारः सम्भवत्येव । अतो वृथैव सामान्यकल्पनेति श्लोकार्थः । श्लोकं व्याख्याय संयोगत्वनिराकरणस्य प्रकृतोपयोगं दर्शयति—तेनेति । तस्मादेकव्यक्तिवृत्तितया संयोगत्वं न जातिरिति भावः । अत एव गुणत्वव्याप्यसंयोगत्वजातिमादाय न संयोगस्य लक्षणं सम्भावयितुं शक्यम् । पुनः सिद्धान्ति लोकितेन परिहारं शङ्कते—नन्वन्यतरेत्यादिना । वृक्षश्येनयोः संयोगोऽन्यतरकर्मजन्यः, मेषयोः संयोग उभयकर्मजन्यः, हस्ततरुसंयोगेन कायतरुसंयोगश्च संयोगजसंयोगः । एवं च संयोगत्व व्याप्यं कारणत्रितयजन्यत्वं च व्यापकं, नित्यसंयोगे व्यापकत्रितयसंयोगजन्यत्वाभावे संयोगत्व रूपव्याप्यस्याभावः सुतरां सिध्यति । न चैवं कथमजसंयोगसिद्धिरिति वाच्यम्, महत्त्वपरिमाणस्याप्यसिद्धिप्रसङ्गात् । द्व्यणुकगतकारणबहुत्वात्त्र्यणुके महत्त्वं, कपालादिकारणगतमहत्त्वाद्घटे कार्य महत्त्वं, शिथिलावयवसंयोगरूपप्रचयविशेषाच्च तुलिषु महत्त्वमुपजायते । तथा चात्मादिषु कारणत्रि तयजन्यत्वपरिमाणं व्यावर्तमानं स्वव्याप्यं महत्त्वमपि व्यावर्तयिष्यति । एवं स्थलान्तरयोरपि

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वा संयोगस्य जन्म, तथा च नित्यात्कारणत्रितयजन्यत्वं व्यावर्तमानं तस्य संयोगत्वमपि व्यावर्तयति तत्कथमजसंयोगसिद्धिरिति चेत्; हन्त ! तर्हि कारणबहुत्वात्कारणमहत्त्वात्प्रचयविशेषाच्च महदिति महत्त्वस्य कारणत्रितजन्यत्वेन व्याप्तावात्मादिषु तद् व्यावर्तमानं महत्त्वमपि व्यावर्तयेत् ! तथा संयोगे सम्बन्धत्वमनित्यत्वेन व्याप्तमिति समवायस्यापि सम्बन्धस्य नित्यता न स्यात् । ज्ञानस्य चास्मदादिषु शरीरेन्द्रियादिसाधनाधीनत्वादीश्वरे तद्विरहिणि तद्व्यावर्ततेति भवतैव स्वसमयः सकलोऽपि व्याकुलीकृतः स्यात् । अथ कारणनिवृत्त्या कार्यस्य निवृत्तिर्न नित्यस्य अव्यापकनिवृत्तावव्याप्यानिवृत्तेरयोगादित्युच्येत; तदितोऽपि दीयतां दृष्टिः । तस्मान्न संयोगः सम्भवी ।

नापि विभागः । स हि प्राप्तिपूर्विका अप्राप्तिः किं वा संयोगविरोधी गुणः ? अथवा संयोगावृत्त्यनित्यमात्रवृत्तिद्विवृत्तिवृत्तिगुणत्वावान्तरजातीयः ? सर्वथापि न घटते ।

आत्माश्रयादतिव्याप्तेरयोगाद् व्यभिचारतः ।
विशेषणाप्रसिद्धेश्च न विभागः प्रसिद्ध्यति ॥४२॥

तत्र न तावदाद्यः, विकल्पासहत्वात् । अप्राप्तिशब्देन विभागोऽभिलप्यते ? किं वा सम्बन्धाभावः ? विभागाभिधाने त्वात्माश्रयत्वम्, उत्तरत्र संयोगप्रध्वंसेऽतिव्याप्तिः; न द्वितीयः; विरोधशब्देन सहानवस्थानाभिधाने लक्षणस्यासम्भवित्वात्, वध्यघातकयोरेकाश्रयत्वस्य स्वेनैवाभ्युपगमात् । निवर्तकत्वविवक्षायां च तन्निवर्तकादृष्टेश्वरेच्छादावतिव्याप्तिः । समानाधिकरणो निवर्तको गुणो विवक्षित इति चेत्, न; आत्ममनःसंयोग-

---

प्रतिबन्दिद्वयं सारल्येनावबोधयति—तथेति । ज्ञानस्येत्यत्रापि प्रतिबन्दीं संगमयति—ईश्वरे इति । एवं प्रदर्श्य प्रतिबन्दीं मोचयति - अथेति । कारणनिवृत्त्या भवतु नाम कार्यस्य निवृत्तिर्न तु नित्यस्य तथात्वम् । तत्र कार्यकारणभावाभावात् । नैवमव्यापकनिवृत्त्याऽव्याप्यनिवृत्तिरित्युच्येत, तर्ह्यत्रापि तुल्यमित्याह—तदितोपीति । संयोगनिराकरणपक्षमुपसंहरति—तस्मान्नेति ।

यथाक्रमं विभागं दूषयति—नापीति । विन्ध्यमेर्वोः संयोगाभावेऽतिव्याप्तिवारणाय प्राप्तिपूर्वकेतिपदम् । बुद्ध्यादिवारणाय संयोगेतिपदम् । संयोगप्रागभावध्वंसयोरतिव्याप्तिवारणाय गुणपदम् । संयोगावृत्तित्वे सति अनित्यमात्रवृत्तित्वे, द्विवृत्तिवृत्तित्वे च सति गुणत्वव्याप्यविभागत्वजात्याश्रयत्वमिति विभागस्य तृतीयलक्षणस्यार्थः । तत्र संयोगत्ववारणाय प्रथमदलम् । संख्यादिवारणाय द्वितीयदलम् । रूपादिविशेषगुणेऽतिव्याप्तिवारणाय तृतीयदलम् । घटादावतिव्याप्तिवारणाय विशेष्यदलम । निरुक्तलक्षणगतदूषणानि श्लोकेन संकलयति—आत्माश्रयेति । प्रथमलक्षणगताप्राप्तिपदेन विभागविवक्षायां दोषमाह—आत्माश्रयादिति । सम्बन्धाभावविवक्षायामतिव्याप्तिमाह—अतिव्याप्तेरिति । द्वितीयलक्षणं दूषयति—न द्वितीयः । अत्र विरोधपदार्थं विकल्प्याद्यऽसम्भवो, द्वितीयेऽतिव्याप्तिरित्याह—विरोधशब्देनेत्यादिना । वध्यघातकयोः=संयोगविभागयोरेकाश्रयत्वं त्वयाप्यभ्युपेयते । न च विरोधपदेन समानाधिकरणो निवर्तको गुणो विवक्षित इति वाच्यम्; आत्ममनसोः संयोगस्य निवर्तकेऽदृष्टेऽतिव्याप्तेः । अदृष्टस्यापि तीर्थयात्रादिकर्मजन्यत्वेन

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

निवर्तकादृष्टेऽतिव्याप्तेः। कर्मजन्यत्वे सतीति विशेषणाददोष इति चेत्, न; तस्यापि तीर्थयात्रादिकर्मजन्यत्वात्। कर्मसमानाधिकरणः संयोगविरोधी गुणो विभाग इति चेत्, न; संयोगविभागयोरसिद्धौ कर्मणोऽप्यसिद्धेः, संयोगविभागासमवायिकारणं कर्मेति कर्मलक्षणाङ्गीकारात्, संयोगस्य चासिद्धौ तद्विरोधित्वस्याप्यसिद्धेः, कर्मण एव च पूर्वसंयोगनाशकत्वोपपत्तौ विभागाभ्युपगमवैयर्थ्याच्च। कथं तज्जनकस्य तन्निवर्तकत्वमिति चेत्, मैवम्; प्राचीनकर्मजनितसंयोगस्योत्तरकर्मणा निवृत्तेः। नाङ्गुलिकर्मणस्तरुसंयोगनाशकत्वम्, व्यधिकरणस्य निवर्तकतायामतिप्रसङ्गादिति चेत्, न; स्वाश्रयाश्रितसंयोगस्यैव नाशकत्वेनातिप्रसङ्गाभावात्। विरोधिनः समानाधिकरणस्यैव नाशकत्वोपपत्तावसति बाधके यावत्संयोगवृत्तिसामानाधिकरण्यस्य सङ्कोचोऽनुपपन्न इति चेत्, न; उभयवादिसिद्धकर्मण एवान्वयव्यतिरेकवतस्तन्नाशकत्वोपपत्तौ गुणान्तरकल्पनागौरवस्यैव बाधकत्वात्।

न च विभक्तप्रत्ययादेव यत्सिद्धौ कल्पनैव नास्तीति वाच्यम्; हिमवद्विन्ध्ययोरिव संयोगाभावमात्रादेव विभक्तप्रत्ययोपपत्तेः। ननु स्फुटद्वेणुदलशब्दात्तदसमवायिकारणतया विभागोऽवगम्यते, स हि न वंशदलद्वयसंयोगनाशापेक्षवंशदलाकाशसंयोगजन्यः, संयोग-

---

कर्मजन्यत्वविशेषणमपि नोक्तदोषमतिक्रामति। अदृष्टेऽतिव्याप्तिवारणाय विशेषणान्तरमाशङ्कते—कर्मसमानाधिकरण इति। विभावात्मनि कर्माभावान्नादृष्टस्य कर्मसामानाधिकरण्यमित्यर्थः, एतदपि लक्षणमन्योऽन्याश्रयदोषाक्रान्तम्। तमेव संघटयति—संयोगविभागयोरित्यादिना। विभागाभ्युपगमस्य वैयर्थ्यमप्याह—कर्मण एवेति। न च संयोगजनकस्य कर्मणः कथं संयोगनिवर्तकत्वमिति वाच्यम्; पूर्वकर्मजनितसंयोगस्योत्तरवर्त्तिना कर्मणा निवृत्त्यभ्युपगमेऽदोषात्। नहि येन कर्मणा संयोगो जायते तत्संयोगस्य तेनैव कर्मणा न निवृत्तिरभ्युपेयतेऽपितु तदुत्तरवर्त्तिना कर्मणेति भावः। न चाङ्गुलिवृक्षयोरन्यतरस्मिन्वर्तमानस्य कर्मणः संयोगस्योभयनिष्ठस्य नाशकत्वासम्भवं, व्यधिकरणस्य निवर्त्यनिवर्तकतास्वीकारेऽतिप्रसङ्गः स्यादिति वाच्यम्; स्वाश्रयाश्रितसंयोगस्यैव नाशकत्वेनानतिप्रसङ्गात्। स्व=कर्म, तदाश्रयो वृक्षस्तदाश्रितसंयोगस्य निवर्त्यत्वे उभयवृत्तिसंयोगस्यापि निवर्तमानत्वेऽदोषात्। न च निवर्त्यनिवर्तकयोरेकाधिकरणवृत्तित्वस्यानिवार्यत्वस्वीकारे विभागस्यैव तथात्वमभ्युपेयमिति वाच्यम्; विभागगुणकल्पनायां गौरवस्यैव बाधकत्वात्। तदेद सङ्गमयति—उभयवादीति। उभयवादिसम्मतकर्मसत्त्वे संयोगनिवृत्तिः कर्माभावे संयोगनिवृत्त्यभाव, इत्यन्वयव्यतिरेकाभ्यां कर्मणः संयोगनाशकत्वमवश्यं स्वीकार्यमिति भावः। विभक्त इति प्रत्ययस्यान्यथोपपत्तिमाह—संयोगाभावमात्रादेवेति। लीलावतीकाररीत्या शब्दाद्विभागानुमानं शङ्कते—नन्विति। स्फुटद्वेणुदलशब्दात्=स्फुटतो वेणुकाण्डादुत्पद्यमानशब्दादित्यर्थः। तस्य शब्दस्य विभागजत्वं परिशेषयति—सहीति। तेषामिदमत्राकूतं=वंशदलाकाशविभागस्य निमित्तकारणं वंशदलविभागोऽसमवायिकारणं वंशदलवृत्तिकर्म समवायिकारणं च वंशदलम्। तथा समवायिकारणे महाकाशप्रदेशे प्रथमतो जायमानस्य शब्दस्यासमवायिकारणं वंशदलाकाशविभागः। तत्र वंशदलविभागापेक्षया महाकाशप्रदेशे समवायिकारणे प्रथमतो जायमानस्य शब्दस्य वंशदल-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

जन्यस्य शब्दस्य संयोगनिमित्तकारणतोपलम्भवात्, भेर्याकाशसंयोगजन्यस्य शब्दस्य भेरीदण्डसंयोगनिमित्तकतावदितिचेत्, न, वायुदलसंयोगनिमित्तकत्वोपपत्तेः । न च सर्वत्रातीन्द्रियवायुसंयोगकारणताप्रसङ्गः; भेरीदण्डसंयोगस्यान्वयव्यतिरेकवतः कारणतोपपत्तौ तत्कल्पनानुपपत्तेः । अन्यथा तवापि पलाशादौ शुकशुकशब्दो वेगवदनिलपलाशसंयोगनिमित्तो न स्यात् । कर्म संयोगातिरिक्तासमवायिकारणं संयोगातिरिक्तत्वे सत्यसमवायिकारणत्वाद्रूपवदिति मानमनोहरकारोक्तमनुमानमिति चेत्, न; कर्ममात्रपक्षीकारे वेगाख्यसंस्कारजनकतया सिद्धसाधनत्वात् । वेगाजनककर्मपक्षीकारे च सप्रतिसाधनता—कर्म संयोगातिरिक्तद्विष्ठगुणासमवायिकारणत्वात्यन्ताभावाधिकरणम्, संयोगासमवायिकारणत्वात् संयोगवदिति प्रतिप्रयोगात् । वेदान्तितं प्रति दृष्टान्तस्य साध्यविकलत्वाच्च । विवर्तवादाश्रयणेन तैः कार्ये गुणान्तरमनभ्युपगच्छद्भिः कारणगुणानां कार्ये गुणासमवायिकारणत्वानङ्गीकारात् । नापि तृतीयः; विशेषणाप्रसिद्धेः ।

संयोगस्य निरस्तत्वाद् गुणानामनिरूपणात् ।
जातेश्च दुर्निरूपत्वात् स्यादसम्भवि लक्षणम् ॥४३॥

नापि द्वित्वं सम्भवति । तत्किमिमौ द्वाविति प्रत्यक्षतः सिद्ध्येत् ? उतानुमानतः ?

संयोगनाश एव भवतु निमित्तकारणमित्यत आह—संयोगजन्येति । अत्र प्रयोगं दर्शयति—स हि नेत्यादिना । यः किल संयोगासमवायिकारणकः शब्दः, स संयोगनिमित्तकारणकोऽपि दृश्यते, यथा भेर्याकाशसंयोगाज्जायमानस्य शब्दस्य निमित्तकारणं भेरीदण्डसंयोगोऽस्ति । न चेहाकाशप्रदेशे जायमानः शब्दस्तादृशः, तस्मादाकाशदलविभाग एव तत्र महाकाशप्रदेशे जायमानशब्दस्यासमवायिकारणमिति पक्षं दूषयति—न, वायुदलेति । प्रकृते वायुदलसंयोगनिमित्तकारणत्वोपपत्तेः । तथा च क्वचिद्भेरीदण्डसंयोगस्यान्वयव्यतिरेकाभ्यां निमित्तकारणता क्वचिच्च वायुदलसंयोगस्य निमित्तकारणताभ्युपेया । तस्माद्विभागकल्पना परित्याज्या । विपक्षे दोषमाह—अन्यथा तत्रापीति । पलाशः=पत्रम्, शुकशुकेति=शब्दानुकरणम् । एवं भाष्यादिसम्मतमनुमानं प्रदूष्य मनोहरीयमनुमानं दूषयितुमनुक्रामति—कर्मेति । संयोगेन सिद्धसाधनता स्यादतस्तद्वारणाय साध्यशरीरे संयोगातिरिक्तेतिदलम् । संयोगजनकसंयोगे व्यभिचारवारणाय हेतावपि सत्यन्तदलम् । द्रव्येऽतिव्याप्तिवारणाय हेतौ विशेष्यदलम् । अत्र पूर्वपक्षानुमाने कर्ममात्रस्य पक्षत्वे वेगाख्यसंस्कारस्यासमवायिकारणतामादाय सिद्धसाधनता स्यात् । वेगाजनककर्मणः पक्षत्वे सत्प्रतिपक्षता स्यात् । सप्रतिसाधनतां दर्शयति—कर्मेति । संयोगजनकतया बाधवारणाय साध्ये संयोगातिरिक्तेतिपदम् । वेगजनकत्वेन बाधवारणाय द्विष्ठेतिपदम् । द्रव्यविशेषासमवायिकारणत्वेनार्थान्तरतावारणाय गुणपदम् । स्वविषयज्ञानजनकत्वेन बाधवारणायासमवायिकारणेत्युक्तम् । विभागजनकत्वेनार्थान्तरतावारणायात्यन्ताभावग्रहणम् । द्वित्वाद्यसमवायिकारणकत्वादौ व्यभिचारवारणाय हेतौ संयोगपदम् । वेदान्तिनं प्रति दृष्टान्ते साध्यवैकल्यं संघटयते—विवर्तेति । विभागस्य तृतीयलक्षणं दूषयति—नापीति । विशेषणासिद्धिं श्लोकेन विशदयति—संयोगस्येत्यादिना ।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नोभयथापि— प्रत्यक्षस्यान्यथासिद्धिः स्यादेकत्वसमुच्चये।
अनुमाप्याश्रयासिद्धिसाध्यवैकल्यदूषिता ॥४४॥

इमौ द्वाविति प्रत्यक्षं तावदेकैकसमुच्चयविषयतयाप्यन्यथोपपद्यमानं नापरं द्वित्वमवगमयि[तु]मर्हति। ननु समुच्चयमात्रविषयमिदं प्रत्यक्षम्? तद्विशेषविषयं वा? नाद्यः; तस्यावैचित्र्याद् द्वित्वत्रित्वादिव्यवहारवैचित्र्यविरोधात्। नापि द्वितीयः; विकल्पानुपपत्तेः। स [किं] समुच्चितैकत्वभेदाद्वा? तद्गतधर्मभेदाद्वा? न प्रथमः; एकतायाः सर्वत्र तुल्यत्वात्। [न] चरमः; आरोपितस्य वा पारमार्थिकस्य वा द्वित्वत्रित्वादेरनङ्गीकरणे तद्गतधर्मभेदासि[द्धे]रिति चेत्, मैवम्; द्वित्वत्रित्वादिजनकापेक्षाबुद्धिविषयेऽपि विकल्पसाम्यात्। अपेक्षाबुद्धे[रे]कत्वगुणसमुच्चयमात्रविषयत्वे द्वित्वत्रित्वादिसंख्याभेदोत्पादकता न सिद्ध्येत्, समुच्चयस्य सर्वत्राविशेषात्। आरोपितद्वित्वत्रित्वादिविशेषितैकत्वसमुच्चयालम्बना बुद्धिर्द्वित्वादिजनि[का]इति चेत्, न; तथाभूताया एव बुद्धेर्द्वित्वादिव्यवहारजनकत्वोपपत्तौ द्वित्वाद्युत्पादकत्वकल्पना[]वैयर्थ्यात्। आरोपितस्यानारोपपूर्वकत्वनियमाद् द्वित्वादेः क्वचित्सत्यतापत्तिरिति चेत्, न; शुक्तिरजतादिसंसर्गवत्क्वचित्सत्यताऽभावेऽपि भ्रान्तिविषयत्वोपपत्तेः।

नापि द्वितीयः; द्व्यणुकपरिमाणं जन्यासमवायिकारणजन्यं कार्यत्वात्पटवदित्यनुमा[न]स्याश्रयासिद्धत्वात्। द्व्यणुकतत्परिमाणयोरस्माभिरनङ्गीकारात्, पटस्यापि तन्तुसंयोगा[]समवायिकारणजन्यत्वासम्प्रतिपत्तेर्दृष्टान्तस्य साध्यवैकल्याच्च। "विवादाध्यासि[त]...

प्रतिज्ञातद्वित्वनिराकरणप्रसङ्गे पूर्वं श्लोकेन प्रमाणं निराकुरुते—प्रत्यक्षस्येति। इमौ द्वावि[ति] प्रत्यक्षस्यैकैकत्वसमुच्चयेऽन्यथासिद्धिमनुमानमप्याश्रयासिद्धिसाध्यवैकल्याभ्यां दूषितमिति श्लोकं विशदयति—इमाविति। लीलावतीकाररीत्या द्वाविति प्रत्यक्षस्यैकैकत्वसमुच्चयविषयत्वाभ्यु[पगमं] दर्शयति—नन्विति। तथोक्तप्रत्यक्षस्य समुच्चयमात्रविषयत्वाभ्युपगमे समुच्चयस्यावैचित्र्ये द्वित्वत्रित्वा[]दिव्यवहारवैचित्र्यविरोधः स्यात्। निरुक्तप्रत्यक्षस्य समुच्चयविशेषविषयकत्वे विकल्पानुपपत्तिः स्यात्। तथाहि समुच्चेतव्यैकत्वभेदेन द्वित्वादिविलक्षणव्यवहारो न युज्यते, एकत्वस्य सर्वत्रतुल्यत्वात्। एकत्वगतधर्मभेदादपि न द्वित्वादिविलक्षणव्यवहारः सम्भवति, एकत्वे द्वित्वादिधर्मो नारोपितः नापि पारमार्थिकः, तस्यानङ्गीकारपराहतत्वात्। तमिममाक्षेपं प्रतिबन्द्या परिहरति—मैवमित्या[]दिना। वैशेषिकमतेऽपि विकल्पसाम्यं दर्शयति—अपेक्षाबुद्धेरिति। तथाहि तव मतेऽपेक्षाबुद्धेरेकत्व[]समुच्चयमात्रविषयत्वे द्वित्वत्रित्वादिविलक्षणकार्यजनकत्वं न सिद्ध्येत्, समुच्चयस्य सर्वत्र समानत्वात्। आरोपितद्वित्वादि धर्मविशिष्टस्य निरुक्तसमुच्चयस्यापेक्षाबुद्धिविषयत्वाभ्युपगमे तथाभूताया [एव] बुद्धेर्द्वित्वादिव्यवहारजनकत्वसिद्धौ तादृशापेक्षाबुद्धेर्द्वित्वादिजनकत्वकल्पनावैयर्थ्यं स्यात्। इमवेता[]भिप्रायं प्रश्नोत्तराभ्यां द्रढयति—आरोपितेत्यादिना—न, शुक्त्याद्यन्त्येनेति।

प्रत्यक्षं प्रदूष्यानुमानानि दूषयति—नापि द्वितीयः। परिमाणमात्रस्य पक्षत्वे परमाणौ[] बाधः स्यात्तद्वारणाय द्व्यणुकेति पक्षविशेषणम्। जन्यद्व्यणुकगताणुपरिमाणासमवायिकारणं परमाणुद्वयनिष्ठद्वित्वसंख्या। अत्रानुमाने पक्षासिद्धिमाह—द्व्यणुकतत्परिमाणेति। दृष्टान्ते साध्य[]वैकल्यमाह—पटस्यापीति। मानमनोहरकारीयमनुमानमाह—विवादेति। आत्मभिन्नद्रव्यजातं पक्ष...

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

बुद्धिजन्यगुणयोराश्रयः द्रव्यत्वादात्मवद्" इति मानमनोहरोदीरितमनुमानं मानमिति चेत्, न; अर्थान्तरत्वात्, सर्वस्यापि घटपटादेरीश्वरबुद्धिजन्यरूपादिगुणाश्रयत्वात् । अनित्यबुद्धिजन्यत्वस्य विवक्षितत्वाददोष इति चेत्; न; घटपटादिगतरूपादेरप्यस्मदादिज्ञानेच्छाप्रयत्नजन्यत्वेन पूर्वदोषानतिवृत्तेः । परमाणूनामेव पक्षीकरणे तेषामस्मदादिप्रत्यक्षागोचरत्वात् । तेषु बुद्धिजन्यगुणाधिकरणत्वसाधने नार्थान्तरतेति चेत्, न, तेषामेवासम्मतत्वेनाश्रयासिद्धत्वात्, चेतनत्वस्योपाधित्वाच्च । न चेश्वरे साध्याव्याप्तिः तस्यापि त्वन्मते तद्बुद्धिजन्यसंयोगविभागाश्रयत्वात् । निर्गुणात्मवादिनं प्रति दृष्टान्तस्य साध्यविकलत्वाच्च । अपि चापेक्षाबुद्धिव्यङ्ग्यत्वे द्वित्वस्य कं दोषं पश्यसि, येन तज्जन्यतामङ्गीकुरुषे ? एकत्ववत् द्वित्वस्याप्यपेक्षाबुद्धेः प्रागेव सिद्धौ तत्प्रतीतिसमकालमेव । द्वित्वप्रतीतिप्रसक्तिर्दोष इति चेत्, न; व्यञ्जकाभावादेव तदप्रतीत्युपपत्तेः । न च समानाश्रयसमानेन्द्रियग्राह्यसमानजातीयगुणानां विचित्रव्यञ्जकव्यङ्ग्यत्वानुपपत्तिः । महत्त्वदीर्घत्वयोरिव तदुपपत्तेः । नहि महत्त्वप्रतीतिर्दैर्ध्यप्रतीतिवद् ह्रस्वमपेक्ष्य जायते, तत्प्रतीतेरणुप्रतियोग्यपेक्षत्वात्ततो न द्वित्वस्यापेक्षाबुद्धिजन्यतापि ।

न चैकत्वसंख्यासमुच्चयोऽपि द्वित्वम्; एकत्वस्यापि स्वरूपातिरेकेण दुर्निरूपत्वात् । न च स्वरूपाणां भिन्नत्वादेकमेकमित्यनुगतप्रत्ययानुपपत्तिः; एकत्वसंख्यास्वीकारेपि तस्याः प्रतिद्रव्यं भिन्नतया द्रव्येष्वेकमेकमिति प्रत्ययानुपपत्तेस्तुल्यत्वात् । एकत्वसंख्याविशिष्टतया चैकमिति प्रत्ययविषयत्वे रूपादौ संख्यायां चैकमिति मतेरभावप्रसङ्गाच्च । तत्र स्वरूपत

आत्मनो बुद्धिजन्येच्छाद्याश्रयतया सपक्षत्वम् । रूपादिभिरर्थान्तरतावारणाय बुद्धिजन्येति साध्यविशेषणम् । अत्राप्यनुमानेऽर्थान्तरतां संघटयति—सर्वस्यापीति । जीवबुद्धिजन्यत्वविवक्षायां घटपटादिगतरूपादेरप्यस्मदादिज्ञानेच्छाकृतिजन्यत्वेन पूर्वदोषानतिवृत्तेः । अर्थान्तरतावारणाय परमाणूनामेव पक्षत्वस्वीकारोऽनङ्गीकारपराहतः, चेतनत्वस्योपाधित्वेन सोपाधिकत्वं च । न च चेतनत्वोपाधौ परमेश्वरे साध्याव्याप्तिः शङ्कनीयेति वाच्यम्, ईश्वरस्यापि न्यायमते जीवबुद्धिजन्यसंयोगविभागादिगुणानामाश्रयताभ्युपगमात् । अतस्तत्र न साध्यव्यापकतासन्देहावकाशः । वेदान्तिमते दृष्टान्ते साध्यवैकल्यमप्याह—निर्गुणेति । द्वित्वादावपेक्षाबुद्धिव्यङ्ग्यत्वपक्षे दोषमुद्भाव्य वारयितुमाह—अपि चापेक्षेति । दोषं वारयति—व्यञ्जकाभावादिति । उदयनमानमनोहरकाराभ्यामुक्तं बाधकं दूषयति—न चेति । समानाश्रयाणामपि गन्धरसादीनां विचित्रव्यञ्जकव्यङ्ग्यत्ववारणाय—समानेन्द्रियग्राह्याणामित्युक्तम् । तथाविधानामेकत्वमहत्त्वादीनां विचित्रव्यञ्जकव्यङ्ग्यत्ववारणाय—समानजातीयानामित्युक्तम् । महत्त्वदीर्घत्वयोर्व्यभिचारमेव स्पष्टयति—नहीति ।

पूर्वमेकत्वसमुच्चयमभ्युपगम्य तद्विषयतया द्वित्वप्रसक्तस्यान्यथासिद्धिरुक्ता, सम्प्रत्येकत्वस्यापि दुर्निरूपतया तामेकत्वसंख्यापि दूषयति—एकत्वस्यापीति । अत्रोदयनवल्लभयोरभ्युपगतिमपि दूषयति—न च स्वरूपाणामपीति । एकत्वसंख्यामभ्युपगम्यापि दोषोऽयमपरिहार्यः, तस्या अपि प्रतिद्रव्यं भिन्नत्वादिति भावः । एकत्वसंख्यायामनुगतिं प्रतिषेधति—एकत्वसंख्येति । एकत्वसंख्या-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एवंकत्वव्यवहारेऽन्यत्रापि तथाभावप्रसङ्गात् । एकत्वसंख्याविशिष्टे चैकत्वसमवायस्या- नवस्थादिदोषादयुक्ततया यादृक्स्वरूपे संख्यासमवायस्तादृशस्यैवैकव्यवहारविषयतोपपत्तेः संख्यास्वीकारवैयर्थ्यात् । न चैवं जात्यपलापानिष्टप्रसङ्गोऽद्वैतवादिनाम्; इष्टत्वात् ।

न च प्रमाणं संख्यायामप्येकत्वादिबुद्धयः ।
गुणादिष्वपि तद्भावात् तद्बाधस्यानिरूपणात् ॥४६॥

न च संख्यायामपि प्रमाणं पश्यामः । न चैकत्वादिबुद्धयः प्रमाणम्; संख्याभावेऽपि चतुर्विंशतिर्गुणाः, पञ्च कर्माणि; द्विविधं सामान्यमित्यादिवदुपपत्तेः । न च तत्र गौणः प्रयोगः; मुख्ये बाधानिरूपणात् । न हि निपुणमतयोऽपि निरूपका न चतुर्विंशतिर्गुणाः, न पञ्च कर्माणीति बाधमध्यवस्यन्ति । तदेवं द्वित्वादिसंख्यायां प्रमाणाभावात्, द्व्यणुकपरिमाणासमवायिकारणवृत्तिगुणत्वावान्तरजातीया संख्या तादृग्वृत्तिसंख्यात्वावान्तरजातीयं द्वित्वमित्यादिलक्षणमसम्भवित्वदोषेण परास्तम् ।

तथा जातिरपि— प्रत्यक्षादनुमानाद्वा न जातिः सेद्धुमर्हति ।
व्यञ्जकैरन्यथासिद्धेस्तद्वृत्तेश्चानिरूपणात् ॥४७॥

न तावद्गोगौरित्यभिन्नाकारग्राहिप्रत्यक्षं जातौ प्रमाणम्, विकल्पासहत्वात् । तत्किमेकव्यक्तिवद्व्यक्त्यन्तरे गौरित्यवभासः ? उत व्यक्तीनामेकगोस्वभावावभासः ? एकधर्मवत्तयावभासो वा ? नाद्यः; एकव्यक्तेर्गोस्वभावद्व्यक्त्यन्तरस्यापि गोस्वभावत्वादेवान्तरेणापि

यामधिकार्यस्वीकारस्य वैयर्थ्यमाह—एकत्वेति । लीलावतीकाराभिमतिं वारयति—न चैवमिति । एकत्वसंख्यानिरुक्तिं प्रदूष्य सम्प्रति संख्यामात्रे प्रमाणाभावमाह—न च प्रमाणमिति । एकत्वादिबुद्धीनां संख्यायां प्रमाणत्वं गुणादिषु व्यभिचरितं, न च गुणादिषु तथाविधैकत्वादिप्रतीतेर्भ्रान्तत्वं वक्तुं युक्तं, तत्प्रतीतेर्बाधस्य निरूपयितुमशक्यत्वात् । श्लोकेन सङ्गृहीतमर्थं विवृणुते—नचेति । संख्यारहितेष्वपि गुणादिष्वेकत्वादिप्रतीतेरुपपत्तेः । नच तत्र गौणप्रयोगो वक्तुं शक्यः, मुख्ये बाधकाभावात् । निरुक्तलक्षणेषु प्रमाणाभावादसम्भवदोषमाह—तदेवमित्यादिना । अस्य द्वित्वलक्षणस्य रूपादावतिव्याप्तिवारणाय वृत्यन्तविशेषणम् । द्व्यणुकस्य यत्परिमाणं तदसमवायिकारणं यत्परमाणुगतद्वित्वं तद्वर्तिनी या गुणत्वावान्तरसंख्यात्वजातिस्तदाश्रयो द्वित्वमित्युच्यते । सत्तागुणत्वे समुपादाय द्रव्यादिष्वतिव्याप्तिः स्यात्तद्वारणाय गुणत्वावान्तरजातीयग्रहणम् । तादृग्वृत्ति=द्व्यणुकपरिमाणासमवायिकारणवृत्तीत्यर्थः । सामान्यभिन्नेषु या दुर्निरूपितोपपादिता तां जातावप्युपपादयति—तथा जातिरपीति । पूर्वं षट्पदार्थनिराकरणावसरे सामान्यलक्षणानि निरस्तानि, साम्प्रतं तत्र प्रमाणं स्वरूपनिरुक्तिश्च निराक्रियते इत्यतोऽपुनरुक्तिः । तद्वृत्तेः=तस्या जातेर्व्यक्तिषु वृत्तिप्रकारस्य निरूपयितुमशक्यत्वादित्यर्थः । श्लोकं विशदयति—न तावदिति । गौर्गौरित्यभिन्नाकारग्रहो जातौ प्रमाणमिति विकल्प्य दूषयति—नाद्यः । तत्र हेतुमाह—एकेत्यादि । एकव्यक्तिवद्व्यक्त्यन्तरेऽपि गोस्वभावतया विनापि सामान्यं नानासजलपात्रेष्वयं चन्द्रोऽयं चन्द्र इतिवदवभासोपपत्तेः । ननु व्यक्तिमात्रस्य गौरिति बुद्धिविषयत्वाभ्युपगमे तुरगादिष्वपि तद्बुद्धिविषयत्वप्रसङ्गः, गोव्यक्तेस्तथाविधबुद्धिविषयत्वे जातिस्वीकारापत्तेरिति चेन्न, सास्नादियुक्तव्यक्तेस्तथामतिविषयत्वे

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सामान्यमनेकोदकभाजनेष्वयं चन्द्रोऽयं चन्द्र इतिवदवभासोपपत्तेः। ननु व्यक्तिमात्रं गौरितिमतिगोचरः ? गोव्यक्तिर्वा ? नाद्यः; तुरगादिव्यक्तावपि तत्प्रसङ्गात्। नेतरः; जातिस्वीकारापत्तेरिति चेत्, न; सास्नादिमद्व्यक्तेस्तन्मतिगोचरत्वात्। अन्यथा व्यक्तिमात्रस्य गोत्वव्यञ्जकत्वं गोत्ववद्व्यक्तेर्वेति प्रत्यवस्थानस्य जातावपि तुल्यत्वात्। नापि द्वितीयः; सर्वत्र गोस्वभावस्यैकस्यानिरूपणात्, निरूपणे वा जातिस्वीकारवैयर्थ्यात्। नापि तृतीयः; दण्डी दण्डवानितिवद्गोत्वी गोत्ववानिति प्रत्ययाभावात्। सास्नादिमत्त्वधर्मस्यैकस्य सर्वत्र प्रतिभासोऽस्तीति चेत्, कृतं तर्हि जात्या, तत एवानुवृत्तव्यवहारोपपत्तेः किञ्च जातिं स्वीकुर्वता तद्व्यञ्जकं किञ्चिद्वाच्यम् ? तदपि कुत्र वर्तते ? इति पर्यनुयोगे यत्र जातीस्तत्र वर्तत इत्युक्तावन्योन्याश्रयता। उभयोर्वा कुत्र वृत्तिरिति पर्यनुयोगे यदि व्यञ्जकान्तराभ्युपगच्छेत्तदानवस्था। यदि न, तदोभयोरपि वस्तुमात्रवृत्तितया सर्वत्र सर्वाजातिर्वर्ततेति जातिसाङ्कर्यप्रसङ्गः। यत्र यत्प्रतीयते तत्र तद्वर्तत इति प्रतीतिचरणशरणत्वेऽपि व्यञ्जकाङ्गीकरणवैयर्थ्यम्। प्रतीतिमात्राच्च तथात्वाङ्गीकारे, नभोनीलिमादेरपि तथात्वापातः। अबाधितप्रतीतेर्व्यवस्थापकत्वाङ्गीकारे वेहापि युक्तिबाधस्य सुवचत्वेन न तादृशप्रतीतेरपि व्यवस्थापकता। किञ्च जातिस्वीकारवादिनापीयं जातिरियं जातिरित्यनुवृत्तप्रत्ययसिद्धये कश्चिदुपाधिरेष्टव्यः, तथा च सार्वत्रिकः स एवानुवृत्तप्रत्ययकारणमस्तु तदलं जातिकल्पनादुर्व्यसनेन। तदेवं न प्रत्यक्षं जातौ क्रमते।

अस्तु तर्हि गन्धवन्तो गन्धवदगन्धावृत्तिगन्धवद्वृत्त्यवृत्त्यन्यधर्मवन्तः। तथा शैत्यवन्तः

स्वीकारात्। इयं च रीतिर्भवतापि स्वीकार्येत्याह—अन्यथेति। गोत्ववद्व्यक्तेः=गोत्वविशिष्टव्यक्तेर्गोत्वव्यञ्जकत्वाभ्युपगमे स्वस्यैव स्वव्यञ्जकतयात्माश्रयत्वापत्तिरित्यर्थः। सर्वव्यक्तीनामेकगोस्वभावत्वावभास इति द्वितीयकल्पोऽपि न युक्त इत्याह—नापि द्वितीयः। तृतीयमेकधर्मावभासपक्षं दूषयति—नापि तृतीयः। तत्र प्रतीत्यभावं हेतुमाह—दण्डीत्यादिना। नहि गौरिति प्रतीतिव्यतिरेकेण गोत्वबोधकः प्रत्ययोऽस्तीत्यर्थः। न च गोत्वव्यञ्जकसास्नादिमत्त्वधर्मस्यैकस्यैव सर्वत्र प्रतिभासमानत्वेन गोत्वजातिसिद्धिरिति वाच्यम्, तथाविधव्यञ्जकेनानुवृत्तव्यवहारोपपत्त्या जात्यभ्युपगमस्य वैयर्थ्यात्। किं च जातिव्यञ्जकसास्नादिमत्त्वधर्मोऽपि दुर्निरूप इत्याह—किञ्च जातिमिति। जातितद्व्यञ्जकयोरेकाधिकरणत्वेऽन्योऽन्याश्रयता, उभयोर्व्यञ्जकान्तराधिकरणाश्रितत्वेऽनवस्था, व्यञ्जकान्तराधिकरणानाश्रितत्वे तयोर्वस्तुमात्रवृत्तितया सर्वत्र सर्वजातिवर्तमानत्वेन जातिसाङ्कर्यञ्चेति दोषाः प्रसज्ज्येरन्। न च यत्र यत्प्रतीयते तत्तत्र वर्तते इति प्रतीतिरेव तत्सत्त्वव्यवस्थितयोः शरणमिति वाच्यम्; तथासति व्यञ्जकाभ्युपगमस्य वैयर्थ्यात् प्रतीतिमात्राच्च तथात्वस्वीकारे नभोनीलिमादेरपि यथात्वापत्तेश्च। न चाबाधितप्रतीतेर्व्यवस्थापकत्वमिति वक्तुं युक्तम्; इहापि युक्तिबाधस्य सुवचत्वेन गौरिति प्रतीतेरपि व्यवस्थापकत्वानुपपत्तेः। किं च जातिवादिना जातिष्वपीयं जातिरियं जातिरिति प्रतीतिसिद्धयेऽनुगतः कश्चिदुपाधिरेष्टव्यः; तथासति तस्यैव सार्वत्रिकानुगतप्रतीतिकारणत्वसम्भवे जातिकल्पनाया वैयर्थ्यप्रसङ्गात्।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शीतवदशीतावृत्तिशीतवद्वृत्त्यवृत्त्यन्यधर्मवन्तः प्रमेयत्वाज्ज्वलनादिवदित्युमानैः पृथिवीत्व-जलत्वादीनां सिद्धिः। विवादाध्यासितानि द्रव्यगुणकर्माणि सामान्यवन्त्यनित्यत्वाद्गो-वदित्यनुमानेन सत्तायाश्च सिद्धिरिति चेत्, न; प्रथमप्रयोगेषु तत्तज्जातिव्यञ्जकगन्धवत्त्व-शीतस्पर्शवत्त्वादिधर्मैरेवार्थान्तरत्वात्। जात्यनङ्गीकारवादिनं प्रति गोवदिति दृष्टान्तस्य साध्यविकलत्वाच्च। किञ्च सर्वसर्वगता जातिः? उत व्यक्तिसर्वगता? नाद्यः; विकल्पा-सहत्वात्। किं सर्वसर्वगतत्वं नाम—सर्वत्र संयोगः? तादात्म्यं वा? समवायो वा? सम्बन्धान्तरं वा?

> अद्रव्यत्वान्न संयोगः साङ्कर्यान्नेतरावपि।
> पदार्थान्तरतापत्तेर्नान्यसम्बन्धसम्भवः ॥४८॥

न तावज्जातेः सर्वव्यक्तिसंयोगः; अद्रव्यत्वात्। न तादात्म्यसमवायौ; सर्वव्यक्तिषु सर्व-जातीनां तादात्म्ये समवाये वा सर्वस्य सर्वात्मताप्रतीतिप्रसङ्गात्। व्यञ्जकाभावान्न तथेति चेत्, न; तादात्म्यसमवायस्वीकारे शावलेयादिव्यक्तिवदेव तद्व्यञ्जकताया अपि दुर्निवारत्वात्। स्वभावभेदात्कस्यचिदेव व्यञ्जकत्वं न सर्वस्येति चेत्,न; सिद्धे प्रमाणतः सर्वत्र सम्बन्धे स्वभावभेदालम्बनम्, न तु स्वभाववादपादप्रसारिकयैव वस्तुसिद्धिः, अन्यथास्त्येव पवनादावपि रूपसंभेदः, स्वभावभेदादेवाप्रतीतिरित्यनर्गलगलगर्जनस्य कः प्रतीकारः स्यात्? नापि सम्बन्धान्तरम्; षट्पदार्थातिरिक्तपदार्थस्वीकारप्रसङ्गात्। नापि

एवं जातौ प्रत्यक्षं निराकृत्य कुलार्कपण्डितोन्नीतानुमानं दूषयितुं तत्पक्षमुत्थापयति—अस्तु तर्हीति। गन्धवन्तः, शैत्यवन्त इति पक्षनिर्देशः। गन्धाद्याश्रया इति यावत्। गन्धवत्स्व-गन्धवत्सु च ये धर्मा वर्तन्ते, तेषु गन्धवदगन्धवृत्तित्वं नाम धर्मस्तदत्यन्ताभाववान्, तथा गन्धवत्सु वर्तमानाःसन्तस्तेषु ये धर्मा न वर्तन्ते तेषु गन्धवद्वृत्त्यवृत्तित्वं नामधर्मस्तदनधिकरणो यो धर्मस्तद्वन्त इति योजना। उभयत्र हेतूदाहरणयोर्निर्देशमाह—प्रमेयत्वाज्ज्वलनादिवदिति। एताभ्यां पृथिवीत्वजलत्वादिजातिसिद्धिः। एवं विवादास्पदानि द्रव्यगुणकर्माणि सामान्यवन्ति, अनित्यत्वाद् गोवदित्यनुमानेन सत्ताजातिसिद्धिरिति चेन्न, प्रथमप्रयोगयोर्द्वयोस्तत्तज्जातिव्यञ्जकगन्धवत्त्वशीत-स्पर्शवत्त्वधर्ममादायार्थान्तरतापत्तेः, जात्यनङ्गीकारवादिनं प्रति तृतीयानुमाने गोवति दृष्टान्ते साध्यवैकल्याच्च। पूर्वोक्तश्लोकस्य चतुर्थपादं विवृणुते—किञ्चेति। सर्वपदार्थेषु जातेः सर्वगत-त्वपक्षे दूषणानि श्लोकेन संकलयति—अद्रव्यत्वादित्यादिना। न च सर्वत्र जातेः सर्वगतत्वं संयोगरूपं सम्भवति, सर्ववस्तूनां द्रव्यत्वाभावात्। नापि तादात्म्यरूपं समवायरूपं वा सर्वगतत्वं सम्भवति, सर्वव्यक्तिषु सर्वजातीनां तादात्म्ये समवाये वा स्वीकारे सर्वस्य सर्वात्मतारूपसाङ्कर्यप्रतीति-प्रसङ्गात् (सर्ववस्तूनां सर्वरूपतापत्तिरिति भावः) न चाश्वादिषु सास्नादिमत्स्वरूपस्य गोत्वजाति-व्यञ्जकस्याभावान्नोक्तसाङ्कर्यापत्तिरिति वाच्यम्, तादात्म्यसमवाययोः स्वीकारे शावलेयादि-व्यक्तिवदेव सर्वत्राश्वादिषु गोत्वजातिव्यञ्जकताया अपि वारयितुमशक्यत्वात्। न च स्वभाव-विशेषात्कस्यचिदेव व्यञ्जकत्वं न सर्वस्येति वाच्यम्, प्रमाणतः सर्वत्र जातिसद्भावावगमेऽप्रतीतौ स्वभावभेदालम्बनीयत्वात्। स्वमूलप्रमाणं विनैव स्वभावभेदकल्पनाभ्युपगमेऽतिप्रसङ्गमाह—

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पिण्डसर्वगता जातिः; प्रत्यग्रजायमानखण्डमुण्डादिपिण्डेषु पिण्डान्तरस्थितताया जातेः सम्बन्धाभावप्रसङ्गात्। न हि सा पिण्डान्तरादुत्प्लुत्यात्रानुप्रविशति, निष्क्रियत्वात्। तत्परित्यागे च पूर्वपिण्डे तद्व्यवहाराभावप्रसङ्गात्। न चांशाभ्यामुभयत्र वृत्तिः, अनंशत्वात्। स्वसामग्रीवशादुपजायमानः पिण्डस्तज्जात्यालिङ्गित एवोत्पद्यत इति चेत्, न; पिण्डोत्पत्तेः प्राक् तत्र तस्या अभावात्। भावे च सर्वसर्वगतत्वापत्तेः। तदुक्तं बाह्यैः—

"नायाति न च तत्रासीदस्ति पश्चान्न चांशवत्।
जहाति पूर्वं नाधारमहो व्यसनसन्ततिः॥" इति।

सर्वपिण्डप्रलये च घटत्वादिजातेरुच्छेदप्रसङ्गः। सम्बन्धिविगमेऽपि तस्याः स्वरूपेणावस्थानमिति चेत्, न, आधारविगमेऽप्याधेयावस्थाने रूपादेरपि तथावस्थितेर्नित्यत्वप्रसङ्गः। तदेवमणूनां तत्संयोगस्य तदनेकत्वस्य जातेश्चानिरूपणादनेकैः परमाणुभिः संयोगसचिवैः समानजातीयैर्द्व्यणुकादिक्रमेण सर्वं कार्यद्रव्यमारभ्यत इति मनोरथमात्रम्।

किञ्च— परमाणुबहुत्वेन महत्त्वारम्भसम्भवात्।
त्र्यणुके द्व्यणुकारम्भप्रक्रियापि न सिद्ध्यति॥४९॥

द्व्यणुकादिप्रक्रमप्रक्रियापि न प्रमाणपथमवतरति, अणुभिरेव त्र्यणुकाद्युत्पत्तेरुपपत्तेः। नन्वेवं सति त्र्यणुके महत्त्वं न स्यात्। परमाणुपरिमाणस्य नित्यपरिमाणतयाऽनारम्भकत्वात्; प्रचयस्य निरवयवेष्वनाशङ्कनीयत्वादिति चेत्, न; कारणबहुत्वादेव त्र्यणुकादौ महत्त्वोपपत्तेः। न च परमाणुगतानेकत्वसंख्या नारम्भिका, तद्गतद्वित्वस्यापि द्व्यणुकपरिमाणाना-

---

अन्यर्थेति। श्लोकस्योत्तरार्धं विशदयति—नापि सम्बन्धान्तरमित्यादि। सम्बन्धान्तरपक्षे षट्पदार्थातिरिक्तपदार्थाभ्युपगतिप्रसक्तिः स्यात्। अस्तु तर्हि व्यक्तिसर्वगता जातिरिति पक्षं दूषयति—नापोति। पिण्डसर्वगताजातिस्वीकारे नूतनोत्पन्नखण्डमुण्डादिपिण्डेषु पिण्डान्तरस्थजातेः सम्बन्धाभावप्रसक्तिः। नहि सा पिण्डान्तरादुत्प्लुत्यात्रानुप्रविशति, अद्रव्यत्वेन जातेर्निष्क्रियत्वात्। पूर्वपिण्डपरित्यागे च सति पूर्वपिण्डे जातिव्यवहाराभावप्रसङ्गात्। न चैकांशेनान्यत्रोत्प्लुतिरन्यांशेन च तत्रापि स्थितिरिति वाच्यम्; अनंशत्वात्। नित्यत्वेन पिण्डवज्जातिर्नोत्पद्यते, नापि पिण्डोत्पत्तेः प्राक्तत्र साऽस्ति। अतः कथं तदालिङ्गनमुत्पद्यमानव्यक्तेरित्यर्थः, एतच्च सर्वं बौद्धोक्त्या समर्थयति—नायातीत्यादिना। अपि च यथातथाजातिस्वीकारेऽपि दोषमाह—सर्वपिण्डेति। न च सम्बन्धिविगमेऽपि जातेः स्वरूपेणावस्थानमितिवाच्यम्; तथासति रूपादेरपि नित्यत्वप्रसङ्गात्। सर्वपरपक्षनिराकरणस्य ब्रह्मकारणवादिवेदान्तविरोधनिरासोपयोगमाह—तदेवमिति। अतः परप्रक्रियया सर्गादिनिरूपणं मनोरथमात्रम्।

अथ द्व्यणुकारम्भे प्रमाणप्रयोजनयोरभावमुपपादयति—किञ्चेत्यादिना। श्लोकं विशयति—द्व्यणुकादोति। ननु परमाणुपरिमाणमनारम्भकं नित्यपरिमाणत्वात्, परममहत्परिमाणवदिति मानेन द्व्यणुकारम्भानभ्युपगमे त्र्यणुके महत्त्वं न सिद्ध्येतेति चेन्न; कारणबहुत्वादेव त्र्यणुकादौ महत्त्वोत्पत्तेः। प्रचयः=प्रशिथिलावयवसंयोगः, स च निरवयवेषु न सम्भवतीत्यर्थः। न च परमाणुगतानेकत्वसंख्या न महत्त्वारम्भिकेति वाच्यम्; तद्गतद्वित्वस्यापि द्व्यणुकपरिमाणानारम्भकत्वापत्तेः।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रम्भकत्वप्रसङ्गात् । नन्ववयविनां परमाणूपादानकत्वे कपालशर्करादीनामनारब्धत्वात्पर-
माणूनां चादृश्यत्वादवयविनाशे न किञ्चिद् दृश्येतेति चेत्, न; द्व्यणुकारभ्यत्वेऽपि प्रसङ्गस्य
तुल्यत्वात् त्र्यणुकचतुरणुकादिक्रमेणारम्भान्नायं प्रसङ्ग इति चेत्, न; चतुर्भिर्द्व्यणुकैश्च-
तुरणुकवत् द्व्यणुकसहस्रारब्धकार्यनाशेऽपि प्रसङ्गस्य तुल्यत्वात् । तस्माद् द्व्यणुकसद्भावे न
किञ्चिन्मानमस्ति । ननु त्र्यणुकं कार्यद्रव्योपादानकं, महत्त्वे सति कार्यत्वात् घटवत् । तथा-
रम्भकद्रव्यसंख्यापकर्षतारतम्यं क्वचिद्विश्रान्तं, तरतमभावत्वात्परिमाणतरतमभाववत् ।
न चैकत्वसंख्यायामेव विश्रान्तौ सिद्धसाधनता, तथा सत्येकद्रव्यस्यैव द्रव्यारम्भकत्व-
प्रसङ्गात् । न चैकद्रव्यारब्धं द्रव्यम्; कार्यद्रव्यस्यानाशप्रसङ्गात् । कारणविभागस्य
कारणविनाशस्य च तन्नाशहेतोरभावात् । ततो द्व्यणुकसिद्धौ न परमाणूपादानकत्वं त्र्यणुक-
स्येति चेत्, न; प्रथमप्रयोगे महदुपादानकत्वस्योपाधित्वात् । ननु परिमाणावान्तरसामान्यस्य
महत्त्वाद्यवान्तरसामान्यव्यतिरिक्तस्य कार्याकार्यवृत्तित्वं महत्त्वे दृष्टमतोऽणुत्वस्यापि कार्या-
कार्यवृत्तित्वसिद्धौ कार्याणुपरिमाणाधिकरणद्व्यणुकसिद्धिरिति चेत्, न; ह्रस्वत्वदीर्घत्व-
योरनैकान्त्यात्, तयोः कार्यैकवृत्तितयाऽकार्यवृत्तित्वानङ्गीकारात् ! न च तद्व्यतिरिक्तत्वे
सतीति विशेषणान्नानैकान्तिकता; तथापि प्रतिसाधनसद्भावात्, तथा हि—अणुत्वं कार्या-
कार्यवृत्ति न भवति महत्त्वव्यतिरिक्तत्वे सति परिमाणावान्तरजातित्वाद्ध्रस्वत्वादिवत्

अनुपपत्तेः समानत्वादित्याशङ्क्य परिहरति—नन्वित्यादिना । न च त्र्यणुकादिक्रमेण पटाद्यारम्भा-
भ्युपगमे नायमनन्तरो दोष इति वाच्यम्; चतुर्भिर्द्व्यणुकैश्चतुरणुकवत् द्व्यणुसहस्रारब्धकार्यनाशेऽपि
दर्शनाभावप्रसङ्गस्य तुल्यत्वात् । अतो द्व्यणुकसत्त्वे प्रमाणाभावसिद्धिरिति भावः । सम्प्रति किरणा-
वलीकारोक्तमनुमानमनुसृत्याशङ्कते—ननु त्र्यणुकमिति । तत्रेच्छादिनित्यद्रव्यगुणैः स्वाभिमतद्व्यणुकेन
च व्यभिचारवारणाय सत्यन्तदलम्; आकाशादौ व्यभिचारवारणाय कार्यत्वादितिपदम् । सिद्धसाधन-
तावारणाय साध्यशरीरे कार्यपदम् । तथारम्भकेति=तन्त्वारब्धपूर्वपूर्वारम्भकद्रव्येषु संख्यापकर्षस्य
यदिदं तारतम्यं तत्क्वचिद्विश्रान्तमिति द्वितीयप्रयोगे प्रतिज्ञावाक्यम् । यत्र तारतम्यं समाप्यते तदेव
द्व्यणुकमित्यर्थः । एकत्वसंख्यायामेव विश्रान्तत्वसम्भवे समागतां सिद्धसाधनतां वारयति—तथासतीति ।
न चेष्टापत्तिरिति वक्तुं युक्तम्, तथासति कार्यद्रव्यस्यानाशप्रसङ्गात् । अवयवविभागस्यावयव-
विनाशस्य च कार्यद्रव्यनाशहेतोस्तत्राभावात । तस्माद् द्व्यणुकसिद्धौ सत्यां न परमाणूपादानकत्वं
त्र्यणुकस्य वक्तुं युक्तमिति चेन्न, प्रथमप्रयोगे महदुपादानकत्वस्योपाधित्वात् । दृष्टान्ते साध्य-
व्यापकत्वं पक्षे साधनाव्यापकत्वं चेति सुस्पष्टम् । अथानुकूलतर्काभावान्नात्र साध्यव्याप्तिः प्रत्युत
बाधकापत्तिश्चास्तीति शङ्कते—ननु परिमाणेति । अणुत्वसामान्यं कार्याकार्यवृत्ति, परिमाणत्व-
साक्षाद्व्याप्यजातित्वान्महत्त्ववदिति प्रयोगाकारोऽवधेयः । न चात्र साध्यवैकल्यं शङ्कनीयम्; महत्त्व-
स्याकाशादिषु घटादिषु च वर्तमानत्वात् । एवं चाणुत्वाधिकरणं यत्कार्यं परिमाणं तदधि-
करणमेव द्व्यणुकं, यच्च नित्यपरमाणुपरिमाणं तदधिकरणं परमाणुरितिभावः । व्यभिचारं
स्फोरयति—तयोरिति । न च ह्रस्वादिभिन्नत्वे सतीति हेतुविशेषणान्नानैकान्तिकतेति वाच्यम्;
तथासत्यपि सत्प्रतिपक्षदोषस्य विद्यमानत्वात् । तमेव संघटयति—तथाहीति । अयं प्रयोगः परमाणु-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

परिच्छेदः

अवनमतमाश्रित्य प्रयोगसम्भवात्, त्रसरेणुनित्यत्ववादिनं भाट्टं प्रति हेतोर्विशेष्यासिद्धेश्च, द्वितीयप्रयोगे च सिद्धसाधनता, त्रसरेणुयुगलादौ संख्यापकर्षतारतम्यविश्रान्त्युपपत्तेः। तदेवं परमाणुभिरारब्धे त्र्यणुकादौ महत्त्वोपपत्तेर्न द्व्यणुकादिप्रक्रमप्रक्रियासिद्धिः।

किञ्च—

परिमाणस्य सिद्धत्वे तदारम्भविचारणा।
नाद्यापि सिद्धस्तद्भावोऽभावाल्लक्षणमानयोः ॥५०॥

परिमाणमेव न निरूपणपथमवतरति, कुतस्तदारम्भचिन्ता? तल्लक्षणप्रमाणयोरनिरूपणात्, तथा हि—किं (१) मानव्यवहारकारणं परिमाणम्? (२) उत द्वित्वासमवायिकारणक-वृत्तिगुणत्वावान्तरजातीयम्? (३) आहोस्विदसमवायिकारणत्वानधिकरणनित्याकाशवृत्ति-वृत्तिगुणत्वावान्तरजातिमत्? (४) परिमाणत्वजातिमद्वा? नाद्यः; अदृष्टेश्वरादेरपि मान-व्यवहारकारणस्य परिमाणत्वप्रसङ्गात्। विषयतयेति विशेषणाददोष इति चेत्, न; परि-माणत्वजातेरपि तथात्वापत्तेः। जातिमत्वे सतीति चेत्, न; द्रव्येऽपि प्रसङ्गात्। परिमाण-त्वजातिमत्त्वे सतीति चेत्, न; तावन्मात्रस्यैव लक्षणत्वोपपत्तौ व्यर्थविशेष्यत्वापातात्। नापि द्वितीयः; द्वित्वस्य तदसमवायिकारणत्वस्य चानन्तरमेव निरस्तत्वात्। किञ्च विशिष्टजातिमत्त्वं ज्ञाततया तद्व्यवहारकारणं वक्तव्यम्, तच्च किंचिदुपसंग्राहकपुरस्कारे-

---

वादिनं प्रति दर्शितः। त्रसरेणुनित्यत्ववादिनं भाट्टं प्रति प्रथमप्रयोगस्थहेतोर्विशेष्यासिद्धेश्च। आरम्भकेत्यादिद्वितीयप्रयोगे च सिद्धसाधनता, त्रसरेणुयुगलादावेवास्मन्मते संख्यापकर्षतारतम्य-विश्रान्तिसम्भवात्। प्रपञ्चितं द्व्यणुकदोषमुपसंहरति—तदेवमिति।

यदा परिमाणमात्रं दुर्निरूप्यं तदा तद्विशेषमहत्त्वपरिमाणदुर्निरूप्यस्य का कथेत्यभिप्रेत्याह—किञ्चेति। तद्भावः=परिमाणस्य सत्त्वं नाद्यापि सिद्धम्। श्लोकं विशदयति—परिमाणति। परिमाणलक्षणं दूषयितुं चतुर्धा विकल्प्यते—तथाहीत्यादिना। यस्य द्व्यणुकपरिमाणस्यासम-वायिकारणं द्वित्वं तद्द्वित्वासमवायिकारणकं तद्वृत्तिगुणत्वव्याप्यजातिमदित्यर्थः। रूपादिवारणाय प्रथमं दलं, द्रव्यादिष्वतिव्याप्तिदारणाय द्वितीयं दलम्। असमवायिकारणत्वानधिकरणं नित्यश्च य आकाशादिवृत्तिर्गुणः। तद्वृत्तिर्या गुणत्वव्याप्यजातिस्तदाश्रयत्वं परिमाणत्वमित्यर्थः। अत्रापि रूपत्वादिकमादाय रूपादिवारणायाकाशवृत्तिवृतीति दलम्, द्वित्वादिवारणाय नित्यपदम्। तत्र नाद्यः, मानव्यवहारसाधारणकारणस्यादृष्टेश्वरादेरपि परिमाणत्वप्रसङ्गात्। विषयत्वविशेषणत्वे परिमाणत्वजातेरतिव्याप्त्यापत्तेः। न च जातिमत्त्वे सति विषयत्वे च सति मानव्यवहार-कारणमिति विवक्षितत्वेऽदोष इति वाच्यम्; द्रव्येऽपि तथात्वप्रसङ्गात्। न चात्र परिमाणत्व-जातिमत्त्वं विवक्षितमिति वाच्यम्; तावन्मात्रस्य लक्षणत्वसम्भवे ततोऽधिकस्य वैयर्थ्यापत्तेः। द्वितीयं लक्षणमव्यवहितं पूर्वं निरस्तमिति। जातिपुरःसरलक्षणेषु साधारणदूषणमाह - किञ्चेति। व्यावृत्तिर्व्यवहारो वा लक्षणस्य प्रयोजनं, व्यवहारश्च ज्ञातादेव भवति, अन्यथाऽतिप्रसङ्गाद-सत्त्वप्रसङ्गाच्च। एवं ज्ञातमेव लक्षणं व्यावर्तकं स्यात्। तच्च किञ्चिदुपसंग्राहकपुरस्कारेणैव सर्वलक्ष्यव्यक्तिनिष्ठतया वक्तव्यम्। अन्यथा व्यक्त्यन्तरे तथाप्रतीत्यभावेन परिमाणव्यवहारा-भावप्रसङ्गात्। तथा च सर्वव्यक्त्यनुगतोपसंग्राहकरूपाभ्युपगमे तेनैवानुगतव्यवहारसिद्धौ जातिघटित-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

णैव सर्वलक्ष्यव्यक्तिनिष्ठतयाधिगन्तव्यम्, अन्यथा व्यक्त्यन्तरे तथा प्रथाऽभावेन तद्व्यवहाराभावप्रसङ्गात् । तथा च तेनैवानुगतव्यवहारोपपत्तौ कृतं विलक्षणलक्षणपरीक्षाप्रयासेन । नापि तृतीयः; उक्तदोषानुषङ्गात् । नापि तुरीयः; जातिव्यञ्जकस्य निर्वक्तुमशक्यत्वात् । शक्यत्वे वा पूर्वोक्तदोषानुषक्तेश्च । तदेवं न लक्षणनिरुक्तिः ।

नापि प्रमाणम् । नहि मानव्यवहार एव तत्र प्रमाणम् ? तस्यानिरुक्तेः, तथा हि—कोऽयं मानव्यवहारः ? किं (१) हस्तवितस्त्यादिव्यवहारः ? (२) किं वाणुमहदादिव्यवहारः ? (३) असर्वगतत्वव्यवहारो वा ? (४) परिमितत्वव्यवहारो वा ? सर्वं नोपपद्यते, अव्याप्तेः । अणुत्वमहत्त्वाद्यसिद्धौ तद्विशेषितव्यवहारासिद्धेः, असर्वगतत्वव्यवहारस्याविभुत्वेनापि संभवात् । परिमितत्वव्यवहारस्य दशपलपरिमितमित्यादौ गुरुत्वेनापि दर्शनात्, यादृगाश्रयेऽणुमहदादिपरिमाणसमवायः परेणाङ्गीक्रियते तादृगाश्रयविशेषादेव तद्व्यवहारोपपत्तौ तदतिरिक्तपरिमाणकल्पनायां कल्पनागौरवाच्च । अथ तर्ह्यनुमानं मानमनोहरकारोक्तम्—'विवादाध्यासितं द्विष्ठगुणानसमवायिकारणानित्यविशेषगुणव्यतिरिक्ताद्द्विष्ठगुणाश्रयः, द्रव्यत्वाज्जलाणुवत्, अत्र च जीवाकाशौ पक्षीक्रियेते तथेश्वरो नित्यविशेषगुणव्यतिरिक्तानसमवायिकारणाद्द्विष्ठगुणाश्रय, आत्मत्वाज्जीववदिति' चेत्, न;

विलक्षणलक्षणपरीक्षणप्रयासो व्यर्थः । एवं तृतीयलक्षणस्यापि जातिघटितत्वेन पूर्वोक्तदोषानतिवृत्तेः । नापि चतुर्थः, जातिव्यञ्जकस्य निर्वक्तुमशक्यत्वात्, शक्यत्वे वा पूर्वोक्तदोषप्रसक्तेश्च ।

नापि परिमाणसाधकं प्रमाणम् । ननु मानव्यवहारस्यैव तत्र प्रमाणत्वमिति चेन्न; तस्य चतुर्धा विकल्प्यमानेऽपि निर्वक्तुमशक्यत्वात् । तत्र नाद्यः, हस्तवितस्त्यादिव्यवहारस्यैकैकत्र सम्भवेऽपि परमाणौ परममहति वाऽभावादव्याप्तेः । नापि द्वितीय', परिमाणमात्रासिद्धत्वेन तद्विशेषितव्यवहारस्याप्यसिद्धेः । नापि तृतीयः, विभुत्वाभावमादायाप्यसर्वगतत्वव्यवहारसिद्धिसम्भवात् । नापि चतुर्थः, एतद्वस्तु दशपलपरिमितमित्यादौ गुरुत्वेनापि परिमितत्वव्यवहारोपपत्तेः । कल्पनागौरवं च सर्वपक्षसाधारणदोषमाह—यादृगिति । एवं प्रत्यक्षं निरस्यानुमानमुत्थाप्य निरस्यति—अथ तर्हीति । द्विष्ठगुणासमवायिकारणभिन्नत्वे सत्यनित्यविशेषगुणभिन्नत्वे च सत्यद्विष्ठगुणाश्रयत्वमिति साध्यस्वरूपम् । अत्र विशेष्यदलमात्रोक्ते एकत्वैकपृथक्त्वमादायार्थान्तरता, तद्वारणाय विशेषणम् । ज्ञानादिगुणैः शब्देन चार्थान्तरता, तद्वारणाय द्वितीयविशेषणम् । विशेष्यदलानुक्तौ संयोगविभागयोरजनकौ यौ घटादिनिष्ठौ संयोगविभागौ तदाश्रयत्वेन सिद्धसाधनता, तद्वारणाय विशेष्यदलम् । अत्र प्रयोगे जीवाकाशौ पक्षत्वेन विवक्षितौ । मानमनोहरकारीयमनुमानान्तरमप्याह—तथेश्वर इति । नित्यविशेषगुणभिन्नत्वे सति, असमवायिकारणभिन्नत्वे च सत्यद्विष्ठगुणाश्रयत्वमिति द्वितीयप्रयोगे साध्यपदार्थः । अत्रापि प्रयोगे विशेष्यदलमात्रोक्ते एकत्वादिनार्थान्तरता, तद्वारणाय द्वितीयसत्यन्तदलम् । तथात्वे ज्ञानादिनाऽर्थान्तरता, तद्वारणाय प्रथमसत्यन्तदलम् । द्वित्वादिभिरर्थान्तरतावारणायाद्विष्ठपदम् । सामान्यादिभिरर्थान्तरतावारणाय गुणपदम् ।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आद्यस्योपाधिमत्त्वेन साध्याभावाग्निदर्शने ।
द्वितीयस्योभयत्रापि प्रतिसाधनरोधनात् ॥५१॥

प्रथमानुमाने मूर्तत्वस्योपाधित्वात् । न च पार्थिवपरमाणौ साध्याव्याप्तिः; तत्रापि द्विष्ठगुणानसमवायिकारणानित्यविशेषगुणव्यतिरिक्ताद्विष्ठगुणानां परत्वापरत्ववेगादीनां सद्भावात् । न चेश्वरे मूर्तत्वस्योपाधेः साध्याव्याप्तिः; तस्य वेदान्तिभिर्निर्गुणत्वाङ्गीकारात् । द्वितीयप्रयोगेऽपि दृष्टान्तस्य साध्यवैकल्यात् । गुणानां नित्यत्वासिद्धावप्रसिद्धविशेषणत्वाच्च । सप्रतिसाधनं चेदं प्रयोगद्वयम्, विवादाध्यासितमुक्तविशेषणाविशेषितसाधारणगुणाश्रयो न भवत्यमूर्तत्वाद्रूपादिवदिति प्रयोगोपपत्तेः । न चाद्रव्यत्वमुपाधिः; तद्व्यतिरेके पृथिव्यादिषु मूर्तत्वस्यैवोपाधित्वात् । तदेवं परिमाणस्यासिद्धेर्न तदारम्भविचारणाप्यवकाशं लभते ।

न च कारणगुणपूर्वकतानियमः रूपादीनाम्; परिपक्वे लौहित्यस्याकारणगुणपूर्वस्यापि दर्शनात् । ननु निवृत्तः श्यामो घटोऽन्य एव च लोहितस्तत्रोत्पन्नः; तथा हि–श्यामत्वमाश्रयविनाशादेव नश्यति, कार्यगतरूपत्वात्, नष्टपटरूपवत् । तथा लौहित्यमाश्रयोत्पत्त्यनन्तरमेवोत्पद्यते कार्यगतरूपत्वात्कार्यलोहितपटरूपवदित्यनुमानतस्तद्भेदसिद्धेः । न च विनाशे हेतोरभावः, स्पर्शवद्वेगवदनिलसंचलनबलेन प्रज्वलज्ज्वलनस्य ज्वालाकलापस्यैव घटावयवसङ्घातविघटनहेतुत्वात् । अन्यथानलावयवानामन्तरनुप्रवेशासम्भवेन पिठरजठरसंचारिसलिलोल्ललनतण्डुलविक्लेदनयोरसम्भवप्रसङ्गात् । मृदुकठिनतालक्षणविरुद्धधर्म-

---

अनयोर्दोषान् श्लोकेन सङ्कलयति—आद्यस्येति । द्वितीयस्य निदर्शने साध्याभावादिति योजना । श्लोकं विशदयति—प्रथमेति । प्रथमानुमाने द्रव्यत्वहेतौ मूर्तत्वोपाधिः । न च पार्थिवपरमाणौ साध्याभावेऽपि मूर्तत्वोपाधिसत्त्वान्नोपाधेः साध्येन समव्याप्तिरिति वाच्यम्; तत्रापि साध्यसदृशां परत्वापरत्ववेगादीनां विद्यमानत्वात् । न चेश्वरे साध्यसत्त्वेऽपि निरुक्तोपाध्यभावान्न तत्र साध्यव्यापकत्वमिति वाच्यम्; विश्वेश्वरस्य वेदान्तिभिर्निर्गुणत्वाभ्युपगमात् । द्वितीयानुमाने साध्यवैकल्यात् । नहि तैरात्मनि गुणाधिकरणत्वमभ्युपेयते । नित्यविशेषगुणेति साध्यविशेषणस्याप्रसिद्धिमाह—गुणानामित्यादि । उभयप्रयोगे सप्रतिसाधनतामाह—विवादेति । न चाद्रव्यत्वमुपाधिः; अद्रव्यत्वव्यतिरेके पृथिव्यादिषु मूर्तत्वस्यैवोपाधित्वात् । अर्थात् यत्राद्रव्यत्वं नास्ति तत्रामूर्तत्वमपि नास्ति, यथा पृथिवीति व्यतिरेकव्याप्तौ मूर्तत्वस्यैवोपाधित्वात् । परिमाणनिराकरणस्य परिमाणकारणत्वनिराकरणोपयोगमाह—तदेवमिति ।

ननु कारणगुणप्रक्रमेण कार्ये गुणारम्भ इति वैशेषिकानां परिभाषोपपद्यत इति चेन्न, परिपक्वघटे लौहित्यस्याकारणगुणपूर्वस्यापि लोके दर्शनात् । न चात्र नष्टो घटो भिन्न एव, तत्रैव लौहित्यो जातः, तथाऽऽश्रयनाशादेव श्यामत्वनाशः कार्यगतरूपत्वात्, नष्टपटरूपवत् । एवमाश्रयोत्पत्त्यनन्तरमेव लौहित्यमुत्पद्यते, कार्यनिष्ठरूपत्वात्, नष्टपटरूपवदित्यनुमानाभ्यां श्यामघटरक्तघटयोर्भेदसिद्धेः । न चात्र घटासमवायिकारणस्य नाशकाभाव इति वाच्यम्; ज्वालाकलापस्यवात्र नाशहेतुत्वाभ्युपगमात् । अन्यथा तण्डुलपाकासम्भवमाह—अन्यथेति । उल्ललनम्=ऊर्ध्वचलनम् । पक्वा-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

संसर्गोपलब्धेश्च तद्भेदावगतौ कथं न कारणगुणपूर्वकता रूपादीनामिति चेत् मैवम्;

तत्त्वेन प्रत्यभिज्ञानात्तदाधेयानिपाततः ।
संख्याप्रमाणयोरैक्यादन्यथा पाकसम्भवात् ॥५२॥

स एवायं घट इति प्रत्यभिज्ञाप्रत्यक्षविरोधात्, उपरिस्थितशरावादीनामपातात्, तद्देशत्वतत्संख्यतातत्परिमाणतोपलब्धेश्च । अन्तःपाकस्यापि सच्छिद्रत्वादवयविनां स्फटिकान्तरिन्द्रियरश्मिप्रवेशवदुपपत्तेः । अन्यथा सलिलस्यन्दनबहिःशैत्योपलम्भयोरभावप्रसङ्गात् । मृदुकठिनतालक्षणविरुद्धधर्मसंसर्गस्याप्यन्तरेणावयविनाशं छायातपविनिहितपटवदुपपत्तेः। न च वेगवद्द्रव्याभिघातमात्रादवयविनाशः; प्रबलपवनाभिमुखनिहितघटादेरपि विनाशापत्तेः। नियतहेतुभावकुलालादिव्यतिरेकेण घटजन्मासिद्धेश्च । अन्यथा शब्दसुखादयोऽप्याश्रयविनाशविनाश्याः, कार्यत्वे सति विशेषगुणत्वात्, घटरूपादिवदित्यपि स्यात्। प्रत्यभिज्ञाविरोधस्तु प्रकृतेऽपि समानः। न चैवं पिठरकुहरसंचारितण्डुलानामनलसम्पर्केऽप्यनाशप्रसङ्गः, परिमाणभेदस्य प्रत्यक्षसिद्धत्वाद्विरोधिप्रत्यभिज्ञाभावाच्च । न च स एवायमिति प्रत्यभिज्ञाविरोधः प्रदीपेऽपि तुल्यः; न्यूनाधिकपरिमाणभेदस्य तत्र प्रत्यक्षेणोपलम्भात्, तैलवर्त्यग्निसंयोगानां च प्रतिक्षणं भेदेन सामग्रीभेदाच्च कार्यभेदोपपत्तेः, तत्र प्रत्यभिज्ञायाः सादृश्यविषयतयान्यथासिद्धेः। न चैकत्र प्रत्यभिज्ञाया अन्यथासिद्धौ सर्वत्र तथाभावः; बाधाबाधाभ्यां तद्व्यवस्थोपपत्तेः,अन्यथातिप्रसङ्गात् । तस्मात्कारणगुणप्रक्रमो न विदुषां परितोषायेति सिद्धम् ।

कारणत्वानिरुक्तेश्च । तथा हि—किमिदं कारणत्वम् ? किं (१) पूर्वकालभावित्वम्?

पक्वघटयोर्भेददर्शनेनापि कार्यगतरूपादीनां कारणगुणपूर्वकत्वमवश्यमभ्युपगन्तव्यमिति वैशेषिकाः। तत्र श्लोकेन दोषमाह—तत्त्वेनेति। स एवायं घट इति प्रत्यभिज्ञानादामपक्वघटयोरैक्यमवगम्यते। यदि पाकसमये चुल्लादीनां विनाशोत्पादौ भवेतां तदा तन्मध्ये तत्रस्थस्थाल्यादीनां पतनं भवेत्, तद्देशत्वतत्संख्यतातत्परिमाणतानामुपलब्धेश्च घटैक्यं बोध्यम्। घटादिद्रव्यनाशमन्तरेणापि सच्छिद्रत्वात्तत्र ज्वालनावयवानामन्तरेऽप्यनुप्रवेशसम्भवेन पाकोत्पत्तेरित्यर्थः। श्लोकं विशदयति—स एवेत्यादिना । घटेषु सूक्ष्मछिद्रानभ्युपगमे घटस्थजलबहिः स्यन्दनशैत्योपलम्भयोरभावप्रसङ्गात् । न च छायातपस्थितपटस्यापि पाकोऽभ्युपेय इति वाच्यम्; अवयविनः पटादेस्तत्र प्रत्यभिज्ञानेन घटादिनाशमन्तरेणापि विरुद्धधर्मसंसर्गोपपत्तेः । न च वेगवदनलाद्विद्रव्याभिघातमात्रादवयविनाश इति वाच्यम्; प्रबलपवनाभिमुखस्य घटादेरपि विनाशप्रसङ्गात्, नियतहेतुं विनैव घटादेराकस्मिकोत्पत्तिप्रसङ्गाच्च । विपक्षेऽतिप्रसङ्गमाह—अन्यथेति । न च स्थालीस्थितण्डुलादीनामपि बहिःपातानलसम्पर्केऽप्यनाशप्रसङ्ग इति वाच्यम्, दृष्टे तर्काभावादित्याह—परिणामभेदस्येति । प्रत्यभिज्ञाप्रामाण्येऽप्यतिप्रसङ्गं वारयति—नचेति। बाधाबाधाभ्यां प्रत्यभिज्ञानस्य व्यवस्थोपपत्तेः। प्रत्यभिज्ञानस्य सर्वथाऽन्यथासिद्धत्वमात्मादीनामपि स्थिरतासिद्ध्यभावप्रसङ्गात् । प्रसङ्गमुपसंहरति—तस्मादिति।

किञ्च कारणत्वनिरुक्तिमपि विकल्प्य दूषयति—तथाहीति । सप्तधाविकल्पेषु नाद्यः, अकारणस्य

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(२) किं वा नियतप्राक्कालसत्त्वम् ? (३) सहकारिवैकल्यप्रयुक्तकार्याभाववत्त्वं वा (४) अन्वयव्यतिरेकवज्जातीयत्वं वा ? (५) सामग्र्येकदेशत्वं वा ? (६) व्यापारवत्त्वं वा? (७) यदनभ्युपगमे नित्यसत्त्वासत्त्वयोरन्यतरप्रसक्तिस्तद्वा ? नाद्यः, रासभस्यापि धूमादिकारणत्वप्रसङ्गात् । न द्वितीयः;

कालस्याहेतुतापत्तेर्नाधितोऽन्योन्यसंश्रयात् ।
स्वात्मवृत्तेरयुक्तत्वान्नियतत्वानिरुक्तितः ॥५३॥

कालाव्याप्तेः, कालस्य कालान्तराभावात् । न चौपाधिकं कालस्य पौर्वापर्यम्; इतरेतराश्रयत्वप्रसङ्गात् । कालपौर्वापर्यं उपाधिपौर्वापर्यम्, तत्पौर्वापर्यं कालस्य तथात्वमिति । उपाध्यन्तराधीनमुपाधेः पौर्वापर्यं न तु कालाधीनमिति चेत्, न; युगपदनन्तोपाध्यवस्थानप्रसङ्गात् । न चैवमस्त्विति वाच्यम्;प्रमाणाभावात्, व्यवहारस्य मायामयत्वेनोपपत्तेः, कल्पकाभावाच्च । अन्यथा तदुपाधेरेवातीतादिव्यवहारोपपत्तौ कालापलापप्रसङ्गात् । उपाधिभेदेऽपि किञ्चिदुपाधिविशिष्टस्य कालस्यान्योपाधिविशिष्टे काले न वृत्तिर्येन कालस्य पूर्वकाले भावित्वम्, स्वात्मनि वृत्तिविरोधात् । न हि कुण्डलिनि देवदत्ते स एव दण्डविशिष्टो वर्तते । का चेयं नियतिः ? (१) किं तस्मिन्सत्येव भावः (२) अनन्यथासिद्धत्वं वा ? (३) तत्तत्कार्यानुगुणतया प्राक्कालसत्त्वं वा ?। (४) तस्मिन्सति भाव एव वा ? नाद्यः; रासभस्यापि धूमविशेषं प्रति नियतत्वापत्तेः, स्वसत्तायां सत्यामेव जायमानधूमविशेषं प्रति तस्यापि नियतत्वात् । न द्वितीयः; रासभाकाशादेरपि तथात्वापत्तेः। स्वकारणसत्त्वेन नित्यविभुतया च तेषां सन्निधिर्न त्वनन्यथासिद्ध इति चेत्; तर्हि किं स्वकारणसन्निधिप्रयुक्तसन्निधीनि बीजधरणीधामसलिलानीत्यकारणान्येवाङ्कुरोत्पत्तौ ? किं वा शब्दसुखाद्युत्पत्तौ ? नित्यविभुस्वभावा वियदात्मादयः ? नापि तृतीयः; प्राक्कालसत्त्वातिरिक्तानुगुणत्वस्याप्य-

---

रासभादेरपि धूमादिपूर्वभावित्वेन धूमादिकारणत्वप्रसक्तेः। द्वितीयश्लोकेन दूषणानि संकलयति—कालस्येति । श्लोकं विशदयति—कालाव्याप्तेरिति । कालस्यौपाधिकपौर्वापर्याभ्युपगमेऽन्योऽन्याश्रयत्वप्रसङ्गमाह—न चेति । न चोपाधेः पौर्वापर्यमुपाध्यन्तराधीनमेव, नतु कालाधीनमिति वाच्यम्; युगपदनन्तोपाध्यभ्युपगमप्रसङ्गात् । न चेष्टापत्तिः; प्रमाणाभावात्, व्यवहारस्य मायामयत्वेनोपपत्तेः, अनन्तोपाधीनां पौर्वापर्यकल्पकाभावाच्च । कालापलापप्रसङ्गमप्याह—अन्यथेति । उपाधिभेदपक्षेऽपि स्वात्मनि वृत्तिविरोधदोषमुपपादयति—नहि कुण्डलिनीति । किञ्च द्वितीयकल्पे स्थितं नियतिपदार्थं चतुर्धा विकल्प्य दूषयितुमुपक्रमते—का चेयमिति । तत्र नाद्यः, क्वचिद्रासभस्यापि धूमविशेषं प्रति नियतत्वापत्तेः। एतदेव विशदयति—स्वसत्तायामिति । अनन्यथासिद्धत्वपक्षेऽपीदमेव दूषणमाह—न द्वितीयः । रासभस्य स्वकारणप्रयुक्तसन्निधित्वमाकाशस्य च विभुत्वेनावर्जनीयसन्निधित्वं च न तयोः सन्निधिरनन्यथासिद्ध इति चेन्न; अङ्कुरोत्पत्तौ बीजादीनामप्यकारणत्वप्रसङ्गात्, शब्दसुखाद्युत्पत्तौ च नित्यविभुस्वभावानां वियदात्मादीनामप्यकारणत्वप्रसङ्गाच्च । धाम=तेजः । तृतीयकल्पे प्राक्कालसत्त्वातिरिक्तानुगुणत्वं निरूपयितुमशक्यम् । चतुर्थकल्पे

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

निरूपणात् । न चतुर्थः; बीजादेरकारणत्वप्रसङ्गात् । न हि तस्मिन्सति भाव एवाङ्कुरादेः सहकारिमध्यमध्यासीने तस्मिन्सति भवत्येवेति चेत्, मैवम्, रासभस्यापि कदाचित्सहकारिमध्यमध्यासीनतासम्भवात् ।

सहकारिवैकल्यप्रत्युक्तकार्याभाववत्त्वं कारणत्वमिति तृतीयोऽपि न;

हेतुसाकल्यरूपायां सामग्र्यां तदसम्भवात् ।
कारणत्वानिरुक्तौ च सहकार्यनिरूपणात् ॥५४॥

सामग्र्या अकारणत्वप्रसङ्गात्, तस्याः सहकारिवैकल्यप्रयुक्तकार्याभाववत्त्वाभावात्, सहकारिसकलताया एव सामग्रीत्वात् । किञ्च सहकरोतीति सहकारि कारणान्तरम्, तथा च कारणत्वस्यैवाद्याप्यनिरुक्तेरात्माश्रयः । नापि चतुर्थः;

जातेरहेतुतापत्ते रासभेऽतिप्रसक्तितः ।
गगनादिषु चाव्याप्तेरन्वयादेरयोगतः ॥५५॥

जातेरकारणत्वप्रसङ्गात्; जातेर्जातिमत्त्वाभावात्, द्रव्यत्वादिना रासभादेरप्यन्वयव्यतिरेकवद्वह्न्यादिजातीयत्वेन धूमादिकारणत्वप्रसङ्गात् । द्रव्यत्वावान्तरजातीयत्वं विवक्षितमितिचेत्, न; कालाकाशदिशामकारणत्वप्रसङ्गात्; तेषां द्रव्यत्वावान्तरजातिविधुरत्वात् । कौ चेमावन्वयव्यतिरेकौ ? किं कालतः? उत देशतः? उतोभाभ्याम् ?आद्ये, काले तदभावादव्याप्तिः । द्वितीये तु देशे तदभावः । न तृतीयोऽपि; उभयोरप्युभयाभावात् । सति भावोऽसत्यभाव एव ताविति चेत्, न, तदभावेऽपि तृणारणिमणीनां दहनहेतुत्वाङ्गीकारात् । तेषामेकैकाभावेऽपि दहनदर्शनात् । तत्रापि तज्जन्यदहनानामवान्तरजातिभेदान्न व्यभिचार इति चेत्, न; जातिभेदे प्रमाणाभावात् । न तावत्प्रत्यक्षप्रमाणम्, इन्द्रियसन्निकर्षमात्रे

बीजादेरकारणत्वप्रसक्तिः । नहि बीजादिसत्त्वेऽपि नियमेनाङ्कुराद्युत्पत्तिर्दृश्यते । न च सहकारिमध्यासीने सति बीजादावङ्कुरोत्पत्तिरवश्यम्भाविनीति वाच्यम्; रासभादेरपि क्षित्यादिसहकारिनिवेशे तथाविधनियममात्रेणाङ्कुरं प्रति नियतत्वापत्तेः । पूर्वोक्ततृतीयपक्षे दूषणानि श्लोकेन सङ्कलयति—हेत्विति । तदसम्भवात्=निरुक्ततृतीयकारणत्वलक्षणासम्भवादित्यर्थः । प्रथमं कारणत्वस्यानिरुक्तौ सहकारिकारणं किं सहकरोतीति भावः । श्लोकं विशदयति—जातेरित्यादिना । अन्वयव्यतिरेकिवज्जातीयत्वमिति चतुर्थपक्षेऽपि दोषान् संकलयति—जातेरिति । जातौ गगनादौ चाव्याप्तेः, रासभादेरतिव्याप्तेश्च । तथाऽन्वयव्यतिरेकयोरपि देशतः कालतो निरूपयितुमशक्यत्वादिदं लक्षणमसङ्गतमिति । सङ्ग्रहं विशदविवृत्या विशदयति—जातेरकारणत्वेत्यादिना । न च द्रव्यत्वव्याप्यजातिमत्त्वं विवक्षितमिति वाच्यम्; कालाकाशदिक्षुकारणत्वाभावप्रसक्तेः । न च कारणे सति कार्यस्य भावोऽसत्यभाव इत्यन्वयव्यतिरेकावभिमताविति वाच्यम्, तथाविधान्वयव्यतिरेकाभावेऽपि तृणारणिमणीनामेकैकाभावेऽपि वह्नेरुत्पत्त्यभ्युपगमात् । न च तृणादिजन्यास्तित्ववान्तरवह्नित्वजातिभेदाङ्गीकारान्न व्यभिचार इति वाच्यम्, तादृशजातिभेदे प्रमाण

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सुनिपुणैरप्यनुपलभ्यमानत्वात् । ननु तृणारणिमणिप्रभवत्वज्ञानसंस्कृतेन्द्रियसन्निकर्षाधिगम्योऽयं जातिभेदः, विशिष्टमातृपितृप्रभवत्वज्ञानसस्कारसचिवलोचनगोचर इव ब्राह्मणत्वमिति चेत्, न; तेषां व्यभिचारादेव जनकत्वासिद्धेः । जातिभेदालिङ्गितव्यक्तिविशेषं प्रति न तस्य व्यभिचार इति चेत्, न; सिद्धे जातिभेदे जनकत्वसिद्धिस्तत्सिद्धौ च जातिभेदसिद्धिरितीतरेतराश्रयत्वप्रसङ्गात् । ननु कार्यविशेषेण तृणादिकारणविशेषप्रभवाणां बहूनां वैजात्यानुमानमस्तु, तथा हि—"प्रदीप एव प्रासादोदरव्यापकं प्रभामण्डलमारभते, न तथा ज्वालाजटिलोऽपि वह्निर्नतरां च कारीषः" इति कुसुमाञ्जलिकार इति चेत्, न; एकजातीयत्वग्राहिप्रत्यक्षप्रतिहतस्यानुमानस्यानुत्थानात् । न च प्रत्यक्षायोग्यं वैजात्यम्; प्रत्यक्षव्यक्तिवृत्तिसामान्यस्याप्रत्यक्षत्वायोगात् । प्रासादोदरव्यापिप्रभामण्डलादिकार्यभेदस्य तत्तत्सहकारिभेदादन्यथोपपत्तेश्च, एकजातीयेऽपि मृदादौ तत्तत्सहकारिसाहित्येन तत्तद्विजातीयघटशरावादिकार्योपलब्धेः । एकजातीयादपि घटाद्भिन्नजातीयानां रूपादीनामुत्पत्तेरभ्युपगमाच्च ।

नापि पञ्चमः; सामग्र्या दुर्निरूपत्वेन तदेकदेशस्यापि दुर्निरूपत्वात् । तथा हि—

अतिव्याप्तेः स्ववृत्तित्वाद्भेदेऽभेदेऽप्यसंभवात् ।
कार्यस्य हेतुभिः सिद्धेर्वृथा साकल्यकल्पना ॥५६॥

किं वस्तूनां साकल्यं सामग्री ? किं वा कारणानाम् ? नाद्यः; अकारणसाकल्येऽपि

भावात् । तत्र प्रत्यक्षतो वैजात्यमनुपलब्धिपराहतमित्याह—न तावदिति । न च माभूदिन्द्रियमात्रेण जातिभेदाधिगमः, किन्त्वयं माणवको ब्राह्मणमातृपितृभ्यां जात इति विशिष्टानुभवजन्यसंस्कारसहकृतनयनगोचरो ब्राह्मणत्वं यथाऽयमग्निस्तृणादिजन्य इत्यनुभवजन्यसंस्कारसचिवेन्द्रियसन्निकर्षेण तृणादिजन्यवह्निनिष्ठावान्तरजातिभेदो गृहीतुं शक्य इति वाच्यम्, तृणादीनां निरुक्तव्यभिचारादेव वह्निजनकत्वासिद्धेः । न च जातिभेदयुक्तवह्निविशेषं प्रति तृणादीनां न व्यभिचार इति वाच्यं; परस्पराश्रयत्वादित्याह—सिद्धे जातिभेद इत्यादि । न च मन्दतीव्रकार्यविशेषेण तृणादिवह्नीनां भेदोऽनुमातुं शक्यः; तत्र कुसुमाञ्जलिवाक्यप्रमाणमाह—तथाहीति । कारीषः=गोमयोद्भवः । इति वाच्यम्; तृणादिजन्याग्निष्वेकजातीयत्वग्राहकप्रत्यक्षबाधितत्वेन तत्र जातिभेदानुमानानुदयात् । न चात्र प्रत्यक्षायोग्यो तादृशजातिभेदो विवक्षितः; प्रत्यक्षव्यक्तिनिष्ठसामान्यस्याप्रत्यक्षत्वायोगात् । मन्दतीव्रादिप्रकाशकार्यभेदस्यान्यथोपपत्तिमाह—प्रासादेति । एकजातीयात्सहकारिभेदयुताद्घटादिद्रव्यादपि तद्भिन्नजातीयानां रूपादीनामप्युत्पत्त्यभ्युपगमाच्च ।

नापि सामग्र्येकदेशत्वं कारणत्वमिति पञ्चमपक्षोऽपि युक्तः, सामग्रीदुर्निरूपत्वे तदेकदेशस्यापि दुर्निरूपत्वात् । तत्र सामग्रीदोषान् श्लोकेन संकलयति—अतिव्याप्तेरित्यादिना । श्लोकं विशदयति—किं वस्तूनामित्यादिना । वस्तूनां साकल्यं सामग्रीत्युक्तेऽकारणभूतसाकल्येऽप्यतिव्याप्तिः । कारणानां साकल्यं सामग्रीति चोक्ते कारणत्वस्याद्याप्यनिरूपणादात्माश्रयता । किं च कारणसाकल्यं कारणानां स्वरूपमत्युक्तौ व्यस्तेभ्योऽसम्मिलितेभ्योऽपि कारणेभ्यः कार्योत्पादप्रसङ्गः । कारणसाकल्यस्य कारणातिरिक्तत्वे साकल्यस्य नित्यत्वे सदा कार्योत्पादप्रसङ्गः । अनित्यत्वेऽपि दोषमाह—

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रसङ्गात् । द्वितीये, कारणत्वस्याद्याप्यनिरुक्तेरात्माश्रयः । कारणसाकल्यं च कारणानां स्वरूपम् ? अतिरिक्तं वा ? आद्ये व्यस्तेभ्योऽपि कार्यमुत्पद्येत । द्वितीये, नित्यत्वे साकल्यस्य सदा कार्योत्पादः, अनित्यत्वेऽपि व्यस्तानामेव कारणत्वे साकल्यस्यापि सदातनत्वेन कार्यस्यापि सदोत्पादः । समस्तानां हेतुत्वे चात्माश्रयः, अनवस्था वा । साकल्यजनकेभ्य एव च प्रधानकार्योपपत्तेः, किमजागलस्तनायमानेन साकल्येन ? एतेन कारणानामन्योऽन्यवैशिष्ट्यं सामग्रीति प्रत्यादिष्टम् । न च कारणसन्निधिः सामग्री; तदनिर्वचनात् । न तावदेककालत्वं सन्निधिः; काले तदभावात् । नाप्येकदेशत्वम्, देशे तदभावात् । नोभयम्; उक्तदोषानुषङ्गात् । नापि संयोगसमवायौ; तयोरेवाकारणत्वप्रसङ्गात् । नाप्येककार्यकारणत्वं सन्निधिः; कार्यकारणभावस्यैवाप्रसिद्धेरात्माश्रयात् । नापि कारणानां चरमो व्यापारः सामग्री, व्यस्तानां समस्तानां वा तज्जनकत्वे पूर्वोक्तदोषानुषङ्गात् । अपि च व्यापारे जनयितव्ये कारकाणि व्यापारवन्ति ? निर्व्यापाराणि वा ? आद्येऽनवस्था । द्वितीये, कार्यमेव प्रधानं तथा कुर्वन्तु कृतमन्तरा व्यापारेण व्यापारस्य च सव्यापारस्य जनकत्वेऽनवस्था, निर्व्यापारत्वे च कारकाणामेव तथात्वमस्तु, किं व्यापारेण ? यदनन्तरं कार्यं भवत्येव सा सामग्रीति चेत्, न; विभागानन्तरं पूर्वसंयोगनाशस्यावश्योत्पत्तेर्विभागस्यापि तथा सामग्रीत्वप्रसङ्गात्, एवं कर्मणो विभागेऽन्त्यतन्तुसंयोगस्य च पटे तत्त्वप्रसङ्गाच्च ।

नापि षष्ठः;

व्यापाराव्यापनादात्माश्रयत्वादनिरुक्तितः ।
समवायेऽस्य हेतुत्वे पूर्वदोषानुसङ्गतः ॥५७॥

व्यस्तानामेवेति । समस्तानां साकल्यजनकत्वेऽपि दोषमाह—समस्तानामिति । श्लोकस्योत्तरार्धं व्याचष्टे—साकल्येति । सामग्रीलक्षणान्तरेऽप्युक्तदोषानतिदिशति—एतेनेति । वैशिष्ट्यस्य भिन्नत्वेऽभिन्नत्वे वेत्यादिदोषाणां समानत्वादिति भावः । एवं कारणसन्निधेः सामग्रीत्वे तस्यैककालवृत्तित्वस्वीकारे कालेऽव्याप्तिः, तस्य चैकदेशवृत्तित्वे देशेऽव्याप्तिः, उभयवृत्तित्वे पूर्वोक्तदोषप्रसक्तिरेव । नापि संयोगः समवायो वा सन्निधिर्भवितुमर्हति; संयोगे संयोगाभावात्समवाये समवायाभावाच्च तयोरेवाकारणत्वप्रसङ्गात् । नाप्येककार्यकारणत्वं सन्निधिः; कारणे कारणत्वापेक्षायामात्माश्रयदोषप्रसङ्गात् । अत्र पक्षे दोषान्तरमप्याह—अपि चेति । व्यापारोत्पादनाय सकलकारकाणां व्यापारवत्त्वस्वीकारेऽनवस्था, निर्व्यापारत्वाभ्युपगमे तदेव कारकं प्रधानकार्यमुत्पादयन्तु कृतमन्तराव्यापारेण । न च व्यापारोऽपि सव्यापारः सन्नेव कार्यं जनयतीतिवाच्यम्; तथात्वेऽनवस्थापत्तेः, तस्य निर्व्यापारतया कारणत्वाभ्युपगमे कारकाणामेव तथात्वमस्तु कृतं व्यापारेण । सामग्र्या लक्षणान्तरमाह—यदनन्तरमिति । विभागस्यापि तथाविधसामग्रीत्वप्रसङ्गमाह—नेत्यादिना । एवं कर्मणो विभागेऽन्त्यतन्तुसंयोगस्य च पटे विषये सामग्रीत्वप्रसक्तिरितिभावः । व्यापारवत्त्वं कारणत्वमिति षष्ठपक्षेऽपि दोषान् श्लोकेन संकलयति—व्यापारेत्यादिना ।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

चरमव्यापारस्य व्यापारान्तरविधुरस्याकारणत्वप्रसङ्गात् । तज्जन्यस्तज्जन्यजनको व्यापार इति जनकत्वमन्तर्भाव्य व्यापारनिरुक्तेरात्माश्रयत्वाच्च व्यापारवत्त्वं च व्यापारसमवायित्वम् ? उत तज्जनकत्वम् ? नाद्यः; यागादेः स्वर्गाद्यकरणत्वप्रसङ्गात् । ध्वस्तस्य यागादेरपूर्वादिव्यापारासमवायित्वात् । नेतरः; आत्माश्रयत्वात् । नापि सप्तमः;

असिद्धेः प्रतिबन्धस्य नृशृङ्गादावभावतः ।
सत्त्वे सतीति चायुक्तं दृष्टान्तादेरसिद्धितः ॥५८॥

निर्हेतुकस्य नित्यसत्त्वासत्त्वाभ्यां प्रतिबन्धासिद्धौ नित्यसत्त्वासत्त्वयोरन्यतरप्रसङ्गस्य दुर्वचत्वात् । अहेतुकत्वेऽपि प्रागभावस्य नित्यसत्त्वासत्त्वाभावात्, शशविषाणस्य नित्यसत्त्वाभावाच्च । ननु भावत्वे सत्यहेतुकत्वस्य सदातनत्वे व्याप्तिराकाशादौ सिद्धेति चेत्, न; अस्याव्याप्तेः स्वभाववादिनं प्रत्यसिद्धेः, भूतचतुष्टयतत्त्ववादिना तेनात्माकाशादीनामनभ्युपगमात्, विपर्ययापर्यवसानाच्च प्रसङ्गस्य । नहि यद्भावत्वे सति सदा सत्त्वानधिकरणं तत्सहेतुकमित्युपसंहारस्थलमस्ति, लोकायतिकं बौद्धं प्रति कार्यकारणभावस्यैवाद्याप्यसिद्धेः । ननु विमतं सहेतुकं प्रागभाववत्त्वाद्यन्निर्हेतुकम्; न तत्प्रागभाववदात्मवदिति वेदान्तिनं प्रति प्रयोग इति चेत्, न; हेतुशब्दार्थानिरुक्तौ सहेतुकत्वस्याप्यसिद्धेरप्रसिद्धविशेषणत्वात् । कारणानिरुक्तौ च व्यापारवत्कारणं कारकमिति कारकलक्षणमप्यपास्तम् । तदेवं कारणलक्षणं दुर्भणम् ।

पूर्वदोषानुसङ्गतः—अव्याप्तिरात्माश्रयत्वं च दोषोऽनुसज्ज्यते । श्लोकं विशदयति—चरमेत्यादिना । चरमव्यापारे व्यापाराभावान्न तत्र कारणत्वसिद्धिः । तज्जन्यत्वेसति तज्जनको व्यापार इत्युक्तौ व्यापारे व्यापारान्तर्भावित्वे आत्माश्रयत्वापत्तिः । व्यापारसमवायित्वं व्यापारवत्त्वमित्युक्ते यागादेः स्वर्गाद्यकारणत्वप्रसङ्गः, नहि ध्वस्तस्य यागादेः स्वजन्यापूर्वादिव्यापारसमवायित्वं सम्भवति । व्यापारजनकत्वं च व्यापारवत्त्वमित्युक्तावात्माश्रयत्वापत्तिश्चेत्यर्थः ।

नापि यदनभ्युपगमे नित्यसत्त्वासत्त्वयोरन्यतरप्रसक्तिरिति सप्तमः पक्षः । अत्रापि दोषान् श्लोकेन संकलयति—असिद्धेरित्यादिना । नरविषाणादौ व्यभिचारदर्शनेन निरुक्तलक्षणनिष्ठविशेषणविशेष्ययोः प्रतिबन्धकत्वासिद्धिः । आदिना—प्रागभावो ग्राह्यः । दृष्टान्तादेरसिद्धितो निरुक्तलक्षणनिष्ठविशेषणभागस्य सत्त्वे सतीति विशेषणत्वेऽपि निरुक्तलक्षणमयुक्तमित्यर्थः । श्लोकं उत्तरार्धं विशदयति—निर्हेतुकस्येत्यादिना । प्रतिबन्धासिद्धेर्विवरणमाह—अहेतुकत्वे इत्यादिना । उत्तरार्धे शङ्कते—नन्विति । दृष्टान्तादेरित्यत्रादिशब्दसंकलितं दोषमाह—विपर्ययेति । यन्निर्हेतुकं स्यात्तद्भावत्वे सति सदा सत्त्वाधिकरणं स्यादिति तर्कः । तस्य चैवं विपर्ययः (यद्भावत्वेसति सत्त्वानधिकरणं) तत्सहेतुकमित्युपसंहारस्थलं नास्ति, चार्वाकं बौद्धं च प्रति कार्यकारणभावस्याद्याप्यसिद्धेः । वेदान्तिनं प्रति व्यतिरेकव्याप्तिं दर्शयन् कारणत्वमुपपादयति—नन्विति । विमतं सहेतुकं प्रागभाववत्त्वाद्यन्निर्हेतुकं, न तत्प्रागभाववदात्मवदिति । चेन्न, वेदान्तिनं प्रत्यपि तात्त्विकहेतुत्वासिद्धिः । अतः सहेतुकस्याद्याप्यसिद्धेरप्रसिद्धविशेषणता दोषः स्यात् । प्रसङ्गात्कारणलक्षणमपि दूषयति—कारणानिरुक्ताविति । कारणलक्षणदुर्निरूपमुपसंहरति—तदेवमिति ।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तथा कार्यलक्षणमपि—(१) तत्किं कारणाधीनस्वात्मलाभम् ? (२) प्रागभावोपलक्षितसत्तायोगि वा ? (३) प्रागभावप्रतियोगि वा ? (४) प्रागभाववद्वा ? (५) प्रागसत्युत्तरकालसम्बन्धि वा ? सर्वथा न निरूपणपथमवतरति—

अनिरुक्तेतिव्याप्तेरव्याप्तेस्तदसम्भवात् ।
अतिप्रसङ्गतोऽव्याप्तेर्मतुबर्थानिरूपणात् ॥५६॥

न तावदाद्यः; कारणस्यानिरुक्तौ तदधीनस्वात्मलाभस्याप्यनिरुक्तेः । न द्वितीयः; आत्मादीनामपि कार्यत्वप्रसङ्गात् । घटादौ सत्ताया एव प्रागभावेनोपलक्षितत्वात्तस्यास्तत्र भावात्, स्वप्रागभावोपलक्षितसत्तायोगित्वमिति लक्षणविवक्षायामननुगम एव; सत्ताविरहिणः प्रध्वंसस्याकार्यत्वप्रसङ्गाच्च । न तृतीयः; प्रतियोगिशब्देनैकदेशानवस्थानाभिधाने लक्षणस्यासम्भवित्वात्, कार्यतत्प्रागभावयोः कारणे वृत्तेः, एककालानवस्थाने तु कालस्यापि कार्यत्वप्रसङ्गात्, कालस्य कालान्तराभावेन प्रागभावेनैकस्मिन्कालेऽनवस्थानात् । घटादेरपि कार्यस्य यत्किञ्चित्प्रागभावेन सहावस्थानादसम्भवदोषस्तदवस्थः । स्वप्रागभावेन सहानवस्थाने चात्मादेरपि कार्यत्वप्रसङ्गः; तेषां प्रागभावाभावेन तेन सहानवस्थानात् । न चतुर्थः; मतुबर्थस्याधिकरणार्थतायामात्मादेरपि कार्यत्वप्रसङ्गात् । तेषामपि सुखादिकार्यप्रागभावाधिकरणत्वात् । प्रतियोगिपरत्वे पूर्वदोषानुषङ्गात् । न पञ्चमः; उत्तरकालस्याकार्यत्वप्रसङ्गात् । तस्योत्तरकालसम्बन्धित्वाभावात् । अथ नोत्तरकालः कार्यं नित्यत्वात्तस्येति चेत्, न; प्रागभावस्यापि कार्यत्वप्रसङ्गात्, तस्य प्रागसद्रूपत्वात्; किञ्चिच्चापेक्ष्योत्तरकालसम्बन्धित्वाच्च । प्रागसत्त्वशब्देन प्रागभाववत्ता विवक्षितेति चेत्, न; मतुबर्थानिरूपणात्, कालसम्बन्धपदस्य वैयर्थ्य-

---

सम्प्रति कार्यलक्षणं दूषयितुं विकल्पयति—तत्किमित्यादिना । स्वात्मलाभः, सत्तायोगित्वम्, अभावप्रतियोगित्वम् अभाववत्त्वम्, उत्तरकालसत्त्वं चेत्येतत्सर्वं नित्येष्वप्यस्तीति तद्वारणाय प्रकृतेषु पञ्चष्वपि लक्षणषु प्रथमदलानि । श्लोकेन दूषणानि सङ्कलयति—अनिरुक्तेरित्यादिना । संग्रहं विशदयति—न तावदाद्य इत्यादिना । प्रथमपक्षे कारणानिरुक्तौ तदधीनात्मलाभस्याप्यनिरुक्तिः । द्वितीये त्वात्मादीनामपि कार्यत्वप्रसङ्गः । घटादौ या सत्ता प्रागभावोपलक्षिताऽस्ति, सैवात्मादिष्वप्यस्ति, सत्ताया एकत्वादित्यर्थः । ननु स्वप्रागभावोपलक्षितसत्तायोगित्वं विवक्षितमिति चेन्न, स्वशब्दार्थाननुगमेनाव्याप्तेः । सत्ताविरहिणः प्रध्वंसस्याकार्यत्वप्रसङ्गाच्च । तृतीये प्रतियोगिशब्देनैकदेशानवस्थानोक्तौ लक्षणस्यासम्भवित्वम्, कार्यतत्प्रागभावयोर्द्वयोरेकस्मिन् कारणे वर्तमानत्वात् । न चैककालानवस्थानाभिधानेऽदोष इति वाच्यम्; कालस्य कालान्तराभावेन स्वप्रागभावेनैकस्मिन् कालेऽनवस्थितस्य कालस्यापि कार्यत्वप्रसङ्गात् । घटादेरपि कार्यस्य येन केनचित्प्रागभावेन सहावस्थानादसम्भवापत्तेश्च । न च स्वप्रागभावेन सहानवस्थानाभिधानेऽदोषः; आत्मादीनामपि कार्यत्वप्रसङ्गात्, तेषां प्रागभावाभावेन तेन सहानवस्थानात् । चतुर्थे मतुवर्थस्याधिकरणत्वाभ्युपगमे सुखादिकार्यप्रागभावाधिकरणतयात्मादीनामपि कार्यत्वप्रसङ्गात् । मतुबर्थस्य प्रतियोगित्वाभिधाने तृतीयलक्षणोक्त दोषप्रसङ्गः । पञ्चमे-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रसङ्गाच्च । एतेन नियतोत्तरक्षणवर्ति कार्यमित्यपि परास्तम्; कारणनिरुक्तौ तदपेक्षया नियतोत्तरक्षणवर्तित्वस्थानिरूपणात् ।

कालनिरूपणाच्च न पूर्वोत्तरक्षणभावः कारणकार्यभावः । तथाहि—

प्रत्यक्षागोचरत्वेन परत्वादेरलिङ्गतः ।
स्वरूपतोऽनिमित्तत्वादुपाधौ निष्फलत्वतः ॥६०॥
दिवाकरपरिस्पन्दपिण्डसङ्गतिसम्भवात् ।
व्यापिनश्चेतनादेव कथं कालः प्रसिद्धयति ॥६१॥

न तावत्काले प्रत्यक्षं प्रमाणम्; द्रव्यग्राहकयोश्चक्षुस्पर्शनयोस्तस्मिन् रूपविरहिणि स्पर्शविधुरे चाप्रवृत्तेः; मनसश्च बाह्येन्द्रियनिरपेक्षस्य बहिरप्रवृत्तेः, अननुभवाच्च । नाप्यनुमानम्; तत्प्रतिबद्धलिङ्गाभावात् । परापरयौगपद्यायौगपद्यचिरक्षिप्रप्रत्ययाः प्रत्येकं लिङ्गमिति चेत्, न; तेषां निरुपाधिककालनिबन्धनत्वे प्रत्ययवैलक्षण्यानुपपत्तिप्रसङ्गात् । तपनपरिस्पन्दभेदलक्षणोपाधिकवलितकालाधीनत्वे तूपाधिभिरेव तत्सिद्धेः, कृतं कालकल्पनया ? ननु 'तरणिपरिस्पन्दभेदानां युवस्थविरादिपिण्डैः स्वतः सम्बन्धासम्भवेन दिवसमासादिविशिष्टप्रत्ययजनकत्वायोगात्पिण्डचण्डरोचिः परिस्पन्दयोः परम्परासम्बन्धसम्पादकः कालः स्वीकर्तव्यः । स च सम्बन्धः संयुक्तसंयोगिसमवायात्मा । न च तत्र पृथिव्यादिचतुष्टयं हेतुः; तस्य तपनपिण्डाभ्यां नियमेन संसर्गाभावात् । न च

व्याप्तिमाह—उत्तरकालस्येति । एतेनेत्यस्यैव विवरणमाह—कारणानिरुक्ताविति । यत्किञ्चिदपेक्षया नियतत्वविवक्षाग्रामप्यतिप्रसक्तिस्तदवस्थेति भावः ।

सम्प्रति श्लोकेन काले प्रमाणं दूषयति—प्रत्यक्षेति । न तावत्कालसिद्धौ प्रत्यक्षप्रमाणं, रूपादिशून्यद्रव्यत्वेन बाह्यत्वेन च बहिरन्तःकरणागोचरत्वात् । नाप्यनुमानं, कालसिद्धौ परत्वादेरलिङ्गत्वात् । नहि परत्वादिसिद्धौ कालस्य स्वरूपतो निमित्तत्वं भवितुमर्हति, नाप्युपाधितः; तैरेवोपाधिभिः परत्वादिव्यवहारसिद्धेः कालकल्पनस्य निष्फलत्वापत्तेः । यः किल विभुरात्मा परमेश्वरस्तस्मादेव दिवाकरपरिस्पन्दानां पिण्डानां च सङ्गति सम्भवान्न तन्सिद्धयेऽपि कालः कल्पनीय इति श्लोकयोः सरलार्थः । क्रमशः श्लोकं विशदयति—न तावदित्यादिना । प्रत्यक्षं निरस्यानुमानं निराकर्त्तुमाह—परापरेति । न च परापरत्वं यौगपद्यायौगपद्यत्वं चिरक्षिप्रत्वं चेति षट्कप्रत्ययेनापि कालोऽनुमातुं शक्यः; निरुक्तपरत्वादिधर्माणां निरुपाधिककालनिबन्धनत्वे प्रतीतिविलक्षणत्वानुपपत्तिप्रसङ्गात् । सूर्यपरिस्पन्दादिरूपोपाधिविशिष्टकालस्य परत्वादेर्निमित्तत्वाभ्युपगमे तैरेवोपाधिभिः परत्वादिसिद्धिसम्भवे कृतं कालकल्पनया । तपनपरिस्पन्दभेदः=सूर्यपरिस्पन्दविशेषः । तरणिपरिस्पन्दभेदानां=सूर्यसमवेतपरिस्पन्दविशेषाणाम् । पिण्डचण्डरोचिःपरिस्पन्दयोः=शरीरसूर्यपरिस्पन्दयोः । संयुक्तसंयोगिसमवायात्मा=देहेन संयुक्तः कालस्तस्य संयोगी सूर्यस्तत्रसमवेतः परिस्पन्दः सम्बन्ध इत्यर्थः । न च तत्र पृथिव्यादिचतुष्टयं कारणं, तस्य नियमेन सूर्यशरीरयोः संसर्गाभावत् । न च निरुक्तसम्बन्धः सूर्यकिरणैरपि सम्पादयितुं शक्यः; सूर्यकिरणाभावेऽपि गर्भगृह-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दिनकरकरनिकरस्तथा; तदभावे गृहनिखातनिध्यादिषु मासाद्यवच्छेदप्रतीतेः। न चाकाशात्मानौ तथा; विशेषगुणवत्त्वात्, पृथिव्यादिवत्। न चाव्यापकत्वमुपाधिः; एकस्य व्यापकस्य सम्बन्धोपनायकत्वे व्यापकान्तरस्य तदहेतुतया व्यतिरेकव्याप्तौ साध्याव्यापकत्वेनानुपाधित्वात्। ततः परिशेषात्पिण्डसंयुक्तः कालस्तपनेनापि संयुज्यमानस्तत्समवेतपरिस्पन्दानां परम्परया पिण्डसम्बन्धहेतुः सिद्धः' इति लीलावतीकारः।

मैवम्; उभयवादिसम्प्रतिपन्नात्मनैव वस्तूनामुपाधिसम्बन्धसिद्धेरतिरिक्तद्रव्यकल्पनायां कल्पनागौरवप्रसङ्गात्। न च विशेषगुणवत्त्वादात्मनः पृथिव्यादिवदुपाधिसम्बन्धानुपनायकत्वम्; विशेषगुणवैधुर्येण मनोवदेव भवदभिमतकालेऽप्युपाध्यनुपनायकत्वप्रसङ्गस्य दुर्वारत्वात्। अव्यापकत्वोपाधेस्त्वयैव निवारितत्वात्। ननूपाधिसम्बन्धोपनायकत्वेनैव कालसिद्धस्तत्पक्षीकारेण तद्विपर्ययप्रसञ्जने धर्मिग्राहकप्रमाणबाधस्तदसिद्धावाश्रयासिद्धिरिति चेत्, न; प्रतिवादिप्रसिद्धतामात्रेणैवाश्रयतोपपत्तेरसकृदुपपादितत्वात्। विशेषगुणविधुरत्वं तरणिस्पन्दसंसर्गोपनायकवृत्ति न भवति विशेषगुणशून्यमात्रवृत्तित्वात् मनस्त्ववदिति कालवादिनं प्रति प्रकारान्तरेणापि निरुक्तिसम्भवाच्च। न च परत्वापरत्वगुणासमवायिकारणसंयोगाश्रयतया कालसिद्धिः; परत्वापरत्वयोरेवासिद्धेः। न च परापरत्वव्यवहारानुपपत्त्या तत्सिद्धिः; प्रचुराप्रचुरतरणिपरिस्पन्दान्तरितजन्मत्वेनैव तत्सिद्धेः। अन्यथा परत्ववन्मध्यमत्वस्यापि गुणान्तरस्य स्वीकारः स्यादिति भूषणभाषितदूषणप्रसङ्गात्। न च तरणिपरिस्पन्दानां प्राचुर्यमल्पत्वं च न संख्याभेदो,

---

गर्त्तनिध्यादिषु मासादिविशिष्टव्यवहार दर्शनात्। न चाकाशात्मानौ तथासम्बन्धसम्पादकौ; विशेषगुणवत्त्वात्पृथिव्यादिवत्। निरुक्तानुमानेऽव्यापकत्वमुपाधिमुद्भाव्य निराकुरुते—न चाव्यापकत्वमिति। तत्र हेतुमाह—एकस्येति। परिशेषमुपसंहरति—तत इत्यादिना।

एतन्निरासपरत्वेन द्वितीयं श्लोकं योजयति—मैवमित्यादिना। उभयवादिसम्प्रतिपन्नेनात्मना शरीरादिवस्तूनां सूर्यपरिस्पन्दाद्युपाधिसम्बन्धसिद्धेरतिरिक्तकालद्रव्यकल्पनायां कल्पनागौरवप्रसङ्गात्। न च ज्ञानादिविशेषगुणवत्त्वादात्मनः पृथिव्यादिवन्नोपाधिसम्बन्धसम्पादकत्वम्; भवदभिमतः कालो नोपाधिसम्पादकः, विशेषगुणवैधुर्यात् मनोवदिति प्रसङ्गस्य दुर्वारत्वात्। अव्यापकत्वोपाधेस्त्वयैव निवारितत्वात्। ननु सूर्यपरिस्पन्दाद्युपाधिसम्बन्धसम्पादकत्वेनैव कालसिद्धेस्तमेव कालं पक्षीकृत्य तत्र सम्बन्धसम्पादकत्वाभावसम्पादने धर्मिग्राहकप्रमाणबाधस्तत्कालस्यासिद्धावासिद्धिरिति चेन्न, प्रतिवादिप्रसिद्धि मात्रेणैवाश्रयतोपपत्तेरसकृदुपपादितत्वात्। कालवादिनं प्रति कालं पक्षीकृत्य प्रकारान्तरेणापि निरुक्तिं दर्शयति—विशेषगुणविधुरत्वमिति। सत्तायौ व्यभिचारवारणाय हेतुशरीरे मात्रपदम्। असिद्धिवारणाय विशेषपदम्। न चानुभूतयोः परत्वापरत्वयोरसित किञ्चिदसमवायिकारणं, भावकार्यत्वात्, तयोरसमवायिकारणसंयोगाश्रयतया कालसिद्धिरिति वाच्यम्, परत्वापरत्वयोरेवासिद्धेः। नच परत्वापरत्वव्यवहारान्यथानुपपत्त्या परत्वापरत्वसिद्धिरिति वाच्यम्; न्यूनाधिकसूर्यपरिस्पन्दव्यवहितजन्मत्वेनैव कालिकपरत्वादिसिद्धेः। विपक्षे भूषणभावित-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नापि परिमाणविशेषो; निर्गुणे कर्मण्यसम्भवादिति वाच्यम्; भवन्मते परत्वापरत्वहेतुभूतताया अपेक्षाबुद्धेर्यद्विषयनिबन्धनं वैचित्र्यं तस्यैवास्माभिः प्रचुराल्पतरशब्देनाभिलापात्। अपेक्षाबुद्धेः स्वभावभेदादेव वैचित्र्यव्यवहारहेतुत्वं न विषयभेदापेक्षयेति चेत्, मैवम्; परापरबुद्ध्योरप्यन्तरेणैव विषयवैचित्र्यं स्वभावभेदादेव तथाविधव्यवहारहेतुत्वप्रसङ्गात्। तथा नीलपीतादिबुद्धीनामपीति तथागतानां त्वयैव दत्तः स्वहस्तः स्यात्। तदेवं न कालसद्भावसिद्धिः।

इन्द्रियानधिगम्यत्वान्नाध्यक्षं नानुमा दिशि।
वर्णैरर्थान्तरत्वेन साध्यासिद्धिर्निदर्शने ॥६२॥

एतेन दिगपि व्याख्याता; तस्या अप्यनध्यक्षत्वादलिङ्गत्वाच्च। ननु पूर्वापरदक्षिणोत्तरादिदशप्रत्ययाः सन्ति तत्कथं लिङ्गाभाव इति चेत्, न; तेषां निरुपाधिदिगालम्बनत्वे सर्वत्र सर्वप्रत्ययप्रसङ्गात्। दिशां दशत्वप्रसङ्गे नवैव द्रव्याणीति व्याघाताच्च। न चात्मत्वेन संग्रहवद्दिशामपि दिक्त्वेन संग्रहाददोषः; शब्दलिङ्गानामपि भिन्नतया तत्कारणाकाशस्याप्यानन्त्यप्रसङ्गात्, आकाशत्वेन संग्रहस्य तत्रापि तुल्यत्वात्। न च तथैवास्तु को दोष इति वाच्यम्, आकाशकालदिशामेकैकत्वादपरजात्यभावे पारिभाषिक्यस्तास्ताः संज्ञा आकाशं कालो दिगिति भाष्यविरोधात्। सुरशिखरिशिखरपरिभ्रमन्मार्तण्डमण्डलप्रथमसंयोगाद्युपाध्युपधाने तेनैव पूर्वादिप्रत्ययानामन्यथासिद्धत्वात्।

दोषमाह—अन्यथेति। लीलावतीकाररीतिमुद्भाव्य दूषयति—न च तरणीति। न च सूर्यपरिस्पन्दानां प्राचुर्यमल्पत्वं च न संख्याविशेषो, नापि परिमाणविशेषोऽभ्युपगन्तुं शक्यो, निर्गुणे कर्मण्यसम्भवादिति वाच्यम्, वैशेषिकमते परत्वापरत्वहेतुभूताया अपेक्षाबुद्धेर्यद्विषयप्रयुक्तं वैचित्र्यं तस्यैवास्माभिः प्रचुराल्पतरशब्देनाभिलापात्। न चापेक्षाबुद्धेः स्वभावविशेषादेव वैचित्र्यव्यवहारजनकत्वं न विषयभेदसापेक्षमिति वाच्यम्; परापरबुद्ध्योरपि विषयवैचित्र्यमन्तरेणैव स्वभावविशेषादेव वैचित्र्यव्यवहारजनकत्वप्रसङ्गात्। तथा नीलपीतादिबुद्धीनामपि तथाविधव्यवहारहेतुत्वप्रसङ्गादिति बौद्धानां त्वयैव दत्तः स्वाश्रयः स्यात्। तस्मान्न कालसद्भावसिद्धिरिति भावः।

अथ दिशो निराकुर्वंस्तत्र प्रमाणानि श्लोकेन निराकुरुते—इन्द्रियेत्यादिना। न तावत्प्रत्यक्षं दिक्सिद्धौ मानम्, कालवद्दिशोऽपीन्द्रियायोग्यत्वात्। नाप्यनुमानादिभिस्तत्सिद्धिः, अनुमानादीनां सर्वगतवर्णसाधनेनाप्यर्थान्तरतापातात्। सावतारं श्लोकं विशदयति—एतेनेत्यादिना। ननु पूर्वादिदशप्रत्ययसत्त्वे कथं दिगनुमापकलिङ्गाभावो वक्तुं शक्य इति चेन्न; पूर्वादिप्रत्ययानां निरुपाधिदिगालम्बनत्वे सर्वत्र सर्वप्रत्ययप्रसङ्गात्। न च पूर्वादिव्यवस्थासम्पादनाय दिशां दशत्वं कल्प्यते इति वाच्यम्; तथासति नवैव द्रव्याणीति व्याघातापत्तेः। न चात्मत्वेनात्मनां सङ्ग्रहवद्दिशामपि दिक्त्वेन सङ्ग्रहाददोष इति वाच्यम्; शब्दरूपलिङ्गानामप्यनेकत्वेन लिङ्गिनो नभसोऽप्यानन्त्यप्रसङ्गात्, आकाशत्वेन सङ्ग्रहस्य तत्रापि तुल्यत्वात्। न चेष्टापत्तिः; आकाशकालदिशामेकैकत्वात्तद्वृत्त्याकाशत्वादिव्याप्यजात्यभावे पारिभाषिक्यः त्रिस्रो संज्ञा भवन्ति—आकाशः कालो दिगिति प्रशस्तपादभाष्यविरोधात्। सुमेरुपर्वतशिखरपरिभ्रमन्मार्तण्डमण्डल प्रथमसंयोगाद्युपाधिविषयत्वे तेनैव पूर्वादि-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

उपहितदिगालम्बनत्वे च परस्पराश्रयत्वात्––पूर्वादिप्रत्ययबलादुपाध्युपहितदिक्सिद्धिः, तत्सिद्धौ च तदालम्बनपूर्वापरादिप्रत्ययसिद्धिरिति। लिङ्गान्तरेण तत्सिद्धौ पूर्वापरादिप्रत्ययवैयर्थ्यात्। उपाधीनामादित्यादिगतत्वात् पूर्वापरप्रत्ययालम्बनवस्तुभिः स्वरूपतः प्रत्यासत्तिशून्यानां सम्बन्धापादकवस्त्वन्तरस्य स्वीकारे दिक्सिद्धिरिति चेत्, न; त्वदभिमतकालेनैव तदुपपत्तेः। न च कालकृतपरत्वापरत्ववैलक्षण्यादस्य दिक्कृतत्वम्; दिक्कल्पनामन्तरेणैव व्यवहर्तुः स्वेन संयुक्तपृथिव्यादिभिर्हस्तदण्डादिसंयोगानामल्पीयस्त्वभूयस्त्वाभ्यामेव विशिष्टपरापरव्यवहारोपपत्तेः। नचाल्पीयस्त्वभूयस्त्वयोः संख्यारूपगुणत्वे परिमाणविशेषत्वे च संयोगाख्यगुणाधिकरणत्वसम्भवादनुपपत्तिः; भवदभिमतपरत्वापरत्वजनकसन्निकृष्टविप्रकृष्टलक्षणापेक्षाबुद्धिविषयसंयोगाल्पीयस्त्वभूयस्त्वयोरपि तुल्यत्वात्।

यच्च दिक्कालयोः प्रसाधनाय प्रमाणमुक्तं लीलावतीकारेण––'महत्परिमाणसामान्यं विशेषगुणशून्यद्रव्याधिकरणानेकव्यक्तिवृत्ति परिमाणतारतम्यविश्रान्तिविषयनिष्ठजातित्वादणुत्ववत्। अस्ति हि विशेषगुणशून्यानेकमनोगतानेकाणुपरिमाणनिष्ठताणुत्वजातेः। तथा विवादाध्यासितानि मूर्तद्रव्याणि युगपद्विशेषगुणशून्यानेकद्रव्यसंसर्गीणि द्रव्यत्वादात्मव-

---

प्रत्ययानामन्यथासिद्धत्वात्। पूर्वादिप्रत्ययानामुपाधिविशिष्टदिगालम्बनत्वेऽन्योऽन्याश्रयत्वात्। तदेव संघटयति—पूर्वादीति। लिङ्गान्तरेण दिक्सिद्धौ पूर्वादिप्रत्ययानां वैयर्थ्यप्रसङ्गात्। सुमेरुपर्वतादित्यसंयोगविशेषोपाधीनामादित्यगतत्वेन पूर्वापरप्रत्ययविषयवृक्षादिभिः स्वरूपतः सम्बन्धविधुराणां सम्बन्धापादकवस्त्वन्तरस्य स्वीकारे दिक्सिद्धिरिति वाच्यम्; वैशेषिकाभिमतकालेनैव निरुक्तपरम्परासम्बन्धोपपत्तेः। न च कालिकपरत्वाद्यपेक्षया दैशिकपरत्वादेर्वैलक्षण्यमिति वाच्यम्; दिक्कल्पनामन्तरेणैव व्यवहर्त्तुः पुरुषस्य स्वेन संयुक्तपृथिव्यादिभिः सह हस्तपरिमाणदण्डपरिमाणादिसंयोगानामल्पीयस्त्वभूयस्त्वाभ्यामेव परापरादिविशिष्टव्यवहारोपपत्तेः। न चाल्पीयस्त्वभूयस्त्वयोः संख्यारूपगुणत्वे परिमाणविशेषत्वे चाङ्गीकारे संयोगाख्यगुणाधिकरणत्वासम्भवादनुपपत्तिरिति वाच्यम्; वैशेषिकाभिमतपरत्वादिजनकसमीपादिरूपापेक्षाबुद्धिविषयसंयोगेऽल्पीयस्त्वभूयस्त्वयोर्भमापि तुल्यत्वात्।

सम्प्रति लीलावतीकारेणोक्तं दिक्कालयोः साधकप्रमाणजातमनूद्य दूषयति—यच्चेति। अणुत्वे सिद्धसाधनतावारणाय महत्परिमाणसामान्यमिति पक्षनिर्देशः। विशेषगुणशून्यं यद्द्रव्यं तदधिकरणायाऽनेकव्यक्तिर्महत्परिमाणानि तद्वृत्तीत्यर्थः। गगनात्मघटादिवृत्त्यनेकमहत्परिमाणनिष्ठतासाधनेनार्थान्तरता स्यात्तद्वारणाय शून्यान्तं साध्यविशेषणम्। अनेकव्यक्तिग्रहणेन च तदधिकरणविशेषगुणशून्यद्रव्यानेकत्वसिद्धौ दिक्कालसिद्धिः। परिमाणवृत्तित्वेन सिद्धसाधनतावारणाय द्रव्याधिकरणपदम्। घटत्वादिवारणाय हेतौ विश्रान्त्यादिदलम्। ज्ञानत्वादिवारणाय परिमाणेति पदम्। दृष्टान्ते साध्यप्रसिद्धिमाह—अस्ति हीति। अनुमानान्तरमाह—तथेत्यादि। विवादाध्यासितानि=देहेन्द्रियव्यतिरिक्तमूर्त्तद्रव्याणीत्यर्थः। विशेषगुणशून्यैरनेकद्रव्यैः सह युगपत्संसर्गीणीति साध्ययोजना। तत्र गगनसंसर्गितयार्थान्तरतावारणायानेकद्रव्येतिपदम्। घटादिसंसर्गितयार्थान्तरतावारणाय विशेषगुणशून्येति पदम्। क्रममुक्तसंसर्गितयार्थान्तरतावारणाय युगपदिति पदम्।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इति, तदयुक्तम्; अन्तरेणापि दिक्कालौ व्यापकपञ्चाशद्वर्णद्रव्यप्रसाधनेनार्थान्तरत्वात्। वेदान्तिनं प्रति दृष्टान्तस्य साध्यविकलत्वाच्च, मनसो विशेषगुणशून्यत्वे हि तद्गताणुत्वस्य-विशेषगुणविधुरद्रव्याधिकरणानेकव्यक्तिवृत्तित्वम्, आत्मनश्च युगपद्विशेषगुणशून्यद्रव्य-संसर्गित्वं च भवेत्तच्च वेदान्तिनं प्रत्यसिद्धम्, मनसोऽपि विशेषगुणवत्त्वात्। न च तत्र माना-भावः मूर्तत्वस्यैव तत्त्वात्। न च विशेषगुणवत्त्वे द्रव्यारम्भकत्वमुपाधिः; घटादिष्वन्त्यावय-विषु व्यभिचारात्। न च द्रव्यारम्भकवृत्तिद्रव्यत्वावान्तरजातिमत्त्वमुपाधिः; आत्माकाशयोर्व्य-भिचारात्। न च बाह्येन्द्रियग्राह्यविशेषगुणवत्त्वम्; भवदभिमतात्मनि व्यभिचारात्। न वा भूतात्मनोरन्यतरत्वमुपाधिः; वेदान्तिनं प्रति तमसि साध्याव्याप्तेः। 'कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिरित्येतत्सर्वं मन एवे'ति मनसो विशेषगुणवत्त्वश्रुतेश्च। न च कामादीनां निमित्तकारणत्वान्मनसस्तथात्वव्यपदेशः; मुख्ये बाधकाभावात्, निमित्त-नैमित्तिकत्वमात्रेण सामानाधिकरण्यश्रवणानुपपत्तेश्च। न हि भवति कुलालो घट इति सामानाधिकरण्यम्। एतेन मानमनोहरप्रयोगोऽप्यपास्तः—विवादाध्यासितं कार्यं विशेष-गुणरहितद्रव्याभ्यां जन्यते कार्यत्वादन्तःकरणद्वयसंयोगवदिति; तत्रापि दृष्टान्तस्य साध्य-

---

मनोभिः संसर्गेण चात्मसु साध्यप्रसिद्धिः। लीलावतीकारोक्तमनुमानं दूषयति—तदयुक्तमित्यादिना। अपौरुषेयवादे वर्णानां नित्यत्वं विभुत्वं चाधिगतम्। नहि तेषु विशेषगुणाः सन्ति। नादानमन्य-धर्मत्वादन्यस्य चाभावादतस्तद्गतवृत्तितासाधनेनापि विश्रान्तेरर्थान्तरता स्यात्प्रथमप्रयोगे। द्वितीयेऽपि प्रयोगे व्यापकपञ्चाशद्वर्णद्रव्यसंसर्गसाधनेनार्थान्तरतेतिभावः। उभयत्र दृष्टान्ते साध्य-वैकल्यमाह—वेदान्तिनं प्रतीति। तदेव विशदयति—मनस इति। मनोविशेषगुणशून्यं स्यात्तदा तद्गताणुत्वं विशेषगुणविधुरद्रव्याधिकरणानेकव्यक्तिवृत्ति भवेद्, भवेच्चात्मा युगपद्विशेषगुणशून्य द्रव्यसंसर्गी, तच्च वेदान्तिनं प्रत्यसिद्धम्, मनसोऽपि विशेषगुणवत्त्वात्। तथा च प्रयोगो मनोविशेषगुणवत्, मूर्तत्वाद्, घटवदिति मनसो विशेषगुणसिद्धिः। अत्रोपाधिमाशङ्क्य वारयति—न च विशेषेति। उपाध्यन्तरं निराचष्टे—न चेति। आकाशे विशेषगुणवत्त्वेऽपि द्रव्यत्वव्याप्य-जातेरभावद्, विशेषगुणयुक्तात्मनि द्रव्यत्वव्याप्यात्मत्वजातिसत्त्वेऽपि द्रव्यारम्भकवृत्तित्वाभावा-दित्याह—आत्मेति। उपाध्यन्तरं वारयति—न च बाह्येति। वैशेषिकाभिमते विशेषगुणवत्त्वेन स्वीकृतात्मनि साध्याव्याप्तिः, आत्मगुणानां मानसप्रत्यक्षत्वात्। पुनरप्युपाध्यन्तरं निरस्यति—नवेति। तमसि विशेषगुणवत्ता तमोवादे प्रतिपादिता, तत्र साध्याव्याप्तिरित्यर्थः। मनसो विशेष-गुणवत्त्वे श्रुतिप्रमाणमप्याह—काम इत्यादि। न चात्मगुणानामेव कामादीनां निमित्तकारणस्य मनसस्तथाव्यपदेश इति वाच्यम्; मुख्ये बाधकाभावात्, तावन्मात्रेण सामानाधिकरण्यश्रवणानुप-पत्तेश्च। नहि निमित्तकारणकार्ययोः कुलालो घट इति सामानाधिकरण्यं दृष्टचरम्। श्रीवल्लभानुमानगतदूषणं मानमनोहरीयानुमानेऽतिदिशति—एतेनेति। विमतं कार्यं विशेषगुण-विधुरद्रव्याभ्यां जन्यते, कार्यत्वादन्तःकरणद्वयसंयोगवदिति प्रयोगोऽपि निरस्तः। अत्र घटादिः पक्षः। मृदादिद्रव्येनार्थान्तरतावारणाय विशेषगुणविधुरेति दलम्। अदृष्टेश्वरेच्छादिभिरर्थान्तरता-वारणाय द्रव्यग्रहणम्। अत्रापि दृष्टान्ते साध्यवैकल्यात्। किञ्चानयैव रीत्या विशेषगुणशून्यं

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विकलत्वात्, विवादाध्यासितं विशेषगुणरहितद्रव्यैर्जन्यत इति बहुवचनप्रक्षेपेणापि प्रयोग-सम्भवादतिरिक्तद्रव्यसाधकतयाऽऽभाससमानयोगक्षेमत्वाच्च । न च दृष्टान्तासिद्धिः; अनेकान्तःकरणाधिकरणापेक्षाबुद्धिजन्यबहुत्वस्यैव दृष्टान्ततोपपत्तेः, विवादाध्यासितं विशेषगुणरहितद्रव्याभ्यां न जन्यतेऽन्तःकरणाकार्यत्वादाकाशवदिति सत्प्रतिपक्षत्वाच्च । न चाकार्यत्वमुपाधिः; वेदान्तवादिभिराकाशस्यापि कार्यताङ्गीकारात् । तदेवं कालानिरूपणान्न तत्कृतः पूर्वापरीभावः कार्यकारणभावः ।

भेदाभेदविकल्पानुपपत्तेश्च । तथा ह्यत्यन्तभिन्नयोरश्वमहिषयोरिव नोपादानोपादेय-भावः । तथात्यन्ताभेदेऽपि, पूर्वसिद्धस्योपादानत्वादसिद्धस्य चोपादेयत्वात्, एकत्र युगपत्सिद्धत्वासिद्धत्वविरोधादेव तदनुपपत्तेः । अस्तु तर्हि भिन्नाभिन्नयोः कार्यकारणभावः, अत्यन्ताभेदे भेद च तदनुपपत्तेर्दर्शितत्वात्, सामानाधिकरण्यानुपपत्तेश्च । नहि भवति घटः पट इति सामानाधिकरण्यम्, नापि घटो घट इति । दृश्यते च मृद्घटः, शुक्लः पटः, गौः शाबलेय इति सामानाधिकरण्यं ततो भेदाभेदसिद्धिरिति चेत्, न;

भेदेऽप्ययुतसिद्धत्वादुपादानत्वसम्भवात् ।
तस्यापि दुर्निरूपत्वात्समवायाद्यसङ्गतेः ॥६३॥

अन्तरेणापि भेदाभेदौ जन्यजनकयोरयुतसिद्धतयैवोपादानोपादेयतोपपत्तेः, भेदाभेदवादि-

---

दशममपि द्रव्यं शक्यसाधनमिति प्रयोगाभाससममाह—विवादेति । दृष्टान्तासिद्धिमुद्भाव्य वारयति—न च दृष्टान्तेति । सत्प्रतिपक्षतामप्याह—विवादाध्यासितमिति । आकाशस्यापि कार्यत्वम-भ्युपगम्याकार्यत्वमुपाधिं निराकुरुते—न चाकार्यत्वमिति । कालखण्डनस्य प्रयोजनं कारणखण्डन-मित्याह—तदेवमिति ।

अथ कार्यकारणत्वं प्रकारान्तरेण दूषयति—भेदाभेदेति । अत्यन्तभिन्नयोर्घटकुलालयोर्निमित्त-कारणत्वसम्भवे नोपादानोपादेयभावः सम्भवति । एवमत्यन्ताभेदेऽपि नोपादानोपादेयभावो वक्तुं शक्यः, विरुद्धधर्माध्यासादसम्भवमाह—तथेति । पूर्वोक्तानुपपत्तिसमाधानाय भेदाभेदवादी शङ्कते—अस्तु तर्हीति । कार्यकारणयोर्भेदाभेदसाधनाय सोदाहरणं तर्कमाह—नहि भवतीत्यादिना । सिद्धान्ती भेदाभेदपक्षमपि श्लोकेन दूषयति—भेदेऽपीति । अत्यन्तभेदेऽपि पदार्थयोरयुतसिद्धत्वमादायोपादानो-पादेयभावः सम्भवति, किन्तु समवायादिर्दुर्निरूपत्वादुपादानत्वमपि दुर्निरूपमिति श्लोकसरलार्थः । आदिना वक्ष्यमाणविकल्पदूषणानि संगृह्यन्ते । श्लोकार्थं विशदयति—अन्तरेणापीत्यादिना । जातिव्यक्त्योरयुतसिद्धत्वेऽपि न कार्यकारणभाव इत्यत आह—जन्यजनकयोरिति । ननु समवाया-नभ्युपगमात्स्वरूपेण दुर्निरूपत्वाच्च नास्माकमयुतसिद्धिःसिद्धेत्यत आह—भेदाभेदवादिनेति । समवायानङ्गीकारेऽपि भेदाभेदनियामकतयायुतसिद्धिरवश्यमाश्रयणीया, अन्यथाऽनयोरेव नान्ययो-रितिनियामकाभावप्रसक्तेः । न च कार्यकारणभावस्यैव भेदाभेदनियामकत्वसम्भवे किमर्थमयुत-सिद्धत्वकल्पनेति वाच्यं, नित्ययोरप्यात्मात्मत्वयोर्भेदाङ्गीकारादित्यर्थः । न च भेदाभेदौ विनाऽयुत-सिद्धिरेव न सिद्ध्यतीति वाच्यम्; अत्यन्तभिन्नयोरप्यात्माकाशयोरयुतसिद्धत्वस्य भाट्टैरपीष्ट-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नाप्ययुतसिद्धतायास्तन्नियामकत्वेनावश्याभ्युपेयत्वात् । नहि यत्रैव कार्यकारणभावस्तत्रैव भेदाभेदाविति शक्यं कल्पयितुम् । अतश्चावश्याभ्युपेयैवायुतसिद्धिरिति तत एवार्थापत्ते-रन्यथासिद्धिः । न चान्तरेण भेदाभेदावयुतसिद्धिरेव न सिद्ध्यतीति वाच्यम्; अत्यन्त-भिन्नयोरप्यात्माकाशयोर्भाट्टैरपीष्टत्वात्, उपादानोपादेयभावनिरूपणाच्च । तत्किं (१) समवायित्वे सति कारणत्वम् ? (२) उत कार्याधारत्वम् ? (३) जन्येनायुतसिद्धत्वे सति-जनकत्वं वा ? (४) द्रव्यत्वविशेषितं वा ? (५) आहोस्वित्कार्याकारेण परिणतत्वम् ? (६) अथवा कार्यविभ्रमाधिष्ठानत्वम् ? नाद्यः; समवायस्यानङ्गीकारणान्निराकृतत्वाच्च । न द्वितीयः; कुण्डबदरयोराधाराधेयभावेऽपि तददर्शनात् । स्वजन्याधारत्वं तदिति चेत्, न; स्वजन्यघटाद्याधारे कुलालादावतिव्याप्तेः, आधारानिरुक्तेश्च । न तावदिहेति प्रत्यय-विषयत्वम्, तत्रेति प्रत्ययाव्याप्तिः । नापि समवायित्वम्; शशे विषाणाभावः, कुण्डे बदर-मित्यादावव्याप्तेः । नापि संयोगित्वम्; गुणादौ तदसम्भवात्, संयोगिनोरुभयोरन्योन्या-धारत्वप्रसङ्गाच्च । नापि पतनप्रतिबन्धकत्वम्; गुणादावव्याप्तेः । अत एव नाधेयापेक्षया महत्परिमाणवत्त्वमपि; करतलनिहितमहत्तरतूलपिण्डादावसम्भवाच्च । नापि तृतीयः, ज्ञानेच्छादीनां परस्परोपादानत्वप्रसङ्गात् । अस्ति हि तत्र जनकस्य ज्ञानजन्येनेच्छा-दिनाऽयुतसिद्धत्वम्, आत्मैकाश्रयतया पृथगाश्रयित्वलक्षणयुतसिद्ध्यभावात् । नापि चतुर्थः; व्यर्थविशेष्यत्वापत्तेः । नहि द्रव्यमुपादानमित्यभिहितेऽस्ति क्वचिदतिप्रसङ्गः, येन जन्येना-युतसिद्धत्वमिति पदान्तरमुपादीयेत । नापि पञ्चमः; निरवयवेष्वात्माकाशादिष्वव्याप्तेः । नह्यात्माकाशं वा ज्ञानेच्छादिरूपेण शब्दरूपेण वा परिणमते; कार्त्स्न्यैकदेशविकल्पा-

---

त्वात । तयोरुपादानोपादेयभावस्य दुर्निरूपत्वं विशदयति—तत्किमित्यादिनेति । पञ्चधाविकल्पेषु नाद्यः, भाट्टैः समवायस्यानङ्गीकारेण निराकृतत्वेन च समवायघटितलक्षणस्य वक्तुमशक्यत्वात् । नापि द्वितीयः, कुण्डबदरयोः सत्यप्याधाराधेयभावे तयोरुपादानोपादेयभावादर्शनात् । न च कारणजन्याधारत्वमुपादानोपादेयभाव इति वाच्यम्; कुलालजन्य घटाद्याधारे कुलालादावति-व्याप्तेराधाराधेयभावानिरुक्तेश्च । अनिरुक्तिमभिनयति—न तावदिति । नापि समवायित्व-माधारत्वम्; शशे विषाणाभावः कुण्डे बदरमित्यादौ सत्यप्यधिकरणत्वे समवायित्वाभावात् । नापि संयोगित्वमाधारत्वम्; गुणादौ तदसम्भवात्, संयोगस्यानुयोगिप्रतियोगिनोः कुण्डबदरयोरुभयोरपि परस्पराधारत्वप्रसङ्गाच्च । श्रीवल्लभीयमाधारत्वं निरस्यति—नापि पतनेति । गुणकर्मविरहितानां गुणादीनां पतनाभावेन तदाधारता द्रव्यस्य नहि सम्भवति । अत एव=गुणादावसम्भवादेव महत्परिमाणवत्त्वमपि नाधारत्वं; करतलगतमहत्तरतूलपिण्डादावसम्भवाच्च । नापि तृतीयः, ज्ञानेच्छादीनां परस्परोपादानत्वप्रसङ्गात् । ज्ञानेच्छादिषु निरुक्तलक्षणं संघटयति—अस्ति हीति । नापि द्रव्यत्वविशेषितं जन्येनायुतसिद्धत्वमिति चतुर्थः, व्यर्थविशेष्यत्वप्रसङ्गात् । व्यर्थविशेष्यत्व-मेवोपपादयति—नहीति । नापि पञ्चमः, निरवयवेष्वात्माकाशादिषु कार्याकारेणापरिणामत्वाद-व्याप्तेः । तत्राव्याप्तिं संघटयति—नह्यात्मेति । सावयवेष्वपि विकल्परीत्याऽव्याप्तिं दर्शयति—

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सहत्वात् । तन्त्वादीनामपि पटाद्याकारेण गुणकर्माद्याकारेण वा परिणामादर्शनात्, नहि द्रव्यं गुणः कर्म वा भवति, तदाश्रयत्वात् । नापि षष्ठः; प्रपञ्चसत्यत्ववादिभिरनङ्गीकारात् । तदेवमुपादानोपादेयभावानिरूपणान्न तदन्यथानुपपत्त्या भेदाभेदसिद्धिः।

नापि सामानाधिकरण्यानुपपत्तिः, विकल्पासहत्वात् । तथाहि—किं शाब्दस्य सामानाधिकरण्यस्यानुपपत्तिः ? उतार्थिकस्य ? नोभयथापि—

युक्तेः शब्दनिमित्तानामेकाधिकरणत्वतः ।
शाब्दं न तावद्घटते भेदाभेदप्रसाधकम् ॥ ६४ ॥
धर्माणामेकनिष्ठत्वमात्रेणैवोपपत्तितः ।
अभेदानुभवाभावादार्थं नैवास्य साधकम् ॥ ६५ ॥

शुक्लः पट इत्यादौ शाब्दसामानाधिकरण्यस्य प्रवृत्तिनिमित्तयोरेकाधिकरणसम्बन्धादेवोपपत्तेः धर्मधर्मिभेदाभेदयोरौदासीन्यात् । आर्थिकस्यापि धर्मयोरेकाधिकरणतालक्षणस्यात एवोपपत्तेः । धर्मधर्मिणोरभेदानुभवस्यासम्प्रतिपत्तेश्चासाधकत्वात्, गुणो द्रव्यं कर्म द्रव्यम्, जातिर्व्यक्तिरिति सामानाधिकरण्यानुभवाभावात् ।

भिन्नाभिन्नमित्यत्र भिन्नशब्देन स्वरूपभेदस्याभिन्नशब्देन तदभावस्याभिधाने च भावाभावयोर्युगपदेकत्र परस्परविरोधेनासम्भवात् । अभेदे च शुक्लः पट इत्यादिषु द्वितीयबुद्धिव्यपदेशयोः पौनरुक्त्यापत्तेः । न च भेदस्यापि भावात्सार्थकता, अभेदस्यापि भावे

तन्त्वादीनामपीति । आश्रयाश्रितप्रतीतिविरोधमप्याह—नहि द्रव्यमिति । द्रव्यं यत्तन्त्वादि, तद्गुणः कर्म वा नहि भवतीत्यन्वयः । नापि षष्ठः; प्रपञ्चसत्यत्ववादिभिः कार्यविभ्रमाधिष्ठानत्वानभ्युपगमात् । उपादानोपादेयभावान्यथानुपपत्त्या भेदाभेदासिद्धिमुपसंहरति—तदेवमिति ।

सामानाधिकरण्यानुपपत्त्यापि भेदाभेदसिद्धिं दूषयितुं विकल्पयति—तथाहीति । भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकत्रार्थे प्रयोगात्मकशाब्दसामानाधिकरण्यस्यैकाधिकरणत्वरूपार्थिकसामानाधिकरण्यस्य वाऽत्यन्तभेदेऽप्युपपत्तिं द्वाभ्यां दर्शयति—युक्तेरित्यादिनेति । शुक्लः पट इत्यत्र शुक्लत्वपटत्वादीनामेकपटाधिकरणत्वादेव शाब्दसामानाधिकरण्योपपत्तिसम्भवेन नात्र शाब्दसामानाधिकरण्यं गुणगुण्यादिभेदाभेदसाधकमिति प्रथमश्लोकान्वयः । एवं धर्माणामेकाधिकरणत्वमात्रेणैवार्थिकं सामानाधिकरण्यं सिद्ध्यति । अतो न धर्मधर्मिणोरभेदानुभवोऽस्ति । तस्मादार्थिकं सामानाधिकरण्यमपि न भेदाभेदप्रसाधकमिति द्वितीयश्लोकयोजना । आद्यं श्लोकं विशदयति—शुक्लः पट इत्यादिना । द्वितीयं श्लोकं व्याचष्टे—आर्थिकस्येति । अत एव=धर्मधर्मिसम्बधादेव । अभेदानुभवाभावादिति पद्यांशं व्याकुरुते—धर्मधर्मिणोरिति । तथा चात्र धर्मधर्मिणोरभेदानुभवोऽपि न भेदाभेदानुभवस्य साधकः । अभेदानुभवाभावमभिनयति—गुण इति ।

सम्प्रति भिन्नाभिन्नशब्दार्थस्य दुर्भरत्वं दर्शयति—भिन्नेत्यादिना । तथा च निरुक्तरीत्या स्वरूपत्वमस्वरूपत्वं च भेदाभेदशब्दार्थः, तच्च विरुद्धम्, विरोधाभावेऽपि धर्मिणोऽपि स्वापेक्षया तथात्वापत्तेः । तथा चानेकान्तवादिमतवत् पटश्चापटश्चेत्यव्यवस्थैव त्वदीयपदार्थैरभ्युपगता स्यादित्यर्थः । न चैवं शुक्ल पट इत्यत्र न केवलमभिन्नत्वमपितु तयोर्भिन्नत्वमपि स्वीक्रियतेऽतो

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वैयर्थ्यस्यापि सम्प्रतिपन्नांश इव दुष्परिहरत्वात् । हेत्वभावे फलाभावादौत्सर्गिकाद्धेतुभावे फलभावस्य तदपवादतया बलीयस्त्वात् । अन्योन्याभावतदभावयोर्भिन्नाभिन्नशब्दाभ्याम-भिधाने, विरोधपौनरुक्त्ये पूर्वोक्ते एव पुनरुपावर्तेते । ननु भेदशब्देन स्वरूपभेदस्याभेदशब्देनेतरेतराभावराहित्यस्य वाभिधानादविरोध इति चेत्, मैवम्; इतरेतराभावस्यैवोच्छेदप्रसङ्गात् । स्वरूपभेदे विद्यमानेऽपि तदविरोधितया यदि क्वचिदितरेतरभावः स्यात्, तर्हीतरेतरभावस्यैव निरंकुशप्रसरतयेतरेतराभावविरह एव जगति स्यादित्यद्वैतवाद एव भेदाभेदवादिना समर्थितः स्यात् । तदेवं भेदाभेदादिपक्षेषु कार्यकारणभावस्य दुर्निरूपत्वात्, स्वरूपतोऽपि विचारागोचरत्वात्, अनाद्यविद्यातद्विलसितः सकलोऽप्ययं प्रपञ्च इति तद्ग्राहिप्रत्यक्षादिप्रमाणविरोधाभावाद्वेदान्तवाक्यं निरपवादमेवाद्वितीये ब्रह्मण्यपरोक्षज्ञानं जनयतीति निरवद्यम् ।

इति श्रीमत्परमहंसपरिव्राजकाचार्यज्ञानोत्तमपूज्यपादशिष्यश्रीचित्सुखमुनिविरचितायां तत्त्वप्रदीपिकायां लक्षणभङ्गो नाम
द्वितीयः परिच्छेदः समाप्तः ॥२॥

न पदद्वयस्य प्रयोगवैयर्थ्यमिति वाच्यम्; अभिन्नत्वेनावगतांशे द्वितीयपदप्रयोगवैयर्थ्यस्य परिहर्तुमशक्यत्वात् । किञ्चोभयहेतुसद्भावे नैरर्थक्यपक्षे विनिगमकाभावमित्यत आह—हेत्वभाव इति । अपवादस्य बलीयस्त्वमाह—फलभावस्येति । न च भिन्नाभिन्नशब्दाभ्यामन्योऽन्याभावतदभावयोरभिधाने न पूर्वोक्तविरोधो, नापि पौनरुक्त्यमिति वाच्यम्; तथासति जगति विरोधस्य दत्तजलाञ्जलिताप्रसङ्गात् । अपि च भेदशब्देन स्वरूपभेदस्याभेदशब्देनेतरेतराभावराहित्यस्य चाभिधान इतरेतराभावोच्छेदप्रसङ्गस्तदवस्थैव । स्वरूपभेदसत्त्वेऽपि तस्याविरोधित्वेन क्वचिदितरेतरभावः स्याच्चेत्तर्हीतरेतरभावस्यैव निरङ्कुशप्रसरत्वादितरेतराभावाभाव एव जगति स्यादिति भेदाभेदवादिनाऽद्वैतवादिनां मतं समर्थितं स्यात् । वादार्थोपसंहारपुरःसरं द्वितीयपरिच्छेदार्थमुपसंहरति—तदेवमिति । भेदाभेदतदुभयपक्षेषु स्वरूपतश्च कार्यकारणभावस्य दुर्निरूपत्वात्सकलोऽयं प्रतिवादिभिः परिकल्पितो द्वैतप्रपञ्चः शुक्तिरजतादिवदनिर्वचनीयाविद्याविलसितस्तदधिष्ठानचैतन्यविवर्त इत्यवधेयम् ।

इति श्रीमत्परमहंसपरिव्राजकाचार्ययतीन्द्रकुलतिलकश्रीकैलासपीठाधीश्वर-
दशमाचार्यमहामण्डलेश्वरश्रीमत्स्वामिविद्यानन्दगिरिविरचितायां
प्रत्यक्तत्त्वप्रदीपिकाया व्याख्यारूपायां छात्रतोषिण्यां
द्वितीयः परिच्छेदः समाप्तः ॥२॥

॥ ॐ तत्सत् ॥

❀ ❀ ❀

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तृतीयः परिच्छेदः

ननु कथमपरोक्षज्ञानजनकतया शब्दस्य ? तथा सत्यपरोक्षप्रमितिकरणतया प्रत्यक्षान्तर्भावप्रसङ्गात्, धर्माधर्मप्रतिपादकवाक्येष्वदर्शनाच्च न च दशमस्त्वमसीति वाक्यमुदाहरणम्; तत्रापि केवलशब्दस्यापरोक्षज्ञानाजनकत्वादिन्द्रियसन्निकर्षस्यापि दशमशरीरगोचरस्य तत्र भावात्। न च सत्यपीन्द्रियसन्निकर्षे तस्यादावदर्शनात् पश्चाद्भाविशब्दजनिततैव तस्येति निश्चेतुं शक्यम्; रत्नतत्त्वाधिगमेऽपि तथात्वप्रसङ्गात्। तथाहि—सत्यपीन्द्रियसन्निकर्षे अनधिगतरत्नतत्त्वपरीक्षाशास्त्रः पुष्परागादिभेदं न प्रत्यक्षतः प्रतिपद्यते, अधिगतशास्त्रार्थस्तु तत्तत्त्वं प्रतिपद्यते। न चैतावता शास्त्रं तत्र प्रत्यक्षप्रमितिजनकमभ्युपेयते। यत्पुनरिह कैश्चिदुच्यते—विमतं शाब्दज्ञानमपरोक्षमपरोक्षविषयत्वात्सुखज्ञानवदिति। तत्र किमिदमपरोक्षत्वं शाब्दज्ञानस्य ? किं साक्षात्कारत्वजातिमत्त्वम्? अपरोक्षव्यवहारहेतुत्वं वा ? नाद्यः; अयं घट इति शब्देऽनैकान्त्यात्। प्रतिपत्तिव्यवधानमन्तरेण तद्विषयत्वमपरोक्षविषयत्वमिति चेत्, न; अयं पर्वतोऽग्निमानिति परोक्षा-

---

दिशन्तु शं मे गुरुपादपांसवः।
परीक्षितसाधनात्साध्यं श्रेयःकामोऽनुगच्छति।
तस्मादस्मिन् परिच्छेदे तृतीये तत्परीक्ष्यते॥

अथ विरोधपरिहारेण साध्ये सुनिश्चिते साधनान्वेषणावकाशः सम्भवतीत्यतः पूर्वेण द्वितीयेन परिच्छेदेनास्य तृतीयपरिच्छेदस्य हेतुहेतुमद्भावसङ्गतिः प्रदर्शिता। पूर्वस्मिन् परिच्छेदान्ते वेदान्तवाक्यमद्वयब्रह्मण्यपरोक्षज्ञानं जनयतीत्युक्तं, तदमृष्यमाणा वैशेषिकमीमांसकादयः केचन मण्डनमिश्रादयश्च प्रत्यवतिष्ठन्ते—ननु कथमिति। वेदान्तवाक्यानामपरोक्षप्रमितिजनकत्वस्वीकारे न केवलं तत्र शब्दत्वहानिः प्रत्यक्षत्वबाधिका, अनुपलब्धिपराहतिमप्याह—धर्माधर्मेति। नहि धर्माधर्मशब्दाभ्यां तदर्थयोः प्रत्यक्षं क्वापि दृष्टम्। न च 'दशमस्त्वमसि" इति वाक्याद् दशमस्य प्रत्यक्षं भवतीति वाच्यम्, तत्रेन्द्रियसन्निकर्षस्यापि दशमदेहगोचरस्य विद्यमानत्वात्। रत्नतत्त्वाधिगमेऽपि न केवलः शब्दः प्रत्यक्षहेतुरपितूपदेशसहितं रत्नतत्त्वप्रत्यक्षं तत्साक्षात्कारहेतुः। तत्रापि प्राप्ताप्राप्तविवेकसाम्यं संगमयति—तथाहीति। पुष्परागो=रत्नविशेषः। न्यायरत्नदीपावलीकृतमनुमानमाह—विमतमित्यादि। ज्योतिष्टोमादिवाक्ये बाधासिद्ध्योः परिहाराय विमतमिति पक्षविशेषणम्। तच्च तत्त्वमस्यादिशब्दजन्यं शाब्दज्ञानम्। प्रत्यक्षेणार्थान्तरतावारणाय शाब्दग्रहणम्। शाब्दज्ञानस्यापरोक्षत्वं दूषयितुं विकल्प्यते—तत्र किमिदमिति। आद्ये सव्यभिचारमाह—अयं घट इति। अयं घट इति शब्दे—अपरोक्षविषयत्वादिजातिरूपसाध्याभावेऽत्रापरोक्षत्वहेतोः सत्त्वात्। अनैकान्तिकतां वारयितुं प्रतिक्षिपति—प्रतिपत्तिव्यवधानमिति। तथाप्यनैकान्तिकतामाह—अयं पर्वत

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

परोक्षद्विषयानुमानिकज्ञाने व्यभिचारात् । अपरोक्षमात्रविषयत्वं विवक्षितमिति चेत्; न; सुखेच्छायां व्यभिचारात् । तज्जनकज्ञानस्य तद्विषयत्वादिच्छायास्तद्विषयत्वमुपचर्यते इति चेत्, मैवम्; तथाप्यविद्यायां व्यभिचारात्, स्वतोऽपरोक्ष आत्मैवाविद्याया आश्रयो विषयश्चेति भवद्भिरभ्युपगमात् । नापि द्वितीयः; अविद्यायामेव व्यभिचारात्, तस्या अपरोक्षात्मविषयत्वेऽपि तद्विपरीतव्यवहारहेतुतया तद्व्यवहारहेतुत्वाभावात् । अपरोक्षव्यवहारहेतुत्वमेव हेतुरिति चेत्; न; साध्याविशिष्टत्वप्रसङ्गात् । प्रतिप्रयोगसम्भवाच्च—विवादाध्यासितः शब्दः, अपरोक्षज्ञानजनको न भवति, शब्दत्वात्, ज्योतिष्टोमादिवाक्यवदिति ।

अत्रोच्यते— साक्षात्करणहेतोरप्यप्रत्यक्षत्वसम्भवात् ।
दशमस्त्वमसीत्यादौ शब्दादेव तदुद्भवात् ॥१॥

यत्तावदुक्तमपरोक्षप्रमितिकरणत्वे प्रत्यक्षान्तर्भावः स्यादिति । तत्र ब्रूमः—अभ्युपगम्यते हि परैरपि योगिमनसो बाह्यविषयापरोक्षप्रमितिकरणता, तथापि न बाह्यप्रत्यक्षान्तर्भावस्तत्राभ्युपेयते, एवं शब्दस्यापरोक्षप्रमितिजनकत्वेऽपि प्रत्यक्षान्तर्भावो मा भूत् । अथ तत्र बाह्यप्रत्यक्षान्तर्भावे चक्षुरादीनामन्यतमत्वं योगिमनोऽन्यत्वे सति बाह्यप्रत्यक्षप्रमितिकरणत्वं वा प्रयोजकम्, हन्तेहापि तर्हि स्वतोऽपरोक्षब्रह्मात्मविषयशब्दान्यत्वे सत्यपरोक्षप्रमितिकर-

---

इति । अग्निमत्त्वांशे परोक्षत्वं पर्वतांशेऽपरोक्षत्वमिति परोक्षापरोक्षविषयकानुमितिज्ञाने साङ्कर्यात्साक्षात्कारत्वजातिरूपसाध्याभावेऽप्यपरोक्षत्वहेतोः सत्त्वादनैकान्तिकत्वात् । अपरोक्षपक्षकानुमितौ व्यभिचारवारणाय शङ्कते—अपरोक्षमात्रविषयत्वमिति । तथापि सुखेच्छायामतिव्याप्तिः । तस्या अपरोक्षविषयत्वेऽपि साक्षात्कारजात्यनधिकरणत्वात् । न चेच्छायां सविषयत्वमौपचारिकं तज्जनकज्ञाने च सविषयत्वं मुख्यमित्यतो न सुखेच्छायामतिव्याप्तिरिति वाच्यम्, तथाप्यविद्यायामतिव्याप्तेः । अतिव्याप्तिं सङ्गमयति—स्वत इति । भवद्भिरेकजीववादिभिरित्यर्थः । अपरोक्षव्यवहारहेतुत्वमपरोक्षत्वमिति द्वितीयपक्षेऽविद्यायां व्यभिचारमाह—नापि द्वितीय इत्यादिना । अविद्याया अपरोक्षात्मविषयत्वे तद्विपरीतपरोक्षव्यवहारहेतुतयाऽऽत्मापरोक्षव्यवहारहेतुत्वाभावात् । न चापरोक्षविषयकत्वं विहायापरोक्षव्यवहारहेतुत्वमेव हेतुर्विवक्षणीय इति वाच्यम्, साध्यसाधनयोरविशिष्टत्वदोषप्रसङ्गात् । प्रतिप्रयोगसम्भवाच्च । प्रतिप्रयोगमाह—विवादाध्यासित इति ।

समाधातुं प्रतिजानीते—अत्रोच्यत इति । शब्दादपरोक्षत्वं समर्थयति—साक्षात्करणेत्यादिना श्लोकेनेति । साक्षात्कारस्य हेतौ चक्षुरादौ सत्यपरोक्षत्वासम्भवेन दशमस्त्वमसीत्यादौ शब्दादेवापरोक्षज्ञानदर्शनादिति श्लोकार्थः । ननु शब्दस्यापरोक्षप्रमितिकरणत्वाभ्युपगमे शब्दस्यापि प्रत्यक्षान्तर्भूतत्वप्रसङ्गः पूर्वमुक्त इति चेन्न, त्वयापि योगिमनसो बाह्यविषयापरोक्षप्रमितिकरणत्वाभ्युपगमात् । तत्र यथा बाह्यप्रत्यक्षानन्तर्भावस्त्वयेष्यते, तथा ममापि शब्दस्यापरोक्षप्रमितिजनकत्वेऽपि न शब्दस्य प्रत्यक्षान्तर्भाव इति तात्पर्यम् । विशेषणप्रदर्शनेन प्रतिबन्द्या शङ्कते—अथ तत्रेति । तदेव बाह्यप्रत्यक्षान्तर्भूतं यच्चक्षुरादीनामन्यतमेन्द्रियप्रयुक्तमुत योगिमनोऽन्यत्वे सति बाह्यप्रत्यक्षप्रमितिकरणप्रयुक्तम् ? नायं विशेषः, प्रकृतेऽप्येवं शब्दसंकोचत्वादिति परिहारमाह—हन्तेति । इह स्वतोऽपरोक्षब्रह्मण्यात्मत्वबोधकशब्दान्यत्वे सत्यपरोक्षप्रमाकरणत्वं प्रत्यक्षान्तर्भावे-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

णत्वं प्रत्यक्षान्तर्भावे प्रयोजकमस्तु । सिद्धे शब्दस्यापरोक्षप्रमितिकरणत्वे तद्व्यावृत्त्यर्थं विशेषणं युक्तं तदेव तु कथमिति चेत्, दशमस्त्वमसीत्यादिवाक्येषु दर्शनादिति ब्रूमः। ननु तत्रापीन्द्रियसहितस्यैव तद्धेतुत्वं न केवलस्येत्युक्तमिति चेत्, अत्रापि तर्हि मनः सहायस्यैव शब्दस्यापरोक्षप्रतीतिहेतुताऽस्तु । ननु तत्रेन्द्रियस्यैव करणत्वं शब्दस्य तु सहकारितामात्रमिति चेत्, न; शब्द एव करणमिन्द्रियं सहकारीति वैपरीत्यमेव कुतो न स्यात् ? अन्वयव्यतिरेकयोस्तूभयत्राविशिष्टत्वात् । तथापि विनिगमनायां को हेतुरिति चेत्, क्वचिद्बहुलतमे तमसि क्वचिच्च लोचनविरहिणोऽपि वाक्याद्दशमोऽस्मीत्यपरोक्षप्रमिति-दर्शनमेवेति वदामः । भवत्वेवम्, तथापि ब्रह्मसाक्षात्कारे करणं मन एव 'मनसैवेदमाप्तव्यम्' इत्यादिश्रुतेः । 'यन्मनसा न मनुते' अप्राप्य मनसा सह' इत्यादिश्रुतेश्चानधिकृतमनोविषयत्वा-दिति चेत्, मैवम्;

तद्धेत्यादिश्रुतेःक्वापि मनसस्तदयोगतः ।
शब्दत्वानुमितेर्बाधाव्यभिचारादनुत्थितेः ॥२॥

'तद्धास्य विजज्ञौ' 'तमसः पारं दर्शयति' इति चोपदेशमात्रादेवापरोक्षप्रमित्युपपत्तिप्रतिपा-दनात् । नन्वेतानि वचनान्यागमाचार्योपदेशयोर्न साक्षात्कारहेतुतां प्रतिपादयन्ति, साक्षात्कारहेतोर्मनसः सहायताप्रतिपादनपरत्वेनाप्युपपत्तेः । अन्यथा श्रवणोत्तरकालयोर्म-नननिदिध्यासनयोर्विधानानर्थक्यात्, श्रवणेनैव साक्षात्कारोत्पत्तेः, श्रुतवेदान्तानामपि पूर्ववत्संसारानुवृत्तिदर्शनाच्चेति चेत्, मैवम्; असम्भावनाविपरीतभावनाख्यस्य चित्तविक्षे-पलक्षणस्य च प्रतिबन्धस्य निरासद्वारेण मनननिदिध्यासनयोः फलोपकार्यङ्गतयापि श्रवणं

प्रयोजकमस्तु । न च सिद्धे शब्दस्यापरोक्षप्रमितिकरणत्वे तद्वारणाय शब्दान्यत्वविशेषणं युक्तं तदेव=शब्दस्यापरोक्षप्रमितिकरणत्वमेव तु कथमिति वाच्यम्; दशमस्त्वमसीत्यादिवाक्येषु दर्शनात्। न च दशमस्त्वमसीत्यादौ चक्षुरिन्द्रियसहितस्यैव शब्दस्य प्रत्यक्षहेतुत्वं न केवलशब्दस्येत्युक्तमिति वाच्यम्, तर्ह्यत्र ब्रह्मापरोक्ष्येऽपि मनःसहितस्यैव शब्दस्यापरोक्षप्रतीतिहेतुताऽस्तु । न चापरोक्ष-प्रमायामिन्द्रियस्यैव करणत्वं शब्दस्तु सहकारिमात्रमिति वाच्यम्, विनिगमकाभावाच्छब्द एव करणमिन्द्रियं सहकारीति कुतो न स्यात् । अन्वयव्यतिरेकयोरुभयत्राविशेषात् । तथापि क्वचि-न्निबिड़ान्धकारे क्वचिच्चक्षुर्विहीनस्यापि दशमस्त्वमसीतिवाक्यादहं दशमोऽस्मीत्यपरोक्षप्रमा-दर्शनमेव विनिगमकमिति ध्येयम् । नन्वेवमपि ब्रह्मसाक्षात्कारे श्रुत्यविरोधान्मन एव करणमस्तु, "यन्मनसा न मनुते" "अप्राप्य मनसा सह"इत्यादिश्रुतेस्त्वनधिकृतासंस्कृतमनोविषयत्वादिति चेन्न, तद्धेत्यादिश्लोकेन समाहितत्वात् । श्लोकं विशदयति— तद्धास्य विजज्ञाविति । आचार्यस्योपदेशेनैव तदु-पदिश्यमानं ब्रह्म शिष्यो विशेषेण विज्ञातवानित्यर्थः । तमसः=शोकादिकारणाज्ञानस्य पारम्=अन्तं विशुद्धं ब्रह्मादर्शयदित्यर्थः । मनननिदिध्यासनविधानान्यथानुपपत्त्या न श्रवणमात्रं ब्रह्मसाक्षात्कार-साधनमित्याह—नन्वेतानीत्यादिना—संसारानुवृत्तिदर्शनाच्चेत्यन्त्येनेति । मनननिदिध्यासनयोः प्रति-बन्धनिवर्त्तकत्वेन फलोपकार्यङ्गतयापि श्रवणं प्रति विधानोपपत्तेः । अनुपपत्त्यन्तरं निराचष्टे—

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रति विधानोपपत्तेः । पूर्ववत्संसारित्वोपलब्धेश्च प्रतिबद्धविज्ञानपुरुषविषयत्वात् । मनसैवेदमाप्तव्यमित्यादिश्रुतेश्चित्तैकाग्र्यस्याङ्गताप्रतिपादनपरत्वात् । मनसश्च नित्यशुद्धबुद्धमुक्तस्वभावब्रह्मात्मसाक्षात्कारहेतुत्वस्यादृष्टचरतया तत्र शब्दस्य सहकारित्वकल्पनानुपपत्तेः । तथात्वे श्रवणादीनामेव वैयर्थ्यप्रसङ्गात् । सुखादीनां साक्षिवेद्यत्वादात्मनश्च स्वयंप्रकाशत्वात् मनसः क्वचिदपि साक्षात्कारहेतुत्वासम्प्रतिपत्तेः । भावनासहायस्य तु मनसो गरुडादिसाक्षात्कारप्रमित्यनुत्पादकत्वात्; तदपरोक्षस्य च विधुरपरिभावितकामिनीसाक्षात्कारवद्विभ्रमत्वात् । अप्रमारूपसाक्षात्कारस्यापि साक्षिरूपतया मानसत्वाभावात् । इह च "भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः," "तमसः पारं दर्शयति," "भूयश्चान्ते विश्वमायानिवृत्तिः," "तरति शोकमात्मवित्," "योऽस्माकमविद्यायाः परं पारं तारयसि," "मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते" "तरत्यविद्यां वितता" मित्यादिश्रुतिस्मृतिषु ब्रह्मविद्याया एवाविद्यानिवर्तकत्वश्रवणात् पारिशेष्यात्तत्कारणं वेदान्तवाक्यमिति निश्चीयते । श्रूयते च—"नावेदविन्मनुते तं बृहन्तम्," "तं त्वौपनिषदं पुरुषं पृच्छामि," "वेदान्तविज्ञानसुनिश्चतार्थाः" इति । अत्र हि वेदान्तवाक्यजन्यज्ञानस्य विज्ञानमिति विशेषणेन विशेषविषयत्वप्रतिपादनात्, निश्चयहेतुत्वे सिद्धेऽपि सुशब्दविशेषणेनापरोक्षनिश्चयहेतुत्वप्रतिपादनाच्चायमर्थो निश्चीयते ।

यत्पुनः शब्दत्वादित्यनुमानम्, तच्छ्रुतिविरुद्धतया कालात्ययापदिष्टम्, दशमस्त्वमसीत्यादिवाक्येऽनैकान्त्यं च ।

पूर्ववदिति । नहि सति प्रतिबन्धे कार्यानुत्पत्तिः कारणताविघातिका क्वापि दृष्टचरी । मनसः साक्षात्कारकारणताप्रतिपादिकां श्रुतिमन्यथयति—मनसैवेति । न च श्रुतीनामुपदेशस्य मनःसहायताप्रतिपादकतयाप्युपपत्तेरिति वाच्यम्; मनसश्च नित्यादिस्वभावब्रह्मात्मैक्यसाक्षात्कारहेतुत्वाननुभूतत्वेन तत्र शब्दस्य सहकारित्वकल्पनानुपपत्तेः । बाधकान्तरमाह—तथात्वे इति । श्लोकस्य द्वितीयपादं विशदयति—सुखादीनामिति । न च भावनापरिपाकसहकृतमनसो गरुडादिसाक्षात्कारहेतुत्वं दृष्टचरमिति वाच्यम्; तादृशस्य मनसो गरुडादिसाक्षात्कारप्रमाऽजनकत्वात्, तदपरोक्षस्य च भ्रमरूपत्वात् । तत्र दृष्टान्तमाह—विधुरेत्यादि । तादृग्भ्रमस्यापि साक्षिरूपतया मानसत्वाभावमाह—अप्रमारूपेति । प्रकृते प्रमासाक्षात्कारः श्रुतिगम्योऽविद्यानिवृत्तिक्षमः, तत्र मनसः करणत्वनिषेधात्करणान्तरानिरूपणाच्च पारिशेष्याद्वेदान्तवाक्यमेव तत्करणं प्रतिपद्यते इत्याह—इह चेत्यादिना—सुनिश्चितार्था इत्यन्त्येनेति । अत्र "मामेव" तरत्यविद्यामिति स्मृती । शेषाः श्रुतयः । तं बृहन्तं=परमात्मानमपरिच्छिन्नमिति । अवेदज्ञो न मनुते, किन्तु वेदज्ञ एव जानाति । अत्र वेदशब्देन वेदैकदेशा वेदान्ता गृह्यन्ताम् । इह वेदान्तवाक्यजन्यं ज्ञानं विज्ञानमिति न निश्चयमात्रपर्यवसायि, किन्तु सूपसर्गसामर्थ्याद्विशेषविषयप्रतिपादनात् ब्रह्मविद्याहेतुता केवलं वेदान्तवाक्येष्वेवेति निश्चतोऽर्थः प्रतिभातीत्यर्थः ।

श्लोकस्योत्तरार्द्धं विशदयति—यत्पुनरिति । विवादास्पदः शब्दः, नापरोक्षज्ञानजनकः, शब्दत्वात्, ज्योतिष्टोमादिवाक्यवदित्यनुमानं निरुक्तश्रुतिविरुद्धत्वाद्बाधितं, दशमस्त्वमसीति वाक्ये व्यभिचरितं

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रतिप्रयोगयोगाच्च विपक्षे बाधसम्भवात् ।
तस्याभाससमानत्वाच्छब्दादेवापरोक्षधीः ॥३॥

प्रतिप्रयोगश्च—अपरोक्षत्वं तत्त्वमसीत्यादिवाक्यजन्यज्ञानवृत्ति, अपरोक्षज्ञाननिष्ठात्यन्ताभावाप्रतियोगित्वात्, ज्ञानत्ववत् । न च परोक्षत्वं तद्वृत्ति, परोक्षज्ञाननिष्ठात्यन्ताभावाप्रतियोगित्वादिति सप्रतिसाधनता; सिद्धसाधनत्वात् । इष्यते हि तस्यासम्भावनाविपरीतभावनाप्रतिबद्धान्तःकरणे पुरुषे परोक्षज्ञानजनकत्वम् । 'तद्धास्य विजिज्ञौ' इति श्रुतिविरुद्धतया कालात्ययापदिष्टत्वाच्च । न चापरोक्षत्वमग्निहोत्रादिवाक्यजन्यज्ञानवृत्ति,अपरोक्षज्ञाननिष्ठात्यन्ताभावाप्रतियोगित्वात्,ज्ञानत्ववदित्याभाससमानयोगक्षेमता; विपक्षे बाधकतर्काभावेन तस्याप्रयोजकत्वात् । किं वाक्याप्रामाण्यानुपपत्तिर्बाधिका ? उतानुष्ठानानुपपत्तिः ? स्वर्गादिफलासिद्धिर्वा? नाद्यः; अनुमानादिवत्प्रामाण्योपपत्तेः । न द्वितीयः, परोक्षनिश्चयादप्यनुष्ठानसिद्धेः । न तृतीयः, अनुष्ठानादेव फलसिद्धेः । इह त्वात्मविज्ञानस्य मोक्षसाधनत्वश्रुत्यन्यथानुपपत्तिरेव बाधिका । तथाहि—'ब्रह्मविदाप्नोति परम्', 'ब्रह्म वेद ब्रह्मैव भवति,' 'तरति शोकमात्मवित्'—इति वेदान्तवाक्यजनितात्मविज्ञानान्मोक्षः श्रूयते । स च सविलासाज्ञाननिवृत्तिलक्षणः । संसारस्य दुर्निरूपत्वेनाविद्यारूपत्वात्,तस्य चाहं कर्ता भोक्तेत्याद्यपरोक्षविभ्रमलक्षणस्य परोक्षज्ञानान्निवृत्त्यनुपपत्तेः । ब्रह्मणि च सकलकरणागोचरे प्रमाणान्तरेण प्रत्यक्षज्ञानानुत्पत्तेर्वाक्याच्चापरोक्षज्ञानानुत्पत्तावनिर्मोक्षः स्यादिति-

---

चेति बोध्यम् । पूर्वोक्तानुमाने श्लोकेन दोषान्तरमप्याह—प्रतिप्रयोगेति । प्रतिप्रयोगं=सत्प्रतिपक्षमाह—अपरोक्षत्वमित्यादि । अत्र साध्यशरीरे ज्ञानवृत्तीत्युक्ते प्रत्यक्षवृत्तित्वमादायार्थान्तरता स्यात्तद्वारणाय वाक्यजन्येति । तथात्वेऽपि विवक्षितार्थासिद्धिरिति तद्वारणाय तत्त्वमस्यादीति । असिद्धिवारणाय हेतावपरोक्षेति । वेदान्तवाक्यजन्यज्ञानावृत्तिमविकल्पकत्वादिना व्यभिचारः स्यात्तद्वारणाय हेतुशरीरेऽत्यन्ताभावविशेषणम् । न चात्र-परोक्षत्वं तत्त्वमसीत्यादिवाक्यजन्यज्ञानवृत्ति, परोक्षज्ञाननिष्ठात्यन्ताभावाप्रतियोगित्वाद् ज्ञानत्ववदिति सत्प्रतिपक्षतेति वाच्यम्, सिद्धसाधनत्वात् । अत्र द्वितीयानुमानेऽसिद्धिवारणाय परोक्षपदं शाब्दावृत्तित्यनुमितित्ववारणायात्यन्ताभावग्रहणम् । सिद्धसाधनतां स्पष्टयति—इष्यते हीति । बाधमप्याह—तद्धास्येत्यादि । सिद्धान्त्यनुमाने आभाससमानयोगक्षेमतामुद्भाव्य परिहरति—न चापरोक्षत्वमिति । अत्रानुमानाभासे विपक्षबाधकतर्काभावेन स्वोपसाध्यसाधनेऽसमर्थत्वात् । विपक्षे बाधकमेव विकल्पयति—किं वाक्येत्यादिना । त्रिषु विकल्पेषु न तावद्वाक्यप्रामाण्यानुपपत्तिर्बाधिकेति प्रथमः; अग्निहोत्रादिवाक्यस्यापरोक्षज्ञानाजनकत्वेऽप्यनुमानवत्प्रामाण्योपपत्तेः । नाप्यनुष्ठानानुपपत्तिर्बाधिकेति द्वितीयः पक्षः, परोक्षनिश्चयादप्यनुष्ठातुं शक्यत्वात् । नापि स्वर्गाफलासिद्धिर्बाधिकेति तृतीयः पक्षः; अनुष्ठानादेव फलसिद्धेः । श्लोकस्य द्वितीयं पादं विशदयति—इह त्विति । बाधं विशदयति—तथाहीति । तस्य चेति दिङ्मोहादिवदहंकर्त्ता भोक्तेत्याद्यपरोक्षविभ्रमस्य परोक्षज्ञानान्निवृत्तिर्न दृश्यते । न च मनसैवापरोक्षज्ञानमुत्पद्यतामिति वाच्यम्; सकलप्रमाणाविषये ब्रह्मणि शब्दातिरिक्तप्रमाणेनापरोक्ष

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विपक्षे बाधकतर्कसम्भवान्नाभाससमानतानुमानस्य, तस्माच्छब्दादेवापरोक्षज्ञानात् कैवल्यमिति सकलमनाविलम् ।

ननु कथं ज्ञानात्कैवल्यं तस्य स्वर्गादिफलकर्मशेषतया स्वतन्त्रफलसाधनत्वाभावात् । देहव्यतिरिक्तात्मतत्त्वविज्ञानव्यतिरेकेण पारलौकिककर्मणि प्रवृत्त्ययोगात्, फलश्रुतेश्चापापश्लोकश्रवणवदर्थवादत्वात् । तथाचाहुः—

'आत्मा ज्ञातव्य इत्येतन्मोक्षार्थं न च चोदितम् ।
कर्मप्रवृत्तिहेतुत्वम् आत्मज्ञानस्य लक्ष्यते ॥
विज्ञाते चास्य पारार्थ्ये पापानामफलश्रुतिः ।
सार्थवादो भवेदेव न स्वर्गादेः फलान्तरम् ॥इति ।

(श्लो० वा० सम्बन्ध १०३,१०४)

देहव्यतिरिक्तात्मज्ञानस्य कर्मप्रवृत्त्युपयोगित्वेऽप्यशनायाद्यतीतब्रह्मविज्ञानस्य न तच्छेषत्वमनुपयोगादधिकारविरोधाच्चेति चेत्, मैवम्; आज्यावेक्षणव्रीहिप्रोक्षणादिवददृष्टद्वारेणोपपत्तेः । न चाधिकारविरोधः; तथाभूतब्रह्मविदामपि यमनियमादौ प्रवृत्तिवत्कर्मप्रवृत्त्यविरोधात् । जनकोद्दालकप्रभृतीनां तथाभूतानामपि कर्मणि प्रवृत्तिदर्शनाच्चेति चेत्;

अत्रोच्यते— अभावाच्छ्रुतिलिङ्गादेरुपयोगानिरूपणात् ।
अधिकारविरोधाच्च कर्माङ्गं नात्मतत्त्वधीः ॥४॥

न तावद् 'ऐन्द्र्या गार्हपत्यमुपतिष्ठते' इतिवदात्मविज्ञानस्य कर्माङ्गत्वे श्रुतिरस्ति । न च 'यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति, इति श्रुतिः;तस्याः प्रकृतो-

---

ज्ञानानुत्पत्तेर्वाक्याच्चापरोक्षानुत्पत्तेरनिर्मोक्षप्रसङ्गः स्यादिति विपक्षे बाधतर्कसत्त्वेनानुमानस्य नाभाससमानतेत्यतः शब्दादेवापरोक्षज्ञानोत्पत्तौ कैवल्यप्राप्तिरित्यनवद्यम् ।

ज्ञानात्कैवल्यसिद्धान्तममृष्यमाणो मीमांसकः शङ्कते—ननु कथमिति । देहातिरिक्तात्मज्ञानस्य कर्मशेषत्वमुपपादयति—देहव्यतिरिक्तेति । आत्मज्ञानप्रकरणे फलश्रवणं पर्णमयीत्वाद्याश्रितापापश्लोकादिश्रवणवदर्थवादः । तथा च "द्रव्यगुणसंस्कारकर्मसु परार्थत्वात्फलश्रुतिरर्थवादः स्यादि"ति परमर्षिराह । तत्र भट्टपादसम्मतिमाह—तथा चाहुरिति । आत्मज्ञानस्य फलान्तरश्रवणस्य गतिमाह—विज्ञाते चास्येति । स्वर्गादिःसकाशात्फलान्तरमपि नास्तीत्यर्थः । द्विविधं ह्यात्मज्ञानं, स्थूलदेहभिन्नत्वेनैकं, स्थूलसूक्ष्मकारणदेहभिन्नत्वेन द्वितीयम् । तत्राद्यं स्यादपि कर्मशेषम्, नेतरदित्याह—देहव्यतिरिक्तेति । अनुपयोगं परिहरति पूर्वपक्षी—आज्यावेक्षणेति । अधिकारविरोधं समाधत्ते—न चाधिकारेति । आत्मविदां कर्मप्रवृत्तौ दृष्टान्तमाह—जनकेत्यादि ।

सिद्धान्ती समाधातुं प्रतिजानीते—अत्रोच्यत इति । आत्मज्ञानस्य कर्मशेषत्वं श्लोकेन सङ्कलयति—अभावादित्यादि । तत्राद्यं पादं विशदयति—न तावदित्यादिना । यदेव विद्ययेति तृतीयाश्रुतेः प्रकृतोद्गीथविद्योपयोगित्वं बोध्यम् । श्रद्धयेति श्रद्धाया अप्युपासनाप्रकरणे पाठादुपासनानुष्ठानाङ्गत्वं ज्ञेयम् । नापि "बर्हिर्देवसदनं दामि" देवानां सदनभूतं दर्भमुष्टिविशेषं

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

द्गीथविद्याविषयत्वात्। श्रद्धादिवत्सार्वत्रिकं किन्न स्यादिति चेत्; तथाप्युपासनानुष्ठानस्यैव तदङ्गताऽस्तु, उपासनाप्रकरणे पाठात्। नापि 'बर्हिर्देवसदनं दामि' इतिवच्छ्रुतिसामर्थ्यलक्षणं लिङ्गमस्ति। न चोद्दालकादीनां कर्मणा सहात्मविज्ञानसद्भावो लिङ्गम्; 'किं प्रजया करिष्यामः' 'किमर्थं वयमध्येष्यामहे' इति च वैपरीत्यस्यापि दर्शनात्। न च 'यस्य पर्णमयी जुहूर्भवति; इतिवद्वाक्याद्विनियोगः पर्णमयीत्वादिवदात्मनोऽव्यभिचरितक्रतुसम्बन्धाभावात्, तस्य लौकिकवैदिकर्मसाधारण्यात्। न चात्मज्ञानं कर्मप्रकरणे श्रुतम्, येन प्रयाजादिवत्कर्माङ्गतामश्नुवीत। नापि स्थानम्, कर्मसंनिधावपठ्यमानत्वात्। नापि समाख्या; संज्ञासाम्याभावात्। न चात्मज्ञानस्य कर्मण्युपकारप्रकारो निरूप्येत देहव्यतिरिक्तात्मज्ञानस्योपयोगेऽप्यशनायाद्यतीतात्मविज्ञानस्य तत्रानुपकारित्वात्। न चाज्यावेक्षणादिवददृष्टद्वारेणोपयोगः; स्वप्रकरणपठितसंसारनिवृत्तिलक्षणदृष्टफलनिराकांक्षस्यादृष्टफलकल्पनानुपपत्तेः। न च क्रियाकारकफलशून्यमद्वैतमात्मानं विजानतः कर्मणि प्रवृत्तिरुपपद्यते। न च यमनियमादिप्रवृत्तिवदविरोधः;यमनियमादावप्यपरोक्षात्मविज्ञानवतो विधितः प्रवृत्त्यनङ्गीकारात्। 'तस्य कार्यं न विद्यते'।

'ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः।
नैवास्ति किंचित्कर्तव्यमस्ति चेन्न स तत्त्ववित्।' (जा०द०उ०१/२३)

इति स्मरणात्। भिक्षाटनादावपि व्युत्थानदशायां यदृच्छयैव प्रवृत्तेः। न चैवं कर्मणि प्रवृत्तिः, नियतदेशकालतया तस्य विधानात्।

खण्डयामीत्यर्थप्रकाशनसामर्थ्यरूपलिङ्गमात्मज्ञानस्य कर्मशेषत्वबोधकमिति। उद्दालकादीनां कर्मणा सहात्मज्ञानसद्भावो लिङ्गमपि विपरीतश्रुतिदर्शनपराहतमित्याह—किं प्रजयेत्यादि। तस्य=देहातिरिक्तात्मज्ञानस्य दर्शादिपारलौकिककर्मणः कारीर्यादिलौकिककर्मणश्च साधारण्यान्नात्मनः पर्णमयीत्वादिवदव्यभिचरितक्रतुसम्बन्धोऽस्ति। अतो वाक्यमपि नात्मज्ञानस्य कर्मशेषत्वावबोधकमित्याह—न च यस्येति। नापि प्रकरणप्रमाणेनात्मज्ञानस्य कर्मशेषत्वं वक्तुं युक्तमित्याह—न चात्मज्ञानमिति। कर्मसन्निधौ पाठाभावान्न स्थानप्रमाणमात्मज्ञानस्य कर्मशेषत्वावबोधकमित्याह—कर्मसन्निधाविति। संज्ञासाम्याभावात्समाख्यापि नात्मज्ञानस्य कर्मशेषत्वावबोधिकेत्याह—नापि समाख्येति। देहव्यतिरिक्तात्मज्ञानस्य कर्मोपकारकत्वेऽपि नाशनायाद्यतीतात्मज्ञानस्य कर्मोपकारकत्वमित्याह—न चात्मज्ञानस्येति। अदृष्टद्वारेणाप्यात्मज्ञानस्य कर्मोपयोगाभावं दर्शयति—न चाज्येत्यादि। उत्तरार्द्धं विशदयति—न च क्रियेत्यादिना। उत्पन्नात्मापरोक्षज्ञानस्य स्वभावतो यमादीनां संघटनं न विधित इत्याह—न च यमेति। तत्र स्मृतिप्रमाणमाह—तस्येति। जाबालदर्शनोपनिषद्यपि तथैवाह—ज्ञानामृतेनेति। व्युत्थानदशायां भिक्षाटनादौ सत्यपि अनियता यादृक्षी प्रवृत्तिर्न कर्मणि तथाऽनियतेति। कर्मणो नियतदेशादिविधानादित्याह—नियतेति।

इत्थं विद्यायां कर्मशेषत्वं निरस्य कैवल्यफलत्वं प्रसाधितं, सम्प्रति कर्मसमुच्चितैव ब्रह्मविद्या मोक्षसाधिका न तु केवलेति समुच्चयवादिमतं दूषयितुं समुच्चयपक्षेऽपि पूर्वोक्तां कर्मणि प्रवृत्त्य-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतेन ज्ञानकर्मणोः समुच्चयोऽपि निराकृतो वेदितव्यः । विरोधादेव । उक्तं हि—

"यद्धि यस्यानुरोधेन स्वभावमनुवर्तते ।
तत्तस्य गुणभूतं स्यान्न प्रधानाद् गुणो यतः" ॥इति । (बृह०वा० ३/३/६८)

अपि च उत्पत्त्याप्तिविकृतिसंस्कृतयः कर्मणः फलम्, विद्यायाः पुनरविद्यास्तमयस्तत्कथमनयोः साहित्यम् ? नहि शुक्तिकाशकलं सकलमाकलयतः कलधौतविभ्रमनिवृत्तिः स्नानाऽऽचमनादिकर्मापेक्षया विलम्बते । तदेवं लौकिकेन न्यायेन ब्रह्मात्मसाक्षात्कार एव तदविद्यानिवृत्तिहेतुरित्यास्थेयम् । श्रुतिस्मृतिषु कर्मणो निर्वाणकारणतानिराकरणाच्चैतदवसेयम् । श्रूयते हि—'तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय ।' 'न कर्मणा न प्रजया धनेन' 'नास्त्यकृतः कृतेन' 'एतावदरे खल्वमृतत्व' मित्यादि । स्मर्यते च—

'ज्ञानादेव तु कैवल्यं प्राप्यते येन मुच्यते ।
कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते ।
तस्मात्कर्म न कुर्वन्ति यतयः पारदर्शिनः ॥' । इति ।

नन्वेतानि वचनानि केवलानामेव कर्मणां कैवल्यसाधनत्वनिराकरणपराणि समुच्चितानां तूपपद्यते तत्साधनभावः' तथा च 'अन्धं तमः प्रविशन्ति येऽविद्यमुपासते । ततो भूय इव ते तमो य उ विद्यायां रताः । इत्येकैकनिन्दापुरःसरं 'विद्यां चाविद्यां च यस्तद्वेदोभयं सह । अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते' इति ज्ञानकर्मणोः समुच्चितयोर्मोक्षसाधनत्वप्रतिपादनात् । तथा हि—संसारनिवृत्तिर्ब्रह्मप्राप्तिश्च मुक्तिः । तत्र विद्येतरत्वे-

---

नुपपत्तिमतिदिशति—एतेनेति । अतिदिश्यमानं विशदयति—विरोधादेवेति । समुच्चयो द्विविधः षड्यागादिवत् समप्राधान्येन, प्रयाजदर्शपूर्णमासवद् गुणप्राधान्येन । तत्र वक्ष्यमाणरीत्या ज्ञानकर्मणोः साध्यसाधनत्वावगमान्न समसमुच्चयोऽभिमतः । गुणप्रधानपक्षेऽपि परम्परया ज्ञानं प्रति कर्मणां गुणत्वमभ्युपगतमेव न तद्विपरीतं स्वरूपविरोधादिति भावः । अत्र वार्तिकसम्मतिमाह—उक्तं हीति । यद्वस्तु यस्याविरोधेन स्वभावानुकूलं भवति तदेव वस्तु तस्य गुणभूतमङ्गं भवति न प्रधानात् = (प्रधानविघातकः) प्रधानस्य गुणो भवितुमर्हतीति श्लोकयोजना । कर्मविरोधि ज्ञानं कथं कर्माङ्गं भवेदिति । अतो नोभयोर्गुणप्रधानभावेन समुच्चयः सम्भवति । विरुद्धफलत्वादपि नोभयोर्गुणप्रधानभाव इत्याह—अपिचेति । तत्र लौकिकदृष्टान्तमाह—नहि शुक्तिकेति । सकलं = नीलपृष्ठादविशेषं पश्यतः । तं लौकिकन्यायं सिद्धान्तेऽतिदिशति—तदेवमिति । श्रुतिस्मृतिषु कर्मणो मोक्षकारणतां वारयति—"तमेव" "न कर्मणा" "नास्त्यकृतः" इत्यादि । स्मर्यते च—ज्ञानादेवेत्यादि ।

समुच्चयवादी प्रदर्शितवचनान्यन्यथयति—नन्वेतानीति । समुच्चयपक्षे श्रुतिप्रमाणमाह—अन्धं तम इति । ज्ञानकर्मणोरेकफलत्वं संघटयति—तथाहीत्यादिना । नहि ब्रह्मप्राप्तिमात्रं मोक्षः, तस्य पूर्वमपि विद्यमानत्वेन साधनानुष्ठानवैयर्थ्यात् । नाप्यविद्यानिवृत्तिमात्रमपवर्गः, तस्याभावरूपतयाऽपुरुषार्थत्वात् । तस्मादविद्यानिवृत्त्युपलक्षितब्रह्मप्राप्तिरपवर्गः । तत्रोभयोः समसाधनत्वमित्याह—तत्र विद्येतरत्वेनेति । तत्रापि मृत्युपदवाच्यसंसारस्य निवृत्तौ कर्मणामुपयोगः, अविद्यानिवृत्तौ

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri. Funding IKS-MoE-Grant-2

नाविद्यामूलत्वेन वा अविद्याशब्दवाच्यानां कर्मणां मृत्युपदवेदनीयकर्मक्षयद्वारेण संसारनिवृत्तावुपयोगः । ब्रह्मत्वात्मरूपतया नित्यप्राप्तमविद्यामात्रतिरोहितं कण्ठगतचामीकरवत्' न तत्राविद्यानिवृत्तेरधिकं कार्यमस्तीति' अविद्यानिवृत्तौ विद्यायाः उपयोगः। तदिदमुक्तम् 'विद्ययाऽमृतमश्नुते' इति । यत्पुनः परेषां व्याख्यानं 'देवताज्ञानमिह विद्याशब्देन विवक्षितम्, तस्य कर्मणा समुच्चयोऽनेन वाक्येन कथ्यत' इति । तदयुक्तम्; प्रक्रमाननुगुणत्वात्' ईशावास्ये परमात्मनः प्रक्रान्तत्वात् । तथा च श्रुतिः—'तेनैति ब्रह्मवित्पुण्यकृत्तैजसश्च', 'सत्येन लभ्यस्तपसा ह्येष आत्मा सम्यग्ज्ञानेन ब्रह्मचर्येण नित्यम्' इति स्पष्टमेव समुच्चयं प्रतिपादयति । स्मृतिरपि—

"तपो विद्या च विप्रस्य निःश्रेयसकरं परम् ।
तपसा कल्मषं हन्ति विद्ययाऽमृतमश्नुते ॥" (मनु०१२/१०४)
'तत्प्राप्तिहेतुर्ज्ञानं च कर्म चोक्तं महामुने ।
यथान्नं मधुसंयुक्तं मधु चान्नेन संयुतम् ।
एवं तपश्च विद्या च संयुक्तं भेषजं महत् ॥' इत्यादिकाः ।

तेन च वाचनिकसमुच्चयानुसारेण कर्मनिन्दापराणां वाक्यानां केवलकर्मविषयतैवेति निश्चीयते । न च मोक्षस्य साक्षाज्ज्ञानं साधनं कर्माणि तु पापाऽपाकरणद्वारेण ज्ञानसाधनानीति वचनानां व्यवस्था, 'कर्मणैव हि संसिद्धिमास्थिता जनकादय' इत्यादेस्तु लाङ्गलेन वयं जीवामह इतिवत्पारम्पर्येणापि तत्साधनपरत्वोपपत्तेरिति युक्तम्; साक्षान्मोक्षसाधनत्वेन प्राप्तस्य कर्मणः साधनसाधनत्वग्रहणे प्राप्तान्वयबाधप्रसङ्गात् । 'नान्यः पन्था' इत्यादेस्तु निषेधस्य केवलकर्मविषयतयान्तरेणापि प्राप्तान्वयबाधसकोचेनाप्युपपत्तेः । न च वाच्यमन्वयबाध एवात्र युक्तः 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन',

---

ब्रह्मविद्यायाश्चोपयोग इत्याह—अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुत इति । विद्याशब्देन देवताज्ञानस्य ग्रहणं प्रक्रमानुगुणं दर्शयति—ईशावास्य इति । श्रुत्यन्तरेऽपि ब्रह्मवित्त्वपुण्यकृत्त्वयोरेकपुरुषसम्बन्धमाह—तेनैतीत्यादि । स्मृतिरपि तथैवाह—तपोविद्या चेति । तत्प्राप्तिहेतुरिति—इत्थ च कर्मनिन्दापरवाक्यानां तात्पर्यमाह—तेन चेति । कर्मणैवेति । यथाहि साक्षाज्जीवनसाधनोदनादिः साधने लाङ्गलादौ लाङ्गलेन वयं जीवामह इति जीवनसाधनत्वव्यवस्था, तद्वत् कर्मणैव संसिद्धि दर्शयति । न च युक्तमित्यनेन समुच्चयवादी प्रतिक्षिपति । तत्र हेतुमाह—साक्षादिति । वचनतस्तावत्साक्षात्कर्मणां मोक्षसाधनं प्राप्तं, तस्य बाधो न युक्तः, रागतः प्राप्तमेव शास्त्रेण बाध्यते । "तुल्यं हि साम्प्रदायिकमि"ति न्यायात् । अन्यथा षोडशिग्रहणादावपि विकल्पानवकाशप्रसङ्गात् । न च "नान्यः पन्थाः", इति श्रुत्या ज्ञानातिरिक्तं मोक्षस्य साधनं निषिद्धमिति वाच्यम्; एतन्निषेधस्य केवलकर्मविषयतयान्तरेणापि प्राप्तान्वयबाधं सङ्कोचेनाप्युपपत्तेः । नान्यः पन्थाः । अत्र ज्ञानव्यतिरिक्तसमस्तसाधनस्य निषेधे प्राप्तान्वयबाधः स्यात्, तदेकदेशे तु केवलकर्मविषये व्यवस्थापनेन न बाधो भवति, अपितु सङ्कोचः श्रुतार्थस्य सर्वथा परित्यागाभावादित्यर्थः । अत्रानन्दबोधाचार्यमतमनूद्य दूषयति—न च वाच्यमित्यादिना । अन्वयबाधे हेतुमाह—तमेतमित्यादिना ।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'धर्मात्सुखं च ज्ञानं च ज्ञानान्मोक्षोऽधिगम्यते' 'योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये,' 'कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तते' इत्यादिश्रुतिस्मृतिवाक्यैः कर्मणां मोक्षसाधनसाधनत्वेन विनियोगादिति; ज्ञानस्यैव कैवल्यसाधनत्वे 'ततो भूय इव ते तमो य उ विद्यायां रता' इति केवलविद्यानिन्दानुपपत्तेः। न च समुच्चयपक्षे 'नान्यः पन्था विद्यते', 'न कर्मणा', 'नास्त्यकृतः कृतेने'ति कर्मनिषेधानुपपत्तिः। तद्वचनानां षडयागवत्साक्षात्समप्रधानतया साधनतानिषेधपरत्वात्। अभ्युपगम्यते हि व्यवधानेन कर्मणां मोक्षसाधनत्वम्। व्यवधानत्वं च करणोपकारो, न तदुत्पादकत्वम्। नचैवमपि कर्मसाध्यत्वे मोक्षस्यानित्यत्वदोषः 'तद्यथेहे' त्यादिश्रुतेः; 'यत्कृतकं तदनित्यमि'ति न्यायाच्चेति युक्तम्। बन्धप्रध्वंसे कर्मणामुपयोगात्। बन्धप्रध्वंसस्य कृतकत्वेऽपि नित्यत्वात्, अन्यथा नष्टानिष्टप्रसङ्गात्। 'वेदानुवचनेन ब्राह्मणा विविदिषन्ति' इत्यत्र सन्वाच्येच्छायाः करणसम्बन्धानुपपत्तावश्वेन जिगमिषतीत्यादाविवोभयवादिसम्प्रतिपन्नेष्यमाणवेदनोत्पत्तावेव कर्मणां करणत्वावगमात्, न कर्मणां करणोपकारकत्वम्। करणे मुख्यार्थायास्तृतीयाश्रुतेः करणोपकारकत्वे भङ्गप्रसङ्गादिति न वाच्यम्। 'यज्ञेन विविदिषन्ती' त्यत्रापूर्वत्वाद्विधिपरवाक्ये विध्यवच्छिन्नभावनारूपवाक्यार्थानुप्रवेशेनैव पदार्थानां परस्परसम्बन्धात्, तस्याश्च भावनाया मोक्षभाव्यावच्छिन्नत्वात्, धात्वर्थस्य च स्वतोऽसमीहिततया भाव्यत्वानुपपत्तेः। ततश्चान्यार्थप्रवृत्तभावनाभाव्यत्वलक्षणकरणभाव एव धात्वर्थस्य। तथा च

वेदानुवचनेन ब्रह्मचर्याश्रमोपलक्षितं कर्म, यज्ञादिना गार्हस्थ्याश्रमोचितम् तपसा च वानप्रस्थाश्रमकर्मोपलक्ष्यते, एषां विविदिषायां वेदने वा विनियोगः प्रतीयते। तत्रापीच्छायाः सौन्दर्यज्ञानाधीनतया वेदने तत्कर्मणां विनियोगः। अतः शास्त्रेणैव व्यवस्थाया दर्शितत्वेन प्राप्तान्वयबाध एव युक्तः। तत्र हेतुं दर्शयति—ज्ञानस्यैवेति। केवलविद्याया मोक्षसाधनत्वे "ततो भूय इवे"त्यादिश्रुत्या केवलविद्यानिन्दानुपपत्तेः। समुच्चयपक्षे "नान्यः पन्थाः", "न कर्मणा", "नास्त्यकृतः कृतेने"ति कर्मनिषेधश्रुतिवाक्यानां दर्शादिषड्यागवत्साक्षात्समप्रधानतया समप्रधानत्वेन निषेधपरत्वमाह—न च समुच्चयेति। कर्मणां व्यवधानेन मोक्षसाधनत्वमभ्युपेयते। व्यवधानत्वं नाम ज्ञानरूपकरणोपकारकत्वं न तु तदुत्पादकत्वमिति। न च "यत्कृतकं तदनित्यमि"ति न्यायानुगृहीतया "तद्यथेहे"त्यादि श्रुत्या मोक्षस्य कर्मसाध्यत्वेऽनित्यत्वापत्तिरिति वाच्यम्; बन्धध्वंसे कर्मणामुपयोगात्। बन्धप्रध्वंसस्यानित्यत्वे दोषमाह—अन्यथेति। नष्टबन्धस्य पुनरापत्तिः स्यादित्यर्थः। किं चाश्वेन जिगमिषतीत्यादौ यथा गमनं प्रत्येवाश्वस्य साधनता, तद्वत् विविदिषन्तीत्यत्रापि सन्प्रत्ययवाच्येच्छायाः करणसम्बन्धानुपपत्त्योभयवादिसम्मतेष्यमाणधात्वर्थवेदनोत्पत्तावेव वेदानुवचनादिकर्मणां करणत्वमवगन्तव्यम्, न कर्मणां करणोपकारकत्वमिति। करणे यज्ञेनेत्यादौ मुख्यायास्तृतीयाश्रुतेः। करणोपकारकत्वाभ्युपगमे बाधप्रसङ्गः स्यादिति। अत्रानन्दबोधाचार्यमतेऽरुचिं दर्शयति—न वाच्यमित्यनेन। तत्र हेतुं दर्शयन् करणोपकारत्वेन वाक्यं योजयति—अपूर्वत्वादिति। यज्ञेन विविदिषन्तीत्यज्ञातज्ञापकं विधिवाक्यं, तत्रस्थाः सर्वे पदार्थाः प्रथमं भावनाख्यवाक्यार्थेऽन्वयं यान्ति, तद्द्वारा पदार्थानां परस्परमन्वयो भवति, तस्याश्च भावनायाः भाव्यः

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

लब्धश्रौतधात्वर्थकरणायां भावनायां यज्ञादीनां करणत्वेनानुप्रवेशानुपपत्तेस्तदपेक्षित-करणोपकारद्वारेण तेषां सम्बन्धः, ततश्च यज्ञादिभिरुपकृत्येति वाक्यार्थः सम्पद्यते । न च शमादीतिकर्तव्यतानिराकाङ्क्षत्वत् भावनाया यज्ञादीनां विधेयधात्वर्थकरणत्वेनैवान्वय इति वाच्यम्, उभयोरपि प्रयाजानुयाजादिवदगृह्यमाणविशेषतयेतिकर्तव्यत्वेनैवान्वयोपपत्तेः । तदेवं बाधकाभावात्साधकसद्भावाच्च कर्मसमुच्चितमेव ज्ञानं मोक्षसाधनमिति । तदिदमसुन्दरम् ।

यज्ञादेः करणत्वेन श्रुत्यैव प्रतिपादनात् ।
शेषत्वाधिगतावेव प्रक्रमस्याप्युपक्षयात् ॥५॥

विविदिषन्ति यज्ञेन दानेनेति तृतीयाश्रुत्या विधेयविज्ञानकरणत्वेन यज्ञादेः प्रतिपादनात्, तेषां फलोपकार्यङ्गत्वकल्पने श्रुतिबाधकप्रसङ्गात् । न च प्रकरणप्रमाणेन प्रयाजानुयाजादि वदगृह्यमाणविशेषतयेतिकर्तव्यतात्वमेव यज्ञादीनां शमादिवदिति वाच्यम्; प्रकरणस्य सामान्यतः शेषत्वबोधनेनैव चरितार्थत्वात्तद्विशेषं प्रति श्रुत्यादीनामेव प्रमाणत्वात् । तस्माद् 'व्रीहिभिर्यजेत' इत्यादाविव करणशरीरनिर्वर्तकतया च यज्ञादीनां करणत्वं यज्ञेनेतितृतीयाश्रुत्या निश्चीयते । यज्ञादिभिरूपकृत्येति व्याख्याने साध्याहार-

---

(साध्यो) मोक्षः, न तु धात्वर्थो यागादिः साध्यो भवितुमर्हति, तस्य धात्वर्थस्य स्वतोऽसमीहितत्वेन कष्टरूपतया भाव्यत्वानुपपत्तेः । तस्मात्स्वर्गापवर्गाद्युद्देश्येन प्रवृत्तपुरुषस्य कृतिभाव्यत्वरूपकरणत्वमेव धात्वर्थस्येति । कुठारादेरपि द्वैधीभावाद्युद्देश्येन प्रवृत्तपुरुषकृतिभाव्यत्वमेव करणत्वं तद्वद्वैदिक-यज्ञादिष्वपि बोध्यम् । इत्थमेव विविदिषन्तीत्यत्र लब्धश्रौतधात्वर्थकरणभावनायां यज्ञादीना-मितिकर्तव्यतात्वेनान्वयो बोध्यः । लब्धेत्यादि=लब्धंश्रौतं समानपदश्रुतिसिद्धं करणं यया भावनया सा तथोक्ता भावना । भिन्नपदोपात्तस्य समानपदोपात्ताद्दुर्बलत्वमुपपत्तिर्बोध्या । कथं-भावेनान्वयप्रकारमभिनयति—ततश्चेति । यज्ञादिभिरुपकृत्य ज्ञानेन मोक्षं भावयेदिति वाक्यार्थः सम्पद्यते इत्यर्थः । न च "शान्तो दान्त" इत्यादिवाक्यप्रतिपाद्यशमादिरूपामितिकर्तव्यतां प्राप्य भावनाया निराकांक्षत्वाद् यज्ञादीनां विधेयधात्वर्थवेदनकरणत्वेनैवान्वयः कर्तव्य इति वाच्यम्; यज्ञादीनां शमादीनां चोभयत्रविशेष्यत्वाभावेन प्रयाजानुयाजवदितिकर्तव्यतात्वेनान्वयोपपत्तेः । मोक्षं प्रति ज्ञानकर्मसमुच्चयस्य साधनत्वपक्षमुपसंहरति—तदेवमिति ।

पूर्वपक्षिणोपपादितं समुच्चयपक्षं दूषयितुमुपक्रमते—तदिदमिति । श्लोकेन समुच्चयं निराचष्टे—यज्ञादेरिति । यज्ञेनेति तृतीयाश्रुत्यैव यज्ञादीनां विधेयभावनां प्रति करणत्वमवगम्यते । तत्र साक्षात्करणत्वासम्भवे परम्परयापि करणत्वावगमो युज्यतेतराम् । अन्यथा दुर्बलप्रकरणेन प्रबलश्रुति-प्रमाणस्य बाधः स्यात् । प्रकरणेन श्रुतिविरोधशङ्कामुत्तरार्द्धेन वारयति—शेषत्वेति । सामान्य-सम्बोधकं प्रकरणम् । तच्च श्रुत्यविरुद्धं शेषत्वं बोधयति । श्लोकं विशदयति—विविदिषन्ती-त्यादिना । तेषां=यज्ञादीनाम् । उत्तरार्द्धं विशदयति=न च प्रकरणेति । श्रुतिलिङ्गवाक्यविरोधे प्रकरणस्य बाध्यत्वं, न बाधकत्वम् । प्रकरणस्य सामान्यतः शेषत्वबोधनेनैवोपक्षयाद्विशेषं प्रति श्रुत्यादीनामेव प्रमाणत्वमवसितम् । तत्र दृष्टान्तमाह—व्रीहिभिरिति । किं च त्वत्पक्षे यज्ञादिभिरुपकृत्य वेदनेन मोक्षं भावयेदिति साध्याहारं वाक्यं योज्यते, नैवं मत्पक्षे किञ्चिद-ध्याहार्यम् । प्रत्यक्षश्रुत्यैव यज्ञादीनां करणत्वश्रुतत्वादित्याह—यज्ञादिभिरिति । न च यज्ञादीनां

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

योजनाप्रसङ्गात् । न च यज्ञादीनां श्रवणादिवत्साक्षाद्विज्ञानसाधनत्वाभावात् करणत्वानुपपत्तिः; परम्परासाधनेष्वपि लोके वेदेऽपि करणत्वाभ्युपगमात् । अभ्युपगम्यते हि ज्वालाव्यवधानेनैव काष्ठानां पाके करणत्वम्, अपूर्वव्यवधानेनैव स्वर्गे यागस्य । तथेहापि परिपन्थिदुरितशोधनव्यवधानेन यज्ञादेर्विज्ञानकरणतायां न कश्चिद्विरोधः,तदेवं तृतीयाश्रुत्या यज्ञादेर्विज्ञानकरणत्वाधिगतौ सर्वाण्यपि समुच्चयवचनानि परम्परासमुच्चयप्रतिपादनपराणीत्यभ्युपेयम् ।

न च केवलविद्यानिन्दानुपपत्तिः;

निन्दाया देवताज्ञानविषयत्वेऽपि सम्भवात् ।
प्रक्रमस्यापि बाध्यत्वाद्बलीयस्या तृतीयया ॥६॥

निन्दाया देवताविज्ञानविषयत्वेनाप्युपपत्तेः । न च परमात्मोपक्रमविरोधः, 'यज्ञेन' इति तृतीयाश्रुतेः प्रक्रमाद्बलीयस्त्वेन तद्बाधेऽप्यविरोधात् । क्रमसमुच्चयविषयत्वेनाप्युपपत्तेश्च । 'अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते' इति पौर्वापर्याभिधानात् । 'सह वेद' इति च वदन एव सहभावश्रवणात् । प्रक्रमानुरोधेनात्मविद्याविषयत्वेऽप्यपरिपक्वात्मज्ञानविषयतयाप्युपपन्नत्वात् । एतदुक्तं भवति—विद्यापरिपाकात्प्रागेव ये यथास्वं विहितं नित्यादिकर्म त्यजन्ति; तेषामुपात्तदुरितक्षयाभावाद्विहिताकरणनिमित्तप्रत्यवायस्याहरहरुपचीयमानत्वेनाशुद्धान्तःकरणतया परिपक्वात्मविद्यानुदयात्, न कैवल्यम् । शुभकर्मपरित्यागाच्च नाभ्युदय इत्यात्यन्तिक एवाधःपातः स्यादिति । तत्रैषाक्षरयोजना—विद्यां परिपक्वात्मज्ञानलक्षणाम्, अविद्यां च कर्मलक्षणां यः सह उपायोपेयभावेन वेद ।

नात्मज्ञानं प्रति साक्षात्साधनत्वमवगम्यते, श्रवणादीनामेव साक्षादात्मज्ञानजनकत्वात्; कथं यज्ञादीनामात्मज्ञानकरणत्वमभ्युपेयते इति वाच्यम्; परम्परया साधनेष्वपि लोके वेदे च करणत्वाभ्युपगमात् । अन्यथा श्रुतिबाधप्रसङ्गात् । दृश्यते हि काष्ठेनौदनं पचतीत्यत्र ज्वालाव्यवधानेऽपि काष्ठस्यौदनपाकं प्रति करणत्वं "ज्योतिष्टोमेन स्वर्गकामो यजेते"त्यत्र चापूर्वव्यवधानेऽपि स्वर्गं प्रति यागस्य करणत्वमिति । तथा प्रकृते विरोधिपापशोधनेन व्यवधानेऽपि यज्ञादितत्साध्यात्मज्ञानयोः कार्यकारणत्वाभ्युपगमे न कश्चिद्विरोध इत्याह—तथेहापीति । एवं च श्रुत्यैव यज्ञादिषु विज्ञानकरणत्वनिश्चिते साधारणसमुच्चयप्रवचनानि परम्परया समुच्चयप्रतिपादनपराणीत्यभ्युपेयम् ।

केवलविद्यानिन्दानुपपत्तिं श्लोकेन परिहरति—निन्दाया इत्यादि । श्लोकं विशदयति—निन्देति । न च परमात्मप्रकरणविरोध इति वाच्यम्; यज्ञेनेत्यादितृतीयाश्रुत्याः प्रकरणाद्बलीयस्त्वेन तद्बाधेऽदोषात् । उपायोपेयभावेन क्रमसमुच्चयपरतयाप्युपपत्तेश्च । तत्र पौर्वापर्याभिधानमाह—अविद्ययेति । 'सह वेद' इति वेदनं प्रत्येव सहभावश्रवणान्नतु फलं प्रतीतिभावः । प्रक्रमानुरोधेन निन्दायाः परमात्मविद्याविषयत्वेऽपरिपक्वात्मविषयत्वेनाप्युपपन्नत्वात् । तथा च यावत्परिपक्वब्रह्मविद्योदयमाश्रमविहितसर्वाणि कर्माण्यनुष्ठेयानीति फलितार्थः । अत्रैव "ततो भूय" इति वाक्यं योजयति—एतदुक्तमिति । एवं निन्दावाक्यं संयोज्य "विद्यां चाविद्यां चे"त्यपि वाक्यं क्रमसमुच्चयपरतयैव संयोजयति—तत्रैषेति ।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सोऽधिकृतः पुरुषोऽविद्यया कर्मलक्षणया विद्योत्पत्तिप्रतिबन्धकं मृत्युपदवेदनीयं पापं तीर्त्वा विद्यया परिपक्वसाक्षात्कारलक्षणयाऽमृतं निर्वाणम् अश्नुत इति ।

इदमत्राकूतम्—अविद्यापरिपाकाद्यथास्वं कर्मानुष्ठेयम्, विद्या तु परिपक्वा कर्मनिरपेक्षैव मोक्षं साधयिष्यतीति । समुच्चयवादिनोऽपि न तावत्काम्यकर्मणां समुच्चयः, तस्य मुमुक्षुणा परित्यागात् । नापि नित्यनैमित्तिकैः, तत्तदाश्रमविहितानां तेषामुत्कर्षापकर्षवत्त्वात्कर्मभूयस्त्वात्फलभूयस्त्वन्यायेन कैवल्यफले तावभ्युपेयाविति स्वर्गवदपवर्गस्यापि सातिशयत्वेनानित्वादिदोषप्रसङ्गात् । तस्माज्ज्ञानमेव कैवल्यसाधनमित्यभ्युपेयम् । 'सत्येन लभ्यस्तपसा' इत्यत्रापि सत्यादीनां ज्ञानसाधनत्वम्, ज्ञानस्यैव मोक्षसाधनत्वमित्यभ्युपेयम्; विविदिषावाक्ये यज्ञादीनां विज्ञानसाधनत्वस्यावधृतत्वात् । 'तेनैति ब्रह्मवित्पुण्यकृत्' इति ब्रह्मवित्पुण्यकृतोर्मार्गे समुच्चयः, मार्गश्च कार्यब्रह्मगोचरः, 'कार्यं

फलितार्थमाह—इदमिति । विद्यापरिपाकपर्यन्तं स्ववर्णाश्रमविहितकर्माण्यवश्यमनुष्ठेयानि । परिपक्वा विद्या कर्मनिरपेक्षैव मोक्षं साधयिष्यति । इदमत्रावधेयम्-सत्त्वशुद्धिपर्यन्तं स्ववर्णाश्रमविहितयज्ञादिकर्माण्यनुष्ठेयानि, सत्त्वशुद्ध्यनन्तरं सर्वकर्मसंन्यासरूपं परिव्राज्यमास्थितेन विवेकादिसाधनचतुष्टयसम्पन्नेन मुमुक्षुणा मनननिदिध्यासनशमाद्यनेकविधेतिकर्तव्यतोपेतमनुष्ठितं श्रवणमसति प्रतिबन्धे वर्तमानदेहे एवापरोक्षब्रह्मज्ञानं जनयति, उत्पन्नं चापरोक्षज्ञानमन्यसाधनानपेक्षमनाद्यविद्यां ध्वंसयतीत्यर्थः । एतेन कर्माङ्गभूतानां शिखादीनां तच्छेषिकर्मत्यागेन त्यागात् शिखासूत्रपरित्यागोपलक्षितपरमहंससंन्यासोऽपि समर्थितः । एतादृशसंन्यासस्य श्रुत्यादिभिर्ज्ञानाङ्गत्वेन विधानात् । मोक्षार्थं समुच्चयपक्षं दूषयति—समुच्चयेति । तत्रेहामुत्रार्थफलभोगविरक्तेन मुमुक्षुणा निषिद्धकाम्यकर्माणि परित्यक्तानि न विद्यया सह तेषां समुच्चयः सम्भवति । नापि नित्यनैमित्तिककर्मभिर्विद्यायाः समुच्चयः, तत्तद्वर्णाश्रमविहितानां कर्मणामुच्चावचभावात्कर्मभूयस्त्वात्फलभूयस्त्वन्यायेन मोक्षेऽप्युत्कर्षापकर्षाभ्युपगमप्रसङ्गात्, तेन स्वर्गादिवदपवर्गेऽपि सातिशयत्वानित्यत्वादिदोषप्रसङ्गाच्च । समुच्चयवादिनोक्तानां समुच्चयबोधकवाक्यानां पारम्पर्येण ज्ञानतत्फलमोक्षसाधनपरत्वमित्याह—सत्येनेत्यादि । अनन्यथासिद्धश्रुतिबलादेव श्रुत्यन्तरेऽन्यथासिद्धिमाह—तेनेति । अर्चिरादिमार्गः कार्यब्रह्मगोचरः । अतः कार्यब्रह्मवित्पुण्यकृतो मार्गे समुच्चयो न परब्रह्मणि । एतच्च "कार्यं बादरिरस्य गत्युत्पत्तेरि" (ब्र० सू० ४।३।७) त्यत्राचार्यैः सिद्धान्तितम् । एवं च गतेरर्थवत्त्वमुभयथाप्रतिपाद्य निर्गुणब्रह्मविद्यासु गत्युपसंहारं निवर्तयामास । एवं श्रुतिगतान्यथा-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

बादरिरस्य गत्युपपत्तेः' इत्यत्र राद्धान्तितत्वात्। एवं चोदाहृताः स्मृतयोऽपि क्रमसमुच्चयपरतया श्रुत्यनुसारेण योजनीयाः। तस्माज्ज्ञानमेव मोक्षसाधनमिति सिद्धम्।

इति श्रीमत्परमहंसपरिव्राजकाचार्यज्ञानोत्तमपूज्यपादशिष्य-
श्रीचित्सुखाचार्यविरचिततत्त्वप्रदीपिकायां
तृतीयः परिच्छेदः।

सिद्धि स्मृतिष्वप्यतिदिशति—एवं चेति। एतत्प्रकरणपठितषष्ठश्लोकस्थतृतीयाश्रुत्येति साधारणतयोपसंहारमुक्त्वात्र विशेषेणोपसंहृतमिति। साधनविषवादार्थमुपसंहरति—तस्मादिति।

इति श्रीमत्परमहंसपरिव्राजकाचार्ययतीन्द्रकुलतिलकश्रीकैलासपीठाधीश्वर-
दशमाचार्यमहामण्डलेश्वरश्रीमत्स्वामिविद्यानन्दगिरिविरचितायां
प्रत्यक्तत्त्वप्रदीपिकाया व्याख्यारूपायां छात्रतोषिण्यां

तृतीयः परिच्छेदः समाप्तः ॥३॥

॥ ॐ तत्सत् ॥

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

चतुर्थः परिच्छेदः

कः पुनरयं मोक्षः ? न तावद्विषयाकारोपप्लुतविज्ञानसन्तानोपरमः, तज्ज्ञानसन्तानस्यात्मरूपतया तदुच्छेदस्यापुरुषार्थत्वात्, न हि सर्वतः प्रियतमस्यात्मनः समुच्छेदाय वाञ्छा कस्यचिदुपजायते, बन्धविमोकपर्यायस्य मुक्तिशब्दस्यातदर्थत्वाच्च । नहि बद्धनाशो मोक्षपदवाच्यः, किन्तु सत एव तस्य बन्धविश्लेषः । नापि विधूतविषयाकारोपप्लवविशुद्धविज्ञानसन्तानोदयः, विकल्पासहत्वात् । तथा हि—किमयं सन्तानिनां पुरुषार्थः ? किं वा सन्तानस्य ? नाद्यः; तेषां स्वरसपरिनिर्वाणात् । नोत्तरः; तथाविधसन्तानोदयेऽपि मुमुक्षोरुपप्लुतसन्तानरूपस्योपरमात् । बन्धमोक्षयोर्वैयधिकरण्यापाताच्च । उभयान्वयिनः सन्तानिनः सन्तानस्य वैकस्याभावात्, कारणाभावाच्च । भावनाप्रकर्षो हि तस्य कारणमिष्यते, तस्य स्थिरैकाधिकरणाभावे विशेषानाधायकत्वात् सन्तानस्यावस्तुत्वात्,

---

फलार्थी फलमुद्दिश्य साधनेषु प्रवर्तते ।
चिन्त्यते चित्सुखाचार्यैस्तदेवात्र चतुर्थके ॥

साधनविचारानन्तरं फलं विचारयितुं हेतुहेतुमद्भावात्मकसङ्गत्या चतुर्थः परिच्छेदः प्रारभ्यते—कः पुनरिति । तत्र प्रथमं तावच्छून्यवादाभिमतं मोक्षं निराकुरुते—न तावदित्यादिना । नीलपीतादिविषयाकारैर्दूषितो यो विज्ञानसन्तानस्तस्य विनाशो मोक्षस्तस्याभिमतस्तं दूषयति—तज्ज्ञानेति । फलार्थिनो नाशे कस्यचिदपि फलं नेष्टमित्याह—नहीति । माध्यमिकाभिमतं मोक्षं निरस्य योगाचारसम्मतं मोक्षं निरस्यति—नापीति । विषयाकाररहितो विशुद्धविज्ञानसन्तानोदयश्चतुर्विधभावनापरिपाकावसाने मोक्षोऽपि न सम्भवति, विकल्पासहत्वात् । प्रथमकल्पे, सन्तानिनां स्वभावतो नाशाभ्युपगमेन पुरुषार्थत्वाभावः । विज्ञानलक्षणसन्तानिनः स्वभावतः क्षणभङ्गुरास्तैरभ्युपगम्यन्ते । परिनिर्वाणं—नाशः । तेषां चिरध्वस्ततया पश्चाद्भाविसन्तानोदयो न पुरुषार्थो भवितुमर्हति, फलार्थिनोऽभावे फलाभावादिति भावः । नापि सन्तानस्य नाशो द्वितीयकल्पानुसारी मोक्षः, तथाविधसन्तानोदयात्पूर्वमेवानन्तवासनावासितस्य सन्तानरूपस्य मुमुक्षोर्नाशात् । तथा बन्धमोक्षयोर्वैयधिकरण्यापातश्चेति । क्षणभङ्गवादिमते बन्धमोक्षान्वयिनः सन्तानिनः सन्तानस्य वैकस्य भावात् । किं च क्षणभङ्गवादिमते दूषितविज्ञानसन्तानोपरमे विशुद्धविज्ञानसन्तानोदये च कारणमपि निरूपयितुमशक्यमित्याह—कारणाभावाच्चेति । चतुर्विधभावनाप्रकर्षपर्यन्तजनितसाक्षात्कारस्तस्य कारणमिष्यते, किन्तु त्वन्मते स्थिरैकाधिकरणाभावे विशेषाधायकत्वाभावात् । न खल्वेकत्रानुभवोऽन्यत्र संस्कारस्ततोऽन्यत्र तत्फलं स्मृतिः सम्भवति, देवदत्तयज्ञदत्तविष्णुमित्रेषु भिन्नात्मसु तथाऽदर्शनादिति भावः । यदा स्थिरे भिन्नाधिकरणे तदसम्भवं तदा किमु वक्तव्यमेकस्याभावे । न च सन्तानिषु कश्चिद्विशेषोऽनुगतो विशुद्धाधानाश्रयस्तवाभिमतः, सन्तानस्यावस्तुत्वात् सन्तानिविज्ञानक्षणानां नवनवोत्पद्यमानत्वेनानाहितभावनाप्रकर्षत्वेन विशुद्ध-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

न्तानिनां च प्रतिक्षणमपूर्ववदुपजायमानत्वेनानासादितभावनाप्रकर्षतया विशुद्धविज्ञान-जननासामर्थ्यात् ।

नाप्यात्यन्तिकी दुःखनिवृत्तिः; 'अतीतस्य तस्य स्वत एवात्यन्तं निवृत्तत्वेनासाध्यत्वात्, वर्तमानस्य विरोधिगुणप्रादुर्भावनिवर्त्यत्वात्, अनागतस्य निवर्तयितुमशक्यत्वात् । निवृत्तेरात्यन्तिकत्वशब्देन निवृत्तजातीयस्य दुःखस्य तस्मिन्नात्मनि पुनरनुत्पादो विवक्षित इति चेत्, न; अनुत्पादस्यापि प्रागभावतयानुत्पाद्यत्वात् । ननु दुःखात्यन्ताभावो मोक्षः । न च तस्य नित्यत्वादसाध्यत्वम्; तत्सम्बन्धस्य स्वात्मनि साध्यत्वात् । अशेषक्लेशहेतु-नाशस्य दुःखात्यन्ताभावात्मनोः सम्बन्धरूपत्वात्, तदुत्पत्तौ दुःखात्यन्ताभावस्य तदीयत्वेन व्यवहारात्, तदीयतया व्यवहारहेतुत्वेन च विषयविषयिभावादिवदस्यापि सम्बन्धव्यव-हारगोचरत्वात् । तस्य च कृतकत्वेऽपि ध्वंसत्वादेवाविनाशित्वात् । न चात्यन्ताभावस्य प्रतियोगी दुर्निरूपः; मुमुक्षुसमवेततया सम्भावनोपनीतस्य दुःखस्य प्रतियोगित्वात्, असति योगाभ्यासे दुरितप्रवाहस्यानागतसमयवर्तिदुःखोत्पादकत्वात् । सर्वत्र चात्यन्ताभावनिरूपणे सामान्यतोऽवगतस्य विशेषतः समारोपविज्ञानविषयस्यैव प्रतियोगित्वात्, विशेषतस्तु

विज्ञानमुत्पादयितुमशक्यमिति भावः ।

नापीन्द्रियषट्कं, विषयषट्कं, ज्ञानषट्कं, शरीरं, सुखं दुःखं चैकविंशतिप्रकारदुःखानामात्यन्तिकी निवृत्तिस्तार्किकाभिमता मुक्तिरिति वाच्यम्, अतीतदुःखानां स्वत एवात्यन्तनिवृत्ततयाऽसाध्यत्वात्, वर्तमानस्य विरोधिगुणप्रादुर्भावेन निवर्त्यत्वात्, अनागतस्य च निवर्तयितुमशक्यत्वात् । विद्यमानस्यैव प्रध्वंसो भवति, न त्वविद्यमानस्येति भावः । निरुक्तपक्षत्रयदोषवारणाय तात्पर्यपरिशुद्धौ निवृत्तिपदेन विवक्षितमर्थमुद्भाव्य दूषयति—निवृत्तेरिति । चेतनान्तरे तथाविधदुःखोत्पत्तिसम्भवे-नासम्भववारणाय तस्मिन्नात्मनीति विशेषणम् । निवृत्तस्यानुत्पादः संसारदशायामप्यस्ति, तत्र सिद्धसाधनतावारणाय तज्जातीयस्येतिपदम् । सिद्धान्ती मोक्षसाधनस्य वैयर्थ्यमाह—नेत्यादिना । लीलावतीकाराभिमतमोक्षसाधनस्यापि वैयर्थ्यं दर्शयति—नन्विति । अत्यन्ताभावस्य नित्यत्वेना-साध्यत्वेऽपि तत्सम्बन्धस्य स्वात्मनि साध्यत्वात् । न चात्मनस्तन्निष्ठमोक्षकालीनदुःखात्यन्ता-भावस्य च नित्यत्वेन तयोरन्यतरात्मकस्य स्वरूपसम्बन्धस्यापि नित्यतया कथं तत्साध्यत्वं विवक्ष्यत इति वाच्यम्, अशेषक्लेशहेतुध्वंसस्य दुःखात्यन्ताभावात्मनोः सम्बन्धरूपत्वेन तादृशक्लेशहेतु-नाशस्योत्पत्तौ दुःखात्यन्ताभावस्यात्मसम्बन्धित्वेन व्यवहारदर्शनात् । न चास्य सम्बन्धस्य संयोग-समवायाद्यनन्तर्भूतत्वेन सम्बन्धत्ववचनमसङ्गतमिति वाच्यम्, ज्ञानार्थयोस्तदीयबुद्धिजनकतया विषयविषयिभावसम्बन्धवदस्य सम्बन्धस्यापि दुःखात्यन्ताभावस्यात्मीयत्वव्यवहारहेतुत्वसम्भवात् । तस्याशेषक्लेशहेतुनाशस्य च कृतिजन्यत्वेऽपि ध्वंसरूपतयाऽविनाशित्वात् । न चात्रात्यन्ताभावस्य प्रतियोगी दुर्निरूप इति वाच्यम्, मुमुक्षुजनसमवेतत्वेन प्रामाणिकत्वाभावेऽपि सम्भावनोपनीतस्य दुःखस्यैव प्रतियोगित्वसम्भवात् । सम्भावनामेवोपपादयति—असतीति । प्रतियोगिनोऽप्रामाणिकत्वेऽपि तन्निरूप्यमानाभावस्य प्रामाणिकत्वमाह—सर्वत्र चेति । एतदेव विपक्षे बाधकेन द्रढयति—विशेषत-स्त्विति । शशविषाणं नास्तीति प्रमितावस्यदीयविषाणस्य शशमस्तके संसर्गनिषेधे तत्संसर्गात्यन्ता-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रतियोगिसद्भावनिश्चयापेक्षायामत्यन्ताभावनिरूपणव्याघातात्, शशे विषाणं तदीयमत्यदीयं वा नास्तीति पर्यनुयोगस्य सुवचत्वात्। न चास्य समव्ययफलत्वेनापुरुषार्थत्वम्; योगप्रभावात् कायव्यूहनिर्माणेन जीवन्मुक्तिदशायां सकलसुखोपभोगाङ्गीकारात्। 'क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे' 'ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा' इति श्रुतिस्मृतिशतेभ्यः सर्वकर्मणां ज्ञानेन विलयावगमात्। सुखोपभोगो न युक्त इति न वाच्यम्; तद्वचनानामचिरविनश्वरतामात्रप्रतिपादनपरत्वात्, अन्यथा सर्वकर्मणां विनाशाद्विदुषः सद्य एव शरीरपाते जीवन्मुक्त्यभावप्रसङ्गात्। प्रारब्धकार्येतरकर्मणां ज्ञानादेव प्रक्षयो विवक्षित इति चेत्, मैवम्; अकृतप्रायश्चित्तानां कर्मणां देहारम्भककर्मवद्भोगैकनाश्यत्वनियमात् 'नाभुक्तं क्षीयते कर्म' इति स्मृतेः। न चानन्त्यात्कर्मणां भोगेन प्रक्षयानुपपत्तिः; योगप्रभावादनन्ततदुपभोगसाधनकायव्यूहनिर्माणेन तदुपपत्तेः। न चानियतकालविपाकतया कर्मणां युगपदुपभोगविरोध; उपभोगानुकूलसहकारिसाकाल्यादेव समानविपाकसमयतोपपत्तेः। अतः आत्यान्तिकदुःखनिवृत्तावपि मुक्तौ न समव्ययफलता। न चाननुभूयमानतया दुःखनिवृत्तेरपुरुषार्थत्वम्; विकल्पासहत्वात्। किमनुभूयमानतामात्रं पुरुषार्थत्वोपयोगि? यावद् दुःखनिवृत्तिसत्त्वं वा? नाद्यः; चरमे जन्मनि योगप्रभावादनागताया अपि दुःखनिवृत्तेरनुभूयमानत्वसम्भवात्। वर्तमानाया अप्यचिरमनुभवोपपत्तेः। तथाहि—

भावस्यासम्भवात् शशमस्तकोत्पन्नविषाणानिषेधप्रसङ्गाच्च। शशीयविषाणनिषेधपक्षे शशविषाणं नास्तीत्यादौ प्रमित्यप्रमित्योरपि दूषणापत्तिर्वारयितुमशक्येति भावः। न चाशेषदुःखनिवृत्यन्तःपात्यशेषसुखनिवृत्तिरपि मोक्षदशायां भवद्भिरभ्युपेयते, तथा च समव्ययफलत्वेन=समानलाभहानिमत्वेन। समव्ययफलत्वान्न कोऽपि पुरुषार्थ इत्यत्र प्रेक्षावतां प्रवृतिर्न स्यादिति; योगबलात्कायव्यूहं निर्माय जीवन्मुक्तिकाले सकलसुखोपभोगाभ्युपगमात्। "क्षीयन्ते" "ज्ञानाग्निः" इति श्रुतिस्मृतिशतेभ्यः सर्वकर्मणां ब्रह्मज्ञानेन विलयावगमात् सुखोपभोगो न युक्त इति वाच्यम्; "क्षीयन्ते" इत्यस्य न चिरात्क्षीयन्ते, किन्तु तत्क्षणमेवेत्यर्थः, भस्मात्करणं च विनश्वरत्वोपलक्षणमित्यर्थः। तथा च तद्वचनानामचिरविनश्वरतामात्रप्रतिपादनमात्रप्रतिपादनपरत्वात्। विपक्षे दोषमाह—अन्यथेति। वेदान्ती सद्यः शरीरपातं परिहरति—प्रारब्धेति। तथा प्रारब्धकर्मभिः शरीरस्थितिर्घटते इत्यर्थः। प्रारब्धकर्मणामपि भोगमन्तरेण ज्ञानमात्रादनिवृत्तेरिति परिहरति पूर्ववादी—मैवमिति। "नाभुक्तं क्षीयते कर्मे"ति स्मृत्या अननुष्ठितप्रायश्चित्तानां कर्मणां देहारम्भककर्मवद्भोगैकनाश्यत्वनियमात्। विमतानि कर्माणि भोगैकविनाश्यानि, अकृतप्रायश्चित्ते सति कर्मत्वात् प्रारब्धफलककर्मवदित्यनुमानविरोधादित्यपि बोध्यम्। कर्मणामानन्त्येऽपि योगबलादनन्ततदुपभोगयोग्यकायव्यूहं निर्माय भोगेन सकलकर्मक्षयोपपत्तिमाह—योगप्रभावादिति। सहकारिसम्पत्तियुक्तयोगप्रभावादगस्त्यादिपयोनिधिपानवद् युगपदुपभोगमुपपादयति—न चानियतेति। उपपादितं समव्ययफलत्वं=समानहानिलाभवत्वं समव्ययफलत्वमुपसंहरति—अत इति। तात्पर्यपरिशुद्धावुदयनरीत्या दोषमुद्भाव्य परिहरति—न चाननुभूयेते। तत्रानुभूयमानतामात्रं पुरुषार्थत्वोपयोगीति पक्षे समाधानमाह—चरमे जन्मनीति। योगप्रभावाद्=भूतभविष्यद्वर्तमानवेदनादित्यर्थः। वर्तमानताया दुःखनिवृत्तेरपि तत्कालेऽनुभवोपपत्तेः। तमेवोपपादयति—तथाहीति।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ोगितश्च रमज्ञानेन सकलविषयेण दुःखतदभावौ युगपत्साक्षात्कृतौ तेनैव विरोधिगुणप्रादु र्भाविण निवृत्ते दुःखे विनश्यदवस्थज्ञानेन वर्तमानापि दुःखनिवृत्तिरनुभूतेति। नापि द्वितीयः; प्रसक्तकण्टकादिदुःखनिवृत्तेरपुरुषार्थत्वप्रसङ्गात्; यावत्सत्त्वमनुभूयमानत्वात्। तथात्वे विषयान्तरावेदनप्रसङ्गात्। न च दुःखाभावस्य सुखशेषतया पुरुषार्थत्वम्; सुखस्यापि दुःखाभावशेषतया पुरुषार्थत्वमिति वैपरीत्यस्यापि वक्तुं सुकरत्वात्। कामनायाश्चोभय- त्रापि समानोदयतयोभयोरपि पुरुषार्थत्वोपपत्तेः। प्रयोगश्च—आत्मा कदाचिद् ध्वस्ता- खिलविशेषगुणः, नित्यत्वे सत्यनित्यविशेषगुणाश्रयत्वात्, महाप्रलयावस्थायामाकाशवदिति लीलावतीकारः।

वक्रमतानुसारिणः पुनरेवं मोक्षलक्षणमाचक्षते—'एतज्जीवनिष्ठदुःखसमानकालीनदुःख- ध्वंसातिरिक्तैतन्निष्ठदुःखध्वंसोऽस्य मुक्तिः' इति। प्रयोगश्च—देवदत्तोऽयमेवंविधदुःखध्वंस- वान् दुःखित्वाच्चैत्रवत्। एतन्निष्ठदुःखप्रागभावासमानकालीनैतन्निष्ठदुःखध्वंसोऽस्य मोक्ष इत्यपरे। एवंविधसाध्येऽपि दुःखित्वादिति प्रयोगः पूर्ववदेव। अन्ये तु ज्ञानाजनकसंस्कार- जनकजन्यसाक्षात्कारविषयो दुःखध्वंसो मोक्ष इति मन्यन्ते। तत्र साक्षात्कारविषयो दुःखध्वंस-

---

विनश्यदवस्थेति हृदयम्। नित्यद्रव्येष्वाश्रयविनाशासम्भवेन विरोधिगुणप्रादुर्भाविण पूर्वगुणनाशा- दुक्तम्—विरोधिगुणप्रादुर्भाविणेति। नापि यावद् दुःखनिवृत्तिसत्त्वं पुरुषार्थत्वोपयोगीति द्वितीयः कल्पः, दुःखनिवृत्तेर्यावत्सत्त्वमनुभूयमानत्वेन प्रसक्तकण्टकादिदुःखनिवृत्तेरपुरुषार्थत्वप्रसङ्गात्। दुःख- निवृत्तेर्यावत्सत्त्वमननुभूयमानत्वस्वीकारे विषयान्तरसंचाराभावप्रसङ्गात्। न च दुःखाभावस्य पुरुषार्थत्वमेव नास्ति दुःखाभावाकांक्षा तु सुखशेषतयाऽभ्युपेयते इति वाच्यम्; वैपरीत्यस्यापि वक्तुं शक्यत्वात्। कामनाविषयत्वमुभयत्रापि तुल्यमित्याह—कामनायाश्चेति। एतादृशमुक्तौ प्रयोगमाह—आत्मेत्यादि। अधुनोपलभ्यमानविशेषगुणकतया बाधः स्यात्तद्वारणाय साध्ये कदाचि- दितिपदम्। क्रमेण विशेषगुणध्वंसस्य संसारकालेऽपि सिद्धत्वेनार्थान्तरता स्यात्तद्वारणायाशेष- पदम्। अत्र युगपदिति विवक्षितम्। संख्यादिसामान्यगुणानामुक्तावपि सत्त्वेन बाधः स्यात्तद्वारणाय विशेषपदम्। पीलुपाकपक्षे विशेषगुणैः सहैव ध्वंसमानेषु घटादिषु व्यभिचारः स्यात्तद्वारणाय हेतौ सत्यन्तलम्। ईश्वराद्यपरमाण्वादिषु व्यभिचारः स्यात्तद्वारणाय हेतौ विशेषदलम्। दृष्टान्ते साध्यसाधनसाहचर्यप्रदर्शनकाले शब्दव्यक्तिभेदापेक्षयाऽशेषपदसाथक्यमित्यवधेयम्।

नवीनतार्किकसम्मतं मोक्षलक्षणमाह—वक्रमतेत्यादिना। एतज्जीवनिष्ठं यद्दुःखं तेन समान- कालीनो यो दुःखध्वंसस्तद्भिन्नो य एतन्निष्ठो दुःखध्वंसः स एतज्जीवस्य मुक्तिरिति लक्षणवाक्य- योजना। तत्रैतन्निष्ठदुःखध्वंसस्यैतत्संसारदशायां सत्त्वेनातिव्याप्तिस्तद्वारणायातिरिक्तेत्यन्तं दलम्। जीवान्तरसंसारकालीनदुःखध्वंसेऽतिव्याप्तिस्तद्वारणायैतन्निष्ठदुःखध्वंस इत्युक्तम्। असम्भववारणा- यैतज्जीवनिष्ठेति पदम्। घटादिध्वंसवारणाय दुःखध्वंसेति पदम्। अत्रानुमानप्रयोगः—अयं देवदत्तः, एतद्देवदत्तनिष्ठदुःखसमानकालीनदुःखध्वंसभिन्नदुःखध्वंसवान्, दुःखित्वाच्चैत्रवदित्यनुमेयम्। लक्षणा- न्तरमाह—एतन्निष्ठेति। प्रयोगश्चात्र द्वितीयलक्षणानुसारं साध्यं हेतुर्निदर्शनं च पूर्ववदिति बोध्यम्। लक्षणान्तरं पुनरप्याह—ज्ञानाजनकेति। ज्ञानाजनकसंस्कारजनकश्चासौ जन्यसाक्षात्कारविषयीभूतो दुःखध्वंसः स एव मोक्ष इति लक्षणवाक्ययोजना। तत्र विशेषणानां कृत्यं स्वयमेवाह—तत्रेत्यादिना।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इत्येतावति लक्षणे सांसारिकदुःखध्वंसेऽतिव्याप्तिर्मा भूदिति ज्ञानाजनकेत्यादिना विशेषणेन साक्षात्कारो विशेष्यते। तत्र जन्यपदेनेश्वरसाक्षात्कारो व्यावर्त्यते, तस्यापि सकलजनकतया ज्ञानजनकसंस्कारजनकत्वात्। अस्ति च ज्ञानाजनकसंस्कारजनकत्वं चरमसाक्षात्कारस्य दुःखध्वंसविषयस्य, तदनन्तरं मुक्तौ ज्ञानान्तरानुदयात्। दुःखनिवृत्तिरेव मुक्तिरित्यत्रचा "शरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः" इत्यादयो वेदान्ताः प्रमाणम्। प्रियशब्दाभिधेयस्य सुखस्यापि निराकरणात्। "यो वै भूमा तत्सुखम्" "एषोस्य परमानन्दः" इत्येवमाद्यास्तु श्रुतयो दुःखाभावविषयतयोपचरितार्था विषयाजन्यसुखस्यादृष्टचरत्वात्। न च सुप्तोत्थितस्य सुखमहमस्वाप्समिति सुखपरामर्शदर्शनाददृष्टचरत्वमसिद्धमिति वाच्यम्; पित्ताद्युपहतेन्द्रियस्य दुःखमहमस्वाप्समिति परामर्शात्, दुःखस्यापि नित्यताप्रसक्तेः। न च परमप्रेमास्पदत्वादात्मनः सुखरूपतानुमेया, दुःखाभावे व्यभिचारात्। आत्मनः सुखरूपत्वे च मुक्तिसंसारयोरविशेषप्रसङ्गात्; स्वयंप्रकाशस्य निरतिशयसुखरूपतया सदावभाससम्भवात्। सुखं मे स्यादिति च प्रेमालोके न सुखमहं स्यामिति, तथा चात्मनः सुखरूपत्वे प्रेमास्पदत्वमेव न स्यादिति प्रतिज्ञाहेत्वोर्विरोधस्तत्र कुतस्ततः सुखरूपतानुमानम्? तस्मात् दुःखनिवृत्तिरेव मुक्तिरिति।

अत्रोच्यते—प्रतियोगिहेतुनाशो न तदत्यन्ताभावस्य तदीयत्वे प्रयोजकः।

लीनशब्दनिदानेऽपि व्योम्नि तस्यानवस्थितेः
रूपाभावव्यवहृतेस्तदभावेऽपि चात्मनि ॥१॥

ननु भावनाख्यसंस्कारस्य स्वभावतः स्मृतिजनकत्वात्तत्कथं ज्ञानाजनकसंस्कारजनकत्वमित्यत आह—अस्ति चेति। अनुमानप्रयोगः पूर्ववदवसेयः। दुःखनिवृत्तिरूपमुक्तौ श्रुतिप्रमाणमाह—अशरीरमित्यादि। दुःखवत्प्रियशब्दवाच्यसुखस्यापि प्रतिषेधाद् दुःखनिवृत्तिमात्रमेव मोक्षः। मुक्तौ सुखबोधकश्रुतीनामुपचरितार्थत्वमाह—यो वै भूमेत्यादि। मुख्यार्थपरित्यागे हेतुमाह—विषयेति। अदृष्टचरत्वस्यासिद्धिमाशङ्क्य परिहरति—न च सुप्तोत्थितस्येत्यादिना—नित्यताप्रसक्तेरित्यन्त्येनेति। आत्मनि सुखरूपत्वसत्त्वे व्यतिरेक्यनुमानमाशङ्क्य निराचष्टे—न च परमेति। तथा चात्मा सुखरूपः परमप्रेमास्पदत्वात्, सम्प्रतिपन्नसुखवत्, व्यतिरेकेण दुःखवदिति वा। अत्रानुमाने न केवलं दुःखाभावे व्यभिचारः, अपितु तर्कबाधितत्वं चाह—आत्मन इति। आत्मनः सुखरूपत्वं चेत्तर्हि मुक्तिसंसारयोरभेदप्रसङ्गः स्यात्। न च स्वरूपभूतमपि सुखं संसारदशायां नावभासते मुक्तौ चावभासते इति वाच्यम्, स्वयंप्रकाशस्यात्मनो निरतिशयसुखरूपत्वेन सदावभाससम्भवात्। प्रतिज्ञाविरोधरूपं निग्रहस्थानं चाह—सुख मे स्यादिति। मोक्षे पूर्वपक्षमुपसंहरति—तस्मादिति।

सिद्धान्तं वक्तुं प्रतिजानीते—अत्रेति। प्रतियोगिदुःखहेतुनाशो न व्यवहारे दुःखात्यन्ताभावस्यात्मसम्बन्धित्वेन प्रयोजकः, व्यभिचारादित्याह—प्रतियोगीति। तत्र श्लोकेन हेतुं दर्शयति—लीनेति। प्रलये ह्याकाशेऽधिकरणे शब्दहेतूनां समवाय्यसमवायिनिमित्तात्मकानां प्रलीनेऽपि न शब्दात्यन्ताभावस्य नभसा सम्बन्धोऽस्ति। नहि ध्वंसाधिकरणेऽत्यन्ताभावस्यावस्थानं नैयायिकैर्मन्यते। एवमात्मनि दुःखतद्धेतूनां मोक्षावस्थायां ध्वंसेऽपि न तदत्यन्ताभावस्यात्मना सह सम्बन्धो वक्तुं शक्य इति पूर्वार्द्धयोजना। अन्वयाभावमुक्त्वा व्यतिरेकाभावमाह—रूपेति। तथा रूपात्मक-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रलयदशायामशेषशब्दनिदाननाशेऽपि आकाशे न शब्दात्यन्ताभावः, पुनः सर्गे तत्रैव शब्दोत्पत्तेः। प्रतियोगिहेतुनाशाभावेऽप्यात्मनि रूपात्यन्ताभावव्यवहारात्। न चाभावत्वेऽपि विषयविषयिभावादिवत् ध्वंसस्य सम्बन्धरूपता, विषयविषयिभावादेरप्यभावत्वे सम्बन्धरूपत्वे चासम्प्रतिपत्तेः।

न च विनाशस्याप्यविनाशिता, कृतकत्वात्। न च ध्वस्ताध्वस्तिप्रसङ्गः, पुरस्तादेव निरास्तत्वात्। न च समारोपितप्रतियोगिकत्वे दुःखात्यन्ताभावस्य पारमार्थिकता, स्वप्नसमारोपितद्विरदध्वंसवदस्यापि पारमार्थिकत्वानुपपत्तेः। न च शशविषाणनिषेधप्रतिबन्दीग्रहः, तस्याप्यविचारितरमणीयत्वात्। न च कायव्यूहनिर्माणेन जीवन्मुक्तिदशायामशेषसुखोपभोगाङ्गीकारात् समव्ययफलत्वदोषपरिहारः, विदेहकैवल्ये दुःखाननुभववत्सुखानुभवस्याप्यभावात्। न च सर्वकर्मफलोपभोगसम्भवः प्रारब्धकर्मेतरकर्मणां ज्ञानान्निवृत्तिश्रवणात्। न चाकृतप्रायश्चित्तानां कर्मणां भोगैकनाश्यत्वनियमः, "क्षीरावृत्तैराम्रपत्रैस्तु ज्वरं सद्यो निवारयेत्" इत्यादिना अकृतप्रायश्चित्तानामपि ज्वरादिहेतुकर्मणां निवृत्तिस्मरणात्। न चाकृतप्रायश्चित्तत्वम्, 'एवं हास्य सर्वे पाप्मानः प्रदूयन्ते, एवमेवंविदि पापं कर्म न श्लिष्यते' इत्यादिवाक्यशेषे श्रूयमाणपापक्षयस्य रात्रिसत्रन्यायेन ज्ञानफलत्वकल्पनया सगुणासु विद्यासु दुरितक्षयकामो ब्रह्मोपासनं कुर्यादिति प्रायश्चित्तविधित्वोपपत्तेः।

प्रतियोगिहेतूनां नाशाभावेऽप्यात्मनि रूपात्यन्ताभावस्य व्यवहारदर्शनादिति श्लोकोत्तरार्द्धयोजना। पूर्वार्द्धं विवृणुते—प्रलयेति। उत्तरार्द्धं विशदयति—प्रतियोगीति। किञ्च भावविशेषस्यैव सम्बन्धत्वप्रसिद्धेः प्रतियोगिध्वंसस्य सम्बन्धत्वं न प्रसिद्धम्। न च विषयविषयिभावो यथा सम्बन्धो मन्यते, तद्वत्प्रतियोगिध्वंसस्यापि सम्बन्धत्वमभ्युपेयमिति वाच्यम्; विषयविषयिभावस्याप्यभावे सम्बन्धरूपत्वे च वादिनां विप्रतिपत्तेरित्याह—न चाभावत्वेऽपीति।

कृतिजन्यत्वेऽपि ध्वंसस्य नित्यत्वसमर्थनं दूषयति—न च विनाशस्येति। न चात्यन्ताभावस्य समारोपितप्रतियोगिकत्वाङ्गीकारे पारमार्थिकत्वमवसेयमिति वाच्यम्; स्वप्ने व्यभिचारादित्याह—स्वप्नेति। द्विरदो=गजः। न च दुःखात्यन्ताभावस्यापारमार्थिकत्वे शशविषाणनिषेधोऽप्यप्रामाणिकः स्यादिति, प्रतिबन्दीदातुमशक्येति वाच्यं; तस्याप्यविचारितरमणीयत्वात्। सुखदुःखयोरनुपभोगे समव्ययफलतां समर्थयते—न च कायेति। कायव्यूहेनापि सर्वकर्मफलोपभोगासम्भवमाह—न च सर्वकर्मेति। अकृतप्रायश्चित्तकर्मणां भोगमन्तरेणापि ज्ञानान्नाशं सोदाहरणं दर्शयति—न चाकृतेति। ज्ञानिनां वेदान्तश्रवणात्मकं प्रायश्चित्तं श्रुत्या समर्थयते—न चाकृतेति। न च वाक्यशेषे पापसंश्लेशाभावोऽर्थवाद इत्यत आह—रात्रीति। तथाहि "प्रतितिष्ठन्ति ह वै य एता रात्रीरुपयन्ती"त्यत्र विश्वजिन्न्यायेन स्वर्गफलकल्पनायां गौरवप्रसङ्गात्कामपदविपरिणामेन प्रतिष्ठाकामो रात्रिसत्रं कुर्यादिति यथा कल्प्यते, तन्न्यायेन ज्ञानं प्रति फलत्वेन कल्पनया सगुणविद्यासु दुरितक्षयकामो ब्रह्मोपासनं कुर्यादिति प्रायश्चित्तविधानोपपत्तेः। पापक्षयोद्देश्येन साक्षादेव ध्यानविधायिकां

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'उपपातकेषु सर्वेषु पातकेषु महत्सु च ।
प्रविश्य रजनीपादं ब्रह्मध्यानं समाचरेत्' ।। इति स्मरणाच्च ।
'सत्येनापि शपेद्यस्तु देवाग्निगुरुसन्निधौ ।
तस्य वैवस्वतो राजा धर्मस्यार्द्धं निकृन्तति' ।।

इत्यादिस्मरणात्, सुकृतस्यापि भोगैकनाश्यत्वनियमानुपपत्तेः । 'नाऽभुक्तं क्षीयते' इत्यादेरौत्सर्गिकत्वादपवादं परिहृत्यैव चोत्सर्गस्थितेः । निर्गुणब्रह्मविद्यायाश्च सर्वकर्म-हेतुभूताऽविद्यानिरासिकाया अदृष्टद्वारेणैव तत्कार्यपुण्यापुण्यनिवर्तकत्वोपपत्तेः । न च कायव्यूहनिर्माणेन युगपत्सर्वकर्मफलोपभोगसम्भवः तत्तत्कल्पमन्वन्तरादिनियतकालोप-भोग्यानां युगपदुपभोगे तत्प्रतिपादकशास्त्रस्याप्रामाण्यप्रसङ्गात् । न च प्राप्ताणिमाद्यैश्व-र्याणामेव मुक्तिः, येन कायव्यूहनिर्माणेन युगपदशेषकर्मफलोपभोगः स्यात्; न त्वेवम् । भगवता पतञ्जलिना नियमाभावाभिधानात्—'यदा निर्द्धूतरजस्तमोमलं बुद्धिसत्त्वं पुरुषस्यान्यताप्रत्ययमात्राकारं दग्धक्लेशबीजं भवति, तदा पुरुषस्य शुद्धिसारूप्यमिवापन्नं भवति, एतस्यामवस्थायां कैवल्यं भवतीश्वरस्यानीश्वरस्य वा' इति । जनकजडभरत-विदुरधर्मव्याधपिङ्गलादीनामप्राप्तैश्वर्याणामपि मुक्तिस्मरणाच्च ।

न च युगपद्भोगे सहकारिसाकल्यम्, भविष्यत्तत्तत्कल्पमन्वन्तरादीनां सहकारिणामि-दानीमाहर्तुमशक्यत्वात् । न च प्रसक्तकण्टकादिदुःखनिवृत्तिवन्मुक्तौ दुःखनिवृत्तेर्वर्तमान-तया साक्षात्कारसम्भवः, अप्राप्तैश्वर्यस्यापि मुक्तिप्रतिपादनेन तदसम्भवस्योपपादित-त्वात् । न च दुःखाभावः स्वतन्त्रतया पुरुषार्थः, सुखाभिव्यक्तिशेषत्वात् । न च विपरि-वृत्तप्रसङ्गः, विकल्पासहत्वात् । किं सुखं दुःखाभावस्योत्पादकम् ? उताभिव्यञ्जकम् ? नोभयथापि; आत्मनि समस्तदुःखाभावमनुभवतोऽप्यकस्मादुपनतविपञ्चीस्वरश्रवणादौ

स्मृतिमप्याह—उपपातकेष्विति । रजनीपादः=रात्रिश्चतुर्थभागः । सुकृतेऽपि भोगैकविनाश्यत्व-नियमाशङ्कां वारयति—सत्येनापीति । भोगैकविनाश्यत्वप्रतिपादकशास्त्रवचनस्यौत्सर्गिकत्वेन गतिं दर्शयति—नाभुक्तमिति । निर्गुणविद्यायामपि कर्मनाशकत्वमुपपादयति—निर्गुणेति । अधुना शक्यत्वे-नापि सर्वकर्मफलोपभोगासम्भवमाह—न च कायव्यूहेति । युगपत्सर्वकर्मफलोपभोगे नियतदेशकाल-निमित्तप्रतिपादकशास्त्रस्याप्रामाण्यापत्तेः । अणिमाद्यैश्वर्याणां मोक्षाप्रयोजकत्वं, प्रकृतिपुरुषविवेक-ज्ञानस्यैव मोक्षस्य प्रयोजकत्वं पातञ्जलयोगदर्शनमनुसृत्योपपादयति—न च प्राप्ताणिमेति । तत्रैतिह्यं स्मारयति—जनकेत्यादि ।

किञ्च युगपदुपभोगे सहकारिसाकल्यं सम्भाव्य दूषयति—न च युगपदिति । वर्तमानदुःख-निवृत्तिसाक्षात्कारवन्मोक्षेऽपि सर्वदुःखनिवृत्तेः साक्षात्कारमाशङ्क्य वारयति—न प्रसक्तेति । सुखाभिव्यक्तेः शेषत्वं दुःखाभावे साधयति—न चेति । न चात्र वैपरीत्यं कुतो न स्यादिति वाच्यम्, विकल्पासहत्वात् । तत्रोत्पादकत्वेन सुखस्य दुःखाभावशेषत्वाभ्युपगमेऽभिव्यञ्जकत्वेन वा तथात्वस्वीकारेऽप्यात्मनि व्यभिचारमाह—समस्तदुःखाभावमिति । विपञ्ची=वीणा । ननु दुःखानुभव-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सुखोत्पत्तेः। न च सन्तापवतः शीतह्रदे निमग्नार्धकायस्य सत्येव दुःखे सुखोपलम्भात्, न दुःखाभावस्य सुखप्रतिपत्तिशेषतेति वाच्यम्; सुखस्य दुःखाभावैकाभिव्यङ्ग्यत्वनियमानभ्युपगमात्, अनुभूयमानो दुःखाभावः सुखमभिव्यनक्त्येवेति नियमात्। ननु वैषयिकसुखस्य कण्टकादिनिवृत्तावननुभवात्, । आत्मनश्च सुखरूपत्वासंप्रतिपत्तेर्न दुःखाभावस्य सुखाभिव्यक्तिशेषतेति चेत्, न; आत्मनः सुखरूपत्वस्यानन्तरमेव निवेदयिष्यमाणत्वात्। प्रयोगश्चासमीचीनः, वेदान्तिनः प्रति हेतोरसिद्धत्वात्। दृष्टान्तस्य च साध्यसाधनविकलत्वात्, आकाशस्यापि प्रलये लयाभ्युपगमात्। अस्तु तर्हि 'दुःखसन्ततिरत्यन्तमुच्छिद्यते सन्ततित्वात्, प्रदीपसन्ततिवत्' इति किरणावलीकारप्रयोग इति चेत्, न; पार्थिवपरमाणुरूपादिसन्ताने त्वन्मते व्यभिचारात्। ननु सर्वमुक्तौ सापि सन्ततिरुच्छिद्यते, धर्माधर्माख्यनिमित्तस्य सुखदुःखोपभोगलक्षणप्रयोजनस्य चाभावादिति चेत्, मैवम्; सर्वमुक्त्यनङ्गीकारवादिनं प्रति एवं पर्यनुयोगायोगात्, कन्दलीकारलीलावतीकारप्रभृतिभिः कैश्चिद्वैशेषिकविशेषैः सर्वमुक्तेरनङ्गीकारात्, केषाञ्चिदात्मनां संसार्येकस्वभावताङ्गीकारात्। न चैवं सति सर्वेषां तथात्वशङ्कया मोक्षसाधनाननुष्ठानप्रसङ्गः; शमदमोपरमतितिक्षादिना मुमुक्षुचिह्नेन श्रुतिसिद्धेन तथात्वशङ्का निवृत्तेः।

वक्रानुमानं पुनः सिद्धसाधनत्वादुपेक्षणीयम्, न हि मुक्तस्य दुःखनिवृत्तौ कश्चिद्विप्रतिपद्यते। तृतीयमपि मोक्षलक्षणमसम्भवित्वदोषेण निरसनीयम्; योगप्रभावनियमनिराकर-

---

कालेऽपि सुखानुभवदर्शनेन न दुःखाभावस्य सुखप्रतिपत्तिशेषतेति चेन्न, सुखस्य दुःखाभावैकाभिव्यङ्ग्यत्वनियमानभ्युपगमात्, अनुभूयमानो दुःखाभावोऽवश्यं सुखमभिव्यनक्तीति नियमात्। मूर्च्छादौ सुखानुभवप्रसङ्गवारणायानुभूयमान इत्युक्तम्। न च कण्टकादिनिवृत्तिसमये चन्दनवनितादिसंसर्गजनितवैषयिकसुखस्याननुभवाद्, आत्मनश्च सुखरूपत्वस्य प्रमाणासिद्धत्वान्न दुःखाभावस्य सुखाभिव्यक्तिशेषतेति वाच्यम्, आत्मनः सुखरूपत्वेऽव्यवहितमेव वक्ष्यमाणत्वात्। आत्मा कदाचिदशेषविशेषगुणध्वंसवान्, नित्यत्वे सत्यनित्यविशेषगुणाश्रयत्वात्, महाप्रलयकालीनाकाशवदिति न्यायलीलावतीकारस्य प्रयोगं दूषयति—प्रयोगश्चेति। निर्गुणात्मवादिवेदान्तिमते स्वरूपासिद्धिः साध्यहीनश्च दृष्टान्तः। अत्यन्तमुच्छिद्यते=दुःखप्रागभावासमानकालीनध्वंसप्रतियोगिनीत्यर्थः। प्रलये दुःखसन्ततेरुच्छेदाभ्युपगमात्स्यात्सिद्धसाधना, तद्वारणाय साध्येऽत्यन्तपदम्। पार्थिवेति। पार्थिवपरमाणुरूपादिसन्ताने सन्ततित्वहेतुसत्त्वेऽपि न्यायमते तत्र साध्याभावेन व्यभिचार इत्यर्थः। प्रलये न तादृग्रूपादिसन्तानस्यात्यन्तोच्छित्तिः, सर्गान्तरेषु रूपादेरुत्पत्तेरित्यर्थः। अत्र तदीयं परिहारमुद्भाव्य दूषयति—नन्वित्यादिना—स्वभावताङ्गीकारादित्यन्त्येनेति। सर्वेषामात्मनि बद्धैकस्वभावताशङ्कामुद्भाव्य वारयति—न चैवमित्यादिनेति।

देवदत्तोऽयमेवं दुःखध्वंसवान्, दुःखित्वात्, चैत्रवदित्यनुमानं सिद्धसाधनत्वादुपेक्षणीयम्। तत्र सिद्धसाधनतां विशदयति—नहीति। ज्ञानाजनकसंस्कारजनकजन्यसाक्षात्कारविषयो दुःखध्वंस इति तृतीयमोक्षलक्षणमसम्भवदोषग्रस्तत्वेन निरसनीयं, योगप्रभावनियमनिरासेनानागतदुःखध्वंससाक्षात्कारनियमनिराकरणादित्याह—योगेति। दुःखनिवृत्तिमात्रमोक्षसमर्थिकां श्रुतिमन्यथयति—

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri and Sarayu Trust. Funding IKS-MoE-Grant-2

णात्, अनागतदुःखध्वंसस्य साक्षात्कर्तुमशक्यत्वात्, चरमदुःखध्वंसदशायां विज्ञानस्यापि विशेषगुणस्योच्छेदस्याङ्गीकारात् । प्रियस्पर्शनिषेधश्रुतिस्तु वैषयिकसुखनिषेधपरा, अन्यथा 'एषोऽस्य परमानन्दः', 'यो वै भूमा तत्सुखम्' इति सुखरूपताप्रतिपादकश्रुतिविरोधात् । न चासामुपचरितार्थत्वम्; मुख्यार्थे बाधकाभावात् । न च नित्यसुखस्यानुपलब्धिर्बाधिका; नित्यज्ञानवदुपपत्तेः । सुखस्य विषयेन्द्रियादिजन्यत्वव्याप्तेश्च ज्ञानेच्छादेर्जन्यत्वव्याप्तिवदेव निरसनीयत्वात्, श्रुत्यवष्टम्भेन नित्यत्वाङ्गीकारस्योभयत्रापि तुल्यत्वाद्विषयाद्यभावेऽपि सुप्तोत्थितस्य सुखमहमस्वाप्समिति सुखपरामर्शदर्शनाच्च । न च दुःखपरामर्शस्यापि सत्त्वान्नित्यदुःखरूपत्वमपि तुल्यमिति वाच्यम्; नित्यदुःखरूपतायामात्मनः परमप्रेमास्पदत्वव्याकोपात् । न च दुःखाभावे व्यभिचारादिदमसाधनमिति वाच्यम्; तस्य सुखशेषतया परमप्रेमास्पदत्वाभावात् ।

परमप्रेमास्पदत्वानुपपत्तिरप्यात्मनः सुखरूपत्वे प्रमाणम् । आत्मनः प्रेमास्पदतायां न कस्यचिद्विवादः, मा न भूवं भूयासमित्यात्मन्याशिषो लौकिकपरीक्षकसम्मतत्वात् । न चेयमाशीः शरीरोपघातजन्मनो दुःखाद्बिभ्यतो न पुनरात्मानमानन्दं मन्यमानस्येति युक्तम्; शरीरोपघातजन्मनो भयस्याप्यात्मनः प्रेमास्पदत्वमन्तरानुपपत्तेः, न हि दुःखं दुःखतया भयहेतुरन्यगतस्यापि तथाभावप्रसङ्गात् 'तदेतत्प्रेयः पुत्रात्' इति प्रेमास्पदत्वश्रुतेश्च । न च दुःखाभावतयात्मनः प्रेमास्पदत्वम्, भावरूपत्वात् । नापि तदाश्रयतया, दुःखदशायामप्यात्मनि प्रेमोपलम्भात् । नापि तत्साधनतया, साधने प्रेम्णो निरुपाधिकत्वासम्भवात् । अत एव न सुखसाधनतयापि सुखस्याप्यात्मार्थतया प्रेमास्पदत्वात् । अतः सकललौकिकवैदिकसुखगोचरप्रेम्णोऽतिशयः स्वात्मनि प्रेमा, निरतिशयसुखगोचरप्रेमसमान एवात्मन्यवकल्पत इत्यर्थापत्त्याऽऽत्मनो निरतिशयसुखस्वभावत्वसिद्धिः । प्रयोगश्च-

कुम्भः कुम्भेतराचित्कासुखान्यान्यः प्रसाध्यताम् ।
कुम्भत्वेन यदित्थं तत्तथा कुम्भान्तरं यथा ॥२॥

प्रियस्पर्शेत्यादिना । सुखरूपताप्रतिपादकश्रुतीनां मुख्यार्थे बाधकाभावमाह—नित्यज्ञानवदिति । यद्यत्सुखं तत्तद्विषयेन्द्रियजन्यमिति व्याप्तिरीश्वरीयनित्यज्ञानेच्छादौ व्यभिचारदर्शनेन निरसनीयेत्यर्थः । उभयत्रापि=ज्ञानसुखयोरपीति भावः, संसारदशायामपि नित्यसुखोपलब्धिं दर्शयति—विषयाद्यभावेऽपीति । पूर्ववादिनोक्तामतिप्रसक्तिं परिहरति—न च दुःखेति । दुःखाभावे परमप्रेमास्पदत्वानुपपत्तिं दर्शयति—न च दुःखाभाव इति ।

परमप्रेमास्पदत्वमात्मनः सुखरूपत्वकल्पकं प्रमाणं साधयति—आत्मन इत्यादिना । देहहिंसाजन्यभयमप्यात्मनः परमप्रेमास्पदत्वं विना नोपपद्यते इत्याह - शरीरेति । तच्च दुःखभयमाध्यासिकमित्याह - नहि दुःखमिति । आत्मनः परमप्रेमास्पदत्वे श्रुतिप्रमाणमाह—तदेतदिति । दुःखाभावतया, दुःखाभावाश्रयतया, दुःखाभावसाधनतया चात्मनः प्रेमास्पदं क्रमेण वारयति—न चेत्यादिना । अत एव=निरुपाधिकत्वादित्यर्थः । अर्थापत्तिप्रमाणमप्याह—अतः सकलेत्यादिनेति । आत्मस्वरूपसुखसद्भावेऽनुमानप्रयोगं श्लोकेनाह—कुम्भ इति । अत्र कुम्भविशेषः पक्षः तत्रायमिति पक्षविशेषणम् । श्लोके

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कुम्भोऽयमेतदितरानात्मासुखान्यान्यः कुम्भत्वात्सम्प्रतिपन्नकुम्भवत् । न च कुम्भोऽयमेतदितरानात्मादुःखान्यान्यः कुम्भत्वात्सम्प्रतिपन्नकुम्भवदित्याभाससमानयोगक्षेमता, तस्यागमार्थापत्तिबाधितविषयतयानुत्थानात् । किञ्च सुखप्रेम्णोः सम्बन्ध आत्मनिष्ठः सुखनिष्ठत्वात्सम्प्रतिपन्नलक्ष्यत्वादिवत् । न च सुखनिष्ठोत्कर्षापकर्षादिधर्मैरनैकान्तता; तेषां वेदान्तिभिः सुखनिष्ठतानङ्गीकारात् तत्प्रतीतेरौपाधिकत्वाभ्युपगमात् । न चेदृशसम्बन्धोऽनात्मनिष्ठः प्रेमनिष्ठत्वात्सत्तादिवदिति सप्रतिसाधनता; प्रेमनिष्ठतयैव सिद्धसाधनत्वादनात्मनिष्ठ एवेति तु साधने दृष्टान्तस्य साध्यविकलता । सत्तादेरात्मानात्मनिष्ठत्वस्य परैरङ्गीकारात् । न च नित्यसुखरूपत्वे मुक्तिसंसारयोरविशेषप्रसङ्गः, तस्या विद्यातिमिरतिरोधानातिरोधानाभ्यां विशेषोपपत्तेः । न चात्मनः सुखरूपत्वे सुखं मे स्यादिति प्रेमानुपपत्तिः, सम्बन्धव्यपदेशस्यान्यनिष्ठताव्यावृत्तिपरत्वात् । अन्यासम्बन्धिसुखसाक्षात्कारे सत्यपि सम्बन्धाभावापराधेनापुरुषार्थत्वानुपलब्धेः । सम्बन्धस्य केवलव्यतिरेकाभावात् । सुखसम्बन्धमात्रस्य पुरुषार्थत्वे परकीयसुखसम्बन्धस्यापि तथात्वप्रसङ्गात् । सम्बन्धे न

विशदयति—कुम्भोऽयमिति । अयं कुम्भ एतत्कुम्भेतरत्वे सत्यनात्मत्वासुखत्वानधिकरणादन्यः, कुम्भत्वात्सम्प्रतिपन्नकुम्भवदित्यर्थः । अत्र सुखत्वानधिकरणादन्य इत्युक्ते सुखादन्यत्वेनार्थान्तरता स्यात्तद्वारणायानात्मासुखान्यान्य इति दलम् । तथात्वेऽप्रसिद्धविशेषणता, नह्यात्मरूपमेतादृग्वस्तु किञ्चित्सुखप्रतिवादिनः सम्प्रतिपन्नमस्ति । तस्मादप्रसिद्धविशेषणतावारणायैतदितरेत्युक्तम् । कुम्भान्तरे दृष्टान्ते एतत्कुम्भेतरत्वेन साध्यप्रसिद्धिः । पक्षे त्वेतदतिरिक्तमनात्मत्वासुखत्वानधिकरणं किञ्चिदादाय तदन्यत्वसिद्धयात्मरूपसुखसिद्धिरिति भावः । आभाससमानयोगक्षेमतामुद्भाव्य वारयति न च कुम्भोऽयमिति । तस्यागमार्थापत्तिबाधितविषयतयाऽनुत्थानात् । आत्मसुखरूपत्वेऽनुमानान्तरमाह—किञ्चेति । न च "ते ये शतमि"त्यादिश्रुतौ मानुषानन्दमारभ्योत्तरोत्तरोत्कर्षः श्रूयते, प्रतीयते च प्रत्यात्ममनुभूत्या सुखस्य तारतम्यमिति सुखनिष्ठोत्कर्षापकर्षधर्मैरनैकान्तिकतेति वाच्यम्, तेषां शुभकर्मोपस्थापितविषयविशेषसंसर्गेणसत्त्वप्रधानान्तःकरणवृत्तिषु संसारदशायां स्वाभाविकानन्दाभिव्यक्तेः । वृत्तिरूपोपाध्यवच्छेदाद्विषयतारतम्याच्चेदमानन्दे तारतम्यमध्यस्यते इत्यत आह—तेषां वेदान्तिभिरिति । प्रकृतानुमाने सत्प्रतिपक्षतामुत्थाप्य परिहरति—न चेदृशेति । अत्रानात्मनिष्ठत्वस्य साध्यत्वे प्रेमनिष्ठतामादाय सिद्धसाधनता, अनात्ममात्रनिष्ठत्वस्य च साध्यत्वे दृष्टान्ते साध्यवैकल्यं, न खलु सत्तादेरनात्ममात्रनिष्ठत्वम्, अपितु सत्तादेरात्मानात्मनिष्ठत्वस्य तार्किकैरभ्युपेयत्वात् । न चात्मनो नित्यसुखरूपत्वे मुक्तिसंसारयोरविशेष इति वाच्यम्; तस्य तत्र तत्राविद्यातिमिरतिरोधानातिरोधानाभ्यां भेदोपपत्तेः । सुखं मे स्यादिति सम्बन्धव्यपदेशस्यान्यनिष्ठत्वमात्रनिषेधपरत्वात् । यथा मम स्वरूपमित्युक्तौ सम्बन्धव्यवहारस्य तात्पर्यमन्यसम्बन्धधारकं न तु स्वसम्बन्धसाधकं, तद्वदत्रापि बोध्यमित्यर्थः । सुखं मे स्यादिति सम्बन्धव्यपदेशस्य पुनरपि मुख्यत्वं वारयति—अन्यासम्बन्धीति । सम्बन्धाभावेऽपुरुषार्थत्वमिति सम्बन्धस्य केवलव्यतिरेकादर्शनात् । किं सुखसम्बन्धमात्रं पुरुषार्थः, किं वा स्वस्य सुखसम्बन्धः ? उभयत्रापि दोषमाह—सुखसम्बन्धे-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सम्बन्धान्तरमभ्युपेयं तथा चानवस्था। तस्मादात्यन्तिकी दुःखनिवृत्तिरेव मुक्तिरित्युक्तम्।

एतेन प्रकृतिपुरुषविवेकदर्शनात्पुरुषस्य स्वरूपावस्थानं मुक्तिरित्यपि परास्तम्।

आत्मनःसुखरूपत्वाद्वन्धस्यान्यगतत्वतः ।
उपचारस्य वा योगात्सम्बन्धस्यानिरूपणात् ॥३॥

सुखसाक्षात्कारस्यैव पुरुषार्थत्वोपपादनादात्मनश्च सुखत्वानभ्युपगमात् न पुरुषस्य स्वरूपमात्रावस्थानं पुरुषार्थः। अपि च यस्य बन्धस्तस्यैव मुक्तिः। न च पुरुषस्य बन्धः; बन्धस्य बुद्धिगतत्वाङ्गीकारात्। न चोपचाराद् बुद्धिगतावेव बन्धमोक्षौ पुरुषे व्यपदिश्येते; निमित्ताभावादुपचारानुपपत्तेः। न च स्वस्वामिभावो निमित्तम्; सर्वथोदासीनस्य स्वामिभावे दृष्टान्ताप्रसिद्धेः। न च बुद्धेः स्वत्वमपि; अनाधेयातिशयपुरुषेऽनुपकारकत्वात्। न च द्रष्टृदृश्ययोर्योग्यतालक्षणः सम्बन्धः, मुक्तावपि प्रसङ्गात्, तस्यास्तदाप्यनपायात्। न च पुरुषभेदेन प्रकृतिगतयोग्यताया अपायानपायौ; अनाधेयातिशयतया पुरुषं प्रति प्रकृतिविशेषाभावे तद्व्यवस्थानुपपत्तेः। तस्मादनतिशयानन्दस्वभावस्यात्मनोऽविद्यातिरोधानमेव बन्धः विद्यानिमित्तस्तदस्तमयो मोक्ष इति सिद्धम्।

ननु कस्याविद्या? किं ब्रह्मणो? जीवानां वा? नाद्यः, सर्वज्ञस्य तदनुपपत्तेः। न द्वितीयः,तेषां परमार्थतः परस्माद्भेदेऽद्वैतव्याघातात्। अभेदे च पूर्वदोषानुषङ्गात्,अविद्याकल्पितभेदत्वे चेतरेतराश्रयापातात्—अविद्याधीनो जीवविभागो; जीवाश्रया चाविद्येति। अनुपपत्तिरविद्याया न दूषणमिति चेत्,अनुपपत्त्यभावे मुक्तानां ब्रह्मणश्च सा किं न स्यात्?

त्यादिना। वादार्थमुपसंहरति—तस्मादिति।

सम्प्रति सांख्याभिमतं मोक्षं दूषयति—एतेनेति। सांख्यमतेऽन्यानि दूषणानि श्लोकेन संकलयति—आत्मन इत्यादि। प्रथमपादं व्याचष्टे—सुखेति। द्वितीयपादं व्याकुरुते—अपि चेत्यादिना। तृतीयपादं विवृणुते—न चोपचारेति। चतुर्थचरणं विशदयति—निमित्तेति। सर्वथोदासीनपुरुषस्य स्वामित्वाभावमाह—न च स्वस्वामिभाव इति। बुद्धेः स्वत्वं वारयति—न च बुद्धेरिति। द्रष्टृदृश्ययोर्योग्यतालक्षणसम्बन्धेऽपि दोषमाह—मुक्तावपीति। पुरुषभेदेन प्रकृतिगतयोग्यतामपि दूषयति—अनाधेयेति। एवं सांख्याभिमतं मोक्षं प्रदूष्य सिद्धान्ताभिमतं मोक्षमुपसंहारव्याजेन दर्शयति—तस्मादिति।

आत्मनोऽविद्यातिरोधानं बन्ध इत्युक्तेऽविद्याश्रयविषयावाक्षिप्य समाधत्ते—ननु कस्येत्यादिना। सर्वज्ञस्य ब्रह्मणोऽविद्यानोपपद्यते। जीवानां परमार्थतः परमात्मनो भेदाऽभ्युपगमेऽद्वैतव्याघातः, अभेदे च विद्यास्वभावजीवेऽविद्याऽसम्भवदोषः। जीवब्रह्मणोरविद्याकल्पितभेदाङ्गीकारेऽन्योन्याश्रयतापत्तिः। मण्डनमिश्रोक्तिमनुवदति—अनुपपत्तिरिति। सदसद्विलक्षणाऽनिर्वाच्या मायाऽविद्या, अनुपपत्तिस्तस्या भूषणं, न दूषणमिति चेत्तर्हि तदनुपपत्त्यभावे मुक्तानां ब्रह्मणश्च साऽविद्या किं न स्यात्। मुक्तसर्वज्ञब्रह्मणोश्चाविद्या न भाति, नापि कल्पकाभावेन कल्पनीया, तयोरविद्याश्रयत्वे व्याघातश्च।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ननु न सा मुक्तानां ब्रह्मणश्च भाति, नापि कल्प्या; कल्पकाभावात्। मुक्तसर्वज्ञयोरविद्याश्रयत्वव्याघाताच्च। जीवानां तु न सा कल्प्या, अहमज्ञ इत्यनुभवसिद्धत्वादिति चेत्, न; अविद्याकल्पितोऽहमज्ञ इत्यनुभवाभावात्। नन्वहमिति प्रतीतिः कल्पिततामविद्याश्रयस्य बोधयति; अहंकृतेः कल्पनामयत्वात्। सुषुप्ततुरीयादौ च सत्यपि चिदात्मनि तदभावात्। अहं ब्रह्मास्मीति सामानाधिकरण्यस्य योऽयं स्थाणुरसौ पुमानितिवद्बाधपरत्वात् अहंशब्दस्य तत्र लक्षणया शोधितत्वंपदार्थविषयत्वाभ्युपगमाच्च अतः कल्पिताश्रयमज्ञानं प्रतीतित एव सिद्धमिति चेत्, न; प्रविलीनाहंकारेऽप्यात्मनि सुषुप्तादावज्ञानस्य सद्भावाभ्युपगमादन्यथा सुषुप्तिप्रलययोर्मुक्तिप्रसङ्गात्। तस्मादविद्याधीनो जीवविभागस्तदधीना वाऽविद्येति दुर्वारा परस्पराश्रयता। न च बीजाङ्कुरसन्तानयोरिव जीवाविद्ययोरनादित्वेन तत्परिहारः; दृष्टान्तवैषम्यात्। तत्र हि बीजाङ्कुरव्यक्तीनामन्योन्यकार्यकारणभावात्, तत्सन्तानयोः परस्पराधीनत्वव्यपदेशः, इह तु जीवाविद्याव्यक्त्योरेकत्वात् कार्यकारणभावाभावाच्च कथं तथा व्यपदेशः स्यात्? नन्वात्मनि गुणवत्त्वद्रव्यत्वयोरिवानादित्वेऽपि प्रयोज्यप्रयोजकभावो जीवाविद्ययोः किं न स्यादिति चेत्; तर्ह्यविद्यावत्त्वजीवत्वयोश्चिन्मात्रं किमधिकरणम्? उताविद्याविशिष्टम्? आद्ये ब्रह्मण्येवाविद्येति प्राचीनदोषानुषङ्गः। द्वितीये पुनरविद्यावत्येवाविद्येत्यात्माश्रयः। ब्रह्मवज्जीवस्यानादित्वे च न ब्रह्मप्रतिबिम्बता।

अथ ब्रह्मैव स्वाविद्यया संसरति स्वविद्यया च विमुच्यत इत्युच्येत, तदा तस्यैकत्वान्न विद्वदविद्वद्गुरुशिष्यबन्धमोक्षादिव्यवस्थाः स्युः। तथा हि—यदि नोत्पन्ना विद्या कस्तदा

जीवानां त्वहमज्ञ इत्यनुभवसिद्धत्वेन सा न कल्पनीयेति शङ्कते—नन्विति। अहंकारेऽविद्याकल्पितत्वं वारयति—न; अविद्येति। प्रतीतिबलादज्ञानाश्रयस्याविद्याकल्पितत्वं शङ्कते—नन्वहमित्यादिना। अहंकृतेः=अहमाकारेण परिणामो यस्मिन् जीवे यस्याहङ्कारस्य वेत्यर्थः। अहंकृतेः कल्पनामयत्वं साधयति—सुषुप्तेत्यादिना। तुरीयं=मोक्षावस्था। अहं ब्रह्मास्मीति बाधायां सामानाधिकरण्यं, तत्राहंशब्दस्य लक्षणया शोधितत्वं पदार्थविषयत्वमभ्युपेयते। अतः प्रतीतिबलादेव कल्पिताश्रयमज्ञानमिति सिद्धमिति चेन्न, प्रविलीनाहंकारेऽपि सुषुप्तादावात्मन्यज्ञानस्य सद्भावाभ्युपगमादन्यथासुषुप्तिप्रलययोर्मोक्षप्रसङ्गात्। परस्पराश्रयत्वपक्षमुपसंहरति—तस्मादिति। अविद्यापेक्षया जीवविभागो जीवाश्रिता चाविद्येति परस्पराश्रयता दुर्वरिति भावः। जीवविद्ययोरनादित्वेनान्योऽन्याश्रयतावारणाय बीजाङ्कुरदृष्टान्ते वैषम्यमाह—न च बीजेत्यादिना। वैषम्यं स्पष्टयति—तत्र हीत्यादिना। दृष्टान्तरमवष्टभ्यपुनरप्यन्योन्याश्रतां वारयितुमुपतिष्ठते—नन्वात्मनीति। तथा सति गुणवत्त्वद्रव्यत्वयोर्यथैक आत्माधिकरणम्, तथाऽत्राप्येकमधिकरणं वाच्यं, तत्किञ्चैतन्यमात्रम्? किं वाऽविद्याविशिष्टं चैतन्यम्? उभयकल्पं प्रदूष्य दूषणान्तरं चाह—ब्रह्मवज्जीवस्येति। इष्टसिद्धिकारसम्मतं पक्षं दूषयितुमुद्भावयति—अथ ब्रह्मैवेति। गुर्वादिविभागाभावमेव स्पष्टयति—तथाहीत्यादिना। गुरुशिष्यादिभावस्याविद्यानिर्मितत्वाभ्युपगमेऽपि शिष्याविद्यानिर्मितस्य

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गुरुरात्मान्तराभावाद् । यद्युत्पन्ना कस्तदा शिष्यः ? सर्वभेदप्रविलयात् । मायाविनिर्मितौ गुरुशिष्यौ स्त एवेति चेत्, न; उत्पन्नविद्यस्य मायानुपपत्तेः । शिष्याविद्याविनिर्मितो गुरुरिति चेत्, न; अविद्यानिर्मितस्य जडत्वेन विद्यावत्त्वानुपपत्तेः। दृश्यत एवाविद्यानिर्मितस्य गुरुत्वं स्वप्न इति चेत्, तर्हि शिष्याविद्याविनिर्मितस्य गुरुत्वे तस्य तस्यापि शिष्यस्य स्वीयस्वीयशिष्यं प्रतिगुरुत्वेन तत्तदविद्याविनिर्मितत्वान्न कोऽपि परमार्थः परमात्मतया निरूपितः स्यात् । यच्चाहुः——स्वात्मानमेव कल्पितभेदं गुरुः शास्तीति,तच्चायुक्तम्; तस्य स्वात्मनो मुक्तिं निश्चिन्वतः स्वव्यतिरेकेण तेषामभावं च पश्यतस्तदुपदेशार्थं प्रवृत्त्ययोगात् । प्रवृत्तौ च 'मन्मुक्त्यैवासि मुक्तस्त्वं मा यत्नं कुरु मुक्तये' (इष्ट०७/७) इत्येवोपदेशप्रसङ्गात् । किञ्चानादौ संसारे कस्यचिन्मुक्तिरासीत् ? न वा ? आद्ये नेदानीं संसारोपलम्भः स्यादात्मान्तराभावात् द्वितीयेऽपि कथं भविष्यतीति प्रत्याशा ? न च विद्याभावात्पूर्वममुक्तिः । शुकवामदेवप्रभृतीनामविद्यमाना विद्याऽन्यस्य भविष्यतीति प्रत्याशाऽसम्भवात्, गुरुसम्प्रदायाभावाच्च । तस्मादेकात्मवादे बन्धमोक्षव्यवस्थानुपपत्तेः । पारमार्थिक एवात्मभेदः समाश्रयणीयः । प्रयोगश्च——आत्मा, आत्मप्रतियोगिकान्योन्याभाववान्, आत्मनिष्ठमिथ्याभेदातिरिक्तभेदवान् वा, लक्ष्यत्वाद्धटवत् । न च 'एको देवः सर्वभूतेषु गूढः' इत्याद्यागमविरोधः; तस्येश्वरैकत्वप्रतिपादनपरत्वात् । न च तत्र सर्वभूतान्तरात्मत्वविरोधः; तस्यैव नियामकतया सर्वभूतान्तरावस्थानात् । तथा च श्रुतिः——'य आत्मनि तिष्ठन्य आत्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयत्येष त आत्मान्तर्याम्यमृत' इति ।

'एक एव तु भूतात्मा भूते भूते व्यवस्थितः ।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ।।'

इतिस्मृतेरपीश्वरपरत्वात्तस्य कायव्यूहनिर्माणेन बहुधा भावस्याप्युपपत्तेः । तत्त्वमसीत्याद्यैकात्म्योपदेशस्य चोपासनापरत्वात् । न चोपासनाविध्यश्रवणादतत्परत्वं शङ्कनीयम्, अपूर्वत्वेन 'पूषा प्रपिष्टभागः' इत्यादाविव विधेः कल्प्यमानत्वात् । 'नेह नानास्ति किञ्चने' त्यादेश्चेश्वरभेदाभावपरत्वात् । 'मृत्योः स मृत्युम्' इत्यस्य भेददर्शननिन्दया

गुरुत्वे गुर्वविद्यानिर्मितस्य च शिष्यत्वे सकलव्यवहाराप्रवृत्तिमाह—मायाविनिर्मितावित्यादिना-उपदेशप्रसङ्गादित्यन्त्येनेति । अत्र पक्षे बन्धमोक्षव्यवस्थानुपपत्तिमप्याह—किञ्चेत्यादिना । एकात्मवादे बन्धमोक्षव्यवस्थानुपपत्त्या पारमार्थिक एवात्मभेदः स्वीकार्यं इत्याशयेनोपसंहरतीत्याह—तस्मादिति । भेदमात्रसत्यत्वेऽनुमानमाह—प्रयोगश्चेत्यादिनेति । आत्मैकत्वश्रुतिरीश्वरैकत्वप्रतिपादनपरा । तस्य सर्वनियामकतया सर्वभूतान्तरात्मावस्थानम् । ईश्वरैकत्वपरां स्मृतिमप्याह—एक एवेति । तत्त्वमस्याद्यैकात्म्योपदेशस्तदुपासनापरः, तदर्थं तत्र विधेः कल्पनीयत्वमाह—अपूर्वत्वेनेत्यादिना । भेदनिन्दाश्रुतिरुपासनाविधिशेषतया नेयेत्याह—नेहेति, मृत्योरिति । 'द्वा सुपर्णा' 'अजामेकाम्'

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भेदोपासनाविधिपरत्वात् । 'द्वासुपर्णा' 'अजामेकाम्' इत्यादिना च जीवेश्वरयोर्जीवानां च परस्परभेदस्य साक्षादेव प्रतिपादनात् । न च तत्र लोकसिद्धभेदानुवाद इति वाच्यम्ः । ईश्वरस्यालौकिकत्वादेव तद्भेदस्य लोकतोऽधिगमासम्भवात् । जीवभेदस्य च लोकसिद्धत्वे प्रत्यक्षादिव्यतिरेकेण लोकशब्दार्थानिरूपणात्, प्रत्यक्षादिसिद्धत्वेन जीवभेदस्य प्रामाणिकत्वसिद्धिः ।

सुखदुःखव्यवस्थानुपपत्तिरपि जीवभेदं साधयति । अन्यथैकस्मिन्कस्मिंश्चित्सुखिनि सुखिन एव सर्वे स्युर्दुःखिनि वा दुःखिन इति व्यवस्था न स्यात् । न च पादे मे वेदना शिरसि मे सुखमितिवदुपाधिनिबन्धना व्यवस्था, तद्वदेव शरीरभेदेऽपि भोगानुसंधानप्रसङ्गात् । न च सुखादीनां साक्ष्यत्वेन साक्षिधर्मत्वाभावात् तद्भेदव्यवस्थापकत्वासिद्धिः । प्रमातृव्यतिरिक्तसाक्षिणो दुर्निरूपत्वात् । तथा हि—तस्य द्रष्टृत्वे प्रमात्रन्तर्भावादद्रष्टृत्वे सुखादिसाधकत्वासिद्धेर्ब्रह्मरूपत्वे च संसारदशायामनाविर्भावात् । साक्षिप्रत्यक्षं नाम व्यवहाराङ्गं न सिध्येत् । प्रमाणाभावाच्च । न तावत्प्रत्यक्षमत्र प्रमाणम्, मानसप्रत्यक्षवेद्यत्वे प्रमात्रन्तर्भावप्रसङ्गात् । इच्छादय एतद्ग्राहकानित्यज्ञानातिरिक्तप्रत्यक्षवेद्याः, अर्थापरोक्षत्वात् । रूपादिवदित्युमानं प्रमाणमिति चेत्, न; ईश्वरप्रत्यक्षवेद्यतया सिद्धसाधनत्वात् । अनीश्वरवादिनां चेच्छादय एतद्ग्राहकानित्यानुमानातिरिक्तानुमानवेद्याः वेद्यत्वादिति साधनादाभाससमानयोगक्षेमत्वात् । अनित्यप्रत्यक्षवेद्यत्वे बाधकाभावाच्च । सुखादिविशिष्टस्यात्मनः स्वाश्रितज्ञानवेद्यत्वे कर्मकर्तृत्वविरोधप्रसङ्गो बाधक इति चेत्, मैवम्; स्वरूपमात्रेण ग्राहकस्य विशिष्टस्वरूपेण कर्मत्वेऽप्यविरोधात् । अन्यथा त्वन्मतेऽपि कर्तृत्वकरणत्वयोरेकत्र समावेशो न स्यात् । अभ्युपगम्यते हि

इत्यादिना जीवेश्वरयोर्जीवानां च परस्परभेदस्य साक्षादेव प्रतिपादनात् । अलौकिकस्येश्वरस्य लोकतो भेदाधिगमासम्भवेन न तत्र लोकसिद्धभेदानुवादः शङ्कनीयः । न च जीवभेदस्य लोकसिद्धत्वमिति वाच्यम्, तस्य लोकसिद्धत्वेऽपि प्रत्यक्षादिभिन्नत्वेन लोकशब्दार्थानिरूपणेन प्रत्यक्षादिप्रमाणसिद्धजीवभेदस्य प्रामाणिकत्वसिद्धेः ।

एवमनुमानागमाभ्यामात्मभेदं प्रसाध्य तत्रार्थापत्तिमप्याह—सुखदुःखेति । अन्यथैकात्मवादे कस्मिंश्चिदेकस्मिन्सुखिनि सर्वेषां सुखित्वप्रसङ्गात् एकस्मिन् दुःखिनि सर्वेषां च दुःखित्वप्रसङ्गाच्च । शरीरावयवभेदेनापि सुखित्वादिव्यवस्थानुपपत्तिमाह—न च पाद इति । प्रमातृभिन्नसाक्षिणो दुर्निरूप्यत्वेन न सुखादीनां साक्ष्यधर्ममादाय भेदव्यवस्थासिद्धिरित्याह—न च सुखादीनामिति । प्रमातृव्यतिरिक्तं साक्षिणं विकल्प्य दूषयति—तथाहीति । प्रमातृभिन्नत्वेन साक्षिणि प्रमाणाभावं दर्शयति—प्रमाणाभावाच्चेति । न तावत्साक्षिणो बाह्यप्रत्यक्षं तस्याबाह्यत्वात्, नापि मानसप्रत्यक्षं, तथा सति प्रमात्रन्तर्भावप्रसङ्गात् । साक्षिप्रत्यक्षेऽनुमानमुद्भाव्य दूषयति—इच्छादय इति । ईश्वरवादिनैयायिकः सिद्धसाधनतामाह—ईश्वरेति । अनीश्वरवादीत्वाभाससमानयोगक्षेमतामाह—अनीश्वरेति । विपक्षे बाधकाभावात् शङ्कितप्रयोजकतामाह—अनित्येति । स्वरूपमात्रेण ग्राहकस्य विशिष्टरूपेण कर्मत्वानङ्गीकारे दोषमाह—अन्यथेति । बुद्धेः करणत्वं कर्मत्वं चोदाहृत्योदाहरणान्तरमाह—

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

केवलाया बुद्धेः करणत्वमात्मविशिष्टरूपेण च कर्तृत्वम्, अविद्याविशिष्टस्य साक्षित्वं केवलाविद्यायाश्च साक्ष्यत्वमिति च स्वीकारात्। "ब्रह्म वा इदमग्र आसीत्, तदात्मानमेवावेदहं ब्रह्मास्मी" ति चात्मन एव वेद्यवेदकभावश्रवणात्। प्रमाणवत्त्वेन विरुद्धस्याप्यभ्युपगमे प्रकृतेऽप्यहं सुखीत्यनुभवसद्भावात्, नासौ दण्डवारितः। एतेन—सुखादिप्रतिपत्त्यन्यथानुपपत्तिरपि साक्षिसिद्धौ प्रमाणमिति परास्तम्, अन्यथाप्युपपत्तेः। न च व्यभिचारिकरणजन्यज्ञानानां चैतन्यरूपमनुगतमनुसंधातारमन्तरेण प्रतिसंधानानुपपत्तिः साक्षिणि प्रमाणम्; ज्ञानानां स्वयंप्रकाशत्वात् तदाश्रयतया सिद्धस्य स्थिरस्यात्मनः पूर्वोत्तरकालीनज्ञानानुसंधानोपपत्तेः। एतेन प्रमातृप्रमाणप्रमेयप्रतीत्यन्यथानुपपत्तिरपि परास्ता; त्रिपुटिप्रत्यक्षवादे घटमहं जानामीति त्रितयप्रतिभासोपपत्तेः। नापि 'साक्षी चेता केवलो निर्गुणश्च' इत्यागमः प्रमाणम्; साक्षादीक्षत इतीश्वरस्य सर्वपरोक्षदर्शिनः प्रतिपादनात्। तदेवं न साक्षिणः सिद्धिः। सिद्धावपि न साक्ष्याणां धर्मत्वक्षतिः, "आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति धर्मा" इति साक्ष्याणामपि तद्धर्मत्वस्वीकारात्। किञ्चाकाशो विशेषगुणवद्व्यापकद्रव्यान्यः; द्रव्यत्वाद्घटवदित्यनुमानादपि आत्मनां सुखादिविशेष गुणवत्त्वसिद्धिः। तथा च तद्व्यवस्थातस्तेषां नानात्वसिद्धिः।

अत्रोच्यते—यत्तावदुक्तं सर्वज्ञत्वाद् ब्रह्मणो नाविद्येति, तदयुक्तम्; यतः—

स्वरूपतः प्रमाणैर्वा सर्वज्ञत्वं द्विधा स्थितम्।
तच्चोभयं विना विद्यासम्बन्धं नैव सिध्यति ॥४॥

स्वरूपप्रज्ञया चेत्सर्वज्ञत्वं ब्रह्मणोऽभ्युपगम्यते, तदा असङ्गस्य ब्रह्मणो नाविद्यामन्तरेणाशेषार्थसङ्गतिरिति सर्वज्ञत्वोपपत्त्यर्थमेव साऽभ्युपगमनीया। प्रमाणतः सर्वज्ञत्वेऽपि प्रमातृ

अविद्येति। आत्मनो ग्राह्यग्राहकतायां श्रुतिमप्याह—ब्रह्मेति। प्रमाणबलेन विरुद्धस्याप्यभ्युपगमेऽत्राप्यहं सुखीत्यनुभवोऽवश्यमभ्युपेतव्य इत्याह—प्रमाणवत्त्वेनेति। एवं प्रमातृभिन्ने साक्षिणि प्रत्यक्षानुमाने प्रदूष्यार्थापत्तिं दूषयति—एतेनेति। अन्यथापि=मानसवेद्यत्वेऽपि विरोधाभावस्योक्तत्वादिति भावः। स्वयप्रकाशतया ज्ञानाश्रयत्वेन सिद्धस्यात्मनः स्थिरस्य पूर्वोत्तरकालीनज्ञानानुसन्धानोपपत्त्या नार्थापत्तिरपि प्रमातृभिन्ने साक्षिणि प्रमाणमित्याह—न च व्यभिचारीति। आगमं साक्षिणि परिहरति—नापीति। तटस्थेश्वरवादे तदुपपत्तेरित्यर्थः। पञ्चपादीविरोधं परिहरति—आनन्द इत्यादिना। साक्षिणि विशेषगुणधर्मवत्त्वेऽप्यनुमानमाह—किञ्चेति। द्रव्यान्य इत्युक्ते घटाद्यन्यमादायार्थान्तरता, तद्वारणाय व्यापकेत्युक्तम्। तथात्वे कालाद्यन्यत्वेनार्थान्तरता, तद्वारणाय विशेषगुणवदिति दलम्। विशेषगुणवतो व्यापकद्रव्याद्यन्यो यः स आत्मा। आकाशस्य पक्षत्वेन न साध्यत्वसम्भवः, घटे दृष्टान्ते त्वाकाशान्यत्वे साध्यप्रसिद्धिः। तस्मादात्मनः सुखादिविशेषगुणवत्त्वसिद्धिव्यवस्थातस्तेषां नानात्वसिद्धिरित्याह—तथा चेति।

सिद्धान्ती समाधातुं प्रतिजानीते—अत्रेति। अविद्याया ब्रह्माश्रितत्वपक्षोक्तदोषान्परिहरति—यत्तावदिति। स्वरूपतः प्रमाणैर्वा द्विधास्थितं यत्सर्वज्ञत्वं, तच्चोभयमविद्यासम्बन्धं विनाऽऽत्मनि नैव सिध्यतीति योजना। श्लोकार्थं विशदयति—स्वरूपेत्यादिना। साऽभ्युपगमनीया=ब्रह्मणि

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्य प्रमाणप्रमेयसम्बन्धस्य चाविचारितरमणीयानाद्यविद्यासम्बन्धमन्तरेणासिद्धेः सर्वज्ञ-
मविद्यावत्तामाक्षिपति, न तु प्रतिक्षिपतीति कुतो विप्रतिषेधः ? ननु प्रकाशरूपस्य
मप्रकाशरूपाविद्याश्रयत्वं परस्परविरोधिनोस्तमःप्रकाशयोरिवाधाराधेयभावानुपपत्ते-
ति चेत्, मैवम्; विकल्पासहत्वात् । किमप्रकाशशब्देन प्रकाशाभावः ? उत प्रकाशा-
न्यत् ? तद्विरुद्धं वा विवक्षितम् ? नाद्यः, अविद्याया भावाभावविलक्षणत्वेनाभावत्वा-
भ्युपगमात् । द्वितीये तु दृष्टान्ताभावः; किं खलु चित्प्रकाशादन्यत्तदाश्रयं न भवतीति
प्रत्युदाह्रियेत ? सर्वस्य जडस्य चित्प्रकाशाश्रयत्वाभ्युपगमात् । तदेकाश्रयस्य तेन
ह विरोधासम्भवान्न तृतीयोऽपि । न चाविरुद्धत्वादनिवृत्तिः; वेदान्तवाक्यजनितेन
ह्माकारेण विज्ञानेन तदवच्छिन्नेन वा चित्प्रकाशेन तन्निवृत्त्युपपत्तेः । न च विज्ञानस्य
वर्तकान्तराभावादनिवृत्तिः, भावे वा तन्निवर्तकान्तरस्याभ्युपगन्तव्यत्वादनवस्थेति
च्यम्; कारणनिवृत्त्यैव तन्निवृत्तेरप्यत्र सिद्धत्वात् । न च कार्येण कारणस्यानिवृत्तिः ।
स्कारेण तज्जनकस्य ज्ञानस्य स्मरणेन तज्जनकसंस्कारस्यान्त्यशब्देनोपान्तशब्दस्य
परीक्षकैर्नाशाभ्युपगमात् । लौकिके चारणिप्रभवेनाशुशुक्षणिनाऽरणेः कदलीफलोद्-
मेन वा कदलीकाण्डादेः प्रक्षयदर्शनाच्च ।

ननु भवत्वेवं ब्रह्माश्रया अविद्या, तस्याश्च को विषयः ? किं स्वयमेव ब्रह्म ? उत
न्यम् ? उभयं वा ? सर्वथाप्यनुपपन्नम्, सर्वज्ञस्य तत्तद्विषयज्ञाने सति तत्र तत्राज्ञाना-
सम्भवादिति चेत्, मैवम्; मां न जानामि त्वदुक्तमर्थं न जानामीति चावभासमानेऽपि
विषये तस्याः स्वानुभवसिद्धत्वात् । जडस्याविद्यानिर्मितत्वेन तद्विषयविद्यानुपपत्तौ

र्वज्ञत्वोपपत्त्यर्थमेवाविद्याऽभ्युपेया । प्रमाणजनितसर्वज्ञत्वमपि तत्राविद्यावत्त्वकल्पकमेव न विरुद्ध-
त्याह—प्रमाणत इत्यादि । स्वरूपविरोधमाशङ्क्य दूषयति—ननु प्रकाशेत्यादिना । अविद्ये-
त्यविद्याऽभावरूपतया नञर्थं विकल्प्य दूषयति—नाद्य इत्यादिना । प्रथमेऽविद्याया अभावरूपत्वा-
सिद्धिमाह—अविद्याया इति । द्वितीये दृष्टान्ताभावमाह—न खल्विति । अविद्या न चैतन्याश्रया
चैतन्यान्यत्वादिति व्याप्तिदर्शनाय दृष्टान्तो नास्तीति भावः । तृतीयकल्पं दूषयति—तदेकेति ।
चैतन्याश्रयस्य चैतन्येन सह विरोधासम्भवात्तृतीयकल्पोऽपि दूषित इत्यर्थः । अविद्यायाः स्वाश्रयेण
चैतन्येनाविरोधे मोक्षाभावमाशङ्क्य परिहरति—न चाविरुद्धेति । स्वरूपचैतन्यस्याविद्याऽविरुद्धत्वेऽपि
वेदान्तवाक्यजनितब्रह्माकारवृत्तिज्ञानेन तादृग्वृत्तिप्रतिफलितचैतन्येन वाऽनाद्यविद्यानिवृत्त्यभ्युपगमेना-
दोषात् । न चान्तःकरणवृत्तिरूपज्ञानस्य निवर्तकाभावादनिवृत्तिः, भावे वाऽनवस्थेति वाच्यम्,
वृत्तिकारणाविद्यानिवृत्त्यैवान्तःकरणवृत्तिरूपविज्ञाननिवृत्तेः सिद्धान्तित्वात् । तत्रोदोहरणत्रयमाह—
संस्कारेण, स्मरणेनान्त्यशब्देन चेति । लौकिकोदाहरणद्वयमाह—लौकिके चेत्यादिना ।

एवमविद्याश्रयत्वं निरूप्याविद्याविषयत्वं निरूपयति—नन्वित्यादिना । त्रिधाविकल्प्य दूषयति—
सर्वमित्यादिना । ज्ञायमानः सन् पदार्थो नाविद्याविषय इति पूर्वपक्षोक्तं परिहरति—मामिति ।
एवं च ज्ञानाज्ञानयोर्यथा न भिन्नविषयं तथोपपादितं भावरूपाज्ञानवादे । ब्रह्मभिन्नसर्वस्याविद्या-
निर्मितत्वेन जडस्य विद्याऽविद्ययोर्विषयत्वं वारयति—जडस्येति । जीवाश्रिताविद्यानङ्गीकारेण

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तन्निवर्त्याविद्यायास्तत्रासम्भवाच्च । जीवाश्रयाविद्यापक्षोद्भावितास्तु दोषास्तदनङ्गीकारादेव परास्ताः । यत्तु ब्रह्मण एवाविद्याश्रयत्वे विद्वदविद्वद्गुरुशिष्यबन्धमोक्षव्यवस्था न स्यादिति, तदसत्; यावदविद्यं सर्वव्यवस्थानां स्वप्नवदुपपत्तेः । निवृत्तायां तस्यां न काचिदपि व्यवस्था । न चाविद्यानिर्मितस्य गुरोः कल्पितत्वेन विद्यावत्त्वानुपपत्तिः; स्वप्न इव विद्यावत्तयैव कल्पनोपपत्तेः । न च गुरोः शिष्याविद्याकल्पितत्वे शिष्याणामपि स्वोयस्वीयशिष्याविद्याकल्पितत्वान्न कोऽपि परमार्थः स्यादिति वाच्यम्; विकल्पासहत्वात् । गुरुशिष्यादिशब्दैः किं केनचित्परिच्छेदेन कवलीकृतं चैतन्यमभिधीयते ? किं वा निरस्तसमस्तभेदम्? नाद्यः; परिच्छिन्नस्य परिकल्पितत्वादेवाविद्याश्रयत्वानुपपत्तेः । द्वितीये तु सिद्धसाधनम्, यस्मादस्माभिरप्येतदेवाभिधीयते––विध्वस्तसमस्तविकल्पं चिन्मात्रमेव ब्रह्म स्वाविद्यापरिकल्पितांस्तत्तद्विकल्पान्पश्यत् संसरतीति तादृशमेव चाकारमभिप्रेत्य गुरुरिति शिष्य इति चाभिलप्यते, न तु परिच्छिन्नं कञ्चनाकारम् । न चेत्परिच्छिन्नानामविद्या कथं तर्हि मदविद्यानिर्मितस्त्वं मदविद्यानिर्मितस्त्वमिति वादिप्रतिवादिनोरन्येषां च कोलाहल इति चेत्; मैवम्; विनैव तत्तत्परिच्छेदेष्वविद्यां स्वप्ने इव परस्मिन्नेव ब्रह्मणि गुरुरिति शिष्य इति चायमिति चाहमिति चैकस्मिन्नेव नानाप्रतिभासः स्वप्नदृशीव चिदात्मनीत्युक्तत्वादित्यलं मतिकर्दमेन । एतेन स्वात्मानमेव कल्पितभेदं गुरुः शास्तीत्यत्राभिहितोपालम्भः परास्तः; परमार्थत उत्पन्नविद्यो मुक्तश्च कश्चिच्छास्तीत्यनङ्गीकारात् । अविद्यानिर्मिते च गुरौ स्वाप्न इव कस्मादित्थं कुरुते कस्मान्नेति पर्यनुयोगायोगात् । यत्पुनरनादौ संसारे न कश्चिदपि मुक्तश्चेद्भविष्यति मुक्तिरिति प्रत्याशा न सम्भवति, विद्योत्पत्तिरप्यनुपपन्ना गुरुसम्प्रदायाभावादिति, तदपि प्रत्युक्तम्; शास्त्रप्रामाण्यादेव भविष्यति मुक्तिरिति प्रत्याशोपपत्तेः । न च गुरुसम्प्रदायाभावः विद्वत्तया परिकल्पितगुरोस्तदुपपत्तेरुक्तत्वात् । प्रथमप्रयोगे च पारमार्थिकान्योन्याभाववत्त्वसाधने साध्यविकलो दृष्टान्तः, अद्वैतवादिभिः घटस्यापि वास्तवान्योन्याभावानभ्युपगमात् । व्यावहारिक-

---

तत्पक्षोक्ताः सर्वे दोषाः प्रत्याख्याता इत्यवधेयम् । न च ब्रह्मणोऽविद्याश्रयत्वे बन्धमोक्षादिव्यवस्थाऽनुपपत्तिरिति वाच्यम्; यावदविद्यादशायां स्वप्नवत्सर्वव्यवहारोपपत्तेः, निवृत्तायां चाविद्यायां सर्वव्यवहारानुपपत्तेरिष्टत्वात् । गुरुशिष्यादिव्यवहारस्य स्वप्नवदविद्याकल्पितत्वमाह—न चाविद्येत्यादिना । परमार्थतस्तु निरवच्छिन्नं चैतन्यमेवाविद्याश्रयो विषयश्चेत्यप्याह महता संरम्भेण—विकल्पासहत्वादित्यादिना । एतेन स्वात्मानमेव कल्पितभेदं गुरुः शास्तीत्ययं पक्षः समर्थितः । परमार्थतस्तु निखिलव्यवहाराभावोऽभ्युपगतः । तत्र न विधिनिषेधयोः प्रवृत्तिरिति भावः । यद्यप्यनादिसंसारेऽद्यावधि न कश्चिन्मुक्तश्चेद्भविष्यति कश्चिन्मुक्त इति कथमाशास्महे, तथापि शास्त्रप्रामाण्यादेव भविष्यति मुक्तिरिति प्रत्याशोपपत्तिरिति भावः । न चैवं सति गुरुसम्प्रदायाभावप्रसङ्गः स्यादिति वाच्यम्; विद्वत्तया परिकल्पितगुरोस्तदुपपत्तेरुक्तत्वात् । न चात्मा, आत्मप्रतियोगिकाऽन्योऽन्याभाववान्, लक्ष्यत्वात्, घटवदिति वाच्यं; प्रथमप्रयोगे = पारमार्थिकभेदसाधने

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

साधने च सिद्धसाधनत्वात् । द्वितीयप्रयोगे च कालात्ययापदिष्टता, 'एको देवः सर्वभूतेषु गूढः' इति श्रुत्या बाधात् । न चैषा श्रुतिरीश्वरपरा, अप्रसक्तनिषेधप्रसङ्गात् । नहीश्वरस्य प्रतिभूतं भेदो लोकतो वेदतः परीक्षकसम्मत्या वा प्रसक्तः । न च तस्यापि नियन्तृतया सर्वभूतान्तरवस्थानं 'य आत्मनि तिष्ठन्' इति श्रुतेरिति वाच्यम्; आत्मेश्वरभेदाभावस्य तत्र तत्र श्रुतिषु बहुशः प्रतिपादनात् । अन्तर्यामिब्राह्मणे च 'नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति श्रोता' इत्यात्मभेदनिराकरणात्, 'य आत्मनि तिष्ठन्' इति चौपाधिकस्यात्मनो घटाकाशस्य महाकाशाधीनत्ववत्स्वानुगतात्माधीनतामात्रप्रतिपादनपरत्वात्, अन्यथा नित्यद्रव्याणां स्वतन्त्रतया परस्पराधाराधेयभावानुपपत्तेरनङ्गीकाराच्च श्रुतेरानर्थक्यप्रसङ्गात् ।

न च तत्त्वमसीत्याद्युपासनापरम्, तथात्वे प्रमाणाभावात् । तथा हि किं प्रमाणान्तरविरोधादुपासनापरम् ? उत स्वार्थे तात्पर्यावगमोपायाभावात् ? नाद्यः; जीवब्रह्मणोः प्रमाणान्तरागोचरतया तद्भेदस्यापि प्रमाणान्तरागोचरत्वात् । बिम्बप्रतिबिम्बयोरिव भेदावभासोपपत्तेश्च । नापि द्वितीयः । 'तत्त्वमसि' इति नवकृत्वोऽभ्यासात्, 'अनेन जीवेन' इति चार्थवादोपादानाद्, 'अथ ये अन्यथाऽतो विदुः' इति भेददर्शननिन्दनात्, 'अथ सम्पत्स्यते' इति फलश्रवणात् 'एकमेवाद्वितीयमैतदात्म्यं' इति चोपक्रमोपसंहारयोरैकरूप्याद्, अपूर्वत्वान्मृदादिदृष्टान्तैश्चोपपादनात् । अन्यत्रापि 'अहं ब्रह्मास्मि' 'स एष इह प्रविष्टः', 'योऽन्यां देवतामुपास्ते', 'स इदं सर्वं भवति' इत्यादिश्रवणादेकत्वे तात्पर्यावगमात् । 'तद्धास्य विजज्ञौ' इति 'तरति शोकमात्मवित्' 'तमसः पारं दर्शयति', 'भिद्यते हृदयग्रन्थिः' 'ब्रह्म वेद ब्रह्मैव भवति' इति विद्याया अविद्यानिवृत्तिब्रह्मात्मभावफलकत्वश्रवणात्, उपासनाविज्ञानस्याप्रमाणत्वादविद्यानिवर्तकत्वायोगात् । परमार्थतो भिन्नस्यात्मनो ब्रह्मात्मत्वासंभवात्स्थितस्य नष्टस्य वान्यस्यान्यात्मत्वायोगात्, उपासनपरत्वस्य

दृष्टान्ते साध्यवैकल्यात् । नह्यद्वैतिभिर्घटस्यापि पारमार्थिको भेदोऽभ्युपेयते । व्यावहारिकभेदसाधने सिद्धसाधनत्वम् । न चात्मा, आत्मवृत्तिमिथ्याभेदातिरिक्तभेदवान्, लक्ष्यत्वात्, घटवदिति वाच्यं द्वितीयप्रयोगे । "एको देवः" इति श्रुत्या तस्यानुमानस्य बाधितत्वात् । सत्प्रतिपक्षत्वं चास्य मिथ्यात्ववादे सम्भवितत्वात् । ईश्वरे पारमार्थिकभेदाप्रसङ्गमेवाह—नहीश्वरस्येति । तटस्थेश्वरस्यैकत्वबोधकत्वेनात्मैकत्वश्रुतेरन्यथासिद्धत्वमाशङ्क्य दूषयति—न च तस्यापीति । अन्तर्यामिब्राह्मणमौपाधिकभेदमादाय स्वानुगतात्माधीनत्वमात्रपरं न तु पारमार्थिकभेदप्रतिपादकम् । विपक्षे नित्यद्रव्ययोः परापरात्मनोः परस्पराधाराधेयभावानुपपत्तिमाह—अन्यथेति ।

श्रुत्यन्तरस्योक्तामन्यथासिद्धिं वारयति—न च तत्त्वमसीति । जीवब्रह्मणोर्भेदे प्रमाणाभावं विकल्प्य साधयति—तथाहीति । तत्राद्ये जीवब्रह्मणोर्भेदस्य प्रमाणान्तराविषयत्वमाह - नाद्य इति । द्वितीये स्वार्थे तात्पर्यावगमोपायमुपक्रमोपसंहाराभ्यासापूर्वताफलार्थवादोपपत्तिरूपषड्विधतात्पर्यावबोधकमाह—नापि द्वितीय इत्यादिना । उपासनाविज्ञाने तात्पर्याभावमाह—उपासनेति । विद्या-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वक्तुमयुक्तत्वात्। 'वेद भवति, विद्वान् न बिभेति; पश्यन् प्रतिपेदे, को मोहः कः शोक एकत्वमनुपश्यत' इत्यादिना विद्यातत्फलयोः समकालीनत्वप्रतिपादनात्, विधेयज्ञानापूर्वजन्यत्वे च तदयोगात्। 'नेह नानास्ती'त्यत्र च त्वप्रत्ययाश्रवणेन नानात्वस्यानिषेधात्, अप्रसक्तप्रतिषेधप्रसङ्गस्य च पूर्वमेव दर्शितत्वात्। नानाभूतस्य कार्यस्य प्रतिषेधे च कारणादन्यत्र कार्यस्याभावेन वाक्यस्य तन्मिथ्यात्वे पर्यवसानात्। उपासनाविधिपरत्वस्य निषेधादेव भेददर्शननिन्दायास्तत्परःत्वायोगात्।

द्वासुपर्णेत्यादेश्च लोकसिद्धभेदानुवादकत्वात् लोकसिद्धत्वेऽपि भेदस्य देहात्मभाववत् सवितृप्रादेशिकत्वादिवच्च प्रामाणिकत्वाप्रसङ्गात्। व्यवस्थानुपपत्तेश्च दुर्निरूपतया भेदासाधकत्वात्। व्यवस्थाशब्देन धर्मभेदमात्राभिधाने दाहपाकादेरिव धर्मिभेदासाधकत्वात्। भिन्नाधिकरणधर्मभेदाभिधाने चान्योन्याश्रयत्वात्। परस्परविरुद्धधर्मोक्तौ च विरोधस्य विचारासहत्वात्, सहानवस्थानस्यासिद्धेः, एकस्मिन्नप्यात्मनि पादे मे वेदना शिरसि मे सुखमिति युगपत् सुखदुःखयोरनुभवात्। अणुपरिमाणस्य मनसो युगपत्प्रदेशद्वयेन सन्निकर्षाभावेऽपि त्वगिन्द्रियेण व्यापकेन युगपत्संन्निकर्षात्। तत्तत्प्रदेशावच्छिन्नात्ममनःसन्निकर्षस्य च सुखदुःखनिदानत्वाङ्गीकारे सुखदुःखयोरणुमात्रतयोपलम्भप्रसङ्गात्। सकलदेहव्यापितया च तयोरनुत्पादप्रसङ्गात्। विनश्यदविनश्यतोश्च सुखदुःखयोः सहावस्थानस्य स्वयमेवाङ्गीकारात्। वध्यघातकभावस्य च 'नाजात एकोऽन्यं हन्ति नाप्यन्याधारम्' इति न्यायेन सहावस्थानाक्षेपकत्वात्। व्यवस्थायाश्च कल्पितभेदाश्रयत्वेनाप्युपपत्तेः। अननुसंधानस्य च शरीरभेदादेवातीतशरीरेष्विव सम्भवात्।

तत्फलयोः समानकालीनत्वप्रतिपादनेनोपासनायां तदभावमाह—विद्वान् न बिभेतीत्यादिना। निषेधश्रुतेः समस्तद्वैतनिषेधे तात्पर्यमाह—नेह नानास्तीति। उपासनाविधिनिषेधादेव नोपासनाविधौ भेदनिन्दातात्पर्यमित्याह—उपासनाविधीति।

पूर्वपक्षिणोदाहृतश्रुतीनां कल्पितभेदविषयतयाऽन्यथासिद्धिमाह—द्वासुपर्णेत्यादि। लोकसिद्धभेदस्याप्रमाणिकत्वे दृष्टान्तद्वयमाह—देहात्मवदित्यादि। सुखादिव्यवस्थाऽपि न भेदसाधिकेति व्यवस्थाया दुर्निरूपितामाह—व्यवस्थाशब्देनेति। नहि दाहपाकादिव्यवस्थानुपपत्त्या धर्मिभेदः साधयितुं केनापि शक्यः। तथैकस्मिन्नात्मनि न्यूनाधिकसुखादिव्यवस्था स्वीकार्या। व्यवस्थापदेन भिन्नाधिकरणधर्मभेदाभिधानेऽन्योऽन्याश्रयत्वात्। न च व्यवस्थापदेन परस्परविरुद्धधर्मयोर्विवक्षितत्वमिति वाच्यम्; विचारासहत्वात्। एकस्मिन्नप्यात्मनि पादे मे वेदना शिरसि मे सुखमिति युगपत्सुखदुःखयोरनुभवेन सहानवस्थात्मकविरोधस्यासिद्धेस्तयोर्युगपदनुभवे निखिलशरीरव्यापकेन त्वगिन्द्रियेण सन्निकर्षाच्च। नहि तत्तत्प्रदेशावच्छिन्नात्ममनःसन्निकर्षः सकलदेहव्यापिसुखदुःखयोरुत्पादयितुं शक्नुयात्। विनश्यदविनश्यदवस्थयोश्च सुखदुःखयोः सहावस्थानस्य स्वयमेव भवताङ्गीकारात्। वध्यघातकभावस्य विरोधस्य "नाजत एकोऽन्यं हन्ति, नाप्यन्याधारम्" इति सहावस्थानाक्षेपकत्वात्। न चक्रजीववादे सुखदुःखयोर्व्यवस्थानुपपत्तिरिति वाच्यम्; कल्पितभेदाश्रयत्वेनोक्तव्यवस्थोपपत्तेः। तयोरननुसन्धानकारणमाह—अननुसन्धानस्येति। अन्यथाऽतिप्रसङ्गमाह—

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वर्तमानशरीरेष्वपि निदर्शनाभावादेव योगिनमनङ्गीकुर्वद्भिः अनुसन्धानस्य प्रसञ्जयितुमशक्यत्वात्, योगिसद्भावाभ्युपगमेऽपि नयनावच्छिन्नस्यात्मनः शब्दाद्यननुसंधानवदेकशरीरविशिष्टस्य शरीरान्तरेऽननुसंधानोपपत्तेः। उपलक्षितस्य परमात्मनः सर्वज्ञस्य सर्वत्रानुसंधानेऽपि दोषाभावात्। अनुसंधानेऽपि तस्याभोक्तृत्वादेव योगिवदीश्वरवच्च तस्य तत्तच्छरीरदुःखपरिहाराय प्रवृत्तेरप्रसङ्गात्।

सुखादीनां च साक्ष्याणां साक्षिधर्मत्वाभावेन तद्भेदासाधकत्वात्। साक्षिणश्च प्रमाकरणासंनिधानेऽपि सुषुप्तावज्ञानसाधकस्य प्रमात्रन्तर्भावानुपपत्तेः। तस्य च जीवात्मान्तर्भावात्साक्षिप्रत्यक्षस्य लौकिकव्यवहाराङ्गत्वोपपत्तेः। न च साक्षिणि प्रमाणाभावः, यतः—

'चैत्ररागः स्वविषयानित्यज्ञानातिरेकिणा।
तदध्यक्षेण संवीक्ष्यः प्रत्यक्षत्वात्पटादिवत्' ॥५॥

विवादाध्यासिताः चैत्रेच्छादय एतद्ग्राहकाऽनित्यज्ञानातिरिक्तैतत्प्रत्यक्षग्राह्याः एतत्प्रत्यक्षत्वादेतत्प्रत्यक्षपटादिवत्। न चाभाससमानयोगक्षेमत्वम्; अनुमानस्य नित्यत्वप्रसाधने लक्षणव्याघातात्। व्याप्याद्व्यापके बुद्धिरनुमानम्, साधनधर्मदर्शनात् साध्यधर्मविशिष्टे बुद्धिरनुमानम्, लिङ्गदर्शनात् सञ्जायमानं लैङ्गिकमनुमानम्, त्रिरूपाल्लिङ्गतोऽर्थदृगित्यादिलक्षणैरनित्यस्यैव ज्ञानस्यानुमानत्वेन लक्ष्यमाणत्वात्, विपक्षे बाधकाभावाच्च। मानसप्रत्यक्षवेद्यत्वे इच्छादेः कर्मकर्तृभावस्यैव बाधकत्वात्। न च स्वरूपमात्रेण ग्राहकस्य विशिष्टरूपेण ग्राह्यत्वेऽप्यविरोधः। केवलस्य देवदत्तस्य गन्तृत्वं कुण्डलविशिष्टस्य तु गन्तव्यत्वमिति तत्रापि विरोधाभावप्रसङ्गात्। दृश्यते च कर्तुरप्यन्यत्र करणता 'योधै राजा युध्यते', 'चारेण परसैन्यं कलयति' इत्यादिषु।

वर्तमानेति। मीमांसकान् समाधाय तार्किकान् समाधत्ते—योगिसद्भावेति। उपलक्षितत्वपक्ष इष्टापत्तिमाह-उपलक्षितस्येति। एतत्पक्षे तत्तच्छरीरदुःखपरिहाराय प्रवृत्त्यभावकारणमाह-अनुसन्धानेऽपीति।

सुखादीनां साक्ष्यधर्माणां साक्षिभेदासाधकत्वमाह—सुखादीनां चेति। साक्षिणः प्रमात्रनन्तर्भावमाह—साक्षिणश्चेति। साक्षिप्रत्यक्षस्य लौकिकव्यवहाराङ्गत्वमुपपादयति—तस्येति। साक्षिसद्भावेऽनुमानप्रमाणं तार्किकं प्रति श्लोकेनाह—चैत्रेति। तदध्यक्षेण=चैत्रप्रत्यक्षेण। श्लोकं विशदयति—विवादेति। एतद्=चैत्रेच्छादय इत्यर्थः। अनित्यज्ञानातिरिक्तेति=अनित्यज्ञानानधिकरणत्वमित्यर्थः। ईश्वरप्रत्यक्षवेद्यतयाऽर्थान्तरतावारणायैतत्प्रत्यक्षपदम्। मानसप्रत्यक्षत्वेन सिद्धसाधनता स्यात्तद्वारणायैतद्ग्राहकेति पदम्। तथा चेच्छादिग्राहकनित्यापरोक्षसाक्षिसिद्धिः। हेतुशरीरे परोक्षादिष्वेतत्प्रत्यक्षाविषयेषु व्यभिचारवारणायैतत्पदम्। अतीन्द्रियेषु व्यभिचारवारणाय प्रत्यक्षपदम्। न चात्रानुमाने 'इच्छादय एतद्ग्राहकानित्यानुमानातिरिक्तानुमानवेद्याः वेद्यत्वात्सम्प्रतिपन्नवदि'त्याभाससमानयोगक्षेमतेति वाच्यम्, अनुमानस्य नित्यत्वसाधनेऽनुमानलक्षणेनैव विरोधात्। तत्र तार्किकसम्मतमनुमानमाह—व्याप्येति। स्वानुमानस्य विपक्षे बाधकतर्कमाह—मानसप्रत्यक्षेति। कर्तृकरणभावस्य बाधकाभावमुद्भाव्य दूषयति—न च स्वरूपमात्रेणेति। विरोधे लौकिकोदाहरणमाह—दृश्यते चेति।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

न चाविद्याविशिष्टः साक्षी, येन कर्तृकोटिनिविष्टाया अविद्यायाः कर्तृत्वं स्यात्, चिद्रूपस्यैवात्मनः साक्ष्यसम्बन्धे साक्षित्वेन व्यवहारात्। 'यद्वै तन्न पश्यति पश्यन् वै तन्न पश्यति' इत्यादिश्रुतेः। 'ब्रह्म वा इदमग्र आसीत्' 'तदात्मानमेवावेद्' इत्यादिना नात्मनः कर्मकर्तृभावो विवक्ष्यते, किं तर्हि—वेदान्तवाक्यजनितब्रह्मैकाकारान्तःकरणवृत्तिरूपया विद्यया स्वतःसिद्धस्यैवात्मनोऽब्रह्मत्वभ्रमकारणाविद्यानिवृत्तिः, तथा चान्तःकरणविशिष्टस्यैव प्रमातृत्वं विशुद्धस्य ब्रह्मणो वृत्तिव्याप्यत्वमिति कुतस्तत्रैकस्य कर्मकर्तृभावः? न च नित्यबोधमन्तरेण पूर्वापरबुद्धीनामनुसंधानसिद्धिः, ग्राहकतया सिद्धेर्निराकृतत्वात्। न च 'साक्षी चेता केवलो निर्गुणश्चे'ति वाक्यमीश्वरपरत्वादात्मनः साक्षित्वे न प्रमाणमिति युक्तम्; मायाविशिष्टरूपे तस्मिन् केवलो निर्गुण इति विशेषणानुपपत्तेः। तस्मात्सर्वप्रत्यग्भूतं विशुद्धं ब्रह्मात्र जीवाभेदेन साक्षीति प्रतिपाद्यते। न चानन्दादीनां साक्ष्याणां साक्षिधर्मत्वम्, आनन्दानुभवयोरात्मरूपत्वात् न च नित्यत्वं धर्मः, विनाशराहित्येनोपलक्षितस्वरूपस्य तथा व्यपदेशात्। विशेषगुणवद्व्यापकान्यत्वसाधनं च प्रतिकल्पं जायमानाकाशभेदैरेव सिद्धसाधनम्, अर्थान्तरञ्चेश्वरवादिनामीश्वरेण; अनित्यपदप्रक्षेपे च पूर्वोक्त एव दोषः। तथा च सुखादीनामात्मगुणत्वाभावान्न तद्व्यवस्थातस्तद्भेदसिद्धिः। तदेवं स्वाविद्यया ब्रह्मैव संसरति स्वविद्यया च मुच्यत इति एकाविद्यापक्षे न कश्चिद्दोषः, तथा नानाविद्यापक्षेऽपि।

ननु नानाजीवानां किमेकाविद्या कल्पिका? उत प्रतिजीवं भिन्ना? नाद्यः; एकमुक्तौ सर्वमुक्तिप्रसङ्गतादवस्थ्येन नानाजीवकल्पनायामपि व्यवस्थानुपपत्तेः। न द्वितीयः; कल्पनागौरवात्। ननु व्यवस्थानुपपत्तौ कल्पिकायां न कल्पनागौरवं दोषः 'प्रमाणवन्त्य-

---

विशेषणीभूताविद्यायाः कर्तृत्वाभावमुपपादयति—न चाविद्येति। तत्र श्रुतिर्द्वैताभावनिबन्धनमदर्शनं स्वरूपतश्च दर्शनं वदति—यद्वै इत्यादि। "तदात्मानमेवावेदि"ति श्रुत्या ब्रह्मणि प्रतिबन्दीया कर्मकर्तृभावगृहीता, तां वारयति—वेदान्तवाक्येति। अनुसन्धानान्यथानुपपत्तिमपि साक्षिणि प्रमाणमाह—न च नित्यबोधमिति। तत्रागमप्रमाणमप्याह—साक्षीति। पूर्वोदाहृतस्य पञ्चपादिकावचनस्य तात्पर्यमाह— न चानन्दादीनामिति। तस्य विनाशरहितत्वेन नित्यत्वव्यपदेशः। न 'चाकाशो विशेषगुणवद्व्यापकद्रव्यान्यो, द्रव्यत्वात्, घटवदि' त्यनुमानेनात्मनि भिन्नत्वं साधितमिति वाच्यम्, वियदधिकरणन्यायेन प्रतिकल्पं जायमानाकाशभेदैरेव सिद्धसाधनतापत्तेरीश्वरवादिमते परमेश्वरादन्यत्वमादायार्थान्तरापत्तेश्च। न चोक्तानुमाने साध्यशरीरेऽनित्यपदोपादानान्न दोषापत्तिरिति वाच्यम्; आकाशेन पूर्वोक्ताया अर्थान्तरतायास्तादवस्थ्यात्। साक्ष्यनिष्ठधर्माणां साक्षिधर्मत्वाभावप्रतिपादनमुपसंहरति—तथा चेति। अतः सुखादीनामात्मधर्मत्वाभावान्न तद्व्यवस्थाऽनुपपत्त्याऽऽत्मभेदसिद्धिः। समर्थितमेकजीववादमुपसंहरति—तदेवमिति। एकजीववादे दोषाभावमुपपाद्य नानाजोववादे दोषाभावमुपपादयितुं प्रतिजानीते—तथा नानाविद्यापक्षेऽपीति।

एवं विशदमतीन् प्रत्येकजीववादपक्षमुपपाद्य मन्दमतीन् प्रति नानाजीववादपक्षमप्याक्षेपसमाधिभ्यामुपपादयति—नन्वित्यादिना। कल्पकसद्भावात्कल्पनागौरवं न दोषावहमिति शङ्कते—ननु व्यवस्थेति।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ष्टानि कल्प्यानि सुब्रह्मण्यपी'ति न्यायादिति चेत्, मैवम्; व्यवस्थायाः पारमार्थिकत्वे सत्य-विद्याकार्यत्वानुपपत्तेस्तत्कल्पनावैयर्थ्यात्। अपारमार्थिकत्वे पुनरेकयैव तस्याः सिद्धेर-विद्याभेदकल्पना व्यर्था। अन्यथैकस्याप्यनन्तभेदभानायानन्तविद्याः कल्प्याः स्युः। सन्तु को दोष इति चेत्, तर्हि ताभिरेव सर्वकल्पनासिद्धेरात्मान्तरस्य न ताः कल्प्याः। न च बाणामप्यज्ञतया भानात् ताः कल्प्या इति वाच्यम्; अद्वैतवादिनस्तद्भेदभानस्य प्रामाणिक-त्वाभावादप्रामाणिकस्य चैकाविद्याभिरेव सिद्धेर्नान्यस्याविद्याः कल्पनीयाः। किञ्च यथान्त-रेणैवार्थान्तरमविद्यान्तरं च स्वप्ने चराचरं जगत् त्वदविद्ययैव ते भाति, तथा जाग्रत्यपि किं न भायात्? अपि चोत्पन्नविद्यस्यात्मान्तरमोहस्तत्कार्याणि भान्ति? न वा? आद्ये निवृत्ताविद्यस्यापि भेदभाने न भूमलक्षणब्रह्मप्राप्तिः। द्वितीये तु शिष्याद्यभानात् गुरोरुप-देशादिक्रिया न भवेत्। किञ्चैकस्य मोहो मोहान्तराणां तत्कार्याणां च भानहेतुः? उत कल्पकः? नाद्यः; मोहस्य प्रकाशरूपत्वाभावात्। न द्वितीयः; त्वन्मोहकल्पितस्य संप्रतिपन्न-त्वन्मोहकल्पितवत्, अन्यमोहस्य त्वत्कार्यत्वानुपपत्तेः। न चान्यमोहकल्प्यत्वम्, क्लृप्तत्वात्। न च त्वत्कल्पितस्यान्यमोहस्यान्यमोहकल्पकत्वं, कल्पितत्वात्, रजतादिवत्। मोहान्त-रतत्कार्याणां च स्वात्मदृश्यत्वे सम्प्रतिपन्नवत् तन्मोहत्वं तत्कार्यत्वं च स्यात्। अन्यमोहत-त्कार्याणां चान्यदृश्यत्वस्यासम्प्रतिपन्नत्वात्, स्वमोहतत्कार्याणां च स्वदृश्यत्वस्योभयवादि-सिद्धत्वात्। न चेन्द्रजालादेर्बहुमोहकल्पितस्य बहुद्रष्टृकस्यैकस्य प्रसिद्धत्वात् दृष्टान्तसिद्धिः;

व्यवस्थायाः कालपनिकत्वेनैकजीवगताविद्याभिरेव कालपनिकव्यवस्थासिद्धौ नानेक-जीवकल्पनावश्यकमित्याह--मैवमिति। ननु नानाजीववादपक्षे सर्वजीवानामप्यज्ञतया भानादनेका अविद्याः कल्प्या इति चेन्न; अद्वैतवादिमते जीवभेदप्रतीतेरप्रामाणिकत्वादप्रामाणिकस्य जीवभेदस्य चैकाविद्याभिरेव सर्वकालपनिकव्यवहारसिद्धेर्नान्यजीवगताविद्याः कल्पनीयाः। किञ्चाज्ञोऽहमित्य-ज्ञानवत्तया व्यवहारमात्रादपि नाविद्याभेदसिद्धिः, स्वप्नवदर्थान्तरमविद्यान्तरमन्तरेणैव जागरणेऽपि भेदभानसम्भवादित्याह—किञ्चेति। किञ्चानेकजीवकल्पनायामपि बन्धमोक्षगुरुशिष्यशासनादि-व्यवस्थाया अनुपपत्तिः समानैवेत्याह—अपि चेति। किञ्च नानाजीवगतनानाविद्यापक्ष एकजीवस्य मोहो न मोहान्तराणां तत्कार्याणां च भानहेतुः, तस्याप्रकाशरूपत्वात्। नापि तेषां कल्पकः, उभय-वादिसम्मतत्वन्मोहकल्पितसर्पादिवत्त्वन्मोहकल्पितस्य जगतोऽन्यमोहत्वतत्कार्यत्वानुपपत्तेरित्याह—किञ्चैकस्येत्यादिना। न चैकजीवकल्पितवस्तुनि जीवान्यमोहकल्प्यत्व युक्तं, तस्य पूर्वमेव कल्पि-तत्वात्। किञ्चैकेन कल्पितं रजतादिकं न तदन्येन कल्प्यते, तथा त्वत्कल्पितस्यान्यमोहस्य नान्यमोह-कल्पकत्वमित्याह—न च त्वत्केति। किञ्चान्यमोहतत्कार्याणामन्यदृश्यत्वमसम्प्रतिपन्नं, किन्तु स्वमोह-तत्कार्याणां स्वदृश्यत्वं निर्विवादं तद्वन्मोहान्तरतत्कार्याणां यद्दृश्यत्वं तन्मोहत्वं तत्कार्यत्वं चाभ्युपेयम्। न चन्द्रजालिकप्रदर्शितवस्तुनो मोहकल्पितस्यापि बहुदृश्यत्ववदत्राप्यन्यमोहादेरन्य-दृश्यत्वं किं न स्यादिति वाच्यम्, तत्तन्मोहकल्पितस्य तत्तद्दृष्टस्य च मिथो भिन्नत्वात्। तत्र

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तत्तन्मोहकल्पितस्य तत्तद्दृष्टस्य च भिन्नत्वात्। तदेव मया दृष्टं मयादृष्टमिति संवादस्य चैकरूपभ्रमोत्पादात् तन्निमित्तहर्षशोकादिकार्याणामेकरूपत्वाच्चोपपत्तेः, एकदृष्टौत्पातिक-सवितृसुष्याऽऽदावन्येषां विसंवादादेकमोहकल्पितत्वस्य सिद्धेः, एकस्यैव प्रपञ्चस्य बहुमोह-कल्पितत्वे चैकस्य धिया तन्नाशे सर्वमुक्तिरनाशेऽप्येकस्याप्यमुक्तिः, न चैकमेव पुरुष-भेदेन नष्टमनष्टं चेति युक्तम्; विरोधात्। अविरोधे वा तमेव प्रति युगपदेकमेव नष्ट-मनष्टं च स्यात्। द्विचन्द्रादेश्च युगपन्नष्टानष्टत्वस्यासम्प्रतिपन्नत्वात्। भ्रान्तपुरुषभेदेन तस्यापि भेदात्। तस्मान्नाविद्याभेदो नापि तद्भेदाज्जीवभेदसिद्धिरिति स्थितम्।

अत्रोच्यते—यस्तावदेकैवाविद्येति पक्षे दोषः, सोऽनभ्युपगमादेव परास्तः। ब्रह्मण एवैकस्य तत्तदनाद्यनन्ताविद्यावच्छेदेनानन्तजीवनिर्भासास्पदत्वाभ्युपगमात्। सति च कल्पके कल्पनागौरवस्यादोषत्वात्, एकस्यापि च जीवस्यानेकाविद्यासद्भावाभ्युपगमात्। इष्ट-सिद्धिकारैरपि यावन्ति ज्ञानानि तावन्त्यज्ञानानीत्यनेकाविद्यास्वीकारात्। नन्वपारमार्थिकत्वे भेदभानस्यैकाविद्ययैव तत्सिद्धेरविद्यान्तरकल्पना व्यर्था। न व्यर्था; विद्वदविद्वद्गुरु-शिष्यबन्धमोक्षादिव्यवस्थासिद्धेरेव प्रयोजनत्वात्। एकाविद्यापक्षेऽपि स्वप्न इव व्यवस्था सिद्ध्यत्येवेति चेत्, तत्किं स्वप्नकल्पिकैवाविद्या जाग्रद्व्यवहारकल्पिका? उतान्या? आद्ये प्रबोधे स्वप्नकल्पकाविद्यानिवृत्तौ जाग्रद्व्यवहारोऽपि सर्वो निवर्तेतेति विनैव ब्रह्मविद्यां मुक्तिः स्यात्। अनिवृत्तौ वाऽविद्यायास्तत्त्वज्ञानान्निवृत्तौ दृष्टान्ताभावाद् ब्रह्मज्ञानादज्ञान-निवृत्तिर्न सिध्येत्। ननु तत्त्वावभासविरोधिनोरग्रहणमिथ्याज्ञानयोः शुक्त्यादितत्त्वज्ञाना-न्निवृत्तेर्दृष्टत्वाद्ब्रह्मतत्त्वावभासविरोधिनोऽज्ञानस्य ब्रह्मतत्त्वज्ञानान्निवृत्तिरवगन्तुं शक्यत इति चेत्; किमिदमनुमानम्? आहोस्विदर्थापत्तिः? अथवा दृष्टान्तदर्शनात्सम्भावनामात्रम्?

संवादनिमित्तमाह—तदेवेति। तन्निमित्तेति=भ्रमनिमित्तेत्यर्थः। उक्तप्रत्यभिज्ञाबाधे दृष्टान्तमाह—एकदृष्टौत्पातिकेति। अशुभसूचकं सूर्यगतकालिमेति तदर्थः। दोषान्तरमाह—एकस्यैवेति। बहुभिर्दृष्टे द्विचन्द्रादौ युगपन्नष्टानष्टत्वं न सम्प्रतिपन्नम्, तत्र भ्रान्तपुरुषभेदकारणमिति भावः। अनेकजीववादपक्षान्तर्गतदोषमुपसंहरति—तस्मादिति।

समाधातुं प्रतिजानीते—अत्रोच्यत इति। नानाजीववादपक्षे गौरवं परिहरति—सति चेति। एकजीववादपक्षेऽपि नानाविद्याऽभ्युपगतिमाह—एकस्यापीति। अत्रेष्टसिद्धिकारसम्मतिमाह—यावन्तीति। पूर्वपक्षयाशयमनूद्य दूषयति—नन्वित्यादिना। न च स्वप्नवदियं व्यवस्थैकाविद्या-पक्षेऽपि सम्पादयितुं शक्येति वाच्यम्, स्वप्नकल्पिकयाऽविद्ययैव जाग्रद्व्यवहारकल्पनास्वीकारे प्रबोधेन स्वप्नकल्पिकाऽविद्यानिवृत्तौ सत्यां सर्वोऽपि जाग्रद्व्यवहारो निवर्तेतेति ब्रह्मविद्यामन्तरेणैव मुक्तिः स्यात्। प्रबोधेन तादृगविद्याऽनिवृत्तौ तत्त्वज्ञानात्तन्निवृत्तौ दृष्टान्ताभावेन ब्रह्मज्ञानात्तद-ज्ञाननिवृत्तेराशा परित्यज्या स्यात्। मा भूद् जाग्रदवस्थायां तत्त्वबोधविरोधिबाधकोदये जाग्रद्व्यवहार-निवृत्तिस्तथापि तत्त्वज्ञानविरोधिनोरग्रहणमिथ्याग्रहणयोः शुक्त्यादितत्त्वज्ञानान्निवृत्तिदर्शनेन ब्रह्मतत्त्व-ज्ञानविरोधिनोऽज्ञानस्य ब्रह्मतत्त्वज्ञानान्निवृत्तिरभ्युपगन्तव्येति चेन्न; विमतमज्ञानं तत्त्वज्ञाननिवर्त्यं तत्त्वज्ञानविरोधित्वात्सम्प्रतिपन्नशुक्त्यज्ञानवदित्यनुमानस्वरूपाभ्युपगमे स्वप्नाज्ञानेऽनैकान्तिकत्वा-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आद्ये तेनैवाज्ञानेनानैकान्तता, प्रबोधेऽपि तस्य निवृत्त्यनभ्युपगमात् । न द्वितीयः; ज्ञाननिवर्त्यत्वमन्तरेणैव तत्त्वावभासविरोधित्वस्य स्वप्नाविद्यावदुपपत्तेः । न तृतीयः; स्वप्नाविद्यावद्वैपरीत्यस्यापि सम्भवात् । अथ श्रुतिप्रामाण्यात् ज्ञानादज्ञाननिवृत्त्यध्यवसायः, तर्हि 'भूयश्चान्ते विश्वमाया' इत्यादिश्रुतिप्रामाण्यादनेकान्यज्ञानानि तन्निवृत्तयश्च क्रमेणेति स्वीक्रियताम् । द्वितीये तु तत्राप्यनेकाविद्याकल्पनादोषस्तदवस्थः । कार्यभेददर्शनस्य तत्कल्पकस्य भावाददोष इति चेत्, तत्किं भेददर्शनं पारमार्थिकम्? उत न? आद्ये विरोधान्न कल्पनासिद्धिः । द्वितीये त्वेकयैव तत्सिद्धेर्व्यर्थानेकाविद्याकल्पनेति त्वदुक्ता दोषास्त्वामेवोपहन्युः । कल्पितत्वाविशेषेऽपि किंचिद्व्यावहारिकं यद्देहाद्यात्मभावादिनिवर्तकात्मसाक्षात्कारपर्यन्तमनुवर्तते, किंचित्प्रातिभासिकं यत्प्रमातृत्वादिव्यवहारे सत्येव निवर्तत इत्यवान्तरभेदसिद्धये अविद्याभेदः कल्पनीय इति चेत्, तर्हि—

अविद्या कल्प्यतेऽनेका जाग्रत्स्वप्नविभेदिनी ।
यथा तथैव कल्प्यन्तामनन्ताः सति कल्पके ॥६॥

ममापि मुक्तामुक्तादिरूपेण व्यावहारिकानन्तजीवानां शुकवामदेवपराशरप्रभृतीनां प्रतिभासनात्तदुपपत्तये तत्तद्धेतुभूतानेकाविद्याभ्युपगमेऽपि न दोषः । न चाद्वैतवादिनो मानतस्तेषामभानात्, भ्रान्तिसिद्धानां चैकयैवाविद्यया सिद्धेर्नानन्ताविद्याकल्पना युक्तेति वाच्यम्; विकल्पासहत्वात् । तत्किं तत्त्वावेदकमानस्यागम्यत्वम्? उत व्यावहारिकस्य? न प्रथमः; जाग्रत्स्वप्नव्यवहारभेदस्यापि तथात्वेन तत्राप्यविद्याभेदस्यासिद्धेः । न चरमः, जीवभेदानामनुमानादिव्यावहारिकमानसिद्धत्वस्येष्टत्वात् । एतेन स्वप्ननिदर्शनेनैकाविद्यैवालमिति प्रत्यवस्थानं परास्तम् । यश्चोत्पन्नविद्यस्याविद्यान्तरतत्कार्याणां भानाभानयोर्दोष

पत्तेः । तदेव विवृणोति—प्रबोधे इति । अर्थापत्तिरूपं द्वितीयकल्पं दूषयति— न द्वितीयः । ज्ञाननिवर्त्यत्वं विनैव तत्त्वज्ञानविरोधित्वं स्वप्नाज्ञाने उपपद्येत—स्वप्नाविद्यावत्=स्वप्नजागरकल्पकाविद्यावदित्यर्थः । तृतीयं सम्भावनाकल्पं परिहरति—न तृतीयः । स्वप्नाज्ञानवद् वैपरीत्ये दृष्टान्तसद्भावादित्यर्थः । अथ "तरति शोकमात्मविदि"ति श्रुतिबलात्तत्त्वज्ञाननिवर्तकमिति चेत्तर्हि "भूयश्चान्ते विश्वमाया निवृत्तिरि"त्यादिश्रुतिप्रामाण्यादनेकान्यज्ञानानि तन्निवृत्तयश्च क्रमेणेति स्वीक्रियन्ताम् । अत्र विश्वशब्देन मायाबाहुल्यं पुनःशब्दपर्यायभूयःशब्देन क्रमशो निवृत्तिश्च प्रतीयते । अथ स्वप्नकल्पिकाऽविद्यातो जाग्रत्कल्पिकाविद्या भिन्नेति द्वितीये तु पक्षे तत्राप्यनेकाविद्याकल्पनादोषस्य तावदवस्थ्यम् । कार्यभेददर्शनेन कल्पितस्य भेददर्शनस्य पारमार्थिकत्वे विरोधान्न कल्पनासिद्धिः । ननु अपारमार्थिकत्वे त्वेकस्यैवाविद्यया तत्सिद्धेरित्यादिकल्पना त्वदुक्ता दोषास्त्वामेवोपहन्युः । नन्वपारमार्थिकत्वे त्वेकस्यैवाविद्यया तत्सिद्धेरित्यादिकल्पना त्वदुक्ता दोषास्त्वामेवोपहन्युः । ननु स्वप्नजागरयोः कल्पितत्वाविशेषेऽपि तदवान्तरवैलक्षण्याद्विलक्षणाविद्यापरिकल्पितत्वमित्याशङ्क्य श्लोकेन साम्यमाह—अविद्येति । श्लोकस्य पूर्वार्द्धेनाशङ्क्योत्तरार्द्धेन समाधानमाह—तथैवेति । पुनरप्याक्षिप्य समादधाति—न चाद्वैतेत्यादिना । विकल्प्य दूषयति—न प्रथमः । तथात्वेन=तत्त्वावेदकप्रमाणाविषयत्वेनेत्यर्थः । न चरमः, इष्टापत्तेः । एतेन=व्यावहारिकप्रमाणगम्यत्वेन । दोषान्तरस्यापि साम्यमाह—यश्चोत्पन्नेति । त्वन्मतेऽपि विदुषां द्वैतभाने ब्रह्मज्ञानाभावप्रसङ्गात्, अभाने च

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

उद्भावितः, स परस्यापि तुल्यः, तन्मते विदुषां द्वैतभाने भूमलक्षणब्रह्मप्राप्त्यभावप्रसङ्गात्। अभाने च 'यावदधिकारमवस्थितिराधिकारिकाणाम्, भोगेन त्वितरे क्षपयित्वाथ सम्पद्यत' इति सूत्रविरोधात्, अविद्यालेशस्वीकारवैयर्थ्यप्रसङ्गाच्च। न चाविद्यान्तराणां तत्कार्याणां च तदविद्यात्वं तत्कल्पितत्वं चान्तरेणैव तस्य भानानुपपत्तिः; त्वदभ्युपगताविद्यान्तरतत्कार्ययोरपि पर्यनुयोगसाम्यात्स्वप्नाविद्यातत्कार्याणां जाग्रदविद्यात्वं तत्कार्यत्वं चान्तरेण भानाभ्युपगमात्।

यच्चाविद्यान्तरतत्कार्याणामन्यदृश्यत्वे सम्प्रतिपन्नवत्तदविद्यात्वं तत्कार्यत्वं च स्यादिति, तदपि जाग्रत्स्वप्नकल्पकाविद्याभेदेनैव व्याख्यातम्, एकपुरुषसम्बन्धित्वेऽपि परस्परं भेदात्। अस्माभिरप्यविद्यानामेव ब्रह्मसम्बन्धित्वाभ्युपगमाच्च। इन्द्रजालादिनिदर्शनं च पूर्वोक्तन्यायेन परास्तम्; परकल्पितस्य परं प्रत्यपरोक्षत्वाभावेऽपि परोक्षतावभाससम्भवस्योक्तत्वात्। एतेन सवितृसुषिरनिदर्शनमपि परास्तम्। तत्रापि तद्वचनात्परोक्षत्वोपपत्तेः। तथापि गुरुशिष्ययोः परस्परमपरोक्षत्वाभावे कथमुपदेशः क्रियत इति चेत्, मैवम्; भूतभौतिकप्रपञ्चस्य कृत्स्नस्येश्वरमायाविनिर्मितत्वेऽपि सर्वापरोक्षत्वोपपत्तेः। 'यतो वा इमानि भूतानी'ति, 'अहं कृत्स्नस्य जगतः प्रभवः, जन्माद्यस्य यत' इति श्रुतिस्मृतिसूत्रभाष्यादिभिरस्यार्थस्य प्रतिपादितत्वात्। अन्यथा शुक्तिरजतादिवज्जीवाविद्यामात्रनिर्मितत्वे जगतो जीवादिकर्तृकत्वनिरासप्रयासवैयर्थ्यात्। जीवाविद्याकल्पितत्वे चेश्वरस्य जीवानामीश्वरो नियन्तेत्यादिश्रुतिस्मृतीनामप्रामाण्यप्रसङ्गात्। एकस्य प्रपञ्चस्य बहुमोहकल्पितत्वानङ्गीकारादेव तत्रोक्तदोषाणां दूरपरास्तत्वात्। स्वीयस्वीयविद्यया च स्वस्वाविद्यानिर्मितकर्तृत्वभोक्तृत्वादेर्बन्धस्य सकारणस्य निरासेन नित्यशुद्धबुद्धमुक्तस्वभावाख्यब्रह्मप्राप्तिलक्षणमुक्तेरप्युपपत्तेः। ननु स्वस्वाविद्येति कथं जीवनिष्ठत्वेनाविद्या व्यपदिश्यते?

जीवन्मुक्त्यभावप्रसङ्गाच्च। न चान्यपुरुषीयाविद्यातत्कार्याणां तत्पुरुषीयत्वं तत्कल्पितत्वं विनैव तस्य भानानुपपत्तिरिति वाच्यम्, त्वन्मोहादीनामप्यन्यमोहादित्वस्यैव साधयितुं शक्यत्वात्, पर्यनुयोगस्य साम्याच्चेत्याह—स्वप्नेति। शक्यते हि वक्तुम्, जागरेऽपि स्वप्नत्वं दृश्यत्वात् स्वप्नवदिति भावः।

अन्यदृश्यत्वे पूर्वोक्तं बाधकमनूद्य दूषयति—यच्चेति। अतिदेशमेव विवृणुते—एकपुरुषेति। अनन्ताविद्यातत्कार्याणामेकब्रह्मसम्बन्धित्वमस्माभिरभ्युपेयते। इन्द्रजालादौ परोक्षावभासत्वमेवाभ्युपगन्तव्यम्। इन्द्रजालादेः परोक्षभानस्वीकारेण सवितृसुषिरादिदृष्टान्तोऽपि परास्त इत्याह—एतेनेति। तथापि गुरुशिष्यादिसम्बन्धतदुपदेशव्यवस्थामाह—भूतभौतिकेत्यादिना। तत्र प्रमाणमाह—यतो वेत्यादि। अन्यथा जीवादिकर्तृकत्वनिरासप्रयासवैयर्थ्यप्रसङ्गात्। दोषान्तरमाह—जीवाविद्येति। बहुमोहकल्पितत्वपक्षोक्तदोषोऽनङ्गीकारपराहत इत्याह—एकस्येति। प्रपञ्चस्य जीवाश्रिताविद्याकार्यत्वानभ्युपगमेऽपि जीवगततत्त्वज्ञानान्मोक्षव्यवस्थां दर्शयति—स्वीयस्वीयेति। असाधारणप्रपञ्चनिवृत्त्यैव मोक्षः, साधारणप्रपञ्चस्य विद्यमानत्वेऽपि न मुक्तौ तद्भानत्वं, प्रविलीनसर्वकरणत्वाद्दग्धस्य रूपप्रतीतिवदित्यर्थः। स्वस्वाविद्येति निर्देशमाक्षिप्य समाधत्ते—ननु स्वस्वेत्यादिना। चिन्मात्र-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ब्रह्माश्रयत्वादविद्यानामिति चेत्, सत्यम्, ब्रह्मसम्बन्धित्वेऽपि तासामवच्छिन्नजीवरूपपक्षपातितया प्रतिभानात् । दृष्टं हि लोके—मुखमात्रसम्बन्धिनोऽपि दर्पणस्य प्रतिबिम्बपक्षपातित्वम्, दृश्यते च घटस्याकाशमात्रसम्बन्धिनोऽप्यवच्छिन्नाकाशपक्षपातित्वम्, तस्मान्न किञ्चिदवद्यमिति ।

अपिच— सूत्रभाष्यादिवाक्यानां श्रुतिस्मृतिगिरामपि ।
मुख्यार्थत्वोपपत्त्यर्थं व्यवस्थैवाभ्युपेयताम् ॥७॥

एवं च सति 'नेतरोऽनुपपत्तेः', 'अनुपपत्तेस्तु न शारीरः', 'कर्मकर्तृव्यपदेशाच्च', 'परात्तु तच्छ्रुतेः,' 'कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः', 'यावदधिकारमवस्थितिः' 'पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ', 'प्रकाशादिवन्नैव परः', 'असन्ततेश्चाव्यतिकरः' इत्येवमादीनि सूत्राणि तद्व्याख्यानपराणि भाष्याणि च सामञ्जस्येनोपपन्नार्थानि भवन्ति । 'तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्तथा ऋषीणां तथा मनुष्याणां तद्धैतत्पश्यन् ऋषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्च," तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान् सनत्कुमारः; 'अभयं वै जनक प्राप्तोऽसि', 'एतावदरे खल्वमृतत्वमिति होक्त्वा याज्ञवल्क्यः प्रवव्राज,' 'तद्धास्य विजज्ञौ' 'एकशतं ह वै वर्षाणि मघवान् प्रजापतौ ब्रह्मचर्यमुवास' 'भृगुर्वै वारुणिः वरुणं पितरमुपससार,' 'स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राह' इत्येवमादिश्रुतिस्मृतीतिहासपुराणवाक्यानि च मुख्यार्थे प्रामाण्यमश्नुवीरन् । तस्मादेकमपि ब्रह्मानेकोपाधिभिरवच्छिन्नं लब्धनानाजीवभावं तत्र बद्धमिव, यत्र विद्यया अविद्योपाधिनिवृत्तिस्तत्र मुक्तमिव भवतीति नानाजीववादेऽपि बन्धमुक्तिव्यवस्थोपपद्यत इति केचिदाचार्याः प्रतिपेदिरे ।

का पुनरविद्यानिवृत्तिः । न तावत्सती, आत्मव्यतिरिक्तत्वे तस्याः सद्द्वैततापत्तेः ।

ब्रह्मसम्बन्धित्वेऽप्यविद्याया जीवपक्षपातित्वे बिम्बप्रतिबिम्बवादमनुसृत्य दृष्टान्तं दर्शयति—दृष्टं हि लोक इति । अवच्छेदवादेऽपि निदर्शनमाह—दृश्यते चेति ।

जीवभिन्नमीश्वरं तदेकत्वं तदधीनतां च जीवानां सूत्रभाष्यश्रुतिभिः क्रमेण साधयितुं प्रतिजानीते—अपिचेति । श्लोकं विशदयति—एवं चेति । इतरो=जीवः । जीवे शाण्डिल्यविद्याप्रतिपाद्यत्वं कर्तृकर्मेत्यादिसूत्रैस्तद्भाष्येण च प्रतिषेधति । बद्धमुक्तव्यवस्थायामपि श्रौतलिङ्गमाह—तद्यो य इति । अत्रोदाहृतश्रुत्यादिवाक्यानां मुख्यार्थे प्रामाण्यं साधयति—इत्येवमादीति । अनेकजीववादप्रसङ्गमुपसंहरति—तस्मादिति । द्वाभ्यामिवाभ्यां बन्धमोक्षयोरेकानेकजीववादिपक्षेऽपि निरुपितत्वमुच्यते । केचिदाचार्याः—सुरेश्वरपद्मपादवाचस्पतिमिश्रमतावलम्बिनः ।

अधुनाऽविद्यानिवृत्तिरूपं मोक्षमाक्षेपसमाधिभ्यां निरूपयति—का पुनरित्यादिना । बहुधा विकल्पं मनसि निधायाद्यं सतीपक्षं दूषयति—न तावत्सतीति । तत्रात्मभिन्नत्वपक्षं प्रदूष्याभिन्नत्वपक्षेऽपि

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अव्यतिरिक्तत्वे चात्ममात्रत्वे सदानिवृत्तेः संसारानुपलब्धिप्रसङ्गात् । तन्मात्रत्वे चात्मनस्तस्या ज्ञानजन्यतया पूर्वमभावात्, अज्ञानस्य स्वातन्त्र्यप्रसङ्गात् । नाप्यसति, तुच्छत्वे शशविषाणादिवत् ज्ञानाधीनत्वासम्भवात् । अभावत्वे च तस्य निर्वाच्यत्वे द्वैतापातात्, अनिर्वाच्यत्वे च तत्कारणाविद्यावस्थनादनिर्मोक्षप्रसङ्गात् । भावस्याभावो निवृत्तिरभावस्य च भावः भावाभावविलक्षणस्याज्ञानस्य कथमभावो निवृत्तिः स्यात् ? नाप्यनिर्वचनीया, अविद्यातत्कार्ययोरन्यतरत्वापातात् । न चाविद्यातत्कार्ययोरन्यतरत्वे निवृत्तिमत्त्वमुपाधिः; अनिर्वचनीयत्वेन निवृत्तिमत्त्वस्यापि साधनात् । न च निवृत्तेर्निवृत्तिमत्त्वेऽनवस्था; निवृत्तिमत्प्रध्वंसपक्षे प्रध्वंसमालावदुपपत्तेः । प्रध्वंसप्रध्वंस इव प्रतियोगिनो बन्धस्यानुन्मज्जनादेवापुनरावृत्तिश्रुतेरप्यव्याकोपात् । तस्मादनिर्वचनीयत्वे अविद्यातत्कार्ययोरन्यतरत्वं प्रसज्यत एव । नापि पञ्चमप्रकारा, सदसद्विलक्षणतया तस्या अप्यनिर्वचनीयत्वप्रसङ्गात्; सदसद्विलक्षणमनिर्वचनीयमिति लक्षणाङ्गीकारात् । ननु नेदं लक्षणं किंतु ज्ञाननिवर्त्यमनिर्वचनीयम्, न चाज्ञाननिवृत्तिर्ज्ञाननिवर्त्या, ज्ञानजन्यत्वात् । ज्ञानानिवर्त्यापि च सा बाधगोचराऽतो न प्रपञ्चमिथ्यात्वसाधनं सव्यभिचारम् 'नेह नानास्ति किञ्चने'ति प्रतिपन्नौपाधौ निषेधात्मबाधोऽज्ञाननिवृत्तेरपि तुल्य इति चेत्, मैवम्; अज्ञाननिवृत्तेर्ब्रह्मज्ञानरूपतया तज्जन्यत्वाभावात्, 'ज्ञातोऽर्थस्तज्ज्ञप्तिर्वाऽज्ञानहानि' रितीष्टसिद्धिकारैरभिधानात्, 'विद्यैव वाऽद्वया शान्ता तदस्तमय उच्यते' इति ब्रह्मसिद्धिकारैरप्युक्तत्वात्, ज्ञानजन्यसंस्कारे च ज्ञाननिवर्त्ये व्यभिचारात् । ननु तत्र ज्ञानान्तरेण ज्ञानान्तरजन्यसंस्कारो निवर्तते न तु तेनैवेति वैषम्यमिति चेत्, मैवम्; ईश्वरज्ञानजन्यस्य जगतस्तज्ज्ञानेनैव निवर्त्यत्वाङ्गीकारात्, 'उत्पाद्य घटं नाशयिष्यामि

दोषमाह—आत्ममात्रत्व इति । आत्मनोऽविद्यानिवृत्तिरूपत्वेऽपि दोषमाह—तन्मात्रत्व इति । तस्याः= अविद्यानिवृत्तेः । असतीपक्षं प्रतिषेधति—नापीति । अविद्यानिवृत्तिस्सदसद्रूपिणीति तृतीयपक्षं दूषयति—भावस्येति । अनिर्वचनीयपक्षं परिहरति—नाप्यनिर्वचनीयेति । आनन्दबोधाचार्योक्तपक्षं दूषयति—न चाविद्यातत्कार्ययोरिति । पञ्चमप्रकाररूपामविद्यानिवृत्तिं दूषयति—नापि पञ्चमेति । तस्याः=अविद्यानिवृत्तेरित्यर्थः । तत्राप्यनिर्वचनीयत्वलक्षणं संगच्छत इत्याह—सदसद्विलक्षणमिति । न्यायरत्नावलीकारोक्तं पक्ष दूषयितुमुद्भावति—ननु नेदमिति । ज्ञानजन्यत्वेनाज्ञाननिवृत्तिर्न ज्ञाननिवर्त्येत्याक्षिप्य प्रतिक्षिपति—ज्ञानानिवर्त्याऽपीति । सा= अज्ञाननिवृत्तिः । ज्ञानानिवर्त्यत्यनेन ज्ञाननिवर्त्यत्वज्ञानबाध्यत्वयोर्भेदं मत्वा सव्यभिचारं वारयतीति भावः; ज्ञानबाध्यत्वे श्रुतिप्रमाणमाह—नेहेति । पूर्वपक्षी दूषयति—मैवमिति । विरोध्युदयो हि विरोधिनिवृत्तिर्नान्येति भावः । सा च ब्रह्मज्ञानस्वरूपा । तत्रष्टसिद्धिकारसम्मतिमाह—ज्ञातोऽर्थ इति । मण्डनमिश्रसम्मतिमप्याह—विद्यैव वेति । "अविद्याऽस्तमयो मोक्षः । सा संसार उदाहृता" इति पूर्वार्द्धः । तदस्तमयः=अविद्याऽस्तमयः । शान्ताऽद्वयस्वरूपा विद्यंवाऽविद्यानिवृत्तिरित्यर्थः । किञ्च यज्ज्ञानजन्यं न तज्ज्ञाननिवर्त्यमिति व्याप्तिस्वीकारे व्यभिचारमाह—ज्ञानजन्यसंस्कार इति । व्यक्तिपक्षेऽपि वैषम्यं परिहरति—ईश्वरज्ञानजन्यस्येति । अनीश्वरज्ञानवृत्तिव्याप्तावपि व्यभिचारमाह—उत्पाद्य घटमिति । दृश्यत्वहेतौ व्यभिचारवारकं

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

च्छेदः

व्यभिसंधानस्थले कुलालज्ञानजन्यघटस्य तेनैव ज्ञानेन निवर्त्यत्वदर्शनाच्च। आज्ञाननि-
तेश्च ज्ञानानिवर्त्यत्वे प्रपञ्चमिथ्यात्वसाधनस्य तत्र व्यभिचारात्। ज्ञानानिवर्त्यत्वेऽपि
बाध्यत्वात् न व्यभिार इति चेत्, न; ज्ञाननिवर्त्यत्वमन्तरेण बाध्यत्वस्यानिरूपणात्।
सविलासाज्ञाननिवृत्तिर्बाध इत्यङ्गीकरणात्। नाप्यात्मैवाज्ञाननिवृत्तिः; आत्मनः सदातन-
त्वेनाज्ञाननिवृत्तेरपि तथात्वे संसाराभावप्रसङ्गात्, आत्मनस्तत्त्वज्ञानसाध्यत्वप्रसङ्गाच्च।
ज्ञात आत्मा अज्ञाननिवृत्तिर्न स्वरूपेणैवेति चेत्, न; ज्ञानस्य विशेषणत्वे नित्यत्वे च मोक्ष-
दशायामपि अन्तःकरणादेरवस्थानप्रसङ्गात्। अनित्यत्वे चाज्ञाननिवृत्तिरूपाया मुक्तेरप्य-
नित्यत्वापातात्। न च ज्ञानोपलक्षित एवात्माज्ञाननिवृत्तिः; उपलक्षितत्वस्य नित्यत्वा-
नित्यत्वयोः प्राचीनदोषानुषङ्गात्। तस्मान्नाज्ञाननिवृत्तिरुपपन्नेति।

अत्रोच्यते—

> निवृत्तिरात्मा मोहस्य ज्ञातत्वेनोपलक्षितः।
> उपलक्षणनाशेऽपि स्यान्मुक्तः पाचकादिवत्॥८॥

यथा लोके सकारणस्य कलधौतविभ्रमस्य ज्ञाता शुक्तिरेव निवृत्तिः। न च तत्रापि नेदं
रजतमित्यन्योन्याभावज्ञानं तन्निवर्तकमिति युक्तम्। अपरिज्ञाते शुक्तिशकले धर्मिप्रतियोगि-
सव्यपेक्षस्य तस्यैवासम्भवात्। परिज्ञाते तु तेनैव तदुपपत्तावितरस्य कृतकरस्य वैयर्थ्यात्।
इदमाकारपरिज्ञानस्य च भ्रान्तौ विद्यमानस्य तदविरोधात्। तथेहाप्यनृतजडदुःखानात्म-
प्रतिविरोधिसत्यज्ञानानन्दानन्ताद्वयलक्षणं ब्रह्मैव वेदान्तवाक्यजनितब्रह्मैकाकारान्तः-
करणपरिणामदर्पणप्रतिबिम्बितं सविलासाज्ञाननिवृत्तिरिति युक्तमभ्युपगन्तुम्।
न च ज्ञाततालक्षणोपलक्षणनाशे तेन घटितस्य मुक्तस्याभावप्रसङ्गः, पाचकादिवदवस्था-
नोपपत्तेः, न हि लोके पचनलवनादिक्रियायामतिवृत्तायां देवदत्तः पाचको लावको न भवति,

---

ज्ञाननिवर्त्यत्वज्ञानबाध्यत्वयोर्भेदं प्रतिषेधति—अज्ञाननिवृत्तेश्चेत्यादिना। अपसिद्धान्तमप्याह—
सविलासेति। अविद्यानिवृत्तिरात्ममात्रमिति षष्ठं पक्षं दूषयति—नाप्यात्मैवेति। तथासति संसारा-
भावप्रसङ्गोऽपसिद्धान्तापत्तिश्चेति। न च ज्ञातः सन्नात्माऽज्ञाननिवृत्तिर्न स्वरूपेणैवेति वाच्यम्;
ज्ञानस्य विशेषणत्वे तत्र नित्यत्वस्वीकारे मुक्तावपि तदुपादानान्तःकरणादेरवस्थानप्रसङ्गात्,
अनित्यत्वे चाज्ञाननिवृत्तिरूपामुक्तावप्यनित्यत्वप्रसङ्गाच्च। ज्ञानस्योपलक्षणत्वेऽपि दोषमाह—
उपलक्षितत्वस्येति। पूर्वपक्षमुपसंहरति—तस्मादिति।

चरमपक्षमुपादातुं प्रतिजानीते—अत्रोच्यते इति। तं श्लोकेनोपपादयति—निवृत्तिरित्यादिना।
ज्ञातत्वेनोपलक्षित आत्मा मोहस्य निवृत्तिः। उपलक्षणनाशेऽपि पाचकादिवन्मुक्तः पुरुषस्तिष्ठतीति
श्लोकयोजना। श्लोकं विशदयति—यथालोक इति। कलधौतं=रजतम्। न च तत्रापि नेदं
रजतमिति भेदज्ञानं रजतभ्रमनिवर्तकमिति वाच्यम्; अज्ञाते शुक्तिखण्डे धर्मिप्रतियोगिसापेक्षस्य
भेदज्ञानस्यैवासम्भवात्, परिज्ञाते निषेधज्ञानस्य वैयर्थ्यात्। इदमाकारस्याधिष्ठानसामान्यज्ञानस्य
भ्रमदशायामपि विद्यमानस्य भ्रमाविरोधात्। प्रकृतेऽपि न्यायमिमं योजयति—तथेहापीति।
अनन्तेति=देशकालवस्तुकृतपरिच्छेदरहितेत्यर्थः। उत्तरार्द्धं विशदयति—न च ज्ञातेति। निरुक्तरीत्या

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

न वा तथा व्यवह्रियते। एतेनाज्ञाननिवृत्तेरनित्यत्वे पुनरज्ञानस्य संसारस्य चोन्मज्जनापत्तिरित्यादयो दोषाः प्रत्युदस्ताः; शुक्तिशकलादौ ज्ञाननाशेन ज्ञातत्वोपलक्षणनाशेऽपि निवृत्तस्याज्ञानस्य तद्विलासस्य वा पुनरुन्मज्जनादर्शनात्। पुनरुद्भवतो रजतादिविभ्रमस्याज्ञानान्तराधीनत्वात्, यावन्ति ज्ञानानि तावन्ति तन्निवर्त्यान्यज्ञानानीत्यभ्युपगमात्। इह च 'भूयश्चान्ते विश्वमायानिवृत्ति' रिति श्रुतेरशेषाज्ञाननिरासात् पुनः संसारशङ्कासङ्कानवकाशात्। तस्मात्—

त्रिगीताज्ञानहानिः स्यात् ज्ञाताधिष्ठानमात्रकम्।
तत्त्वाद्यदित्थं तत्ताहग्यथा शुक्त्यादिकं मितम् ॥६॥

एवं सति 'यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः, यत्र त्वस्य सर्वमात्मैवाभू' दित्याद्याः श्रुतयः सर्वस्य द्वैतजातस्यात्ममात्रतया प्रविलयमुपपादयन्त्यो मुख्यार्थतामश्नुवीरन्। इतरथाऽनिर्वचनीयस्य पञ्चमप्रकारस्य वा अज्ञाननिवृत्तिरूपस्याङ्गीकारे संसारदशायामिव केवलात्ममात्ररूपेणावस्थानासम्भवादुदाहृताः श्रुतय उपचरितार्थाः कदर्थिताः स्युः। तस्मादुत्पन्नात्मविज्ञानस्य ज्ञात आत्मैव सविलासाज्ञाननिवृत्तिरिति स्थितम्। ननु ज्ञात आत्मैव चेत्सविलासाज्ञाननिवृत्तिस्तदोत्पन्नविज्ञानस्य शरीरादिप्रतिभासानुवृत्तिर्न स्यात्। न चाविद्यालेशात् तदनुवृत्तिः, निवर्तकतत्त्वज्ञानोदये तल्लेशस्यापि निवृत्तेः। प्रारब्धकर्मणा प्रतिबद्धं तत्त्वज्ञानं शरीरादिप्रतिभासहेतुमविद्यालेशं न निवर्तयतीति चेत्, मैवम्; कर्मणोऽप्यविद्याकार्यतया तन्निवृत्तौ तन्निवृत्तेः, अनिवृत्तौ च कर्मणस्तत्कार्यस्य च शरीरादेः सत्यत्वप्रसङ्गात्। 'क्षीयन्ते चास्य कर्माणी' त्यविशेषेणाशे-

---

दोषपरिहारमन्यत्रातिदिशति—एतेनेति। इममेव परिहारं विशदयति—शुक्तीति। ज्ञातत्वविशिष्टपक्षपरित्यागेनैव तत्प्रयुक्तदोषप्रशान्तेर्न पुनस्तद्दोषोत्थानसम्भव इति भावः। न च पुनस्तत्र विभ्रमदर्शनेन तदुपादानाज्ञानोन्मज्जनापत्तिरभ्युपेयेति वाच्यम्; तत्र पुना रजतादिविभ्रमस्याज्ञानान्तराधीनत्वाभ्युपगमात्। तथैव स्वाशयमाह—यावन्तीति। न पुनस्तत्र संसारप्रसक्तिराशङ्कनीयेत्यत्र श्रुतिप्रमाणमाह—इह चेति। आतङ्कः=भयम्। अत्र श्लोकेनानुमानप्रयोगमाह—विगीतेति। लौकिकविभ्रमनिवृत्यार्थान्तरता स्यात्तद्वारणाय विगीतपदम्। तत्त्वात्=अज्ञानहानित्वात्। शुक्त्यादिकम=यथा शुक्त्यादिमात्राज्ञाननिवृत्तिरित्यर्थः। अनुमानानुग्राह्यभागमप्याह—एवं सतीति। विजानतः=ब्रह्मात्मैक्यविदः। यत्र=यस्मिन् काले यस्मिन्नात्मनि वेत्यर्थः। अज्ञाननिवृत्तेरात्ममात्रत्वानभ्युपगमे पूर्वोक्ताः श्रुतयः उपचरितार्थाः सन्तः कदर्थिताः=पीडिताः स्युरित्यर्थः। वादार्थमुपसंहरति—तस्मादिति।

इत्थमविद्यानिवृत्तिरूपं मोक्षमुपपाद्य तदवान्तरविशेषां जीवन्मुक्तिमुपपादयति—नन्वित्यादिना। तदोत्पन्नविज्ञानस्य=तदा दृढापरोक्षात्मतत्त्वविदः। अविद्यानिर्वतकतत्त्वज्ञानोदयेऽविद्यालेशस्थित्यसम्भवमाह—न चाविद्येति। कर्मणोप्यविद्याकार्यतयाऽविद्यानिवृत्तौ कर्मनिवृत्तेरवश्यम्भावित्वान्न प्रारब्धकर्मणा प्रतिबद्धं तत्त्वज्ञानं शरीरादिप्रतिभासहेत्वविद्यालेशानिवर्तकमिति वक्तुं युक्तं, कर्मानिवृत्तौ कर्मतत्कार्यशरीरादेश्च सत्यत्वभानप्रसङ्गात्। अशेषकर्मविनाशे श्रुतिप्रमाणमाह—"क्षीयन्ते" इत्यादिना। "तस्य तावदेव चिरमि"ति श्रुतिस्तु परोक्षज्ञानविषयेति। "उपदेक्ष्यन्ति

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्कर्मणां ज्ञानात् प्रक्षयश्रवणाच्च । न च 'तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्य' इति विदुषो देहपातावधिश्रवणात्, प्रारब्धकर्मव्यतिरिक्तकर्मविषयैषा श्रुतिरिति वाच्यम्; तस्याः परोक्षज्ञानिविषयत्वात् । ननु 'उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः' इत्यपरोक्षज्ञानिन एवोपदेष्टृत्वं दर्शयन्नीश्वरस्तत्त्वदर्शिनामपि शरीरादेस्तद्धेतूनां च कर्मणामवस्थानं सूचयतीति चेत्, मैवम्; ज्ञानिन इति परोक्षनिश्चयवतस्तत्त्वदर्शिन इति च तत्त्वदर्शनाभ्यासशीलस्य तत्र प्रतिपादितत्वात् । न चापरोक्षे परोक्षज्ञानविभ्रमः; स्वात्मनि स्वसुखादौ च परकीयानुमानादिज्ञानस्याविभ्रमत्वात् ।

कश्चायमविद्यालेशः, किमविद्याया एकदेशः? किंवा तदाकारान्तरम् । नाद्यः, अविद्यायाः घटादिवत्सावयवत्वानङ्गीकारात् । नापि द्वितीयः; स्वाकारिनिवृत्तौ तदाकारावस्थानानुपपत्तेः । अस्तु तर्हि संस्कारादेव द्वैतप्रतिभासानुवृत्तिः, विनिवृत्तसर्पविभ्रमस्यापि संस्काराद्भयकम्पाद्यनुवृत्तिदर्शनात्, 'तिष्ठति संस्कारवशाच्चक्रभ्रमवद्धृतशरीर'इति च तन्त्रान्तरेऽप्यभिधानादिति चेत्, मैवम्; तस्याप्यविद्याकार्यत्वात्तन्निवृत्तौ तन्निवृत्तेः । अतथात्वे वा सत्त्वे द्वैतसत्यत्वापत्तेः; मिथ्यात्वे च भावरूपकार्यस्योपादानमन्तरेणानुपपत्तेः, निराश्रयत्वानुपपत्तेश्च । न चात्मैवाश्रयः, निरविद्यासंगस्य स्वतः कार्याश्रयत्वानुपपत्तेः । न च स्थितप्रज्ञगुणातीतलक्षणानां जीवन्मुक्तविषयत्वम्, साधकस्यैवावस्थाविशेषं प्राप्तस्य तत्राभिधानात् अतो न जीवन्मुक्तिर्युक्तिमतीति । अत्र वदामः—

अविद्यालेशशब्देन मोहाकारान्तरोक्तितः । ज्ञानस्य प्रतिबन्धाच्च प्रबलारब्धकर्मभिः ।१०।
लेशानुवृत्तौ तज्जन्यकर्मादेरनुवृत्तितः । उत्पन्नात्मावबोधस्य जीवन्मुक्तिः प्रसिध्यति ।११।

एवं हि न्यायसुधायामाराध्यपादैरुपपादितम्, संसारमूलकारणभूताविद्या यद्यप्येकैव,

---

ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिन" इति भगवद्गीतावाक्यस्यापि परोक्षनिश्चयवतस्तत्त्वदर्शिन इति तत्त्वदर्शनाभ्यासशीलस्योपदेष्टृत्वप्रतिपादनसम्भवात् । न चापरोक्षे वस्तुनि परोक्षाज्ञानस्य विभ्रमत्वं वक्तुं युक्तं; स्वात्मनि स्वसुखादौ च परकीयानुमित्यादिज्ञानस्याविभ्रमत्वदर्शनात् ।

अविद्यालेशस्थितिं निरस्याधुनाऽविद्यालेशं दुर्निरूपयितुमाह—कश्चायमिति । अनङ्गीकारात्=अद्रव्यत्वादनादित्वेनावयवानारब्धत्वाच्च सावयवानङ्गीकारादित्यर्थः । मण्डनमिश्रमतं दूषयितुमुद्भावयति—अस्तु तर्हीति । तत्र दृष्टान्तमाह—विनिवृत्तेति । सांख्यसम्मतिमप्याह—तिष्ठतीति । तदेव दूषयति—मैवमिति । अतथात्वे=अविद्याकार्यत्वानभ्युपगमे । संस्कारस्य सत्यत्वे द्वैतसत्यत्वापत्तिः, मिथ्यात्वेऽभावविलक्षणभावरूपकार्यस्य निरुपादानत्वानुपपत्तिः, निराश्रयत्वानुपपत्तिश्च । न चात्मैवाश्रयः; निरविद्यस्यासङ्गस्यात्मनः स्वतः कार्याश्रयत्वानुपपत्तेः । स्थितप्रज्ञगुणातीतलक्षणानि साधकस्यैवावस्थाविशेषं गतस्याभिधानपराण्यतो न जीवन्मुक्तिर्युक्तिसहेति ।

समाधातुं प्रतिजानीते—अत्रेति । सुखेनावबोधयितुं सिद्धान्ताशयं श्लोकाभ्यां सङ्कलयति—अविद्येति । पूर्वार्द्धेनाविद्यालेशं निरूप्योत्तरार्द्धेन तत्स्थितिं निरूपयति. उत्तरश्लोकेन फलितार्थमाह—लेशानुवृत्ताविति । अपसिद्धान्तशङ्कावारणायाह—एवं हीति । आराध्यपादैः=स्वगुरुभिर्ज्ञानसिद्धिकारैः । पादशब्दः पूजार्थस्तत्प्रणीतो न्यायसुधावेदान्तप्रकरणग्रन्थः । तत्रोपपादितोऽविद्या-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तथापि तस्याः सन्त्येव बहवः आकारास्तत्रैकः प्रपञ्चस्य परमार्थसत्त्वभ्रमहेतुः, द्वितीयोऽर्थक्रियासमर्थवस्तुकल्पकः, तृतीयस्त्वपरोक्षप्रतिभासविषयाकारकल्पकः । तत्राद्वैतसत्यत्वाध्यवसायेन समस्तद्वैतसत्यत्वकल्पकाकारो निवर्तते । अर्थक्रियासमर्थप्रपञ्चोपादानमायाकारस्तत्त्वसाक्षात्कारेण विलीयते । अपरोक्षप्रतिभासयोग्यार्थाभासजनकस्तु मायालेशो जीवन्मुक्तस्यानिवृत्तः समाध्यवस्थायां तिरोहितोऽन्यदा देहाभासजगदाभासहेतुतयानुवर्तते। प्रारब्धकर्मफलोपभोगावसाने तु निवर्तते । श्रुतिरपि 'इन्द्रो मायाभिः पुरुरूप ईयत' इत्याद्या मायां विविधाकारां दर्शयति । न च लेशस्यापि विरोधितत्त्वज्ञानोदयान्निवृत्तिः किं न स्यादिति वाच्यम्; प्रबलैः प्रारब्धकर्मभिर्ज्ञानस्य प्रतिबद्धत्वात् । तथाहि—विद्यार्थानि कर्माणि कर्मान्तरारब्धशरीरे फलं जनयन्ति । अन्यथा ज्ञानार्थानामपि कर्मणां भोगार्थत्वप्रसङ्गात् । तथा च शरीरारम्भककर्माण्युपजीव्य ज्ञानार्थानि कर्माणि तदविरोधेन स्वफलं प्रयच्छन्तीति युक्तम् । तथा च तैः प्रतिबद्धशक्तित्वात्तत्त्वज्ञानमविद्यालेशं न निवर्तयति । न च कर्मणामप्यविद्याकार्यतया तन्निवृत्तौ निवृत्तिः, तज्जनकाविद्यालेशस्यानिवृत्तेः नन्वेवं सतीतरेतराश्रयत्वम्—तत्त्वज्ञानशक्तिप्रतिबन्धककर्मणामवस्थानादविद्यालेशानुवृत्तिः, तदनुवृत्तौ च कर्मणामनुवृत्तिरिति, मैवम्; 'भूयश्चान्ते विश्वमायानिवृत्ति'रित्यत्र भूयो निवृत्तिरिति विशेषणादुभयविधमायाकारनिवृत्तेराकारान्तरानुवृत्तेश्च मानान्तरेणाधिगमात्, प्रतीतावितरेतराश्रयत्वाभावात् । 'अन्ते विश्वमायानिवृत्तिः' इति च श्रवणात्, प्रारब्धफलकर्मलक्षणस्य विद्याशक्तिप्रतिबन्धकस्य फलोपभोगेन निवृत्तौ प्रतिबन्धाभावे तत्त्वज्ञानान्निःशेषाविद्यानिवृत्तिरिति प्रतीतेश्च । अत एव 'क्षीयन्ते चास्ये'ति सामान्यश्रुतेः प्रारब्धकर्मव्यतिरिक्तकर्मनिवृत्तिपरत्वोपपत्तिः, 'तस्य तावदेव चिर'मिति विदुषः प्रारब्धकर्मतत्कार्ययोरवस्थानाधिगमाच्च, 'तद्धास्य

यास्त्रिविधो भेद इत्याह—तत्रैक इत्यादिना । अपरोक्षेति । अर्थक्रियारहितस्यापि प्रपञ्चस्य शुक्तिरजतादिवदपरोक्षप्रतिभासविषयाकारसमर्थकस्तृतीयः । क्रमेणैतेषां निवर्तकज्ञानस्वरूपाणि दर्शयति—तत्राद्वैतेत्यादि । निरुक्तार्थे श्रुतिप्रमाणमाह—श्रुतिरपीति । इन्द्रः परमात्मा । आदिशब्देन "भूयश्चान्ते" इत्याद्या ग्राह्याः । उत्तरार्द्धं व्याचष्टे—न च लेशस्यापीति । ज्ञानस्य प्रबलप्रारब्धकर्मप्रतिबद्धत्वमुपपादयति—तथाहीत्यादिना । प्रारब्धं कर्माविद्यालेशनिवृत्तौ प्रतिबन्धकं, तत्त्वज्ञानोत्पत्तौ तु ज्ञानसाधनसमुचितदेहादिसामग्रीसमुपस्थापकत्वेन साधकमेवास्ति । उत्पन्नमपि ज्ञानं प्रारब्धकर्मभिः प्रतिबद्धमविद्यालेशं न निवर्तयति । प्रारब्धकर्मणां प्रतिबन्धकत्वाभावमाशङ्क्य परिहरति—न च कर्मणामिति । ज्ञप्तावन्योऽन्याश्रयतामाशङ्कते—नन्वेवमिति । श्रुतिप्रमाणेनाप्यविद्यालेशाधिगम्यत्वं दर्शयति—भूयश्चान्ते इत्यादि । अत्रान्ते निवृत्तिरित्यनेन विदेहकैवल्यावस्थायां विलीयमानः कश्चिदाकारः प्रतीयते—"अन्ते विश्वमायानिवृत्तिरि" त्यनेन पूर्वमशेषाऽनिवृत्तिरित्यपि प्रतीयते । अशेषाविद्यानिवृत्तौ प्रारब्धकर्मप्रतिबन्धकमाह—प्रारब्धफलेति । "क्षीयन्ते" इति सामान्यश्रुतिसंकोचमुपपादयति—अत एवेति । ननु "तस्य तावदेवे"ति श्रुतिः परोक्षज्ञानविषयेति प्रत्यास्यातेत्यत आह—तद्धास्येति । अनेनाश्चर्यं द्योत्यते । विस्पष्टज्ञानजननस्याश्चर्यवत्ताप्रतिपादना

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विज्ञा'विति विस्पष्टज्ञानोपजननस्याश्रयंवत्प्रतिपादनात् परोक्षज्ञानविषयत्वानुपपत्तेः अन्यथा श्रुतवाक्यस्य परोक्षज्ञानस्यावश्यंभावितया तत्प्रतिपादनवैयर्थ्यात् । न च 'ज्ञान-तत्त्वदर्शिनः' इति स्मृतिः परोक्षनिश्चयवतस्तदभ्यसनशीलस्य प्रतिपादिका, दर्शनशब्देन साक्षात्कारस्यैव रूपादिदर्शनस्येवाभिधानात् । स्वात्मनि चापरोक्षे परोक्षज्ञानस्य विभ्रमत्वात् । न च सुखादिविषयपरकीयानुमानादिज्ञाने व्यभिचारः । स्वापरोक्षस्य स्वपरोक्षज्ञानविषयत्वे विभ्रमत्वाङ्गीकारात् ।

न चाकारिनिवृत्तौ तदाकारावस्थानासम्भवः, सामान्यविशेषघटितस्यापि वस्तुनो-विशेषनिवृत्तौ सामान्याकारावस्थानस्य परीक्षकैरभ्युपगमात् । न च साधक एवावस्था-विशेषं प्राप्तः स्थितप्रज्ञो गुणातीतश्च; 'प्रजहाति यदा कामा' नित्याद्यभिहितविशेषणानां तत्रानुपपत्तेः । नहि सर्वकामानां विमोकः परमात्मसाक्षात्कारमन्तरेणोपपन्नः । 'रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते' इति स्मरणात्, 'यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः, अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत' इति श्रुतेश्च । तदेवं श्रुतिस्मृतिपुराणा-दिष्वाघुष्यमाणा जीवन्मुक्तिः प्रद्वेषमात्रेण नापलपितुं शक्यत इति सिद्धम् ॥

इति श्रीगौडेश्वराचार्यपरमहंसपरिव्राजकाचार्यज्ञानोत्तमपूज्यपादशिष्य-
श्रीमत्परमहंसपरिव्राजकाचार्यश्रीचित्सुखमुनि-
विरचितायां तत्त्वप्रदीपिकायां चतुर्थः परिच्छेदः ॥

श्रोक्तश्रुतेः परोक्षज्ञानोपपत्तिः । अन्यथाऽधीतवेदस्य विदितपदपदार्थसंगतिकस्य न परोक्षज्ञानोत्पत्ता-वाश्चर्यं, श्रुतवाक्यस्य परोक्षज्ञानावश्यम्भावित्वात्तत्प्रतिपादनस्य वैयर्थ्यात् । गीतास्मृतेरन्यथासिद्धि परिहरति—न च ज्ञानिन इति । स्वापरोक्षे स्वपरोक्षज्ञानस्य विभ्रमत्वं वारयति—स्वात्मनि चेति । एतेनान्यदीयसुखादिविषयकपरकीयानुमानादि ज्ञाने व्यभिचारः परिहृतः । न चाविद्यारूपाकारि-निवृत्तौ तदाकारविशेषांशाश्रितजीवन्मुक्तावस्थानासम्भव इति वाच्यम्; सामान्यविशेषाकार-घटितस्यापि वस्तुनो विशेषाकारनिवृत्तौ सत्यामपि लशुनभाण्डसंलग्नगन्धसंस्कारवत्सामान्या-वस्थानस्य परोक्षकैरभ्युपगमात् । किञ्च भगवद्गीता स्थितप्रज्ञत्वेन गुणातीतत्वेन च जीवन्मुक्तमेव प्रतिपादयति, न शमादिसाधनसम्पन्नमपि साधकम्, तस्य ब्रह्मात्मैक्यापरोक्षज्ञानाभावेन तत्प्रयुक्त-निःशेषकामप्रहाणासम्भवादित्याह—न चेत्यादिना । नहि ब्रह्मात्मैक्यसाक्षात्कारमन्तरेण सर्वकामानां निःशेषनिवृत्तिः सम्भवति । अन्यथा "रसवर्जमि"ति स्मरणस्य वैयर्थ्यप्रसङ्गात् । रसः=कामः । दृष्ट्वा=साक्षात्कृत्य । अत्र बृहदारण्यकश्रुतिसम्मतिमाह—यदा सर्वे इत्यादि । उपसंहारव्याजेन फलितार्थमाह—तदेवमिति ।

ग्रहवेदनभोनेत्रे (२०४९), विक्रमाब्दे शुभान्विते । रामजन्मदिने टीका, छात्राणां तोषवर्द्धिनी ॥१॥
समापनं गता नूनं, विद्यानन्देन निर्मिता । कैलासाधिपतेः पाणौ, सादरं सुसमर्पिता ॥२॥

इति श्रीमत्परमहंसपरिव्राजकाचार्ययतीन्द्रकुलतिलक-श्रीकैलासपीठाधीश्वर-
दशमाचार्यमहामण्डलेश्वर-श्रीमत्स्वामिविद्यानन्दगिरिविरचितायां
प्रत्यक्तत्त्वप्रदीपिकाया व्याख्यारूपायां छात्रतोषिण्यां चतुर्थः परिच्छेदः ।

❀ ॐ तत्सत् । श्रीशङ्करः प्रीयताम् ❀

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

परिशिष्टम्

प्रत्यक्तत्त्वप्रदीपिकास्थपूर्वोत्तरपक्षसङ्ग्राहकश्लोकावलिः

प्रथमः परिच्छेदः

स्तम्भाभ्यन्तरगर्भभावनिगदव्याख्यातसद्वैभवो, यः पाञ्चाननपाञ्चजन्यवपुषा व्यादिष्टविश्वात्मतः।
प्रह्लादाभिहितार्थतत्क्षणमिलद्दृष्टप्रमाणं हरिः, सोऽव्याद्वः शरदिन्दुसुन्दरतनुः सिंहाद्रिचूडामणिः॥ १।
ज्योतिर्यद् दक्षिणामूर्तिव्यासशङ्करशब्दितम्। ज्ञानोत्तमाख्यं तद्वन्दे सत्यानन्दपदोदितम्॥ २॥
विप्रतिपत्तिव्रातध्वान्तध्वंसप्रगल्भवाचाला। क्रियते चित्सुखमुनिना प्रत्यक्तत्त्वप्रदीपिका विदुषा॥ ३॥
प्रमाणनखनिर्भिन्नमहामोहामरारये। नमस्कुर्मो नृसिंहाय स्वप्रकाशचिदात्मने॥ ४॥
अपरोक्षव्यवहृतेर्योग्यस्याधीपदस्य नः। सम्भवे स्वप्रकाशस्य लक्षणासम्भवः कुतः॥ १॥
सामान्यतोऽनुमानेन प्रसिद्धेऽपि विशेषणे। कथं कथय पक्षोऽयमप्रसिद्धविशेषणः॥ २॥
चिद्रूपत्वादकर्मत्वात्स्वयंज्योतिरिति श्रुतेः। आत्मनः स्वप्रकाशत्वं को निवारयितुं क्षमः॥ ३॥
सम्बन्धस्याश्रयत्वेन विज्ञानासमवायिनः। इन्द्रियत्वाविघाताच्च मनः प्रत्यक्षमात्मवत्॥ ४॥
तमालश्यामलज्ञाने निर्बाधे जाग्रति स्फुटे। द्रव्यान्तरं तमः कस्मादकस्मादपलप्यते॥ ५॥
चक्षुः प्रकाशनाजन्यरूपवद्वीक्षणक्षमम्। रूपिग्राहीन्द्रियत्वेन यथैव स्पर्शनेन्द्रियम्॥ ६॥
सर्वेषामपि भावानामाश्रयत्वेन सम्मते। प्रतियोगित्वमत्यन्ताभावं प्रति मृषात्मता॥ ७॥
अंशिनः स्वांशगात्यन्ताभावस्य प्रतियोगिनः। अंशित्वादितरांशीव दिगेषैव गुणादिषु॥ ८॥
अनादिभावरूपं यद्विज्ञानेन विलीयते। तदज्ञानमिति प्राज्ञा लक्षणं सम्प्रचक्षते॥ ९॥
देवदत्तप्रमा तत्स्थप्रमाभावातिरेकिणः। अनादेर्ध्वंसिनी मात्वादविगीतप्रमा यथा॥ १०॥
स्वीकारे विभ्रमाणां स्यात् स्वीयसिद्धान्तबाधना। अनभ्युपगमे तेषामाश्रयासिद्धिरुद्धता॥ ११॥
नयनं नयनोद्भूतसम्यग्ज्ञानातिरेकिणः। ज्ञानस्य कारणं तत्त्वाद्यथैव नयनान्तरम्॥ १२॥
प्रत्येकं सदसत्त्वाभ्यां विचारपदवीं न यत्। गाहते तदनिर्वाच्यमाहुर्वेदान्तवेदिनः॥ १३॥
एकालम्बनसंसर्गनिषेधं सदसत्त्वयोः। धर्मत्वाद्रूपरसवत् सिद्धानिर्वचनीयता॥ १४॥
दृष्टश्च त्रसुतोत्पत्तेस्तत्पदाङ्कितवाससा। वार्ताहारेण यातस्य परिशेषविनिश्चितेः॥ १५॥
विवादाध्यासितः सिद्धः शब्दव्युत्पत्तिगोचरः। मेयत्वान्न्यायगम्यत्वात्तत्वाभिमतकार्यवत्॥ १६॥
कार्यस्यावगतेर्हेतुर्यादृशं हितसाधनम्। प्रवृत्तेस्तादृशं हेतुर्व्यभिचारस्ततः कुतः॥ १७॥
विवादाध्यासिताः शब्दाः क्रियाकार्याभिधायिनः। कार्यप्रत्ययहेतुत्वाद् आनयेत्यादिशब्दवत्॥ १८॥
संसर्गासंगिसम्यग्धीहेतुता या गिरामियम्। उक्ताखण्डार्थता यद्वा तत्प्रातिपदिकार्थता॥ १९॥
सत्यज्ञानादिगीरेतत्संसर्गव्यतिरेकिणि। अर्थे प्रमाणं मानत्वान्नयनादिप्रमाणवत्॥ २०॥
आहुर्विज्ञानसामग्रीजन्यत्वे सत्यजन्यता। तदन्यतःप्रमायास्तत्स्वतस्त्वमिति तद्विदः॥ २१॥
प्रमा विज्ञानसामग्रीजन्यत्वे सति नान्यतः। जायते व्यतिरिक्तत्वादप्रमातः पटादिवत्॥ २२॥
परास्य शक्तिर्विविधा सर्गाद्या भावशक्तयः। इति श्रुतिस्मृतिमिता शक्तिः केन निवार्यते॥ २३॥
स्थितिस्थापकधर्मान्यातीन्द्रियाद्विष्ठसंश्रयः। दहनो गुणयोगित्वाद् गुरुत्वाश्रयकुम्भवत्॥ २४॥
विनाभिधेयस्मरणमन्वयाप्रतिपत्तितः। तत्तत्पदार्थस्मृतयस्तेषामन्वयबोधिकाः॥ २५॥
शब्दास्तात्पर्यविषयव्यतिषङ्गस्य लक्षकाः। तत्तात्पर्याभिधानत्वात् क्ष्वेलं भुङ्क्ष्वेति शब्दवत्॥ २६॥
श्रुतीनामीश्वराज्जन्म केवलं श्रुतिषु श्रुतम्। मानान्तरोपलब्धेऽर्थे रचना तु न मीयते॥ २७॥

द्वितीयः परिच्छेदः

सापेक्षत्वात् सावधेश्च तत्त्वेऽद्वैतप्रसङ्गतः। एकाभावादसंदेहान्न रूपं वस्तुनो भिदा॥ १॥
युगपद्ग्रहणायोगादनवस्थाप्रसङ्गतः। परस्पराश्रयत्वाच्च धर्मभेदेऽपि नाक्षधीः॥ २॥
नान्योन्याभावरूपोऽयं द्वैताभावप्रसङ्गतः। तादात्म्यस्याप्यमानत्वात् प्रतियोग्यनिरूपणात्॥ ३॥

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अव्याप्तेरप्यतिव्याप्तेर्द्रव्यं नैव गुणाश्रयः । आद्ये क्षणे गुणाभावाद् गुणादावपि वीक्षणात् ॥४॥
द्रव्यत्वजातियोगित्वमपि नो द्रव्यलक्षणम् । तज्जातिव्यञ्जकाभावात् तन्मानस्यानिरूपणात् ॥५॥
सामान्यवानगुण इत्याद्यप्यस्य न लक्षणम् । अन्योन्याश्रयतापत्तेर्गुणस्याद्याप्यसिद्धितः ॥६॥
गुणत्वजातियोगोऽपि न भवेद्गुणलक्षणम् । अन्योऽन्याश्रयदुष्टत्वाज्जातेस्तद्व्यञ्जकस्य च ॥७॥
यथाश्रुतेऽसंभवित्वान्निरुक्तेरप्ययुक्तितः । नानपेक्षतया हेतुः कर्मयोगविभागयोः ॥८॥
मैवं व्याप्तेरसिद्धत्वादनध्यवसितत्वतः । यौगपद्यप्रतीतेश्च प्रत्यक्षत्वमुपेयुषाम ॥९॥
अतिव्याप्त्या निराकुर्यादाद्यं पक्षचतुष्टयम् । अनेकत्वानिरुक्तेश्च पक्षमन्त्यं प्रतिक्षिपेत् ॥१०॥
जातेरद्याप्यसिद्धेश्च सत्तादेरप्यसिद्धितः । तदनाश्रयताऽन्यत्वलक्षणेऽन्योऽन्यसंश्रयः ॥११॥
नित्यद्रव्यैकवृत्तित्वमयोगपरिहारतः । न लक्षणमतिव्याप्तेस्तवात्मत्वमनस्त्वयोः ॥१२॥
आश्रयासिद्धिदुष्टत्वादप्रसिद्धविशेषणात् । प्रमाणतामवश्नुवीत न प्राभाकरभाट्टयोः ॥१३॥
न स्यादयुतसिद्धयादि समवायस्य लक्षणम् । विशेषणविशेष्यत्वसम्बन्धे व्यभिचारतः ॥१४॥
घटस्तद्वृत्त्यनित्यान्यभावसम्बन्धवानयम् । सम्बन्धित्वादिति स्याच्चेन्नाभावे व्यभिचारतः ॥१५॥
सिद्धे भेदे विरोधे च धर्मयोर्धर्मिभेदधीः । तयोर्नाद्यापि संसिद्धिर्धर्मिभेदस्तदा कुतः ॥१६॥
अन्यत्र लिङ्गेन्द्रिययोरन्योन्यनिरपेक्षयोः । दृष्टं सम्भूयकारित्वं विशिष्टानुमितिं प्रति ॥१७॥
मानाधीना मेयसिद्धिर्मानसिद्धिश्च लक्षणात् । तच्चाध्यक्षादिमानेषु गीर्वाणैरपि दुर्भणम् ॥१८॥
अनिरुक्तेरवधृतेरतिव्याप्तेर्द्वयोरपि । अव्याप्तेर्विभ्रमाभेदाज्जातिसाङ्कर्यसक्तितः ॥१९॥
आद्यकल्पेष्वतिव्याप्तेरव्याप्तेश्चान्त्ययोर्द्वयोः । न मिथ्याध्यवसायत्वं विपर्यासस्य लक्षणम् ॥२०॥
आद्ये कल्पेऽधिकव्याप्तेर्द्वयोश्चासम्भवित्वतः । तुर्येऽतिव्याप्तिश्चान्त्येऽभावाद्व्यञ्जकमानयोः ॥२१॥
प्रमितेर्दुर्निरूपत्वाद्व्यञ्जकस्यानिरूपणात् । साक्षात्त्वं जातिसाङ्कर्यान्न प्रत्यक्षस्य लक्षणम् ॥२२॥
किं व्यक्त्योरथवा जात्योस्तद्वतोर्वा विशेषयोः । व्याप्तिस्त्वयेष्यते किं वा साध्यसाधनवत्त्वयोः ॥२३॥
सा न व्यक्त्योस्तदानन्त्यान्न जात्योस्तदसम्भवात् । न तद्वतोरुक्तदोषान्न चतुर्थोऽनिरूपणात् ॥२४॥
न प्रत्यक्षमशक्यत्वान्नानुमाप्यनवस्थितेः । नागमस्तदृते भावान्नोपमाऽतत्प्रमेयतः ॥२५॥
नार्थापत्तिरन्यत्वादनुमाफललोपनात् । नाभावो दुर्निरूपत्वान्न तर्कस्तर्कबाधनात् ॥२६॥
पूर्वोदितेन न्यायेन पक्षस्यैवानिरूपणे । कथं तद्वचनं वाच्यं प्रतिज्ञेति विपश्चिता ॥२७॥
अनुमानाङ्गयोः सिद्धेर्व्याप्तिपक्षगतत्वयोः । उदाहृतेरुपनयात्पञ्चावयवता मुधा ॥२८॥
भूयोऽवयवसामान्यं सादृश्यं यच्च गोगतम् । विज्ञातमविकल्पेन प्रत्यभिज्ञायते यतः ॥२९॥
वाचको गवयस्यायं तत्र वृत्त्यन्तरेऽसति । वृद्धैः प्रयुज्यमानत्वाद्गोत्वे गौरिति गीरिव ॥३०॥
शब्दो मानं विवक्षायां ज्ञानेऽर्थे वा भवन्भवेत् । नाद्यौ तद्व्यभिचारित्वान्नान्त्यः सङ्गत्ययोगतः ॥३१॥
आप्तोदीरितवाक्येषु मालतीमाधवादिषु । व्यभिचारान्न तद्युक्तमाप्तत्वस्यानिरुक्तितः ॥३२॥
आगमस्य बहिर्देशविषयत्वस्य कल्पनात् । प्रागेव देवदत्तस्य गृहेऽभावो मितो न वा ॥३३॥
आद्येऽनुमानं तेनैव निष्प्रत्यूहं प्रवर्तताम । द्वितीये कल्पकाभावदर्थापत्त्युदयः कुतः ॥३४॥
तदसिद्धिरतिव्याप्तिः सक्तिः सप्रतिसाधने । असम्भवोऽतर्कता च दोषास्तेषां क्रमादमी ॥३५॥
केवलानुपलम्भस्य व्यभिचारनिवारिणी । योग्यता चेत्कुतो न स्यादनुमानमभावधीः ॥३६॥
सर्वस्य प्रतियोगित्वाद्दुर्लभा तदनिष्ठता । द्विधाप्यात्माश्रयत्वाच्च न स्वशब्दो विशेषणम् ॥३७॥
अर्थान्तरत्वादाद्यस्य परस्योपाधिमत्त्वतः । अन्त्यस्याभासतुल्यत्वात्प्रतिसाधनरोधनात् ॥३८॥
प्रमितत्वस्य वैयर्थ्यात्सिद्धस्यैवाश्रयत्वतः । देहात्मतावन्नियमात्लक्षणंश्च व्यवस्थितेः ॥३९॥
अन्योऽन्यसंश्रयापत्तेरतिव्याप्तिप्रसङ्गतः । अव्याप्तेरजसंयोगे द्रव्यत्वाद्यनिरूपणात् ॥४०॥
संयोगस्यापृथक्त्वेऽपि व्याहारव्यवहारयोः । समवाय इवोत्थानाद्वृथा सामान्यकल्पना ॥४१॥
आत्माश्रयादतिव्याप्तेरयोगाद्व्यभिचारतः । विशेषणाप्रसिद्धेश्च न विभागः प्रसिद्ध्यति ॥४२॥
संयोगस्य निरस्तत्वाद्गुणानामनिरूपणात् । जातेश्च दुर्निरूपत्वात्स्यादसम्भवि लक्षणम् ॥४३॥
प्रत्यक्षस्यान्यथासिद्धिः स्यादेकत्वसमुच्चये । अनुमाप्याश्रयासिद्धिसाध्यवैकल्यदूषिता ॥४४॥

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

न च प्रमाणं संख्यायामप्येकत्वादिबुद्धयः । गुणादिष्वपि तद्भावात् तद्बाधस्यानिरूपणात् ॥४५॥
प्रत्यक्षादनुमानाद्वा न जातिः सेद्धुमर्हति । व्यञ्जकैरन्यथासिद्धेस्तद्वृत्तेश्चानिरूपणात् ॥४६॥
अद्रव्यत्वान्न संयोगः साङ्कर्यान्नेतरावपि । पदार्थान्तरतापत्तेर्नान्यसम्बन्धसम्भवः ॥४७॥
परमाणुबहुत्वेन महत्वारम्भसम्भवात् । त्र्यणुके द्व्यणुकारम्भप्रक्रियापि न सिद्ध्यति ॥४८॥
परिमाणस्य सिद्धत्वे तदारम्भविचारणा । नाद्यापि सिद्धस्तद्भावोऽभावाल्लक्षणमानयोः ॥४९॥
आद्यस्योपाधिमत्त्वेन साध्याभावान्निदर्शने । द्वितीयस्योभयत्रापि प्रतिसाधनरोधनात् ॥५०।
तत्त्वेन प्रत्यभिज्ञानात्तदाधेयानिपाततः । संख्याप्रमाणयोरैक्यादन्यथा गौरवसम्भवात् ॥५१॥
कालस्याहेतुतापत्तेर्नाधितोऽन्योन्यसंश्रयात् । स्वात्मवृत्तेरयुक्तत्वान्नियतत्वानिरुक्तितः ॥५२॥
हेतुसाकल्यरूपायां सामग्र्यां तदसम्भवात् । कारणत्वानिरुक्तौ च सहकार्यनिरूपणात् ॥५३॥
जातेरहेतुतापत्ते रासभेऽतिप्रसक्तितः । गगनादिषु चाव्याप्तेरन्वयादेरयोगतः ॥५४॥
अतिव्याप्तेः स्ववृत्तित्वाद्भेदेऽभेदेऽप्यसम्भवात् । कार्यस्य हेतुभिः सिद्धेर्वृथा साकल्यकल्पना ॥५५॥
व्यापाराव्यापनादात्माश्रयत्वादनिरुक्तितः । समवायेऽस्य हेतुत्वे पूर्वदोषानुषङ्गतः ॥५६॥
असिद्धेः प्रतिबन्धस्य नृशृङ्गादावभावत । सत्त्वे सतीति चायुक्तं दृष्टान्तादेरसिद्धितः ॥५७॥
अनिरुक्तेरतिव्याप्तेरव्याप्तेस्तदसम्भवात् । अतिप्रसङ्गतोऽव्याप्तेर्मतुबर्थानिरूपणात् ॥५८॥
प्रत्यक्षागोचरत्वेन परत्वादेरलिङ्गतः । स्वरूपतोऽनिमित्तत्वादुपाधौ निष्फलत्वतः ॥५९॥
दिवाकरपरिस्पन्दापण्डसङ्गतिसम्भवात् । व्यापिनश्चेतनादेव कथं कालः प्रसिद्ध्यति ॥६०॥
इन्द्रियानधिगम्यत्वान्नाध्यक्षं नानुमा दिशि । वर्णैरर्थान्तरत्वेन साध्यासिद्धिर्निदर्शने ॥६१॥
भेदेप्ययुतसिद्धत्वादुपादानत्वसम्भवात् । तस्यापि दुर्निरूपत्वात्समवायाद्यसङ्गतेः ॥६२॥
युक्तेः शब्दनिमित्तानामेकाधिकरणत्वतः । शाब्द न तावद्घटते भेदाभेदप्रसाधकम् ॥६३॥
धर्माणामेकनिष्ठत्वमात्रेणैत्रोपपतितः । अभेदानुभवाभावादार्थं नैवास्य साधकम् ॥६४॥

तृतीयः परिच्छेदः

साक्षात्करणहेतोरप्यप्रत्यक्षत्वसम्भवात् । दशमस्त्वमसीत्यादौ शब्दादेव तदुद्भवात् ॥१॥
तद्धेत्यादिश्रुतेः क्वापि मनसस्तदयोगतः । शब्दत्वानुमितेर्बाधाद्व्यभिचारादनुत्थितेः ॥२॥
प्रतिप्रयोगयोगाच्च विपक्षे बाधसम्भवात् । तस्याभाससमानत्वाच्छब्दादेवापरोक्षधीः ॥३॥
अभावाच्छ्रुतिलिङ्गादेरुपयोगानिरूपणात् । अधिकारविरोधाच्च कर्माङ्गं नात्मतत्त्वधीः ॥४॥
यज्ञादेः करणत्वेन श्रुत्यैव प्रतिपादनात् । शेषत्वाधिगतावेव प्रक्रमस्याप्युपक्षयात् ॥५॥
निन्दाया देवताज्ञानविषयत्वेऽपि सम्भवात् । प्रक्रमस्यापि बाध्यत्वाद्बलीयस्या तृतीयया ॥६॥

चतुर्थः परिच्छेदः

लीनशब्दनिदानेऽपि व्योम्नि तस्यानवस्थितेः । रूपाभावव्यवहृतेस्तदभावेऽपि चात्मनि ॥१॥
कुम्भः कुम्भेतराचित्कासुखान्यान्यः प्रसाध्यताम् । कुम्भत्वेन यदित्थं तत्तथा कुम्भान्तरं यथा ॥२॥
आत्मनः सुखरूपत्वाद्बन्धस्यान्यगतत्वतः । उपचारस्य वा योगात्सम्बन्धस्यानिरूपणात् ॥३॥
स्वरूपतः प्रमाणर्वा सर्वज्ञत्वं द्विधा स्थितम् । तच्चोभयं विना विद्यासम्बन्धं नैव सिध्यति ॥४॥
चैत्रराग: स्वविषयानित्यज्ञानातिरेकिणा । तदध्यक्षेण सम्वीक्ष्यः प्रत्यक्षत्वात्पटादिवत् ॥५॥
अविद्या कल्प्यतेऽनेका जाग्रत्स्वप्नविभेदिनी । यथा, तथैव कल्प्यन्तामनन्ताः सति कल्पके ॥६॥
सूत्रभाष्यादिवाक्यानां श्रुतिस्मृतिगिरामपि । मुख्यार्थत्वोपपत्त्यर्थं व्यवस्थैवाभ्युपेयताम् ॥७॥
निवृत्तिरात्मा मोहस्य ज्ञातत्वेनोपलक्षितः । उपलक्षणनाशेऽपि स्यान्मुक्तः पाचकादिवत् ॥८॥
विगीताज्ञानहानिः स्यात् ज्ञाताधिष्ठानमात्रकम् । तत्त्वाद्यदित्थं तत्तादृग्यथा शुक्त्यादिकं मितम् ॥९॥
अविद्यालेशशब्देन मोहाकारान्तरोक्तितः । ज्ञानस्य प्रतिबन्धाच्च प्रबलारब्धकर्मभिः ॥१०॥
लेशानुवृत्तौ तज्जन्यकर्मादेरनुवृत्तितः । उत्पन्नात्मावबोधस्य जीवन्मुक्तिः प्रसिद्ध्यति ॥११॥

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दिशन्तु शं मे गुरुपादपांसवः ।

श्रीकैलासपीठाधीश्वरेण स्वामिविद्यानन्दगिरिणा

विरचिता

परीक्षाब्धिसन्तरणी

प्रत्यक्तत्त्वप्रदीपिका (चित्सुखीप्रथमपरिच्छेदः)

प्रथमं पत्रम्

पारंगत्यै परीक्षाब्धेस्तरणी निर्मिता मया ।
आरुह्य तरणीमेतां सन्तरन्तु तितीर्षवः ॥

प्रश्नः १—नृसिंहस्य सावयवत्वे फलकाव्याप्यत्वध्रौव्यात्कथं स्वप्रकाशत्वमिति प्रसक्तामापत्तिं निरस्य स्वप्रकाशत्वाभावे समागतामापत्तिं युक्त्या प्रदर्शयत ।

उत्तरम्—अथ प्रत्यक्तत्त्वप्रदीपिकाग्रन्थारम्भे श्रीमन्तः चित्सुखाचार्याः—

"स्तम्भाभ्यन्तरगर्भभावनिगदव्याख्याततद्वैभवो,
यः पाञ्चाननपाञ्चजन्यवपुषा व्यादिष्टविश्वात्मतः ।
प्रह्लादाभिहितार्थतत्क्षणमिलद्दृष्टप्रमाणं हरिः,
सोऽव्याद्वः शरदिन्दुसुन्दरतनुः सिंहाद्रिचूडामणिः ॥"

प्रमाणनखनिर्भिन्नमहामोहामरारये ।
नमस्कुर्मो नृसिंहाय स्वप्रकाशचिदात्मने ॥

इति विशेषणेन भगवतो
इत्यादिवाक्येन मङ्गलाचरणमकार्षुः। तत्र "पाञ्चाननपाञ्चजन्यवपुषा" इति विशेषणेन भगवतो
नृसिंहस्य विश्वात्मता प्रतिपादिता, एवं स्तम्भाभ्यन्तरेत्यादिविशेषणेन तस्य विभुताऽपि प्रतिपादिता।
ननु नृसिंहस्य सावयवत्वेनास्मदादिवद्विभुत्वाभावः सुनिश्चित इति चेन्न, पूर्वोक्ताभ्यां द्वाभ्यां
विशेषणाभ्यां व्यापकत्वस्य विश्वात्मत्वस्य च दर्शितत्वेनाव्यापकत्वशङ्काया निराकृतत्वात्। न च
सावयवत्वेन तस्य स्वप्रकाशत्वं न सम्भवतीति वाच्यम्, प्रदीपादीनां सावयवत्वेऽपि परप्रकाश्य-
त्वाभावेन स्वप्रकाशत्वाभ्युपगमात् । न चैवं स्वप्रकाशस्य चिदात्मनो विवक्षितलक्षणस्य
प्रदीपादिष्वतिव्याप्तिरिति वाच्यम्; प्रदीपादीनां सजातीयप्रदीपान्तराप्रकाश्यत्वेऽपि चिदात्मना
प्रकाशमानत्वेन वस्तुतः स्वप्रकाशत्वाभावेन त्वदुक्तातिव्याप्त्यभावादिति भावः ।

नन्वनुभूतौ स्वप्रकाशत्वे किं मानम् ? न चानुभूतिरनुभूतिव्यवहारहेतुप्रकाशोऽनुभूतित्वाद् यन्नैवं तन्नैवं, यथा घटः, इत्यनुमानं तत्र प्रमाणमिति वाच्यम्; अनुभूतौ निरुक्तानुमानविषयत्वाभ्युपगमे तत्र वेद्यत्वावश्यम्भावित्वेन स्वप्रकाशत्वाभावप्रसङ्गादिति चेन्न, अनुभूतेरनुभाव्यत्वस्वीकारेऽनवस्थापातात् । न चावश्यं वेद्यत्वाभावान्नानवस्था, व्यवहारस्य तत्स्वरूपसत्तामात्रेणाप्युपपत्तेरिति

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वाच्यम्; तद्विषयप्रमाणानुदये तत्सत्ताया अप्यनिश्चयेन व्यवहारासिद्धिप्रसङ्गात् । किं चानुभूतिः स्वप्रकाशा न स्यात्तर्हि जडानां घटादिविषयाणां स्वतः परस्परतो वा प्रकाशमानत्वायोगाद् ज्ञानमपि न प्रकाशेत तदा जगदान्ध्यप्रसङ्गः स्यादिति । न चानुभूतिर्वेद्या, वस्तुत्वात्, घटवदिति सत्प्रतिपक्षः शङ्कनीयः; व्याप्तिग्रहाभावात् । तथाहि वस्तुत्वाद् वेद्यत्वं साधयता यद्यद्वस्तु तत्तद्वेद्यमिति व्याप्तिरभ्युपेया । तथासत्यस्या व्याप्तेर्ग्राहिका संविद्व्याप्तिग्रहणसमये स्फुरति चेत्तर्हि स्वेनैव स्वस्य स्फुरणे सौगताभिमतस्वप्रकाशत्वानुमतिप्रसङ्गः । नचेत्स्फुरति; तदा संविद्रूपवस्तुविशेषस्य स्फुरणाभावात् सर्वोपसंहारवतो व्याप्तिरेवास्तंगच्छेत्तत्र कुतोऽनुमानप्रसरः कुतस्तरां वस्तुत्वहेतोः सप्रतिसाधनता । न चैवमवेद्यस्यानुभूतित्वमप्रसिद्धमिति वाच्यं, तथासत्यनुभूतेः वेद्यत्वावेद्यत्वयोर्वादिनां विप्रतिपत्त्यभावप्रसङ्गात् । न चैवमुभयतःपाशारज्जुरिति वाच्यम्; अनुभूतेः प्रमाणजन्यस्फुरणाश्रयतया स्फुरणकर्मतया वा घटादिवद्विषयत्वाभावेऽपि प्रमाणजनितान्तःकरणवृत्तिव्याप्यत्वेन विषयत्वाभ्युपगमे स्वप्रकाशत्वव्याघाताभावात् । तस्मादनुभूतौ स्वप्रकाशत्वानुमानं विगलितसकलकलङ्कमितिसिद्धमितिभावः ।

प्रश्नः २—फलकान्तलक्षणावेद्यत्वे सत्यपरोक्षव्यवहारयोग्यत्वस्य स्वप्रकाशत्वस्य प्रातिभासिके रजतादावन्तःकरणेच्छादौ चातिव्याप्तिः कथं भवतीति निर्दिश्य निराकुरुत ?

उत्तरम्—अथ "नमस्कुर्मो नृसिंहाय स्वप्रकाशचिदात्मने" इति मङ्गलवाक्येन सङ्केतितं चिदात्मनः स्वप्रकाशलक्षणमेकादशधा विकल्प्य पूर्ववादिना दूषितम् । तत्र समाधातुं सिद्धान्तिनोक्तम्—

"अपरोक्षव्यवहृतेर्योग्यस्याधीपदस्य नः ।
सम्भवे स्वप्रकाशस्य लक्षणासम्भवः कुतः" ॥ इति वाक्येन

स्वप्रकाशलक्षणेऽसम्भवदोषो वारितः । तथाहि—अवेद्यत्वे सत्यपरोक्षव्यवहारयोग्यत्वं स्वप्रकाशत्वमिति लक्षणं व्यधायि । तत्रावेद्यत्वपदेन फलव्याप्तिशून्यत्वमुच्यते, अपरोक्षव्यवहारयोग्यत्वपदेन च वृत्तिव्याप्तियोग्यत्वमुच्यते । तथा च फलव्याप्तिशून्यत्वे सति वृत्तिव्याप्तियोग्यत्वमित्युक्तलक्षणार्थः । तत्रापि घटादावतिव्याप्तिवारणाय सत्यन्तदलम् । अतीतादिषु नित्यानुमेयेषु धर्मादिष्वतिव्याप्तिवारणायापरोक्षव्यवहारयोग्येति विशेष्यदलम् ।

ननु नित्यानुमेयधर्मादीनामागमवेद्यत्वेनावेद्यत्वाभावान्न तत्रातिव्याप्तिर्येनापरोक्षव्यवहारयोग्यत्वदलस्य सार्थक्यं स्यादिति चेन्न फलव्याप्यत्वरूपवेद्यत्वाभावस्य निरुक्तधर्मादिष्वपि सत्त्वेनादोषात् । न चान्तःकरणतद्धर्मेच्छादिषु प्रातिभासिकेषु च शुक्तिरजतादिषु निरुक्तस्वप्रकाशत्वलक्षणस्यातिव्याप्तिः, तेषामपि फलव्याप्यत्वाभावेनावेद्यत्वात्, अहमज्ञ इत्याद्यपरोक्षव्यवहारयोग्यत्वाच्चेति वाच्यम्; अध्यस्तत्वेन केवलसाक्षिवेद्यवस्तूनां फलव्याप्यत्वाभावरूपावेद्यत्वस्य सत्त्वेऽपि अपरोक्षयोग्यत्वाभावात्, शुक्तिरजतादीनामध्यस्तत्वेनैव सिद्धेरिति भावः । न चैवमज्ञोऽहमहमिच्छामीत्यादावपरोक्षव्यवहारदर्शनेन तत्रापि योग्यता कल्पनीयेति वाच्यम्; रजतादिव्यवहारायोग्येऽपि शुक्तिखण्डे रजतादिव्यवहारदर्शनेन निरुक्तेच्छादिषु तादृशयोग्यताकल्पनाया अयुक्तत्वात् । न च रजतादिवद् घटादीनामप्याविद्यकत्वेनाध्यस्ततयाऽपरोक्षव्यवहारसम्भवान्न तत्रापि योग्यताकल्पनीयेति वाच्यम्; ब्रह्मात्मैक्यबोधानन्तरं घटादीनां बाधितत्वेऽपि व्यवहारदशायां प्रमाणविषयत्वेनापरोक्षयोग्यतास्वीकारात् । न चैवं मोक्षदशायां तादृशयोग्यतालक्षणधर्मासम्भवेनाव्याप्तिस्तादृशयोग्यताधर्मस्वीकारेऽपसिद्धान्तापत्तिश्चेति वाच्यम्, गुणवत्त्वात्यन्ताभावानधिकरणत्वं द्रव्यत्वमिति द्रव्यलक्षण-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्वम्
त्योत्पत्तिकालावच्छिन्ने घटादिकार्यद्रव्ये विद्यमानतावद् निरुक्तयोग्यत्वात्यन्ताभावानधिकरणत्वस्य मोक्षदशायामपि सत्त्वेन लक्षणसमन्वयादव्याप्त्यभावादिति भावः। न चापसिद्धान्तापत्तिस्तदवस्थेति शङ्कनीयं; काल्पनिकधर्माणां संसारदशायामभ्युपगम्यमानत्वात्। तत्र सुरेश्वराचार्यपद्मपादाचार्ययोर्वचनं प्रमाणम्—

अक्षमा भवतः केयं साधकत्वप्रकल्पने।
किं न पश्यसि संसारं तत्रैवाज्ञानकल्पितम्॥

"आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति धर्माः" इत्यादि। न च संसारदशायामवेद्यत्वेसत्यपरोक्षव्यवहारयोग्यत्वरूपधर्मकल्पनासम्भवेऽपि मुक्तौ तदसम्भावादव्याप्तिस्तदवस्थेति वाच्यम्; तादृशयोग्यतारूपधर्मस्य कादाचित्कत्वेनापि तद्धर्मात्यन्ताभावानधिकरणत्वस्य सत्त्वेन लक्षण समन्वयसम्भवे दोषाभावादिति दिक्।

प्रश्नः ३—स्वप्रकाशस्य लक्षणानि ग्रन्थोक्तानि प्रदर्श्य कुत्र ग्रन्थकारस्याभिप्रायः कथञ्चेति सपदकृत्यं विवेचनीयम्?

उत्तरम्—अथ लक्षणप्रमाणाभ्यां वस्तुसिद्धिरिति पूर्वं लक्षणं साधयितुमाक्षिपति, तदर्थं च विकल्पमुद्भावयति किमित्यादिना। तत्र स्वत्वे सति प्रकाशत्वमिति प्रथमलक्षणार्थः। अत्रापि घटादावतिव्याप्तिवारणाय प्रकाशपदम्। स्वविषयत्वे सति प्रकाशत्वमिति द्वितीयलक्षणार्थः। तत्रार्थान्तरतावारणाय प्रथमदलम्, शब्दशब्देऽतिव्याप्ति वारयितुं द्वितीयदलम्। सजातीयप्रकाश्यत्वं वेति तृतीयलक्षणम्। इदं लक्षणं प्रदीपादेः स्वप्रकाशत्वमभ्युवगच्छतां, तत्रार्थान्तरतावारणाय सजातीयपदम्। स्वसत्तायां प्रकाशव्यतिरेकविरहितत्वं वेति चतुर्थलक्षणस्य स्वसत्तापर्यन्तं प्रकाशेनाव्यभिचारोऽर्थः। स्वव्यवहारहेतुप्रकाशत्वं वेति पञ्चमलक्षणम्। तत्राविज्ञातवस्तुनि व्यवहारायोगादवश्यं स्वव्यवहारहेतुज्ञानं स्वीकार्यम्। ज्ञानाविषयत्वं वेति षष्ठलक्षणम्। यद्यपि शशविषाणशब्दजन्यबुद्धिर्नार्थसंस्पर्शिनी, तस्याः विकल्पमात्रतया न तत्रातिव्याप्तिः शङ्कनीया, शिष्यमतिविकासायोत्तरोत्तरलक्षणमनुसरति न तु सर्वत्र पूर्वपूर्वलक्षणे दोषपरिहाराय। तथापि षष्ठलक्षणेऽतिव्याप्तिशङ्कया सप्तममनुधावति ज्ञानाविषयत्वेसत्यपरोक्षत्वं वेति। शशविषाणादौ ज्ञानाविषयत्वेऽपि अपरोक्षत्वाभावान्नतत्रातिव्याप्तिः। ननु ज्ञानाविषयत्वे सत्यपरोक्षत्वमिति लक्षणं व्याघातदोषदुष्टमिति चेन्न व्यवहारविषयत्वे ज्ञानाविषयत्वमिति पक्षान्तरानुसृतत्वात्। अख्यातिवादिमतेन शुक्तिरजतादिसंसर्गेऽतिव्याप्तिशङ्कया स्वप्रतिबद्धव्यवहारे सजातीयपरानपेक्षत्वमिति नवमलणमनुधावति। तत्रासम्भवदोषवारणाय सजातीयपदम्। अवेद्यत्वेसत्यपरोक्षव्यवहारविषयत्वमिति दशमलक्षणेनसह सप्तमलक्षणस्य साङ्कर्यं न शङ्कनीयम्; सप्तमेऽपरोक्षत्वं विशेष्यदलमत्रत्वपरोक्षव्यवहारविषयत्वमिति तयोर्भेदात्। मोक्षकाले व्यवहारानङ्गीकारात्तत्राव्याप्तिस्तद्वारणाय चरमं लक्षणमवेद्यत्वे सत्यपरोक्षव्यवहारयोग्यत्वमिति। अत्रान्तिमे लक्षणे ग्रन्थकारस्याभिप्रायः, तथा चाह श्लोकेन—

अपरोक्षव्यवहृतेर्योग्यस्याधीपदस्य नः।
सम्भवे स्वप्रकाशस्य लक्षणासम्भवः कुतः॥

न च योग्यतालक्षणधर्माङ्गीकारे मोक्षदशायामव्याप्तिस्तदसम्भवादपसिद्धान्तापत्तिश्चेति शङ्कनीयम्; गुणवत्त्वात्यन्ताभावानधिकरणत्वं द्रव्यत्वमितिवन्निरुक्तयोग्यत्वाभावानधिकरणत्वं स्वप्रकाशत्व-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मितिस्वीकारे मुक्तिदशायामपि तत् सम्भवान्नाव्याप्तिर्नाप्यपसिद्धान्तापत्तिः, काल्पनिकधर्माणां संसारदशायामभ्युपगमात् । तत्र सुरेश्वराचार्यपद्मपादाचार्ययोर्वचनम्

"अक्षमा भवतः केयं साधकत्वप्रकल्पने ।
किं न पश्यसि संसारं तत्रैवाज्ञानकल्पितम्" ।

"आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति धर्माः" इत्यादि प्रमाणमाह । न च संसारदशायां तत्कल्पनासम्भवेऽपिमुक्तौ तदभावादव्याप्तिरिति वाच्यम्; कदाचित्सत्त्वेनापि तादृशयोग्यतात्यन्ताभावानधिकरणत्वेन लक्षणसमन्वयोपपत्तेः । अपरोक्षव्यवहारयोग्येऽपि घटादावतिव्याप्तिवारणायावेद्यत्वे सतीतिदलम् । अतीतादिषु नित्यानुमेयेषु च धर्मादिष्वतिव्याप्तिं वारयितुमपरोक्षव्यवहारयोग्येति विशेष्यदलम् । ननु नित्यानुमेयधर्मादीनामप्यागमवेद्यत्वेनावेद्यत्वाभावात्कथं तत्रातिव्याप्तिवारणायापरोक्षव्यवहारयोग्यत्वदलं सार्थकमिति चेन्न, फलव्याप्यत्वरूपावेद्यत्वस्य धर्मादिष्वभावादिति । विषयसन्निकर्षदशायां विषयाकारवृत्तौ प्रतिफलितं चैतन्यं फलमित्युच्यते । विधिवाक्यरूपविशिष्टशब्दप्रमाणात्परोक्षबुद्धिवृत्तिसमुदयमात्रादेव धर्मादिव्यवहारो भवतीति वेदवादिप्रक्रिया । न तत्र धर्माद्याकाराऽपरोक्षबुद्धिवृत्तिर्भवति, येन तत्र चैतन्यमभिव्यज्येत । न च योगिप्रत्यक्षगम्यतयाऽपरोक्षत्वंधर्मादीनामिति वाच्यम्; धर्मादीनां चोदनैकप्रमाणगम्यत्वात् । न चैतावता योगिनां सर्वदर्शित्वाभावः शङ्कनीयः, तेषां सर्वदर्शित्वशब्देन योग्यसर्वदर्शित्वस्यैव विवक्षितत्वात् अत्र भट्टपादसम्मतिमाह—

यत्राप्यतिशयो दृष्टः स स्वार्थानतिलङ्घनात् ।
दूरसूक्ष्मादिदृष्टौ स्यान्न रूपे श्रोत्रवृत्तिता ॥ इति,

अतो धर्मादिष्वतिव्याप्तिवारणाय निरुक्तस्वप्रकाशलक्षणेऽपरोक्षव्यवहारयोग्यत्वे सतीति दलमावश्यकमितिभावः ।

प्रश्नः ४—ज्ञानस्य स्वप्रकाशतायां मानमस्ति न वा ? आद्ये कथं न स्वप्रकाशत्वहानिः, अन्त्ये साधकमानाभावादेव न तत्सिद्धिरिति शङ्कां निरस्य सिद्धान्तं प्रकटयत !

उत्तरम्—अथ लक्षणप्रमाणाभ्यां वस्तुसिद्धिरिति नियमेन पूर्वमवेद्यत्वे सत्यपरोक्षयोग्यत्वं स्वप्रकाशत्वमिति ज्ञानस्य स्वप्रकाशत्वं समर्थयित्वा प्रमाणं समर्थयितुं चित्सुखाचार्याः अनुभूतिः स्वयं प्रकाशा, अनुभूतित्वात् यन्नैवं तन्नैवं यथाघट इत्यनुमानप्रयोगंप्राहुः । ननु ज्ञानस्यानुमानप्रमाणेन स्वप्रकाशत्वसाध्यत्वाभ्युपगमे तत्र स्वप्रकाशत्वहानिरिति चेन्न, वृत्तिव्याप्यत्वाभ्युपगममात्रेणैव ज्ञानस्य स्वप्रकाशत्वस्वीकारात्, फलव्याप्यत्वानभ्युपगमेन ज्ञाने स्वप्रकाशत्वक्षत्यभावात् । अचेतने घटादौ वस्तुनि घटाकारवृत्या तद्विषयकमावरणमपनीयते, चिदाभासरूपफलेन घटादि वस्तु प्रकाश्यते यथा, न तथा चेतने वस्तुनि फलव्याप्तेः कश्चिदुपयोगोऽस्तीत्यतो न तत्र स्वप्रकाशत्वहानिः शङ्कनीया । किञ्च महाविद्यानुमानेनापि ज्ञाने स्वप्रकाशत्वं साधयितुं शक्यते । तथाहि-अयं घटः, एतद्घटान्यत्वे सति वेद्यत्वानधिकरणान्यः, पदार्थत्वात्ः पटवदिति महाविद्यानुमानेन ज्ञाने स्वप्रकाशत्वं सिध्यति । अत्र महतीविद्या महाविद्या, तदुपयोग्यनुमानं महाविद्यानुमानम् । तत्र दृष्टान्ते साध्यप्रसिद्धिरन्यरीत्या क्रियते, पक्षे साध्यसिद्धिरन्यथा च क्रियते । एतद्घटान्यत्वविशिष्टवेद्यत्वमेतद्घटं विहाय पटादौ वर्तते, शुद्धवेद्यत्वं सर्वत्रास्ति, तादृशविशिष्टवेद्यत्वाधिकरणं पटादिकम्, अनधिकरणमेतद्घटः पक्षः, तद्भेदः पुनः पटादौ समायातः । तथा यत्र पदार्थत्वं हेतुस्तत्रैतद्घटान्यत्वविशिष्टवेद्यत्वानधिकरणान्यत्वं साध्यमप्यस्ति । अतो दृष्टान्ते पटादौ साध्यहेत्वोः साहचर्यरूपव्याप्तिर्गृह्यते,

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तद्बलेन पक्षधर्मताज्ञानानन्तरं पक्षे साध्यं निश्चेतुं सुलभम् । अत्रेदमप्यवधेयम्—एतद्घटान्यत्वं विशेषणम् वेद्यत्वं च विशेष्यम् । यत्र विशेषणाभावप्रयुक्तो विशिष्टाभावो न सम्भवति, तत्र विशेष्याभावप्रयुक्तो विशिष्टाभावोऽवश्यं ग्राह्यः । तथा चात्र दृष्टान्ते सत्यपि विशेषणाभावप्रयुक्त-विशिष्टाभावे पक्षे तदसम्भवाद्विशेष्याभावप्रयुक्त एव विशिष्टाभावो ग्राह्यः । स च वेद्यत्वाभावात्मकः । तस्माज्ज्ञाने वेद्यत्वाभावसिद्ध्या स्वप्रकाशत्वसिद्धिः । किञ्च ज्ञानस्य स्वप्रकाशत्वानङ्गीकारे जडानां स्वतः परतो वा प्रकाशमानत्वायोगाज्ज्ञानमपि न प्रकाशते चेत्तर्हि सर्वस्मिन् जगति सर्वथान्धत्व-प्रसङ्गः इत्यन्यथानुपपत्त्यापि ज्ञानस्य स्वप्रकाशत्वमवश्यमभ्युपगन्तव्यम् । किञ्च घटज्ञानवानहं ज्ञातो घटः इत्यादौ घटस्यैव विषयत्वं न तज्ज्ञानस्य व्यवसायात्मकस्य, तस्य स्वतः स्फुरणंनापि तादृग्व्यवहारोपपत्तेः । अस्तु तावदनुभूतौ प्रत्यक्षत्वं न तत्प्रत्यक्षेणानुभूतिनिष्ठानुभाव्यत्वं प्रत्यक्षयितुं शक्यं चेत्तदा कथमनुभूतौ स्वप्रकाशत्वानुमाने प्रत्यक्षेण बाधप्रसक्तिदोषः स्यात् । अन्यथाऽनुव्यवसायेन स्वीयविशिष्टवेद्यत्वग्रहणाङ्गीकारेऽनुव्यवसायस्यापि स्वेन वेद्यत्वापातात्सौगतमतानुमतिप्रसक्तिः । न चानुभूतिर्वेद्या, वस्तुत्वात्, घटवदिति वेद्यत्वसाधकवस्तुत्वहेतुकानुमानेन विरोध इतिवाच्यम्; व्याप्तिग्रहणासिद्धेः । तथा हि यद्यद्वस्तु तत्तद्वेद्यमिति व्याप्तिरभ्युपेया, तदायं प्रश्नो जागर्ति, यत्किल निरुक्तव्याप्तिग्रहणावसरे व्याप्तिग्राहकज्ञानं स्फुरति न वा ? आद्ये स्वेनैव स्वस्य स्फुरणे सौगत-मतानुमतं स्वप्रकाशत्वमभ्युपगतं स्यात् । द्वितीये ज्ञानरूपवस्तुविशेषस्य स्फुरणाभावे सर्वोप-संहारवती व्याप्तिरेव समाप्येत । तत्र वस्तुत्ववेद्यत्वयोर्व्याप्तिग्रहाभावे कुतोऽनुमानोदयः कुतस्तरां वाऽनुभूतित्वहेतौ सप्रतिसाधनताप्रसङ्गः । तस्माज्ज्ञानस्य स्वप्रकाशत्वं सिद्धमिति ।

प्रश्नः ५—स्वप्रकाशत्वघटकावेद्यत्वांशं परिष्कृत्य, अत्रापि तथात्वाद् व्याघात इति विभ्रमो माभूदिति पङ्क्त्या अभिप्रायं सप्रसङ्गं स्फुटयत ।

उत्तरम् ५—अथ लक्षणप्रमाणाभ्यां वस्तुसिद्धिरिति नियमेन पूर्वं लक्षणं समर्थयितुं चित्सुखाचार्यः प्रतिजानीते—अत्रोच्यते । तत्रावेद्यत्वेसत्यपरोक्षव्यवहारयोग्यत्वमिति स्वप्रकाशत्वलक्षणम् । अत्रापरोक्ष-व्यवहारयोग्यघटादावतिव्याप्तिवारणायावेद्यत्वे सतीतिविशेषणं, नित्यानुमेयेषु धर्मादिष्वतीतादिष्व-तिव्याप्तिवारणायापरोक्षव्यवहारयोग्येति विशेष्यदलम् । ननु नित्यानुमेयधर्मादीनामप्यागमवेद्यत्वे-नावेद्यत्वाभावान्न तत्रातिव्याप्तिर्येनापरोक्षव्यवहारयोग्यत्वदलं सार्थकमिति चेन्न, फलव्याप्यत्वरूप-वेद्यत्वस्य धर्मादिष्वभावात् । विषयसन्निकर्षदशायां विषयाकारवृत्तौ प्रतिफलितं चैतन्यं फलमित्युच्यते, तच्चेन्द्रियसन्निकर्षमन्तरेण न सम्भवति, विधिवाक्यरूपविशिष्टशब्दप्रमाणात्परोक्षबुद्धिवृत्तिसमुदय-मात्रेणैव धर्मादिव्यवहारो भवतीति वेदवादिप्रक्रिया सर्वानुमता, न तत्र धर्माद्याकारापरोक्षबुद्धिवृत्तिर-पेक्ष्यते, येन तत्र चैतन्यमभिव्यज्येत । न च योगिप्रत्यक्षत्वेन धर्मादिष्वपरोक्षत्वं शङ्कनीयमिति, धर्मादीनां चोदनैकप्रमाणगम्यत्वात् । न चैतावता योगिनां सर्वदर्शित्वाभावः शङ्कनीयः, सर्वदर्शित्व-पदेन योग्यसर्वदर्शित्वस्यैवाभिप्रेतत्वात् । तथा चाह भट्टपादः—

"यत्रातिशयो दृष्टः स स्वार्थानतिलङ्घनात् ।
दूरसूक्ष्मादिदृष्टौ स्यान्न रूपे श्रोत्रवृत्तितेति" ॥

अतो धर्मादिष्वतिव्याप्तिवारणार्थं निरुक्तस्वप्रकाशलक्षणे विशेष्यदलमावश्यकम् ।

न च केवलसाक्षिवेद्येष्वज्ञानान्तःकरणतद्धर्मादिषु शुक्तिरजतादिषु च निरुक्तस्वप्रकाशलक्षण-स्यातिव्याप्तिस्तदवस्थैवेति वाच्यम्; केवलसाक्षिवेद्यवस्तूनां निरुक्तशुक्तिरजतादीनामध्यस्तत्वेन सिद्धेस्तत्रापरोक्षयोग्यत्वाभावात् । न चैवमहमज्ञोऽहमिच्छामित्यादावपरोक्षव्यवहारदर्शनेन तत्रापि

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

योग्यता कल्पनीयेतिवाच्यम्; रजतादिव्यवहारायोग्येऽपि शुक्तिखण्डे रजतादिव्यवहारदर्शनात् । न चैवं रजतादिवद्घटादीनामप्यध्यस्तत्वेनैवापरोक्षव्यवहारसम्भवान्न तत्रापि योग्यताङ्गीकार्या, येन तत्रातिव्याप्तिवारणायावेद्यत्वविशेषणं सार्थकमिति वाच्यम्; प्रमाणविषयघटादीनां व्यवहारदशायामपरोक्षयोग्यताङ्गीकारात् । न चैवमप्यवेद्यत्वपदस्य परोक्षत्वपदस्य च सार्थक्येऽपि व्यवहारयोग्यतेति विशेषणं निरर्थकमिति वाच्यम्; भ्रमवारणाय तद्विशेषणस्याप्यावश्यकत्वादित्यत आह—अत्रापि तथात्वात् व्याघात इतिविभ्रमो माभूदिति तद्व्यवहारेणैव प्रतिवादिनामपि सम्प्रतिपन्नेनैव तत्स्फुटीक्रियते । न चावेद्यस्य व्यवहारयोग्यत्वं परस्परं व्याहतमिति वाच्यम्; अवेद्यस्य व्यवहारयोग्यत्वमित्यभ्युपगमेऽनिष्टप्रसञ्जनमिति पक्षे दोषाभावात् । नहि परेषामापाद्यापादकयोरुभयोरपि प्रसिद्धिरभिमता । व्यवहारविषयत्वेन वेद्यत्वापादनमिति पक्षे दोषाणां सप्रतिपक्षनिराकरणसमये निराकरिष्यमाणत्वात् तस्मादनाविलं स्वप्रकाशलक्षणमितिदिक् ।

प्रश्नः ६—अनुव्यवसायदूषणप्रकारो ग्रन्थोक्तदिशा विविच्य तदस्वीकारेऽहमिदमपश्यमिति स्मृतिः कथं सङ्गच्छते ? कथं वा घटज्ञानवानहमिति प्रतीतिः सिद्धयति ?

लक्षणप्रमाणाभ्यां वस्तुसिद्धिरिति नियमेनानुभूतेरवेद्यत्वे सत्यपरोक्षव्यवहारयोग्यत्वमिति लक्षणं सपदकृत्यमुपपाद्य तत्त्वप्रदीपिकायां चित्सुखाचार्यैरनुमानमपि दर्शितम् । तथाहि—अनुभूतिः, स्वयंप्रकाशा, अनुभूतित्वाद्यन्नैवं तन्नैवमिति व्यतिरेक्यनुमानेनानुभूतौ स्वप्रकाशत्वं प्रसाधितम् । तत्र सामान्यतो दृष्टानुमानेनोदयनरीत्या केवलव्यतिरेकिणः प्रामाण्यमुपपाद्य लीलावतीकाररीत्यापि तत्र प्रामाण्यमुपपादितम् । ततः शशविषाणोल्लिखिता भूरित्यादौ साध्याप्रसिद्धिदोषस्य सावकाशत्वमुक्तम् । अनुभूतिपक्षस्योभयवादिसम्मतत्वेनाश्रयासिद्धिदोषो वारितः । चन्द्रत्वसामान्यवत्कल्पितव्यक्तिभेदनिष्ठस्यानुभूतित्वहेतोः प्रसिद्धतया स्वरूपासिद्धिदोषोऽपि निराकृतः । एवं वेद्येषु घटादिषु विपक्षेष्वनुभूतित्वहेतोरसत्त्वेन विरुद्धत्वं निराकृतम् । नाप्यनैकान्तिकः, विपक्षाद्व्यावृत्तिरेव । नाप्यसाधारणः, सपक्षाभावात् । न च विपक्षे बाधकतर्काभावात्सन्दिग्धानैकान्तिकता; अनुभूतेरनुभाव्यत्वेऽनवस्थापातात्, व्यवहारस्य स्वरूपसत्तामात्रेणाप्युपपत्तेः । अनुभूतौ वेद्यत्वेऽनुभूतिस्वरूपासिद्धिरेव विपक्षे बाधकस्तर्कस्तेन न संन्दिग्धानैकान्तिकता । ननु यदा कदाचित्तत्सत्ताजिज्ञासोदये व्यवहारादिना केनचिल्लिङ्गेन साऽनुभूतिरपि प्रमीयते इति चेन्न, घट इति घटमनुभवामीति चानुभूतिद्वयातिरिक्तायास्तत्तदनुभूतिपरम्परावगाहिकायाः कस्याश्चिदनुभूतेरनुभवागोचरत्वात् ।

किञ्चानुभूतिरर्थप्रकाशनसमये न प्रकाशेत चेत्तर्हि तद्विषयेऽनन्तरक्षणे जिज्ञासोः संशयो, विपर्ययो, विपरीतप्रमा वाऽवश्यमुदियात् । न च कश्चिदमुमद्राक्षीन्न वा भवानिति पृष्टोऽनन्तरक्षणे सन्दिग्धे विपर्यस्यति संविदभावं वा प्रमिणोति, किन्तु निश्चिनोत्येव 'इदमहमद्राक्षमि'ति । तस्मादनुभूतिः स्वप्रकाशमानैव स्वार्थे व्यवहारमुत्पादयतीतियुक्तम् । न च सुखादिवदेवान्याधीनप्रकाशत्वेऽपि संशयाद्यविषयत्वोपपत्तिः; सति द्वितीयज्ञाने प्रथमज्ञानवदेवावश्यवेद्यत्वेऽनवस्थादौस्थ्यात् ।

किञ्चात्ममनःसंयोगो ज्ञानस्यासमवायिकारणं तार्किकैरभ्युपेयते । तत्र येनात्ममनःसंयोगेन घटानुभूतिरूपव्यवसायस्य जन्माभूत्तेनैवात्ममनःसंयोगेनानुव्यवसायस्य जन्माभ्युपेयते चेत्तर्हि कार्यकारणयोर्युगपदुत्पत्तिरनुभवविरुद्धाभ्युपेया स्यात् । असमवायिकारणभेद एव ज्ञानभेदहेतुस्तवाभिमतः । अथ भिन्नेनात्ममनःसंयोगेन मयानुव्यवसायस्य जन्माभ्युपेयते चेत्तर्हि व्यवसायजन्मापेक्षयाऽनेकक्षणविलम्बेन जायमानेनानुव्यवसायेन पूर्वंजातस्य व्यवसायस्यापरोक्षत्वं कथं स्यात् । ग्राहकज्ञानोत्पत्तिसमये गृह्यमाणस्य व्यवसायस्याभावादित्यर्थः ।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ननु घटज्ञानवानहमस्मि, ज्ञातो घट इति प्रत्यक्षेणैवानुभूतेर्वेद्यत्वप्रतीतेः स्वप्रकाशत्वानुमाने ावदोषोऽस्तीति चेन्न; वेद्यमन्तरेणापि तस्याः स्वतःस्फुरेण तादृग्व्यवहारोपपत्तेः । किञ्च टज्ञानवाहनहं विदितो घट इत्यनुव्यवसायेन घटस्यैव विदितत्वमवसीयते, न तु वित्तेः, विदितत्वस्य टविशेषणत्वात् । अपिचानुभूतेः प्रत्यक्षत्वेऽपि तत्प्रत्यक्षेणैव तदनुभाव्यत्वस्याप्रत्यक्षीकरणान्न त्यक्षविरोधः । अन्यथाऽनुव्यवसायेन स्वीयविशिष्टवेद्यत्वाङ्गीकारेऽनुव्यवसायस्यापि स्वेनैव द्यत्वापत्त्या सौगतमतानुमोदनप्रसङ्गः । न चानुभूतिर्वेद्या, वस्तुत्वाद्, घटवदित्यनुमानविरोध इति ाच्यम्; यद्यद्वस्तु तत्तद्वेद्यमिति वेद्यत्वसाधकानुमाने व्याप्तिरभ्युपगन्तव्या, तदायं प्रश्नो जागर्ति, यत्किल िरुक्तव्याप्तिग्रहणसमये तद्ग्राहकज्ञानं स्फुरति न वा? आद्ये स्वेनैव स्वस्य स्फुरणे सौगत-मतानुमतस्वप्रकाशत्वापत्तिः । स्फुरणं प्रति स्वस्य हेतुत्वानङ्गीकारे वेदान्तसिद्धान्ताभ्युपगमप्रसङ्गः । ज्ञानरूपवस्तु विशेषस्य स्फुरणाभावे सर्वोपसंहारवती व्याप्तिरेवास्तमियात्तत्र कुतोऽनुमानप्रसरः कुतस्तरां च प्रकृतस्य हेतोः सप्रतिसाधनताप्रसङ्गः । न चानुभूतौ वेद्यत्वानभ्युपगमे वस्तुत्वानुपपत्ति-रिति; स्वतः सिद्धावप्यनुभूतौ वस्तुत्वोपपत्तेः । तस्माल्लक्षणप्रमाणाभ्यामनुभूतौ स्वप्रकाशत्वसिद्धि-रिति दिक् ।

प्रश्नः ७—"उक्तवृत्तिव्याप्यत्वेऽपि स्फुरणव्याप्यत्वाभावापराधेन नाप्रामाणिकतापि, केवलव्यतिरेका-भावाद्" इति ग्रन्थं स्फोरयत ।

उत्तरम्—अथानुभूतिः, स्वयंप्रकाशा, अनुभूतित्वात्, यन्नैवं तन्नैवं यथाघट, इति सिद्धान्ति-नोक्तानुमाने प्रतिवादिनोद्भावितानखिलान् हेत्वाभासान् परिहृत्यान्त्ये चित्सुखाचार्याः प्राहुः—यत्किल लक्ष्यत्वन्यायविषयत्वहेत्वोरपि यथोक्तमूहनीयम् । ननु लक्षकमनुभूतिपदं, स्वलक्ष्यविषयकज्ञानजन्यं, लक्षकपदत्वात्, लक्षकगङ्गादिपदवदित्यनुमानेन लक्षकानुभूतिपदेऽपि लक्ष्यविषयकज्ञानजन्यत्वमिति चेन्न; हेतोरसिद्धतया स्वरूपासिद्धेः । नह्यनुभूतिपदे लक्षकत्वं तवाभिमतं, तद्वाचकत्वेनैव त्वयाभ्यु-पगम्यमानत्वात् । न चैवमनुभूतौ वेद्यत्वमनुमातुं शक्यमिति वाच्यम्; विकल्पासहत्वात् । तथाहि किं लक्ष्यज्ञानशब्देन लक्ष्यकर्मकं स्फुरणं? किंवा लक्ष्यविषयकं स्फुरणं? किंवा स्फुरणमात्रमुत तद्विषयान्तःकरणवृत्तिर्विवक्ष्यते? आद्येऽतीताद्यर्थकलक्षकपदेषु लक्षकपदत्वहेतोः सत्त्वेऽपि लक्ष्यकर्मक-स्फुरणसाध्यस्याभावादनैकान्तिकता । शेषविकल्पत्रये सिद्धसाधनता, अस्ति ह्यनुभूतिस्वरूपस्य स्फुरणस्यानुभूतिव्यवहारजनकतयाऽनुभूतिविषयकत्वम्, अस्ति चानुभूत्याकारान्तःकरणवृत्तौ तत्स्फुरणमात्रेऽपि चानुभूतिविषयकत्वम् । न चानुभूतिपदवाच्यस्य लक्ष्यं वा स्वप्रकाशत्वमिति शङ्कनीयमिति वाच्यम्; उभयवादिसम्मतस्फुरणमात्रे स्वप्रकाशत्वस्य प्रतिपादने दोषाभावात् । अन्यथा वेद्यत्वसाधनेऽपि विकल्पदोषपरिहारासम्भवात् । न चैवं घटत्वादिहेतुना घटेऽपि स्वप्रकाशत्व-साधनसम्भवेनाभाससमानयोगक्षेमता कल्पनीयेति वाच्यम्; लौकिकघटस्य पक्षत्वे प्रत्यक्षविरोधात्, अलौकिकघटस्य पक्षत्वे चाप्रसिद्धत्वेनाश्रयासिद्धेः । न च रूपादिहीनस्य यथा घटत्वमप्रसिद्धं तथाऽ-वेद्यस्यानुभूतित्वमप्यप्रसिद्धमिति वाच्यम्, तथासत्यनुभूतिविषये वादिनां वेद्यत्वावेद्यत्वयोर्विप्रतिपत्त्य-भावप्रसङ्गात् । न चानुभूतौ प्रमाणसत्त्वे वेद्यत्वादस्वप्रकाशत्वं प्रमाणाभावेऽसिद्धत्वादाश्रयासिद्धि-रिति वाच्यम्; प्रमाणजनितान्तःकरणवृत्तिव्याप्यत्वमात्रेण विषयत्वाभ्युपगमेऽपि स्वप्रकाशत्वा-व्याघातात् । न च घटादौ फलव्याप्यत्वेन प्रामाणिकत्वदर्शनादनुभूतावपि प्रामाणिकत्वसिद्धये फल-व्याप्यत्वमवश्यं स्वीकार्यमिति वाच्यम्; केवलव्यतिरेकाभावात् । तथाहि यत्र फलव्याप्यत्वं तत्र प्रामाणिकत्वमित्यन्वयसत्त्वेऽपि यत्र फलव्याप्यत्वाभावस्तत्र प्रामाणिकत्वाभाव इति व्यतिरेकस्य दुर्घटत्वात् । फलव्याप्यत्वरहितयोर्वृत्तिमात्रव्याप्ययोरतीतानागतयोर्भाट्टैः प्रामाणिकत्वस्वीकारात् ।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

चेष्टादिलिङ्गकानुमानगम्यस्य परकीयज्ञानस्य स्वाश्रये स्वविषयापरोक्षव्यवहारोत्पत्तौ ज्ञानान्तर-निरपेक्षत्वेन स्वप्रकाशत्वोपपत्तेश्च। अत्रैव चित्सुखाचार्याः प्राहुः—उक्तवृत्तिव्याप्यत्वेऽपि स्फुरणरूप-फलव्याप्यत्वाभावापराधेन नाप्रामाणिकताऽपि, केवलव्यतिरेकाभावादित्यादि। अत्रेदमाकूतम्—अचिद्वस्तुप्रकाशनाय तदाकारान्तःकरणवृत्तिस्तद्वृत्तिगतं चित्प्रतिफलनं चेत्युभयं तद्वस्तुप्रकाशनस्य प्रामाणिकत्वसिद्धयेऽपेक्ष्यते, चिद्रूपायामनुभूतौ प्रामाणिकत्वसिद्धयेऽन्तःकरणवृत्तिव्याप्यत्वमात्रम-पेक्ष्यते, नहि स्फुरणरूपफलव्याप्यत्वाभावमात्रापराधेनानुभूतिस्वप्रकाशेऽप्रामाणिकत्वं कल्पनीय-मितिभावः।

प्रश्नः ८—"त्वज्ज्ञानं तवापरोक्षव्यवहारयोग्यत्वे सति वेद्यं न भवति, ज्ञानत्वान्मदीयज्ञानवदिति" अनु-मानाभिप्रायं निर्दिश्य तत्र मदसमवेतत्वं मदन्यसमवेतत्वं वा समागतमुपाधिं समन्वयमुखेन निराकुरुत ?

उत्तरम्—अथानुभूतिः, स्वयंप्रकाशा, अनुभूतित्वाद्, यन्नैवं तन्नैवं यथा घट इति सिद्धान्तिना प्रयुक्तेऽनुमानप्रयोगे पूर्ववादिनोद्भावितान्निखिलान् दोषान्निराकृत्यानुभूतौ स्वप्रकाशत्वमनाविलं प्रसाधितम्। तदनन्तरं वक्ररीत्याभिनवान्वयव्यतिरेकप्रयोगं चित्सुखाचार्याः प्राहुः—किञ्च "त्वज्ज्ञानं, तवापरोक्षव्यवहारयोग्यत्वे सति वेद्यं न भवति, ज्ञानत्वात्, मदीयज्ञानवदिति। अत्र मदीयज्ञाने दृष्टान्ते ज्ञानत्वहेतुरस्ति, तत्र तवापरोक्षव्यवहारयोग्यत्वविशिष्टवेद्यत्वाभावरूपं साध्यमप्यस्ति। तथाहि दृष्टान्ते हेतुसाध्यव्याप्तिग्रहे विशेषणाभावप्रयुक्तविशिष्टाभावरूपं साध्यमुभयवादिसम्मत-मभिमतम्, नतु वेद्यत्वाभावरूपविशेष्याभावप्रयुक्तो विशिष्टाभावस्तत्रोभयवादिसम्मतः, किन्तु पक्षे त्वदीयज्ञाने निरुक्तविशेषणाभावो नास्तीत्यगत्या विशेष्याभावो वेद्यत्वाभाव एव ग्राह्यस्तेन वादिज्ञानेऽ-वेद्यत्वरूपं स्वप्रकाशत्वं साध्यं सिद्धयति। न चात्रानुमाने मदसमवेतत्वं मदन्यसमवेतत्वं वोपाधिः-शङ्कनीयः; त्वदीयात्मसमवेतेषु त्वदीयधर्मादिषु, असमवेतेषु परमाणुषु तवापरोक्षव्यवहारयोग्यत्व-विशिष्टवेद्यत्वाभावात्मकस्य प्रकृतसाध्यस्य सत्त्वेऽपि पूर्वोक्तोभयविधोपाध्यभावेन तदुपाधेः साध्य-व्यापकत्वाभावात्। एवं देवदत्तसमवेतधर्मादिषु प्रकृतसाध्यसत्त्वेऽपि देवदत्तासमवेतत्वमुपाधिर्नास्ति। तथा परमाणवो न कुत्रापि समवेताः सन्तीति। तस्मान्न तत्र साध्यसत्त्वे मदन्यसमवेतत्वमुपाधिः सम्भवत्यतः चित्सुखाचार्याः प्राहुः—साध्याव्याप्तेरित्यादिना। तदभिप्रायः पूर्वोक्तदिशा प्रस्फुटितः। एवं वक्ररीत्या वेद्यत्वाभावात्मकमनुभूतौ स्वप्रकाशत्वं सिद्धयतीति भावः।

प्रश्नः ९—पूर्वोत्तरपक्षाभ्यां स्वप्रकाशत्वं संसाध्यानुभूतिपदार्थो विवेचनीयः।

उत्तरम्—लक्षणप्रमाणाभ्यां वस्तुसिद्धिरितिनियमेन पूर्वं स्वप्रकाशस्य लक्षणं जिज्ञासति—अथ कोऽयं स्वप्रकाशार्थः ? तत्र स्वश्चासौ प्रकाशश्च स्वप्रकाश इत्यारभ्य सम्भावितेष्वेकादशलक्षणेषु सर्वेषु यथायथं दूषणानि पूर्ववादी प्रदत्तवान्। प्रमाणमपि युक्त्या तेन निराकृतम्। ततः पूर्व-वादिनोक्तान् लक्षणप्रमाणविषयकाक्षेपान् परिहर्तुं सिद्धान्ती प्रतिजानीते—अत्रोच्यते इत्यादिना। अवेद्यत्वे सति अपरोक्षव्यवहारयोग्यत्वं स्वप्रकाशत्वमिति स्वप्रकाशस्य लक्षणसम्भवे लक्षणासम्भवं वक्तुं न युक्तम्। अत्र घटादावतिव्याप्तिवारणाय सत्यन्तदलम्। अतीतादिषु, नित्यानुमेयेषु च धर्मादि-ष्वतिव्याप्तिवारणायापरोक्षव्यवहारयोग्यत्वमिति विशेष्यदलम्। ननु शुक्तिरजतादिवद्घटादीना-मपि वेदान्तिमतेऽध्यस्ततयाऽपरोक्षव्यवहारयोग्यत्वाभावादवेद्यत्वविशेषणस्य किञ्चिद्व्यवच्छेद्यं न दृश्यते इति चेन्न; ब्रह्मापरोक्षावबोधानन्तरं घटादीनां व्यावहारिकप्रमाणसिद्धानां बाधितत्वेऽपि

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

व्यवहारदशायां तेषामपरोक्षयोग्यताङ्गीकारात्। नहि संसारदशायां घटादयो न सन्तीति कश्चिदनुभवितुं वक्तुं वा शक्नुयादिति भावः।

एवम्—अनुभूतिः स्वयंप्रकाशा, अनुभूतित्वात्; यन्नैवं तन्नैवं यथा घट इत्यनुमानमनुभूतौ स्वप्रकाशत्वे प्रमाणमस्त्येव। न चात्रव्यतिरेक्यनुमाने स्वप्रकाशत्वरूपसाध्यस्याप्रसिद्धिरिति वाच्यम्; वेद्यत्वं, किञ्चिन्निष्ठात्यन्ताभावप्रतियोगि,धर्मत्वात्, शौक्ल्यवदिति सामान्यतोदृष्टानुमानेनानिर्धारिताधिकरणविशेषनिष्ठस्यावेद्यत्वधर्मस्य प्रसिद्धत्वात् केवलव्यतिरेकिणश्चोभयवादिसम्प्रतिपन्नापरोक्षव्यवहारयोग्यानुभूतिविशेषावलम्बनताया एव समर्प्यमाणत्वात् साध्याप्रसिद्ध्यभावात्। केवलव्यतिरेकिणि सर्वत्रैव प्रक्रियेयं प्रसरति, अन्यथा इच्छादीनामष्टद्रव्यातिरिक्तद्रव्याश्रितत्वेनात्मसाधने नैय्यायिकादिष्वपि पूर्वोक्तसर्वदोषप्रसक्तिस्तुल्यैव। तत्रापि साध्याप्रसिद्धिः, केवलव्यतिरेकित्वभङ्गः, असाधारणानैकान्तिकता चेति दोषाणां तुल्यत्वमिति। न चैवं सत्यप्रसिद्धविशेषणताया अदूषणतापत्तिरिति वाच्यम्; निरुक्तसामान्यतोदृष्टानुमानविषयत्वासम्भवे शशविषाणोल्लिखिता भूरित्यादौ साध्याप्रसिद्धिदोषस्य सावकाशत्वात्। तथाऽनुभूतेः प्रसिद्धत्वेनाश्रयासिद्धिरपि नास्ति। चन्द्रत्वसामान्यवदनुभूतित्वसामान्यस्य कल्पितत्वाकल्पितत्वाग्रहं विहायोभयवादिसिद्धत्वेन नात्र स्वरूपासिद्धिरिति। नापि विरुद्धो हेतुः, वेद्येषु विपक्षेष्वनुभूतित्वहेतोरवर्तमानत्वात्। विपक्षेऽनुभूतेरनुभाव्यत्वाभ्युपगमेऽनवस्थादोषो बाधकस्तर्कोऽस्ति। तस्मान्नसन्दिग्धानैकान्तिकता। किं चानुभूतिरर्थप्रकाशनावसरे न प्रकाशते चेत्तदानन्तरक्षणे तद्विषये जिज्ञासोः संशयो, विपर्ययो, विपरीतप्रमावोद्गच्छेत्, किन्तु भवानमुमद्राक्षीन्नवेति प्रश्नानन्तरं तथा न दृश्यते, अपितु इदमहमद्राक्षमिति निश्चिनोत्येव। अतोऽनुभूतिः प्रकाशमानैवार्थे व्यवहारं जनयतीति वक्तुं युक्तम्। किं चानुभूतेरनुभाव्यत्वस्वीकारेऽयमपि प्रश्नो जागर्त्ति, यत्किल तार्किकैरात्ममनःसंयोगो ज्ञानस्यासमवायिकारणमभ्युपेयते, तत्र येनात्ममनःसंयोगेन घटानुभूतिरूपव्यवसायो जायते, तेनैवात्ममनःसंयोगेन तदनुव्यवसायस्यापि जन्माभ्युपगम्यते चेत्तर्हि कार्यकारणयोर्युगपदुत्पत्तिरनुभवविरुद्धाऽभ्युपेया स्यात्। असमवायिकारणभेद एव ज्ञानभेदहेतुर्नैयायिकानामभिमतः। अन्यथापेक्षणीयान्तरासम्भवेन युगपदेव घटानुभवस्मरणयोरनुभवान्तरस्य च तद्विषयस्योत्पत्तिप्रसङ्गात्। अथ भिन्नेनात्ममनःसंयोगेनानुव्यवसायस्य जन्माभ्युपेयते चेत्तर्हि व्यवसायजन्मापेक्षयानेकक्षणविलम्बेन जायमानेनानुव्यवसायेन पूर्वजातस्य व्यवसायस्यापरोक्षत्वं न स्यात्। ग्राहकज्ञानोत्पत्तिसमये गृह्यमाणज्ञानस्याभावादिति दिक्।

प्रश्नः १०—वेदान्तिभिरभावस्यानुपलब्धिप्रमाणगम्यस्यापरोक्षव्यवहारयोग्यत्वाभ्युपगमात्तत्र फलाव्याप्यत्वे सत्यपरोक्षव्यवहारयोग्यत्वलक्षणस्वप्रकाशत्वापत्तिः कथं वारिता भवतीति निर्दिश्य "यद्व्यतिरेकेऽनिष्टप्रसञ्जनं तत्क्वचिन्मानयोग्यमिति ग्रन्थविवक्षितमाशयं स्पष्टीकुरुत।

उत्तरम्—नन्वभावस्थलेऽभावेन सह चक्षुरादीन्द्रियाणां विशेषणविशेष्यभावसन्निकर्षो वैशेषिकैः स्वीक्रियते, तेनाभावस्य प्रत्यक्षज्ञानविषयत्वमभ्युपेयते तथा च तत्र फलव्याप्यत्वस्यावश्यम्भावित्वेनावेद्यत्वाभावान्नातिव्याप्तिः स्वप्रकाशत्वस्य। वेदान्तिभिस्तु तादृशस्थलेचक्षुरादीन्द्रियाणामभावाधिकरणग्रहणे प्रक्षीणशक्तित्वेऽभावग्रहणे तेषामसामर्थ्यान्नानुपलब्धिप्रमाणगम्यस्याभावस्यापरोक्षव्यवहारयोग्यताभ्युपगम्यते। अतस्तत्र फलव्याप्यत्वाभावस्य विशेषणदलस्य सत्त्वेऽपि तादृशापरोक्षव्यवहारयोग्यत्वरूपस्य विशेष्यदलस्यासत्त्वेन स्वप्रकाशत्वलक्षणस्यावेद्यत्वेसत्यपरोक्षव्यवहारयोग्यत्वस्यातिव्याप्त्यभावादिति भावः।

अथोदयनरीत्याऽनुभूतौ स्वप्रकाशत्वसाधनाय केवलव्यतिरेकिणः प्रामाण्यमुपपाद्य लीलावतीकाररीत्या तत्र प्रामाण्यमुपपादयितुमाह—यद्वेति। "यद्विपर्ययेऽसमीहितप्रसक्तिस्तत्क्वचिन्मानयोग्य-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मि"त्यनुमानं प्रवर्तते, न सर्वत्र। इहानुभूतिरनुभाव्या भवति न वेति सन्दिग्धस्थले वादिविप्रत्तिपत्तौ सत्यां वेद्यत्वस्वीकारेऽनिष्टानवस्थाप्रसक्तिस्तत्रैव निरुक्तरीत्याऽनुमानप्रवृत्तिर्न सर्वत्र। तथा च सामान्यतोऽनुमानेन मानयोग्यत्वाधिगमे सति विशेषप्रमाणापेक्षायां व्यतिरेकिण उपन्यासात् न तत्र साध्याप्रसिद्धिदोषप्रसङ्गः। अन्यथा—इच्छादीनामष्टद्रव्यातिरिक्तद्रव्याश्रितत्वेनात्मसाधने नैयायिकादिष्वपि सर्वदोषप्रसक्तिस्तुल्यैव। तत्राष्टद्रव्यातिरिक्तद्रव्यस्याप्रसिद्धावप्रसिद्धविशेषणता, प्रसिद्धौ च हेतोस्तत्र सत्त्वेऽन्वयव्यतिरेकितया केवलव्यतिरेकित्वासम्भवः, अवृत्तौ चासाधारणानैकान्तिकता। अप्रसिद्धविशेषणतायाः स्थलं त्वुक्तसामान्यतोदृष्टानुमानगोचरत्वासम्भवे शशविषाणोल्लिखिता भूरित्यादीति बोध्यम्।

प्रश्नः ११— "चिद्रूपत्वादकर्मत्वात्स्वयंज्योतिरिति श्रुतेः।
आत्मनः स्वप्रकाशत्वं को निवारयितुं क्षमः॥ इति पूर्वापरग्रन्थसहितेयं कारिका व्याख्येया।

उत्तरम्—सरलरीत्याऽनुभूतित्वहेतुनाऽनुभूतौ स्वप्रकाशत्वं प्रसाध्य "विवादपदानि ज्ञानानि घटज्ञानान्यत्वे सति वेद्यत्वानधिकरणानि, ज्ञानत्वात्पटज्ञानवदित्यादिवक्ररीत्यापि तत्र स्वप्रकाशत्वं प्रसाधितं, तदेव स्वप्रकाशत्वमात्मस्वप्रकात्वेऽतिदिष्टम्—एतेनेत्यादि। तत्रात्मनः स्वप्रकाशत्वसाधकान् हेतून् श्लोकेन संकलयति चित्सुखाचार्यः। तथाहि—आत्मा, संविद्रूपः, संवित्कर्मतामन्तरेणापरोक्षत्वात्संवेदनवदिति प्राभाकरं प्रत्यनुमानम्। नैयायिकादीन् प्रत्यनुमानं च घटतज्ज्ञानयोः सम्बन्धः, आत्मनिष्ठः, ज्ञाननिष्ठत्वात्पदविषयत्ववदिति। एतेनात्मनश्चिद्रूपत्वसिद्धिः। विपक्षे चात्मनः संशयविपर्यासगोचरत्वापत्तिर्बाधिका। एवमात्मा, स्वप्रकाशो, ज्ञानाकर्मत्वात्, आत्मनो वेद्यत्वस्वीकारे ज्ञानस्याश्रयो य आत्मा स एव तज्ज्ञानविषयः स्यादिति कर्मकर्तृभावविरोधप्रसङ्गः स्यात्। न च सुखविशिष्टस्याहं सुखीति ज्ञानकर्मत्वं केवलस्य कर्तृत्वमित्याकारभेदादविरोध इति वाच्यम्, गमनादिक्रियास्वपि तथात्वेन कर्मकर्तृभावविरोधस्य सर्वत्रोच्छेदप्रसङ्गः स्यात्।

ननु नात्मनः स्वप्रकाशत्वं, तत्तदर्थसंवेदनाश्रयतया तस्य स्फुरणोपपत्तेः। न चास्य क्रियाफलभाजोऽपि कर्मत्वं, परसमवेतक्रियाफलशालित्वाभावात्। न च मानसप्रत्यक्षमप्येतत्तुल्यमिति वाच्यम्; जानातेः सदा सकर्मकतया कर्मणा व्याप्तस्य ज्ञानत्वस्य कर्मरूपव्यापकनिवृत्त्या ज्ञानत्वरूपव्याप्यस्यापि निवृत्तेरितिचेन्न, संविद्भिन्नस्य संवित्कर्मत्वेनैवापरोक्षत्वनियमादात्मनः कर्मत्वाभावेऽपरोक्षत्वानुपपत्तेः। न चात्मनः संविदाश्रयतयाऽपरोक्षत्वमभ्युपेयते इति वाच्यम्; संवेदिता संविदाश्रयतयाऽपरोक्षो न भवति, अपरोक्षत्वात्, संवेदनवदित्यनुमानविरोधात्। संवित्सत्तायां प्रकाशव्यभिचारे प्रकाशान्तराधीनव्यवहारवत्त्वाभ्युपगमे च कदाचित्संशयादिगोचरत्वस्यैव विपक्षे बाधकत्तर्कत्वात्। संविदाश्रयतयात्मनो घटादिज्ञाने भासमानत्वस्वीकारे घटादिवदेव चाक्षुषत्वप्रसक्तेः। न चेष्टापत्तिः; नीरूपस्य द्रव्यस्यात्मनः चाक्षुषत्वायोगात्। आत्मा चाक्षुषज्ञाने न प्रकाशते, अरूपिद्रव्यत्वादाकाशवदिति प्रतिप्रयोगसम्भवाच्च।

श्लोकोक्तं तृतीयहेतुं व्याचष्टे—अत्रायं पुरुषः स्वयंज्योतिरिति श्रुतेश्चात्मा स्वप्रकाशः सिद्ध्यति। ननु स्वप्ने नात्मा स्वप्रकाशस्तदा मनसोऽनुपरमात्। न च गजाद्याकारेण परिणतस्य मनसो ज्ञानकर्मतयावस्थितेः करणान्तराभावाच्चात्मैव तत्र स्वयंज्योतिरिति वाच्यम्, चक्षुरादिवदिन्द्रियत्वेन मनसः प्रत्यक्षत्वानुपपत्तेः। तस्मान्मनःसन्निकर्षजन्यज्ञानाधारत्वेन स्वयंशब्दवाच्यः आत्मा ज्योतिरित्युच्यते। अथवा ज्योतिःसाधनत्वेनात्मा ज्योतिःशब्दवाच्यः, तथा च श्रुतिः "वाचैवायं ज्योतिषाऽस्ते इत्यादि न त्वात्मा स्वयंज्योतिरिति द्रव्यस्य गुणत्वानुपपत्तेरितिचेन्न, मनः प्रत्यक्षं, ज्ञानासमवायिकारणाधार-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्वात्, आत्मवदित्यनुमानेन मनसोऽपि प्रत्यक्षत्वोपपत्तेः। न च मनसः प्रत्यक्षत्वाभ्युपगमे इन्द्रियत्व-व्याकोप इति वाच्यम्; तस्य साक्षिवेद्यत्वस्वीकारेऽप्यदोषात्। तस्मादात्मनः स्वप्रकाशत्वमनवद्यम्।

प्रश्नः १२— "सम्बन्धस्याश्रयत्वेन विज्ञानासमवायिनः।
इन्द्रियत्वाविघाताच्च मनः प्रत्यक्षमात्मवत्॥" इति कारिका तथा सप्रसङ्गं व्याख्यायतां यथाहेतुदलीयविशेषणविशेष्ययोः सार्थक्यं भवेत्।

उत्तरम्—आत्मनः स्वप्रकाशत्वसाधकहेतवः—
"चिद्रूपत्वादकर्मकत्वात्स्वयंज्योतिरिति श्रुतेः।
आत्मनः स्वप्रकाशत्वं को निवारयितुं क्षमः॥" इति श्लोकेन संकलिताः
तेषु "स्वयं ज्योतिरिति श्रुतेरिति तृतीयं हेतुं व्याचष्टे चित्सुखाचार्यः। तथाहि अत्रायं पुरुषः स्वयंज्योतिरिति श्रुतेरात्मा स्वयंप्रकाशः सिध्यति।"

ननु स्वप्ने नात्मा स्वयं प्रकाशस्तत्र मनसोऽनुपरमात्। न च मनसो गजाद्याकारेण परिणतस्य ज्ञानकर्मतयाऽवस्थितेः करणान्तराभावाच्चात्मैव स्वयंज्योतिरिति वाच्यम्; चक्षुरादिवदिन्द्रियत्वेन मनसः प्रत्यक्षत्वानुपपत्तेः। तस्मान्मनःसन्निकर्षजन्यज्ञानाधारत्वेन स्वयंशब्दवाच्य आत्मा ज्योतिरित्युच्यते। अथवा ज्योतिःसाधनत्वादात्मा ज्योतिःशब्दवाच्यः, तथा च श्रुतिः—"वाचैवायं ज्योतिषा" "अग्निनैवायं ज्योतिषे" त्यादिः। न त्वात्मा स्वयंज्योतिरिति द्रव्यस्य गुणत्वानुपपत्तेरिति चेन्मैवमित्यादिना पूर्वोक्तदोषस्य निवारितत्वात्। तत्र श्लोकेनानुमानमाह—

सम्बन्धस्याश्रयत्वेन विज्ञानासमवायिनः।
इन्द्रियत्वाविघाताच्च मनःप्रत्यक्षमात्मवत्॥ इति

श्लोकेन संकलितमनुमानाकारं प्रयोगं दर्शयति। मनः, प्रत्यक्षं, ज्ञानासमवायिकारणाधारत्वात्, आत्मवदित्यनुमानेन मनसोऽपि प्रत्यक्षत्वोपपत्तेः। अत्र हेतावसिद्धिवारणायासमवायिकारणाधारत्वं विशेषणम्; परमाण्वादिषु व्यभिचारवारणाय ज्ञानेतिपदम्। न चेन्द्रियस्यातीन्द्रियत्वनियमान्मनसः प्रत्यक्षत्वस्वीकारे तत्रेन्द्रियत्वव्याकोप इति वाच्यम्; तस्यैन्द्रियकज्ञानाविषयत्वेऽपि साक्षिवेद्यत्वाभ्युपगमेऽदोषात्। तस्मात्सम्बन्धस्य द्विष्ठत्वेन विज्ञानासमवायिकारणस्यात्ममनःसंयोगस्याधारत्वेन साक्षिवेद्यस्य मनसः इन्द्रियत्वाविघाततया प्रत्यक्षत्वमिति निरस्तसमस्तशङ्काकलङ्कावकाशमात्मनः स्वप्रकाशत्वं सिद्धमिति भावः।

प्रश्नः १३— चक्षुः प्रकाशनाजन्यरूपवद्वीक्षणक्षमम्।
रूपिग्राहीन्द्रियत्वेन यथैव स्पर्शनेन्द्रियम्॥
प्रसङ्गपुरःसरमिमां कारिकां व्याख्याय कारिकोक्तानुमाने रूपरहितेन्द्रियत्वस्यौपाधित्वं कथन्न इति विवेचयत!

उत्तरम्—तमसो भावरूपताममृष्यमाणा वादिनः शङ्कन्ते—ननु तमो न भावरूपं भावेष्वनन्तर्भावात्। तथाहि षट्पदार्थान्यतमत्वरूपं व्यावर्तमानं भावत्वं व्यावर्त्तितम्। तमसो गुणान्तर्भावं दूषयति स्म—नापि गुणा इत्यादिना। कर्मान्तर्भावं वारयति स्म, नापि कर्मेति। संयोगविभागयोरसमवायिकारणं कर्मेति कर्मलक्षणस्य तमस्यभावान्न तमः कर्मेति। सामान्यादित्रये तमसोऽनन्तर्भावं दर्शयति स्म—नापि सामान्येत्यादिना। तस्मात्षट्स्वपि भावेष्वनन्तर्भावात्तद्भावे चोपलम्भकाभावाच्च प्रमाभावस्तम इति शङ्कार्थः।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तमालश्यामलज्ञाने निर्बाधे जाग्रति स्फुटे ।
द्रव्यान्तरं तमः कस्मादकस्मादपलप्यते ॥ इति श्लोकेन

तमसि भावरूपत्वे प्रमाणं प्रदर्शितम् । रूपवत्त्वेन तमसि द्रव्यत्वं प्रसाध्य चलत्वादिक्रियावत्त्वेनापि तत्र द्रव्यत्वं साधयति स्म । किं च तमसि चलत्वमन्यानुविधानपक्षं विकल्प्य दूषयति स्म । तथाहि—किमालोकावरकातपत्राद्यनुविधानम् ? किंवा निवर्तकप्रदीपाद्यनुविधानम् ? नाद्यः, निश्चलेऽपि पर्वतादौ तच्छायायाश्चलनोपलम्भात् । नापि द्वितीय; वैपरीत्यादालोकागमने गच्छति छाया, निर्गमने चागच्छति छायेति प्रतीतेः । तद्विरोधित्वाच्च तदनुविधानुपपत्तेः । अतस्तमसि चलनं स्वाभाविकं न त्वन्यानुविधानमिति भावः । पूर्वं रूपवत्यपि तमसि प्रकाशनिरपेक्षचक्षुषः प्रवृत्तिरुक्ताधुना तत्रानुमानमप्याह—

चक्षुःप्रकाशनाजन्यरूपवद्वीक्षणक्षमम् ।
रूपिग्राहीन्द्रियत्वेन यथैव स्पर्शनेन्द्रियम् ॥ इत्यादि

प्रकाशनमालोकस्तेनाजन्यो यो रूपवद्द्रव्यसाक्षात्कारस्तत्समर्थमिति प्रतिज्ञा । तत्र हेतुमाह—तृतीयपादेन रूपिग्राहकेन्द्रियत्वात् । स्पर्शनेन्द्रियवदित्युदाहरणम् । श्लोकसंगृहीतमनुमानं विशदयति—चक्षुरालोकाजन्यरूपिद्रव्यसाक्षात्कारजनकं, रूपिग्राहकेन्द्रियत्वात्, त्वगिन्द्रियवदिति । न चात्र रूपरहितेन्द्रियत्वमुपाधिरिति वाच्यम्; यद्रूपवदिन्द्रियं तदालोकाजन्यरूपिद्रव्यसाक्षात्कारजनकं न भवति घ्राणवदिति व्यतिरेकव्याप्तौ रूपवदग्राहकत्वस्यैवोपाधित्वात् । तस्मात्सिद्धमेतत् यत्तमोद्रव्यान्तरं भावरूपं चेति । तमसो द्रव्यत्वसिद्धौ समुत्थितं वादमुपसंहृत्य प्रयोजनमाह—इत्थमालोकवदेव भावरूपाज्ञानतमोविरोधिन आत्मनो जगदवभासकस्य ज्योतिःशब्दवाच्यत्वमिति । अस्य प्रकरणस्याभावविलक्षणाविद्यासिद्धिः प्रयोजनमिति फलितार्थः ।

प्रश्नः १४—तमसो भावरूपत्वे "निर्बाधे जाग्रति स्फुटे" इति पदानामभिप्रायमाविष्कृत्य ग्रन्थोक्तानुमानेन तमसश्चक्षुर्ग्राह्यत्वं साधयत ।

उत्तरम्—तमसोभावरूपत्वं समर्थयितुमुपक्रमते—अत्रोच्यते इत्यादिना—

तमालश्यामलज्ञाने निर्बाधे जाग्रति स्फुटे ।
द्रव्यान्तरं तमः कस्मादकस्मादपलप्यते ॥ इति श्लोकेन

तमसि भावरूपत्वे प्रमाणं दर्शयति । तमालवच्छ्यामलं तम इति ज्ञाने निर्बाधे स्फुरति सति कस्मान्निष्कारणं द्रव्यान्तरं तमोऽपलप्यते इति पदयोजना जाग्रतीत्यनेनाप्रामाणस्य, स्फुटपदेन संशयस्य निर्बाधपदेन च विपर्ययस्य पर्युदास इति तात्पर्यम् । अस्ति हि तमस्तमालमालाश्यामलमिति प्रतीतिः । न चाप्रतीतावेवायं प्रतीतिर्विभ्रम इति वाच्यम्; प्रतीतिमन्तरेण भ्रमव्यवहारस्यासम्भवापत्तेः । न च शौक्ल्याभावे नीलव्यवहारवदालोकाभावे श्यामलशब्दप्रयोगस्यौपचारिकत्वमिति वाच्यम्; मुख्यव्यवहारे बाधकाभावात् । न चालोकनिरपेक्षस्य चक्षुषो रूपप्रतीतिजनकत्वानुपपत्तिर्मुख्यव्यवहारे बाधिकेति वाच्यम्; आलोकविरोधिनस्तमसश्चालोकाभावेन व्यञ्जनीयतयाऽलोकनिरपेक्षचाक्षुषत्वोपपत्तेः । न चान्यत्र चक्षुषस्तथा सामर्थ्यं न दृश्यते इति वाच्यं, सामर्थ्यस्य कार्यगम्यत्वात् । न च रूपवत्प्रतियोगिकस्यालोकाभावस्य घटाभावस्येव नालोकनिरपेक्षचक्षुर्विषयत्वमिति वाच्यम्; तमसो भावरूपत्वपक्षेऽपि तदुत्तरस्य तुल्यत्वात् । न च चक्षुर्व्यापाराभावेऽपि निमीलितनयनस्य पुरुषस्य तमसो दृश्यमानत्वान्न तमसि चाक्षुषत्वमिति वाच्यम्; पक्ष्मपटलान्तर्वर्तितमसश्चक्षुर्व्यापारादेवोपलब्धेः । पिहितकर्णस्य श्रोत्रव्यापारादेवान्तरशब्दोपलब्धिवदिति दिक् ।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रश्न: १५—आक्षेपसमाधानाभ्यां तमसो भावरूपत्वं विशदयत ।

उत्तरम्—ननु तमो न भावरूपं, षट्सु भावपदार्थेष्वनन्तर्भावात् । तथाहि क्षितिसलिलातमसु चतुर्दशगुणकेषु, तेजसि एकादशगुणे, नवगुणे मातरिश्वनि, मनसि चाष्टगुणे, नभसि षड्गुणे, दिक्कालयोः पञ्चगुणयोरविनाशिनोरनन्तर्भावात् । अन्तर्भावे तु तावद्गुणवत्त्वप्रसङ्गात्, आत्मादावन्तर्भावे नित्यत्वापत्तेश्च । नापि नवद्रव्यादन्यत्रान्तर्भावयितुं युक्तम्; निर्गुणस्य द्रव्यत्वानुपपत्तौ द्रव्यान्तरत्वस्य सुतरामनुपपत्तेः । नापि तमो गुणेष्वन्तर्भावयितुं युक्तम्; रूपान्तर्भावे पृथिव्यादित्रितयगुणवत्त्वे च तत्सहचारिणां गुणान्तराणामप्युपलब्धिप्रसङ्गात् । नापि नभोनभस्वतोर्गुणः, तयोररूपत्वात् । नापि तमो दिक्कालमनसां गुणः; तेषां विशेषगुणरहितत्वात् । नाप्यात्मनः, तस्य बाह्येन्द्रियप्रत्यक्षगुणानधिकरणत्वात् । नापि तमः कर्मण्यन्तर्भावयितुं शक्यम्; तस्य संयोगविभागयोरकारणत्वात् । नापि तमः सामान्यविशेषसमवायेष्वन्तर्भावयितुं युक्तम्; तेषां व्यक्त्याश्रयसम्बन्धिनामुपलब्धिं विनाऽनुपलम्भनियमात् । न चास्य तमस उपलम्भसम्भव इति वाच्यम्, तदुपलम्भकबाह्याभ्यन्तरप्रमाणाभावात् । तस्मात्षट्स्वपि भावेष्वनन्तर्भावाद्भावे वोपलम्भकाभावाच्चालोकाभावस्तम इत्याक्षेपः ।

तत्र समाधानमाह—तमस्तमालमालाश्यामलमिति प्रतीत्याऽलोकनिरपेक्षचाक्षुषज्ञानविषयत्वमबाधितमस्ति । ननु तमसि गन्धाभावे तद्व्याप्तं नीलरूपमपि न स्यादिति चेन्न; अनुष्णाशीतस्पर्शस्य भूम्यां गन्धादिव्याप्तस्यापि गन्धाभाववति वायौ प्रतीत्यभ्युपगमेन गन्धाभाववति तमसि नीलरूपप्रतीतेरदोषात् । यदि पाकजानुष्णाशीतस्पर्शो गन्धादिव्याप्तस्तर्हि पाकजनीलरूपमेव गन्धादिव्याप्तमिति तुल्यम् । न च स्पर्शाभावात्तमसो रूपवत्त्वाभाव इति वाच्यम्; रूपग्राहकप्रत्यक्षविरोधे हेतोः कालात्ययापदिष्टतया रूपवत्त्वाभावानुमानानुदयात् । अन्यथा रूपाभावेन पवनेऽपि स्पर्शाभावानुमानस्य दुर्निवारत्वात्, अन्यत्र रूपवतामेव स्पर्शवत्त्वनियमात् । न च तमःपरमाणवो, द्रव्यानारम्भकाः, स्पर्शरहितत्वात्, मनोवदिति स्पर्शरहितत्वहेतुना तमःपरमाणूनामनारम्भकत्वमनुमातुं युक्तं; तत्र वैयर्थ्योपाधेः सद्भावात् । नहि शरीरतया विषयतयेन्द्रियतया वा मन—आरब्धद्रव्यस्य भोगसाधनता सम्भावनीयेति; दृष्टान्ते वैयर्थ्योपाधेः साध्यव्यापकत्वेऽपि पक्षे तमसि स्पर्शरहितत्वहेतुसद्भावेनोपाध्यभावात्साधनाव्यापकत्वात् । महतो रूपवतस्तमसो भोगसाधकत्वसम्भवान्न तत्र वैयर्थ्योपाधिरिति तात्पर्यम् ।

किं च वेदान्तिमते न तमोऽवयवैरारब्धं तमः; किन्तु मेघमण्डलान्महाविद्युदादिजन्मवन्मूलकारणान्मायाविशिष्टचैतन्याद् ब्रह्मणस्तमोजन्माभ्युपगमे न कश्चिद्विरोधोस्तीति भावः । वस्तुतस्तु न मनसोऽनारम्भकत्वमभ्युपगन्तुं युक्तम्; तस्यापि सावयवद्रव्यत्वेन परिणामित्वाभ्युपगमात् स्पर्शरहितस्य चात्मनः सर्वजगदुपादानत्वाभ्युपगमाच्च । किं च तमो द्रव्यं, चलनक्रियावत्त्वादालोकवदित्यनुमानेनापि तमो द्रव्यान्तरं सिद्धयति । न च तमसि चलनमालोकावरकातपत्राद्यनुविधानमिति शङ्कनीयं, निश्चलेऽपि पर्वतादौ तच्छायायाश्चलनोपलम्भात् । नापि तमोनिवर्तकप्रदीपाद्यनुविधानमिति वक्तुं युक्तम्; वैपरीत्यादालोकागमने गच्छति छायेतिप्रतीतेर्निर्गमने चागच्छतीतिप्रतीतेः, तद्विरोधित्वाच्च तदनुविधानानुपपत्तेरिति दिक् ।

प्रश्न: १६—तमसो भावरूपत्वं कथं ग्रन्थकृता प्रसाधितमिति साधु सयुक्तिकं साधयत ।

उत्तरम्—अथ तमसि भावरूपत्वे श्लोकेन प्रमाणं दर्शयति—

"तमालश्यामलज्ञाने निर्बाधे जाग्रति स्फुटे ।
द्रव्यान्तरं तमः कस्मादकस्मादपलप्यते ॥"

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तमालवच्छ्यामलं तमः इति निर्बाधे ज्ञाने स्फुरति सति कस्मान्निष्कारणं तमो द्रव्यान्तरमपलप्यते इति तदर्थः। न चाप्रतीतावेवायं प्रतीतिविभ्रमः, भ्रमव्यवहारस्य तत्प्रतीतिं विना वक्तुमशक्यत्वात्। न च शौक्ल्याभावे नीलव्यवहारवदालोकाभावे श्यामलशब्दप्रयोग औपचारिक इति वाच्यम्; मुख्यव्यवहारे बाधकाभावात्। न चालोकनिरपेक्षस्य चक्षुषो रूपप्रतीतिजनकत्वानुपपत्तिर्मुख्ये बाधिकेति वाच्यम्; आलोकविरोधिनस्तमसश्चालोकाभावेन व्यञ्जनीयतयाऽलोकनिरपेक्षचाक्षुषत्वोपपत्तेः। न चान्यत्र चक्षुषस्तथा सामर्थ्यं न दृश्यते इति वाच्यम्; सामर्थ्यस्य कार्यगम्यत्वात्। न च रूपवत्प्रतियोगिकस्यालोकाभावस्य घटाभावस्येव नालोकनिरपेक्षचक्षुर्विषयत्वमिति वाच्यम्; तमसो भावरूपत्वपक्षेऽपि तदुत्तरस्य तुल्यत्वात्। न च चक्षुर्व्यापाराभावेऽपि निमीलितचक्षुषः पुरुषस्य तमसो दृश्यमानत्वान्न तमसि चाक्षुषत्वमिति वाच्यम्; पक्ष्मपटलान्तर्वर्तितमसश्चक्षुर्व्यापारादेवोपलब्धेः, यथा पिहितकर्णस्य श्रोत्रव्यापारादेवान्तरशब्दोपलब्धिस्तद्वत्।

ननु नीलरूपं पृथिव्यां गन्धव्याप्तं दृष्टम्, तद्गन्धाभावे तमसि कथमुपलभ्यते इति चेन्न; अनुष्णशीतस्पर्शस्य भूम्यां गन्धादिव्याप्तस्यापि गन्धाभाववति वायौ प्रतीत्यभ्युपगमवद् गन्धाभाववति तमसि नीलरूपप्रतीतेरदोषात्। यदि पाकजानुष्णाशीतस्पर्शो गन्धादिव्याप्तस्तर्हि पाकजनीलरूपमेव गन्धादिव्याप्तमिति तुल्यम्। सद्भावग्राहिणः प्रत्यक्षस्योभयत्र समानत्वात्। न च तमो नीरूपं स्पर्शाभावादाकाशवदित्यनुमानेन तमसो रूपवत्त्वाभावसिद्धिरिति वाच्यम्, रूपग्राहकप्रत्यक्षविरोधेन हेतोर्बाधितत्वात्। अन्यथा रूपाभावेन पवनेऽपि स्पर्शाभावानुमानस्य दुर्निवारत्वात्। अन्यत्र पृथिव्यादिषु रूपवतामेव स्पर्शवत्त्वनियमात्। न च तमःपरमाणवो, द्रव्यानारम्भकाः, स्पर्शरहितत्वात् मनोवदिति तमसोऽनारम्भकत्वमनुमातुं युक्तं; तत्र वैयर्थ्योपाधेः सद्भावात्। तथाहि मनसि दृष्टान्ते द्रव्यानारम्भकत्वं साध्यमस्ति तत्र शरीरेन्द्रियविषयतया तदारब्धेषु भोगसाधनत्वानुपपत्तेर्वैयर्थ्यो—पाधिरप्यस्ति, स्पर्शरहितत्वं हेतुस्तमसि पक्षेऽपि विद्यते, तत्र वैयर्थ्योपाधिर्नास्तीति महतो रूपवतस्तमसो भोगसाधकत्वसम्भवादिति साध्यव्यापकत्वे सति साधनाव्यापकत्वमिति वैयर्थ्योपाधिरिति। वस्तुतस्तु नास्माकमनिर्वचनीयवादिनां तमोऽवयवैः किञ्चिदारब्धमभिप्रेतम्, मेघमण्डलान्महाविद्युदादिजन्मवन्मूलकारणान्मायाविशिष्टचैतन्याद्ब्रह्मणस्तमोजन्माभ्युपगमे न कश्चिद्विरोधोऽस्तीति भावः।

आपाततो मनसोऽप्यारम्भकत्वाभावं स्वीकृत्य वैयर्थ्योपाधिरुक्ता, वस्तुतस्तु मनसोऽनारम्भकत्वं नास्ति तस्यापि सावयवत्वेन परिणामित्वाभ्युपगमेन तत्र साध्यवैकल्यमस्ति। आत्मनश्च स्पर्शरहितस्य सर्वजगदुपादानत्वाभ्युपगमाच्च सव्यभिचारोऽस्तीतिभावः। तथा तमो, द्रव्यान्तरं, चलत्वादालोकवदित्यनुमानेन तमसि द्रव्यान्तरत्वसिद्धिः। तच्च तमसि चलनं स्वाभाविकं नत्वन्यानुविधानम्। पूर्वं रूपवत्यपि तमस्यालोकनिरपेक्षचक्षुषः प्रवृत्तिरुक्ता, तत्र श्लोकेनानुमानमप्याह—चक्षुरालोकजन्यरूपवद्द्रव्यसाक्षात्कारक्षमं, रूपिद्रव्यग्राहकेन्द्रियत्वात्त्वगिन्द्रियवदित्यर्थः। न च रूपरहितेन्द्रियत्वमुपाधिः; तत्र व्यतिरेकव्याप्तौ रूपवद्ग्राहकत्वस्यैवोपाधित्वात्। तस्मात्तमसो द्रव्यत्वसिद्धौ भावरूपाज्ञानतमोविरोधिनो जगदवभासकस्यात्मन आलोकवदेव ज्योतिःशब्दवाच्यत्वमिति भावः।

प्रश्नः १७—विवादास्पदीभूतः प्रपञ्चः, सत्यः, प्रमाणसिद्धत्वात्, आत्मवदित्यनुमानेन किं साधयितुमिच्छतीति विलिख्य सिद्धान्तपक्षः समर्थनीयः।

उत्तरम्—प्रपञ्चमिथ्यात्वसाधकं लक्षणं प्रमाणं च निराकृत्य प्रपञ्चस्य सत्यत्वे प्रत्यक्षादिप्रमाणमुक्त्वाऽधुनाऽनुमानं दर्शयति—विवादास्पदीभूतः प्रपञ्चः, सत्यः, प्रमाणसिद्धत्वादात्मवदिति। तत्र वियदादेरात्मनां च सत्यभेदमनुमानेन साधयति—अयं घट एतन्निष्ठबाध्यभेदातिरिक्तभेदाश्रयः,

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

द्रव्यत्वात्पटवदित्यनुमानतोऽपि वियदादेरात्मनां च सत्यभेदसिद्धिः। नच भेदस्य सत्यत्वे दृग्दृश्ययोः सम्बन्धानुपपत्तिर्बाधिकेति वाच्यम्; तत्तत्प्रतिपत्तिहेतुभूतेन्द्रियलिङ्गादेस्तत्तद्विषयसम्बन्धादेव तदुत्पन्नज्ञानानां तत्तद्विषयं प्रति नियमसिद्धावन्तरेणापि सम्बन्धान्तरमतिप्रसङ्गाप्रसङ्गात्। तदेवं मिथ्यात्वे लक्षणप्रमाणयोरसम्भवादनुमानागमाभ्यां प्रपञ्चस्य सत्यत्वापादानान्न मिथ्यात्वमिति पूर्वपक्षे सिद्धान्तं वक्तुमुपक्रमते तत्र तावन्मिथ्यात्वलक्षणं श्लोकेन संकलयति—

"सर्वेषामेव भावानामाश्रयत्वेन सम्मते।
प्रतियोगित्वमत्यन्ताभावं प्रति मृषात्मता॥"

स्वाश्रयत्वेनाभिमतेऽत्यन्ताभावं प्रति प्रतियोगित्वं सर्वेषां पदार्थानां मिथ्यात्वमिति तदर्थः। पटादिभावानां स्वाश्रयत्वेनाभिमतास्तन्त्वादयो ये, तन्निष्ठात्यन्ताभावप्रतियोगितैव तेषां मिथ्यात्वम्। स्वकारणातिरिक्तस्थले कार्याणां सत्ता नास्ति, तत्रापि कार्यसत्ता न स्यात्तर्हि बलात्सर्वेषां भावानां मिथ्यात्वं सेत्स्यतीति। न चात्मवदनाश्रयेषु नित्येषु परमाणुषु निरुक्तमिथ्यात्वलक्षणस्याव्याप्तिरिति वाच्यम्; ब्रह्मभिन्नस्य सर्वस्य कार्यत्वेन व्यवहारदशायां रजतादिवत्स्वाधिष्ठानाश्रितत्वेन स्वीकारात्। नाप्यतिव्याप्तिः, सत्यस्य ब्रह्मणो निराश्रयत्वात्तस्य स्वाश्रयनिष्ठात्यन्ताभावप्रतियोगितायाः शङ्कितुमप्यशक्यत्वात्। न च प्रदेशवृत्तितयाऽभ्युपगतेषु संयोगशब्दादिषु निरुक्तमिथ्यात्वलक्षणस्य वर्तमानतयाऽर्थान्तरताशङ्कनीया, भावाभावयोरेकाधिकरणताभ्युपगमे सर्वत्र तथात्वापत्त्या विरोधस्य दत्तजलाञ्जलिताप्रसङ्गात्। प्रदेशोपाधिभेदेन तत्र विरोधसमाधाने भावाभावयोर्भिन्नाधिकरणत्वेन तत्र लक्षणस्यासम्भवित्वेन नातिव्याप्तिर्नाप्यर्थान्तरतेति भावः।

मिथ्यात्वसिद्धौ प्रमाणं श्लोकेन दर्शयति—

अंशिनः स्वांशगात्यन्ताभावस्य प्रतियोगिनः।
अंशित्वादितरांशीव दिगेषैव गुणादिषु॥

विमतः पटः, एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगी, अवयवित्वात्पटान्तरवत्। पटान्तरस्यैतत्तन्तुनिष्ठात्यन्ताभावादर्थान्तरता स्यात्तद्वारणाय विमतपदम्। एतत्तन्तुभिरनारब्धे पटान्तरे साध्यप्रसिद्धिः। अवयवित्वेन तस्यैव सम्मतत्वम्, तेन प्रतिज्ञाहेत्वोरविरोधः। गुणादिष्वप्युक्तमनुमानमतिदिष्टम्। तथाहि—एतद्रूपमेतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगि, रूपत्वादितररूपवत्। एवं स्पर्शादिष्वपि मिथ्यात्वं सिध्यति। एतच्चलनमेतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगि, चलनत्वादितरचलनवत्। तथा घटादिदृष्टान्ते व्याप्तिग्रहानन्तरं जातित्वहेतुना तन्तुत्वसत्तादिषु तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वरूपं मिथ्यात्वमनुमीयते। एवं समवायः स्वसमवायिनिष्ठात्यन्ताभावप्रतियोगी सम्बन्धत्वात्संयोगादिसम्बन्धवत्। तथाऽयं विशेषः, एतदात्मनिष्ठात्यन्ताभावप्रतियोगी, विशेषत्वादितरविशेषवदिति रीत्या गुणकर्मसामान्यविशेषसमवायेष्वपि तादृग् मिथ्यात्वं सिद्धं भवति। तस्माल्लक्षणप्रमाणाभ्यां ब्रह्मभिन्ने सर्वस्मिन् प्रपञ्चे मिथ्यात्वसिद्ध्या प्रपञ्चसत्यत्ववाद्यभिमतपक्षो निराकृतो वेदितव्य इति दिक्।

प्रश्नः १८—शब्दान्तराभ्याससंख्यादेश्च कर्मभेदप्रतिपादकप्रमाणस्य भेदमिथ्यात्वप्रतिपादनेऽप्रामाण्यापत्तिं प्रसक्तां निरस्य भेदमिथ्यात्वे जडचेतनविभागभङ्गप्रसङ्गः कथं वारणीय इति निरूप्यताम्।

उत्तरम्—प्रपञ्चमिथ्यात्वलक्षणं दशधा विकल्प्य निराकृतं पूर्ववादिना। ततः प्रपञ्चमिथ्यात्वसाधने प्रत्यक्षमनुमानमागमश्चापि न प्रमाणमित्युक्तम्। केषाञ्चिदागमवाक्यानामापाततः प्रपञ्चनिषेधकत्वेन प्रतीयमानत्वेऽपि प्रपञ्चनिष्ठसत्यत्वापादकप्रबलज्येष्ठप्रत्यक्षप्रमाणविरोधेन न तेषामाग-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मवाक्यानां प्रपञ्चमिथ्यात्वप्रतिपादकत्वमुपपादयितुं शक्यम्। किं च "न हिंस्यात्सर्वा भूतानि, 'अग्नीषोमीयं पशुमालभेत" इत्यादिवाक्यानां परस्परविगीतत्वेन व्याहतत्वं, प्रत्यक्षादेर्न तथात्वं, येन प्रत्यक्षादावपि प्रामाण्यं सन्दिह्येत। किं च "शब्दान्तराभ्याससंख्यासंज्ञागुणप्रकरणान्तरैः कर्मभेदः" इति न्यायेन शब्दान्तराभ्याससंख्यादेश्च कर्मभेदप्रतिपादकप्रमाणस्य भेदमिथ्यात्वेऽप्रामाण्यप्रसक्तिः। तथाहि—यजति, ददाति, जुहोतीत्यादौ धात्वन्तरभेदे सति कर्मभेदेन भावनाभेदोऽभ्युपेयः, तेनैव भावनायाः कृतावच्छेदकत्वात्। समिधो यजति, तनूनपातं यजतीत्यादौ पञ्चकृत्वो यजतिश्रुतौ भिन्नविधितया कर्मभेदोऽभ्युपगतः। अन्यथा पुनः पुनरेकस्य विधेः श्रवणमनर्थकं स्यात्। "सप्तदश-प्राज्यापत्यान् पशूनालभते" इत्यत्र प्रजापतिदेवताया एकत्वेऽपि सप्तदशसंख्याश्रवणात्कर्मभेदोऽभ्यु-पगतः। "अथैष ज्योतिरथैष विश्वज्योतिरि"त्यत्र मिथो विलक्षणनामभेदात्कर्मभेदोऽवश्यमभ्युपेयः। "वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमि"त्यत्रामिक्षावाजिनरूपगुणभेदात्कर्मभेदोऽभ्युपेयः। प्रकृताग्नि-होत्रापेक्षयामासाग्निहोत्रं कर्मप्रकरणभेदाद्भिन्नमेव, विच्छिन्नप्रकरणतया प्रत्यभिज्ञाभावान्मासादिगुण-विशिष्टं कर्मान्तरमेव। अग्निहोत्रादिनामोपदेशस्तु अग्निहोत्रादिधर्मातिदेशार्थमिति भावः। न च तस्य लोकसिद्धभेदानुवादकत्वसम्भवः, तादृक्कर्मापूर्वभेदस्य लोकतोऽसिद्धेः, सिद्धत्वे च शब्दान्तराद्य-धिकरणानारम्भकत्वप्रसङ्गात्।

अत्रोच्यते सिद्धान्तिना—स्वाश्रयत्वेनाभिमतयावन्निष्ठात्यन्ताभावप्रतियोगित्वं मिथ्यात्वमिति लक्षणम्। अनुमानं तत्र प्रमाणं, विमतः पटः एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगी, अंशित्वात् पटान्तर-वदिति लक्षणप्रमाणाभ्यां प्रपञ्चमिथ्यात्वसिद्धिः। न च प्रपञ्चस्य मिथ्यात्वे कर्मभेदप्रतिपादकस्य निरुक्तशब्दान्तरादेरप्रामाण्यप्रसक्तिरिति वाच्यम्; घटपटादिवद् व्यावहारिकभेदस्य सत्यत्वाभ्युपगमा-त्पारमार्थिकसत्यत्वप्रतिपादने तेषां शब्दान्तराद्यागमानामौदासीन्यात्।

न चैवं भेदस्य मिथ्यात्वे जड़चेतनभेदभङ्गप्रसङ्ग इति वाच्यम्; "सर्वं खल्विदं ब्रह्मे"तिश्रुत्या घटोऽस्ति, घटो भाति, घटः प्रिय इति सार्वजनीनानुभूत्या च सर्वत्र सच्चिदानन्दब्रह्मणोऽनुगततया सर्वेषां नामरूपात्मकप्रपञ्चानां चैतन्यब्रह्मरूपत्वाभ्युपगमात्। न च सर्वलोकानुभवेन जड़चेतनयो-र्भेदोऽवश्यमभ्युपगन्तव्य इति वाच्यम्; बुद्धौ चित्प्रतिबिम्बप्रयुक्त्यैव लोके चेतनत्वाभ्युपगतत्वात्। चित्प्रतिबिम्बाभावे जडत्वाभ्युपगमाच्च। तस्माच्चित्प्रतिबिम्बभावाभावाभ्यां जडचेतनभेदोऽभ्युपेयते न परमार्थत इति दिक्।

प्रश्नः १९—भेदस्य मिथ्यात्वे शब्दान्तराभ्याससंख्यागुणप्रकरणान्तरैः कर्मभेदप्रतिपादनं कथं न विरुद्ध-मिति निर्दिशत।

उत्तरम्—लक्षणप्रमाणाभ्यां वस्तुसिद्धिरिति नियमेन स्वाश्रयत्वेनाभिमतयावन्निष्ठात्यन्ताभाव-प्रतियोगित्वं मिथ्यात्वमिति लक्षणेन, विमतः पटः, एतन्निष्ठात्यन्ताभावप्रतियोगी, अवयवित्वात्परा-न्तरवदित्यनुमानेन च नामरूपात्मके सर्वस्मिन् प्रपञ्चे मिथ्यात्वं सिद्ध्यति। ननु भेदस्य मिथ्यात्वे शब्दान्तराभ्याससंख्यासंज्ञागुणप्रकरणान्तरैः कर्मभेदप्रतिपादनं कथं न विरुध्यते, तथाहि—यजति, ददाति, जुहोतीत्यादौ धात्वन्तरभेदे सति कर्मभेदेन भावनाभेदोऽङ्गीकर्तव्यः कुतः, कृतानुबन्धित्वात्। समिधो यजति, इडो यजति, बर्हिर्यजतीत्यादौ पञ्चकृत्वो यजति श्रुतौ भिन्नविषयतया कर्मभेदः सिद्धान्तितः। अन्यथा पुनः पुनरेकस्य विधेः श्रवणं निरर्थकं स्यादिति भावः। "सप्तदशप्राज्यापत्यान् पशूनालभते" इत्यत्र प्रजापतिदेवताया एकत्वेऽपि सप्तदशसंख्याश्रवणात्कर्मभेदोऽभ्युपगन्तव्यः। तथा प्रतिपशुदृष्टार्थमेकादशावदानसिद्धिः। 'अथैष ज्योतिरथैष विश्वज्योतिरि'त्यत्र मिथो विलक्षणनाम-भेदात्कर्मभेदोऽवश्यमभ्युपेयः। 'वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमि'त्यत्रामिक्षावाजिनरूपगुणभेदा-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्रम्

कर्मभेदोऽभ्युपगन्तव्यः। आमिक्षात्मकगुणविशिष्टकर्मणोऽपेक्षया वाजिनगुणविशिष्टं कर्म ततोऽन्यदितिभावः। प्रकृताग्निहोत्रापेक्षया मासाग्निहोत्रं कर्म प्रकरणभेदाद्भिन्नमेव, विच्छिन्नप्रकरणतया प्रत्यभिज्ञाभावान्मासादिगुणविशिष्टस्य कर्मान्तरत्वादितिभावः। अतो निरुक्तरीत्या कर्मभेदप्रतिपादकागमविरोधान्न भेदस्य मिथ्यात्वं वक्तुं युक्तमिति चेन्न;—

सर्वेषामेव भावनामाश्रयत्वेन सम्मते।
प्रतियोगित्वमत्यन्ताभावं प्रति मृषात्मता॥ इति श्लोकेन

मिथ्यात्वस्य लक्षितत्वात्,

अंशिनः, स्वांशगात्यन्ताभावस्य प्रतियोगिनः।
अंशित्वादितरांशीव दिगेषैव गुणादिषु॥

इत्यनुमानेन प्रमितत्वाच्च मिथ्यात्वलक्षणस्यापलपितुमशक्यत्वात्। न चोक्तरीत्यां शब्दान्तराभ्याससंख्यासंज्ञागुणप्रकरणान्तरैः कर्मभेदप्रतिपादनं कथं न विरुध्यते इति वाच्यम्; घटपटादिवत् लौकिकपारमार्थिकत्वभेदमात्रस्य तद्विषयत्वाभ्युपगमेन त्रिकालाबाध्यसत्यत्वप्रतिपादने तेषां शब्दान्तराद्यागमानामौदासीन्यात्।

ननु प्रपञ्चस्य मिथ्यात्वसाधकानुमाने मिथ्यात्वं तदेवानुमानं स्वयमेव साधयति किमप्यन्यद्वानुमानम्। आद्ये स्वात्मनि वृत्तिविरोधः, अन्त्येऽनवस्थापत्तिरिति चेन्न; शब्दशब्दः सर्वान् शब्दान् स्वमपि च यथा विषयीकरोति, प्रपञ्चः सत्यः; प्रमाणसिद्धत्वादात्मवदित्यनुमानं तव मते यथाप्रपञ्चसत्यत्वानुमानं स्वस्मिन्नपि सत्यत्वं साधयति, यथा वा स्वाध्यायोऽध्येतव्य इत्यध्ययनविधिः स्वाध्यायशब्दः सर्ववेदराशिवत् स्वस्याप्यध्ययनं विधत्ते, तद्वदत्रानुमानेनापि मिथ्यात्वसाधने विरोधाभावादिति दिक्।

प्रश्नः २०— अनादिभावरूपं यद्विज्ञानेन विलीयते।
तदज्ञानमिति प्राज्ञा लक्षणं सम्प्रचक्षते॥

इति कारिकामिमां चित्सुखाचार्यरीत्या व्याख्यायाज्ञानस्य भावरूपत्वसाधकं प्रमाणं प्रदर्शयत।

उत्तरम्—प्रपञ्चस्य मिथ्यात्वसाधने लक्षणप्रमाणयोरुपपन्नत्वेनात्मनि द्वैतप्रपञ्चोऽयमनाद्यनिर्वचनीयाविद्याविलसित इति सिद्धान्तिभिरुक्तम्। ततः पूर्ववादिनाऽविद्यायामनिर्वचनीयत्वं पञ्चधा विकल्प्य प्रदूषितम्। न केवलमनाद्यनिर्वचनीयाविद्याया लक्षणाभावः, प्रत्युत तत्र प्रमाणमपि न पश्यामः। नन्वज्ञोऽहमित्यनुभवस्तत्र प्रमाणमिति चेन्न; तस्य ज्ञानाभावविषयत्वेनाप्युपपत्तेः, त्वदभिमतयोरनादित्वभावत्वयोरस्यानुभवस्यौदासीन्याच्च। नापि 'न किञ्चिदवेदिषम्' 'गाढं मूढोऽहमासमिति सुप्तोत्थितस्य परामर्शानुपपत्तिसिद्धः सौषुप्तिकानुभवस्तत्र प्रमाणमिति वाच्यम्, तस्य सुप्तोत्थितस्य तवाभिमतस्य तादृक्परामर्शस्य सौषुप्तज्ञानाभावगमकतयाऽन्यथासिद्धेः। न च ज्ञानाभावस्य सिद्धिर्धर्मिप्रतियोगिज्ञानाधीना, तथा च सुषुप्तौ निर्विकल्पकसाक्षिचैतन्यगोचरत्वेन ज्ञानाभावस्य कथं सिद्धिरिति वाच्यम्; भेदादिवज्ज्ञानाभावस्यापि कल्पकदशायां भेदादिवदेव सुस्पष्टव्यवहारविषयत्वोपपत्तेः। न चाज्ञानं, न ज्ञानाभावरूपम्, अभावमानागम्यत्वात्, सम्प्रतिपन्नवदित्यनुमानेन भावरूपमज्ञानं सिध्यतीति वाच्यम्; मानागम्यत्ववस्तुसिद्धयेऽनुमानप्रयोगस्य व्याहतत्वात्, अनुमानप्रयोगे च मानागम्यत्वस्य व्याहतत्वात्। नापि 'तम आसीत्' 'मायां तु प्रकृतिं विद्यात्' 'इन्द्रो मायाभिरि' त्याद्यागमस्तत्र प्रमाणमिति वाच्यम्, तमःशब्देन प्रलयकालीनजीवज्ञानाभावस्यैवोच्यमानत्वात्, मायाशब्देन परमेश्वरज्ञानशक्तेरेव परमेश्वरस्वरूपभूतायाः संकीर्त्तनात्। तस्मादनिर्वचनीयाज्ञाने लक्षणप्रमाणयोरसम्भवेन न तादृगज्ञानसिद्धिरिति पूर्ववादिनोक्तौ सत्यां सिद्धान्ती—

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'अनादिभावरूपं यद्विज्ञानेन विलीयते ।
तदज्ञानमिति प्राज्ञा लक्षणं सम्प्रचक्षते ॥' इति श्लोकेन

लक्षणं संकलयति ।

अनादित्वे सति भावत्वे च सति ज्ञाननिवर्त्यत्वमज्ञानत्वमिति विदुषामज्ञानपदेनाभिमतमिति तदर्थः । न च कुत्रचिदज्ञानेऽव्याप्तिरिति शङ्कनीयम्; सर्वेषामज्ञानानामुक्तत्रयधर्मानुगमात् । नाप्यतिव्याप्तिः, अनादेर्भावस्यात्मनो निवर्त्यत्वाभावेन ज्ञाननिवर्त्यत्वस्याप्यभावात् । न च पार्थिवपरमाणूनां विशेषगुणेष्वतिव्याप्तिरिति वाच्यं; तेषां स्वरूपतोऽनङ्गीकृतत्वेन दूरतोऽनादित्वाङ्गीकारात् । न चानादिभावरूपे आत्मनि विरोधादज्ञानस्यानादिभावत्वाभ्युपगमे निरुक्तलक्षणासम्भवमिति वाच्यं; भावाभावविलक्षणस्याज्ञानस्याभावविलक्षणत्वमात्रेण भावत्वोपचारादनादिभावत्वेनानिवर्त्यत्वानुमानानुपपत्तेः । न चैवंविधाज्ञाने मानाभाव. शङ्कनीयः; विगीतं देवदत्तनिष्ठप्रमाणज्ञानं, देवदत्तनिष्ठप्रमाऽभावातिरिक्तानादेर्निवर्तकं, प्रमाणत्वाद्यज्ञदत्तादिगतप्रमाणज्ञानवदित्यनुमानस्य विद्यमानत्वात् । किञ्च 'न किञ्चिदवेदिषमिति परामर्शसिद्धः सौषुप्तिकानुभवोऽप्यत्र प्रमाणम् । ननु सुप्तोत्थितस्यात्र सौषुप्तिकज्ञानाभावस्यानुमानमिति चेन्न तदनुमापकलिङ्गाभावात् । किञ्च तम आसीत्, मायां तु प्रकृतिं विद्यादित्यागमोऽप्यत्र प्रमाणम । न च तमःशब्देन ज्ञानाभावो वक्तुं शक्यः, नासीदित्यनेनाभावस्यापि प्रतिषेधात् । न चेयं परमेश्वरस्य ज्ञानस्वरूपभूताशक्तिर्माया; भूयश्चान्ते विश्वमायानिवृत्तिः, मायामेतां तरन्ति ते 'इत्यादिना ज्ञाननिवर्त्ये मायाशब्दप्रयोगदर्शनात् । तस्माल्लक्षणप्रमाणाभ्यामज्ञानस्यानादिभावरूपत्वं सिद्धिमिति दिक् ।

प्रश्नः २१—दृश्यप्रपञ्चस्य मिथ्यात्वे पूर्वपक्षेण लक्षणप्रमाणासम्भवमुत्थाप्य ताभ्यां मिथ्यात्वं स्थापयत ।

उत्तरम्—अथ प्रपञ्चस्य मिथ्यात्वसिद्धे दशधालक्षणं विकल्पितं, तत्सर्वं पूर्ववादिना निराकृतम् एवं मिथ्यात्वसिद्धये प्रत्यक्षमनुमानमागमश्च प्रमाणमपि निरस्तम् । तद्विपरीतं प्रत्यक्षादिभिः प्रपञ्चसत्यत्वं च प्रसाधितम् । ततः सिद्धान्तिभिर्मिथ्यात्वं साधयितुं श्लोकेन लक्षणं संग्रहीतम्—

सर्वेषामपि भावानामाश्रयत्वेन सम्मते ।
प्रतियोगित्वमत्यन्ताभावं प्रति मृषात्मता ॥ इति वाक्येन प्रति

पादितम् । तथाहि—पटादीनां सर्वेषां भावनां स्वाश्रयत्वेनाभिमतास्तन्त्वादयो ये भावास्तन्निष्ठात्यन्ताभावप्रतियोगित्वमेव मिथ्यात्वम् । स्वकारणातिरिक्तस्थले कार्याणां सत्ता नास्ति, तत्रापि कालत्रये सत्ता न स्यात्तर्हि गलेपादुकान्यायेन मृषात्वमेव पर्यवस्येत् । न चात्मवदनाश्रयेषु नित्येषु परमाणुषु निरुक्तमिथ्यात्वलक्षणस्याव्याप्तिरिति वाच्यम्, ब्रह्माभिन्नसर्वप्रपञ्चस्य कार्यत्वेन व्यवहारदशायां शुक्त्यादौ रजतादिवत्स्वाश्रितत्वेन स्वीकारात् । नाप्यतिव्याप्तिः; सत्यस्य ब्रह्मणो निराश्रयतया तस्य ब्रह्मणः स्वाश्रयनिष्ठात्यन्ताभावप्रतियोगितायाः शङ्कितुमप्यशक्यत्वात् । न च प्रदेशवृत्तितयाभ्युपगतेषु संयोगशब्दादिषु निरुक्तमिथ्यात्वलक्षणस्य वर्तमानतयाऽर्थान्तरता स्यादिति वाच्यम् भावाभावयोरेकाधिकरण्याभ्युपगमे सर्वत्रैव तथात्वापत्त्या विरोधस्य जगति दत्तजलाञ्जलिताप्रसङ्गात् मूलशाखादिप्रदेशोपाधिभेदेन वा तत्र विरोधसमाधाने भावात्यन्ताभावयोर्भिन्नाधिकरणत्वेन लक्षणस्य तत्र विद्यमानतयाऽतिव्याप्त्यभावात् ।

नापि, मिथ्यात्वसिद्धौ प्रमाणाभावः शङ्कनीयः; तत्रानुमानप्रमाणस्य विद्यमानत्वात् । तथाहि विमतः पटः, एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगी, अवयवित्वात्पटान्तरवत् । ननु तादृशप्रतियोगित्वस्य प्रामाणिकत्वे तदभावानामपि प्रामाणिकत्वस्वीकारप्रसङ्गः, तथा च तैरभावैरेव द्वैतापत्तिः, प्रामाणिकाभावप्रतियोगिनां च भावानामपि प्रामाणिकतया न तत्र मिथ्यात्वं साधयितुं युक्तं, निरुक्तप्रतियोगि

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्वस्य प्रातिभासिकत्वऽर्थान्तरता स्यादिति चेन्न; भावेन कथञ्चिदद्वैतव्याकोपस्य वक्तुं शक्यत्वेऽप्यभावेनाद्वैतव्याकोपस्य वक्तुमशक्यत्वात्। वस्तुतस्तु तत्त्वावेदकप्रमाणोपनीतस्याद्वैतस्य व्यावहारिकैर्भावैरभावैर्वा न व्याकोपशङ्कावसरः। नापि प्रामाणिकाभावप्रतियोगिनोपि शुक्तीदमंशरजताकारद्वयालिङ्गितस्य संसर्गस्य 'इदं रजतमि'त्येकज्ञानोपनीतस्य केवलतद्व्यवहारोपनीतस्य वा बुद्धिवृत्तिरूपरजताकारोपारोहिणो बहिष्ट्वस्य वा क्वचिद्देशे काले वा केनचिदपि वादिना सत्ताभ्युपेयते, येन प्रामाणिकाभावप्रतियोगिनो वा सत्तां प्रतिपद्येरन्। द्वितीयस्तु विकल्पोऽनङ्गीकारपराहतः। न च धर्मिग्राहकप्रमाणबाधः, धर्मिणस्तत्त्वावेदकप्रमाणसिद्धत्वानभ्युपगमात्। न चाश्रयासिद्धिः, सांव्यवहारिकप्रमाणोपनीतस्याप्याश्रयत्वोपपत्तेः। न च प्रपञ्चस्तत्त्वावेदकप्रमाणगोचरः, धर्मित्वादात्मवदित्यनुमानेन त्वदीयानुमानस्य बाध इति वाच्यम्; आत्मत्वोपाधिना पूर्वपक्षोक्तानुमानस्य निराकृतत्वात्। न च व्यतिरेकोपसंहारस्थलाभावः; अनात्मनः शुक्तिरजतसंसर्गादेस्तत्त्वावेदकप्रमाणविषयस्योभयवाद्यभिमतस्य व्यतिरेकोपसंहारस्थलस्य सद्भावात्, धर्मित्वहेतोः शुक्तिरजतादिसंसर्गधर्मिणि व्यभिचाराच्च। न च शुक्तिरजतसंसर्गो न धर्मी, मिथ्यात्वाच्छुक्तिरजतवदिति वाच्यम्; मिथ्यात्वहेतुं प्रति संसर्गस्य धर्मित्वाधर्मित्वयोर्वक्तुमशक्यत्वात्।

नाप्यवयवित्वहेतुरसिद्धः; पटस्यावयवित्वे वादिप्रतिवादिनोरविवादात्। नापि विरुद्धः; विपक्षे आत्मनि अंशित्वाप्रवृत्तेः। नाप्यनैकान्तिकः, विपक्षाद्व्यावृत्तेरेव। नापि प्रत्यक्षेण बाधः; आकाशमरूपि, विभुत्वादात्मवदित्यनुमाने नभसि नीलिमेति प्रत्यक्षस्य विभ्रमत्वान्न यथा प्रत्यक्षबाधस्तद्वदिह तन्तुषु पट इति प्रत्यक्षस्यापि विभ्रमत्वान्मिथ्यात्वानुमानेऽप्रसरत्वात्। तस्माल्लक्षणप्रमाणाभ्यां प्रपञ्चे मिथ्यात्वसिद्धिरिति दिक्।

प्रश्न २२—अज्ञानस्य लक्षणं ग्रन्थोक्तं पदकृत्यपुरःसरं विलिख्य—

'देवदत्तप्रमा तत्स्थप्रमाभावातिरेकिणः।
अनादेर्ध्वंसनीयत्वादविगीतप्रमा यथा'॥

इतिकारिका चित्सुखीग्रन्थोक्तशास्त्रार्थनिरूपणद्वारा स्पष्टीकरणीया।

उत्तरम् २२—अथ लक्षणप्रमाणयोर्निरूपणान्नानिर्वचनीयाज्ञानसिद्धिरिति पूर्ववादिभिरुक्तम्। तत्र सिद्धान्ती श्लोकेन लक्षणं संकलयति।

अनादिभावरूपं यद्विज्ञानेन विलीयते।
तदज्ञानमिति प्राज्ञा लक्षणं संप्रचक्षते॥ इति॥

अनादित्वे सति भावत्वे च सति विज्ञाननिरसनीयमित्यज्ञानलक्षणमिह विवक्षितम्। न तावदिहाव्याप्तिः; सर्वेषामप्यज्ञानानामुक्तरूपत्रयानुगमात्। नाप्यात्मनि प्राचीनमतानुसारेण पार्थिवपरमाणूनां विशेषगुणेषु श्यामत्वादिष्वतिव्याप्तिरिति वाच्यम्, अनादेर्भावरूपस्यात्मनो निवर्त्यत्वाभावेन ज्ञाननिवर्त्यत्वस्याप्यभावात्, तदन्यस्य परमाणोस्तद्गतश्यामत्वादेश्च स्वरूपतोऽनङ्गीकृतस्य दूरत एवानादित्वाङ्गीकारात्। न च यदनादित्वे भावरूपं तदनिवर्त्यं यथात्मेत्यनुमानविरोधादसम्भवमिदं लक्षणमिति वाच्यम्; भावाभावविलक्षणस्याज्ञानस्याभावविलक्षणत्वमात्रेण भावत्वोपचारादनादिभावत्वेनानिवर्त्यत्वानुमानानुपपत्तेः।

न चैवंविधे मानासम्भवः शङ्कनीयः;

"देवदत्तप्रमा तत्स्थप्रमाभावातिरेकिणः।
अनादेर्ध्वंसिनी, मात्वादविगीतप्रमा यथा"॥

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इति श्लोकेन तादृगनुमानस्योपपादयितुं शक्यत्वात् । विगीतं देवदत्तनिष्ठप्रमाणज्ञानं, देवदत्तनिष्ठप्रमाभावातिरिक्तानादेर्निवर्तकं, प्रमाणत्वाद्यज्ञदत्तादिनिष्ठप्रमाणज्ञानवदिति श्लोकोक्तानुमानस्याकारः । तत्रानादेर्निवर्त्तकमित्युक्तौ प्रागभावमादायार्थान्तरता स्यात्तद्वारणाय प्रमाभावातिरिक्तेति । तावल्लक्षणत्वे साध्याप्रसिद्धिस्तद्वारणाय देवदत्तनिष्ठेति । दृष्टान्ते निरुक्तसाध्यलक्षणस्य यज्ञदत्तनिष्ठप्रमाप्रागभावमादाय साध्यप्रसिद्धिः सुस्थिरा । पक्षे यज्ञदत्तनिष्ठप्रमाज्ञाने निरुक्तसाध्यलक्षणमज्ञानमन्तरेण संघटयितुमशक्यमिति भावरूपमनादित्वविशिष्टमज्ञानं सिध्यति । न चैतदसमवेतत्वमेतदन्यसमवेतत्वं वा तत्रोपाधिरिति वाच्यम्; एतत्समवेतसुखादीनामेतन्निष्ठप्रमाभावातिरिक्तानादेः स्वप्रागभावस्य निवर्तकत्वेन साध्ये विद्यमानेऽपि त्वदुक्तोपाध्यभावेन साध्यव्यापकत्वाभावात् । न च विवादपदमनादेर्भावस्यानिवर्तकं, पदार्थत्वाद्, घटवादिति सत्प्रतिपक्षः; सत्ताद्रव्यत्वादेरनिवर्तकत्वेन सिद्धसाधनत्वात् । ननूभयवादिसम्मतानादिभावविलक्षणस्य साध्यत्वविवक्षायामदोष इति वाच्यम्; त्वन्मते तस्याप्रसिद्धतयाऽप्रसिद्धविशेषणत्वापत्तेः । किञ्च 'न किञ्चिदवेदिषम्' इति परामर्शसिद्धसौषुप्तिकानुभवोऽप्यत्र प्रमाणम्, तस्य ज्ञानाभावविषयत्वे प्रत्यक्षेणानुमानेऽर्थापत्त्या वोपपादयितुमशक्यत्वात् । न चैवं सति वेदान्तिनामपि घटपटादिविशेषज्ञानाभावानुमानासम्भवः; भावरूपाज्ञानबलादेव विशेषघटपटादिज्ञानाभावस्य तत्सामग्र्यभावस्य चानुमातुं सुलभत्वात् । ननु भावरूपाज्ञानपक्षे त्वदुक्तमर्थं न जानामीति व्यवहारस्योपपत्तिः कथम्, उभयवादिपक्षे निवर्त्यत्वस्य तुल्यत्वादिति चेन्न; तत्राज्ञाननिवर्तकं प्रमाणज्ञानं नाज्ञानबोधकं तस्य भावरूपाज्ञानस्य साक्षिचैतन्येन प्रकाशमानत्वाभ्युपगमेऽदोषात् । साक्षिचैतन्येनावगतेऽर्थे प्रश्नस्वीकारेऽविरोधात् । तत्र सम्प्रदायविदां 'सर्वं वस्तु ज्ञाततयाऽज्ञाततया वा साक्षिचैतन्यस्य विषय एवेति सम्मतिरप्यस्ति । किञ्च 'तम आसीत्' मायां तु प्रकृतिं विद्यादित्यागमोऽपि भावरूपाज्ञानसद्भावे प्रमाणम् । अतो लक्षणप्रमाणयोरुपपन्नत्वादनादिभावरूपाज्ञानमस्तीति सिद्धम् ।

प्रश्नः २३—ज्ञानज्ञेययोर्विषयविषयिभावसम्बन्धे जागरूके कथ 'तदनिरूपणात्' इत्युक्तं युक्त भवेदिति लिखन्तु ।

उत्तरम्—अथ प्रपञ्चनिष्ठमिथ्यात्वनिरूपणावसरे यदा सिद्धान्तिभिर्दृग्दृश्ययोः सम्बन्धानुपपत्तिः प्रपञ्चस्य सत्यत्वानुमानस्य बाधिकाऽपि निराकृता, तदा पूर्ववादी ज्ञानज्ञेययोर्विषयविषयिभावसम्बन्धं प्रपञ्चसत्यत्वसाधकमाह—नन्वस्तु तर्हि ज्ञानज्ञेययोर्विषयविषयिभावसम्बन्धः प्रपञ्चसत्यत्वसाधक इति चेन्न, तादृक्सम्बन्धस्य निरूपयितुमशक्यत्वात् । न च ज्ञानेन जन्यं फलं प्रत्याधारत्वं विषयत्वं तादृशफलजनकत्वं च विषयित्वमिति तयोः सम्बन्धोऽभ्युपगन्तुं शक्यः, विकल्पे सति दूषणासहत्वात् । तादृक्फलं ज्ञातता चेत्तर्हि फलजननकालेऽतीतादेरवर्तमानत्वेन फलाधारत्वानुपपत्त्या तत्र लक्षणाव्याप्तेः । ज्ञानजन्यफलं व्यवहारश्चेत्तर्हि करार्कर्षणादिव्यवहारस्यात्मादौ स्पर्शरहिते विभावसम्भवेनाव्याप्तेः । रजतमलस्यापि नान्तरीयकतया रजतज्ञानप्रयुक्तादानादिव्यवहारभाक्त्वस्य विद्यमानत्वेन रजतज्ञानविषयत्वापत्तेः । न च ज्ञानजन्येच्छादिव्यवहाराभ्युपगमेऽदोष इति वाच्यम्, इच्छाधारत्वमात्मन्येवास्ति तद्भिन्नेऽनात्मवर्गलक्षणाव्याप्तेः ।

अथ ज्ञानप्रतिबद्धहानादिलक्षणज्ञानगोचरत्वं तद्योग्यत्वं वा विषयत्वमित्युपगमे नोक्तदोष इति चेन्न; ज्ञानगोचरत्वस्याद्याप्यनिरूपितत्वात् । हानादिज्ञानानां च हानादिज्ञान्तराजनकत्वेन निर्विषयत्वप्रसङ्गात् । जनकत्वे वा हानादिज्ञानानुपरमाद्विषयान्तराभावस्य सुषुप्त्यभावस्य च प्रसङ्गापत्तेः । न च व्यवहारयोग्यत्वं विषयत्वमिति वाच्यम्, योग्यतायां योग्यतान्तराभ्युपगमेऽनवस्थापत्तेरनभ्युपगमे योग्यताया विषयत्वाभावप्रसक्तेः ।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नापि शालिकनाथोक्तरीत्या यस्यां संविदि योऽर्थोऽवभासते, स तद्विषय इति विषयत्वनिरुक्तिरिति चेन्न, चतुर्धाविकल्प्यमानेऽपि विषयत्वस्यानिरूप्यमाणत्वात् वैपरीत्यापत्तेश्चापि सम्भवात्। सौगताभिमत्या ज्ञानाकारार्पकोहेतुर्विषय इति चेन्न; ज्ञानतदाकारयोर्भेदाभावेन ज्ञानहेतूनां विषयेन्द्रियसहकारिणां सर्वेषां ज्ञानाकारसमर्पकतया विषयत्वप्रसक्तेः। न च दृश्यमानत्वे सति ज्ञानाकारसमर्पकत्वं विषयत्वम्; दृश्यमानताया एवाद्याप्यनिरूपणात्। न च ज्ञानकर्मत्वं विषयत्वम्; अतीतादिज्ञानस्येश्वरज्ञानस्य च कर्मकारकाजन्यत्वेनाविषयत्वापत्तः। न च सम्बन्धान्तरमन्तरेणैव ज्ञानस्य यद्विशेषणं स तद्विषयो, विशेष्यं च विषयीति वाच्यम्; मत्समवेतं रूपज्ञानमित्यत्र समवायो ज्ञानं प्रति विशेषणमस्ति, न तत्र ज्ञानसमवाययोः संयोगसमवायादिसम्बन्धान्तरमस्ति, तस्मात्समवायेऽतिव्याप्तेः। न चेष्टापत्तिरितिवाच्यम्; मत्समवायरूपज्ञानयोर्विषयविषयित्वाभावात्। तत्र समवायस्यानुव्यवसायविषयत्वेऽपि रूपज्ञानाविषयत्वमिति भावः। तस्माद्विषयविषयिभावानिरूपणाद् आत्मन्यध्यस्तत्वेन प्रपञ्चस्यासिद्धिः तथाविधः प्रपञ्चसत्यत्ववादिभिर्नाभ्युपगम्यते। अतः प्रपञ्चस्य सत्यत्वे दृश्यत्वानुपपत्तिर्बाधिका सुस्थिरेति भावः।

प्रश्नः २३— नयनं नयनोद्भूतसम्यग्ज्ञानातिरेकिणः।
ज्ञानस्य कारण तत्त्वात् यथैव नयनान्तरम्॥

कारिकेयं पक्षसाध्यहेतुदृष्टान्तनिरूपणपूर्वकं व्याख्येया' कथञ्चात्र सत्प्रतिपक्षः, कथं च तन्निरास इत्यपि लेखनीयम्।

उत्तरम्—अथ मास्तु सर्वज्ञानानां याथार्थ्यं प्रामाणिकं, माभूद्विपक्षे बाधकस्तर्कस्तथापि समारोपे किं मानमिति जिज्ञासायामुक्तम्।

नयनं नयनोद्भूतसम्यग्ज्ञानातिरेकिणः।
ज्ञानस्य कारणं तत्त्वाद् यथैव नयनान्तरम्॥ इति॥

एतन्नयनमेतन्नयनोद्भूतसम्यग्ज्ञानभिन्नज्ञानकारणं, नयनत्वादितरनयनवदिति श्लोकार्थः। अत्र चक्षुर्मात्रपक्षत्वेऽर्थान्तरता स्यात्तद्वारणायेतच्चक्षुर्ग्रहणम्। यथार्थज्ञानातिरिक्तज्ञानजनकत्वस्य साध्यत्वे प्राभाकराणामप्रसिद्धविशेषणता, विरुद्धता च स्यात्तद्वारणायैतच्चक्षुर्जन्येति। व्याहतिवारणाय यथार्थपदम्। दृष्टान्ते चक्षुरन्तरे चक्षुष्ट्वं हेतुरस्ति, तत्र निरुक्तसाध्यं यथार्थज्ञानजनकत्वमप्यस्ति, पक्षेऽगत्या भ्रमज्ञानजनकत्वमेव ग्राह्यम्। तेन दृष्टान्ते न साध्याप्रसिद्धिर्नापि पक्षेऽर्थान्तरतेति भावः।

ननु चक्षुश्चक्षुर्जन्ययथार्थज्ञानजनकत्वे सत्यतिरिक्तज्ञानजनकं न भवति, इन्द्रियत्वाद्, घ्राणवदिति सत्प्रतिपक्षतेति चेन्न, मनसि व्यभिचारात्। तस्य मनसः साधारणकारणस्य न केवलं चक्षुर्मात्रज्ञानजनकत्वम्, अपितु तदतिरिक्तरसादिज्ञानजनकत्वमप्यस्ति। तस्मान्मनस्यनैकान्तिकता। चक्षुषश्चक्षुर्जन्ययथार्थज्ञानजनकत्वे सत्यतिरिक्तरसादिज्ञानजनकतया सिद्धसाधनताऽप्यस्ति। न चात्र हेतौ वहिरिन्द्रियत्वविशेषणत्वाज्ज्ञानैकान्तिकतेति वाच्यम्; पूर्वोक्तसिद्धसाधनतायास्तादवस्थ्यात्। न चोक्तसिद्धसाधनतावारणाय चक्षुर्जन्ययथार्थज्ञानजनकत्वे सत्यतिरिक्तज्ञानाजनकत्वात्यन्ताभावाधिकरणत्वं साध्यं विवक्ष्यतामिति वाच्यम्; घ्राणादिदृष्टान्ते निरुक्तसाध्यस्य चक्षुर्जन्ययथार्थज्ञानाजनकत्वस्यैवोपाधित्वात्। न चात्र यत्र निरुक्तोपाधिर्नास्ति, तत्र निरुक्तसाध्यमपि नास्तीति व्यतिरेकोपसंहारस्थलाभाव इति वाच्यम्; मनसो व्यतिरेकोपसंहारभूमित्वाभ्युपगमेनादोषात्। तस्माद्विभ्रमज्ञानसिद्धये श्लोकोक्तानुमानं सकलदोषविवर्जितं सर्ववादिभिः सम्मतमिति दिक्।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रश्नः २४—अख्यातिपक्षं सोपपत्ति प्रदर्श्य निरस्य च आत्मख्यातिदूषणे विवर्तपक्षः कथं रक्षितः स्यादिति प्रतिपादयत ।

उत्तरम्—आरोपं निरूप्यारोप्यं निपरूयितुं चित्सुखाचार्यः कथयति—यत्किल भवतु नाम विभ्रमसद्भावः किन्तु तदालम्बनमसन्न भवितुमर्हति, असतोऽपरोक्षावभासानर्हत्वात् असद्ग्रहीतुमिच्छया प्रवृत्त्यनुपपत्तेश्च। ननु क्वचिदसद्विशेषे शुक्तिरजतादौ प्रतिभामप्रवृत्ती कथं न स्यातामिति चेन्न; असतो निःस्वभावत्वेन विशेषाधिकरणत्वस्वीकारे तुच्छत्वानुपपत्तेः । न च सद्विलक्षणत्वेन शुक्तिरजतादेरसत्त्वाभिधानान्न दोष इति वाच्यम् तथासति सौगतानां मायावादिमतप्रवेशापत्तेः । न च स्वमुत्तरक्षणवृत्तिविज्ञानं तस्य कारणविशेषः पूर्वक्षणवृत्तिविज्ञानं, तस्मात्प्राप्तः स्वभावविशेषोऽसत्प्रकाशनसामर्थ्यं येनोत्तरक्षणवर्त्तिना विज्ञानेन, तदेव विज्ञानमसत्प्रकाशनशक्तिमदिति निःस्वभावेऽप्यसति स्वीक्रियते इति वाच्यम्; एतादृक्शक्तेः शक्यस्य निरूपयितुं दुर्लभत्वात्। न च शक्तेः कार्यं शक्यमिति वक्तुं युक्तम्; असतोऽकार्यत्वात् प्रकाशनशक्तित्वव्याघाताच्च। नापि शक्तेः शक्यं ज्ञाप्यं; प्रकाशान्तराभावादनवस्थानाच्च। न च शक्तिजन्यविषयं शक्यमित्यत्र जन्यज्ञानपदेन शक्त्याश्रयभूतस्य प्रथमज्ञानस्यैव विवक्षितत्वान्नानवस्थेति वाच्यम्; विज्ञानाश्रयभूतां शक्तिं प्रति विज्ञानस्यैव शक्त्याश्रयत्वेन शक्तस्य पुनः शक्यतया विषयत्वानुपपत्तेः । न च विजातीयविज्ञानमेवासतः प्रकाश इति वाच्यम्, सदसतोः सम्बन्धस्य निरूपयितुमशक्यत्वात् । न चासदधीननिरूपणत्वं ज्ञानस्यासता सह प्रकाश इति वाच्यम्; तस्यापि सम्बन्धान्तरापेक्षाऽस्ति, तन्नात्र सम्भवः, निरूपाख्यत्वादसतः सम्बन्धान्तराधारतानुपपत्तेः, घटस्य प्रकाश इत्यत्रास्ति यथा घटे ज्ञानजन्यातिशयाधारता, न तथाऽसतो ज्ञानजन्यातिशयाधारता । तस्माज्ज्ञानजन्यातिशयानाधारतयाऽसतोऽपरोक्षज्ञानविषयत्वानुपपत्तेः। न चायमसदनुभव इत्यनुभवेन सहासतो निरूप्यनिरूपकभावसम्बन्धोऽभ्युपेय इति वाच्यम्; अनुभवो नासदुत्पन्नो नाप्यसदात्मा, येन तथाविधसम्बन्धस्य कल्पयितुं शक्येत । तस्मादुक्तरीत्याऽसत्ख्यातिवादो निराकृतो वेदितव्यः ।

नन्वस्तु तर्हि बुद्धौ तथाविधं रजतादिकम्। तथाहि स्वरूपेणासतो गगनपुष्पादिवदप्रतिभासात्, नेदं रजतमिति बाधस्येदन्तामात्रविषयत्वात्, द्वयोर्बाधकल्पनायां गौरवात्, नेदं रजतमिति रजते बाधादर्शनात् । न चेदन्तामात्रनिषेधे सत्यनिदंतया बहिरपि व्यवस्थोपपत्तौ कुतः संविदाकारतेति वाच्यम्, दूरस्थरजतादेरपरोक्षसंविदक्यं विनाऽपरोक्षत्वानुपपत्तेरिति धीरूपमेव रजतादिकमभ्युपेयमितिचेन्न, आध्यासिकसम्बन्धमन्तरेणेन्द्रियसन्निकर्षानधीनापरोक्षत्वस्य तद्रजतादेर्निरूपयितुमशक्यत्वात्। किं चात्यन्तालीकाया अपि बाह्यताया यथाप्रतिभासस्त्वयाऽभ्युपेयते, तद्वदत्यन्तासतोऽपि रजतादेः प्रतिभासः संगच्छेतेत्यत्र का क्षतिः। न चेदन्तामात्रनिषेधे कल्पनालाघवमिति वक्तुं युक्तम्, भ्रान्तिसिद्धरजतस्य नेदं रजतमिति बाधस्य चानुभवसिद्धतयाऽकल्पनीयत्वेन कल्पनालाघवन्यायानवतारात् । किं चारोपितं बुद्धौ चेत्तर्हि गुञ्जापुञ्जादौ वह्निसमारोपे देहदाहप्रसङ्गः । न च बुद्धावपि तस्याताात्त्विकत्वेन नोक्तदोषापत्तिरिति वाच्यम्; तथासति न तद्बहिः सन्नान्तरमित्यन्तासतोऽनिर्वचनीयस्यैव रजतादेर्गत्यन्तराभावेनाभ्युपगम्यमानत्वात् । शुक्त्यवच्छिन्नचैतन्यस्य शुक्तिरजतादेर्विवर्ततया तदाश्रिताविद्यायाः परिणामता चेति वेदान्तिभिरभ्युपगतत्वेन न तत्रात्मख्यातित्वप्रसक्तिरिति दिक् ।

प्रश्नः २५—अख्यातिसत्ख्यातिपक्षौ निरस्य स्वाभिमतं पक्षं सम्यक्तया स्थापयत ।

उत्तरम्—अध्यासं निरूप्याध्यस्यमाननिरूपणावसरे चित्सुखाचार्यः प्राह—भवत्येवं विभ्रमसद्भावः, विभ्रमालम्बनं तु किमसत् ? सदेवेत्यादि ? आद्यविकल्पेनासत्ख्यातिनिर्देशः, द्वितीयेन.अन्यथा-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ख्यात्यात्मख्यात्योर्निर्देशः। न तत्र तावदसत्, असतोऽपरोक्षानर्हत्वात् तदादित्सया प्रवृत्त्यनुपपत्तेश्च। अथ माभूतामत्यन्तासति शशविषाणादौ प्रतीतिप्रवृत्ती, क्वचिदसद्विशेषे शुक्तिरजतादौ ते किं न स्यातामिति चेन्न, विशेषाधिकरणत्वे तुच्छत्वानुपपत्तेस्तस्य निःस्वभावत्वात्। सद्वैलक्षण्यमात्रेणासत्त्वाभिधाने सौगतानां मायावादिमतप्रवेशप्रसङ्गात्। न च ज्ञेयसामर्थ्यमन्तरेणापि निःस्वभावेऽप्यसति स्वकारणविशेषमासादितस्वभावविशेषज्ञानमेवाविद्ययाऽसत्प्रकाशनशक्तिमदिति वाच्यम्: एतच्छक्तेः शक्यस्य निरूपणानर्हत्वात्। अथ विज्ञानमेवासतः प्रकाशकमिति चेन्न, विज्ञानाश्रयभूतां शक्तिं प्रति विज्ञानस्यैव शक्तशक्यतया विषयत्वानुपपत्तेः। नह्येकस्य युगपत्सिद्धतया शक्त्याश्रयत्वमसिद्धतया च तद्विषयत्वं सम्भवति, युगपदेकत्रसिद्धत्वसाध्यत्वविरोधात्। अस्तु तर्हि स्वकारणविशेषासादितस्वभावभेदं विज्ञानमेवासतः प्रकाश इति चेन्न, सदसतोः सम्बन्धानिरूपणात्। न चासदधीननिरूपणत्वमेव ज्ञानस्यासतः सह सम्बन्ध इति वक्तुं युक्तमिति वाच्यम्; तस्यापि सम्बन्धान्तरापेक्षावत्त्वाभ्युपगन्तव्यत्वात्, असतश्च निरूपाख्यत्वात्सम्बन्धाधारतानुपपत्तेः। घटस्य प्रकाश इत्यत्र यथा ज्ञानजन्यातिशयाधारता घटे, न तथाऽसतो ज्ञानजन्यातिशयाधारता। अतोऽसत्त्वाज्ज्ञानजन्यातिशयानाधारत्वादसतोऽपरोक्षज्ञानविषयत्वानुपपत्तेरित्यर्थः। अयमसदनुभव इत्यनुभवेन सहासतो निरूप्यनिरूपकभावसम्बन्धोऽभ्युपेयते इति चेन्न; असदुत्पत्तेरतदात्मनश्चानुभवस्य तदविनाभावसम्बन्धासम्भवात्। तस्मान्निरुक्तरीत्याऽसत्ख्यातिवादिनामसत्प्रलापोऽनादरणीयः।

नन्वस्तु तर्हि अध्यस्यमानं रजतादिकं सदेवेति चेन्न, नेदं रजतमिति बाधविरोधापत्तेः। यत्र बाध्यते ततोऽन्यत्रास्तीति वाच्यम्, तत्र प्रमाणानिरूपणात्। न तावद्भ्रान्त्यनुभवस्तत्र प्रमाणम्; तस्य पुरोवर्तिरजतसत्तामात्रगोचरतयाऽसन्निहितरजतसत्तायामौदासीन्यात्। नापि बाधानुभवः प्रमाणम्; तस्य पुरोवर्तिन्यारोपिताभावविषयस्य देशान्तरतत्सत्तानावेदकत्वात्। नापि भ्रमानुपपत्त्यान्यत्ररजतसत्तावेदकत्वम्; रजतावभासस्य यथाप्रतीतपुरोवर्त्तिरजतसत्तां विनानुपपत्तावपि देशान्तरे तदीयसत्तामन्तरेणानुपपत्त्यभावात्। नापि बाधानुपपत्तिस्तत्र प्रमाणम्; प्रसक्तप्रतिषेधात्मनो बाधस्य तत्रैव तत्सत्ताक्षेपकतयाऽन्यत्र तत्सत्तानापेक्षकत्वात्। नाप्यसत्ख्यात्यनुपपत्तिस्तत्रप्रमाणम्; असत्संसर्गवदसद्रजतस्यापि ख्यात्युपपत्तेः।

अस्तु तर्हि बुद्धौ, स्वरूपेणासतो गगनारविन्दवदप्रतिभासात्, नेदं रजतमिति बाधस्येदन्तामात्रगोचरत्वात्, द्वयोर्बाधकल्पनायां कल्पनागौरवात्, नेदं रजतमिति च रजते बाधादर्शनाद्धीरूपमेव रजतमिति चेन्न, अत्यन्तालोकाया अपि बाह्यतायाः प्रतिभासवदत्यन्तासतोपि रजतादेः प्रतिभासोपपत्तेः। न चेदं रजतमितीदन्तामात्रमेव बाध्यते; कल्पनालाघवादिति वक्तुं युक्तम्; इदं रजतमिति प्रतिपन्नविशिष्टरजतस्य नेदं रजतमिति बाधस्य चानुभवसिद्धतया कल्पनीयत्वाभावात्। न च संविदक्यमन्तरेणापरोक्षत्वानुपपत्तिरितिवाच्यम्; बाह्यतावत्तदुपपत्तेः। तस्मान्नासत्, नापि समारोपितं सत्, गत्यन्तराभावादनिर्वचनीयमारोपितमिति सिद्धम्।

प्रश्नः २६—विमतः पटः, एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगी, अवयवित्वात्, पटान्तरवत् इत्यनुमानेन कथं मिथ्यात्वस्य सिद्धिः, इह तन्तुषु पट इति प्रत्यक्षेण कथन्नास्य बाधः, साध्यकोटिप्रविष्टैतदंशस्य सार्थक्यञ्च कथमिति सम्यग् विवेचयत।

उत्तरम्— अथ सर्वेषामपि भावानामाश्रयत्वेन सम्मते।
प्रतियोगित्वमत्यन्ताभावं प्रति मृषात्मता॥ इति श्लोकोक्तं मिथ्यात्वलक्षणं स्वाश्रयत्वेनाभिमतयावन्निष्ठात्यन्ताभावप्रतियोगित्वं मिथ्यात्वमिति परिष्कृत्य

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मिथ्यात्वसाधनायानुमानमुपन्यस्यति—विमतः पट, एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगी, अवयवित्वात्, पटान्तरवत् इति। अत्रार्थान्तरतावारणाय विमतपदम्। एतत्तन्तुभिरनारब्धे पटान्तरे प्रसिद्धिः। अवयवित्वेनोभयवादिसम्मतं पटान्तरमुदाहरणम्। तेन प्रतिज्ञाहेत्वोरविरोधः। तन्तुनिष्ठात्यन्ताभावप्रतियोगीत्यस्य साध्यत्वे तन्त्वन्तरमादयार्थान्तरता स्यात्तद्वारणायैतत्तन्तुनिष्ठेत्युक्तम्। ननु तादृक्प्रतियोगित्वस्य प्रामाणिकत्वे तदभावानामपि प्रामाणिकत्वाभ्युपगमप्रसङ्गः, तथा च तैरेव द्वैतापत्तिः, प्रामाणिकाभावप्रतियोगिनां च भावानामपि प्रामाणिकतया न तत्र मिथ्यात्वं साधयितुं शक्यम्। तथा निरुक्तप्रतियोगित्वस्य प्रातिभासिकत्वेऽर्थान्तरापत्तिरिति चेन्न; अभावानां प्रामाणिकत्वेऽप्यभावेनाद्वैतव्याकोपाभावात। द्वितीयविकल्पस्य त्वनङ्गीकारपराहतत्वात्। न च धर्मिग्राहकप्रमाणबाध इति वाच्यम्, धर्मिणस्तत्त्वावेदकप्रमाणसिद्धत्वानभ्युपगमात्। न चैवमाश्रयासिद्धि, सांव्यावहारिकप्रमाणोपनीतस्याप्याश्रयतोपपत्तेः। न चायमसिद्धो हेतुः, पटस्यावयवित्वे वादिनोरविवादात्। नापि विरुद्धः, आत्मनि विपक्षेंऽशित्वस्यावृत्तेः।

न चेह तन्तुषु पटः इति प्रत्यक्षेण बाधः, पटस्यैतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वमभ्युपगच्छता सिद्धान्तिना नभसि नीलिमेतिवदङ्गीकुर्वता निरुक्तप्रत्यक्षबाधानङ्गीकारात्। न चैवं वह्नौ शैत्यानुमानेऽपि प्रत्यक्षबाधो न प्रसरेदिति सर्वत्र बाधकथाऽस्तमियादिति वाच्यम्; तत्र तत्रोभयवादिसम्मतप्रबलप्रमाणछत्रछायायां निरङ्कुशरूपतया बाधप्रवृत्तिसम्भवात्प्रकृते प्रबलप्रमाणाभावाच्च। इदमत्राकूतं-वह्निरनुष्ण इत्यत्रोष्णत्वं निषेध्यं कुत्रचित्प्रमितं न वा ? नान्त्यः; अप्रमितप्रतियोगिकाभावस्याप्रमित्याऽप्रसिद्धविशेषणत्वापत्तेः। न च भ्रान्तिसिद्धस्य निषेधः, अर्थक्रियायां बाधाभावात्। तस्मादाद्यपक्षोऽभ्युपेयः। न च तदग्निव्यतिरिक्तस्थलेऽस्तीत्युभयवादिसम्मतं प्रमाणसिद्धम्। अतस्तद्विरोधादनुमितिर्नोदेतीति बाधस्तत्रावश्यं प्रवर्तते। प्रकृते तु न तथोपजीव्य किञ्चित्प्रमाणमस्ति येन प्रपञ्चमिथ्यात्वानुमानस्य बाधः स्यादिति भावः।

प्रश्नः २७—तदेवं प्रत्ययानां यथार्थत्वेन स्वरूपतो विभ्रमाभावाद्विभ्रमोपादानमज्ञानमिति लक्षणमलक्षणमेवेति कस्येदं मतमिति प्रोच्य—

स्वीकारे विभ्रमाणां स्यात्स्वीयसिद्धान्तबाधना।
अनभ्युपगमे तेषामाश्रयासिद्धिरुद्धृता ॥

कारिकेयं चित्सुखमुनिसरण्या व्याख्यायताम्।

उत्तरम्—ननु तथाप्यसम्भवि लक्षणमित्यारभ्य–तदेवं प्रत्ययानां यथार्थत्वेन स्वरूपतो विभ्रमाभावात् विभ्रमोपादानमज्ञानमितिलक्षणमलक्षणमेवेत्यख्यातिवादिनां प्राभाकराणां मतं सुनिपुणतया निरूपितं, तत् प्रत्यख्यातुं वेदान्तिभिः प्रतिज्ञाय—

"स्वीकारे विभ्रमाणां स्यात्स्वीयसिद्धान्तबाधना।
अनभ्युपगमे तेषामाश्रयासिद्धिरुद्धृता ॥ इति श्लोकेन

प्रत्याख्यातम्। विगीतविभ्रमाभ्युपगमे सिद्धान्तविरोधाद्, अनभ्युपगमे हेतोराश्रयासिद्धेरनुमानानुदयादित्यर्थः। तत्र गङ्गापुरीयं मतं दूषयितुमुद्भावयति–अयथार्थहेतोर्ज्ञानस्य पक्षत्वेन विवक्षितत्वाददोष इति चेन्नः; यथार्थस्यापीश्वरज्ञानस्य सर्वव्यवहारहेतोरयथार्थव्यवहारं प्रत्यपि हेतुतया तत्र तार्किकाणां सिद्धसाधनत्वात्। सिद्धान्तिमतेंऽशतः सिद्धसाधनत्वे प्राभाकरस्यापि सम्मतिमाह—इदं रजतमित्यत्रापीदंविषयस्य वृत्तिज्ञानस्यायथार्थव्यवहारहेतोरप्यधिष्ठानविषयस्य वेदान्तिभिर्यथार्थत्वाङ्गीकारात्। धर्मिप्रयुक्तदूषणं परिहर्तुं प्रकारान्तरमनुसरति–ज्ञानत्वं, यथार्थमात्रवृत्ति, ज्ञान-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मात्रवृत्तित्वात्प्रमात्ववदिति चेन्न, मात्रपदेनायथार्थव्यवहारे ज्ञानत्वस्य वृत्यभावेन सिद्धसाधनत्वात्, अयथार्थवृत्तित्वात्यन्ताभावाधिकरणत्वविवक्षायां दुष्टसामग्रचप्रसूतमात्रवृत्तित्वस्य तत्रोपाधेः।

किञ्च यथार्थशब्देन सदर्थविवक्षायां नायं सर्प इत्यादि बाधविरोधः, तुच्छव्यावृत्तार्थविवक्षायां चास्मान्प्रति सिद्धसाधनत्वम्।

ननु संविदां विषयव्यभिचारादनाश्वासप्रसङ्ग इति चेन्न; विसंवादिव्यवहारजनकत्वपक्षवदस्मन्मतेऽप्याश्वासोपपत्तेः। न चासतः संसर्गादेरवभासाभ्युपगमादसत्ख्यातिप्रसङ्ग इति वाच्यम्, भासमानस्य संसर्गादेः सद्विलक्षणतावदसद्विलक्षणताया अप्यभ्युपगमात्। न चायथार्थज्ञानोत्पत्तौ कारणाभावः शङ्कनीयः; दोषदूषितचक्षुरादेरेव तस्य कारणत्वोपपत्तेः। ज्ञानानां स्वभावतो यथार्थव्यवहारजनकत्वेऽपि दोषवशादयथार्थव्यवहारहेतुत्ववदेव दुष्टकरणानां विपरीतज्ञानजनकत्वस्यापि सम्भवात्।

न च योग्यताविच्छेदो बाधः; तद्विच्छेदे सति समयान्तरे पुनः तत्र व्यवहाराभावप्रसङ्गात्। नापि प्रतिबन्धो बाधः इति वक्तुं युक्तं; पुष्कलकारणे सत्यपि कार्यानुत्पत्तिः शक्तिप्रतिबन्धिकां कल्पयति सा च कल्पिकात्र नास्ति, विवेकग्रहेण विवेकाग्रहस्य निराकृतत्वात्। न चाग्रहणनिवृत्तिर्बाधः, स्वप्रागभावनिवर्तकानां सर्वेषां ज्ञानानामज्ञाननिवर्तकेन बाधरूपत्वप्रसङ्गात्। तस्मान्न व्यवहारनिवृत्तिमात्रेण बाधकज्ञानस्य बाधकतोपपद्यते। परिशेषन्यायात्प्राप्तां स्मृतिं दूषयति—रजतगोचरविज्ञानस्य च दोषदूषितलोचनजन्यतया परिशेषासिद्धौ संस्कारमात्रजन्यतया स्मृतित्वकल्पनायोगात्। न चात्र रजतज्ञानस्य साक्षात्कारित्वेऽसंयुक्तविषयत्वमनुपपन्नमिति वाच्यं; प्रत्यभिज्ञायां तत्ताया अपि चाक्षुषविषयत्वाभ्युपगमात्। यदि तत्र संस्कारोत्थापितां तत्तां संस्कारसहकृतमिन्द्रियं गोचरयति; तर्हि प्रकृतेऽपि संस्कारोपनीतं दोषदूषितं चक्षुरिन्द्रियं विषयीकरिष्यतीति न कोऽपि दोष इति दिक्।

प्रश्नः—२८ सर्वेषां ज्ञानानां याथार्थ्ये भ्रमोपादानमज्ञानमिति लक्षणं कथं नासम्भवदोषग्रस्तमिति निरूपयत।

उत्तरम्—अथ लक्षणप्रमाणाभ्यामनाद्यनिर्वचनीयभावरूपाविद्यासिद्धत्वे भ्रमोपादानमज्ञानमिति समर्थयति। विभ्रमाणां परिणाम्युपादानमज्ञानमिति लक्षणेऽपि न दोषः। केवलस्य कूटस्थस्यात्मनोऽनुपादानत्वेन न तत्रातिव्याप्तिः; सत्योपादानत्वे विभ्रमस्यापि सत्यत्वप्रसङ्गात्। न चेष्टापत्तिः; तथासति प्रमाज्ञानमिव विषयापहाररूपबाधस्याप्यसम्भवापत्तेः। न चैतावन्तं कालमिदं रजतमभादिति प्रत्यभिज्ञानविरोधः शङ्कनीयः; अनिर्वचनीयस्यापि विभ्रमस्याभावविलक्षणतया तथात्वेन प्रत्यनुसन्धानोपपत्तेः। न च स्वरूपसत एवासीदिति प्रतिसन्धानम्; एतावन्तं कालमिहादर्शे मुखमासीत्स्फटिकश्च लोहित आसीदित्यनुसन्धानदर्शनात्।

ननु तथाप्यसम्भवि लक्षणं सर्वेषां ज्ञानानां यथार्थत्वेन विभ्रमाणामेवाभावात्। तत्राख्यातिवादी प्रयोगमाह—विगीताः प्रत्ययाः, यथार्थाः, प्रत्ययत्वात्सम्प्रतिपन्नवदिति प्रत्ययानां यथार्थत्वेन स्वरूपतो विभ्रमाभावात् विभ्रमोपादानमज्ञानमिति लक्षणमसम्भवदोषग्रस्तमिति चेन्न; विगीतविभ्रमाणां पक्षत्वेनाभ्युपगमे सिद्धान्तविरोधादनभ्युपगमे हेतोराश्रयासिद्धेरनुमानोदयाभावात्। न चायथार्थव्यवहारहेतोर्ज्ञानस्य पक्षत्वेनाभ्युपगमेऽदोष इति वाच्यम्; यथार्थस्यापीश्वरज्ञानस्य सर्वव्यवहारहेतुत्वाभ्युपगमेनायथार्थप्रत्ययं प्रति हेतुतया तत्र तार्किकमते सिद्धसाधनत्वात्, इदं

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रजतमिति वृत्तिज्ञानस्येदमाकारविषयस्यायथार्थव्यवहारहेतोरप्यधिष्ठानविषयत्वेन स्वीकृतस्य वेदान्तिभिर्यथार्थत्वाङ्गीकारात्। न च ज्ञानत्वं यथार्थमात्रवृत्ति, ज्ञानमात्रवृत्तित्वात्, प्रमात्ववदिति। विवक्षितमिति वाच्यम्; मात्रशब्देनायथार्थव्यवहारे ज्ञानत्ववृत्त्यभावेन सिद्धसाधनत्वात्। न चायथार्थवृत्तित्वात्यन्ताभावाधिकरणत्वं विवक्षितम्; दुष्टसामग्रीप्रसूताभावमात्रवृत्तित्वस्य तत्रोपाधेः।

किं चायथार्थप्रत्ययोऽस्तीत्यस्य प्रत्ययस्य यथार्थत्वे तस्य विषयः कश्चिदयथार्थप्रत्ययोऽभ्युपगन्तव्यः, तथासति तत्रैव हेतोर्व्यभिचारः; अयथार्थत्वे तस्य प्रत्ययस्य कण्ठोक्त एव व्यभिचारः। न चायथार्थप्रत्ययोऽस्तीत्येतादृशः प्रत्ययो नास्ति किन्तु व्यवहारमात्रं पदार्थानामसंसर्गाग्रहनिबन्धनमिति वाच्यम्, सर्वत्र संसर्गव्यवहारस्य व्यवह्रियमाणपदार्थज्ञानपूर्वकनियमात्। अन्यथा मध्यमवृद्धव्यवहारेऽपि व्युत्पित्सोरसंसर्गादेव व्यवहारोपपत्तेः संसर्गज्ञानानुमानाभावाच्छब्दप्रामाण्यभङ्गप्रसङ्गः। तथाऽनुमानाभासवत्सदनुमानेऽप्यसंसर्गादेव संसर्गव्यवहारोपपत्तेरनुमानोच्छेदः। प्रत्यभिज्ञाप्रामाण्योच्छेदश्च, सर्वत्र ज्वालैकत्वव्यवहारवत्प्रत्यभिज्ञायामसंसर्गाग्रहादेव संसर्गव्यवहारोपपत्तेः।

प्रश्नः २९—विवादास्पदीभूतः प्रपञ्चः, सत्यः, प्रमाणसिद्धत्वादात्मवदित्यनुमानस्य कथं निरास इति लिखत।

प्रश्नः ३०—'प्रपञ्चः सत्यः प्रमाणसिद्धत्वादात्मवदि'ति प्रयोगं दोषैः प्रदूष्य अज्ञानस्य भावरूपत्वं यथाग्रन्थं साधयत।

उत्तरपक्षः—अथ प्रपञ्चस्य सत्यत्वे प्रत्यक्षादिप्रमाणमुक्त्वा पूर्ववादी अनुमानं दर्शयति—विवादास्पदीभूतः प्रपञ्चः, सत्यः, प्रमाणसिद्धत्वादात्मवदिति तन्न, मिथ्यात्वसिद्धावनुमानप्रमाणस्य विद्यमानत्वात्। तदनुमानं चित्सुखाचार्यैः श्लोकेन 'अंशिनः स्वांशगात्यन्ताभावस्य प्रतियोगिनः। अंशित्वादितरांशीव दिगेषैव गुणादिषु ॥ इति सङ्कलितम्। तथाहि—अवयविनः, स्वावयवनिष्ठात्यन्ताभावप्रतियोगिनः, अवयवित्वात्, अन्त्यावयविवदिति। एवं गुणकर्मसामान्यविशेषेष्वपि मिथ्यात्वं सिध्यति।

ननु तादृक्प्रतियोगित्वस्य प्रामाणिकत्वे तदभावानामपि प्रामाणिकत्वप्रसङ्गः, तथा तैरेव द्वैतापत्तिः, प्रामाणिकाभावप्रतियोगिनां भावानामपि प्रामाणिकतया न तत्र मिथ्यात्वं साधयितुं शक्यमिति चेन्न, अभावानां प्रामाणिकत्वेऽपि सदद्वैताविरोधात्। न च धर्मिग्राहकप्रमाणबाध इति वाच्यम्; धर्मिणस्तत्त्वावेदकप्रमाणसिद्धत्वानभ्युपगमात्। न चैवमाश्रयासिद्धिरिति वाच्यम्; सांव्यावहारिकप्रमाणोपनीतस्याप्याश्रयत्वोपपत्तेः। न च प्रपञ्चस्तत्त्वावेदकप्रमाणविषयः, धर्मित्वादात्मवदित्यनुमानप्रमाणेन मिथ्यात्वानुमानस्य बाध इति वाच्यम्; आत्मत्वस्यैव तत्रोपाधित्वात्। न च व्यतिरेकासिद्धिरिति वाच्यम्; अनात्मनः शुक्तिरजतसंसर्गादेस्तत्त्वावेदकप्रमाणाविषयकस्योभयवादिसिद्धस्य व्यतिरेकोपसंहारस्थलस्य सद्भावात्, धर्मित्वहेतोः शुक्तिरजतादिसंसर्गधर्मिणि व्यभिचाराच्च। न च शुक्तिरजतसंसर्गो न धर्मी, मिथ्यात्वादिति वाच्यम्; मिथ्यात्वहेतुं प्रति संसर्गस्य धर्मित्वाधर्मित्वयोर्वक्तुमशक्यत्वात्। न चावयवित्वहेतुरसिद्ध इति वाच्यम्; परस्यांशित्वे वादिनोरविवादात्। नापि विरुद्धः, मिथ्यात्वानुमानेऽत्र विपक्षस्यात्मनः सर्वाधिष्ठानत्वेन सर्वस्वरूपतया तन्तुनिष्ठात्यन्ताभावाभावात्। न चेह तन्तुषु पटः इति प्रत्यक्षेण बाधः; आकाशमप्यपि, विभुत्वादात्मवदित्युमाने नभसि नीलिमेति प्रत्यक्षस्य विभ्रमत्वात् न प्रत्यक्षबाधस्तद्वन्निरुक्तप्रत्यक्षस्यापि विभ्रमत्वान्मिथ्यात्वानुमाने बाधाप्रसरत्वात्।

(अत्राज्ञानस्य भावरूपत्वसमर्थनमिति प्रसञ्जनीयम्)

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रश्न. ३१—प्रमाणानामज्ञानविरोधित्वात् प्रमाणेनाज्ञानसिद्धिः कथं सम्भवति ? इति विचार्य बध्यतां बध्यतां बालो नानेनार्थोऽस्ति जीवता। स्वपक्षहानिकर्तृत्वात् यः कुलाङ्गरतां गतः॥ इयं कारिका कथमुपक्षिप्ता ? इति विविच्यताम्।

उत्तरम्—अथानादित्वे सति भावत्वे च सति विज्ञाननिवर्त्यत्वमज्ञानत्वमिति लक्षणेन, विगीतं देवदत्तनिष्ठप्रमाणज्ञानं, देवदत्तनिष्ठप्रमाभावानादेर्निवर्तकं, प्रमाणत्वाद्यज्ञदत्तादिगतप्रमाणज्ञानवदित्यनुमानेन, न किञ्चिदवेदिषमिति परामर्शसिद्धसौषुप्तिकानुभवेन, 'तम आसीत्'। 'मायां तु प्रकृतिं विद्यादि, त्यागमेन चाज्ञानसिद्धिरुक्ता। किंच त्वदुक्तमर्थं न जानामीति व्यवहारान्यथोपपत्तिरपि भावरूपाज्ञानसद्भावे मानम्। न च त्वदुक्तमर्थं प्रमाणतो न जानामीत्येवम्परतयापि व्यवहारोपपत्तिरिति वाच्यम्, तादृग्विशिष्टज्ञानस्य प्रमात्वेन तद्विषयभूतस्यार्थस्यापि प्रमाणतो ज्ञातत्वात् तन्निषेधवचनस्य मम मुखे जिह्वा नास्तीतिवद् स्ववचनव्याघातापत्तेः। एतदज्ञानत्वग्राहिप्रमाणभिन्नं त्वदुक्तेऽर्थे मम नास्तीत्युक्तावपि स्ववचनव्याघातस्य तादवस्थ्यम्, अस्यापि ज्ञानस्य पूर्ववदेव प्रमाणजन्यत्वात्। ननु भावरूपमप्यज्ञानं ज्ञाननिरस्यं त्वयाऽभ्युपगम्यते, तत्कथं ज्ञायमानेऽर्थे न जानामीति व्यवहार इति चेन्न, अस्मन्मतेऽज्ञानस्य साक्षिचैतन्येन प्रकाशमानत्वाभ्युपगमेऽदोषात्, नहि प्रमाणज्ञानमज्ञानबोधकं प्रमाणज्ञानस्याज्ञाननिवर्तकत्वेनैवाभ्युपगमात्। साक्षिचैतन्येनावगतेऽर्थे निरुक्तरीत्या प्रश्नस्वीकारेऽविरोधात्।

अथेदं रजतमित्येकज्ञानसंसर्गिणोर्द्वयोर्भेदाग्रहादयथार्थव्यवहारो विभ्रमः, स च गृह्यमाणयोर्भेदाग्राहकमेकं ज्ञानं सविकल्पकमिति भ्रमलक्षणमभ्युपगम्यते न्यायकल्पतरुकृद्भिराधुनिकैः। तस्मान्नासतः कस्यचित्ख्यातिरिति चेन्न; मध्यमवृद्धव्यवहारेऽपि तथात्वे बालस्य ज्ञानानुदयाच्छब्दप्रामाण्यभङ्गप्रसङ्गात्, एवमसंसर्गग्रहादेवानुमानेऽपि संसर्गव्यवहारोपपत्तावनुमानमात्रोच्छेदापत्तेः, ज्ञानैकत्वव्यवहारवत्सर्वत्र प्रत्यभिज्ञायां संसर्गव्यवहारोपपत्त्या प्रत्यभिज्ञाप्रामाण्योच्छेदापत्तेश्च।

प्रश्नः ३२— प्रत्येकं सदसत्त्वाभ्यां विचारपदवीं न यत्।
गाहते तदनिवार्च्यमाहुर्वेदान्तवेदिनः॥

इमां कारिकां व्याख्याय 'इदं रजतमिति भ्रमस्थले' इदमाकारविषयमिन्द्रियजन्यं ग्रहणं रजततत्संसर्गविषयं साक्षिचैतन्यमिति विज्ञानद्वयाभ्युपगमेन कथं नाख्यातिप्रसङ्गः इतिशङ्कां ग्रन्थोक्तरीत्या परिहरत।

उत्तरम्—लक्षणप्रमाणयोरनिरूपणान्नानिर्वचनीयावभासो विभ्रम इति पूर्ववादिभिरुक्तम्। तत्र श्लोकेन लक्षणं सिद्धान्ती संकलयति—

प्रत्येकं सदसत्त्वाभ्यां विचारपदवीं न यत्।
गाहते तदनिर्वाच्यमाहुर्वेदान्तवेदिनः॥ इति॥

सत्त्वेनासत्त्वेन सदसत्त्वेन च यद्विचारपदवीं न प्रविशति तदेवानिर्वचनीयं प्राहुर्वेदान्तवेदिन इति श्लोकार्थः। अत्र सदसत्त्वाभ्यां विचारपदवीं न गाहते तदनिर्वाच्यमित्युक्ते सदसतोरतिव्याप्तिस्तद्वारणाय प्रत्येकमित्युक्तम्। तावत्युक्ते समुदितयोः सदसतोरतिव्याप्तिस्तद्वारणाय सदसत्त्वाभ्यामित्युक्तम्। न चैवं सति कुत्राप्यव्याप्तिः शङ्कनीया; सर्वभ्रमविषयाणां तथात्वनियमात्; सदादीनां च तद्विचारसहत्वेन परैरभ्युपगमात्। एवं च सति तात्पर्यपरिशुद्धौ द्वितीयसूत्रे उदयनाचार्येण भ्रमविचारावसरे विकल्पितं कल्पं निराकृतं वेदितव्यम्। परस्परविरुद्धेन सत्त्वेनासत्त्वेन

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सदसत्त्वेन च निषेधानां समुच्चयस्य तात्त्विकत्वानङ्गीकारात् । सत्त्वादिविलक्षणत्वाभिलापस्तु तत्प्रतियोगिसत्त्वादिदुर्निरूपताप्रकटनार्थमिति भावः । नहि स्वरूपतो दुर्निरूपस्य किञ्चिदपि रूपं सम्भवति, तथासति तस्यापि तात्त्विकत्वप्रसङ्गात् । न चैकतरनिषेधोऽन्यतरविधिनान्तरीयकः; अनिवर्चनीयवादिनं प्रति व्याप्त्यसिद्धेः ।

किञ्चाख्यातिवादिना इदं रजतमिति भ्रमस्थले इदमाकारज्ञानं शुक्तिखण्डसामान्यविषयकमनुभवात्मकं रजतमिति पूर्वदृष्टरजतस्य स्मरणात्मकमिति ज्ञानद्वयोर्भेदाग्रहणनिबन्धनमभेद–व्यवहारमात्रजनकमित्यभ्युपेयते, तद्वेदान्तिभिर्युक्त्या निराकृतम् । तथाहि सिद्धान्ते निरुक्तभ्रमस्थले इदमिति शुक्तिरजताद्यधिष्ठानपुरोवर्त्तिविषयकं रजतमिति शुक्त्यवच्छिन्नचैतन्यनिष्ठाविद्यापरिणामकल्पितरजतविषयकं तत्कल्पितसंसर्गविषयकं चाभ्युपेयते । न चैवं सति ज्ञानद्वयाङ्गीकारादख्यातिवादप्रसङ्ग इति वाच्यम्; इदमंशावच्छिन्नसाक्षिचैतन्यस्यैवाधिष्ठानज्ञानफलभूतस्य स्वमायाविवर्तरजतादिसिद्धित्वात्, अन्तःकरणवृत्तिलक्षणज्ञानद्वयानङ्गीकारात् । तस्मादन्तःकरणवृत्तिद्वयानङ्गीकारेण भ्रमस्थले इदमाकारविषयकमिन्द्रियजन्यं ग्रहणं, रजततत्संसर्गविषयकं साक्षिचैतन्यमिति विज्ञानद्वयाभ्युपगमेऽपि नाख्यातिवादप्रसङ्ग इति दिक् ।

प्रश्नः—३३ 'विवादपदमनिर्वाच्यं, भ्रमविषयत्वात्, यन्नैवं तन्नैवं यथा आत्मा इत्यनुमानेनानिवर्चनीयत्वं साधयितुं शक्यते नवा ? इतिविचार्य 'एकालम्बनसंसर्गनिषेधे' सदसत्त्वयोः । धर्मत्वाद्रूपरसन्त्रसिद्धानिर्वचनोयता ॥ इयं कारिका चित्सुखाचार्यमतेन व्याख्यायताम् ।

उत्तरम्—अविद्याऽनिर्वचनीयत्वेऽर्थापत्तिप्रमाणं प्रदूष्यानुमानं दूषयितुमाह चित्सुखाचार्यः—अस्तु तर्ह्यनुमानम्—विवादपदमनिर्वचनीयं, भ्रमविषयत्वाद्, यन्नैवं तन्नैवं यथाऽऽत्मा । न चात्र साध्याप्रसिद्धिरिति वाच्यम्; इच्छादीनामष्टद्रव्यातिरिक्ताश्रितत्वानुमानवत्सामान्यतः प्रसिद्धिविशेषपरिशेषाभ्यां तत्प्रसिद्ध्युपपत्तेः । न च शुक्त्यादावात्मनि च विपक्षे हेतोर्वर्तमानतया विरुद्धत्वमिति वाच्यम्; गुणत्वलिङ्गेन क्वचिदाश्रितत्वप्रसाधनवदनिर्वचनीयत्वसाधनेलिङ्गाभावात् ।

ननु साध्याप्रसिद्धिदोषवारणाय विमतं सदसद्विलक्षणं, दोषप्रयुक्तमानत्वात्, भ्रान्तिसिद्धताद्वात्म्यवदित्यन्वयव्यतिरेक्यनुमानं प्रयुञ्जीतेतिचेन्न, दृष्टान्तस्य साध्यविकलत्वात् । नहि शुक्तिरजततादात्म्यस्य सदसद्वैलक्षण्यं परीक्षकैरभ्युपेयते, येनोभयवादिसिद्धतया तत्तादात्म्यस्य दृष्टान्तता स्यात् । अथ भावरूपतयाऽपरोक्षत्वेन भानाद्बाधाच्च तस्य सदसद्वैलक्षण्यं युक्त्या प्रसाध्येत; तदा रजतस्यापि तत्साधयितुं शक्यमिति व्यर्थोऽयं बकबन्धविधिप्रयासः । तस्माल्लक्षणप्रमाणयोरनिरूपणान्नानिर्वचनीयावभासो विभ्रम इति सति पूर्वपक्षे सिद्धान्तमाह—

प्रत्येकं सदसत्त्वाभ्यां विचारपदवीं न यत् ।
गाहते तदनिर्वाच्यमाहुर्वेदान्तवेदिनः ॥ इति ॥

यत्सत्त्वेनासत्त्वेन सदसत्त्वेन च विचारमार्गं न प्रविशति, तदेवानिर्वचनीयमाहुर्वेदान्तवेदिनः; इति पदयोजना । अत्र सदसत्त्वाभ्यां विचारपदवीं न गाहते, तदनिर्वाच्यमित्युक्ते सदसतोरतिव्याप्तिस्तद्वारणाय प्रत्येकमित्युक्तम् । तावत्युक्ते समुदितयोः सदसतोरतिव्याप्तिस्तद्वारणाय सदसत्त्वाभ्यामित्युक्तम् । न च क्वाप्यव्याप्तिः शङ्कनीया; सर्वविभ्रमाणां तथात्वनियमात्, सदादीनां च तत्तद्विचारसहत्वेन परैरभ्युपगमात् । एवं च सति तात्पर्यपरिशुद्धौ द्वितीयसूत्रेविभ्रमविचारावसरे उदयनाचार्येण विकल्पितं कल्पं निराकृतं वेदितव्यम् । प्रत्येकं परस्परविरुद्धेन सत्त्वेना-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सत्त्वं सदसत्त्वेन च निषेधानां समुच्चयस्य तात्त्विकत्वानङ्गीकारात् । सत्त्वादिविलक्षणत्वाभिलापस्तत्तत्प्रतियोगित्वादिदुर्निरूपिताप्रकटनार्थमिति भावः । नहि स्वरूपतो दुर्निरूपस्य किञ्चदपिरूपं सम्भवति, तथा सति तस्यापि तात्त्विकत्वप्रसङ्गात् । न चैकतरनिषेधोऽन्यतरविधिर्नान्तरीयकः; अनिर्वचनीयवादिनं प्रति व्याप्त्यसिद्धेः । तस्माल्लक्षणप्रमाणाभ्यां शुक्त्यादिरजतादावनिर्वचनीयत्वसिद्धौ निखलद्वैतप्रपञ्चेऽपि भ्रमविषयत्वादिहेतुनाऽनिर्वचनीयत्वसिद्धिर्वेदान्तवाक्यप्रमाणजन्यादधिष्ठानाद्वितीयात्मविज्ञानाद्द्वैतप्रपञ्चोविलीयते चेति सिद्धम् ।

प्रश्नः ३४—मिथ्यात्वं निरूप्य तस्य प्रामाणिकत्वाप्रामाणिकत्वे पूर्वोत्तरपक्षाभ्यां विवेचनीये ।

उत्तरम्—लक्षणप्रमाणाभ्यां वस्तुसिद्धिरिति पूर्वं 'स्वाश्रयत्वेनाभिमतयावन्निष्ठात्यन्ताभावप्रतियोगित्वमिति मिथ्यात्वलक्षणमभिहितम्' । ततो विमतः पटः एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगी, अवयवित्वात्पटान्तरवत् । एवमेतद्गुणकर्मसामान्यादयोऽपि तत्तत्स्वाश्रयनिष्ठात्यन्ताभावप्रतियोगिनः तत्तद्रूपत्वादितरतत्तद्रूपादिवदित्येवमादिप्रयोगाः सर्वत्रोहनीयाः ।

ननु तादृक्प्रतियोगित्वस्य प्रामाणिकत्वे तदभावानामपि प्रामाणिकत्वस्वीकारप्रसङ्गः, तथा च तैरेवाभावैर्द्वैतापत्तिः, प्रामाणिकाभावप्रतियोगिनां च भावानामपि प्रामाणिकतया न तत्र मिथ्यात्वं साधयितुं युक्तम् । निरुक्तप्रतियोगित्वस्य प्रातिभासिकत्वेऽर्थान्तरता स्यादिति चेन्न, भावेनाद्वैतव्याकोपस्य कथञ्चिद्वक्तुं शक्यत्वेऽपि नाभावानां प्रामाणिकत्वे सदद्वैतव्याकोपसत्त्वाभ्युपगमात् । वस्तुतस्तु तत्त्वावेदकप्रमाणोपनीतस्याद्वैतस्य व्यावहारिकैर्भावैरभावैर्वा नाद्वैतव्याकोपशङ्कावसरः । द्वितीयस्तु विकल्पोऽनङ्गीकारपराहतः । ननु प्रपञ्चस्य मिथ्यात्वसाधकानुमाने मिथ्यात्वं तदेवानुमानं स्वयं साधयति, किमप्यन्यद्वाऽनुमानम् ? आद्ये स्वात्मनि वृत्तिविरोधः, अन्त्येऽनवस्थापत्तिरिति चेन्न; शब्दशब्दवत्प्रपञ्चसत्यत्वानुमानवदध्ययनविधिवच्चाविरोधात् । यथा शब्दशब्दः सर्वान् शब्दान् स्वमपि च गोचरयति, यथा त्वन्मते प्रपञ्चसत्यत्वानुमानं स्वस्मिन्नपि सत्यत्वमनुमापयति, यथा वा स्वाध्यायोऽध्येतव्यः इत्यध्ययनविधिः सर्ववेदराशिवत् स्वस्याध्ययनं विधत्ते, तद्वदत्रानुमानेऽपि मिथ्यात्वसाधने विरोधाभावात् ।

किंच प्रपञ्चस्य मिथ्यात्वेऽनुमानमिवैकमेवाद्वितीयमित्याद्यागमोऽपि प्रमाणम् । अद्वितीयपदस्य सजातीयमात्रनिषेधपरत्वाभ्युपगमे सर्वविज्ञानप्रतिज्ञोपक्रमोपसंहारादयो बाध्येरन् । न चैकमितिपदमेकत्वसंख्याविधानपरं तत्रैव लोकव्युत्पत्तेर्लोकशक्तेश्च वेदेऽपि बोधकत्वमिति वाच्यम्; संख्याविरहितेष्वपि रूपसंख्याऽभावेषु एकं रूपमेका संख्या, एकोऽभाव इत्यादिष्वेकपदप्रयोगदर्शनात् । न चानन्तपदस्य प्रागभावप्रध्वंसयोर्व्युत्पत्तेस्तयोरेव तस्य बोधकत्वमिति वाच्यम्; तथात्वाभ्युपगमे नित्यमाकाशमनन्तं चेति प्रयोगानुपपत्तेः । तथाऽन्तशब्दस्य देशतः कालतो वस्तुतश्चेत्यवच्छेदत्रयेव्युत्पत्तेर्नञस्तन्निषेधव्युत्पन्नत्वान्न पृथक् समुदायव्युत्पत्त्यपेक्षा । नापि श्रुतितो लोकतो वादिप्रसिद्धितो

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वा ब्रह्मणि नानात्वप्रसिद्धिः, येन तस्य "नेह नानास्ति किञ्चने"ति श्रुत्या निषिद्धत्वं वक्तुं शक्येत। किञ्च नानाशब्दान्न भावप्रत्ययोऽस्ति, येन ब्रह्मणि नानात्वप्रतिषेधः स्यात्। अस्तु तावद्गोशब्देन गोत्वमिव नानाशब्देन नानात्वाभिधानं, तथापि संकोचे हेत्वभावात्सर्वप्रतियोगिकनानात्वप्रतिषेधेनाद्वैते पर्यवसानात्। न च प्रपञ्चस्य मिथ्यात्वे आगमस्योपजीव्यविरोधः शङ्कनीयः, तस्य तद्विषयस्य च पारमार्थिकत्वांशस्यानुपजीव्यात्तद्बाधनेऽपि विरोधाभावात्। आगमः प्रत्यक्षस्य यदंशंमपेक्षते न तदंशं बाधते, यदंशं बाधते, न तदंशमपेक्षते। अतो नोपजीव्यविरोधोऽस्तीतिभावः। न च सांव्यावहारिकस्य बाधाभावेऽद्वैतानुपपत्तिरिति वाच्यम्; प्रपञ्चे पारमार्थिकत्वस्यैव प्रत्यक्षवृत्ति-सांव्यावहारिकभागस्यागमेनाबाध्यमानत्वात्। अतो न श्रुतेरप्रामाण्यप्रसक्तिरितिभावः। न च "न हिंस्यादित्यादि"वाक्येषु परस्परपराहतिरिति वाच्यम्; सामान्यविशेषभावेनेच्छाविकल्पेन वा व्यवस्थितविकल्पेन वाऽविरोधोपपत्तेः। न च कर्मकाण्डज्ञानकाण्डयोर्भेदाभेदविषयतया कर्मानुष्ठानतत्त्यागप्रतिपादकतया च विरोधः; विद्याऽविद्याऽवस्थाभेदेन विद्वदविद्वत्पुरुषविषयतया चाविरोधात्। तस्माल्लक्षणप्रमाणाभ्यां प्रपञ्चे मिथ्यात्वसिद्धिरित्यर्थः।

प्रश्नः ३५—ज्ञानबाध्यत्वं वा अनिर्वचनीयत्वमिति लक्षणं सम्यग् विविच्य ख्यातत्वे सति बाध्यत्वान्यथानुपपत्तेरनिर्वचनीयत्वे प्रमाणत्वं समर्थनीयम्।

उत्तरम्—अथ ज्ञानबाध्यत्वं वा अनिर्वचनीयत्वमिति तृतीयलक्षणं समीचीनम्। ननु पूर्वज्ञानस्य तज्जन्यसंस्कारस्य चोत्तरज्ञानेन बाधात्तयोरतिव्याप्तिरिति चेन्न, तयोर्ज्ञाननाश्यत्वेऽपि ज्ञानबाध्यत्वानङ्गीकारात्। प्रतिपन्नोपाधावभावबोधो बाधः। न च पूर्वज्ञानस्य तत्संस्कारस्य वा प्रतिपन्नोपाधावात्मनि नासीदात्माधिकरणं ज्ञानं संस्कारो वेत्यभावो बोद्धुं शक्यः। मुद्गरप्रहारेण घटादेरिवेश्वरज्ञानेन प्रपञ्चस्य प्रध्वंस एव क्रियते, न त्वभावबोधोऽतो नातिव्याप्तिः। अभावबोधनं हि बाधो न तु ध्वंसकरणमिति भावः।

एवमनिर्वचनीयत्वे ख्यातत्वे सति बाध्यत्वानुपपत्तिरपि प्रमाणम्। ननु देशान्तरे सत्त्वादत्रासत्त्वाच्च ख्यातिबाधयोरन्यथाप्युपपत्तिरिति चेन्न, अन्यत्र सत्त्वस्येह प्रतीत्ययोगात्। नहि भूमावम्भरुहं सदिति दृष्टाक्षस्यापि नभसि तदेव भासते। अप्रतीतत्वादेव च बाधायोगात्। न चासतोऽभानेऽसत्पदप्रयोगस्यापार्थकत्वप्रसङ्ग इति वाच्यम्; अपरोक्षभानाभावस्येह विवक्षितत्वात्परोक्षभानस्य चानिराकरणात्। न च सच्छब्दार्थानिरुक्तेर्यत्सत्तदबाध्यमिति व्याप्त्यसिद्धिः, व्यवहारदशायां तत्त्वं व्यवस्थापयता त्वयापि रजताद्यपेक्षया घटादौ यदेव सत्त्वेन व्यवस्थापितं, तदेव मयाप्यबाध्यत्वमुच्यते। अतो न तत्र व्याप्त्यसिद्धिशङ्का। किञ्च सत्त्वमबाधायां प्रयोजकमसत्त्वं चाभाने प्रयोजकमवश्यमभ्युपगन्तव्यमन्यथागौरवापत्तिः स्यात्। न चासतोऽपि तत्पदात्प्रतिभासनात्सत्तायुक्तस्यापि प्रपञ्चस्य

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

बाधाभ्युपगमान्नतयोः प्रयोजकत्वम्; अपरोक्षतयाऽभानस्य व्यवहारदशायां चाबाध्यस्येह विवक्षितत्वात् ।

ननु यत्सद्विलक्षणं तद्बाध्यं यदसद्विलक्षणं तत्ख्यातीतिव्यतिरेके गौरवं स्यात्, सत्त्वासत्त्वयोस्तु ख्यातिबाधप्रयोजकतायां मत्पक्षे लाघवमिति चेन्न, विनिगमकाभावेन तवापि व्यतिरेके गौरवस्य तुल्यत्वात् । अख्यात्यबाध्यत्वयोः सदसद्वैलक्षण्यस्य प्रयोजकत्वाङ्गीकारात् । न चैवमपि प्रयोजकत्व-विनिगमनायां हेत्वभावः शङ्कनीयः; पक्षान्तरे ख्यात्यसम्भवापत्तेः । अध्यस्तस्येहासत्त्वात् सतश्च ख्यातौ भ्रान्त्यभावेन बाधानुपपत्तेश्च । रजतस्यासत्त्वे चापरोक्षतयाभानानुपपत्तेः । तस्माद-निर्वचनीयत्वं प्रमाणसिद्धमिति तात्पर्यम् ।

प्रश्नः ३६—प्रारब्धस्य भोगैकनाश्यत्वात्तस्य कथमनिर्वचनीयत्वसिद्धिरिति विमृशत ।

उत्तरम्—अविद्यातत्कार्यनिखिलप्रपञ्चयोरनिर्वचनीयत्वविचारावसरे पूर्ववादिना लक्षणं प्रमाणं च निराकृतम् । तदित्थं लक्षणप्रमाणयोरनिरूपणान्नानिर्वचनीयावभासो विभ्रम इति । ततः सिद्धान्तिना श्लोकेन तल्लक्षणं संकलितम्—

प्रत्येकं सदसत्त्वाभ्यां विचारपदवीं न यत् ।
गाहते तदनिर्वाच्यमाहुर्वेदान्तवेदिनः ॥इति॥

सत्त्वेनासत्त्वेन च विचारासहत्वे सति सदसत्त्वेन च प्रत्येकं यद्विचारमार्गं न प्रविशति तदेवानिर्वचनीयं प्राहुर्वेदान्तवेदान्तिनः । ज्ञानबाध्यत्वं वानिर्वचनीयत्वमित्यप्याहुः । अनिर्वचनीयत्वस्य लक्षणोपपाद-नानन्तरं प्रमाणमपि ख्यातत्वे सति बाध्यत्वानुपपत्तिरित्यनेनोपपादितम् । अनुमानमप्यत्र प्रमाणम्—विमतं जगदनिर्वचनीयं, बाध्यत्वात्, यन्नैवं तन्नैवं यथाऽत्मेति । ननु संसर्गस्यैव बाध्यत्वाद्रजतस्य बाध्यत्वमसिद्धमिति चेन्न, द्वयोरपरोक्षतया प्रतिभासमानयोः संसर्गमात्रप्रतिषेधे विविक्तयोर्व-नस्पत्योरिव बाधोत्तरकालमुभयोरपि इहावभासप्रसङ्गात् । तस्माल्लक्षणप्रमाणाभ्यामविद्यातत्कार्य-योरनिर्वचनीयत्वं सिद्धमिति ।

ननु तत्त्वमसीत्यादिमहावाक्यजन्याद्वैतब्रह्मात्मैक्यबोधेनाविद्यातत्कार्ययोर्निवर्त्यत्वाभ्युपगमे कथं तत्त्वविदां शरीरस्थितिः कथं वा जीवन्मुक्तिसिद्धिरिति चेन्न; परमार्थतो ब्रह्मात्मनोरभिन्नत्वेऽपि निरुक्ताविद्यया भेदप्रतीतेः । तथाहि—ब्रह्मात्मैक्यविशुद्धचैतन्यनिष्ठाविद्याया अस्त्यंशद्वयम्, आवरणं विक्षेपश्च । तयोरावरणभागः स्वरूपं ब्रह्मात्मैक्यमावृणोति, विक्षेपभागस्तु शरीरादिसंसारं तदुचितभोगादिकं च सम्पादयति । तत्त्वमस्यादिमहावाक्यजन्याद्वयात्मबोधेनाविद्यांशावरणस्य निवर्त-मानत्वेऽपि विक्षेपांशस्यानिवर्तमानत्वमभ्युपेयते, तेन प्रारब्धशेषतयोपभोगसम्भवः । न चाविद्याया-स्तत्त्वधिया नाश्यत्वेऽपि कथं विक्षेपांशावस्थानमिति वाच्यमिति, विक्षेपांशनाशे प्रारब्धकर्मणः प्रतिबन्धकत्वात् । न चाध्यस्तसर्पाधिष्ठानरज्जुतत्त्वबोधे न तत्र विक्षेपांशस्यावस्थानं वक्तुं शक्यते इति वाच्यम्, निरुपाधिकविभ्रमस्य तथात्वेऽपि सोपाधिकभ्रमस्थले विक्षेपांशस्यावस्थितिसम्भवात्

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

जलगतप्रतिबिम्बस्य दर्पणगतप्रतिबिम्बस्य च बिम्बतत्त्वबोधेऽपि जलदर्पणयोरूपाध्योर्नाशमन्तरेण सार्वजनीनानुभवसिद्धस्य प्रतिबिम्बस्य दृश्यमानत्वात् । किं चात्मावबोधेन सञ्चितकर्मसहितस्यावरणांशस्यैव नाशः सम्भवति न तु प्रारब्धकर्मयुतस्य विक्षेपांशस्यापि। अत एव भगवता वेदव्यासेनोक्तम् "भोगेन त्वितरे क्षपयित्वा सम्पद्यते" "इति सूत्रेण प्रारब्धस्य भोगैकनाश्यत्वमुक्तम् । न च "क्षीयन्ते चास्य कर्माणी"ति श्रुत्या "ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा" इति स्मृत्या च सर्वकर्मणां नाश्यत्वोक्तेन कर्मसंकोचोक्तिर्नोपपद्यते इति वाच्यम्; तत्त्वज्ञानेन सर्वकर्मनाश्यत्वाभ्युपगमे जीवनमुक्तस्यभावप्रसङ्गात् । तथा च "तद्विज्ञानार्थं स गुरुमेवाभिगच्छेदि"ति श्रुतिः । "तद्विद्धि प्रणिपातेन" इत्यादिस्मृतिश्च नोपपद्येत । तस्मात्प्रारब्धस्य भोगैकनाश्यत्वेऽपि निरुक्तरीत्या तस्यानिर्वचनीयत्वे न काप्यनुपपत्तिरिति भावः ।



RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ॐ

॥ चित्सुखीग्रन्थस्थ द्वितीयपत्राणि ॥

प्रश्नः १—विवादाध्यासितः सिद्धः शब्दव्युत्पत्तिगोचरः ।
मेयत्वान्न्यायगम्यत्वात् तवाभिमतकार्यवत् ।

सप्रपञ्चं ग्रन्थमिमं व्याख्याय उक्तानुमाने कार्यत्वमुपाधिः सम्भवति न वा ? इति स्फुटं विविच्यताम् ।

उ०—अथ न केवलं सिद्धार्थव्युत्पत्तौ युक्तिरेवापितु प्रमाणमपि, तथा हि—

विवादाध्यासितः सिद्धः शब्दव्युत्पत्तिगोचरः ।
मेयत्वान्न्यायगम्यत्वात्तवाभिमतकार्यवत् ॥

इति श्लोकेनानुमानं दर्शयति । विवादाध्यासितपदं कार्यान्विते सिद्धसाधनतावारणाय । नन्वत्रानुमाने कार्यत्वमुपाधिरिति चेन्न; यत्र कार्यत्वं नास्ति तत्र शक्तिविषयत्वमपि नास्ति, यथोभयसम्मतमिति व्यतिरेकव्याप्तेः प्राभाकारं प्रति दर्शयितुमशक्यत्वेनोक्तानुमाने कार्यत्वोपाध्यसम्भवात् । ननु व्यक्तौ शब्दशक्तिविषयत्वाभावेऽपि मेयत्वहेतोर्वर्तमानतया तत्रानैकान्तिकतेति चेन्न; आकृतेः शब्दार्थत्वेऽपि तस्या एव शब्दार्थत्वमिति नियमानङ्गीकारात् । व्यक्तेरपि शक्तिविषयत्वं ममाभिमतं, "व्यक्त्याकृतिजातयस्तु पदार्थाः" इति सूत्रकृद्भिःसमर्थितम्, आकाशादिपदानां व्यक्तिवाचकत्वं मीमांसकैरप्यभिमतमिति व्यक्तिशब्दस्य वाचकत्वं सर्वैरभ्युपेयमिति भावः । न च सर्वव्यक्तिष्वनुगतस्य व्यक्तित्वोपाधेरेव व्यक्तिशब्दवाच्यत्वं न व्यक्तेस्तस्या लक्ष्यत्वादितिवाच्यम्; क्वचिदप्यवाच्यस्य लक्ष्यत्वानुपपत्तेः; व्यक्तिः शब्दवाच्या न भवतीति स्ववचनव्याघाताच्च । तस्माद्ब्रह्मणि वेदान्तानां प्रामाण्यं सिद्धमिति ।

वस्तुतस्तु शब्दस्य कार्ये प्रामाण्यमेवानुपपन्नं, तत्र संगतिग्रहणायोगात् । ननु कथं तत्र संगतिग्रहणायोगः, स्वतन्त्रप्रवृत्तिदर्शनात् । अन्यथा प्रवलानिलजलौघेन नुद्यमानप्रवृत्तौ व्यभिचारः स्या।दति । तथाहि स्वाधीनाप्रवृत्तिर्बुद्धिपूर्विका, स्वतन्त्रप्रवृत्तित्वात्, मदीयाप्रवृत्तिवदिति पूर्वं प्रवृत्तिदर्शनेन प्रवर्त्तकज्ञानमनुमीयते, ततः प्रवर्त्तकज्ञानत्वहेतुना स्वीयप्रवर्त्तकज्ञानं दृष्टान्तीकृत्य कार्यविषयकतामध्यवस्यति । यथा मध्यमवृद्धप्रवृत्तिहेतुभूताबुद्धिः, कार्यविषया, प्रवृत्तिहेतुभूतबुद्धित्वाद्, मदोयाप्रवृत्तिहेतुभूतबुद्धिवत् । तदनन्तरं मध्यमवृद्धनिष्ठज्ञानं, शब्दशक्तिकार्यग्रहपूर्वकं, गामानयेत्यन्वय-व्यतिरेकाभ्यां शब्दानुविधायित्वाद्, मदीयशब्दशक्तिकार्यज्ञानवदिति कार्ये शक्तिग्रहः सम्भवत्येव । न चात्मनि प्रवृत्तिमिष्टसाधनताज्ञानादेव दृष्ट्वा परत्रापि तदेवानुमेयमिति विरुद्धो हेतुर्दृष्टान्ते साध्य-वैकल्यं चेति वाच्यम्; अतीतेषु नष्टराज्यादिषु ज्योतिषाचार्येणोक्तेषु भाविधनादिषु च सत्त्वेऽपीष्ट-साधनताज्ञाने प्रर्त्तकत्वाभावेन व्यभिचारात् । अथ कृतिसाध्येष्टसानताज्ञानस्य प्रवर्त्तकत्वाभ्युपगमे नामान्तरेण कार्यमेव प्रवर्त्तकं त्वयापि स्वीकृतं, कार्यस्यैव कृतिसाध्यत्वात्, कृतिसाध्यं प्रधानं यत्तत्कार्य-मभिधीयते इति शालिकनाथेणोक्तत्वात् । न चैवमपि कृतिसाध्येष्टसाधनताज्ञानमेव प्रवर्त्तकं न भवेदिष्ट-कार्यज्ञानमिति; इष्टसाधनताज्ञानस्य कार्यज्ञानं प्रति हेतुतया कुलालपितृवदन्यथासिद्धेः ।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मनारथो यदि बालेन स्वात्मन्यपि कार्यबोधस्य प्रवर्त्तकत्वमध्यवसीयेत, समीहितसाधनताया एव तु स्वात्मनि प्रवर्त्तकत्वाध्यवसायात्। न चातीतादाविष्टसाधनताज्ञानमात्रस्य व्यभिचारात्कृतियोग्येष्ट-साधनताज्ञानमेव कार्यताज्ञानहेतुरितिवाच्यम्, तादृगिष्टसाधनताबोधस्यैव प्रवृत्तिहेतुत्वोपपत्तौ कार्यवि-बोधस्य प्रवर्त्तकत्वकल्पने प्रयोजनाभावात्। न चेष्टसाधनताज्ञानमेव कार्यताज्ञानमिति वाच्यं; कार्यता-ज्ञानं प्रतीष्टसाधनताज्ञानस्य हेतुत्वाभ्युपगमात्। न च ममेदं कार्यमिति चिकीर्षामपहाय कार्यज्ञानं नाम किञ्चदुपलभ्यते। न च चिकीर्षोत्पादकं कार्यज्ञानमिति कल्पयितुं युक्तम्; कृतियोग्येष्टसाधनता-ज्ञानादेव चिकीर्षाया अप्युपपत्तेरिति दिक्।

प्रश्नः २—वेदान्तानां सिद्धार्थबोधकत्वं युक्तिभिः समर्थनीयम्।

अथ वैदिकलिङ्गादिशब्दाः क्रियारूपकार्यवाचकाः, कार्यप्रत्ययहेतुत्वाद्, आनयेत्यादिशब्दवदि इत्युनुमानं प्रत्यनुमानपराहतमिति पूर्ववादिना न लिङ्गादेः क्रियातिरिक्तकार्याभिधायित्वमनुमातुं शक्यम्। इष्टसाधनतावादिनो वेदान्तिनः प्रति साध्यवैकल्यं चाप्यस्ति। लौकिकलिङाशब्दानामपि श्रेयः साधनबोधकत्वाभ्युपगमेन व्यापकाभावानुपलब्ध्या व्याप्याभावानुपलब्धिपराहतत्वाच्च। तथाहि—तदभिधायकत्वं तत्र सङ्गतिग्रहेण व्याप्तम्; तच्च मानान्तरानधिगतादपूर्वाद्विचावर्तमानं लिङादीनां कार्याभिधायकतां वारयति। न च क्रियातिरिक्तकार्याभिधाने स्वर्गकामो यजेतेति शास्त्र-स्याप्रामाण्यप्रसङ्गः; क्रियाया एवान्तरव्यापाराया: परमेश्वरानुग्रहावान्तरव्यापाराया वा फलसाधनत्वो-पपत्तेः। तस्माद्विधिवाक्यानामपि सिद्धार्थबोधकत्वं यदा, तदा विधिसंस्पर्शविधुराणां सत्यज्ञानादिश्रुति-वाक्यानामखण्डैकरसब्रह्मलक्षणसिद्धार्थबोधकत्वं सुतरां सिद्ध्यतीति दिक्।

प्रश्नः ३—कार्यज्ञानस्य प्रवर्तकत्वं निराकृत्य स्वमतं साधु निरूप्यताम्।

प्रश्नः ४—कार्यस्यावगतेर्हेतुर्यादृशं हितसाधनम्। प्रवृत्तेस्तादृशं हेतुर्व्यभिचारः ततः कुतः॥ पद्यमिदं सम्यग् व्याख्यायताम्।

उत्तरम्—पूर्ववादिना युक्तिप्रमाणाभ्यां सिद्धार्थे व्युत्पत्तिं निरस्य नियोगात्मके कार्ये लिङा-दीनां शक्तिरभिहिता। तत्र प्रयोगमप्याह—विवादाध्यासिता लिङादयः, एतत्क्रियातिरिक्तकार्याभि-धायिनः, कार्याभिधायित्वाद्, गामानयेत्यादिपदवत्। विपक्षे यागातिरिक्तकार्यानभ्युपगमाद् यागस्य चाशुतरविनाशित्वेन स्वर्गसाधनत्वानुपपत्तेः "स्वर्गकामो यजेते"त्यादिवाक्यानामप्रामाण्यप्रसङ्गो बाधकस्तर्क इति। तत्र—

सिद्धान्ती कार्ये व्युत्पत्तिं दूषयितुं श्लोकेन भूतादौ व्युत्पत्तिव्यभिचारं वारयति—
कार्यस्यावगतेर्हेतुर्यादृशं हितसाधनम्। प्रवृत्तेस्तादृशं हेतुर्व्यभिचारः ततः कुतः॥

इति। कृतिसाधनताविशिष्टमिष्टसाधनताज्ञानं यादृशं मीमांसकैरभ्युपेयते प्रवृत्तिं प्रति कारणं, तादृशमेव ज्ञानं प्रवर्तकत्वेनाश्रीयते मयापि, कुतो व्यभिचार इति भावः। न चेष्टसाधनताज्ञानमेव कार्यताज्ञानमिति वाच्यम्; इष्टसाधनताज्ञानस्य कार्यताज्ञानं प्रति हेतुत्वाभ्युपगमात्। न च ममेदं कार्यमिति चिकीर्षां विहाय कार्यज्ञानं किञ्चिदुपलभ्यते, नापि कार्यधियमन्तरेणानुपपद्यमाना-चिकीर्षैव कार्यबुद्धिं कल्पयतीति वाच्यम्; कृतियोग्येष्टसाधनताबोधादेव चिकीर्षाया अप्युपपत्तेः।

न च कृतिसाध्यं प्रधानं यत्तत्कार्यमभिधीयते इति कार्यलक्षणं वक्तुं युक्तम्; कृतिसाध्ये फलेऽति-व्याप्तेः। न च साक्षात्कृतिसाध्यत्वविवक्षायां नोक्तदोष इति वाच्यम्; नियोगे तदभावेनाव्याप्तेः। धात्वर्थस्यैव साक्षात्कृतिसाध्यत्वात्। न च साध्यैकस्वभावत्वं कार्यत्वम्; उत्पत्तियोग्येषु प्रागभाव-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वत्सु घटादिषु व्यभिचारात् । न च सदा साध्यैकस्वभावत्वं कृतिसाध्यत्वनियोगस्य लक्षणमभिप्रेतं घटादीनामुत्पत्तिकालावच्छेदेन साध्यैकस्वभावत्वे सत्यप्युत्पत्त्यनन्तरं सिद्धतया साध्यैकस्वभावत्वाभावान्न तत्र घटादिषु नियोगलक्षणस्यातिव्याप्तिरिति वाच्यम्; नियोगस्य तथात्वाभ्युपगमे नियोगस्वरूपस्य सदाऽसिद्धौ स्वर्गादिफलासिद्धिप्रसङ्गात् ।

अस्तु तावल्लोके किञ्चित्कार्यमापाततः, तथापि तद्विशेषेऽलौकिके नियोगे वैदिकलिङादिशब्दाद्बोधः कथं स्यात् ? मानान्तरानधिगते नियोगे लिङादेः शक्तिग्रहस्यायुक्तत्वात् अधिगते चापूर्वत्वभङ्गप्रसङ्गात् । न च कार्यताकारेण लोकप्रसिद्धस्यैव नियोगस्य वाक्यविशेषविमर्शाद्विशेषमात्रनिर्णयो भवतीति वाच्यम्; अनुपपत्तिर्नामार्थापत्तिप्रमाणं, नियोगस्य तद्वेद्यत्वस्वीकारे मानान्तराधिगततयाऽपूर्वत्वभङ्गप्रसङ्गस्य तादवस्थ्यात् ।

नन्वनुपपत्तिर्नार्थापत्तिः किन्तु तर्करूपा प्रमाणानुग्राहिकापरीक्षकैः स्वीक्रियतेऽतो नोक्तदोष इति चेन्न तर्कगोचरत्वेऽपि प्रमाणान्तरगोचरत्वस्यावश्यम्भावित्वात् । न च नियोगस्यार्थापत्तिगम्यत्वमपि; कृतेर्भावार्थजननद्वाराऽपूर्वसाधनत्ववत्क्रियाया एवापूर्वावान्तरव्यापारद्वारा स्वर्गसाधनत्वोपपत्तेः । अपि च नियोगस्य कृत्युद्देश्यत्वं; सुखावाप्तिदुःखपरिहारयोस्तदुभयसाधनयोर्वा पुरुषार्थत्वान्नियोगस्य पुरुषार्थत्वाभावात् । न च स्वर्गादिफलसाधनत्वेन नियोगस्य पुरुषार्थत्वमिति वाच्यम्; नित्यनैमित्तिकनियोगस्य कृत्युद्देश्यत्वलक्षणस्याव्याप्तेः । नियोगस्य पुरुषार्थत्वाभ्युपगमे तत्र फलसाधनत्वानर्थक्यप्रसङ्ग इति । किं च स्वर्गादिसाधनत्वेन नियोगस्य प्राधान्यमपि न सम्भवतीति; तस्य स्वर्गादिशेषत्वाभ्युपगमादिति दिक् ।

प्रश्नः ५—तत्त्वप्रदीपिकानुसारेण परमतनिराकरणपूर्वकं वेदान्तवाक्यानां सिद्धार्थबोधकत्वमुपस्थाप्यताम् ।

प्रश्नः ६—वेदान्तानां सिद्धार्थबोधकत्वं युक्तिभिः समर्थनीयम् ?

उत्तरम्—अथ न केवलं सिद्धार्थव्युत्पत्तौ युक्तिरेवापितु प्रमाणमपि, तच्च कार्यस्यावगतेर्हेतुर्यादृशं हितसाधनं, प्रवृत्तेस्तादृशं हेतुर्व्यभिचारस्ततः कुतः । इति समीहितसाधनताया एव स्वात्मनि बालेन प्रवर्तकत्वमध्यवसितम् । तत्रापीष्टसाधनताबोधमात्रस्यातीतादौ व्यभिचारात्कृतियोग्येष्टसाधनताज्ञानमेव कार्यताज्ञानहेतुरित्यभ्युपेयते । तथा तादृगिस्टसाधनताबोधस्यैव प्रवृत्तिहेतुत्वसिद्धौ कृतं कार्यविबोधेनेति ।

न च कृतिसाध्यं प्रधानं यत्तत्कार्यमभिधीयत इति कार्यलक्षणं वक्तुं युक्तम्; कृतिसाध्ये फलेऽतिव्याप्तेः । न च साक्षात्कृतिसाध्यत्वविवक्षायां नोक्तदोष इति वाच्यम्; नियोगे तदभावेनाव्याप्तेः । धात्वर्थस्यैव साक्षात्कृतिसाध्यत्वाच्च । न च साध्यैकस्वभावत्वं कार्यत्वम्, उत्पत्तियोग्येषु प्रागभाववत्सु घटादिषु व्यभिचारात् । न च सदा साध्यैकस्वभावत्वं कृतिसाध्यत्वनियोगस्य लक्षणमभिप्रेतं, घटादीनामुत्पत्तिकालावच्छेदेन साध्यैकस्वभावत्वे सत्यप्युत्पत्त्यनन्तरं सिद्धतया साध्यैकस्वभावत्वाभावान्न घटादिषु नियोगलक्षणस्यातिव्याप्तिरिति वाच्यम्; नियोगस्य तथात्वाभ्युपगमे नियोगस्वरूपस्यसदाऽसिद्धौ स्वर्गादिफलासिद्धिप्रसङ्गात् ।

अस्तु तावदापाततो लोके किञ्चित्कार्यं, तथापि तद्विशेषेऽलौकिके नियोगे वैदिकलिङादिशब्दाद्बोधः कथं स्यात् । मानान्तरानधिगते नियोगे लिङादेः शक्तिग्रहस्यायुक्तत्वात् । अधिगते चापूर्वत्वभङ्गप्रसङ्गात् । न च कार्यताकारेण प्रसिद्धस्यैव नियोगस्य वाक्यविशेषविमर्शाद्विशेषमात्रनिर्णयो भवतीति

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वाच्यम्; नियोगस्यानुपपत्तिरूपार्थापत्तिप्रमाणवेद्यत्वस्वीकारे मानान्तराधिगततयाऽपूर्वत्वभङ्गप्रसङ्गस्य तादवस्थ्यात्। नन्वनुपपत्तिर्नार्थापत्तिः, किन्तु तर्करूपा प्रमाणानुग्राहिका परीक्षकैरभ्युपेयते, अतो नोक्तदोष इति चेन्न, तर्कगोचरत्वेऽपि प्रमाणान्तरगोचरत्वस्यावश्यम्भावित्वात्। न च नियोगास्यार्थापत्तिगम्यत्वमपि; कृतेर्भावार्थजननद्वाराऽपूर्वसाधनवत्क्रियाया एवापूर्वावान्तरव्यापारद्वारा स्वर्गसाधनत्वोपपत्तेः।

अपि च नियोगस्य न कृत्युद्देश्यत्वं, सुखावाप्तिदुःखपरिहारयोरेतदुभयसाधनोर्वापुरुषार्थत्वान्नियोगस्य पुरुषार्थत्वाभावात्। न च स्वर्गादिसाधतत्वेन नियोगस्य पुरुषार्थत्वमिति वाच्यम्; नित्य नैमित्तिककर्मजन्यनियोगस्य कृत्युद्देश्यत्वलक्षणस्याव्याप्तेः। नियोगस्य पुरुषार्थत्वाभ्युपगते तत्र फलसाधनत्वानर्थक्यप्रसङ्गाच्च। किं च स्वर्गादिसाधनत्वेन नियोगस्य प्राधान्यमपि न सम्भवतीति, तस्य स्वर्गादिफलशेषत्वाभ्युपगमात्। तस्माद्वेदान्तानां कथमपि कार्यपरत्वं न वक्तुं युक्तमिति दिक्।

प्रश्नः ७—सिद्धार्थे शक्तिग्रहः सम्भवति नवेति पर्यालोच्य 'विज्ञानमानन्दं ब्रह्मे' त्यादिवचसां प्रतिपत्तिशेषत्वं निरस्यताम्।

उत्तरम्—अथ कार्यवादी सिद्धार्थे वेदस्य प्रामाण्याभावमुपपाद्य लोकवेदयोः कार्ये शक्तिग्रहसामर्थ्यमुपपादयामास। तत्र सिद्धान्ती स्वपक्षसमुपपादनाय कार्यवादिपक्षं निराकृतवान्। तथाहि—न तावत्सिद्धे प्राथमिकव्युत्पत्त्यसम्भवः। तत्र पारिशेष्यावधारणं "दृष्टचैत्रसुतोत्पत्तेस्तत्पदाङ्कितवाससा। वार्ताहारेण यातस्य परिशेषविनिश्चितेः। इति श्लोकेन संग्राहयामास। दृष्टा चैत्रसुतोत्पत्तिर्येन, तस्य पुत्रस्य पदेनाङ्कितं लांछितं वासो यस्य तत्पदाङ्कितवासास्तेन वार्ताहारेण सह यातस्याविदितपदपदार्थभाषस्य द्रविडस्य परिशेषविनिश्चितेः सम्भवादिति श्लोकयोजना। यो हि परिदृष्टचैत्रप्रहर्षहेतुभूतपुत्रजन्मा पुत्रपदालिप्तकुङ्कुमालिप्तपटप्रदर्शनेन वार्ताहारेण सह चैत्रसकाशंगतः, तस्य 'दृष्टचा वर्धसे चैत्र ? पुत्रस्ते जात' इति वार्ताहारवाक्यश्रवणसमनन्तरं प्रसन्नवदनं चैत्रमवलोकयतस्तत्प्रमोदलिङ्गेन चैत्रहर्षसूचकं पुत्रजन्मैव नान्यदित्यध्यवसितस्य द्राविडस्य सिद्धार्थे पदानां शक्तिग्रहः सम्भवत्येव। एवं सिद्धेऽपि प्राथमिकव्युत्पत्तेः सम्भवात्प्रभिन्नकमलोदरे मधूनि पिवति मधुकर इत्यादि पदसमभिव्याहारनिवन्धनव्युत्पत्तावपि सिद्धार्थपरताऽव्याघातः। एवं मुख्यार्थविषयतया सिद्धेऽपि प्रयोगयोगे न लाक्षणिकत्वकल्पना कथञ्चिदपि सम्भवतीति भावः।

ननु विवादास्पदानि पदानि, कार्यपराणि, पदत्वात्कार्यपदवदित्यनुमानेन सर्वेषां पदानां कार्यपरत्वमनुमीयते इति चेन्न, 'न पिबेत्' न हन्यादि"ति निषेधवाक्यस्थपदैरनैकान्तिकत्वात्। तत्र पदत्वहेतुसत्त्वेऽपि कार्यत्वाभावात्। नहि तत्र प्राप्तक्रियौदासीन्यव्यतिरेकेण किञ्चिदनुष्ठेयमववोध्यते, हननप्रागभावस्यानादित्वेनाननुष्ठेयत्वात्। न चात्रौदासीन्यव्यतिरिक्तस्य 'न हन्यामिति' हनननिरोधसंकल्पस्य विधारकप्रयत्नस्य वा विधानमभ्युपेयते इति वाच्यम्; तस्याप्रतीयमानतया लक्षणाप्रसङ्गात्, निषेधार्थवाक्येन प्राप्तक्रियायाश्चेष्टसाधनत्वाभावमात्रवोधादेव कृतकार्यत्वोपपत्तेश्च।

न च विज्ञानमानन्दं ब्रह्मे'त्यादिवाक्यानां प्रतिपत्तिशेषत्वमिति वाच्यम्; विकल्पासहत्वेन प्रतिपत्तिविधिशेषत्वाभावात्। तथाहि किं शाब्दी प्रतिपत्तिर्विधेया ? भावनात्मिका ? साक्षात्काररूपा वा ? नाद्यः, परोक्षज्ञानरूपायाः शाब्दीप्रतिपत्तेः 'स्वर्गकामो यजेते'त्यादिशब्दवद् विधिमन्तरेणैव विदितपदपदार्थसङ्गतेः पुरुषस्य स्वयमेवोत्पत्तेः। न चात्राध्ययनविधिनैव शाब्दीप्रतिपत्तिर्भवतीति वाच्यं स्वर्गकामो यजेतेत्यत्र पृथग्विध्यनवकाशाद्, अध्ययनविधेरक्षरग्रहणमात्रविश्रान्तत्वाच्चेति भावः। नापि ध्यानरूपा भावनात्मिका प्रतिपत्तिरत्रविधेया; तस्याः प्रकर्षज्ञानहेतुत्वे गान्धर्वशास्त्रवदन्वय-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

व्यतिरेकसिद्धमिति तत्र विधेयत्वाभावात् । नापि साक्षात्काररूपा प्रतिपत्तिर्विधेयेति वाच्यम्; ब्रह्मस्वरूपत्वेन नित्यसिद्धत्वेनाविधेयत्वात् । न च साक्षात्कारपदेनान्तःकरणपरिणामोऽत्र विवक्षित इति वाच्यम्; तस्यापि परमानन्दब्रह्मसाक्षात्कारत्वेन फलरूपतयाऽविधेयत्वात् । 'द्रष्टव्य' इत्यादिपदानां 'अर्हे कृत्यतृचश्चे'ति कृत्यप्रत्ययान्तानामर्हार्थतयाप्युपपत्तेश्चेति दिक् ।

प्रश्नः ८—स्वाधीतग्रन्थदिशा नियोज्यलक्षणं निरस्य नियोगस्य प्राधान्यं स्फुटं निराक्रियताम् ।

उत्तरम्—अथेतः पूर्वं नियोगस्य शब्दाप्रतिपाद्यत्वमुपपादितं, सम्प्रति नियोगव्यावर्तनाय नियोज्यं दूषयितुं समारभते—कश्चायमिति । नियोज्यस्य क्रियां प्रति गुणत्वस्वीकारे तस्य चेतनतया कर्तृत्वेन लोके क्रियामात्रेऽन्वयदर्शनान्न क्रियातिरिक्तकार्यसिद्धिः सम्भवति । नियोज्यस्य क्रियां प्रति प्राधान्याभ्युपगमेऽधिकारिण्यन्तर्भावान्न ततोऽपि क्रियातिरिक्तकार्यसिद्धिरित्यर्थः, नियोगनियोज्ययोर्गुणप्रधानातिरिक्तप्रकारान्तरासम्भवाच्च । नह्येतयोः स्वतन्त्रयोरन्वयः सम्भवतीति भावः । न च क्रियारूपकार्यं प्रति गुणभूतत्वं कर्तृत्वं, क्रियातिरिक्तनियोगात्मकं कार्यं प्रति गुणभूतत्वं नियोज्यत्वमिति विषयभेदाद्भेद इति वाच्यम्; निरुक्तरीत्या नियोज्यनियोगनिरूपणस्यान्योऽन्याश्रितत्वेन दुष्टत्वात् ।

किञ्च सुखावाप्तिदुःखपरिहारयोस्तदुभयसाधनयोर्वा न कृत्युद्देश्यत्वमपि गुरुमतानुसारिभिर्नियोगस्य लक्षणं वक्तुं युक्तम् । न च स्वर्गादिसाधनत्वेन नियोगस्य पुरुषार्थत्वमिति वाच्यम्; नित्यनैमित्तिकनियोगे कृत्युद्देश्यत्वस्य नियोगलक्षणस्याव्याप्तेः, नियोगस्य पुरुषार्थत्वाभ्युपगमे तत्र फलसाधनत्वानर्थक्यप्रसङ्गाच्च । न च काम्यकर्मसु फलस्य पुरुषार्थत्वं नित्येषु नियोगसिद्धिरेवपुरुषार्थ इति वैषम्याददोषः; नित्यकाम्यवैषम्यस्यान्यथाप्युपपन्नत्वात् । तथाहि नित्यकाम्ययोः फलवत्त्वाविशेषेऽपि यत्र निमित्ततया कामना श्रूयते कल्प्यते वा तत्काम्यं, यत्र पुनर्नैवं, यदकरणे प्रत्यवायस्तदितरदिति वैषम्यात् । किञ्च नित्यनैमित्तिकयोः फलशून्यत्वे पुरुषस्य प्रवृत्तिरेव न स्यात् । अपि च नित्यकाम्ययोः वैषम्यं पुनरपि वक्तुं न शक्यते; तथाहि फलं प्रति करणीभूते यागादौ रागत एव प्रवृत्तिरितिकर्तव्येषु तु कामाधिकारे वैधी प्रवृत्तिः, नित्येषु करणेतिकर्तव्यतयोर्विधित एव प्रवृत्तिरिति वैषम्यं तवाभिमतं तच्च भज्येत; नियोगस्य फलरूपत्वाभ्युपगमे नियोगकरणे यागादावपि रागत एव प्रवृत्त्युपपत्तेः ।

किं च स्वर्गादिसाधनत्वे नियोगस्य प्राधान्यमपि न सम्भवति, नियोगस्य स्वर्गादिसुखशेषत्वात् । न च स्वानुकूलनियोज्यसिद्धये स्वर्गादिकं साधयतो नियोगस्य स्वामिवत्प्राधान्यानुपघात इति वाच्यम्; दृष्टान्तदार्ष्टिकान्तयोर्वैधर्म्यात् । तथाहि—दृष्टान्ते गर्भदासस्वामिनोश्चेतनतया स्वस्वप्रयोजनोद्देश्येन प्रवृत्तिर्युक्ता, अत्र तु नियोगस्याचेतनतया स्वामिस्थानीयता न युक्ता, अचेतनत्वादेव प्रवृत्तिरपि न युक्ता । न केवलं नियोगस्य प्राधान्याभावः, प्रत्युत स्वर्गं प्रति शेषत्वमेव । एवं च नियोगस्यान्यार्थत्वेऽपि न स्वर्गादिसुखस्यान्यार्थता, स्वभाववैपरीत्यापत्तेः । यदर्थं सर्वं यच्च नान्यार्थं तत्सुखमिति हि सुखस्य लक्षणमाचक्षते, तत्कथं स्वर्गादिसुखस्यान्यशेषता स्यात् । तस्मान्न नियोज्यस्य लक्षणं नापि नियोगस्य प्राधान्यंचोपपन्नमिति दिक् ।

प्रश्नः ९—चित्सुखीरीत्या कार्यस्य लक्षणं निरस्य यागस्य फलं प्रति कारणत्वं सम्भवति न वा इति सम्यगालोच्यताम् ।

उत्तरम्—अत्र सिद्धान्ती कार्यस्याप्रवर्त्तकत्वं तत्र प्रमाणाभावं चोक्त्वा तल्लक्षणं दूषयितुमाह—न च कृतिसाध्यं प्रधानं यत्तत्कार्यमभिधीयते इति कार्यलक्षणं वक्तुं युक्तम्, कृतिसाध्ये प्रधाने च फलेऽतिव्याप्तेः । न च साक्षात्कृतिसाध्यत्वस्य विवक्षितत्त्वे फलेऽतिव्याप्त्यभाव इति वाच्यम्, नियोगे

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तदभावेनाव्याप्तेः, भावार्थस्यैव साक्षात्कृतिसाध्यत्वादिति भावः। अथ साध्यैकस्वभावत्वं नाम साधनार्हत्वाधिकरणत्वं चेत्तर्हि घटादिषूत्पत्तियोग्येषु प्रागभाववत्स्वतिव्याप्तिः। न च सदा साध्यैकस्वभावत्वं कृतिसाध्यत्वनियोगस्य लक्षणमभिप्रेतं, घटादीनामुत्पत्तिकालावच्छेदेन साध्यैकस्वभावत्वे सत्यप्युत्पत्त्यनन्तरं सिद्धतया साध्यैकस्वभावत्वाभावान्न घटादिषु नियोगलक्षणस्यातिव्याप्तिरिति वाच्यम्; नियोगस्य तथात्वाभ्युपगमे नियोगस्वरूपस्य सदाऽसिद्धौ स्वर्गादिफलासिद्धिप्रसङ्गात्।

अस्तु वा लोके किञ्चित्कार्यमापाततः, तथापि तद्विशेषेऽलौकिके नियोगे वैदिकलिङादिशब्दाद्बोधः कथं स्यात्? मानान्तरानधिगते नियोगे लिङादेः शक्तिग्रहस्यायुक्तत्वात्। अधिगते वा नियोगे "अतो मानान्तरापूर्वमपूर्वमिति गीयते, इति स्वकपोलकल्पितापूर्वत्वभङ्गप्रसङ्गात्। न च कार्यताकारेण लोकप्रसिद्धस्यैव नियोगस्य वाक्यविशेषविमर्शाद्विशेषनिर्णयो भवतीति वाच्यम्; अनुपपत्तिरूपार्थापत्तिप्रमाणवेद्यत्वस्वीकारे नियोगस्य मानान्तराधिगततयाऽपूर्वत्वभङ्गप्रसङ्गस्य तादवस्थ्यात्। अथोक्तानुपपत्तिर्नार्थापत्तिः, किन्तु तर्करूपा सा, तर्कस्य स्वरूपेणामानत्वेऽपि प्रमाणानुग्राहकतयाभ्युपगमान्नोक्तदोष इति वाच्यम्, तर्कगोचरत्वस्य प्रमाणान्तरगोचरत्वावश्यम्भावित्वात्। तथा हि प्रमाणान्तराधिगतव्याप्यव्यापकभावयोरेकाभ्युपगमे द्वितीयस्य नियतप्रसञ्जनरूपस्तर्कः। यथा ह्ययं पर्वतो वह्निमान्न स्यात्तर्हि धूमवानपि न स्यादिति। तथा च यद्ययं लिङादिः क्रियातिरिक्तकार्याभिधायी न भवेत्तदा न स्वर्गकामपदेन समभिव्याह्रियेत, समभिव्याह्रियते चायं, तस्मात्क्रियातिरिक्तकार्याभिधायको लिङादिरिति प्रसङ्गरूपे तर्के द्वयोरापाद्यापादकभावयोस्तदभावयोश्च धूमवत्त्ववह्निमत्त्वयोस्तदभावयोरिव कथं न मानान्तरगोचरता स्यात्। न चापाद्यापादकभावोऽपि; क्रियातिरिक्तकार्यस्याप्रसिद्धत्वेन तदभावस्याप्रसिद्धत्वात्। तस्मान्न क्रियातिरिक्तकार्यस्य कथमपि सिद्धिरिति। अपि च फलं प्रतिकरणीभूतस्य यागस्य नियोगं प्रति विषयत्वमपि दुर्निरूपम्। तथाहि—किमिदं यागस्य फलं प्रति करणत्वं श्रुतिलिङ्गादिगम्यम्? उत नियोगानुपपत्तिगम्यम्? नाद्यः, श्रुत्यादीनामदर्शनात्। स्वर्गकामो यजेतेत्यत्र प्रकृतिप्रत्ययाभ्यां यागेन नियोगस्यैव कर्तव्यत्वेन तवाभिमतत्वान्न तु फलस्येति। लिङ्गादीनां चानाशङ्कनीयत्वात्। नापि द्वितीयः, विकल्पाहतत्वात्। तत्र किं नियोगः स्वसिद्धये यागस्य फलकरणत्वं कल्पयति? उत फलसिद्धये? अथवा स्वस्य फलकामिकृतिसाध्यत्वसिद्धये? नाद्यः, नियोगसाधनीभूतयागानुष्ठानादेव नियोगस्य सिद्धेः। न द्वितीयः, नियोगसिद्ध्यैव फलस्यापि सिद्ध्युपपत्तेः। नापि तृतीयः, यागस्य स्वर्गसाधनत्वाभाववत्करणत्वाभावस्याप्यभ्युपेयत्वेन स्वर्गसाधनीभूतनियोगं प्रति करणत्वादेव स्वर्गकामिनः पुरुषस्य कृतिसाध्यत्वोपपत्तेः। न च यागो न स्वर्गं प्रति करणं चेत्तर्हि यागे न स्वर्गकामिनः प्रवृत्तिः स्यादिति वाच्यम्; साधनत्वाभावेऽपि यागे स्वर्गकामिनः प्रवृत्त्यनुपपत्तेस्तुल्यत्वात्। किं च 'साधकतमं करणमि'ति पाणिनिस्मरणात् स्वर्गं प्रति यागस्य साधनत्वाभावे साधनविशेषकरणत्वमपि स्वर्गं प्रति यागस्य न स्यादिति दिक्।

प्रश्नः १०—अपर्यायशब्दानां संसर्गागोचरप्रमितिजनकत्वमिति लक्षणं विशदं विविच्यताम्।

उत्तरम्—अथ लक्षणप्रमाणाभ्यां वस्तुसिद्धिरित्यखण्डार्थत्वस्य न लक्षणं, नापि प्रमाणं सम्भवति। तस्मादुभयोरसम्भवेन नाखण्डार्थता वेदान्तानामिति पूर्वपक्षे सिद्धान्तयति—न तावल्लक्षणासम्भवः, यतः

"संसर्गासङ्गिसम्यग्धीहेतुता या गिरामियम्।
उक्ताखण्डार्थता यद्वा तत्प्रातिपदिकार्थता" ॥ इतिश्लोकेन

लक्षणद्वयं सङ्कलयति। अपर्यायशब्दानां संसर्गागोचरप्रमितिजनकत्वमखण्डार्थकत्वम्। न चेदंलक्षणमसम्भवं, प्रकृष्टप्रकाशश्चन्द्र इत्यादिवाक्येषु निरुक्तलक्षणस्य विद्यमानत्वात्। न च लक्षणवाक्यमपि

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

संसृष्टार्थं, लक्षणस्य सजातीयविजातीयेभ्यो व्यावृत्तिवैशिष्ट्यप्रतिपादनपरत्वात्तत्तच्छब्दैर्व्यवहर्तव्यत्वप्रतिपादनाद्वेतिवक्तुं युक्तम्; विकल्पासहत्वात्। किं प्रकृष्टप्रकाशश्चन्द्र इत्यादिवाक्यमभिधावृत्त्याऽन्यतश्चन्द्रं व्यावर्त्तयति ? किंवा स्वरूपप्रतिपादनेन नान्तरीयकतया ? नाद्यः, व्यावृत्तिप्रतिपादकशब्दाभावात्। नापि द्वितीयः, नान्तरीयकतया सिध्यतोऽर्थस्य शब्दार्थत्वाभावात्। "यश्चार्थादर्थो न स चोदनार्थं" इति शाबरभाष्यवचनात्। अन्यथा गामानयेत्यदिवाक्येष्वश्वाद्यानयनव्यावृत्तेरपि वाक्यार्थत्वप्रसङ्गात्।

ननु व्यावृत्तिर्माभूल्लक्षणवाक्येन, व्यवहारसाधनतामात्रं त्ववश्यं स्वीकार्यं, तथा चायं चन्द्र इति व्यवहर्तव्यः, प्रकृष्टत्वे सति प्रकाशत्वात्, यन्नैवं तन्नैवं यथा नक्षत्रादि, न तथा चायं तस्मान्न तथेति केवलव्यतिरेकितया लक्षणवाक्यं पर्यवस्यति, तथा च कथमखण्डार्थता ? चन्द्र इति व्यवहर्तव्यतालक्षणधर्मवैशिष्ट्यप्रतिपादनपरत्वादिति चेन्न; चन्द्ररूपार्थविशेषितव्यवहारकर्तव्यतासाधने चन्द्रविशिष्टं व्यवहारं नाज्ञासीच्चेत्तदा लक्षणवाक्यादपि विषयविशेषितकर्तव्यताया ज्ञातुमशक्यत्वात्। यथाऽज्ञाताग्निरनुमानादपि पक्षेऽग्निसम्बन्धमधिगमयितुं न शक्यस्तद्वदित्यर्थः। अथाऽग्निमज्ञासीत्तदा लक्षणवाक्यरूपानुमानस्य निष्प्रयोजनत्वेन ज्ञातस्यैव ज्ञापनात्। न च ज्ञाताज्ञातपक्षेऽदोष इतिवाच्यं; सामान्यतो व्यवहारस्य निमित्तवत्ताज्ञातत्वेऽपि प्रकृतानुपयोगेन व्यवहारविशेषस्यैवात्र विचार्यमाणत्वात्। चन्द्ररूपार्थविशेषानधिगमे तद्विशिष्टव्यवहारस्याप्यधिगन्तुमशक्यत्वात्। ज्ञाते च लक्षणवाक्यवैधुर्यापातात्। न च चन्द्रशब्दविशेषितोव्यवहार एव साध्य इति वाच्यम्; विनापि लक्षणं गवादिशब्दानामिव वृद्धव्यवहारादेव वाच्यवाचकसंगतिग्रहसम्भवे लक्षणवाक्यस्य वैयर्थ्यप्रसङ्गात्। न च पूर्वाधिगतस्य वाच्यवाचकभावसम्बन्धस्यैव लक्षणवाक्येनैव स्मार्यत इति वाच्यम्; तथा सति तत्तच्छब्दादेव स्मरणोपपत्तौ लक्षणाभिधानस्य वैयर्थ्यापत्तेः। न चावगतसम्बन्धस्यापि शब्दस्य लक्षणवाक्यादेव सम्बन्धस्मरणनियम इति वाच्यम्; लक्षणवाक्यस्थपदानामपि प्रत्येकं लक्षणवाक्यैः सम्बन्धस्मरणप्रसक्त्याऽनस्थादुरवस्थापातात्। तस्मात्सर्वं वाक्यं स्वरूपमात्रे पर्यवस्यदर्थात्पुनरन्यतो व्यावृत्तिः फलतीति युक्तमिति दिक्।

प्रश्नः ११—अपर्यायशब्दानामेकप्रातिपदिकार्थमात्रपर्यवसायित्वमखण्डार्थत्वमितिलक्षणं विशदं विवेचनीयम्।

प्रश्नः १२— "प्रतिपद्यपदार्थं हि विरोधात्तद्विरोधिनः।
पश्चादभावे जानाति वध्यघातकवत्पदात्॥

शब्दात्प्रतीयते तावत्संगतिर्धर्मधर्मिणोः।
मानान्तरादपोहस्तु न शाब्दस्तेन स स्मृतः॥

तत्रानन्तोऽन्तवद्वस्तुव्यावृत्त्यैव विशेषणम्।
स्वार्थार्पणप्रणाड्या च परिशिष्टौ विशेषणम्॥

तद्विरोध्यर्थसन्त्यागः सामर्थ्यात्स्यान्न शब्दतः।" इतीमाः कारिकाः सप्रपञ्चं व्याख्यायन्ताम्।

उत्तरम्—सिद्धान्तिना वादिनोक्तशङ्कासमाधानावसरे

संसर्गासङ्गिसम्यग्धीहेतुता या गिरामियम्।
उक्ताखण्डार्थता यद्वा तत्प्रातिपदिकार्थता॥ इति

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्लोकेनाखण्डार्थस्य लक्षणद्वयमभिहितम् । तत्र श्लोकावयवेन चतुर्थपादेन तत्प्रातिपदिकार्थतेत्यनेन द्वितीयं लक्षणं यदुक्तं तद्विशदयति—यद्वा अपर्यायशब्दानामेकप्रातिपदिकार्थमात्रपर्यवसायित्वमखण्डार्थत्वम् । यथा प्रकृष्टप्रकाशश्चन्द्र इत्यत्र प्रकृष्टप्रकाशपदयोरेकचन्द्रमात्रप्रातिपदिकार्थे पर्यवसायित्वम् । नन्वत्रैकपदेनैव चन्द्रप्रातिपदिकार्थमात्रावबोधसम्भवे पदान्तरप्रयोगस्य वैयर्थ्यमिति चेन्न व्यावर्त्यभेदादर्थवत्त्वोपपत्तेः । तथाहि व्यवच्छेद्यभेदेन लोकेऽपि प्रकृष्टप्रकाशशब्दयोरर्थवत्त्वोपपत्त्या "प्रकृष्टप्रकाशश्चन्द्र" इत्यत्र प्रकृष्टपदेनाप्रकृष्टखद्योतादेः प्रकाशपदेन चाप्रकाशरूपसन्तमसादेश्च व्यवच्छेदेन यथा बुभुत्सितश्चन्द्रप्रातिपदिकार्थमात्रः प्रतिपाद्यते, तथा सत्यादिवाक्येष्वपि चिन्मात्रब्रह्मावबोधमात्रपर्यवसायित्वमवगन्तव्यम् अन्यथा वक्तुरबुभुत्सितार्थं प्रतिपादयतोऽनवधेयवचनत्वप्रसङ्गात् । न च व्यावृत्तिपरत्वे व्यावृत्तिमत्पदार्थपरत्वे वा संसृष्टार्थत्वप्रसक्तिः, स्वरूपमात्रपरत्वे च पदान्तरप्रयोगस्य वैयर्थ्यमिति वाच्यम्; यथा लोके व्यावृत्तिद्वारा सर्वेषां तत्रस्थानां पदानां स्वरूपमात्रपर्यवसायित्वाङ्गीकारात् व्यावर्त्यभेदेन पदान्तरप्रयोगस्यावैयर्थ्याच्च । तथा वेदेऽपि भिन्नाकारजनकानां सत्यादिपदानामपि लक्षणासमये तत्तद्भ्रान्तिनिवृत्तिमात्रप्रयोजकतया लक्ष्ये शुद्धब्रह्ममात्रे तात्पर्येण पर्यवसानान्न लक्ष्यस्य ब्रह्मणोऽनेकाकारताप्रसक्तिः । तस्मात्तत्तच्छब्दजन्यविज्ञानानां तत्तद्भिन्नाकारसमर्पणां नान्तरीयकतया तत्तद्विरुद्धाकारनिवर्तकत्वाद्वेदान्तवाक्यानामखण्डार्थत्वसिद्धिरिति भावः । एतदेव "सत्यं ज्ञानमनन्तं ब्रह्म"ति वाक्यव्याख्यानावसरे तैत्तिरीयकेवार्त्तिके सुरेश्वराचार्यैरुक्तं—

"प्रतिपद्यपदार्थं हि विरोधात्तद्विरोधिनः ।
पश्चादभावं जानाति बध्यघातकवत्पदात् ॥१॥
शब्दात्प्रतीयते तावत्सङ्गतिर्धर्मधर्मिणोः ।
मानान्तरादपोहस्तु न शाब्दस्तेन स स्मृतः ॥२॥
तत्रानन्तोऽन्तवद्वस्तुव्यावृत्त्यैव विशेषणम् ।
स्वार्थार्पणप्रणाड्या च परिशिष्टौ विशेषणम् ॥३॥
तद्विरोध्यर्थसन्त्यागः समर्थ्यात्स्यान्न शब्दतः ।" इत्यादि ॥

एतेषामयमर्थः—सत्यादेः पदात्सत्यत्वादिपदार्थं ब्रह्मणि ज्ञात्वा तेन पश्चाद्विरोधात्कारणाद्विरोधिनोऽनृतादेरभावं जानाति । यथाऽऽखुभूषितां भूमिमवलोक्यार्थान्मार्जाराभावोऽवगम्यते, तद्वदित्यर्थः । तत्राह—शब्दादिति । तत्र प्रथमं सत्यत्वादेर्धर्मस्य ब्रह्मणो धर्मिणश्च शब्दाच्छक्तिग्रहो भवति, विरोधिव्यावृत्तिरूपोऽपोहस्तु मानान्तरादनुपपत्तिलक्षणाज्ज्ञायते । तस्मादपोहो न शाब्दः । तत्रापि सत्यंज्ञानमनन्तमिति त्रयाणां पदानां वैषम्यमाह—तत्रानन्त इति । तेषु सत्यज्ञानयोर्विरोधिव्यावृत्तिनिमित्तमाह—तद्विरोधीति । तस्मादसत्यत्वादिविरोधिपदार्थानां निवृत्तिरर्थतो भवति न शब्दत इति भावः । न च गुणगुण्यादिभावप्रतिपादनेऽपि तत्तद्विरोध्याकारनिवृत्त्युपपत्तेः कथमखण्डैकरसत्वसिद्धिरिति वाच्यम्; ब्रह्मविदाप्नोति परमित्यैकरसत्वस्य ब्रह्मशब्दार्थमात्रस्यैव बुभुत्सितत्वात् । सर्वतोऽनवच्छिन्नवस्तुपराभ्यां ब्रह्मानन्तशब्दाभ्यां विरोधाच्च । "एकधैवानुद्रष्टव्यमेकमेवाद्वितीयमित्याद्येकरसत्वप्रतिपादकवाक्यविरोधात्, नेह नानास्ति किञ्चनेत्यनेकरसत्वप्रतिषेधाच्चेति सर्वथैवाखण्डार्थत्वसिद्धिरितिभावः ।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्रम्

प्रश्नः १३—तत्त्वप्रदीपिकानुसारेण वेदान्तानामखण्डार्थत्वमुपपाद्यताम् ।

प्रश्नः १४—अखण्डार्थत्वं विविच्य तत्र प्रमाणमुपन्यस्यताम् ?

उत्तरम्—अथ वेदान्तोक्ताखण्डार्थत्वस्य पञ्चधा सम्भावितलक्षणानि प्रदूष्य पूर्ववादिना प्रमाणमपि निराकृतम् । तत्र सिद्धान्ती प्रत्याह—अपर्यायशब्दानां संसर्गागोचरप्रमितिजनकत्वमखण्डार्थत्वलक्षणम् । अथवा अपर्यायशब्दानामेकप्रातिपदिकार्थमात्रपर्यवसायित्वमखण्डार्थत्वलक्षणम् । हस्तः=कर इत्यादि पर्यायशब्देष्वतिव्याप्तिवारणायापर्यायेतिपदम् । इन्द्रियेऽतिव्याप्तिवारणाय शब्दग्रहणम् । गामानयेत्तिवारणाय संसर्गागोचरेति पदम् । वाक्याभासवारणाय प्रमितिग्रहणम् । तत्र प्रथमलक्षणं नासम्भवि, प्रकृष्टप्रकाशश्चन्द्र इति प्रकृष्टप्रकाशादिवाक्येषु लक्षणसद्भावात् । द्वितीयलक्षणे पदान्तरप्रयोगस्य वैयर्थ्यं न शङ्कनीयं; लोकवद् व्यावर्त्यभेदात्पदान्तरप्रयोगस्यार्थवत्त्वोपपत्तेः ।

न चाप्रसिद्धत्वाद्ब्रह्मणो लक्ष्यत्वासम्भवः; प्रत्यगात्मतया स्वतः सामान्येन प्रसिद्धत्वात् । न च तथात्वे लक्षणवैयर्थ्यमिति वाच्यम्; लक्षणस्य विशेषाकारसमर्पणार्थत्वात् । सामान्यतः प्रसिद्धेऽपि लक्षणस्य विशेषाकारसमर्थत्वानभ्युपगमे "गन्धवती पृथिवी" "नित्यज्ञानाधार ईश्वरः" इत्यादि लक्षणानामपि लक्ष्यस्य प्रसिद्धत्वाप्रसिद्धत्वाभ्यां वैयर्थ्यापातस्य तुल्यत्वात् ।

किञ्च "सोऽयं देवदत्त इति वाक्यवत्तत्त्वमसीत्यादिवाक्यादप्यखण्डार्थत्वमवबुध्यते, तत्रापि तत्त्वंपदाभ्यां लक्षणया चिन्मात्रस्य ब्रह्मणो बुभुत्सितत्वात् । ननु सोऽयं देवदत्ता इत्यत्रोभयपदलक्षणां विनैव तत्कालोपलक्षितस्यैतत्कालवैशिष्ट्यप्रतिपादनेनाप्यभेदार्थावबोधः सम्भवतीति चेन्न; यद् दृष्टं न तद् बुभुत्सितमिति नतत्कालविशिष्टस्य बुभुत्सितत्वात् । न च पूर्वकालोपलक्षितस्यैतत्कालवैशिष्ट्यप्रतिपादनेनापि भेदभ्रमनिरासः सिध्यतीति वाच्यम्; एतत्कालविशिष्टस्य पूर्वकालसम्बन्धासम्भवेन तदुपलक्षितत्वस्याप्यसम्भवेन तयोरभेदप्रतिपादनस्याशक्यत्वात् । बुभुत्सितार्थप्रतिपादनप्रयोजनतायामुभयपदलक्षणाभ्युपगमे गौरवस्यादोषत्वात्, 'प्रमाणवन्त्यदृष्टानि कल्प्यानि सुबहून्यपि' इति न्यायात् । तस्मादखण्डार्थत्वे न लक्षणासम्भवः । नापि प्रमाणासम्भवः;

"सत्यज्ञानादिगीरेतत्संसर्गव्यतिरेकिणः ।
अर्थे प्रमाणं मानत्वान्नयनादिप्रमाणवत्" ॥

इति श्लोकेन प्रमाणस्य सङ्कलितत्वात् । विमतं सत्यादिवाक्यम्, एतत्पदार्थसंसर्गातिरेकिणि अर्थे प्रमाणं, प्रमाणत्वाच्चक्षुरादिवदित्यनुमानं प्रमाणम् । अखण्डार्थत्वानभ्युपगमे "एकधैवानुद्रष्टव्यमि"त्यादीनामेकरसत्वप्रतिपादकश्रुतिवाक्यानामुदाहृतानामप्रामाण्यप्रसङ्गः जिज्ञासिते ब्रह्मणि प्रामाण्यभङ्गप्रसङ्गश्च बाधकस्तर्कः समुन्नेयः । ननु विमतं सत्यादिवाक्यं, पदार्थसंसर्गप्रतीतिजनकं, वाक्यत्वाद्, गामानयेत्यादिवाक्यवदिति चेन्न; एकधैवानुद्रष्टव्यमित्येकरसत्वप्रतिपादकश्रुतिविरोधेन तदनुमानस्य बाधितत्वात् । न च सिद्धान्त्यनुमाने संसर्गप्रतीतिजनकत्वानभ्युपगमे वाक्यत्वानुपपत्तिर्बाधिकेतिवाच्यम्; "आकांक्षासन्निधियोग्यतावन्ति पदानि वाक्यमि"ति वाक्यलक्षणत्वे तत्र संसर्गप्रतीतिजनकत्वस्यानिवार्यत्वात् । न चैवं प्रामाण्यभङ्गप्रसङ्गो बाधक इति वाच्यम्; आचार्यशबरस्वामिना शब्दविषयज्ञानादसन्निकृष्टेऽर्थे—प्रमाणान्तरेण तथा चानधिगतेऽर्थे—यद्विज्ञानं जायते तच्छास्त्रं प्रमाणमित्येतावत एव लक्षणस्याभिधानात् । कोऽसौ चन्द्रः ? प्रकृष्टप्रकाशश्चन्द्र इति प्रातिपदिकमात्रार्थप्रश्नप्रतिवचनानुपपत्तिरपि लौकिकवैदिकलक्षणवाक्यानामेकप्रातिपदिकार्थमात्रपर्यवसायित्वे प्रमाणम् । अजिज्ञासितार्थप्रतिपादनेऽनवधेयवचनत्वप्रसक्तिरपि तत्रानुपपत्तिः प्रदर्शिता । तस्मादशेषोपनिषदामखण्डैकरसे ब्रह्मणि स्वतः सिद्धमेव प्रामाण्यमिति दिक् ।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रश्नः १५—प्रामाण्यस्य स्वतस्त्वमेवं प्रतिपाद्यतां यथा परमतेऽनुपपत्तिरपि स्फुटा भवेत् ?

उत्तरम्—अथ लक्षणप्रमाणाभ्यां वस्तुसिद्धिरिति नियमेन ज्ञाननिष्ठप्रामाण्यस्य स्वतस्त्वं निर्वक्तुमशक्यम्। तथा प्रामाण्यस्य स्वतस्त्वे प्रमाणमपि न दृश्यते। तद्विपरीतं तस्य परतस्त्वे प्रयोगोऽस्ति, तथाहि—अनीश्वरप्रमा, विज्ञानहेत्वतिरिक्तहेत्वधीना, कार्यत्वात्, घटवदिति सति पूर्वपक्षे सिद्धान्ती प्रामाण्ये स्वतस्त्वं श्लोकेन निर्वक्ति—

आहुर्विज्ञानसामग्रीजन्यत्वे सत्यजन्यता।
तदन्यतः प्रमायास्तत्स्वतस्त्वमिति तद्विदः ॥२१॥

विज्ञानसामग्रीजन्यत्वे सति तदतिरिक्तकारणाजन्यत्वं प्रमायाः स्वतस्त्वमिति लक्षणमाहुः प्रामाण्यविद इति श्लोकयोजना। अप्रामाण्येऽतिव्याप्तिवारणाय विज्ञानजनकसामग्रीभिन्नकारणाजन्यत्वमिति विशेष्यदलम्। तेनार्थान्तरताऽपि वार्यते। नचेश्वरज्ञानेऽजन्यतयाऽव्याप्तिरितिवाच्यम्; तस्याजन्यत्वेऽपि ज्ञानसामग्रीजन्यत्वे सत्यतिरिक्तकारणजन्यत्वलक्षणविशिष्टधर्मवत्त्वाभावात्। तत्र विशेष्याभावादेव विशिष्टलक्षणसंगमनान्नाव्याप्तिरितिभावः। अप्रमायास्तु विज्ञानसामग्रीजन्यत्वे सत्यतिरिक्तदोषात्मककारणजन्यत्वान्न तत्रातिव्याप्तिः।

तथा प्रामाण्यस्य स्वतस्त्वमनुमानेन साधयति—प्रमाविज्ञानसामग्रीजन्यत्वे सत्यतिरिक्तजन्या न भवति, अप्रमातिरिक्तत्वात्, पटादिवत्। न च ज्ञानत्वानधिकरणत्वमुपाधिरिति वाच्यम्; ईश्वरज्ञाने-साध्यसत्त्वेऽप्युपाध्यभावात्साध्याव्याप्तेः। नापि ज्ञानसामग्रीजन्यत्वमुपाधिः; व्यतिरेकव्याप्तावप्रमाणत्वस्यैवोपाधित्वात्। तथा च व्यतिरेके सोपाधिकतया त्वयोक्तोपाधिर्नात्र सम्भवतीतिभावः। विपक्षे विज्ञानसामग्रीमात्रादेव प्रमोत्पत्तिसम्भवे तद्भिन्नस्य गुणस्य दोषाभावस्य वा कारणत्वकल्पनागौरवप्रसङ्गो बाधकस्तर्कः। न च प्रमाविज्ञानहेत्वतिरिक्तहेत्वधीना, कार्यत्वात्, पटवदिति प्रतिप्रयोगः सम्भवतीति वाच्यम्; त्वदुक्तस्य प्रतिप्रयोगस्य निरुक्तरीत्या गौरवतर्कपराहताशङ्क्यमानोपाधिमत्त्वात्। न च विज्ञानसामग्रीमात्रप्रयोज्यत्वेन प्रमात्वस्याप्रमाज्ञानवृत्तित्वं प्रसज्ज्येतेति वाच्यम्; प्रयोजकाभावप्रयुक्तस्य प्रयोज्यस्याप्रसक्तेः। अप्रमायां दोषसत्त्वेन कुतस्तत्र प्रमात्वस्य वृत्तित्वसम्भावनापि जायेत। न च दोषस्याप्रमाहेतुत्वेऽन्ततोगत्वा दोषाभावस्य प्रमां प्रति हेतुत्वं स्यादेवेति वाच्यम्; कारणत्वावेदकावन्यथासिद्धिशून्यान्वयव्यतिरेकौ प्रमात्वविरोध्यप्रमाप्रतिबन्धकत्वेनोपक्षीणौ न कारणमात्रत्वमावेदयितुं शक्नुयाताम्। तत्र भट्टपादसम्मतिरप्यस्ति—

तस्माद्गुणेभ्यो दोषाणामभावस्तदभावतः।
अप्रामाण्यद्वयासत्त्वं तेनोत्सर्गोऽनपोदितः ॥ इति ॥

नन्वेकस्यापि दोषाभावस्याप्रमाप्रतिबन्धकत्वं प्रमाहेतुत्वं चैकस्य संस्कारस्यानुभवनाशकत्वस्मृतिहेतुत्वमिव किं न स्यादिति चेन्न; तत्र संस्कारस्यानुभवनाशकत्वेऽपि स्मृतेः संस्कारातिरिक्तकारणान्तरानिरूपणेनोभयहेतुताया अवश्यमाश्रयणीयत्वात्। न च तत्रापि कारणान्तरापेक्षया संस्कारनाशादेव स्मरणोत्पत्तिः कथं नाभ्युपेयत इति वाच्यम्; स्मृतिसमुदयमन्तरेण संस्कारनाशस्यैवासम्भवात्। प्रकृते दार्ष्टान्तिके ज्ञानसामग्रीमात्रादेव प्रमोत्पत्तिसम्भवे दोषाभावस्यान्यथासिद्धतया प्रमाहेतुत्वकल्पना निष्प्रामाणिकेति भावः। तस्माद्विज्ञानसामग्रीमात्रादेव प्रमोत्पद्यत इति सिद्धम्।

प्रश्नः १६—प्रामाण्यस्य ज्ञप्तिस्वतस्त्वे परमतेऽनुपपत्तिप्रदर्शनपुरःसरं प्रमाणमुपन्यस्यताम् ?

उत्तरम्—तस्मात्प्रमा विज्ञानसामग्रीमात्रादेव जायते इति ग्रन्थेन प्रमायामुत्पत्तिस्वतस्त्वमुपपाद्य

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ज्ञप्तिस्वतस्त्वमुपपादयितुमाह—तथेति। प्रमाज्ञप्तिरपि विज्ञानज्ञापकसामग्रीमात्रादेवावगम्यते। ननु विज्ञानग्राहकसाक्षिमात्रग्राह्यत्वेन विज्ञानवत्तत्प्रामाण्येऽपि संशयानुदयप्रसङ्ग इति चेन्न; स्वतः प्रमाणत्वेन भवदभिमतधर्मिज्ञानेऽनुव्यवसाये च स्फुरत्यपि बौद्धानामप्रमाणमेवेति भ्रान्तिदर्शनात्। एवं सर्वं ज्ञानं धर्मिण्यभ्रान्तमित्यभ्युपगम्यते त्वयापि, तथाव्यवसायज्ञानप्रकाशनावसरेऽनुव्यवसाये प्रामाण्यस्फुरणमपि स्वीक्रियते एव। अन्यथानवस्थाप्रसङ्गात्। स्वतः प्रमाणत्वेन भवदङ्गीकृतानुमित्युपमित्योरपि ज्ञायमानयोः प्रत्यक्षप्रमाणमात्रवादिनश्चार्वाकस्य प्रामाण्ये विप्रतिपत्तिदर्शनात्। प्राभाकरार्कबन्धुप्रभृतीनां स्वरूपभेदवादिनां च गृह्यमाणेऽपि स्थाणोः स्वरूपे स्थाणुर्वापुरुषो वेति सन्देहस्य, पुरुष एवेति वा भ्रमस्योपलम्भात्। न च तत्र सत्यपि ज्ञानपुष्कलकारणे प्रबलप्रतिबन्धकसमवधानात्तत्र संशयभ्रमोत्पत्तिरिति वाच्यम्; प्रकृतेऽपि तुल्यं समाधानमन्यत्राभिनिवेशात्। भ्रमज्ञानेऽपि प्रथमं प्रामाण्यं गृह्यत एव, प्रसक्तस्यापि प्रामाण्यज्ञानस्य कारणगतदोषज्ञानेन बाधबोधेन च पश्चादपनयनात्। न च कारणगतदोषज्ञानबाधबोधाभ्यां प्रसक्तस्यापि प्रमात्वग्रहस्यापनयनाभ्युपगमे तयोरभावज्ञानस्य प्रामाण्यग्रहस्य हेतुत्वोपपत्तौ तत्र परतः प्रामाण्यापत्तिरिति वाच्यम्; निरुक्तदोषज्ञानबाधबोधयोरनुदयमात्रेण प्रमात्वस्फुरणाभ्युपगमात्। तत्र भट्टपादसम्मतिमाह—

यदा स्वतः प्रमाणत्वं तदान्यन्नैव मृग्यते।
निवर्तते हि मिथ्यात्वं दोषाज्ञानादयत्नतः॥

दोषज्ञानानुदयमात्रेणायत्नतो मिथ्यात्वशङ्का निवर्तते, यदास्य स्वतः प्रमाणत्वमाश्रीयते तदा ज्ञानग्राहकभिन्नकारणं नैव मृग्यते इति वार्त्तिकार्थः। दोषाभावावगमस्यापि प्रमात्वस्फुरणहेतुत्वाभ्युपगमेऽनवस्थादुष्परिहार्यत्वात्। तथा चानभ्यासदशायां सांशयिकत्वादिति हेतोः स्पष्टमनैकान्तिकत्वम्। स्वतः प्रमाणत्वेन भवदभिमतेष्वेवानुमानोपमानानुव्यवसायनिश्चयेषु व्यभिचारस्य सुस्पष्टत्वात्। तत्राचार्यवाचस्पतिमिश्रेणोक्तं तात्पर्यटीकायाम्-विमतं ज्ञानमर्थाव्यभिचारि, समर्थप्रवृत्तिजनकत्वाद्, यदि पुनरेवं नाभविष्यन्न समर्थां प्रवृत्तिमकरिष्यत्, यथाप्रमाणाभास इति व्यतिरेकीत्यत्रानुमाने सर्वत्र सपक्षाभावान्नासाधारणानैकान्तिकता। विमतपदेन विवादग्रस्तज्ञानमेव पक्षत्वेनाभिमतं, नोपेक्षाज्ञानं, येन भागासिद्धिराशङ्क्येत। ननु वादिनां प्रामाण्यस्य निश्चयेऽनिश्चये च विप्रतिपत्त्यभावान्न कथायां प्रवृत्तिः स्यात्, नहि केवलव्यतिरेक्यनुमाने व्याप्तिग्रहभूमिः काचिदभ्युपेयते इत्यतोमिश्रेणोक्तमन्वयव्यतिरेकी वा। नन्वनुमाने स्वतः प्रमात्वं न सिद्धं; यद्दृष्टान्तबलेन तत्रान्वयित्वमङ्गीकृत्यानुमानस्यान्वयव्यतिरेकित्वमभ्युपगन्तुं शक्येतेत्यतस्तत्रैवोक्तम्—अनुमानस्य स्वतः प्रमाणतयान्वयस्यापि सम्भवात्। तत्रापि तदीयमेव ग्रन्थमुट्टङ्क "अनुमानस्य तु परितोनिरस्तसमस्तविभ्रमाशङ्कच स्वत एव प्रामाण्यम्, अनुमेयाव्यभिचारिलिङ्गसमुत्थत्वात्।" अनुमेयेनानलादिना यल्लिङ्गमव्यभिचारि तेनोत्पन्नत्वादित्यर्थः। अनुमानोपमानानुव्यवसायधर्मिज्ञानानां स्वत एव प्रामाण्यं तेनाभ्युपेयते। तत्रापि व्याप्तिपक्षधर्मताग्राहकेणैवानुमाने हेतुतःस्वरूपतश्च व्यभिचारशङ्कानिरासात्, उपमानेऽतिदेशवाक्यसादृश्यज्ञानयोः प्रामाण्यनिश्चयेनाप्रमात्वशङ्कानिरासात्, अनुव्यवसायेऽज्ञाताननुव्यवसायादिति भावः। एतच्च सर्वमुपलक्षितमित्याह—"एतेनोपमानं व्याख्यातमि"त्यादि।

किं चोदयनीयानुमाने सत्प्रतिपक्षतामप्याह—विमतं प्रमात्वं, विज्ञानग्राहकसामग्रीमात्रग्राह्यम्, अप्रमामात्रवृत्तित्वानधिकरणत्वे सति ज्ञानैकवृत्तिजातित्वात्, ज्ञानत्ववदिति दिक्।

अस्तु तावत्प्रमास्तित्वलोभाज्ज्ञानस्य स्वतः स्फुरणम्, तथापि ज्ञानगतगुणत्वादिवज्ज्ञाने प्रामाण्यस्यान्यतः स्फुरणे को विरोध इति चेन्न, प्रथमतो ज्ञानगतप्रामाण्यास्फुरणे ज्ञानविषये निःशङ्कप्रवृत्त्यनुप-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पत्तेः। नहि मरुमरीचिकायां जलं ज्ञातमित्येतावन्मात्रेण तत्राप्रामाण्यनिश्चये सति तृषावतां जलार्थिनां जलपानाय प्रवृत्तिर्दृश्यते। न चाप्रामाण्यस्फुरणेऽपि प्रमात्वस्फुरणं विना ज्ञानमात्रादेव प्रवृत्तिरिति वाच्यम्; विज्ञानस्य प्रमात्वाप्रमात्वयोर्द्वयोः स्फुरणाभावे संशयसम्भवान्निःशङ्कप्रवृत्त्यनुपपत्तेः। अस्ति च पुनः पुनः दर्शनानभ्यासदशायां नववनस्थलीस्थितेषु फलिताम्रादिषु तदर्थिनां फलोपादानेच्छया निःशङ्कप्रवृत्तिः। अपि च त्वयापि पारलौकिकसाधनेषु ऐहिकेष्वनभ्यासदशापन्नेषु प्रामाण्यनिश्चयाधीनैव निःशङ्कप्रवृत्तिरभ्युपगता, तद्वत्सर्वत्र प्रामाण्यनिश्चयाधीनैव निःशङ्कप्रवृत्तिरनुमेया। न च कृष्यादौ संशये सत्यपि प्रवृत्तिर्दृष्टेति वाच्यम्; तत्र निःशङ्कप्रवृत्तेर्वक्तुमशक्यत्वात्। तथा चानुमानं—यत्र यत्र निःशङ्कप्रवृत्तिस्तत्र तत्र सा प्रामाण्यनिश्चयाधीनैवेतिव्याप्तिग्रहबलेन सर्वत्र निःशङ्कप्रवृत्तिः प्रमात्वनिश्चयाधीनैवाभ्युपेया। अन्यथा प्रामाण्यानिश्चयेन निवृत्तेरपि प्रसङ्गात्। न च व्यवहारादिफलेऽपि परतस्त्वं वक्तुं युक्तं; ज्ञेयाभिव्यक्तिलक्षणफलस्य ज्ञानमात्रादेव सिद्धेः, हानोपादानादीनां पुनरिष्टसाधनादिज्ञानाधीनतया तद्विषयप्रमाणस्य तत्रापि फलजनकत्वं स्वत एवेति दिक्।

प्रश्नः १७—ननु "प्रमात्वं कथं जातिः" इतिग्रन्थरहस्यमुद्घाट्य क्व जातिनिमित्तो व्यवहारः क्व वोपाधिनिबन्धनः इति सम्यग् विविच्यताम्।

उत्तरम्—अथ ज्ञप्तिपरतस्त्वे न्यायकुसुमाञ्जल्यामाहोदयनाचार्यः—प्रामाण्यं परतो ज्ञायते, अनभ्यासदशायां सांशयिकत्वात्, अप्रामाण्यवदिति। अत्रोदयनीयानुमाने वेदान्तो सत्प्रतिपक्षतामाह—विवादस्थले प्रमात्वं विज्ञानग्राहकसामग्रीमात्रग्राह्यम्, अप्रमामात्रवृत्तित्वानधिकरणत्वे सति ज्ञानैकवृत्तिजातित्वात्, ज्ञानत्ववदित्यादिप्रयोगोऽनुमित्यादिभिन्ने विवादास्पदे तेनैव प्रदर्शितः। अत्र प्रयोगे परतः प्रामाण्यवादिनोऽर्थान्तिरतावारणाय साध्यशरीरे मात्रपदम्। गुणत्वादिव्यभिचारवारणाय ज्ञानैकवृतीत्युक्तम्। अप्रमात्वसंशयत्वादिव्यभिचारवारणायाप्रमावृत्तित्वानधिरणेत्युक्तम्। साधनवैकल्यवारणाय हेतुशरीरेऽपि मात्रपदम्। प्रमामात्रवर्त्तिना प्रमाभिन्नभिन्नत्वादिना व्यभिचारवारणाय जातिपदमित्यर्थः।

ननु प्रमात्वं कथं जातिः? साक्षात्कारित्वेन तस्य परापरभावासम्भवात्। तथाहि यद्यत्र प्रत्यक्षत्वं व्यापकं प्रमात्वं च व्याप्यं, तर्हि व्यापकाभावेन व्याप्याभाव इति नियमेन प्रत्यक्षत्वविरहेषु परोक्षेष्वनुमानादिषु प्रमात्वाभावप्रसक्तिः। अथ प्रत्यक्षत्वमपरं प्रमात्वं च परं चेत्तदा प्रत्यक्षत्वरूपव्याप्यजातौ व्यापकप्रमात्वादिनाऽविनाभावोऽभ्युपेयः, तथा चेदं रजतमिति प्रत्यक्षभ्रमेऽपि प्रमात्वप्रसक्तिः। ततश्च परापरभावशून्ययोरेकत्रवृत्तौ समावेशे सङ्करः स्यात्, स च जाति वाधकः। किञ्च प्रमात्वं जातिश्चेत्तदा सर्वं ज्ञानं धर्मिण्यभ्रान्तं प्रकारे तु विपर्ययः इत्येषा परिभाषा परिलुप्येत। एकस्यवेदं रजतमिति ज्ञानस्य धर्म्यंशे प्रमात्वमितरांशेऽप्रमात्वमिति जातिसङ्करप्रसङ्गादिति चेन्न; रजताद्विविभ्रमेषु प्रत्यक्षत्वानभ्युपगमात्। भ्रमेषु प्रत्यक्षत्वव्यवहारस्येन्द्रियसम्प्रयोगजन्यत्वोपाधिमात्रेणोपपत्तेः। एवं च भ्रमे धर्म्यंशे प्रमात्वमपि नास्ति, तत्र प्रमाव्यवहारस्य चाबाधितानुभूतित्वोपाधिनिबन्धनत्वेनापि सम्भवात्। न च सर्वत्रोपाधिनिबन्धन एव व्यवहारोऽस्तु, किमर्थमर्धजरतीयं कल्प्यते इति वाच्यम्; गौर्गौरिति सर्वगव्ष्वनुगतव्यवहारवत् प्रमिणोमीत्यबाधितानुगतव्यवहारस्य जात्यनभ्युपगतिं विनाऽनुपपत्तेः। न चोपाधिमादाय जातिः प्रत्याख्यातुं शक्येति वाच्यम्; तथासति गोत्वादिष्वपि समानत्वात्। तस्माद्यत्र;

"व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथानवस्थितिः।
रूपहानिरसम्बन्धः जातिबाधकसङ्ग्रहः॥"

इति

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इति परिगणितानां जातिबाधकानामन्यतमोऽपि बाधको न प्रसरति, तत्र जातिर्निमित्तो व्यवहारोऽन्यत्र तूपाधिनिबन्धन इति विभागो द्रष्टव्यः। तस्माज्ज्ञानैकनिष्ठजातित्वादिति न विशेष्यासिद्धो हेतुः। विपक्षे ज्ञप्तिपरतस्त्वे चानवस्थाप्रसङ्गो बाधकस्तर्कः। न चाज्ञात-प्रामाण्यस्यंवार्थे व्यवहारजनकत्वसम्भवे नानवस्थेति वाच्यम्; अज्ञातप्रमायां व्यवहारजनकत्वनिश्चा-यकप्रमाणानुदयेऽज्ञातप्रमास्तित्वस्यैव निश्चेतुमशक्यत्वादिति दिक्।

प्रश्नः १८—श्रुतियुक्तिभ्यां स्वरूपसमवधानातिरिक्ता शक्तिः साधनीया।

प्रश्नः १९—शक्तेरतिरिक्तपदार्थत्वमस्ति नवेति पर्यालोच्य स्वसिद्धान्तो व्यवस्थाप्यताम्।

उत्तरम्—अथ स्वरूपसहकारिसमवधानातिरिक्तां शक्तिममन्यमानास्तार्किकाः कथयन्ति, यत्किल प्रमाणाभावान्निरुक्तलक्षणां शक्ति नावगच्छामः। तत्र सिद्धान्ती शक्तौ प्रमाणाभावं निराचष्टे—न तावच्छक्तौ प्रमाणाभावो वक्तुं शक्यः, 'परास्य शक्तिर्विविधैव' 'सर्गाद्या भावशक्तयः' 'ते ध्यानयोगानुऽ-गता अपश्यन्' 'देवात्मशक्ति स्वगुणैर्निगूढाम्', 'स एकोऽवर्णो बहुधाशक्तियोगात्', 'शक्तयः सर्वभावानां,' 'स्वतन्त्रता नित्यमलुप्तशक्तिः', अचिन्त्यशक्तिश्च, इत्यादिश्रुतिस्मृतिशतशः प्रमाणत्वेन शक्तिसद्भावे विद्यमानत्वात्। न चैतानि वाक्यानि स्वरूपसहकारिमात्रप्रतिपादकानीति वक्तुं युक्तं; कार्यकरणादि-सहकारिनिरासपूर्वकं तादृक्शक्तेः प्रतिपादनपरत्वाभ्युपगमात्। न चासां श्रुत्यादीनामर्थवादत्वम्; उप-क्रमादितात्पर्यनिर्णायकलिङ्गैरेश्वरत्वनिश्चयाद्, भेदवादिभिरप्येतासामीश्वरस्वरूपपरत्वाभ्युपगमाच्च।

किञ्च स्फोटादिकार्यान्यथानुपपत्तिरूपार्थापत्तिरपि निरुक्तशक्तिसद्भावे प्रमाणम्। ननु प्रति-बन्धकाभावसहकृतादेव वह्निस्वरूपात्स्फोटादिकार्योत्पत्तिसम्भवे न तत्रान्यथोपपत्तिर्वक्तुं शक्येति चेन्न, वह्नेः, प्रतिबन्धकाभावस्यैवैकस्मिन्नुभयत्र वा एकविशिष्टापरस्मिन् वा कार्योत्पादकत्वकल्पनापेक्ष-याऽतिरिक्तशक्तौ कार्योत्पादकत्वकल्पनायां लाघवात्। किञ्च सति पुष्कलकारणे कार्योत्पादविरोधि प्रतिबन्धकमिति शक्तिवादिनो मन्यन्ते, तेन न सामग्रीवैकल्यात्कार्यानुत्पादः, किन्तु विरोधिसद्भावादेव। न च सामग्रीवैकल्यमेव प्रतिबन्धः, लोकप्रसिद्धिविरोधात्। नहि कुशूलनिहितबीजानि क्षितिपवनो-दकतेजस्संसर्गविरहितानि, तन्तवो वा मञ्जूषानिहितास्तुरीवेमतन्तुवायविरहिणः प्रतिबन्धः इति प्रतियन्ति लौकिकाः। न चाभावस्याकारणत्वे कार्येण सहान्वयव्यतिरेकविरोधः स्यादितिवाच्यं; विरोधिनिवर्तकत्वेन कार्यकारणभावानिश्चायकतया प्रतिबन्धाभावस्यान्यथासिद्धत्वात्। "अनन्यथा-सिद्धावन्वयव्यतिरेकौ कारणक्लृप्तिं कुर्वाते" इति न्यायात्। न चैवमनुपलब्धेरप्यभावप्रमाहेतुता न स्यादिति वाच्यम्; अनुपलब्धिव्यतिरेकेणाभावोपलम्भकारणानिरूपणात्। न चेन्द्रियमेव कारणं वक्तुं युक्तम्; तस्याभावेन सन्निकर्षाभावात्। तत्र संयोगसमवाययोरभावात्, विशेषणविशेष्यभावस्य च सम्बन्धान्तरगर्भस्यैव प्रत्यक्षाङ्गत्वात्, न तत्राभावस्य प्रत्यक्षगम्यत्वं किन्त्वनुपलब्धिगम्यत्वमेवेति-निश्चीयते। अन्यथा वह्निमान् पर्वत इत्यादौ प्रत्यक्षधर्मिकानुमानमात्रोच्छेदप्रसङ्गः स्यादितिभावः।

ननु सम्बन्धमन्तरेणैवाभावस्येन्द्रियग्राह्यत्वमस्तु, अभावप्रतीतेरिन्द्रियान्वयव्यतिरेकानुविधायित्वा-द्गत्यन्तराभावाच्चेति चेन्न; योगिभिन्नप्रत्यक्षप्रमायामिन्द्रियाणां सम्बन्धेनैव ग्राहकत्वनियमस्य निरा-कर्तुमशक्यत्वादभावोपलम्भस्यापरोक्षत्वस्यासिद्धत्वादिन्द्रियान्वयव्यतिरेकयोरधिकरणग्रहणमात्रेणैवोप-क्षीणतयाऽन्यथासिद्धत्वाच्च। न चैवमन्धस्य त्वगिन्द्रियसंयुक्तघटादौ रूपाभावप्रतीतिः स्यात् अधि-करणस्य त्वचागृहीतत्वात्, चक्षुरिन्द्रियस्य चाभावाग्राहकत्वात्। अतो यदिन्द्रियवैकल्यादभावाग्रहणं तदिन्द्रियमेव तत्प्रतियोगिकाभावग्राहकं मन्तव्यमिति चेन्न, अभावस्य प्रतियोगिग्राहकेन्द्रियग्राह्यत्वमतेऽ-प्यनन्वस्य मेर्वादौ घटतद्रूपाद्यभावस्य चाक्षुषत्वप्रसङ्गात्। न चात्र प्रतियोगिनो घटादेश्चाक्षुषत्वेऽ-प्यनुयोगिनोऽसन्निहितस्य मेर्वादेरधिकरणस्याचाक्षुषत्वान्न तत्र रूपाद्यभावश्चाक्षुष इति वाच्यम्; तत्र

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रतियोगिग्राहकेण चक्षुषाऽधिकरणस्य मेर्वादेरग्रहणात्। न चैवं घ्राणागोचरपुष्पादौ गन्धस्य, वायौ वाऽचाक्षुषे रूपस्य चाभावप्रत्यक्षाभावः स्यादिति वाच्यम्; तत्र प्रमाणान्तरानुमानेन वेद्यत्वेऽपि गन्धाद्यभावस्य व्यवहाराविरोधात्। नहि सर्वत्रानुपलब्धिप्रमाणवादिनाऽभावोऽनुपलब्धिप्रमाणगम्य एवेति नियमः। अतः प्रतिबन्धाभावस्य कारणत्वासम्भवान्न कार्यार्थापत्तेरन्यथोपपत्तिरिति श्रुतिस्मृतिभ्यां निरुक्तार्थापत्त्या च स्वरूपसहकारिसमवधानातिरिक्ता शक्तिः सिद्धेति दिक्।

प्रश्नः २०—शक्तिसद्भावे उपादानोपादेयभावनियमान्यथोपपत्तिरपि यथाप्रमाणं भवेत्तथा साधुनिरुप्यताम्।

उत्तरम्—अथ "परास्य शक्तिर्विविधैव श्रूयते" 'सर्गाद्या भावशक्तय इत्यादि श्रुतिस्मृतिशतैः शक्तिसद्भावसिद्धावपि नार्थापत्त्यनुमाने विना तार्किकमन्यस्तुष्यति, तं ताभ्यामपि तोषयितुं शक्नुमः। तथाहि—स्फोटादिकार्यान्यथानुपपत्तिरपि निरुक्तशक्तिसद्भावे प्रमाणम्। नन्वेवं शक्तेः कारणत्वाभ्युपगमे प्रतिबन्धकाभावस्यापि कारणत्वमवश्यमभ्युपेयमिति चेन्न, उपादानोपादेयभावनियमानुपपत्तेरपि निरुक्तशक्तिसद्भावे प्रमाणत्वेनाभ्युपगमात्। न च तत्र स्वभावभेदादेवोपपत्तेरन्यथोपपत्तिरपि वक्तुं शक्येति वाच्यम्; तथासति सर्वत्र स्वभाववादपादप्रसारिकया सामान्यसमवायविशेषाणामपि पराकरणप्रसङ्गात्। तथाहि सत्तायां सत्तान्तराभ्युपगमेऽनवस्थाप्रसङ्गभिया स्वभावभेदादेव सदिति यथा व्यवहारो भवति, तथा द्रव्यादिष्वपि स्वभावभेदादेव सदिति व्यवहारोपपत्तौ तत्र सत्तासामान्यापलापः प्रसज्ज्येत। एवं सामान्यवान् घटोऽयमित्यादाविव सम्बन्धं विनापि गुणकर्मादेर्विशेषणत्वोपपत्तौ समवायोऽप्यपलापः स्यात्। विशेषाणां विशेषान्तरमन्तरेणैव व्यावृत्तिव्यवहारवच्च नित्यद्रव्याणामपि पार्थिवादिपरमाणूनामाकाशादीनां च स्वभावभेदादेव व्यावृत्तित्वव्यवहारोपपत्तौ विशेषाख्यपदार्थस्यापि परित्यागप्रसङ्गः स्यात्। न च नित्यद्रव्याणां व्यावर्त्तको विशेषः प्रमाणसिद्ध इति प्रमाणसत्त्वे विशेषाख्यपदार्थाधीन एव व्यावृत्तिव्यवहारः, किन्त्वनवस्थाभिया विशेषव्यावर्त्तको विशेषान्तरो नाभ्युपेयते, तत्र प्रमाणाभावे स्वभावविशेषादेव व्यावृत्तिव्यवहारव्यवस्थेति वाच्यम्; शक्तावपि प्रमाणसत्त्वेनैव स्वरूपातिरेकिणी अप्यवश्यमभ्युपेयेति कृतं स्वभाववादशरणागत्येत्यलमतिविस्तरेणेतिभावः।

प्रश्नः २१—अतिरिक्तशक्तिसाधकमनुमानमुपन्यस्य तस्य समन्वयः प्रदर्श्यताम्।

प्रश्नः २२—शक्तिसाधकमनुमानमुपन्यस्य श्रुतिरपि यथाप्रमाणं तथा प्रतिपाद्यताम्।

उत्तरम्—अथ स्वरूपातिरिक्तशक्तिसद्भावे श्रुतिस्मृतिशतशोऽर्थापत्तिद्वयस्य प्रमाणत्वेऽपि तार्किकमात्मानं मन्यमानमपरितुष्यमाणं तार्किकमनुमानेनापि तोषयितुं प्रयतामहे। तथाहि—

स्थितिस्थापकधर्मान्यातीन्द्रियाद्विष्ठसंश्रयः।
दहनो गुणयोगित्वाद् गुरुत्वाश्रयकुम्भवत्॥

इति श्लोकेनानुमानं चित्सुखाचार्यैः संकलितम्। तस्य विशदस्वरूपमिदम्—वह्निरद्विष्ठातीन्द्रियस्थितिस्थापकेतरभावाश्रयः, गुणवत्त्वात्, घटवदिति योजना। श्लोकस्य पूर्वार्द्धेन साध्यनिर्देशः, उत्तरार्द्धेन च पक्षहेतुदृष्टान्तानां निर्देशः। अत्रानुमाने आकाशादिसंयोगवारणय साध्यशरीरेऽद्विष्ठेतिविशेषणम्। रूपादिवारणायातीन्द्रियेतिपदम्। प्रत्यक्षयोग्यसावयववह्नेः पक्षत्वाद् द्व्यणुकगतरूपमादाय नार्थान्तरता। स्थितिस्थापकवारणाय स्थितिस्थापकेतरेति पदम्। अग्निनिष्ठस्यातीन्द्रियाकाशादिप्रतियोगिकभेदस्य वारणाय भावपदम्। आश्रयपदेनायुतसिद्धतया सिद्धसम्बन्धित्वस्य विवक्षितत्वेन न वायवीयपरमाणुभिरर्थान्तरता। घटादिदृष्टान्ते गुरुत्वेन साध्यस्य प्रसिद्धिः।

नन्वीश्वरस्य योगिनां च सत्तावादिनां मतेऽतीन्द्रियत्वमप्रसिद्धमिति चेन्न; अतीन्द्रियशब्देन

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विवक्षितार्थस्य गुरुत्वादौ भावनादौ च प्रसिद्धत्वात् "गुरुत्वधर्माधर्मभावना अतीन्द्रिया" इति प्रशस्तपादेरुक्तत्वात्। ज्ञानलक्षणसन्निकर्षजन्यत्वेऽनुव्यवसायभिन्नत्वे च सति अस्मदादिप्रत्यक्षाविषयत्वमतीन्द्रियत्वमित्यर्थः।

ननु निरुक्तानुमाने साध्यशरीरे निविष्टस्याश्रयपदस्याधारमात्रार्थो विवक्षितश्चेत्तर्ह्यग्नेरपि कदाचित्परमाण्वाधारत्वसम्भवेन सिद्धसाधनत्वात्, आश्रयपदेन समवायित्वविवक्षायां भाट्टमतेनाप्रसिद्धविशेषणत्वं स्यादिति चेन्न; समवायमनभ्युपगच्छतां भाट्टानां मतेऽपि यथाग्नौ स्वीयायुतसिद्धरूपादेराश्रयता, तद्वद्विशिष्टधर्मस्याप्याश्रयताया आश्रयपदेन विवक्षायामदोषात्। न च कर्माप्रत्यक्षवादिनः प्राभाकरस्याप्यर्थान्तरताप्रसक्तिरिति वाच्यम्; शक्तिवादिनोर्भाट्टवेदान्तिनोरपि प्राभाकरवत् कर्मातीन्द्रियत्वस्याप्रसिद्धत्वात्। विपक्षे वह्निस्वरूपस्यैव स्फोटादिकारणत्वसिद्धौ प्रतिबन्धकाभावस्य कारणत्वाभ्युपगमे व्यर्थत्वात्, मन्त्रादिसमवधानासमवधानयोरविशेषेण कार्यजननप्रसङ्गो बाधक इति भावः। नचैवंविधधर्माश्रयत्वे गुणकर्मादेरपि द्रव्यत्वप्रसक्तिरिति वाच्यम्; तेषां गुणानधिकरणत्वात्। न चैवंविधधर्माश्रयत्वेन गुणाधिकरणत्वमप्यभ्युगम्यतामिति वाच्यम्; प्रसङ्गस्य विपर्ययासापर्यवसायित्वात्। नहि यद्गुणानधिकरणं तदेवंविधधर्माधिकरणं न भवतीति प्रतिवादिसम्मतमुदाहरणमस्ति, येनायं प्रसङ्गो विपर्यये पर्यवस्येत। शक्तिव्यतिरिक्तस्य सर्वस्य पक्षान्तर्गतत्वेनोदाहरणाभावइत्यर्थः।

एवं विमतः स्फोटः, उभयवादिसम्प्रतिपन्नस्फोटकारणातिरिक्तकारणजन्यः, कार्यत्वाद्, घटवदिति द्वितीयानुमानेऽपि मायावादिनं प्रति नेश्वरकारणत्वेन सिद्धसाधनता; तस्योभयवादिसम्मतकारणातिरिक्तत्वाभावादीश्वरकारणत्वस्य वेदान्तिभिरभ्युपगमात्। अनीश्वरवादिभाट्टमते जन्यभावजन्य इतिविशेषणान्तरोपादानेनार्थान्तरतापरिहारसम्भवादितिभावः। न चैवं नित्येषु शक्त्यभावप्रसङ्गः; अनित्येषु शक्तिसिद्धचनन्तरं तद्दृष्टान्तावष्टम्भेनैव नित्येष्वपि शक्तिसिद्धेः। तथा च नित्यानित्यवस्तुषु नित्यानित्यशक्तिस्वीकृतत्वेनैकरूपत्वं शक्तौ नाशङ्कनीयमितिभावः।

किञ्च व्रीहीन्प्रोक्षतीत्यादिद्वितीयाश्रुतिभिश्च व्रीह्यादिषु अतीन्द्रियशक्तिसद्भावसिद्धिः। न चादृष्टस्य चेतनकधर्मस्याचेतनेषु व्रीह्यादिष्वसम्भवात्तद्विषयक्रियाजन्यतामात्रेण तदीयत्वप्रतिपत्तेश्च द्वितीयाश्रुतिर्गौणीति वाच्यम्; धर्माधर्मलक्षणादृष्टविलक्षणस्यैवाधेयतारूपस्य कस्यचिदतिशयस्य तण्डुलपिष्टपुरोडाशादिपरम्परया प्रधानापूर्वजननसामर्थ्यपरनामधेयस्याभ्युपगमात्। निरुक्तरीत्या विलक्षणादृष्टानभ्युपगमे स्वरूपेण व्रीह्यादीनां तत्साधनत्वाभ्युपगमे च प्रोक्षणादिविधानवैयर्थ्यप्रसङ्गाद्, दृष्टस्यासम्भवे चादृष्टस्यैव कल्पनीयत्वात्, सम्भवति च मुख्ये लक्षणाश्रयणानवकाशात्। व्रीहीन्प्रोक्षतीत्यत्र द्वितीयाश्रुत्या प्रोक्षणेन व्रीहीणामेव संस्कार्यत्वं श्रूयते, तस्य चात्मनि कल्पनायां लक्षणाप्रसङ्गोऽनुचित इति भावः। तस्मात्सकलप्रमाणसिद्धतया स्वरूपसहकारिसमवधानातिरिक्तशक्तिसद्भावसिद्धिः।

प्रश्नः २३—अन्विताभिधानवादिमतं प्रदर्श्य चित्सुखोक्तिदिशा तन्निराकरकरणप्रकारो निरूप्यताम्।

उत्तरम्—अथ श्रौतत्वसम्भवे लक्षणाया अयुक्तत्वात्, मुख्यामुख्ययोर्मुख्यस्यैवाभ्यर्हितत्वाच्च पदानामेवान्योऽन्यान्वितस्वार्थाभिधायकत्वसम्भवे कुतः पदार्थानां लक्षणयाऽन्योऽन्यान्वयप्रतिपत्तिजनकत्वमभ्युपेयते? किं च पदानां स्वार्थाभिधायकत्वापेक्षयाऽन्वितस्वार्थाभिधायकत्वस्वीकारे प्रमाणमुखगौरवापत्तिरपि न दोषावहेत्यतोऽन्विताभिधानवाद एव श्रेयानिति। ननु "गामानय गां पश्य"ति प्रतिप्रयोगं विशेषान्तरतत्संसर्गयोरन्विताभिधानवादे व्यभिचार इति चेन्न; तथासत्यपि योग्येतरान्वितस्वार्थस्याव्यभिचारात्। अतः प्राथमिकशक्तिग्रहो योग्येतरान्वितस्वार्थे भवतीति तदनुसारेण "अश्वमानये" त्यादिप्रयोगान्तरेष्वपि तथैव कल्पयिष्यमाणत्वं नानुचितमिति।

ननु गोपदमनुक्तेन पदार्थेनान्वितस्वार्थमभिदधाति चेत्तर्ह्येकस्मादेव पदात्तत्तदर्थावबोधसम्भवेन

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पदान्तरप्रयोगस्य वैयर्थ्यंप्रसङ्गः, पदान्तरोक्तेनान्वितं स्वार्थं गोपदं बोधयति चेत्तर्हि परस्पराश्रयता दुर्वारेति चेन्न; त्वयापि पदार्थविषयाः प्रत्ययाः प्रमाणे, विपर्यये, संशये वान्तर्भावयितुमशक्याः, प्रमाणेऽन्तर्भावे सर्वस्य प्रमाणविषयस्य सत्यत्वप्रसङ्गात्, तथा यथार्थनिश्चयत्वेन तेषां पदार्थप्रत्ययानां भ्रमसंशययोरप्यन्तर्भावयितुमशक्यत्वात्। परिशेषात्स्मृतयस्तेऽभ्युपगन्तव्याः। ताश्च न स्वरूपमात्रविषयाः किन्त्वन्वितगोचरा एव त्वयाप्यभ्युपगन्तव्याः, तथासति तुल्यो दोषः। अभ्यासातिशयश्च पदार्थस्मरणहेतुः स च यथा पदानां स्वार्थेषु, न तथार्थान्तरेषु, तेषां व्यभिचारित्वात्। अपिचाभिहितान्वयवादे संसर्गबोधस्य शब्दाजन्यत्वेऽप्रमाणिकत्वप्रसङ्गः, क्लृप्तप्रत्यक्षादिषु षट्सु प्रमाणेष्वनन्तर्भावेन पदार्थसंज्ञकसप्तमप्रमाणाभ्युपगमप्रसङ्गो वा स्यात्। किं च पदार्थानामनभिहितार्थानां संसर्गबोधकत्वाभावादभिहितानामेव तदेष्टव्यम्, तथा च पदार्थानां संसर्गबोधजननसामर्थ्यं पदानां, पदार्थेषु तत्सामर्थ्याधानसामर्थ्यमिति द्वयं कल्पनीयमिति कल्पनागौरवमभिहितान्वयवादिनः, अन्विताभिधानवादिनस्तु पदानां योग्येतरान्वितस्वार्थाभिधानसामर्थ्यमेकमेव कल्पनीयमिति कल्पनालाघवमिति पक्षोऽयमेव श्रेयानीति। अत्राभिहितान्वयवादिनः प्रत्यवतिष्ठन्ते—

पदसमूहश्रवणानन्तरमपि कुतश्चिन्मानसापराधादनुपजातपदार्थस्मृतेर्वाक्यार्थबोधानुदयादुदयाच्चोपजातपदार्थस्मृतेरित्यन्वयव्यतिरेकाभ्यां पदार्थस्मृतीनां वाक्यार्थहेतुत्वमवसीयते। न चान्यत्रादृष्टचरत्वेन पदार्थस्वरूपमात्रगोचरस्मरणानां नान्वयबोधकत्वमुपपन्नमिति वाच्यं; पदार्थमात्रस्मरणस्य वाक्यबोधजननासामर्थ्येऽपि सहोच्चरितपदसमूहजन्यपदार्थस्मृतीनामाकाङ्क्षादिसहकृतानामन्वयबोधकत्वमस्त्येव, पदार्थस्मृतौ सहकारिविशेषसम्बन्धात्, प्रत्यभिज्ञावाक्यवत्। अन्यथा संस्कारेन्द्रिययोरप्यत्र परस्परसंगतार्थगोचरयोस्तत्र पूर्वापरदेशकालसंसृष्टैकवस्तुबोधकत्वं कथमुपपद्येत। परस्परसहकारितया तथात्वमुभयत्र तुल्यम्। न च पदार्थस्मृतीनां स्मृतपदार्थानां वान्वयबोधकत्वे सप्तमप्रमाणाभ्युपगमप्रसङ्ग इति वाच्यम्; लिङ्गप्रकरणस्थानानामिव शब्दप्रमाणान्तर्भावोपपत्तेः। न चात्र लिङ्गादिभ्यो वैषम्यं दर्शयितुं शक्यमिति वाच्यम्; लिङ्गादिषु श्रुतिं कल्पयित्वा विनियोगप्रतीतिस्वीकारवदत्राप्यन्वयबोधजनकपदानामवान्तरव्यापारत्वेन पदार्थस्मरणाभ्युपगमेऽदोषात्। न च स्वव्यापारेण व्यवधानाद्व्यापारवतः करणत्वव्याघातः; स्वर्गादिफलसाधकानां यागादीनां तज्जन्यापूर्वव्यापारव्यवधानेनाकारणत्वप्रसङ्गात्।

नन्वभिहितान्वयवादे त्वयापि तिस्रः शक्तयः कल्पनीयाः, पदानामर्थस्वरूपानुभवजननशक्तिः, अर्थानामन्योऽन्यान्वयबोधनशक्तिः, पदार्थनिष्ठान्वयबोधकजनकताधानशक्तिश्च। कथञ्चित्साहचर्यवशात्पदार्थानां स्मृतिस्वीकारेऽपि पदार्थानामन्वयबोधनशक्तिः, पदानां पदार्थनिष्ठान्वयबोधकजनकताधानशक्तिश्चेति शक्तिद्वयकल्पनागौरवं त्वन्मते वारयितुं दुःशकमिति चेन्न; त्वयाप्यन्विताभिधानवादेऽर्थान्तरबोधनशक्तेरन्वयबोधनशक्तेः स्वार्थबोधनशक्तेश्चावश्यं कल्पनीयत्वात्। न चोभयत्र दोषाणां समानत्वे विनिगमकाभावेन कथमभिहितान्वयवादस्य श्रेयस्त्वमिति वाच्यम्; विशिष्टार्थबोधाय प्रयुक्तानां पदसमूहानां समभिव्याहारान्यथानुपपत्त्या पदैः स्मारितानामर्थानामन्योऽन्यान्वयस्य लक्ष्यमाणतयोपपत्तेस्तत्र शक्तेरकल्पनीयात्। किं च मुख्यार्थस्य शक्यार्थस्य च परिग्रहे विरोधेनामुख्यार्थस्य लक्ष्यार्थस्य च स्वीकारे गौरवो न दोषावहः इत्यभिहितान्वयवादस्य श्रेयस्त्वं निष्प्रत्यूहमिति।

प्रश्नः २४— विनाभिधेयस्मरणमन्वयाप्रतिपत्तितः।
तत्पदार्थस्मृतयस्तेषामन्वयबोधिकाः॥ इति-
कारिका अभिहितान्वयवादसमर्थनपुरःसरं व्याख्येया।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रश्नः २५—परमतनिराकरणपूर्वकमभिहितान्वयवादः सम्यगुपस्थाप्यताम् ।

उत्तरम्—अथाभिहितान्वयवादिनः स्वपक्षसाधनायान्वयव्यतिरेकौ प्रमाणमुपस्थापयन्ति सङ्ग्रहश्लोकेन—

विनाभिधेयस्मरणमन्वयाप्रतिपत्तितः ।
तत्तत्पदार्थस्मृतयस्तेषामन्वयबोधिकाः ॥२५॥

अभिधेयपदार्थस्मरणमन्तरेण वाक्यार्थबोधानुपपत्त्या पदजन्यपदार्थस्मरणं पदेन स्मृतपदार्थो वा वाक्यार्थबोधहेतुरभ्युपगन्तव्यः इति श्लोकार्थः। अत्रान्वयव्यतिरेकाभ्यां पदार्थस्मृतीनां वाक्यार्थबोधहेतुत्वं श्लोकार्थविशदीकरणेन दर्शयति चित्सुखाचार्यः। पदसमूहश्रवणसमनन्तरमपि कुतश्चिन्मानसापराधादनुपजातपदार्थस्मृतेर्वाक्यार्थबोधानुदयादुदयाच्चोपजातपदार्थस्मृतेरित्यन्वयव्यतिरेकाभ्यां पदार्थस्मृतीनां वाक्यार्थबोधहेतुत्वमध्यवसीयते । नन्वन्यत्राद्दृष्टचरत्वेन पदार्थस्वरूपमात्रगोचरस्मरणानां नान्वयबोधकत्वमुपपन्नमिति चेन्न; पदार्थमात्रस्मरणस्य वाक्यार्थबोधासामर्थ्येऽपि सहोच्चरितपदसमूहजन्यपदार्थस्मृतीनामाकाँक्षादिसहकृतानामन्वयबोधकत्वसत्त्वेन पदार्थस्मृतौ सहकारिविशेषसम्बन्धात्, कथमन्यथा संस्कारेन्द्रिययोरन्यत्र परस्परसङ्गतार्थाविषययोः प्रत्यभिज्ञायां पूर्वापरदेशकालसंसृष्टैकवस्तुबोधकत्वम्। परस्परसहकारितया तथात्वमुभयत्र समानम्। न च पदार्थस्मृतीनां स्मृतपदार्थानां वान्वयबोधकत्वे सप्तमप्रमाणाभ्युपगमप्रसङ्गः; श्रुतिवाक्यसमाख्यानां शब्दरूपत्वेऽपि न लिङ्गप्रकरणस्थानानां शब्दरूपत्वं, नापि शब्दात्पृथक्प्रमाणत्वं, तथापि शब्दान्तर्भावस्तथैव लिङ्गप्रकरणस्थानानामिव पदार्थस्मरणानां स्मृतपदार्थानामपि शब्दप्रमाणेऽन्तर्भावयितुं शक्यत्वात्। न चात्र लिङ्गादिभ्यो वैषम्यं दर्शयितुं शक्यम्; लिङ्गादिषु श्रुतिं कल्पयित्वा विनियोगप्रतीतिस्वीकारवदत्राप्यन्वयबोधजनकपदानामवान्तरव्यापारत्वेन पदार्थस्मरणाभ्युपगमेऽदोषात्। न च स्वव्यापारेण व्यवधानाद्व्यापारवतः करणत्वव्याघात इति वाच्यम्; स्वर्गादिफलसाधकानां यागादीनां तज्जन्यापूर्वव्यापारव्यवधानेनाकारणत्वप्रसङ्गात्। न च चक्षुषावगतधूमलिङ्गजन्यवह्निज्ञानस्य चाक्षुषत्वप्रसङ्गस्तत्र चक्षुषो लिङ्गज्ञानमवान्तरव्यापारोऽभ्युपेयते इति वाच्यम्; अगृहीतव्याप्तिकस्य पुरुषस्यानुमानानुदयात्, अचाक्षुषस्थलेऽपि लिङ्गस्य तज्ज्ञानस्य वा स्वसाध्यबोधकत्वस्य दृश्यमानत्वात्, प्राभाकरैरपि श्रुतिकल्पनामन्तरेणैव लिङ्गप्रकरणादीनां विनियोजकानां शब्दप्रमाणान्तर्भावाभ्युपगमाच्च ।

ननु त्वयाप्यभिहितान्वयवादे तिस्रः शक्तयः कल्पनीयाः, पदानामर्थस्वरूपानुभवजननशक्तिः, अर्थानामन्योऽन्यान्वयबोधनशक्तिः, पदार्थनिष्ठान्वयबोधजनकताधानशक्तिश्च। कथञ्चित्साहचार्यवशात्पदार्थानां स्मृतिस्वीकारेऽपि पदार्थानामन्वयबोधनशक्तिः, पदानां पदार्थनिष्ठान्वयबोधकजनकताधानशक्तिश्चेति शक्तिद्वयकल्पनागौरवं त्वन्मते वारयितुं दुःशकमिति चेन्न; त्वयाप्यन्विताभिधानवादेऽर्थान्तरबोधनशक्तेरन्वयबोधनशक्तेः स्वार्थबोधनशक्तेश्चावश्यं कल्पनीयत्वात्। न च गोत्वादिजातिवाचकं गवादिपदं गोव्यक्तितत्समवायात्मकान्वययोरवाचकमिव मन्मतेऽर्थान्तरान्वितस्वार्थाभिधायकमपि पदं स्वार्थमात्रस्यैव वाचकमिति वाच्यम्; विकल्पासहत्वात्। जातिवाचकगवादिपदेन व्यक्तेरिवार्थान्तरतदन्वययोर्लक्ष्यत्वाभ्युपगमे पदानामन्विताभिधानवादभङ्गप्रसङ्गात्, वाच्यत्वाभ्युपगमे तयोरर्थान्तरतदन्वययोरपि शक्तेरवश्यकल्पनीयत्वेन त्वन्मतेऽपि गौरवस्य तादवस्थ्यात्। किं च कथञ्चिद्विशिष्टार्थबोधकत्वमिव पदेष्वेकैव शक्तिरिति स्वीकारेऽपि प्रकारान्तरेण शक्तित्रयमन्विताभिधानवादेऽप्यभ्युपगन्तव्यमेव, एकैकस्य पदस्य श्रूयमाणस्य स्मर्यमाणस्य वा तत्तत्पदार्थस्मरणजननशक्तिः, पुनरेकस्मरणविषयाणां च तेषामेव पदानामन्योऽन्यान्वितपदार्थाभिधानशक्तिस्तथा सकलपदगोचरस्य स्मरणस्य पदेष्वन्विताभिधानशक्त्याधानशक्तिश्चेति कल्पनं तुल्यमेव। न चोभयत्र शक्तित्रयकल्पना-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गौरवस्य तुल्यतया विनिगमकाभावः शङ्कनीय इति वाच्यम्; विशिष्टार्थबोधाय प्रयुक्तानां पदसमूहानां समभिव्याहारान्यथानुपपत्त्या पदैः स्मारितानामर्थानामन्योऽन्यान्वयस्य लक्ष्यमाणतयोपपत्तेस्तत्र शक्तेरकल्पनीयत्वात्। तस्मादभिहितान्वयवादस्यैव श्रेयस्त्वमिति दिक्।

प्रश्नः २६— 'न विमुञ्चन्ति सामर्थ्यं वाक्यार्थेऽपि पदानि नः।
वाक्यार्थो लक्ष्यमाणो हि सर्वत्रैवेति च स्थितिः॥ सप्रपञ्चं
व्याख्यायतामियं कारिका।

उत्तरम्—ननु पदानां न पदार्थवाचकत्वं, तेषामर्थानुभवजनितसंस्कारोद्बोधमात्रोपयोगात्, अन्यथा पदार्थानामपि स्ववाचकपदानुभूतिजनितसंस्कारोद्बोधकानां स्ववाचकपदस्मारकतया वाचकत्वप्रसङ्गः स्यादिति चेन्न; पदपदार्थयोः परस्परं स्मारकत्वाविशेषेऽपि पदार्थस्मारकानां पदानामेव वाचकत्वस्य लोकशास्त्रप्रसिद्धिसिद्धस्य निवारयितुमशक्यत्वात्, पदार्थस्मरणजननशक्तिविशिष्टस्य शब्दज्ञानस्यैवाभिधाव्यापारत्वेनाभ्युपगमात्, ततोभिन्नस्य परिस्पन्दप्रयत्नरूपस्य व्यापारस्य भाट्टाभिमते विभौ शब्दे नैय्यायिकादिसम्मते नभोगुणे शब्दे वा चैतन्यानधिकरणे निरूपयितुं दुःशक्यत्वाच्च। तस्मात्समभिव्याहृतपदसमूहस्मारितपदार्थानां परस्परान्वयबोधो लाक्षणिकः शाब्दश्चेति। तत्र भट्टपादसम्मतिमाह—

न विमुञ्चन्ति सामर्थ्यं वाक्यार्थेऽपि पदानि नः।
वाक्यार्थो लक्ष्यमाणो हि सर्वत्रैवेति च स्थितिः॥

अस्माकं मते पदानि वाक्यार्थाविबोधाय सामर्थ्यं न परित्यजन्ति, यतो हि वाक्यार्थः सर्वत्र लक्ष्यमाण एव भवतीति स्थितिः। अत्र सङ्ग्रहश्लोकेनाचार्यः प्रमाणमाह—

शब्दास्तात्पर्यविषयव्यतिषङ्गस्य लक्षकाः।
तत्तात्पर्याभिधानत्वात्क्ष्वेलं भुङ्क्ष्वेति शब्दवत्॥२६॥

शब्दास्तात्पर्यविषयान्वयस्य लक्षकाः, अन्वयबोधतात्पर्याभिधानत्वात्, विषं भुङ्क्ष्वेति वाक्यवत्। न च पदानि स्वार्थपरित्यागेन लक्षणयान्वयप्रतिपत्तिपराणि, अन्वयबोधतात्पर्याभिधानत्वात्, विषं भुङ्क्ष्वेति वाक्यवदित्याभाससमानयोगक्षेमतेति वाच्यम्; त्वदुदाहृतानुमानवाक्ये वाच्यार्थपरित्यागे विशिष्टसाध्यबोधकत्वाभावेनास्मदनुमानस्याविघातकत्वात्, वाच्यार्थपरित्यागे तत्रैव तव हेतावनैकान्तिकत्वात्। तथा च व्याघातकाभावेनास्मदनुमानेऽव्याघातः। विरुद्धानुमाने व्याप्यत्वासिद्धिरप्यस्ति, वाच्यार्थपरित्यागप्रयोजको मुख्यार्थबाध एव। अस्मत्पक्षे मुख्यार्थबाधाभावान्न तत्र वाच्यार्थपरित्यागोऽनुमातुं शक्यः। अतोऽभिहितान्वयवादस्य श्रेयस्त्वं बोध्यमितिवाचस्पतिमिश्राचार्याणामभिप्रायः। न चैवमपसिद्धान्तापत्तिः; समन्वयसूत्रे वेदान्तवाक्यानि प्रस्तुत्य "न च तद्गतानां पदार्थानां ब्रह्मस्वरूपविषये निश्चिते समन्वयेऽवगम्यमानेऽर्थान्तरकल्पनायुक्ता; श्रुतहान्यश्रुतकल्पनाप्रसङ्गात्" इत्याचार्यैर्भगवत्पादैः प्रत्यपादि। तत्र पदार्थानामेवान्योऽन्यान्वयबोधकता प्रतीयते, मण्डनमिश्रादिभिरपि तथैवाङ्गीकृतत्वात्।

पदार्थान्तरतुल्यत्वाद्विध्याकांक्षानिबन्धनः।
न संसर्गः पदार्थानां स्वशब्दैस्तु प्रकाशितः॥
सम्बन्धयोग्यरूपेण तस्मात्सम्बन्धभागिनः।
विशिष्टार्थप्रयुक्ता हि समभिव्याहृतिर्जनैः॥ इत्यादि

पदार्थानां संसर्गो न विध्याकांक्षानिबन्धनः, विधेरपि पदार्थान्तरतुल्यत्वात्। तस्मात्सम्बन्धयोग्यरूपेण स्वशब्दैः प्रकाशिताः पदार्थाः स्वयमेव संसर्गभागिनो भवन्तीति श्लोकतात्पर्यार्थः। वेदान्तिभिर्व्यवहारे

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भट्टनयाङ्गीकृते भट्टपादसम्मतिरप्यस्ति स पुरस्तादेवोक्तः 'वाक्यार्थो लक्ष्यमाणो हि सर्वत्रैवेति च स्थिति'रित्यवधेयम् ॥

प्रश्नः २७—परमतनिराकरणपूर्वकं वेदान्तानामपौरुषेयत्वं प्रतिपाद्यताम् ।

प्रश्नः २८—वेदानां पौरुषेयत्वं निराकृत्यापौरुषेयत्वं व्यवस्थाप्यताम् ।

उत्तरम्—अथ वेदान्तानामपौरुषेयत्वममृष्यमाणाः काणादादयः प्रत्यवतिष्ठन्ते—ननु वेदान्तानां (वेदानां) कथमपौरुषेयत्वं ? तत्प्रतिपादकप्रमाणाभावात् । नन्वपौरुषेया वेदाः, सम्प्रदायाविच्छेदे सत्यस्मर्यमाणकर्तृकत्वात्, आत्मवदित्यनुमानं प्रमाणं वेदापौरुषेयत्वसाधनेऽस्त्येवेति चेन्न, सम्प्रदायाविच्छेदस्य हेतुविशेषणस्यासिद्धेः । पौरुषेयवेदवादिभिरस्माभिः प्रलये सम्प्रदायविच्छेदस्याभ्युपगमात् । अस्मर्यमाणकर्तृकत्वपदेनाप्रमीयमाणकर्तृकत्वं विवक्षितं नोचितं "तस्माद्यज्ञा"दित्यादिश्रुतिभिः कर्त्तुः प्रमीयमाणत्वात् । न च तत्पदेन स्मरणागोचरकर्तृकत्वं विवक्षितमिति वाच्यम्; एकेनास्मर्यमाणस्य विवक्षायां प्रकीर्णश्लोकादावनैकान्तिकत्वात्, सर्वास्मरणविवक्षायामसर्वज्ञविज्ञानाविषयत्वापत्तेश्च । किं चानुमानतोऽपि वेदानां पौरुषेयत्वमध्यवसामः—वेदवाक्यानि पौरुषेयाणि, वाक्यत्वात्, कालिदासादिवाक्यवत्, वेदवाक्यान्याप्तप्रणीतानि, प्रमाणत्वे सति वाक्यत्वात् मन्वादिवाक्यवदितिपूर्वः पक्षः—

अत्र समाधानं श्लोकेन संकलयति—

श्रुतोनामीश्वराज्जन्म केवलं श्रुतिषु श्रुतम् ।
मानान्तरोपलब्धेऽर्थे रचना तु न मीयते ॥२७॥ इति

श्रुतिषु श्रुतोनामीश्वराज्जन्मैव श्रूयते, न तेन मानान्तरेणोपलभ्य वेदविरचनमनुमातुंशक्यमिति श्लोकार्थः । किं च वेदानां पौरुषेयत्वं नाम पुरुषाधीनोत्पत्तिमत्त्वमिति कल्पोऽस्माभिरप्यभ्युपगम्यते एव । प्रमाणान्तरेणार्थमुपलभ्य विरचितत्वं पौरुषेयत्वमिति पक्षस्य श्रुतिभिरप्रतिपादितत्वात् । न च पुरुषाधीनोत्पत्तिमत्त्वश्रवणान्यथानुपपत्त्यैव प्रमाणान्तरेणार्थमुपलभ्य विरचितत्वमनिच्छताऽपिसिद्धेदिति वाच्यम्; इदानीमस्मदादिभिरुच्चार्यमाणेषु वेदवाक्येषु मालतीमाधवादिवाक्येषु च प्रमाणन्तरेणार्थमुपलभ्यास्मदादिभिर्विरचितत्वाभावेऽपि पुरुषाधीनोत्पत्तिमत्त्वस्योक्तरीत्या विद्यमानत्वेन व्यभिचारात् । नह्यत्रास्माभिर्विरचितत्वं कल्पनीयमावश्यकम् । एवं वेदे विरचितत्वं साध्य नास्ति, तत्रपूर्वोक्तरीत्या पुरुषाधीनोत्पत्तिमत्त्वमस्तीत्यतः सुव्यक्तोऽत्र व्यभिचारः । किं च यदि विरचितत्वान्यथानुपपत्तिर्मानान्तरोपलब्धेऽर्थे रचनां कल्पयेत्, तर्हि वेदानामग्न्यादिभ्यो जन्मश्रवणादीश्वरकर्तृकत्वनियमभङ्गप्रसङ्गः स्यात् । न च वेदानामीश्वरादुत्पत्तिश्रवणात्तत्तद्वाक्यमधिष्ठातृदेवपरमभ्युपेयमिति वाच्यम्; "ब्रह्म स्वयम्भु" इत्यादिश्रुतिस्मृतिशतेभ्योऽपि वेदानां नित्यत्वावगमात् । न च तस्माद्यज्ञादित्यादिवाक्यं सम्प्रदायप्रवर्तकत्वपरमिति वाच्यम्;अस्मत्पक्षेऽपि सम्प्रदायप्रवर्तकत्वकल्पनस्य दण्डवारिताभावात् । देवताधिकरणन्यायेन प्रमाणान्तरेण प्राप्तिविरोधयोरसतोरन्यपराणामपि वाक्यानां स्वार्थे प्रामाण्योपपत्तेः । इन्द्रादिविग्रहस्य च न प्रमाणान्तरेण प्राप्तिर्नापि निषेधः । अतः प्राशस्त्यपराणामपीन्द्रादिदेवविग्रहावगमकवेदवाक्यानां स्वार्थे प्रामाण्यमुपपद्यत एवेति देवताधिकरणन्यायतात्पर्यम् ।

ननु वेदाः आप्तप्रणोताः, अनाप्ताप्रणीतत्वात्, सम्मतवदित्यनुमानेन वेदानामाप्तप्रणीतत्वमनुमातुं शक्यमिति चेन्न; आत्माकाशादौ हेतौ व्यभिचरितत्वात् । न चोक्तानुमाने हेतौ शब्दत्वे सतीति विशेषणादनैकान्तिकताऽभाव इति वाच्यम्;आप्तोच्चरितत्वमात्रस्याप्तप्र णीततामात्रस्यास्मदादिभिरपि वेदेऽभ्युपगतत्वेन व्यभिचाराभावेऽपि सिद्धसाधनतादिदोषस्य तादवस्थ्यात् । न चैवं सति शब्दानामुत्पत्तिर्नाभिव्यक्तिरेवार्थोऽभिप्रेतश्चेत्तर्हिपाषण्डाद्यागमानामप्यपौरुषेयत्वापत्तिरिति वाच्यम्; माना-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

न्तरेणार्थमुपलभ्य तत्तत्पुरुषविरचितत्वस्य सौगतादिभिः स्वयमेवाङ्गीकारात्प्रसिद्धेश्च । अतो वेदानां तच्छिरोभागानां च वेदान्तानामपौरुषेयत्वं निष्प्रत्यूहं सिद्धमभूदिति भावः ।

प्रश्नः २९—वेदवाक्यान्याप्तप्रणीतानि, प्रमाणत्वे सति वाक्यत्वात्, मन्वादिवाक्यवदित्यनुमानं दोषान् प्रदर्श्य निरसनीयम् ।

उत्तरम्—अथ वेदानां पौरुषेयत्वप्रतिपादकस्य बाधकाभावान्नित्यत्वप्रतिपादकवाक्यस्यान्यार्थत्वाद्वेदान्तानां पौरुषेयत्वं पूर्ववादिना प्रसाधितम् । तथा च नित्यत्वानुमानागमौ प्रदूष्य ताभ्यामनित्यत्वं च प्रसाध्य साम्प्रतं वेदानामानित्यत्वेऽनुमानमपि दर्शयति—वेदवाक्यान्याप्तप्रणीतानि, प्रमाणत्वे सति वाक्यत्वान्मन्वादिवाक्यवदिति ।

ननु वेदस्याध्ययनं सर्वं गुर्वध्ययनपूर्वकम् ।
वेदाध्ययनरूपत्वादधुनाऽध्ययनं यथा ॥ इत्यनुमानेन

सत्प्रतिपक्षतेति चेन्न, सकलवेदाध्ययनस्य पक्षत्वे दृष्टान्तासिद्धेः, अतीतकालाध्ययनस्य पक्षत्वेंऽशतः सिद्धसाधनतापत्तेः, सर्गकालीनाध्ययनस्य च पक्षत्वे सर्गमनङ्गीकुर्वतो मीमांसकस्याश्रयासिद्धेश्च ।

किं च भारताध्ययनं सर्वं गुर्वध्ययनपूर्वकम् ।
भारताध्ययनत्वेन, साम्प्रताध्ययनं यथा ॥

इत्याभाससमानयोगक्षेमताप्यस्ति । न चाहं न केवलं 'तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे' इतिश्रुतिबलादेव वेदे पौरुषेयत्वं साधयामि, किन्तु वाक्यत्वहेतुनाऽपि तत्र पौरुषेयत्वं पुरस्तादेवानुमितमिति वाच्यम्; पुरुषप्रणीतत्वमात्रसाध्ये सिद्धसाधनतापत्तेः । प्रमाणान्तरेणार्थमुपलभ्य विरचितत्वसाधने च मालतीमाधवादिष्वनैकान्तिकत्वात् । तथा वेदा, आप्तप्रणीताः, प्रमाणत्वे सति वाक्यत्वादिति द्वितीयानुमानेऽपि सिद्धसाधनतापत्तेर्दुर्वारत्वात् आप्तेनोच्चार्यमाणतया तत्प्रणीतत्वस्यापौरुषेयवादिभिरप्यभ्युपगमात् । प्रमाणेनार्थमुपलभ्य विरचितत्वानुमाने तु हेतोरन्यथासिद्धिः । अस्मदादिभिरुच्चार्यमाणइदानीन्तनवेदवाक्यानामिव सर्गकालीनानामपि तेषामीश्वरेणोच्चार्यत्वमात्रेणापि प्रमाणवाक्यत्वोपपत्तौ प्रमाणान्तराधिगतिपूर्वकविरचितत्वस्यानुमातुमशक्यत्वात् । ईश्वरस्य च सर्वज्ञत्वेनातोतकल्पान्तरगतवेदापरोक्षत्वसम्भवात् । न चैवमपि ताल्वादिकरणरहितस्याशरीरिणः परमेश्वरस्य वेदानां कर्तृत्वं सम्प्रदायप्रवर्त्तकत्वं च न सम्भवतीति वाच्यम्; तथाविधस्यापि परमेश्वरस्य भक्तानुकम्पितया लीलाविग्रहधारणेन वेदोच्चारणोपपत्तेश्च ।

वस्तुतस्तु परमेश्वरेण शरीरमुपादाय न वेदा उपदिश्यन्ते किन्त्वीश्वरानुगृहीतानामतीतकल्पानुष्ठितोपासनादिसाधनेन निरतिशयज्ञानसमृद्धानां हिरण्यगर्भादीनां बुद्धौ कल्पादौ यो वेदानामाविर्भावः, स किल परमेश्वरस्य वेदोपदेष्टृत्वम् । इदमेव "यो वै वेदांश्च"ति श्रुतिवाक्येनोक्तं, न तत्र शरीरेण किञ्चत्कृत्यमिति भावः । एतेन सर्गकालीनं वेदाध्ययनं, पूर्ववेदाध्ययनपूर्वकं, वेदाध्ययनत्वात्, वर्तमानाध्ययनवदिति प्रयोगेन सर्गकालीनवेदाध्ययनस्य पूर्वपूर्ववेदाध्ययनपुरःसरत्वं समर्थितं जातमिति । न चोक्तप्रयोगे आश्रयासिद्धिरिति वक्तुं युक्तम्; वेदान्तिभिः सर्गारम्भस्याङ्गीकारान्मीमांसकान् प्रत्येवोक्तदोषसम्भवात् । तस्माद्वेदाध्ययनस्यानादित्वसिद्धौ वेदानामपौरुषेयत्वसिद्धिरितिभावः ।

न च सर्वं भारताध्ययनपूर्वकं, गुर्वध्ययनत्वाद्, आधुनिकाध्ययनवदित्यनुमानाभाससमानतेति वाच्यम्; दृढतरकर्तृस्मरणेन त्वदियानुमानस्य बाधितत्वात्, अस्माकं वेदाध्ययनपक्षकानुमाने बाधाभावाच्च । "वेदांश्च प्रहिणोतीति श्रुत्यासम्प्रदायप्रवर्तकत्वेनापि युक्तत्वात् । अन्यथा नित्यत्वप्रतिपादकवेदवाक्यानामनवकाशत्वप्रसङ्गात् । न चैवं व्यासस्य स्मृत्या सम्प्रदायप्रवर्त्तकत्वेनैव सामञ्जस्याद्भारतस्याप्यपौरुषेयत्वापत्तिरिति वाच्यम्; महाभारतस्य नित्यत्वप्रतिपादकप्रमाणाभावात् । तस्माद्वेदानां तच्छिरोभागानां च वेदान्तानामपौरुषेयत्वं निष्प्रत्यूहं सिद्धमित्यों शम्, ॥ शान्तिः ३॥

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ॐ

॥ श्रीमदभिनवचन्द्रेश्वरो विजयतेतराम् ॥

अष्टोत्तरशतन्यायमाला

१. अजाकृपाणीयन्यायः

कण्डूयनार्थं स्तम्भादौ शिथिलबन्धखड्गे छागी ग्रीवां प्रसारयति, यदृच्छया च ग्रीवा छिद्यते; तथाभूतोऽजाकृपाणीयन्यायः काकतालीयन्यायसमः। यथा भूमिं खनन्त्याजयात्मवधाय कृपाणो दर्शितस्तत्तुल्यं वृत्तं केनचिदात्मविनाशाय कृतमजाकृपाणीयम्।

२. अजाविन्यायः

यत्रकोऽविः कूपे पतति तमवलोक्यान्येऽवयस्तत्र पतन्ति तद्वत्।

३. अन्तर्दीपिकान्यायः –(देहलीदीपन्यायः, मध्यदीपन्यायः, अन्त्यदीपन्यायः)

सत्येन लभ्यस्तपसा ह्येष आत्मा सम्यग्ज्ञानेन ब्रह्मचर्येण नित्यम्। नित्यं सर्वदा नित्यं सत्येन नित्यं तपसा नित्यं सम्यग्ज्ञानेनेति सर्वत्र नित्यशब्दोऽन्तर्दीपिकान्यायेनानुषक्तव्यः। देहलीदीपन्यायः, मध्यदीपन्यायः, अन्त्यदीपन्यायः इति सर्वं समानार्थकम्।

४. अन्धकवर्तकीयन्यायः

अन्धकश्च वर्तकाच अन्धकवर्तकम्। यथा कश्चिदन्धकः पुमान् करतलेन करं ताडयन्वर्तते, तस्य करद्वयमध्ये वर्तकः पक्षिविशेषः समायाति। स तु दुर्भलस्तथा मानवभवे सत्सङ्गतिर्दुर्लभा वर्तते। तथा हि संसारसागरमिमं भ्रमता नितान्तं जीवेन मानवभवः समवापि दैवात्। तत्रापि यद्भुवनमान्यकुले प्रसूतिः सत्सङ्गतिश्च तदिहान्धकवर्तकीयम्।

५. अन्धगजन्यायः

यत्रानेकेऽन्धा गजमेकं नानाविधं पश्यन्ति तद्वदित्यर्थः।

६. अन्धगोलाङ्गूलन्यायः

यदि चाज्ञस्य सतो मुमुक्षोरचेतनमनात्मानमात्मेत्युपदिशेत्प्रमाणभूतं शास्त्रं सश्रद्धधानतयान्धगोलाङ्गूलन्यायेन तदात्मदृष्टिं न परित्यजेत्तद्व्यतिरिक्तं चात्मानं न प्रतिपद्येत, तथा सति पुरुषार्थाद्विहन्येतानर्थं च ऋच्छेत्।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

७. अन्धपरम्परान्यायः

तत्र ये साधवस्ते शास्त्रेणानुशिष्यन्ते। असाधुभ्यो विविक्ताः प्रकृतिप्रत्ययविभागेन ज्ञाप्यन्ते साधव इति। कथं पुनरिदमाचार्येण पाणिनिनावगतमेते साधव इति। आपिशलेन पूर्वव्याकरणेन आपिशलिना तर्हि केनावगतम्। ततः पूर्वेण व्याकरणेन यद्येवमन्धपरम्पराप्रसङ्गः। तद्यथा शुक्लं क्षीरमित्यन्धेनोक्ते केनेदमवगतमिति पृष्टो यदाऽन्धान्तरो निर्दिशति सोप्यन्धान्तरं तदा नैतद्वचः शौक्लये प्रमाणं भवति तादृगेतत्।

८. अरुन्धतीप्रदर्शनन्यायः

यथारुन्धतीं दिदर्शयिषुस्तत्समीपस्थां स्थूलां ताराममुख्यां प्रथममरुन्धतीतिग्राहयित्वा तां प्रत्याख्याय पश्चादरुन्धतीमेव ग्राहयति तद्वन्नायमात्मेति ब्रूयात्। यथारुन्धतीनिदर्शने बह्वीष्वपि तारास्वमुख्यास्वरुन्धतीषु दर्शितासु याऽन्त्या प्रदर्श्यते सा मुख्यैवारुन्धतीभवत्येवमिहाप्यानन्दमयस्य सर्वान्तरत्वान्मुख्यमात्मत्वम्।

९. अर्धजरतीयन्यायः

यथा स्त्री न तरुणी श्लथस्तनत्वात्कृष्णकेशत्वान्न जरती वक्तुं शक्यते तद्वत्सिद्धासिद्धं प्रयोजनम्। अर्धमुखमात्रजरत्या वृद्धायाः कामयते नाङ्गानीति सोऽयमर्धजरतीयन्यायः। न हि कुक्कुटादेरेकदेशो भोगाय पच्यत एकदेशस्तु प्रसवाय कल्प्यते, विरोधात्। ब्रह्मविद्या स्वफलैः कर्माणि नापेक्षते तथा स्वोत्पत्तावपि नापेक्षतेऽन्यथा क्वचिदपेक्षा क्वचिन्नेत्यर्धजरतीयत्वापत्तिरिति प्राप्ते आह सर्वापेक्षेति नार्धजरतीयन्यायो योग्यतावशादेकैकस्यैव कार्यविशेषेष्वपेक्षानपेक्षयोरुपपत्तेः, यथा लाङ्गूलवहनेऽनपेक्षितोऽश्वो रथवहनेऽपेक्ष्यते तद्वत्स्वोत्पत्तौ तु विद्याकर्मापेक्षते।

१०. अल्पायाससिद्धिन्यायः

केवलाच्चेत् ज्ञानात् पुरुषार्थसिद्धिः स्यात्किमर्थमनेकायाससमन्वितानि कर्माणि ते कुर्युः। पूर्वोक्तन्यायात् तद्यथा पथिजातेऽर्के मधूत्सृज्य तेनैव पथा मध्वार्थिनः पर्वतं न गच्छेयुस्तादृशं हि तत्; अपिचाहुः 'अर्के चेन्मधुविन्देत किमर्थं पर्वतं व्रजेत्। इष्टस्यार्थस्य संसिद्धौ को विद्वान्यत्नमाचरेत्'।

११. अवयवशक्तेः समुदायशक्तिर्बलीयसीन्यायः

यथैकं तृणं हस्तिनं बन्धयितुमशक्तमपि तृणसमुदायो रज्जुरूपापन्नो बलिनं हस्तिनं निबध्नाति। तद्वद्विवेकादिसाधनसम्पन्नः पुमान् वेदान्तविचारे समर्थो भवति। एतेन अकृतोपासकापेक्षया कृतोपासकस्य साधकस्य वैशिष्ट्यं मन्तव्यमिति भावः।

१२. अशक्तोऽहं गृहारम्भे शक्तोऽहं गृहभंजने

दुष्टजनः कमपि नोपकरोति प्रत्युत सर्वानपकरोति, तस्यायं स्वभावस्तत्रैवायं न्यायः प्रवर्त्तते।

१३. अशोकवनिकान्यायः

यथाऽशोकवनिकायां स्थिताऽपि सीता शोकसागरे निमग्नासीत् रावणेन निगृहितत्वात्। तथा मायातत्कार्येषु सत्यत्वाग्रहेण परमात्मनोऽशोऽपि दुःखद्वन्द्वसागरे निमग्नो जीवो दरीदृश्यते।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तत्रायं न्यायः प्रवर्तते । अथवा सत्स्वप्यनेकेषु स्थानेषु रावणेनाशोकवनिकायामेव सीता स्थापितेत्यत्र किं कारणमिति प्रश्ने न किमपि कारणम् । केवलं दशाननस्येच्छैव कारणं नान्यत् । स्वतन्त्रः पुरुष अनेकेषां साधनानां मध्ये स्वेच्छया किमपि साधनमुपादातुं शक्नोतीति तत्राप्ययं न्यायः प्रवर्तते ।

१४. अश्मलोष्टन्यायः

यथा लोके दुर्भेध्यमश्मानं प्राप्य पांशुपिण्डलोष्टः पाषाणचूर्णायाश्मणि निक्षिप्तः स्वयमेव विध्वंसते, यत्रैतादृशी विवक्षा तत्रैवास्य न्यायस्य प्रवृत्तिः ।

१५. अस्त्रमस्त्रेण शाम्यति न्यायः

नन्वस्त्रमस्त्रेण शाम्यतीतिन्याये न काम्यैः काम्यानां निषिद्धैर्निषिद्धानां निवृत्तिरस्त्वित्यादि स्थलेऽस्य प्रवृत्तिः ।

१६. अहिकुण्डलन्यायः

अहेः=सर्पस्य कुण्डलाकृतिवेष्टनं स्वाभाविकं, तथा यस्य यत्र स्वाभाविको धर्मो व्यपदिश्यते तत्रास्य प्रवृत्तिः । उभयव्यपदेशात्त्वहिकुण्डलवत् । अत उभयव्यपदेशदर्शनादहिकुण्डलवदत्र तत्त्वं भवितुमर्हति । यथा अहिरित्यभेदः कुण्डलाभोगप्रांशुत्वादीनीति च भेद एवमीहापीति ।

१७. आकाशमुष्टिहननन्यायः

यथाऽऽकाशो मुष्टिना हन्तुमशक्यस्तथाऽऽत्मापि शस्त्रादिनाऽपि हन्तुमशक्यः, उभयत्र निरवयवत्वस्य तुल्यत्वात् ।

१८. आखुमार्जारन्यायः

यथाऽऽखुमार्जारयोः शाश्वतिको विरोधस्तद्वदविद्याब्रह्मविद्ययोः शाश्वतिको विरोधः । अतो नैकाधिकरण्यस्य तयोः सम्भावनास्तीति भावः ।

१९. आम्रवणन्यायः

यथा वन इतरवृक्षसत्त्वेऽप्याम्राणां बाहुल्ये यथाऽऽम्रवणव्यपदेश एवमेकस्य प्राधान्ये भूयस्त्वात्तद्वाद इति न्यायेन तद्व्यपदेशो यत्र तत्रास्य प्रवृत्तिः ।

२०. उपयन्नपयन्धर्मविकारन्यायः

यथा पूर्वस्य रूपरसादिरूपधर्मपरावृत्तौ रूपरसाद्यंतरोत्पत्तौ च घटादेर्धर्मिणो विकृतिरेवं यस्य धर्मिणः पूर्वधर्मस्यापगमेऽन्यधर्मस्योत्पत्तिस्तत्रास्य प्रवृत्तिः ।

२१. उपवासाद्वरं भैक्ष्यम् (आपद्धर्मन्यायः)

यथाऽऽपत्तिकाले भोजनाप्राप्तौ मरणासन्नदशायां येन केनापि प्रकारेण प्राप्तान्नेन जीवनं रक्षणीयं, तथैव नीतिशास्त्रेषूट्टङ्कितम् । अकरणे मन्दकरणं श्रेय इत्यपि न्यायमिमं वदन्ति न्यायविदः ।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

२२. उपोद्घातन्यायः

चिन्तां प्रकृतार्थसिद्धर्यर्थामुपोद्घातं प्रचक्षते। यथा तक्राभिलाषेण कश्चिदन्यगृहं गत्वा पृच्छति यत्तव गृहे गावो दुग्धं ददतीति। प्रतिपाद्यमर्थं बुद्धौ संगृह्य तादर्थ्येनान्यार्थोपवर्णनमुपोद्घातः।

२३. अलंकृत्यशिरच्छेदन्यायः

यागाद्यनुष्ठानावसरे पूर्वमजादिकं पशुमलंकरोति पश्चात् देवेभ्यस्तमुपहरति, तत्रैवायं न्यायः प्रवर्तते। प्रकृते वेदान्तविचारात्पूर्वं ब्रह्मणि जगदारोप्यते, ततो नेति निषेधवचसा जगदपोद्यते। अथाध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यत इत्यभियुक्तैरुक्तमपि सङ्गच्छते।

२४. उष्ट्रकण्टकभक्षणन्यायः

उष्ट्रस्य शमीकण्टकवेधजातदुःखकालेऽपि शमीपत्रभक्षणसुखलेशो यथा, तथाभीष्टविषयोपार्जनदुःखकाले तदुपार्जितद्रव्यजसुखलेशो यत्रोपदिश्यते तत्रास्य प्रवृत्तिः।

२५. उष्ट्रलगुडन्यायः

यथोष्ट्रवाह्येन भक्ष्यशाखासमुदायैकदेशभूतलपतितेन लगुडेनोष्ट्रः ताडयते। एवं यत्र प्रतिवादिभिरुपस्थापितानां तर्काणां मध्य एकं तर्कमादाय प्रतिवादिनस्ताडयन्ते निगृह्यन्ते, तत्रायं न्यायः प्रवर्तते।

२६. एकवृन्तगतफलद्वयन्यायः

एको वटुर्दर्भकुशाग्रपाणिः आम्रस्य मूले सलिलं ददाति। आम्रश्च सिक्तः पितरश्च तर्पिता, एकाक्रिया द्व्यर्थकरी प्रसिद्धा।

२७. कदम्बकोरकन्यायः

कदम्बगोलकस्य—गोलकाकारकदम्बस्य सर्वावयवेषु यथा युगपत्पुष्पोद्गम एवं सर्वप्रदेशेषु युगपद्यत्र कार्यप्रसरस्तत्रास्य प्रवृत्तिः।

२८. कफोणिगुडन्यायः

कफोणौ गुडाभावेऽपि तत्प्रत्याशया यथा लेहनायासस्तथा वस्त्वसद्भावेऽपि यत्र तदाशया व्यापारभेदस्तत्रास्य प्रवृत्तिः।

२९. काकतालीयन्यायः (यादृच्छिकन्यायः)

काकस्यागमनं यादृच्छिकं तालस्य पतनं च तेन तालेन पतता काकस्य वधः कृतः। एवमेव देवदत्तस्य तत्रागमनं दस्यूनां चोपनिपातः तैश्च तस्य वधः कृतः तत्र यो देवदत्तस्य दस्यूनां च समागमः स काकतालसमागमसदृशः। तालः करतलयोः शब्दजनकः संयोगः तस्मिन् क्रियमाणे उत्पतन्काको दवात्तत्र तालाभ्यामाक्रान्तोऽमूत्तदेतत्काकतालीयमित्युच्यते। काकस्पर्शसमकालं तालफलस्य तालवृक्षस्य वा पतनं तदित्यन्ये। श्रूयते च "अयथावस्तुविज्ञानात्फलं लभ्येत ईप्सितम्। काकतालीयतः सोऽयं संवादिभ्रम उच्यते"।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

३०. काकदन्तपरीक्षान्यायः (निष्फलप्रयासन्यायः)

यथा काकस्य कति दन्ता इति परीक्षायां न किञ्चित्प्रयोजनं सिध्यति । एवं यत्र निष्फल-प्रयत्नस्तत्रैवायं न्यायः प्रवर्तते ।

३१. काकाक्षिगोलकन्यायः

"बलिनोर्द्विषतोर्मध्ये वाचात्मानं समर्पयन् । द्वैधीभावेन वर्तेत काकाक्षिवदलक्षितः" । यथा काकस्यैकमेवक्ष्युभयोर्गोलकयोः क्रमशः गच्छद्यथानुकूलं सर्वमवलोकयति । तथैवोभयोर्द्विषतो-र्बलिनोर्मध्ये तिष्ठन्विवेकी पुरुषो द्वैधीभावेनात्मनं वाचा समर्पयन्वर्ततेत्यर्थः ।

३२. काशकुशावलम्बनन्यायः

नद्यादौ पतितस्य सन्तरणानभिज्ञस्य यथा कुशकाशावलम्बनं निरर्थकमेवं प्रबलयुक्तिषु निराकृतासु दुर्बलयुक्त्यवलम्बनं निरर्थकमित्येवमवलम्बनस्य निरर्थकत्वविवक्षायामस्य प्रवृत्तिः ।

३३. कुण्डबदरन्यायः

आधाराधेयभाव एकाश्रयत्वेन न सामानाधिकरण्यं, नहि भवति कुण्डं बदरमिति कुण्ड-बदरन्यायः ।

३४. कूपमण्डूकन्यायः

"कथं मामपि दशदिग्विलासिनीकर्णपूरीकृतकीर्तिपल्लवं त्रिभुवनवीरनामधेयं कूपमण्डूकेन सागरमविख्यातमपदिशसि" । सदैव कूपे वसन् सागरमजानन्मण्डूको यथा कूपमेव सर्वाधि-कजलपूर्णं मन्यते, तथैवातिपरिच्छिन्नबुद्धिपुरुषो बुद्धिमन्तमपि पुरुषमबुद्धमपदिशति । तत्रायं न्यायः प्रवर्तते ।

३५. कूपयन्त्रघटकान्यायः

कांश्चित्तुच्छयति प्रपूरयति वा कांश्चिन्नयत्युन्नतिं कांश्चित्पातविधौ करोति च पुनः कांश्चिन्नयत्याकुलान् । अन्योन्यं प्रतिपक्षसंहतिमिमां लोकस्थितिं बोधयन्नेषः क्रीडति कूपयन्त्र-घटिकान्यायप्रसक्तो विधिः ।

३६. कूर्माङ्ग (रक्षण) न्यायः

यथा कूर्मस्याङ्गानि कूर्मशरीरे निविशमानानि तिरोभवन्ति निःसरन्ति चाविर्भवन्ति । एवं तन्त्वादेः पटादयो विशेषा निःसरन्त आविर्भवन्त उत्पद्यन्त इत्युच्यन्ते, निविशमानास्तिरोभवन्तो विनश्यन्तीत्युच्यन्ते ।

३७. कैमुतिकन्यायः

अत्युत्कृष्टत्वापकृष्टत्वापादनावसरे किञ्चिदपेक्षया यत्र कस्यचिदुत्कृष्टत्वादिकमापाद्यते तत्रायं न्यायः प्रवर्तते । यथा—"यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः" इति । यत्र विदुषामपीन्द्रियाणां जयो दुःशकस्तत्राविदुषां प्रयत्नहीनानामिन्द्रियजयो भवेदिति किमुत वक्तव्यमिति भावः ।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

३८. खले कपोतन्यायः

यथा कस्मिंश्चित्खलेऽनेके कपोताः सहैवोत्पतन्ति निपतन्ति च; तद्वदविवेकिनः सहैव संसार-विषयेषु प्रवर्तन्ते च। अत आह गतानुगतिको लोको न लोकः पारमार्थिक इति ।

३९. खल्वाटबिल्वीयन्यायः

यथा खल्वाटः पर्यटन्नतर्कितं श्रीफलतरोरधस्तादागतो दैववशाच्च बिल्वफलं तदुपरि पतितं, तद्वदन्योऽप्युभयवस्तुसंयोगो दैवादुच्यते—'खल्वाटो दिवसेश्वरस्य किरणैः सन्तापितो मस्तके। वाञ्छन्देशमनातपं विधिवशात्तालस्य मूलङ्गतः। तत्राप्यस्य महाफलेन पतता भग्नं सशब्दं शिरः। प्रायो गच्छति यत्र भाग्यरहितस्तत्रैव यान्त्यापदः" ।

४०. गगनरोमन्थन्यायः

पार्थिवदेहवत्त्वाद्यथा गोमहिषादयो रोमन्थायन्ते, तेन भक्षितानि तृणादीनि पच्यन्ते, न तथा गगने रोमन्थकल्पनं युक्तं, तस्यापार्थिवत्वात् । अतोऽसम्भवस्थलेऽस्य न्यायस्य प्रवृत्तिरिति भावः ।

४१. गड्डुरिकाप्रवाहन्यायः

यथा यदा गड्डुरिकानां=अवीनां संघादेका चेन्नद्यादौ पतति तदा तत्संघान्तर्गताः सर्वेऽपि वार्य्यमाणा अपि अवयस्तत्र पतन्तीति लोकप्रसिद्धया यत्र वार्य्यमाणानामप्यनिष्टमार्गे धावनं तत्रास्य प्रवृत्तिः ।

४२. गुडजिह्विकान्यायः

यथा तिक्तताभिया निम्बपानमकुर्वाणस्य बालस्य जिह्वायां गुडलेपं दत्त्वा पित्रादिस्तं निम्बं पाययति। एवमर्थवादवाक्यानि बह्वायाससाध्ये कर्मण्यप्रवर्त्तमानं पुरुषं स्वर्गाक्षय्यादिकं श्रावयित्वा प्रवर्तयन्ति। अतः फलश्रुतिरपि रोचनार्थः ।

४३. गोबलीवर्दन्यायः

बलीवर्दस्य गोविशेषत्वेऽपि बलीवर्दस्य झटिति गोत्वेन बोधनार्थं यथा प्रयोगस्तथान्ययोः सामान्यविशेषरूपयोर्झटिति बोधनार्थं यत्र प्रयोगस्तत्रास्य प्रवृत्तिः। अत्र चानेकपदोपदाने गोबलीवर्दन्यायेन पुनरुक्तिपरिहारः। यत्र गाः कालयबलीवर्दं चेत्युच्यन्ते तत्र गोपदेनैव बलीवर्दपदसिद्धौ बलीवर्दपदं दुर्दम्यत्वज्ञापनपरत्वेन सफलामति कल्प्यते ।

४४. गोमयपायसीयन्यायः

कथञ्चित्समाधीयमानमप्येतद्गोमयपायसीयन्यायमाक्षिपति। गोमयं पायसं गव्यत्वादित्यादि न्यायमतदूषणं समाधीयमानमप्याक्षिपति तिरस्करोतीत्यर्थः। एवं चायमभेदसाधको हेतुर्गोमय-पायसीयन्यायवदाभासतां व्रजेत् ।

४५. गौणमुख्यन्यायः

गौणमुख्ययोर्मुख्ये कार्यसम्पत्तिः। यद्यपि यथा सिंहशब्दस्य गौणीवृत्त्या शूरत्वक्रूरत्वादिगुण-सम्पन्ने माणवकेऽपि प्रवृत्तिः, तथापि सिंहो नर्दतीत्यत्र मुख्यार्थ एव केसरादिमति वन्यपशौ सिंह-शब्दस्य मुख्यवृत्त्या प्रवृत्तिरवगन्तव्येति बोध्यम् ।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

४६. घट्टकुटीप्रभातन्यायः

कश्चिद्वणिग्विचारयति स्म, यत्किलात्र नगरे मया प्रवेशशुल्कं न देयमिति मत्वा मुख्यं राजपथं परित्यज्य सङ्कीर्णेन पथा यावद्रात्रि गच्छन्नपि प्रातस्तत्रैव समायाति, यत्र राजपुरुषो नगरं प्रविशद्भ्यो वणिग्भ्यो नगरप्रवेशशुल्कं गृह्णातीत्यत्रैवास्य न्यायस्य प्रवृत्तिरिति भावः ।

४७ घुणाक्षरन्यायः (अन्धचटकन्यायः)

घुणोत्किरणात्कथंचिन्निष्पन्नमक्षरं घुणाक्षरम् । तदिव यदकुशलेन दैवान्निष्पद्यते तद्घुणाक्षरम् —"अहो घुणाक्षरन्यायो यदिदं भ्रमरद्वयं प्रति मयोक्तं वन्दिद्वयं प्रतिफलितं वचः। त्रीन्वारान्समरे जित्वा जितं मेने समुम्मुनिम्, सकृज्जयमरेर्वीरा हि घुणाक्षरम् ।

४८. चन्द्रचन्द्रिकान्यायः

अतः सर्वदेवकारणस्य रुद्रस्य या शक्तिश्चन्द्रचन्द्रिकान्यायेन तदुद्बोधरूपिणो स्वाधीनवल्लभेति प्रसिद्धा, सेव भवानो ।

४९. चालनीन्यायः

यथान्नादिपरिष्कर्तुं चालनीति पात्रविशेषे पौनःपुन्येन चाल्यमाने सर्वाण्यन्नानि तत्रस्थानि छिद्राण्यनुसृत्य तैरधो निर्यान्ति, तद्वद् "पर्वतो वह्निमान्"इत्यत्र हेत्वधिकरणे तत्तत्पर्वतादौ सर्वेषां वह्नीनामभावो धर्तुं शक्य इत्यर्थः ।

५०. चोरयामिकन्यायः

प्रयोजनानुपयुक्ते काले तस्य स्वरूपतोऽवस्थानं पाटच्चरलुण्ठिते वेश्मनि यामिकजागरणवृत्तान्तमनुहरति ।

५१. चौरापराधान्माण्डव्यनिग्रहन्यायः

तस्मात्भेदप्रत्यक्षं न सुप्रसरमिति चेत्किं वस्तुस्वरूपभेदवादिनं प्रतीमानि दूषणान्युद्घुष्यन्ते किंवा धर्मिभेदवादिनं प्रति, प्रथमे चौरापराधान्माण्डव्यनिग्रहन्यायापातः ।

५२ छत्रिन्यायः

एकस्तत्र कर्मफलं पिबति=भुंक्ते नेतरस्तथापि पातृसम्बन्धात्पिबन्तावित्युच्यते छत्रिन्यायेन. "ऋतं पिबन्तौ" इत्यत्र तु जीव पिबत्यशनायाद्यतीतः परमात्मापि साहचर्याच्छत्रिन्यायेन पिबतीत्युपचर्यते । यथा लोके छत्रिणो गच्छन्तीति प्रयोगे सपरिवारे राज्ञि गच्छति छत्र्यछत्रिसमुदाये छत्रिशब्दो वर्तते । एकसमूहवाहित्वेनैव पिबदपिबत्समुदाये पिबतिर्वर्तत इत्यर्थः।

५३. तमोदीपन्यायः

"अज्ञानं ज्ञातुमिच्छेद्यो मानेनात्यन्तमूढधीः। स तु नूनं तमः पश्येद्दीपेनोक्ततेजसा"। अज्ञानं नान्तःकरणवृत्तिविषयं, यस्तु प्रत्यक्षादिप्रमाणेनाज्ञानं ज्ञातुमिच्छति स तु मूढधीः तमो दीपेन प्रकाशयितुं वाञ्छतीत्यत्रैव न्यायोऽयं प्रवर्तते ।

५४. तुष्यतुखलन्यायः

तुष्यतु दुर्जन इति रूपेणानभिमतमपि समाधानमुररीकृत्य यत्रापरान्दोषानारोपयति, तत्रैवायं न्यायः प्रवर्तते ।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

५५. दग्धपटन्यायः

"सर्वं खल्विदं ब्रह्म" "ऐतदात्म्यमिदं सर्वम्" इत्यादि श्रुतिबलात्सर्वमहमिति गिरिनदी-समुद्रात्मकं सर्वं जगत्स्वाभिन्नसच्चिदानन्दब्रह्मत्वेनानुभूय तस्य दग्धपटन्यायेन प्रपञ्चभानेप्यद्वैतं सच्चिदानन्दलक्षणं वस्तु भासत एवेत्यर्थः।

५६. दण्डसर्पमारणन्यायः

सर्पमारणार्थं तत्कालमेव कुठारादिनाऽभिनवदण्डच्छेदनप्रवृत्तिर्व्यर्था, तेनैव कुठारादिना सर्पच्छेदनस्य कर्तव्यत्वादित्यर्थः।

५७. दण्डापूपिकान्यायः

दण्डापूपिकयान्यार्थागमोऽर्थापत्तिरिष्यते–मूषकेण दण्डो भक्षितश्चेदिहस्थः पूपोऽपि तेन भक्षित इति न्यायो दण्डापूपिका, तयान्यार्थागमोऽर्थान्तरप्रत्ययोऽर्थापत्तिरित्यर्थः।

५८. दुर्दैवन्यायः

यत्रैकं दोषं परिहरतोऽन्ये बहवो दोषाः समायान्ति, तत्रैवायं दुर्दैवन्यायः प्रवर्तत इति ध्येयम्।

५९. देहलीदीपन्यायः

पश्चादपि क्रियमाणान्यङ्गानि पुरोडाशस्य सन्निहितानि सन्निधानाच्च पुरोडाशस्याप्युपकुर्वन्तीति। प्रदीपवत् यथा प्रासादे कृतो दीपः सन्निधानाद्राजमार्गेप्युपकरोति।

६०. नष्टाश्वदग्धरथन्यायः

यत्र द्वयोर्वणिजोर्द्वाभ्यां रथाभ्यामेकस्मान्नगरान्नगरान्तरं सहगच्छतोरेकस्याश्वो मृतोऽपरस्य रथो दग्धस्तत्र द्वौ वणिजौ मिथो विचार्य सहव्यापाराय सम्भूय शेषयात्रां समापयितुरवशिष्टौ रथाश्वौ संयोज्य कार्यं समारभेते, तत्रैवास्य न्यायस्य प्रवृत्तिरिति भावः।

६१. नहि खदिरगोचरपरशौ पलाशे द्वैधीभावो भवति

नह्यन्यत्र कृतो व्यापारोऽन्यं गोचरयितुं शक्नोति। यथा खदिरं छेत्तुं व्यापारितः परशुर्न पलाशं छेत्तं प्रभवति, तद्वदित्यर्थः।

६२. नहि वरविघाताय कन्योद्वाहः

विषकन्यायां वृतायां यत्र वरस्य घातः सम्भाव्यते तत्र तां नोद्वहेदेवं विवक्षायामस्य प्रवृत्तिः। तथा चानिष्टान्तरपातादिसम्भावनायामभीष्टहेतुरपि वस्तु न वरणीयमित्येवं तन्न्यायतात्पर्यम्। अयमेव न्यायः क्वचिन्नहि वरविघाताय कन्यामुद्वाहयतीति न्यायतया पठ्यते। विदधे विषकन्याश्च सैन्ये पण्यविलासिनीः प्राहिणोत्पुरुषांश्चैव निशासु छद्मघातिनः।

६३. निर्धनमनोरथन्यायः

यत्र दरिद्रो निर्धनो मनोरथं कुरुते घटपरिमाणान् सक्तून् विक्रीय पौनःपुन्येन क्रयविक्रय-व्यापारेण धनसम्पन्नो भविष्यामि, तद्वन्मनोरथमात्रेण न किमपि कार्यं निःसरतीति भावः।

६४. पङ्कप्रक्षालनन्यायः

"धर्मार्थं यस्य वित्तेहातस्यापि न शुभावहा प्रक्षालनाद्धिपङ्कस्य दूरादस्पर्शं वरम्"। क्वचिद्वरं

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तस्य निरीहतेत्यपि पाठः। अतः सांसारिकभोगाकाँक्षयानुष्ठीयमानानां धर्माणामनुष्ठानापेक्षया तेषामननुष्ठानमेव वरम्। यतो हि सांसारिकभोगाकाँक्षया धर्मानुष्ठानावसर अधर्मोऽप्यनिच्छया सम्पद्यते, तन्निवृत्त्यर्थं पुनरपि धर्मोऽनुष्ठीयते, एतादृशं धर्मानुष्ठानं पङ्कप्रक्षालनन्यायमनुसरति।

६५. पङ्ग्वन्धन्यायः

यथा गतिशक्तिरहितस्य पङ्गोर्गतिसाधनाय गतिमतोऽन्धसापेक्षया दृष्टिशक्तिरहितस्य चान्धस्य गतिशक्तिसत्त्वेऽपि स्वाभीष्टदेशगमनं दर्शकमन्तरेण न सम्भवति। तथा च यथा स्वस्वकार्याय तयोरन्योऽन्यापेक्षा तथा क्रियारहितस्य पुरुषस्य सक्रियप्रधानस्यापेक्षा, दृष्टिशक्तिरहितस्य च प्रधानस्य दृष्टिशक्तियुक्तपुरुषस्यापेक्षेत्यत उभाभ्यामन्योऽन्यमपेक्ष्य स्वस्वकार्यं निष्पाद्यत इत्यर्थः।

६६. पञ्जरचालनन्यायः

यथैकपञ्जरवर्तिन एकादशपक्षिणः प्रत्येकं प्रति नियतव्यापाराः सन्तः, सम्भूयैकं पञ्जरं चालयन्ति, एवमेकशरीरवर्त्तिन एकादशप्राणाः प्रत्येकं प्रति नियतवृत्तयः सन्तः सम्भूयैकां प्राणाख्यां वृत्तिं प्रतिलप्स्यन्त इति।

६७. पारिशेष्यन्यायः

प्रसक्तप्रतिषेधे सत्यन्यत्राप्रसङ्गाच्छिष्यमाणे सम्प्रत्ययः पारिशेष इति न्यायेनान्यत्राप्रसङ्गमुक्त्वा शिष्यमाणे सम्प्रत्ययः।

६८. पिष्टपेषणन्यायः

यदि तावच्छ्रुतस्यार्थस्य प्रश्नः कृतस्ततः पिष्टपेषणवत्पुनरुक्तोऽनर्थकः प्रश्नः स्यात्।

६९. पुष्करपलाशन्यायः

आत्मविदोऽसङ्गत्वोपपादनाय श्रुत्योच्यते तद्यथेह पुष्करपलाश आपो न श्लिष्यन्ते, एवं ह्येवंविदि पापं कर्म न श्लिष्यते। तथैव गीतायामप्युक्तं "लिप्यते न स पापेन पद्मपत्रमिवाम्भसा"।

७०. पुष्टलगुडन्यायः

एकतन्त्रकीयमतनिरासाय प्रयुक्तया युक्त्या तत्सदृशमतान्तरनिराकरणं यदा विवक्ष्यते तदास्य प्रवृत्तिः। यथा बहूनां शुनां मध्ये एकस्य शुनः प्रहारार्थं प्रक्षिप्तः पुष्टलगुडस्तं प्रहृत्यान्यानपि शुनः परिहरति।

७१. प्रदीपे प्रदीपं प्रज्वाल्य तमोनाशाय यतमानः

लघोरुपायात्साध्यसिद्धौ भवन्त्यां गुरावुपाये प्रवर्त्तमानस्य तवैवेदं दोषोद्भावनं प्रदीपे प्रदीपं प्रज्वाल्य तमो नाशाय यतमानस्यैव पुंसः।

७२. प्रधानमल्लनिबर्हणन्यायः

यत्र प्रधानमल्ला निगृहीतास्तत्र तदधीनाः सर्वे मल्ला निगृहीता भवन्तीति सांख्यमतनिराकरणानन्तरं सर्वे दार्शनिका निराकृता वेदितव्या इति भगवत्पादैराचार्यशङ्करैः स्वीयभाष्ये पुनः पुनरिदमुद्घोषितम्।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

७३. बकबन्धविधिप्रयासन्यायः (द्राविडप्राणायामन्यायः)

बकं जिघृक्षुः कश्चित्पुरुषः सूर्यरश्मिसन्तप्ते बकशिरसि नवनीतं निदधाति, ततो विलीनेन नवनीतेन बकनेत्रयोः पूर्णतयान्धीभूतं बकं जिघृक्षतीति बकबन्धन्यायो द्राविडप्राणायामन्यायसमः।

७४. बध्यघातकन्यायः (अहिनकुलादिन्यायः; मूषकमार्जारन्यायः)

यथाऽऽखुमूषितामहिमूषितां च भूमिमवलोक्य मार्जाराभावो नकुलाभावश्चावगम्यते, तद्वत् "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यत्र सत्यादेः पदाद्ब्रह्मणि सत्यत्वादिपदार्थमवगम्य तेन पश्चाद्विरोधाद्विरोधिनोऽनृतादेरभावं जानातीत्यर्थः।

७५. बीजाङ्कुरन्यायः

नच कर्मान्तरेण शरीरं सम्भवति, नच शरीरमन्तरेण कर्म सम्भवतीत्यितरेतराश्रयत्वप्रसङ्गः, अनादित्वे तु बीजाङ्कुरन्यायेनोपपत्तेर्न कश्चिद्दोषो भवति।

७६. ब्राह्मणपरिव्राजकन्यायः (तक्रकौण्डिन्यन्यायः)

ब्राह्मणा भोजयितव्याः परिव्राजकाश्च। ब्राह्मणेभ्यः परिव्राजकेषु वैशिष्ट्यावद्योतनाय ब्राह्मणेभ्यो दधि दीयतां तक्र परिव्राजकेभ्य इत्यादौ ब्राह्मणदृष्ट्या परिव्राजकेभ्यो दधिदीयतां तेभ्यो तक्रमपि दीयताम्। तथैव कौण्डिन्याय ब्राह्मणाय दधि दीयते तक्रमपि दीयत इत्यर्थः।

७७. ब्राह्मणवसिष्ठन्यायः

वैदिकानां लौकिकत्वेऽपि प्राधान्यख्यापनार्थं पृथग्ग्रहणं, यथा ब्राह्मणा आगता वसिष्ठोप्यागत इति। अत्र वसिष्ठागमनस्य वैशिष्ट्यं प्रतिभातीति भावः।

७८. ब्राह्मणश्रमणन्यायः

ब्राह्मणाः पूज्याः सन्ति, ततोऽपि ब्राह्मणत्वविशिष्टसंन्यासी श्रेष्ठ इत्यर्थावद्योतनाय न्यायोऽयं प्रवर्तते इति भावः।

७९. भक्षितोऽपि लशुने न शान्तो व्याधिः

यद्यपि लशुनभक्षणं शास्त्रनिषिद्धं तथापि व्याधिनाशनार्थं तद्भक्ष्यते, तथासत्यपि व्याधिर्न शान्त इति, यत्र निषिद्धाचरणेऽपि न लौकिकं सुखं लब्धं, तत्रैवायं न्यायः प्रवर्तते इत्यर्थः।

८०. भविष्यद्वृत्तिन्यायः

दृष्टश्च लोके भाविनीं वृत्तिमाश्रित्य शब्दप्रयोगो यथा तण्डुलं पचतीति प्रयोक्तव्य ओदनं पचतीति, शास्त्रे च "परिव्राजकः सर्वभूताभयदक्षिणां दद्यात्" इत्यादिस्तथेहेति केचिद् ब्रह्मभावी पुरुषो ब्राह्मण इति व्याचक्षते।

८१. भिक्षुपादप्रसारणन्यायः

यथा कश्चिद्भिक्षुर्यथेष्टभोजनाच्छादनवासगृहादिलाभार्थं कस्यचिद्धनिनो गृहे प्रविश्य युगपत्सर्वाभीष्टलाभं कामयमानः प्रथमं धनिगृहे मे पादप्रसारणमस्तु पश्चादनेन परिचयमुत्पाद्य सर्वमभीष्टं सम्पादयिष्यामीति धिया स्वल्पामपि भिक्षां बहुमन्यमानः पश्चात्क्रमेण स्वाभीष्टं सम्पादयत्येवं यत्र विवक्षा तत्रास्य प्रवृत्तिः।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

८२. मण्डूकप्लुतन्यायः

यथा मण्डूका उत्प्लुत्योत्प्लुत्य गच्छन्ति, तथैव सूत्राणां पदानुवृत्तिर्यत्र व्यवहितेषूत्तरसूत्रेषु गच्छति, तत्रैवास्य न्यायस्य प्रवृत्तिरिति बोध्यम् ।

८३. मध्यदीपिकान्यायः

यत्र प्रकोष्ठस्य मध्यभागे प्रदीपः प्रज्वलति तेन सम्पूर्णप्रकोष्ठे दीपप्रकाशः प्रसरति, तथैव यस्य पुरुषस्य मध्यभागेऽवस्थानेन सर्वेषां श्रेयः कामुकानां लाभः सम्पद्यते, तत्रैवास्य न्यायस्य प्रवर्त्तनमित्यर्थः ।

८४. मानाधीना मेयसिद्धिः

मानाधीना मेयसिद्धिरिति न्यायेन प्रमाणस्य प्रथममुद्देशे तदनुसारेण लक्षणस्य कथनीयतया प्रथमोद्दिष्टस्य प्रथमं लक्षणं कथ्यते । मानाधीना मेयसिद्धिर्मानसिद्धिश्च लक्षणात्तत्त्वाध्यक्षादि मानेषु गीर्वाणैरपि दुर्भणम् । मानेन मेयावगतिश्च युक्ता धर्मस्य जाड्याद्विधिनिष्ठकाण्डे । मेयेन मानावगतिस्तु युक्ता वेदान्तवाक्येष्वजडं हि मेयम् ।

८५. मुञ्जादिषीकोद्धरणन्यायः

यथा मुञ्जादिषीका समुद्ध्रियते । तथैवान्नमयादिभ्यः पञ्चकोशेभ्यो वेदान्तविचारेण स्वमात्मानमुद्धरति मुमुक्षुस्तत्रैवास्य न्यायस्य प्रवृत्तिरिति तात्पर्यम् ।

८६. याचितमण्डनन्यायः

देवदत्तः गामानयेत्यादिप्रयोजकवृद्धवाक्यं श्रुत्वा तदनन्तरं प्रयोज्यवृद्धेन सास्नादिमन्तमर्थमानीयमानमालोक्यायमेतद्विषयकैतत् क्रियागोचरकार्यताज्ञानवांस्तद्विषयकचेष्टावत्त्वात्तद्विषयकप्रवृत्तिमत्त्वाद्वा मद्वदिति प्रयोज्यवृद्धस्य ज्ञानमनुमिमीतेऽर्यमिति प्रयोज्यवृद्ध इत्यर्थः । एतच्छब्देन गवादिरुच्यते, द्वितीयेन तेनानयनादिक्रिया तथा च गोविषयकानयनादिक्रियागोचरकार्यताज्ञानवानित्यर्थः । क्रियाजनकप्रवृत्तेः सविषयत्वात्तज्जन्यचेष्टाया अपि याचितमण्डनन्यायेन सविषयत्वम् । नहि याचितं मण्डनं याचितुः सदा मण्डनाय भवितुमर्हतीति ।

८७. लोष्टप्रस्तरन्यायः

यथा प्रस्तरं भेत्तुं तत्रापातिता लोष्ठा विध्वंसन्ते, तद्वदेव मुख्यं प्राणं नाशयितुं प्रवृत्ता असुराः स्वयमेव विनश्यन्ति । तथैव बृहदारण्यकोपनिषदि प्राणस्य वैशिष्ट्योपपादनायोद्गीथविद्याया निरूपितम् ।

८८. वदतोव्याघातन्यायः

मम मुखे जिह्वा नास्ति, मम माता वन्ध्येति प्रयोगे वदतोव्याघातदोषः प्रवर्तते, नहि जिह्वाभावे केनापि किञ्चिद्वक्तुं शक्येत, नापि स्वमातुर्वन्ध्यात्वे स्वजन्म कथमपि सम्भावयितुं युक्तमिति भावः ।

८९. वरमद्यकपोतः श्वो मयूरात्

यत्र विलम्बेन विशिष्टफलं परित्यज्य सद्योजातमचिरं लभमानं स्वल्पीयोऽपि फलमभीष्टं, तत्रैवास्य प्रवृत्तिरिति बोध्यम् ।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

९० वरं सांशयिकान्निष्कादसांशयिकः कार्षापणः

यत्र सन्दिग्धस्य भूयसो लाभस्य परित्यागो निश्चितोऽल्पीयानपि लाभोऽभीष्टस्तत्रायं न्यायः प्रवर्तनोय इति ध्येयम् ।

९१. विषकृमिन्यायः

"विप्र; अस्मिन्नगरे महान्कथय कस्तालद्रुमाणां गणः; को दाता; रजको ददाति वसनं प्रातर्गृहीत्वा निशि । को दक्षः, परदारवित्तहरणे सर्वोऽपि दक्षो जनः । कस्माज्जीवसि हे सखे; विषकृमिन्यायेन जीवाम्यहम्" ॥

९२. विषवृक्षन्यायः

विषवृक्षोऽपि संवर्ध्य स्वयंच्छेत्तुमसांप्रतम्—यथा एते सर्वे तर्का अस्माभिरेव तर्कपद्व्यामभिषिक्तास्ततो न प्रबन्धेन निरस्यन्ते ।

९३. वीचितरङ्गन्यायः

यथा जलेषु लोष्टादिकं परिक्षिप्यते यदा, तदा तत्र वीचयः चतुर्दिग्वर्तिन्यः सञ्जायन्ते, ताश्च चतसृषु दिक्षु प्रसरन्ति, तद्वदेव ताल्वाद्यभिघातेन सञ्जाताः शब्दाश्चतुर्दिग्वर्तिनश्चतुर्दिक्षु प्रसरन्ति । इत्थं सर्वत्र प्रसरन्तः शब्दाः कर्णविवरवर्तिनि नभसि जायमाना अस्मदादिभिः श्रूयन्त इति वैशेषिका वदन्तीति भावः ।

९४. वृद्धकुमारीवाक्यन्यायः

तद्यथा वृद्धकुमारीन्द्रेणोक्ता वरं वृणीष्वेति । सा वरमवृणीत पुत्रा मे बहुक्षीरघृतमोदनं कांस्यपात्र्यां भुञ्जीरन्निति । न च तस्याः पतिर्भवति कुतः पुत्राः कुतो गावः कुतो धान्यम् । तत्रैकेन वाक्येन पतिः पुत्रा गावो धान्यमिति सर्वं संगृहीतं भवति ।

९५. वृद्धब्राह्मणवरन्यायः

स्वपौत्रं राजसिंहासनास्थितिमीक्षितुमिच्छामि । यत्र कश्चिद्वृद्धो ब्राह्मणो दरिद्रः सन्ततिहीनस्तपस्तप्त्वा देवात् स्वाभीष्ठं दुर्लभं वरं वृणीते तत्रायं न्यायः प्रवर्तते । एतेन पुत्रं तत्पुत्रं धनं राजसिंहासनादिकं सर्वमभिमतं दुर्लभं वस्तु तेनावृतेति भावः ।

९६. वृद्धिमिष्टवतो मूलमपि ते नष्टम्

वृद्धिमिष्टवतो मूलमपि विनष्टमिति न्यायः । वृद्धिधनप्रयोगेऽधमर्णात्प्राप्यांशभेदलाभस्तामिष्टवत उत्तमर्णस्याधमर्णादौ स्याद्यथा मूलं नश्यत्येवं यत्राभीष्टान्तरसम्पादनाय प्रयतमानस्य मूलं नश्यति -तत्रास्य प्रवृत्तिः ।

९७. शाकटिकन्यायः

ननु प्रपञ्चस्य मिथ्यात्वमभ्युपेयते नासत्वमिति चेत्तदेतत्सोऽयं शिरच्छेदेऽपि शतं न ददामि विंशतिपञ्चकं तु प्रयच्छामि शाकटिकवृत्तान्तमनुहरेन्मिथ्यात्वासत्वयोः पर्यायत्वादित्यलमतिप्रपञ्चेन ।

९८. शाखाचन्द्रन्यायः

यथा शाखातः सुदूरस्थमपि चन्द्रमसं दर्शयितुं पूर्वं शाखां दर्शयति, ततः शाखादर्शनानन्तरं सुखेन चन्द्रो दृश्यते, तथैवान्नमयादिषु कोषेषु क्रमशो यदाऽऽनन्दमयो दृश्यते तदाऽऽनन्दमयस्य कारणभूतः स्वात्माऽनायासेनोपलभ्यत इति भावः ।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

९९. भृङ्गग्राहिकान्यायः

शास्त्रं चात्र प्रवृत्तं सत्प्रवृत्तिं कुरुते द्विधा। विधानेन लोकदृष्टिसमाश्रयात्। भृङ्गग्राहिकया यद्धि बोधयेत्तद्विधायकम्। यथा लोके करे तेऽस्ति फलमित्यादि भाषणम्। तत्र विधायकशास्त्रस्य लक्षणं लौकिकमुदाहरणं चाह भृङ्गेति, भृङ्गस्य ग्रहणं यस्यां क्रियायां सा भृङ्गग्राहिका"संज्ञायामिति" ण्वुल्। यथा गोव्रज, एका मदीया गौरिति गोपः पृष्टः भृङ्गं गृहीत्वा गां प्रदर्शयेत्तथा बोधकं शास्त्रं विधायकमुच्यते।

१००. श्येनकपोतीयन्यायः

श्येनकपोतयोरिव श्येनकपोतीयो दुर्योगः। यथा कपोतोऽतर्कितमागतेन श्येनेन गृहीतस्तथाकस्मिको यो दुर्योगःस एवमुच्यते।

१०१. श्वश्रूनिर्गच्छोक्तिन्यायः

यथा भिक्षामटते माणवकाय भिक्षां प्रत्याचक्षाणामात्मनः स्नुषां भर्त्सयित्वा श्वश्रूः पुनस्तमाहूय समागते तस्मिन्नास्ति भिक्षा निर्गच्छेति व्याचष्टे।

१०२. सिकतातैलन्यायः

असम्भवार्थप्रतिपादनावसरेऽस्य न्यायस्य प्रवृत्तिः। नहि सिकताभ्यस्तैलं कश्चिच्छक्तोऽपि पुरुषो निष्काषयितुं शक्नोति, तस्यासम्भवित्वात्, तथैव परमात्मज्ञानमन्तरेण कोऽपि पुरुषो दुःखात्मकं संसाराब्धिं तर्त्तुं न शक्नोतीति भावः।

१०३. सिंहावलोकनन्यायः

यथा सिंहोऽग्रे गच्छन् मुहुर्मुहुः पृष्ठतः पश्यति, तथैव विद्वान् शास्त्रविचारकुशलः शास्त्रार्थं निर्णेतुं प्रवर्तमानः पौनः पुन्येन पूर्वोक्तमपि पदार्थमनुसन्धत्ते, तत्रैवास्य न्यायस्य प्रवृत्तिरिति ध्येयम्।

१०४. सूचीकटाहन्यायः

कश्चित् पूर्वमयस्कारं कटाहनिर्माणायावोचत्। ततःपरं तमेव कश्चित् सूचीनिर्माणायाचकथत्। तथैवाधिकायाससाध्यं तयोः कटाहापेक्षयाऽल्पायाससाध्यां सूचिं पूर्वं निर्म्मिमीते, कटाहं च पश्चात्। तथैवाधिकायाससाध्यं विलम्बेन सम्पाद्यमानं कार्यमवरुध्य पूर्वमल्पायाससाध्यमचिरेण सम्पाद्यमानं कार्यं करुते तद्विपरीतं च कार्यं पश्चात् कुरुते। तत्रायं न्यायः प्रवर्तत इत्यथः।

१०५. सूत्रबद्धशकुनिन्यायः

"स यथा शकुनिः सूत्रेण प्रबद्धो दिशं दिशं पतित्वान्यत्रायतनमलब्ध्वा बन्धनमेवोपाश्रयते। एवमेव खलु सोम्य तन्मनो दिशं दिशं पतित्वान्यत्रायतनमलब्ध्वा प्राणमेवोपाश्रयते, प्राणबन्धनं हि सोम्य मन" इति।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

१०६. स्थालीपुलाकन्यायः

लिङ्गस्य पूर्ववत्त्वाच्चोदनाशब्दः सामान्यादेकेनापि निरूप्यते। यथा स्थालीपुलाकेन। एतन्न्याय-पूर्वकं लिङ्गमत्रापि दृश्यमानं तुल्यन्यायानां सर्वेषां धर्मवत्तां ज्ञापयति। यथा स्थाल्यां तुल्यपाकानां पुलाकानामेकमुपमृद्यान्येषामपि सिद्धतां जानाति।

१०७. स्थूणानिखननन्यायः

स्थूणादार्ढ्याय यथा समारोपितां स्थूणां पुनः पुनः चालयित्वा द्रढयति, तद्वत् स्वसिद्धान्तं द्रढयितुं मुहुर्मुहुः प्रतिक्षिप्य समाधत्ते। तत्रास्य न्यायस्य प्रवृत्तिरित्यवधेयम्।

१०८. स्वामिभृत्यन्यायः

यथा स्वामिने स्वात्मानं समर्पयति भृत्यः, स्वामी च तादृशं भृत्यं दयया पालयति, तद्वत् भगवच्चरणाब्जयोः स्वात्मानं समर्पयन्तं भक्तं भगवानपि सर्वात्मना रक्षयति। तथा चोक्तं "तेषां नित्याभियुक्तानां योगक्षेमं वहामी" ति सततमवधेयम्।

इति सव्याख्याष्टोत्तरशतन्यायमाला समाप्ता।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection.